THE HARIBANSA,

AN EPIC POEM,

WRITTEN BY

THE CELEBRATED VEDA VYA'SA RISHI.

EDITED AND CAREFULLY COLLATED WITH THE BEST MANUSCRIPTS IN THE LIBRARY OF THE SANSCRITA COLLEGE OF CALCUTTA, ...YMA'ICHANDRA SIROMANI, PANDIT OF THE COLLEGE, AND RA'MAGOVIND, PANDIT TO THE ASIATIC SOCIETY,

AND

RA'MAHARI NYAYA PANCHA'NAN;

AND

PUBLISHED BY THE ASIATIC SOCIETY OF BENGAL.

Calcutta:

PRINTED AT THE BAPTIST MISSION PRESS, CIRCULAR ROAD.

1839.

हरिवंशः

श्रीमन्महर्षिवेदव्यासविरचितखिलसंज्ञको हरिवंशः

गौडदेशीयाया आसियाटिकाख्यसभाया अनुमत्यनुसारेण

कलिकाताख्यराजधान्यां सम्मुद्रायन्त्रालये

मुद्रितः

तपाठशालाख्यपण्डितेन श्रीनिमाइचन्द्रशिरोमणिना आसियाटिकाख्यसभाख्यपण्डितेन श्रीरामगोविन्दतर्करत्नेन
श्रीरामहरिन्यायपञ्चाननेनापि संशोधितश्च

शकाब्दाः १७६१

ख्रि० १८३९

श्रीमहाभारतं

॥ अथ खिलहरिवंशपर्व्व ॥

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं। देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्।

द्वैपायनौष्ठपुटनिःसृतमप्रमेयं पुण्यं पवित्रमथ पापहरं शिवञ्च। यो भारतं समधिगच्छति वाच्यमानं किं तस्य पुष्करजलैरभिषेचनेन।

अयं पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः। यस्यास्यकमलगलितं वाङ्मयममृतं जगत् पिबति।

यो गोशतं कनकशृङ्गमयं ददाति विप्राय वेदविदुषे च बहुश्रुताय। पुण्यां च भारतकथां शृणुयाच्च नित्यं तुल्यं फलं भवति तस्य च तस्य चैव।

शताश्वमेधस्य च यत् पुण्यं चतुःसहस्रस्य शतक्रतोश्च। भवेदनन्तं हरिवंशदानात् प्रकीर्त्तितं व्यासमहर्षिणा च।

यद्वाजपेयेन तु राजसूयात् दृष्टं फलं हस्तिरथेन चान्यत्। तल्लभ्यते व्यासवचः प्रमाणं गीतञ्च वाल्मीकिमहर्षिणा च। ५

यो हरिवंशं शृणोति यथाविधिना महातपाः सपदि। स याति हरेः पदकमलं कमलं यथा मधुरो लुब्धः।

पितामहाद्यं प्रवदन्ति षष्ठं महर्षिमव्यग्रविभूतियुक्तं। नारायणस्यांशजमेकपुत्त्रं द्वैपायनं वेदमहानिधानं।

आद्यं पुमांसमीशानं पुरुहूतं पुरुष्टुतं। ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनं।

असच्च सदचैव यद्विश्वं सदसत्परं। परावराणां स्रष्टारं पुराणं परमव्ययं।

मङ्गल्यं मङ्गलं विष्णुं वरेण्यमनघं शुचिं। नमस्कृत्य हृषीकेशं चराचरगुरुं हरिं। १०

नैमिषारण्यकुलपतिः शौनकस्तु महामुनिः। सौतिं पप्रच्छ धर्म्मात्मा सर्व्वशास्त्रविशारदं।

॥ शौनक उवाच ॥ सौते सुमहदाख्यानं भवता परिकीर्त्तितं। भारतानां च सर्व्वेषां पार्थिवानां तथैव च।

देवानां दानवानाञ्च गन्धर्व्वोरगरक्षसां। दैत्यानामथ सिद्धानां गुह्यकानां तथैव च।

अत्यद्भुतानि कर्म्माणि विक्रमा धर्म्मनिश्चयाः। विचित्राश्च कथायोगा जन्म चाग्र्यमनुत्तमं।

कथितं भवता पुण्यं पुराणं श्लक्ष्णया गिरा। मनःकर्णसुखं सौते प्रीणात्यमृतसम्मितं। १५

तत्र जन्म कुरूणां वै त्वयोक्तं लोमहर्षणे। न तु वृष्ण्यन्धकानाञ्च तद्भवान्वक्तुमर्हति।

॥ सौतिरुवाच ॥ जनमेजयेन यत् पृष्टः शिष्यो व्यासस्य धर्म्मवित्। तत्तेऽहं सम्प्रवक्ष्यामि वृष्णीनां वंशमादितः।

श्रुत्वेतिहासं कार्त्स्न्येन भारतानां स भारतः। जनमेजयो महाप्राज्ञो वैशम्पायनमब्रवीत्।

॥ जनमेजय उवाच ॥ महाभारतमाख्यानं बह्वर्थं श्रुतिविस्तरं । कथितं भवता पूर्वं विस्तरेण मया श्रुतं ।
तत्र शूराः समाख्याता बहवः पुरुषर्षभाः । नामभिः कर्म्मभिश्चैव वृष्ण्यन्धकमहारथाः । १०
तेषां कर्म्मावदातानि त्वयोक्तानि द्विजोत्तम । तत्र तत्र समासेन विस्तरेणैव मे प्रभो ।
न च मे तृप्तिरस्तीह कथ्यमाने पुरातने । एकश्चैव मतो राशिर्वृष्णयः पाण्डवास्तथा ।
भवांश्च वंशकुशलस्तेषां प्रत्यक्षदर्शिवान् । कथयस्व कुलं तेषां विस्तरेण तपोधन ।
यस्य यस्यान्वये ये ये तांस्तानिच्छामि वेदितुं । स त्वं सर्व्वमशेषेण कथयस्व महामुने ।
तेषां पूर्व्वविसृष्टिञ्च विचिन्त्येमां प्रजापतेः । १५
॥ सौतिरुवाच ॥ सत्कृत्य परिपृष्टस्तु स महात्मा महातपाः । विस्तरेणानुपूर्व्व्या च कथयामास तां कथां ।
॥ वैशम्पायन उवाच ॥ शृणु राजन् कथां दिव्यां पुण्यां पापप्रमोचनीं । कथ्यमानां मया चित्रां बह्वर्थां श्रुतिसम्मितां ।
यश्चेमां धारयेत्तात शृणुयाद्वाऽप्यभीक्ष्णशः । स्ववंशधारणं कृत्वा स्वर्गलोके महीयते ।
अव्यक्तं कारणं यत्तन्नित्यं सदसदात्मकं । प्रधानं पुरुषं तस्मान्निर्ममे विश्वमीश्वरः ।
तं वै विद्धि महाराज ब्रह्माणममितौजसं । स्रष्टारं सर्व्वभूतानां नारायणपरायणं । २०
अहङ्कारस्तु महतस्तस्माद्भूतानि जज्ञिरे । भूतभेदाश्च भूतेभ्य इति सर्गः सनातनः ।
विस्तरावयवञ्चैव यथाप्रज्ञं यथाश्रुतं । कीर्त्त्यमानं शृणु मया पूर्व्वेषां कीर्त्तिवर्द्धनं ।
धन्यं यशस्यं शत्रुघ्नं स्वर्ग्यमायुःप्रवर्द्धनं । कीर्त्तनं स्थिरकीर्त्तीनां सर्व्वेषां पुण्यकर्म्मणां ।
ततस्त्वमपि कौरव्य समग्रं शृणु चैव शुचिः । आपवास्त्वादत्तानि भूतसर्गमनुत्तमं ।
ततः स्वयम्भूर्भगवान् सिसृक्षुर्विविधाः प्रजाः । अप एव ससर्ज्जादौ तासु वीजमवासृजत् ।
आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्व्वं तेन नारायणः स्मृतः ।
हिरण्यवर्णमभवत्तदण्डमुदकेशयं । तत्र जज्ञे स्वयं ब्रह्मा स्वयम्भूरिति नः श्रुतं ।
हिरण्यगर्भो भगवानुषित्वा परिवत्सरं । तदण्डमकरोद्द्वैधं दिवं भुवमथापि च ।
तयोः शकलयोर्मध्ये आकाशमसृजत्प्रभुः । अप्सु पारिप्लवां पृथ्वीं दिशश्च दशधा दधे ।
तत्र कालं मनो वाचं कामं क्रोधमथो रतिं । ससर्ज्ज सृष्टिं तद्रूपां स्रष्टुमिच्छन् प्रजापतीन् । ३०
मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुं । वसिष्ठञ्च महातेजाः सोऽसृजत्सप्त मानसान् ।
सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः । नारायणात्मकानां वै सप्तानां ब्रह्मजन्मनां ।
ततोऽसृजत्पुनर्ब्रह्मा रुद्रं रोषात्मसम्भवं । सनत्कुमारञ्च विभुं पूर्व्वेषामपि पूर्व्वजं ।
सप्तैते जनयन्ति स्म प्रजा रुद्रश्च भारत । स्कन्दः सनत्कुमारश्च तेजः संक्षिप्य तिष्ठतः ।
तेषां सप्त महावंशा दिव्या देवगणान्विताः । क्रियावन्तः प्रजावन्तो महर्षिभिरलङ्कृताः । ३५
विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च । वयांसि च ससर्ज्जादौ पर्ज्जन्यञ्च ससर्ज्ज ह ।
ऋचो यजूंषि सामानि निर्म्ममे यज्ञसिद्धये । साध्यास्तैरयजन्देवा नित्येवमनुशुश्रुम ।
उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे । आपवस्य प्रजासर्गं सृजतो हि प्रजापतेः

सृज्यमानाः प्रजा नैव विवर्द्धन्ते यदा तदा । द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् ।
अर्द्धेन नारी तस्यां स ससृजे विविधाः प्रजाः । दिवञ्च पृथिवीञ्चैव महिम्ना व्याप्य तिष्ठतः ।
विराजमसृजद्विष्णुः सोऽसृजत्पुरुषं विराट् । पुरुषं तं मनुं विद्धि तद्वै मन्वन्तरं स्मृतं ।
द्वितीयं मानसस्यैवं मनोरन्तरमुच्यते । स वैराजः प्रजासर्गं ससर्ज्ज पुरुषः प्रभुः ।
नारायणविसर्गः स प्रजास्तस्याप्ययोनिजाः । आयुष्मान् कीर्त्तिमान्धन्यः प्रजावांश्च भवेन्नरः ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि आदिसर्गकथने प्रथमोऽध्यायः ॥ १ ॥
॥ वैशम्पायन उवाच ॥ स सृष्ट्वा तु प्रजास्त्वेवमापवो वै प्रजापतिः । लेभे वै पुरुषः पत्नीं शतरूपामयोनिजां ।
आपवस्य महिम्ना तु दिवमावृत्य तिष्ठतः । धर्म्मेणैव महाराज शतरूपा व्यजायत ।
सा तु वर्षायुतं तप्त्वा तपः परमदुश्चरं । भर्त्तारं दीप्ततपसं पुरुषं प्रत्यपद्यत ।
स वै स्वायम्भुवस्तात पुरुषो मनुरुच्यते । तस्यैकसप्ततियुगं मन्वन्तरमिहोच्यते ।
वैराजात्पुरुषाद्वीरं शतरूपा व्यजायत । प्रियव्रतोत्तानपादौ वीरात्काम्या व्यजायत ।
काम्या नाम महाबाहो कर्द्दमस्य प्रजापतेः । कन्यापुत्रास्तु चत्वारः सम्राट् कुक्षिर्विराट् प्रभुः ।
प्रियव्रतं समासाद्य पतिं सा ऽजनयत् सुतान् । उत्तानपादं जग्राह पुत्त्रमत्रिः प्रजापतिः ।
उत्तानपादाच्चतुरः सूनृता सुषुवे सुतान् । धर्म्मस्य कन्या सुश्रोणी सूनृता नाम विश्रुता ।
उत्पन्ना वाजिमेधेन ध्रुवस्य जननी शुभा । ध्रुवञ्च कीर्त्तिमन्तञ्च आयुष्मन्तं वसुन्तथा ।
उत्तानपादोऽजनयत्सूनृतायां प्रजापतिः । ध्रुवो वर्षसहस्राणि त्रीणि दिव्यानि भारत ।
तपस्तेपे महाराज प्रार्थयन् सुमहद्यशः । तस्मै ब्रह्मा ददौ प्रीतः स्थानमात्मसमं प्रभुः ।
अचलञ्चैव पुरतः सप्तर्षीणां प्रजापतिः । तस्याभिमानमृद्धिञ्च महिमानं निरीक्ष्य च ।
देवासुराणामाचार्य्यः श्लोकमप्युशना जगौ । अहोऽस्य तपसो वीर्य्यमहो श्रुतमहोऽद्भुतं ।
यमद्य पुरतः कृत्वा ध्रुवं सप्तर्षयः स्थिताः । तस्मात् श्लिष्टिञ्च भव्यञ्च ध्रुवाच्छम्भुर्व्यजायत ।
श्लिष्टेराधत्त सुच्छाया पञ्च पुत्त्रानकल्मषान् । रिपुं रिपुञ्जयं विप्रं वृकलं वृकतेजसं ।
रिपोराधत्त बृहती चाक्षुषं सर्व्वतेजसं । अजीजनत् पुष्करिण्यां वीरण्यां चाक्षुषो मनुं ।
प्रजापतेरात्मजायामरण्यस्य महात्मनः । मनोरजायन्त दश नड्वलायां महौजसः ।
कन्यायां भरतश्रेष्ठ वैराजस्य प्रजापतेः । ऊरुः पूरुः शतद्युम्नस्तपस्वी सत्यवाक्कविः ।
अग्निष्टुदतिरात्रश्च सुद्युम्नश्चेत्यमी नव । अभिमन्युश्च दशमो नड्वलायाः सुतास्मृताः ।
ऊरोरजनयत् पुत्त्रान् षडाग्नेयी महाप्रभान् । अङ्गं सुमनसं स्वातिं क्रतुमङ्गिरसं गयं ।
अङ्गः सुनीथकन्यायां वेनमेकं व्यजायत । अपचारेण वेनस्य प्रकोपः सुमहानभूत् ।
प्रजार्थमृषयो ऽथास्य ममन्थुर्दक्षिणं करं । वेनस्य पाणौ मथिते सम्बभूव महानृषिः ।
तं दृष्ट्वा मुनयः प्राहुरेष वै मुदिताः प्रजाः । करिष्यति महातेजा यशश्च प्राप्स्यते महत् ।
स धन्वी कवची जातः कराज्ज्वलनसन्निभः । पृथुर्वैन्यस्तदा चेमां ररक्ष क्षत्रपूर्व्वजः ।

राजसूयाभिषिक्तानामाद्यः स वसुधाधिपः । तस्माच्चैव समुत्पन्नौ विपुलौ सूतमागधौ ।
तेनेयं गौर्महाराज दुग्धा सस्यानि भारत । प्रजानां वृत्तिकामेन देवैः सर्षिगणैः सह ।
पितृभिर्दानवैश्चैव गन्धर्व्वैः साप्सरोगणैः । सर्पैः पुण्यजनैश्चैव वीरुद्भिः पर्व्वतैस्तथा । ८०
तेषु तेषु तु पात्रेषु दुह्यमाना वसुन्धरा । प्रादाद्यथेप्सितं क्षीरं तेन प्राणानधारयन् ।
पृथुपुत्रौ तु धर्म्मज्ञौ जज्ञातेऽन्तर्द्धिपालिनौ । शिखण्डिनी हविर्द्धानमन्तर्द्धानाद्व्यजायत ।
हविर्द्धानात् षडाग्नेयी धिषणाऽजनयत्सुतान् । प्राचीनवर्हिषं शुक्रं गयं कृष्णं व्रजाजिनौ ।
प्राचीनवर्हिर्भगवान् महानासीत्प्रजापतिः । हविर्द्धानान्महाराज येन संवर्द्धिताः प्रजाः ।
प्राचीनाग्राः कुशास्तस्य पृथिव्यां जनमेजय । प्राचीनवर्हिर्भगवान् पृथिवीतलचारिणः । ८५
समुद्रतनयायान्तु कृतदारोऽभवत्प्रभुः । महतस्तपसः पारे सवर्णायां महीपतिः ।
सवर्णाऽधत्त सामुद्री दश प्राचीनवर्हिषः । सर्व्वान् प्रचेतसो नाम धनुर्व्वेदस्य पारगान् ।
अपृथग्धर्म्मचरणास्तेऽतप्यन्त महत्तपः । दशवर्षसहस्राणि समुद्रसलिलेशयाः ।
तपश्चरत्सु पृथिवीं प्रचेतःसु महीरुहाः । अरक्षमाणामावव्रुर्बभूवाथ प्रजाक्षयः ।
प्रत्याहृताः प्रजाः सर्व्वाश्चाक्षुषस्यान्तरे मनोः । नाशकन्मारुतो वातुं वृतं खमभवद्द्रुमैः । ९०
दशवर्षसहस्राणि न शेकुश्चेष्टितुं प्रजाः । तदुपश्रुत्य तपसा युक्ताः सर्व्वे प्रचेतसः ।
मुखेभ्यो वायुमग्निञ्च ससृजुर्जातमन्यवः । उन्मूलानथ तान् कृत्वा वृक्षान् वायुरशोषयत् ।
तानग्निरदहद्घोर एवमासीद्द्रुमक्षयः । द्रुमक्षयमथो बुद्ध्वा किञ्चिच्छिष्टेषु शाखिषु ।
उपगम्याब्रवीदेतानथ सोमः प्रजापतीन् । कोपं यच्छत राजानः सर्व्वे प्राचीनवर्हिषः ।
वृक्षशून्या कृता पृथ्वी शाम्येतामग्निमारुतौ । रत्नभूता च कन्येयं वृक्षाणां वरवर्णिनी । ९५
भविष्यं जानता तत्त्वं धृता गर्भेण वै मया । मारिषा नाम कन्येयं वृक्षाणामिति निर्म्मिता ।
भार्य्या वोऽस्तु महाभागाः सोमवंशविवर्द्धिनी । युष्माकं तेजसोऽर्द्धेन मम चार्द्धेन तेजसः ।
अस्यामुत्पत्स्यते पुत्रो दक्षो नाम प्रजापतिः । स इमां दग्धभूयिष्ठां युष्मत्तेजोमयेन वै ।
अग्निनाऽग्निसमो भूत्वा प्रजाः संवर्द्धयिष्यति । ततः सोमस्य वचनाज्जगृहुस्ते प्रचेतसः ।
संहृत्य कोपं वृक्षेभ्यः पत्नीं धर्म्मेण मारिषां । मारिषायां ततस्ते तु मनसा गर्भमादधुः । १००
दशभ्यस्तु प्रचेतोभ्यो मारिषायां प्रजापतिः । दक्षो जज्ञे महातेजाः सोमस्यांशेन भारत ।
पुत्रानुत्पादयामास सोमवंशविवर्द्धनान् । अचरांश्च चरांश्चैव द्विपदोऽथ चतुष्पदः ।
स सृष्ट्वा मनसा दक्षः पश्चादप्यसृजत् स्त्रियः । ददौ स दश धर्म्माय कश्यपाय त्रयोदश ।
शिष्टाः सोमाय राज्ञेऽथ नक्षत्राख्या ददौ प्रभुः । तासु देवाः खगा गावो नागा दितिजदानवाः ।
गन्धर्व्वाप्सरसश्चैव जज्ञिरेऽन्याश्च जातयः । ततः प्रभृति राजेन्द्र प्रजा मैथुनसम्भवाः । १०५
सङ्कल्पाद्दर्शनात् स्पर्शात्पूर्व्वेषां प्रोच्यते प्रजाः ।

॥ जनमेजय उवाच ॥ देवानां दानवानाञ्च गन्धर्व्वोरगरक्षसां । सम्भवः कथितः पूर्व्वं दक्षस्य च महात्मनः ।

अङ्गुष्ठाद्ब्रह्मणो जातो दक्षः प्रोक्तस्त्वयाऽनघ । वामाङ्गुष्ठात्तथा चैव तस्य पत्नी व्यजायत ।
कथं प्राचेतसत्वं स पुनर्लेभे महातपाः । एतन्मे संशयं विप्र सम्यगाख्यातुमर्हसि ।
दौहित्रश्चैव सोमस्य कथं श्वशुरतां गतः । ११०
॥ वैशम्पायन उवाच ॥ उत्पत्तिश्च निरोधश्च नित्यौ भूतेषु पार्थिव । ऋषयोऽत्र न मुह्यन्ति विद्वांसश्चैव ये जनाः ।
युगे युगे भवन्त्येते सर्व्वे दक्षादयो नृपाः । पुनश्चैव निरुध्यन्ते विद्वांस्तत्र न मुह्यति ।
ज्यैष्ठ्यं कानिष्ठ्यमप्येषां पूर्व्वं नासीज्जनाधिप । तप एव गरीयोऽभूत्प्रभावश्चैव कारणं ।
इमां विसृष्टिं दक्षस्य यो विद्यात्सचराचरां । प्रजावानायुरुत्तीर्णः स्वर्गलोके महीयते ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि प्रजासर्गे दक्षोत्पत्तिकथने द्वितीयोऽध्यायः ॥ २ ॥
॥ जनमेजय उवाच ॥ देवानां दानवानाञ्च गन्धर्व्वोरगरक्षसां । उत्पत्तिं विस्तरेणैव वैशम्पायन कीर्त्तय । ११५
॥ वैशम्पायन उवाच ॥ प्रजाः सृजेति व्यादिष्टः पूर्व्वं दक्षः स्वयम्भुवा । यथा ससर्ज्ज भूतानि तथा शृणु महीपते ।
मनसा चैव भूतानि पूर्व्वमेवासृजत्प्रभुः । ऋषीन् देवान् सगन्धर्व्वानसुरानथ राक्षसान् ।
यक्षभूतपिशाचांश्च वयःपशुसरीसृपान् । यदाऽस्य तास्तु मानस्यो न व्यवर्द्धन्त वै प्रजाः ।
तदा सञ्चिन्त्य धर्म्मात्मा प्रजाहेतोः प्रजापतिः । स मैथुनेन धर्म्मेण सिसृक्षुर्व्विविधाः प्रजाः ।
असिक्नीमावहत् पत्नीं वीरणस्य प्रजापतेः । सुतां सुतपसा युक्तां महतीं लोकधारिणीं । १२०
अथ पुत्त्रसहस्राणि वैरण्यां पञ्च वीर्य्यवान् । असिक्न्यां जनयामास दक्ष एव प्रजापतिः ।
तांस्तु दृष्ट्वा महाभागान् संविवर्द्धयिषून् प्रजाः । देवर्षिः प्रियसंवादो नारदः प्राब्रवीदिदं ।
नाशाय वचनं तेषां शापायैवात्मनस्तथा । यं काश्यपः सुतं वीरं परमेष्ठी व्यजीजनत् ।
दक्षस्य वै दुहितरि दक्षशापभयान्मुनिः । पूर्व्वं स हि समुत्पन्नो नारदः परमेष्ठिना ।
असिक्न्यामथ वैरण्यां भूयो देवर्षिसत्तमः । तं भूयो जनयामास पितेव मुनिपुङ्गवं । १२५
तेन दक्षस्य पुत्त्रा वै हर्य्यश्वा इति विश्रुताः । निर्म्माथं नाशिताः सर्व्वे विधिना च न संशयः ।
तस्योद्यतस्तदा दक्षो नाशायामितविक्रमः । ब्रह्मर्षीन् पुरतः कृत्वा याचितः परमेष्ठिना ।
ततोऽभिसन्धिं चक्रे वै दक्षस्तु परमेष्ठिना । कन्यायां नारदो मह्यं तव पुत्त्रो भवेदिति ।
ततो दक्षः सुतां प्रादात्प्रियां वै परमेष्ठिने । स तस्यां नारदो जज्ञे दक्षशापभयादृषिः ।
॥ जनमेजय उवाच ॥ कथं विनाशिताः पुत्त्रा नारदेन महर्षिणा । प्रजापतेर्द्विजश्रेष्ठ श्रोतुमिच्छामि तत्त्वतः । १३०
॥ वैशम्पायन उवाच ॥ दक्षस्य पुत्त्रा हर्य्यश्वा विवर्द्धयिषवः प्रजाः । समागता महावीर्य्या नारदस्तानुवाच ह ।
बालिशा वत यूयं वै नास्या जानीथ वै भुवः । प्रमाणं स्रष्टुकामा वै प्रजाः प्राचेतसात्मजाः ।
अन्तरूर्द्ध्वमधश्चैव कथं स्रक्ष्यथ वै प्रजाः । ते तु तद्वचनं श्रुत्वा प्रयाताः सर्व्वतो दिशः ।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः । हर्य्यश्वेष्वथ नष्टेषु दक्षः प्राचेतसः पुनः ।
वैरण्यामेव पुत्त्राणां सहस्रमसृजत्प्रभुः । विवर्द्धयिषवस्ते तु शवलाश्वाः प्रजास्तदा । १३५
पूर्व्वोक्तं वचनं तात नारदेनैव चोदिताः । अन्योन्यमूचुस्ते सर्व्वे सम्यगाह महामुनिः ।

भ्रातॄणां पदवीं ज्ञातुं गन्तव्यं नात्र संशयः। ज्ञात्वा प्रमाणं पृथ्व्याश्च सुखं स्रक्ष्यामहे प्रजाः।
एकाग्राः स्वस्थमनसो यथावदनुपूर्व्वशः। तेऽपि तेनैव मार्गेण प्रयाताः सर्व्वतो दिशं।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः। नष्टेषु शवलाश्वेषु दक्षः क्रुद्धोऽब्रवीद्वचः।
नारदं नाशमेहीति गर्भवासं वसेति च। तदा प्रभृति वै भ्राता भ्रातुरन्वेषणे नृप। १००
प्रयातो नश्यति क्षिप्रं तन्न कार्य्यं विपश्चिता। तांश्चैव नष्टान् विज्ञाय पुत्रान् दक्षः प्रजापतिः।
षष्टिं ततोऽसृजत्कन्यां वैरण्यामिति नः श्रुतं। तास्तदा प्रतिजग्राह भार्य्यार्थं कश्यपः प्रभुः।
सोमो धर्म्मश्च कौरव्य तथैवान्ये महर्षयः। ददौ स दश धर्म्माय कश्यपाय त्रयोदश।
सप्तविंशति सोमाय चतस्रोऽरिष्टनेमिने। द्वे चैव बहुपुत्राय द्वे चैवाङ्गिरसे तथा।
द्वे कृशाश्वाय विदुषे तासां नामानि मे शृणु। अरुन्धती वसुर्य्यामी लम्बा भानुर्म्मरुत्वती। १०५
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च भारत। धर्म्मपत्न्यो दश त्वेतास्तास्वपत्यानि मे शृणु।
विश्वेदेवास्तु विश्वायाः साध्या साध्यान् व्यजायत। मरुत्वत्यां मरुत्वन्तो वसोस्तु वसवस्तथा।
भानोस्तु भानवस्तात मुहूर्त्तायां मुहूर्त्तजाः। लम्बायाश्चैव घोषोऽथ नागवीथी च यामिजा।
पृथिवीविषयं सर्व्वमरुन्धत्यां व्यजायत। सङ्कल्पायास्तु सर्व्वात्मा जज्ञे सङ्कल्प एव हि।
नागवीथ्याश्च यामिन्यां वृषलश्च व्यजायत। या राजन् सोमपत्न्यस्तु दक्षः प्राचेतसो ददौ। ११०
सर्व्वा नक्षत्रनाम्न्यस्ता ज्योतिषे परिकीर्त्तिताः। ये त्वन्ये ख्यातिमन्तो वै देवा ज्योतिःपुरोगमाः।
वसवोऽष्टौ समाख्यातास्तेषां वक्ष्यामि विस्तरं। आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः।
प्रत्यूषश्च प्रभासश्च वसवो नामभिः स्मृताः। आपस्य पुत्रो वैतण्ड्यः श्रमः शान्तो मुनिस्तथा।
ध्रुवस्य पुत्रो भगवान् कालो लोकप्रकालनः। सोमस्य भगवान् वर्च्चा वर्च्चस्वी येन जायते।
धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा। मनोहरायाः शिशिरः प्राणोऽथ रमणस्तथा। ११५
अनिलस्य शिवा भार्य्या यस्याः पुत्रो मनोजवः। अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्य तु।
अग्निपुत्रः कुमारस्तु शरस्तम्बे श्रिया वृतः। तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः।
अपत्यं कृत्तिकानान्तु कार्त्तिकेय इति स्मृतः। स्कन्दः सनत्कुमारश्च सृष्टः पादेन तेजसा।
प्रत्यूषस्य विदुः पुत्रमृषिं नाम्नाऽथ देवलं। द्वौ पुत्रौ देवलस्यापि क्षमावन्तौ तपस्विनौ।
वृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मवादिनी। योगसिद्धा जगत्कृत्स्नमसक्ता विचचार ह। १२०
प्रभासस्य च भार्य्या सा वसूनामष्टमस्य च। विश्वकर्म्मा महाभागो यस्यां जज्ञे प्रजापतिः।
कर्त्ता शिल्पसहस्राणां त्रिदशानाञ्च वर्द्धकिः। भूषणानाञ्च सर्व्वेषां कर्त्ता शिल्पवतां वरः।
यः सर्व्वासां विमानानि देवतानां चकार ह। मनुष्याश्चोपजीवन्ति यस्य शिल्पं महात्मनः।
सुरभी कश्यपाद्रुद्रानेकादश विनिर्म्ममे। महादेवप्रसादेन तपसा भाविता सती।
अजैकपादहिर्ब्बुध्न्यस्त्वष्टा रुद्रश्च भारत। त्वष्टुश्चैवात्मजः श्रीमान् विश्वरूपो महायशाः। १२५
हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः। वृषाकपिश्च शम्भुश्च कपर्द्दी रैवतस्तथा।

मृगव्याधश्च सर्पश्च कपाली च विशाम्पते। एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः।
शतं त्वेवं समाख्यातं रुद्राणाममितौजसां। पुराणे भरतश्रेष्ठ यैर्व्याप्ताः सचराचराः।
लोका भरतशार्दूल कश्यपस्य निबोध मे। अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा खशा।
सुरभिर्व्विनता चैव ताम्रा क्रोधवशा इरा। कद्रुर्मुनिश्च राजेन्द्र तास्वपत्यानि मे शृणु। १७०
पूर्व्वमन्वन्तरे तात द्वादशासन्सुरोत्तमाः। तुषिता नाम तेऽन्योन्यमूचुर्व्वैवस्वतेऽन्तरे।
उपस्थितेऽतियशसश्चाक्षुषस्यान्तरे मनोः। हितार्थं सर्व्वलोकानां समागम्य परस्परं।
आगच्छत द्रुतं देवा अदितिं सम्प्रविश्य वै। मन्वन्तरे प्रसूयामस्तन्नः श्रेयो भविष्यति।
॥ वैशम्पायन उवाच ॥ एवमुक्ता तु ते सर्व्वे चाक्षुषस्यान्तरे मनोः। मारीचात्कश्यपाज्जातास्ते दित्या दक्षकन्यया।
तत्र शक्रश्च विष्णुश्च जज्ञाते पुनरेव ह। अर्य्यमा चैव धाता च त्वष्टा पूषा च भारत। १७५
विवस्वान् सविता चैव मित्रो वरुण एव च। अंशो भगश्चातितेजा आदित्या द्वादश स्मृताः।
चाक्षुषस्यान्तरे पूर्व्वमासन् ये तुषिताः सुराः। वैवस्वतेऽन्तरे ते वै आदित्या द्वादश स्मृताः।
सप्तविंशतिः याः प्रोक्ताः सोमपत्न्यो महाव्रताः। तासामपत्यान्यभवन् दीप्तान्यमिततेजसां।
अरिष्टनेमिपत्नीनामपत्यानीह षोडश। बहुपुत्रस्य विदुषश्चतस्रो विद्युतः स्मृताः।
प्रत्यङ्गिरसजाः श्रेष्ठा ऋचो ब्रह्मर्षिसत्कृताः। कृशाश्वस्य तु देवर्षेर्देवप्रहरणाः सुताः। १८०
एते युगसहस्रान्ते जायन्ते पुनरेव ह। सर्व्वदेवगणास्तात त्रयस्त्रिंशत्तु कामजाः।
तेषामपि च राजेन्द्र निरोधोत्पत्तिरुच्यते। यथा सूर्य्यस्य गगने उदयास्तमयाविह।
एवं देवनिकायास्ते सम्भवन्ति युगे युगे। दित्याः पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतं।
हिरण्यकशिपुश्चैव हिरण्याक्षश्च वीर्य्यवान्। सिंहिका चाभवत्कन्या विप्रचित्तेः परिग्रहः।
सैंहिकेया इति ख्याता यस्याः पुत्रा महाबलाः। गणैश्च सह राजेन्द्र दशसाहस्रमुच्यते। १८५
तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः। असंख्याता महाबाहो हिरण्यकशिपोः शृणु।
हिरण्यकशिपोः पुत्राश्चत्वारः प्रथितौजसः। अनुह्रादश्च ह्रादश्च प्रह्रादश्चैव वीर्य्यवान्।
संह्रादश्च चतुर्थोऽभूत् ह्रादपुत्रो ह्रदस्तथा। संह्रादपुत्रः सुन्दश्च निसुन्दश्चैव तावुभौ।
ह्रदस्य पुत्रो ह्यायुर्व्वै शिबिः कालस्तथैव च। विरोचनश्च प्राह्रादिर्व्वलिर्जज्ञे विरोचनात्।
बलेः पुत्रशतन्त्वासीद्बाणज्येष्ठं नराधिप। धृतराष्ट्रश्च सूर्य्यश्च चन्द्रमाश्चेन्द्रतापनः। १९०
कुम्भनाभो गर्द्दभाक्षः कुक्षिरित्येवमादयः। बाणस्तेषामतिबलो ज्येष्ठः पशुपतिप्रियः।
पुराकल्पे हि बाणेन प्रसाद्योमापतिं प्रभुं। पार्श्वतो विहरिष्यामि इत्येवं याचितो वरः।
बाणस्य चेन्द्रदमनो लोहित्यामुदपद्यत। गणास्तथा सुरा राजन् शतसाहस्रसम्मिताः।
हिरण्याक्षसुताः पञ्च विद्वांसः सुमहाबलाः। झर्झरः शकुनिश्चैव भूतसन्तापनस्तथा।
महानाभश्च विक्रान्तः कालनाभस्तथैव च। अभवन् दनुपुत्राश्च शतं तीव्रपराक्रमाः। १९५
तपस्विनो महावीर्य्याः प्राधान्येन निबोध तान्। द्विमूर्द्धा शकुनिश्चैव तथा शङ्कुशिराः प्रभुः।

शङ्कुकर्णो विराधश्च गवेष्ठी दुन्दुभिस्तथा । अयोमुखः शम्बरश्च कपिशो वामनस्तथा ।
मरीचिर्मघवांश्चैव इरा गर्गशिरा वृकः । विक्षोभणश्च केतुश्च केतुवीर्य्यशतह्रदौ ।
इन्द्रजित्सर्व्वजिच्चैव वज्रनाभस्तथैव च । महानाभश्च विक्रान्तः कालनाभस्तथैव च ।
एकचक्रो महाबाहुस्तारकश्च महाबलः । वैश्वानरः पुलोमा च विद्रावणमहाशिराः । १००
स्वर्भानुर्वृषपर्व्वा च तुहुण्डश्च महासुरः । सूक्ष्मश्चैव निचन्द्रश्च ऊर्णनाभो महागिरिः ।
असिलोमा च केशी च शठश्च बलको मदः । तथा गगनमूर्द्धा च कुम्भनाभो महासुरः ।
प्रमदो मयश्च कुपथो हयग्रीवश्च वीर्य्यवान् । वैसृपः सविरूपाक्षः सुपथोऽथ हराहरौ ।
हिरण्यकशिपुश्चैव शतमायश्च शम्बरः । शरभः शलभश्चैव विप्रचित्तिश्च वीर्य्यवान् ।
एते सर्व्वे दनोः पुत्त्राः कश्यपादभिजज्ञिरे । विप्रचित्तिप्रधानास्ते दानवाः सुमहाबलाः । १०५
एतेषां यदपत्यन्तु न तच्छक्यं नराधिप । प्रसंख्यातुं महीपाल पुत्त्रपौत्त्रमनन्तकं ।
स्वर्भानोस्तु प्रभा कन्या पुलोम्नस्तु सुतात्रयं । उपदानवी हयशिराः शर्म्मिष्ठा वार्षपर्व्वणी ।
पुलोमा कालका चैव वैश्वानरसुते उभे । बह्वपत्ये महावीर्य्ये मारीचेस्तु परिग्रहः ।
तयोः पुत्त्रसहस्राणि षष्टिं दानवनन्दनान् । चतुर्द्दशशतानन्यान् हिरण्यपुरवासिनः ।
मारीचिर्ज्जनयामास महता तपसाऽन्वितः । पौलोमाः कालकेयाश्च दानवास्ते महाबलाः । ११०
अवध्या देवतानाञ्च हिरण्यपुरवासिनः । कृताः पितामहेनाजौ निहताः सव्यसाचिना ।
प्रभाया नहुषः पुत्त्रः सुञ्जयश्च शचीसुतः । पूरुं अजनोऽथ शर्म्मिष्ठा दुष्मन्तमुपदानवी ।
ततोऽपरे महावीर्य्या दानवास्त्वतिदारुणाः । सिंहिकायामथोत्पन्ना विप्रचित्तेः सुतास्तथा ।
दैत्यदानवसंयोगाज्जातास्तीव्रपराक्रमाः । सैंहिकेया इति ख्यातास्त्रयोदश महाबलाः ।
व्यंशः शल्यश्च बलिनौ नभश्चैव महाबलः । वातापिर्नमुचिश्चैव इल्वलः खसृमस्तथा । ११५
आञ्जिको नरकश्चैव कालनाभस्तथैव च । राहुर्ज्ज्येष्ठस्तु तेषां वै सूर्य्यचन्द्रप्रमर्द्दनः ।
शुकः पौलरणश्चैव वज्रनाभश्च वीर्य्यवान् । मूकश्चैव तुहुण्डश्च ह्रदपुत्त्रौ बभूवतुः ।
मारीचः सुन्दपुत्त्रश्च ताडकायां व्यजायत । एते वै दानवाः श्रेष्ठा दनुवंशविवर्द्धनाः ।
तेषां पुत्त्राश्च पौत्त्राश्च शतशोऽथ सहस्रशः । संह्रादस्य तु दैत्यस्य निवातकवचाः कुले ।
समुत्पन्नाः सुमहता तपसा भावितात्मनः । तिस्रः कोट्यः सुतास्तेषां मणिमत्यां निवासिनां । १२०
तेऽप्यवध्यास्तु देवानामर्ज्जुनेन निपातिताः । षट् सुताः सुमहासत्त्वास्ताम्रायाः परिकीर्त्तिताः ।
काकी श्येनी च भासी च सुग्रीवी शुचि गृध्रिका । काकी काकानजनयदुलूकी प्रत्युलूककान् ।
श्येनी श्येनांस्तथा भासी भासान् गृध्रांश्च गृध्र्यपि । शुचिरौदकान् पक्षिगणान् सुग्रीवी तु परन्तप ।
अश्वानुष्ट्रान् गर्द्दभांश्च ताम्रावंशः प्रकीर्त्तितः । विनतायास्तु पुत्त्रौ द्वावरुणो गरुडस्तथा ।
सुपर्णः पतगश्रेष्ठो दारुणः स्वेन कर्म्मणा । सुरसायाः सहस्रन्तु सर्पाणाममितौजसां । १२५
अनेकशिरसां तात खेचराणां महात्मनां । काद्रवेयाश्च बलिनः सहस्रममितौजसः ।

सुपर्णवशगा नागा जज्ञिरेऽनेकमस्तकाः । तेषां प्रधानाः सततं शेषवासुकितक्षकाः ।
ऐरावतो महापद्मः कम्बलाश्वतरावुभौ । एलापत्रस्तथा शङ्खः कर्क्कोटकधनञ्जयौ ।
महानीलमहाकर्णौ धृतराष्ट्रबलाहकौ । कुहरः पुष्पदंष्ट्रश्च दुर्म्मुखः सुमुखस्तथा ।
शङ्खश्च शङ्खपालश्च कपिलो वामनस्तथा । नहुषः शङ्खरोमा च मणिरित्येवमादयः ।
तेषां पुत्त्राश्च पौत्त्राश्च गरुडेन निपातिताः । चतुर्द्दशसहस्राणि क्रूराणामुरगाशिनां ।
गणं क्रोधवशं विद्धि तस्य सर्व्वे च दंष्ट्रिणः । स्थलजाः पक्षिणोऽब्जाश्च धरायाः प्रसवाः स्मृताः ।
गास्तु वै जनयामास सुरभिर्म्महिषींस्तथा । इरा वृक्षलता वल्लीस्तृणजातीश्च सर्व्वशः ।
खशा तु यक्षरक्षांसि मुनिरप्सरसस्तथा । अरिष्टा तु महासत्त्वान् गन्धर्व्वानमितौजसः ।
एते कश्यपदायादाः कीर्त्तिताः स्थाणुजङ्गमाः । तेषां पुत्त्राश्च पौत्त्राश्च शतशोऽथ सहस्रशः ।
एष मन्वन्तरे तात सर्गः स्वारोचिषे स्मृतः । वैवस्वते तु महति वारुणे वितते क्रतौ ।
जुह्वानस्य ब्रह्मणो वै प्रजासर्ग इहोच्यते । पूर्व्वं यत्र तु ब्रह्मर्षीनुत्पन्नान् सप्त मानसान् ।
पुत्त्रत्वे कल्पयामास स्वयमेव पितामहः । ततो विरोधे देवानां दैत्यानाञ्चैव भारत ।
दितिर्व्विनष्टपुत्त्रा वै तोषयामास कश्यपं । तां कश्यपः प्रसन्नात्मा सम्यगाराधितस्तथा ।
वरेण छन्दयामास सा च वव्रे वरं तदा । पुत्त्रमिन्द्रवधार्थाय समर्थममितौजसं ।
स च तस्यै वरं प्रादात् प्रार्थितः सुमहातपाः । दत्त्वा च वरमव्यग्रो मारीचस्तामभाषत ।
भविष्यति सुतस्तेऽयं यद्येनं धारयिष्यसि । इन्द्रं सुतो निहन्ता ते गर्भं वै शरदां शतं ।
यदि धारयसे शौचतत्परा व्रतमास्थिता । तथेत्यभिहितो भर्त्ता तया देव्या महातपाः ।
धारयामास गर्भन्तु शुचिः सा वसुधाधिप । ततोऽभ्युपगमाद्दित्यां गर्भमाधाय कश्यपः ।
रोचयन्वै गणश्रेष्ठं देवानाममितौजसां । तेजः संहृत्य दुर्द्धर्षमवध्यममरैरपि ।
जगाम पर्व्वतायैव तपसे संशितव्रतः । तस्याश्चैवान्तरप्रेप्सुरभवत् पाकशासनः ।
ऊने वर्षशते चास्या ददर्शान्तरमच्युतः । अकृत्वा पादयोः शौचं दितिः शयनमाविशत् ।
निद्राञ्चाकारयामास तस्याः कुक्षिं प्रविश्य सः । वज्रपाणिस्ततो गर्भं सप्तधा तं न्यकृन्तत ।
स पाट्यमानो वज्रेण गर्भस्तु प्ररुरोद ह । मारोदीरिति तं शक्रः पुनः पुनरथाब्रवीत् ।
सोऽभवत्सप्तधा गर्भस्तमिन्द्रो रुषितः पुनः । एकैकं सप्तधा चक्रे वज्रेणैवारिकर्षणः ।
मरुतो नाम देवास्ते बभूवुर्भरतर्षभ । यथैवोक्तं मघवता तथैव मरुतोऽभवन् ।
देवा एकोनपञ्चाशत् सहाया वज्रपाणिनः । तेषामेवं प्रवृद्धानां भूतानां जनमेजय ।
रोचयन् वै गणश्रेष्ठं देवानाममितौजसां । निकायेषु निकायेषु हरिः प्रादात्प्रजापतिं ।
क्रमशस्तानि राज्यानि पृथुपूर्व्वाणि भारत । स हरिः पुरुषो वीरः कृष्णो जिष्णुः प्रजापतिः
पर्ज्जन्यस्तपनो व्यक्तस्तस्य सर्व्वमिदं जगत् । भूतसर्गमिमं सम्यक् जानतो भरतर्षभ ।

मरुताञ्च शुभं जन्म शृण्वतः पठतोऽपि वा । नापत्तिभयमस्तीह परलोकभयं कुतः ।

इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि मारुतोत्पत्तिकथने तृतीयोऽध्यायः ॥ ३ ॥

॥ वैशम्पायन उवाच ॥ अभिषिच्याधिराज्ये तु पृथुं वैन्यं पितामहः । ततः क्रमेण राज्यानि व्यादेष्टुमुपचक्रमे ।
द्विजानां वीरुधाञ्चैव नक्षत्रग्रहयोस्तथा । यज्ञानां तपसाञ्चैव सोमं राज्येऽभ्यषेचयत् ।
अपान्तु वरुणं राज्ये राज्ञां वैश्रवणं प्रभुं । बृहस्पतिन्तु विश्वेषां ददावाङ्गिरसं पतिं ।
भृगूनामधिपञ्चैव काव्यं राज्येऽभ्यषेचयत् । आदित्यानां तथा विष्णुं वसूनामथ पावकं ।
प्रजापतीनां दक्षन्तु मरुतामथ वासवं । दैत्यानां दानवानाञ्च प्रह्लादममितौजसं ।
वैवस्वतं पितॄणाञ्च यमं राज्येऽभ्यषेचयत् । यक्षाणां राक्षसानाञ्च पार्थिवानां तथैव च ।
सर्व्वभूतपिशाचानां गिरीशं शूलपाणिनं । शैलानां हिमवन्तञ्च नदीनामथ सागरं ।
नारायणन्तु साध्यानां रुद्राणां वृषभध्वजं । विप्रचित्तिन्तु राजानं दानवानामथादिशत् ।
गन्धानां मरुताञ्चैव भूतानामशरीरिणां । शब्दाकाशवताञ्चैव वायुं बलवताम्बरं ।
सागराणां नदानाञ्च मेघानां वर्षितस्य च । गन्धर्व्वाणामधिपतिं चक्रे चित्ररथं विभुं ।
नागानां वासुकिं चक्रे सर्पाणामथ तक्षकं । सर्व्वेषां दंष्ट्रिणां शेषं राजानमभ्यषेचयत ।
वारणानान्तु राजानमैरावतमथादिशत् । उच्चैःश्रवसमश्वानां गरुडं च पतत्रिणां ।
मृगाणामथ शार्दूलं गोवृषन्तु गवामपि । वनस्पतीनां राजानं प्लक्षमेवादिशत् प्रभुं ।
गन्धर्व्वाप्सरसाञ्चैव कामदेवं तथा प्रभुं । ऋतूनामथ मासानां दिवसानां तथैव च ।
पक्षाणाञ्च क्षपाणाञ्च मुहूर्त्ततिथिपर्व्वणां । कलाकाष्ठाप्रमाणानां गतेरयनयोस्तथा ।
गणितस्याथ योगस्य चक्रे सम्वत्सरं प्रभुं । एवं विभज्य राज्यानि क्रमेण स पितामहः ।
दिक्पालानथ ततः स्थापयामास भारत । पूर्व्वस्यां दिशि पुत्रन्तु वैराजस्य प्रजापतेः ।
दिक्पालं सुधन्वानं राजानं सोऽभ्यषेचयत् । दक्षिणस्यां महात्मानं कर्द्दमस्य प्रजापतेः ।
पुत्रं शङ्खपदं नाम राजानं सोऽभ्यषेचयत् । पश्चिमायां दिशि तथा रजसः पुत्रमच्युतं ।
केतुमन्तं महात्मानं राजानं सोऽभ्यषेचयत् । तथा हिरण्यरोमाणं पर्ज्जन्यस्य प्रजापतेः ।
उदीच्यां दिशि दुर्द्धर्षं राजानं सोऽभ्यषेचयत् । तैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशमद्यापि धर्म्मेण परिपाल्यते । राजसूयाभिषिक्तस्तु पृथुरेभिर्नराधिपैः ।
वेददृष्टेन विधिना राजराज्ये नराधिप । ततो मन्वन्तरेऽतीते चाक्षुषेऽमिततेजसि ।
वैवस्वताय मनवे ब्रह्मा राज्यमथादिशत् । तस्य विस्तरमाख्यास्ये मनोर्व्वैवस्वतस्य ह ।
तवानुकूल्याद्राजेन्द्र यदि शुश्रूषसेऽनघ । महदेतदधिष्ठानं पुराणे परिनिष्ठितं ।
धन्यं यशस्यमायुष्यं स्वर्गवासकरं शुभं ।

॥ जनमेजय उवाच ॥ विस्तरेण पृथोर्जन्म वैशम्पायन कीर्त्तय । यथा महात्मना तेन दुग्धा चेयं वसुन्धरा ।

यथा च पितृभिर्दुग्धा यथा देवैर्यथर्षिभिः । यथा दैत्यैश्च नागैश्च यथा यक्षैर्यथा द्रुमैः ।
यथा शैलैः पिशाचैश्च गन्धर्व्वैश्च द्विजोत्तमैः । राक्षसैश्च महासत्त्वैर्यथा दुग्धा वसुन्धरा ।
तेषां पात्रविशेषांश्च वैशम्पायन कीर्त्तय । वत्सान् क्षीरविशेषांश्च दोग्धारश्चानुपूर्व्वशः ।
यस्माच्च कारणात् पाणिर्वेनस्य मथितः पुरा । क्रुद्धैर्महर्षिभिस्तात कारणं तच्च कीर्त्तय ।
॥ वैशम्पायन उवाच ॥ हन्त ते कथयिष्यामि पृथोर्वैन्यस्य विस्तरं । एकाग्रः प्रयतश्चैव शृणुष्व जनमेजय ।
नाशुचेः क्षुद्रमनसो नाशिष्यायाव्रताय वा । कीर्त्तयेयमहं राजन् कृतघ्नायाहिताय वा ।
स्वर्ग्यं यशस्यमायुष्यं धन्यं वेदैश्च सम्मितं । रहस्यमृषिभिः प्रोक्तं शृणु राजन् यथातथं ।
यश्चैनं कथयेन्नित्यं पृथोर्वैन्यस्य विस्तरं । ब्राह्मणेभ्यो नमस्कृत्य न स शोचेत् कृताकृतैः ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पृथूपाख्याने चतुर्थोऽध्यायः ॥ ४ ॥
॥ वैशम्पायन उवाच ॥ आसीद्धर्म्मस्य गोप्ता वै पूर्व्वमत्रिसमः प्रभुः । अत्रिवंशसमुत्पन्नस्त्वङ्गो नाम प्रजापतिः ।
तस्य पुत्त्रोऽभवद्वेनो नात्यर्थं धर्म्मकोविदः । जातो मृत्युसुतायां वै सुनीथायां प्रजापतिः ।
स मातामहदोषेण तेन कालात्मजात्मजः । स्वधर्म्मान् पृष्ठतः कृत्वा कामाल्लोभेष्ववर्त्तत ।
मर्य्यादां स्थापयामास धर्म्मापेतां स पार्थिवः । वेदधर्म्मानतिक्रम्य सोऽधर्म्मनिरतोऽभवत् ।
निःस्वाध्यायवषट्कारास्तस्मिन् राजनि शासति । प्रावर्त्तन्त न पपुः सोमं हुतं यज्ञेषु देवताः ।
न यष्टव्यं न होतव्यमिति तस्य प्रजापतेः । आसीत् प्रतिज्ञा क्रूरेयं विनाशे प्रत्युपस्थिते ।
अहमिज्यश्च यष्टा च यज्ञश्चेति कुरूद्वह । मयि यज्ञा विधातव्या मयि होतव्यमित्यपि ।
तमतिक्रान्तमर्य्यादमाददानमसाम्प्रतं । ऊचुर्महर्षयः सर्व्वे मरीचिप्रमुखास्तदा ।
वयं दीक्षां प्रवेक्ष्यामः संवत्सरगणान् बहून् । अधर्म्मं कुरु मा वेन नैष धर्म्मः सनातनः ।
निधनेऽत्रेः प्रसूतस्त्वं प्रजापतिरसंशयं । प्रजाश्च पालयिष्येऽहमिति ते समयः कृतः ।
तांस्तथा ब्रुवतः सर्व्वान् महर्षीनब्रवीत्तदा । वेनः प्रहस्य दुर्ब्बुद्धिरिममर्थमनर्थवित् ।
॥ वेन उवाच ॥ स्रष्टा धर्म्मस्य कश्चान्यः श्रोतव्यं कस्य वा मया । श्रुतवीर्य्यतपःसत्यैर्मया वा कः समो भुवि ।
प्रभवं सर्व्वभूतानां धर्म्माणाञ्च विशेषतः । सम्मूढा न विदुर्नूनं भवन्तो मामचेतसः ।
इच्छन् दहेयं पृथिवीं प्लावयेयं जलैस्तथा । द्यां भुवं चैव रुन्धेयं नात्र कार्य्या विचारणा ।
यदा न शक्यते मोहादवलेपाच्च पार्थिवः । अनुनेतुं तदा वेनस्ततः क्रुद्धा महर्षयः ।
निगृह्य तं महात्मानो विस्फुरन्तं महाबलं । ततोऽस्य सव्यमूरुन्ते ममन्थुर्जातमन्यवः ।
तस्मिंस्तु मथ्यमाने वै राज्ञ ऊरौ विजज्ञिवान् । ह्रस्वोऽतिमात्रः पुरुषः कृष्णश्चापि बभूव ह ।
स भीतः प्राञ्जलिर्भूत्वा स्थितवान् जनमेजय । तमत्रिर्विह्वलं दृष्ट्वा निषीदेत्यब्रवीत्तदा ।
निषादवंशकर्त्ताऽसौ बभूव वदताम्वर । धीवरानसृजच्चापि वेनकल्मषसम्भवान् ।
ये चान्ये विन्ध्यनिलयास्तुखारास्तुम्बुरास्तथा । अधर्म्मरुचयस्तात विद्धि तान् वेनसम्भवान् ।
ततः पुनर्म्महात्मानः पाणिं वेनस्य दक्षिणं । अरणीमिव संरब्धा ममन्थुर्जातमन्यवः ।

पृथुस्तस्मात् समुत्पन्नः कराज्ज्वलनसन्निभः । दीप्यमानः स्ववपुषा साक्षादग्निरिव ज्वलन् ।
स धन्वी कवची जातः पृथुरेव महायशाः । आद्यमाजगवं नाम धनुर्गृह्य महारवं ।
शरांश्च दिव्यान् रक्षार्थं कवचञ्च महाप्रभं । तस्मिन् जातेऽथ भूतानि संप्रहृष्टानि सर्व्वशः । ११५
समापेतुर्म्महाराज वेनश्च त्रिदिवं ययौ । समुत्पन्नेन कौरव्य सत्पुत्रेण महात्मना ।
त्रातः स पुरुषव्याघ्र पुन्नाम्नो नरकात्तदा । तं समुद्राश्च नद्यश्च रत्नान्यादाय सर्व्वशः ।
तोयानि चाभिषेकार्थं सर्व्व एवोपतस्थिरे । पितामहश्च भगवान् देवैराङ्गिरसैः सह ।
स्थावराणि च भूतानि जङ्गमानि च सर्व्वशः । समागम्य तदा वैन्यमभ्यषिञ्चन्नराधिपं ।
महता राजराज्येन प्रजापालं महाद्युतिं । सोऽभिषिक्तो महातेजा विधिवद्धर्म्मकोविदैः । १२०
आदिराज्ये तदा राज्ञां पृथुर्व्वैन्यः प्रतापवान् । पित्राऽपरञ्जितास्तस्य प्रजास्तेनानुरञ्जिताः ।
अनुरागात्ततस्तस्य नाम राजेत्यजायत । आपस्तस्तम्भिरे तस्य समुद्रमभियास्यतः ।
पर्व्वताश्च ददुर्म्मार्गं ध्वजभङ्गश्च नाभवत् । अकृष्टपच्या पृथिवी सिध्यन्त्यन्नानि चिन्तया ।
सर्व्वकामदुघा गावः पुटके पुटके मधु । एतस्मिन्नेव काले तु यज्ञे पैतामहे शुभे ।
सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामतिः । तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः । १२५
पृथोः स्तवार्थं तौ तत्र समाहूतौ सुरर्षिभिः । तावूचुर्ऋषयः सर्व्वे स्तूयतामेष पार्थिवः ।
कर्म्मैतदनुरूपं वां पात्रञ्चायं नराधिपः । तावूचतुस्तदा सर्व्वांस्तानृषीन् सूतमागधौ ।
आवां देवानृषींश्चैव प्रीणयावः स्वकर्म्मभिः । न चास्य विद्व वै कर्म्म न तथा लक्षणं यशः ।
स्तोत्रं येनास्य कुर्य्याव राज्ञस्तेजस्विनो द्विजाः । ऋषिभिस्तौ नियुक्तौ तु भविष्यैः स्तूयतामिति ।
यानि कर्म्माणि कृतवान् पृथुः पश्चान्महाबलः । सत्यवाग्दानशीलोऽयं सत्यसन्धो नरेश्वरः । १३०
श्रीमान् जैत्रः क्षमाशीलो विक्रान्तो दुष्टशासनः । धर्म्मज्ञश्च कृतज्ञश्च दयावान् प्रियभाषणः ।
मान्यमानयिता यज्वा ब्रह्मण्यः सत्यसङ्गरः । शमः शान्तश्च निरतो व्यवहारस्थितो नृपः ।
ततः प्रभृति लोकेषु स्तवेषु जनमेजय । आशीर्व्वादाः प्रयुज्यन्ते सूतमागधवन्दिभिः ।
तयोः स्तवान्ते सुप्रीतः पृथुः प्रादात्प्रजेश्वरः । अनूपदेशं सूताय मगधं मागधाय च ।
तं दृष्ट्वा परमप्रीताः प्रजाः प्राहुर्म्महर्षयः । वृत्तीनामेष वो दाता भविष्यति नराधिपः । १३५
ततो वैन्यं महाराज प्रजाः समभिदुद्रुवुः । त्वं नो वृत्तिं विधत्स्वेति महर्षिवचनात्तदा ।
सोऽभिद्रुतः प्रजाभिस्तु प्रजाहितचिकीर्षया । धनुर्गृह्य पृषत्कांश्च पृथिवीमार्दयद्बली ।
ततो वैन्यभयात्त्रस्ता गौर्भूत्वा प्राद्रवन्मही । तां पृथुर्धनुरादाय द्रवन्तीमन्वधावत ।
सा लोकान् ब्रह्मलोकादीन् गत्वा वैन्यभयात्तदा । प्रददर्शाग्रतो वैन्यं प्रगृहीतशरासनं ।
ज्वलद्भिर्निशितैर्व्वाणैर्दीप्ततेजसमच्युतं । महायोगं महात्मानं दुर्द्धर्षममरैरपि । १४०
अलभन्ती तु सा त्राणं वैन्यमेवाभ्यपद्यत । कृताञ्जलिपुटा भूत्वा पूज्या लोकैस्त्रिभिस्तदा ।
उवाच चैनं नाधर्म्मं स्त्रीवधं कर्त्तुमर्हसि । कथं धारयिता चासि प्रजा राजन् मया विना ।

मयि लोकाः स्थिता राजन् मयेदं धार्य्यते जगत् । मद्विनाशे विनश्येयुः प्रजाः पार्थिव विद्धि तत् ।
न मामर्हसि हन्तुं वै श्रेयश्चेत्त्वं चिकीर्षसि । प्रजानां पृथिवीपाल शृणु चेदं वचो मम ।
उपायतः समारब्धाः सर्व्वे सिद्ध्यन्त्युपक्रमाः । उपायं पश्य येन त्वं धारयेथाः प्रजा नृप ।
हत्वाऽपि मां न शक्तस्त्वं प्रजा धारयितुं नृप । अनुभूता भविष्यामि यच्छ कोपं महाद्युते ।
अवध्याश्च स्त्रियः प्राहुस्तिर्य्यग्योनिगतेष्वपि । सत्त्वेषु पृथिवीपाल न धर्म्मं त्यक्तुमर्हसि ।
एवं बहुविधं वाक्यं श्रुत्वा राजा महामनाः । कोपं निगृह्य धर्म्मात्मा वसुधामिदमब्रवीत् ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पृथूपाख्याने पञ्चमोऽध्यायः ॥ ५ ॥
॥ पृथुरुवाच ॥ एकस्यार्थाय यो हन्यादात्मनो वा परस्य वा । बहून्वै प्राणिनो ऽप्येकं भवेत्तस्येह पातकं ।
सुखमेधन्ति बहवो यस्मिंस्तु निहते सति । तस्मिन् हते नास्ति भद्रे पातकं चोपपातकं ।
एकस्मिन् यत्र निधनं प्रापिते दुष्टकारिणि । बहूनां भवति क्षेमं तत्र पुण्यप्रदो बधः ।
सोऽहं प्रजानिमित्तं त्वां हनिष्यामि वसुन्धरे । यदि मे वचनं नाद्य करिष्यसि जगद्धितं ।
त्वां निहत्याद्य बाणेन मच्छासनपराङ्मुखीं । आत्मानं प्रथयित्वाऽहं प्रजा धारयिता स्वयं ।
सा त्वं शासनमास्थाय मम धर्म्मभृताम्वरे । सञ्जीवय प्रजाः सर्व्वाः समर्था ह्यसि धारणे ।
दुहितृत्वञ्च मे गच्छ तत एनमहं शरं । नियच्छेयं त्वद्वधार्थमुद्यतं घोरदर्शनं ।
॥ वसुन्धरोवाच ॥ सर्व्वमेतदहं वीर विधास्यामि न संशयः । उपायतः समारब्धाः सर्व्वे सिध्यन्त्युपक्रमाः ।
उपायं पश्य येन त्वं धारयेथाः प्रजा इमाः । वत्सन्तु मम तं पश्य क्षरेयं येन वत्सला ।
समाञ्च कुरु सर्व्वत्र त्वं मां धर्म्मभृताम्वर । यथाऽभिस्यन्दमानं मे क्षीरं सर्व्वत्र भावयेत् ।
॥ वैशम्पायन उवाच ॥ तत उत्सारयामास शैलान् शतसहस्रशः । धनुष्कोट्या तदा वैन्यस्तेन शैला विवर्द्धिताः ।
पृथुर्वैन्यस्तदा चक्रे महीं राजा समां ततः । मन्वन्तरेष्वतीतेषु विषमासीद्वसुन्धरा ।
स्वभावेनाभवन् ह्यस्याः समानि विषमाणि च । चाक्षुषस्यान्तरे पूर्व्वमासीदेवं तदा किल ।
न हि पूर्व्वविसर्गे वै विषमे पृथिवीतले । प्रविभागः पुराणाञ्च ग्रामाणां वा तदाऽभवत् ।
न शस्यानि न गोरक्षा न कृषिर्न वणिक्पथः । नैव सत्यानृतं तत्र न लोभो न च मत्सरः ।
वैवस्वतेऽन्तरे चास्मिन् साम्प्रते समुपस्थिते । वैन्यात् प्रभृति राजेन्द्र सर्व्वस्यैतस्य सम्भवः ।
यत्र यत्र समन्त्वस्या भूमेरासीत्तदाऽनघ । तत्र तत्र प्रजाः सर्व्वा निवासं समरोचयन् ।
आहारः फलमूलानि प्रजानामभवत्तदा । कृच्छ्रेण महता युक्त इत्येवमनुशुश्रुम ।
स कल्पयित्वा वत्सन्तु मनुं स्वायम्भुवं प्रभुं । स्वपाणौ पुरुषव्याघ्र दुदोह पृथिवीं ततः ।
शस्यजातानि सर्व्वाणि पृथुर्वैन्यः प्रतापवान् । तेनान्नेन प्रजास्तात वर्त्तन्तेऽद्यापि सर्व्वशः ।
ऋषिभिः श्रूयते चाऽपि पुनर्दुग्धा वसुन्धरा । वत्सः सोमोऽभवत्तेषां दोग्धा चाङ्गिरसः सुतः ।
बृहस्पतिर्महातेजाः पात्रं छन्दांसि भारत । क्षीरमासीदनुपमन्तपो ब्रह्म च शाश्वतं ।
ततः पुनर्देवगणैः पुरन्दरपुरोगमैः । काञ्चनं पात्रमादाय दुग्धेयं श्रूयते मही ।

वत्सस्तु मघवानासीद्दोग्धा तु सविता प्रभुः । क्षीरमूर्ज्जस्करञ्चैव वर्त्तन्ते येन देवताः ।
पितृभिः श्रूयते चापि पुनर्दुग्धा वसुन्धरा । राजतं पात्रमादाय सुधाममितविक्रमैः ।
यमो वैवस्वतस्तेषामासीद्वत्सः प्रतापवान् । अन्तकश्चाभवद्दोग्धा कालो लोकप्रकालनः
नागैश्च श्रूयते दुग्धा वत्सं कृत्वा तु तक्षकं । अलावुं पात्रमादाय विषं क्षीरं नरोत्तम ।
तेषामैरावतो दोग्धा धृतराष्ट्रः प्रतापवान् । नागानां भरतश्रेष्ठ सर्पाणाञ्च महीपते ।
तेनैव वर्त्तयन्त्युग्रा महाकाया विषोल्बणाः । तदाहारास्तदाचारास्तद्वीर्य्यास्तदपाश्रयाः ।
असुरैः श्रूयते चापि पुनर्दुग्धा वसुन्धरा । आयसं पात्रमादाय मायां शत्रुनिवर्हिणीं ।
विरोचनस्तु प्राह्लादिर्व्वत्सस्तेषामभूत्तदा । ऋत्विक् द्विमूर्द्धा दैत्यानां मधुर्द्दोग्धा महाबलः ।
तयैते मायया ऽद्यापि सर्व्वे मायाविनोऽसुराः । वर्त्तयन्त्यमितप्रज्ञास्तदेषाममितं बलं
यक्षैश्च श्रूयते राजन् पुनर्दुग्धा वसुन्धरा । आमपात्रे महाराज पुराऽन्तर्द्धानमक्षयं ।
वत्सं वैश्रवणं कृत्वा यक्षैः पुण्यजनैस्तदा । दोग्धा रजतनाभस्तु पिता मणिवरस्य यः ।
यक्षात्मजो महातेजास्त्रिशीर्षः सुमहातपाः । तेन ते वर्त्तयन्तीति परमर्षिरुवाच ह ।
राक्षसैश्च पिशाचैश्च पुनर्दुग्धा वसुन्धरा । शावं कपालमादाय प्रजा भोक्तुं नराधिप ।
दोग्धा रजतनाभस्तु तेषामासीत् कुरूद्वह । वत्सः सुमाली कौरव्य क्षीरं रुधिरमेव च ।
तेन क्षीरेण यक्षाश्च राक्षसाश्चामरोपमाः । वर्त्तयन्ति पिशाचाश्च भूतसङ्घास्तथैव च ।
पद्मपत्रे पुनर्दुग्धा गन्धर्व्वैः साप्सरोगणैः । वत्सं चित्ररथं कृत्वा शुचीन् गन्धान्नरर्षभ ।
तेषाञ्च सुरुचिश्चासीद्दोग्धा भरतसत्तम । गन्धर्व्वराजोऽतिबलो महात्मा सूर्य्यसन्निभः ।
शैलैश्च श्रूयते राजन् पुनर्दुग्धा वसुन्धरा । ओषधी र्वै मूर्त्तिमतीरत्नानि विविधानि च ।
वत्सस्तु हिमवानासीन्मेरुर्दोग्धा महागिरिः । पात्रन्तु शैलमेवासीत्तेन शैलाः प्रतिष्ठिताः ।
वीरुद्भिः श्रूयते राजन् पुनर्दुग्धा वसुन्धरा । पालाशं पात्रमादाय छिन्नदग्धप्ररोहणं ।
दुदोह पुष्पितः सालो वत्सः प्लक्षोऽभवत्तदा । सेयं धात्री विधात्री च पावनी च वसुन्धरा ।
चराचरस्य सर्व्वस्य प्रतिष्ठा योनिरेव च । सर्व्वकामदुघा दुग्धा सर्व्वशस्यप्ररोहिणी ।
आसीदियं समुद्रान्ता मेदिनीति परिश्रुता । मधुकैटभयोः कृत्स्ना मेदसाऽभिपरिप्लुता ।
तेनेयं मेदिनी देवी प्रोच्यते ब्रह्मवादिभिः । ततोऽभ्युपगमाद्राज्ञः पृथोर्व्वैन्यस्य भारत ।
दुहितृत्वमनुप्राप्ता देवी पृथ्वीति चोच्यते । पृथुना प्रविभक्ता च शोधिता च वसुन्धरा ।
शस्याकरवती स्फीता पुरपत्तनमालिनी । एवंप्रभावो वैन्यः स राजासीद्राजसत्तमः ।
नमस्यश्चैव पूज्यश्च भूतग्रामैरसंशयः । ब्राह्मणैश्च महाभागैर्व्वेदवेदाङ्गपारगैः ।
पृथुरेव नमस्कार्य्यो ब्रह्मयोनिः सनातनः । पार्थिवैश्च महाभागैः पार्थिवत्वमभीप्सुभिः ।
आदिराजो नमस्कार्य्यः पृथुर्वैन्यः प्रतापवान् । योधैरपि च विक्रान्तैः प्राप्तुकामैर्ज्जयं युधि ।
पृथुरेव नमस्कार्य्यो योधानां प्रथमो नृपः । यो हि योद्धा रणं याति कीर्त्तयित्वा पृथुं नृपं ।

स घोररूपान् संग्रामान् क्षेमी तरति कीर्त्तिमान् । वैश्यैरपि च वित्ताढ्यैः पप्रवृत्तिविधायिभिः ।
पृथुरेव नमस्कार्य्यो वृत्तिदाता महायशाः । तथैव शूद्रैः शुचिभिस्त्रिवर्णपरिचारिभिः ।
पृथुरेव नमस्कार्य्यः श्रेयः परमभीप्सुभिः । एते वत्सविशेषाश्च दोग्धारः क्षीरमेव च ।
पात्राणि च मयोक्तानि किम्भूयो वर्णयामि ते । ५०५
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पृथूपाख्याने पृथिवीदोहे षष्ठोऽध्यायः ॥ ६ ॥
॥ जनमेजय उवाच ॥ मन्वन्तराणि सर्व्वाणि विस्तरेण तपोधन । तेषां पूर्व्वविसृष्टिञ्च वैशम्पायन कीर्त्तय ।
यावन्तो मनवश्चैव यावन्तं कालमेव च । मन्वन्तरमहं ब्रह्मन् श्रोतुमिच्छामि तत्त्वतः ।
॥ वैशम्पायन उवाच ॥ न शक्यो विस्तरस्तात वक्तुं वर्षशतैरपि । मन्वन्तराणां कौरव्य संक्षेपं त्वेव मे शृणु ।
स्वायम्भुवो मनुस्तात मनुः स्वारोचिषस्तथा । औत्तमिस्तामसश्चैव रैवतश्चाक्षुषस्तथा ।
वैवस्वतस्तु कौरव्य सांप्रतो मनुरुच्यते । सावर्णिस्तु मनुस्तात भौत्यो रौच्यस्तथैव च । ५१०
तथैव मेरुसावर्णाश्चत्वारो मनवः स्मृताः । अतीता वर्त्तमानाश्च तथैवानागताश्च ये ।
कीर्त्तिता मनवस्तात मयैते तु यथाश्रुतं । ऋषींस्तेषां प्रवक्ष्यामि पुत्रान् देवगणांस्तथा ।
मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः । पुलस्त्यश्च वशिष्ठश्च सप्तैते ब्रह्मणः सुताः ।
उत्तरस्यां दिशि तथा राजन् सप्तर्षयः स्मृताः । यामा नाम तथा देवाश्चासन् स्वायम्भुवेऽन्तरे ।
आग्नीध्रश्चाग्निबाहुश्च मेधा मेधातिथिर्व्वसुः । ज्योतिष्मान् द्युतिमान् हव्यः सवनः पुत्र एव च । ५१५
मनोः स्वायम्भुवस्यैते दश पुत्रा महौजसः । एतत्ते प्रथमं राजन् मन्वन्तरमुदाहृतं ।
और्व्वो वशिष्ठपुत्रश्च स्तम्बः काश्यप एव च । प्राणो बृहस्पतिश्चैव दत्तो निश्च्यवनस्तथा ।
एते महर्षयस्तात वायुप्रोक्ता महाव्रताः । देवाश्च तुषिता नाम स्मृताः स्वारोचिषेऽन्तरे ।
हविघ्नः सुकृतिर्ज्योतिरापोमूर्त्तिरयस्मयः । प्रथितश्च नभस्यश्च नभ ऊर्ज्जस्तथैव च ।
स्वारोचिषस्य पुत्रास्ते मनोस्तात महात्मनः । कीर्त्तिताः पृथिवीपाल महावीर्यपराक्रमाः । ५२०
द्वितीयमेतत्कथितं तव मन्वन्तरं मया । इदं तृतीयं वक्ष्यामि तन्निबोध नराधिप ।
वशिष्ठपुत्राः सप्तासन् वाशिष्ठा इति विश्रुताः । हिरण्यगर्भस्य सुता ऊर्ज्जा नाम सुतेजसः ।
ऋषयोऽत्र मया प्रोक्ताः कीर्त्यमानान्निबोध तान् । औत्तमेयान् महाराज दश पुत्रान् मनोरमान् ।
इष ऊर्ज्जस्तनूर्ज्जश्च मधुर्माधव एव च । शुचिः शुक्रः सहश्चैव नभस्यो नभ एव च ।
भानवस्तत्र देवाश्च मन्वन्तरमुदाहृतं । मन्वन्तरं चतुर्थं ते कीर्त्तयिष्यामि तच्छृणु । ५२५
काव्यः पृथुस्तथैवाग्निर्जन्युर्धामा च भारत । कपीवानकपीवांश्च तत्र सप्तर्षयोऽपरे ।
पुराणे कीर्त्तितास्तात पुत्राः पौत्राश्च भारत । सत्या देवगणाश्चैव तामसस्यान्तरे मनोः ।
पुत्रांश्चैव प्रवक्ष्यामि तामसस्य मनोर्नृप । द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोशनः ।
तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः । तामसस्य मनोरेते दश पुत्रा महाबलाः ।
वायुप्रोक्ता महाराज पञ्चमं तदनन्तरं । वेदबाहुर्यदुध्रश्च मुनिर्वेदशिरास्तथा । ५३०

हिरण्यरोमा पर्ज्जन्य ऊर्द्ध्वबाहुश्च सोमजः । सत्यनेत्रस्तथाऽत्रेय एते सप्तर्षयोऽपरे ।
देवाश्चाभूतरजसस्तथा प्रकृतयोऽपरे । पारिप्लवश्च रैभ्यश्च मनोरन्तरमुच्यते ।
अथ पुत्रानिमांस्तस्य निबोध गदतो मम । धृतिमानव्ययो युक्तस्तत्त्वदर्शी निरुत्सुकः ।
अरण्यश्च प्रकाशश्च निर्मोहः सत्यवाक् कृती । रैवतस्य मनोः पुत्राः पञ्चमञ्चैतदन्तरं ।
षष्ठं ते सम्प्रवक्ष्यामि तन्निबोध नराधिप । भृगुर्नभो विवस्वांश्च सुधामा विरजास्तथा । ३५
अतिनामा सहिष्णुश्च सप्तैते तु महर्षयः । चाक्षुषस्यान्तरे तात मनोर्देवानिमान् शृणु ।
आप्याः प्रभूता ऋभवः पृथुकाश्च दिवौकसः । लेखा नाम महाराज पञ्च देवगणाः स्मृताः ।
ऋषेरङ्गिरसः पुत्रा महात्मानो महौजसः । नाड्वलेया महाराज दश पुत्रास्तु विश्रुताः ।
ऊरुप्रभृतयो राजन् षष्ठं मन्वन्तरं स्मृतं । अत्रिर्वशिष्ठो भगवान् कश्यपश्च महानृषिः ।
गौतमश्च भरद्वाजो विश्वामित्रस्तथैव च । तथैव पुत्रो भगवानृचीकस्य महात्मनः । ४०
सप्तमो जमदग्निश्च ऋषयः साम्प्रतं दिवि । साध्या रुद्राश्च विश्वे च वसवो मरुतस्तथा ।
आदित्याश्चाश्विनौ चैव देवौ वैवस्वतौ स्मृतौ । मनोर्वैवस्वतस्यैते वर्त्तन्ते साम्प्रतेऽन्तरे ।
इक्ष्वाकुप्रमुखाश्चैव दश पुत्रा महात्मनः । एतेषां कीर्त्तितानान्तु महर्षीणां महौजसां ।
राजन् पुत्राश्च पौत्राश्च दिक्षु सर्व्वासु भारत । मन्वन्तरेषु सर्व्वेषु प्राग्दिशं सप्त सप्तकाः ।
स्थिता लोकव्यवस्थार्थं लोकसंरक्षणाय च । मन्वन्तरे व्यतिक्रान्ते चत्वारः सप्तका गणाः । ४५
कृत्वा कर्म्म दिवं यान्ति ब्रह्मलोकमनामयं । ततोऽन्ये तपसा युक्ताः स्थानं तत्पूरयन्त्युत ।
अतीता वर्त्तमानाश्च क्रमेणैतेन भारत । एतान्युक्तानि कौरव्य सप्तातीतानि भारत ।
मन्वन्तराणि षट् चापि निबोधानागतानि मे । सावर्णा मनवस्तात पञ्च तांश्च निबोध मे ।
एको वैवस्वतस्तेषां चत्वारस्तु प्रजापतेः । परमेष्ठिसुतास्तात मेरुसावर्णितां गताः ।
दक्षस्यैते हि दौहित्राः प्रियायास्तनया नृप । महान्तस्तपसा युक्ता मेरुपृष्ठे महौजसः । ५०
रुचेः प्राजापतेः पुत्रो रौच्यो नाम मनुः स्मृतः । भूत्याञ्चोत्पादितो देव्यां भौत्यो नाम रुचेः सुतः ।
अनागताश्च सप्तैते स्मृता दिवि महर्षयः । मनोरन्तरमाद्यस्य सावर्णेरिह तान् शृणु ।
रामो व्यासस्तथाऽत्रेयो दीप्तिमानिति विश्रुतः । भारद्वाजस्तथा द्रौणिरश्वत्थामा महाद्युतिः ।
गौतमस्यात्मजश्चैव शरद्वान्नाम गौतमः । कौशिको गालवश्चैव रुरुः काश्यप एव च ।
एते सप्त महात्मानो भविष्या मुनिसत्तमाः । ब्रह्मणः सदृशाश्चैते धन्याः सप्तर्षयः स्मृताः । ५५
अभिजात्याऽथ तपसा मन्त्रव्याकरणैस्तथा । ब्रह्मलोकप्रतिष्ठास्तु स्मृता ब्रह्मर्षयोऽमलाः ।
भूतभव्यभवज्ज्ञानं बुद्ध्वा चैव च ये स्वयं । तपसा तु प्रसिद्धा ये सङ्गताः प्रविचिन्तकाः ।
मन्त्रव्याकरणाद्यैश्च ऐश्वर्य्यात्सर्व्वशश्च ये । एतान् भाव्यान्वितो ज्ञात्वा नैष्ठिकानि च नाम च ।
सप्तैते सप्तभिश्चैव गुणैः सप्तर्षयः स्मृताः । दीर्घायुषो मन्त्रकृत ईश्वरा दीर्घचक्षुषः ।
बुद्ध्या प्रत्यक्षधर्म्माणो गोत्रप्रावर्त्तकास्तथा । कृतादिषु युगाख्येषु सर्व्वेष्वेव पुनः पुनः । ६०

प्रावर्त्तयन्ति ते वर्णानाश्रमांश्चैव सर्व्वशः । सप्तर्षयो महाभागाः सत्यधर्म्मपरायणाः ।
तेषाञ्चैवान्वयोत्पन्ना जायन्तीह पुनः पुनः । मन्त्रब्राह्मणकर्त्तारो धर्म्मे प्रशिथिले तथा ।
यस्माच्च वरदाः सप्त परेभ्य एव याचिताः । तस्माच्च कालो न वयः प्रमाणन्तु विभाव्यते ।
एते सप्तर्षिकोद्देशो व्याख्यातस्ते मया नृप । सावर्णस्य मनोः पुत्त्रान् भविष्यान् शृणु सत्तम ।
वरीयांश्चावरीयांश्च संमतो धृतिमान्वसुः । चरिष्णुराद्यो धृष्णुश्च वाजः सुमतिरेव च ।
सावर्णस्य मनोः पुत्त्रा भविष्या दश भारत । प्रथमं मेरुसावर्णान् प्रवक्ष्यामि मुनीन् शृणु ।
मेधातिथिस्तु पौलस्त्यो वसुः काश्यप एव च । ज्योतिष्मान् भार्गवश्चैव द्युतिमानङ्गिरास्तथा ।
सवनश्चैव वाशिष्ठ आत्रेयो हव्यवाहनः । पौलहः सत्य इत्येते मुनयो रोहितेऽन्तरे ।
देवतानां गणास्तत्र त्रय एव नराधिप । दक्षपुत्त्रस्य पुत्त्रास्ते रोहितस्य प्रजापतेः ।
मनोः पुत्त्रो धृष्टकेतुः पञ्चहोत्रो निराकृतिः । पृथुः श्रवा भूरिधामा ऋचीकोऽष्टहतो गयः ।
प्रथमस्य तु सावर्णेर्नव पुत्त्रा महौजसः । दशमे त्वथ पर्य्याये द्वितीयस्यान्तरे मनोः ।
हविष्मान् पौलहश्चैव सुकृतिश्चैव भार्गवः । आपो मूर्त्तिस्तथाऽत्रेयो वाशिष्ठश्चाष्टमः स्मृतः ।
पौलस्त्यः प्रमतिश्चैव नभोगश्चैव काश्यपः । अङ्गिरा नभसः सत्यः सप्तैव परमर्षयः ।
देवतानां गणौ द्वौ तौ ऋषिमन्त्राश्च ये स्मृताः । मनोः सुतास्तमौजाश्च सुनिवक्षश्च वीर्य्यवान् ।
शतानीको निरामित्रो वृषसेनो जयद्रथः । भूरिद्युम्नः सुवर्चाश्च दश त्वेते मनोः सुताः ।
एकादशे तु पर्य्याये तृतीयस्यान्तरे मनोः । तस्य सप्त ऋषींश्चापि कीर्त्त्यमानान्निबोध मे ।
हविष्मान् काश्यपश्चापि हविष्मान् यश्च भार्गवः । तरुणश्च तथात्रेयो वाशिष्ठस्त्वनघस्तथा ।
अङ्गिराश्चोदधिष्णाश्च पौलस्त्यो निश्चरस्तथा । पुलहश्चाग्नितेजाश्च भाव्याः सप्त महर्षयः ।
ब्रह्मणस्तु सुता देवा गणास्तेषां त्रयः स्मृताः । सर्व्वत्रगः सुशर्म्मा च देवानीकः पुरूद्वहः ।
क्षेमधन्वा दृढायुश्च आदर्शः पण्डको मनुः । सावर्णस्य तु पुत्त्रा वै तृतीयस्य नव स्मृताः ।
चतुर्थस्य तु सावर्णस्यर्षीन् सप्त निबोध मे । द्युतिर्व्वशिष्ठपुत्त्रश्च आत्रेयः सुतपास्तथा ।
अङ्गिरास्तपसो मूर्त्तिस्तपस्वी काश्यपस्तथा । तपोशनश्च पौलस्त्यः पौलहश्च तपो रविः ।
भार्गवः सप्तमस्तेषां विज्ञेयस्तु तपो धृतिः । पञ्च देवगणाः प्रोक्ता मानसा ब्रह्मणश्च ते ।
देववायुरहरश्च देवश्रेष्ठो विदूरथः । मित्रवान्मित्रदेवश्च मित्रसेनश्च मित्रकृत् ।
मित्रवाहः सुवर्चाश्च द्वादशस्य मनोः सुताः । त्रयोदशेऽथ पर्य्याये भाव्ये मन्वन्तरे मनोः ।
अङ्गिराश्चैव धृतिमान् पौलस्त्यो हव्यपस्तु यः । पौलहस्तत्त्वदर्शी च भार्गवश्च निरुत्सुकः ।
निष्प्रकम्पस्तथात्रेयो निर्मोहः काश्यपस्तथा । सुतपाश्चैव वाशिष्ठः सप्तैते तु महर्षयः ।
त्रय एव गणाः प्रोक्ता देवतानां स्वयम्भुवा । त्रयोदशस्य पुत्त्रास्ते विज्ञेयास्तु रुचेः सुताः ।
चित्रसेनो विचित्रश्च नयो धर्म्मभृतो धृतः । सुनेत्रः क्षत्त्रवृद्धिश्च सुतपा निर्भयो दृढः ।
रौच्यस्यैते मनोः पुत्त्रा अन्तरे तु त्रयोदशे । चतुर्द्दशेऽथ पर्य्याये भौत्यस्यैवान्तरे मनोः ।

अग्नीध्रः काश्यपश्चैव पौलस्त्यो भार्गवस्तथा । भार्गवो ह्यतिबाहुश्च शुचिराङ्गिरसस्तथा ।
युक्तश्चैव तथात्रेयः शुक्रो वासिष्ठ एव च । अजितः पौलहश्चैव अन्त्याः सप्तर्षयश्च ते ।
एतेषां कल्यमुत्थाय कीर्त्तनात् सुखमेधते । यशश्चाप्नोति सुमहदायुष्मांश्च भवेत्तथा ।
अतीतानागतानां वै महर्षीणां सदा नरः । देवतानां गणाः प्रोक्ताः पञ्च वै भरतर्षभ ।
नरस्तुभीरुर्वप्रस्य नरस्यानुप एव च । अभिमानी प्रवीणश्च जिष्णुः संक्रन्दनस्तथा । ४९५
तेजस्वी सबलश्चैव भौत्यस्यैते मनोः सुताः । भौत्यस्यैवाधिकारे तु पूर्णे कल्पस्तु पूर्य्यते ।
इत्येते नामतोऽतीता मनवः कीर्त्तिता मया । तैरियं पृथिवी तात ससमुद्राम्बा सपत्तना ।
पूर्णं युगसहस्रन्तु परिपाल्या नराधिप । प्रजाभिश्चैव तपसा संहारस्तेषु नित्यशः ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि मनुवर्णने सप्तमोऽध्यायः ॥ ७ ॥
॥ जनमेजय उवाच ॥ मन्वन्तरस्य संख्यानं युगानाञ्च महामते । ब्रह्मणोऽह्नः प्रमाणञ्च वक्तुमर्हसि मे द्विज ।
॥ वैशम्पायन उवाच ॥ अहोरात्रं भवेत् सूर्य्यो मानवं लौकिकं परं । तमुपादाय गणनां शृणु संख्यामरिन्दम । ५००
निमेषैः पञ्चदशभिः काष्ठा त्रिंशत्तु ताः कला । त्रिंशत्कलो मुहूर्त्तस्तु त्रिंशता तैर्मनीषिणः ।
अहोरात्रमिति प्राज्ञश्चन्द्रसूर्य्यगतिं नृप । विशेषेण तु सर्व्वेषु अहोरात्रस्य निश्चयः ।
अहोरात्राः पञ्च दश पक्ष इत्यभिशब्दितः । पक्षौ द्वौ तु स्मृतो मासो द्वौ मासावृतुरुच्यते ।
अब्दं द्व्ययनमुक्तन्तु अयनं चर्तुभिस्त्रिभिः । दक्षिणञ्चोत्तरञ्चैव संख्यातत्त्वविशारदैः ।
मानेनानेन यो मासः पक्षद्वयसमन्वितः । पितॄणां तदहोरात्रमिति कालविदो विदुः । ५०५
कृष्णपक्षस्त्वहस्तेषां शुक्लपक्षस्तु शर्व्वरी । कृष्णपक्षे त्वहःशब्दं पितॄणां वर्त्तते नृप ।
मानुषेण तु मानेन यो वै संवत्सरः स्मृतः । देवानां तदहोरात्रं दिवा चैवोत्तरायणं ।
दक्षिणायनं स्मृता रात्रिः प्राज्ञैस्तत्त्वार्थकोविदैः । दिव्यमब्दं दशगुणमहोरात्रं मनोः स्मृतं ।
अहोरात्रं दशगुणं मानवः पक्ष उच्यते । पक्षा दशगुणो मासो मासैर्द्वादशभिर्गुणैः ।
चतुर्युगमनं संप्रोक्तः प्राज्ञैस्तत्त्वार्थदर्शिभिः । चतुर्य्युगेण स्वयमं तद्रूपेनैश वत्सवः । ५१०
चत्वार्य्येव सहस्राणि वर्षाणान्तु कृतं युगं । तावच्छती भवेत्सन्ध्या सन्ध्यांशश्च तथा नृप ।
त्रीणि वर्षसहस्राणि त्रेता स्यात् परिमाणतः । तस्याश्च त्रिशती सन्ध्या सन्ध्यांशश्च तथाऽपरः ।
तथा वर्षसहस्रे द्वे द्वापरं परिकीर्त्तितं । तस्यापि द्विशती सन्ध्या सन्ध्यांशश्च तथाविधः ।
कलिर्व्वर्षसहस्रन्तु संख्यातोऽत्र मनीषिभिः । तस्यापि शतिका सन्ध्या सन्ध्यांशश्चैव तद्विधः ।
एषा द्वादशसाहस्री युगसंख्या प्रकीर्त्तिता । दिव्येनानेन मानेन युगसंख्यां निबोध मे । ५१५
कृतं त्रेता द्वापरञ्च कलिश्चैव चतुर्युगं । युगं तदेकसप्तत्या गणितं नृपसत्तम ।
मन्वन्तरमिति प्रोक्तं संख्यानार्थविशारदैः । सदनस्यापि तत्प्रोक्तं देऽयने दक्षिणोत्तरे ।
मनुः प्रलीयते यत्र मन्वन्ते ऽ्यायने प्रभो । ततोऽपरो मनुः कालमेतावन्तं भवत्युत ।
समतीतेषु राजेन्द्र प्रोक्तः संवत्सरः स वै । तदेव चायतं प्रोक्तं मुनिना तत्त्वदर्शिना ।

ब्रह्मणस्तदहः प्रोक्तं कल्पश्चेति च कथ्यते । सहस्रयुगपर्य्यन्ता या निशा प्रोच्यते बुधैः । ५२०
निमज्जत्यप्सु यत्रोर्व्वी सशैलवनकानना । तस्मिन् युगसहस्रे तु पूर्णे भरतसत्तम ।
ब्राह्मे दिवसपर्य्यन्ते कल्पो निःशेष उच्यते । युगानि सप्ततिस्तानि साग्राणि कथितानि ते ।
कृतत्रेतादियुक्तानि मनोरन्तरमुच्यते । चतुर्दशैते मनवः कीर्त्तिताः कीर्त्तिवर्द्धनाः ।
वेदेषु सपुराणेषु सर्व्वेषु प्रभविष्णवः । प्रजानां पतयो राजन् धन्यमेषाञ्च कीर्त्तनं ।
मन्वन्तरेषु संहाराः संहारान्तेषु सम्भवाः । न शक्यमन्तस्तेषां वै वक्तुं वर्षशतैरपि । ५२५
विसर्गस्य प्रजानाञ्च संहारस्य च भारत । मन्वन्तरेषु संहाराः श्रूयन्ते भरतर्षभ ।
सशेषास्तत्र तिष्ठन्ति देवा ब्रह्मर्षिभिः सह । तपसा ब्रह्मचर्य्येण श्रुतेन च समन्विताः ।
पूर्णे युगसहस्रे तु कल्पो निःशेष उच्यते । तत्र सर्व्वाणि भूतानि दग्धान्यादित्यतेजसा ।
ब्रह्माणमग्रतः कृत्वा सहादित्यगणैर्विभो । प्रविशन्ति सुरश्रेष्ठं हरिं नारायणं प्रभुं ।
यः स्रष्टा सर्व्वभूतानां कल्पान्तेषु पुनः पुनः । अव्यक्तः शाश्वतो देवस्तस्य सर्व्वमिदं जगत् । ५३०
तत्र संवर्त्तते रात्रिः सकलैकार्णवे तदा । नारायणो वृधे निद्रां ब्राह्मं वर्षसहस्रकं ।
तावन्तमिति कालस्य रात्रिरित्यभिशब्दिता । निद्रायोगमनुप्राप्तो यस्यां शेते पितामहः ।
सा च रात्रिरपक्रान्ता सहस्रयुगपर्य्यया । तदा प्रबुद्धो भगवान् ब्रह्मा लोकपितामहः ।
पुनः सिसृक्षया युक्तः सर्गाय निदधे मनः । सैव स्मृतिः पुराणेयं तदुक्तं तद्विचेष्टितं ।
देवस्थानानि तान्येवं केवलञ्च विपर्य्ययं । ततो दग्धानि भूतानि सर्व्वाण्यादित्यरश्मिभिः । ५३५
देवर्षियक्षगन्धर्व्वपिशाचोरगराक्षसाः । जायन्ते च पुनस्तात युगे भरतसत्तम ।
यथर्त्तावृतुलिङ्गानि नानारूपाणि पर्य्यये । दृश्यन्ते तानि तान्येव तथा ब्राह्मीषु रात्रिषु ।
निष्क्रमित्वा प्रजाकारः प्रजापतिरसंशयं । ये च वै मानुषा देवाः सर्व्वे चैव महर्षयः ।
ते सङ्गताः शुद्धसङ्गाः श्मश्रुकर्म्म विसर्गतः । न भवन्ति पुनस्तात युगे भरतसत्तम ।
तत्सर्व्वं क्रमयोगेण कालसङ्ख्याविभागवित् । सहस्रयुगसङ्ख्यानं कृत्वा दिवसमीश्वरः । ५४०
रात्रिं युगसहस्रान्तां कृत्वा च भगवान्विभुः । संहरत्यथ भूतानि सृजते च पुनः पुनः ।
व्यक्ताव्यक्तो महादेवो हरिर्नारायणः प्रभुः । तस्य ते कीर्त्तयिष्यामि मनोर्वैवस्वतस्य वै ।
निसर्गं भरतश्रेष्ठ साम्प्रतस्य महाद्युते । वृष्णिवंशप्रसङ्गेन कथ्यमानं पुरातनं ।
यत्रोत्पन्नो महात्मा स हरिर्वृष्णिकुले प्रभुः । सर्व्वासुरविनाशाय सर्व्वलोकहिताय च ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि मन्वन्तरानुकीर्त्तने अष्टमोऽध्यायः ॥ ८॥
॥ वैशम्पायन उवाच ॥ विवस्वान् कश्यपाज्जज्ञे दाक्षायण्यामरिन्दम । तस्य भार्य्याऽभवत्संज्ञा त्वाष्ट्री देवी विवस्वतः । ५४५
सुरेणुरिति विख्याता त्रिषु लोकेषु भामिनी । सा वै भार्य्या भगवतो मार्त्तण्डस्य महात्मनः ।
भर्त्तृरूपेण नातुष्यद्रूपयौवनशालिनी । संज्ञा नाम सुतपसा सुदीप्तेन समन्विता ।
आदित्यस्य हि तद्रूपमार्त्तण्डस्य तु तेजसः । गात्रेषु परिदग्धं वै नातिकान्तमिवाभवत् ।

न खल्वयं मृतोऽण्डस्थ इति स्नेहादभाषत। अज्ञानात्कश्यपस्तस्मान्मार्त्तण्ड इति चोच्यते।
तेजस्त्वभ्यधिकं तात नित्यमेव विवस्वतः। येनातितापयामास त्रीन् लोकान् कश्यपात्मजः।
त्रीण्यपत्यानि कौरव्य संज्ञायां तपतांवरः। आदित्यो जनयामास कन्यां द्वौ च प्रजापती।
मनुर्वैवस्वतः पूर्व्वं श्राद्धदेवः प्रजापतिः। यमश्च यमुना चैव यमजौ सम्बभूवतुः।
श्यामवर्णन्तु तद्रूपं संज्ञा दृष्ट्वा विवस्वतः। असहन्ती तु स्वां छायां सवर्णां निर्ममे ततः।
मायामयी तु सा संज्ञा तस्याश्छाया समुत्थिता। प्राञ्जलिः प्रणता भूत्वा छाया संज्ञां नरेश्वर।
उवाच किं मया कार्य्यं कथयस्व शुचिस्मिते। स्थिताऽस्मि तव निर्द्देशे शाधि मां वरवर्णिनि।
॥ संज्ञोवाच ॥ अहं यास्यामि भद्रन्ते स्वमेव भवनं पितुः। त्वयेह भवने मह्यं वस्तव्यं निर्व्विकारया।
इमौ च बालकौ मह्यं कन्या चेयं सुमध्यमा। संभाव्यास्ते न चाख्येयमिदं भगवते क्वचित्।
॥ छायोवाच ॥ आकचग्रहणाद्देवि आशापान्नैव कर्हिचित्। आख्यास्यामि मतं तुभ्यं गच्छ देवि यथासुखं।
॥ वैशम्पायन उवाच ॥ समादिश्य सवर्णान्तु तथेत्युक्ता तया च सा। त्वष्टुः समीपमगमद्व्रीडितेव तपस्विनी।
पितुः समीपगा सा तु पित्रा निर्भर्त्सिता तदा। भर्त्तुः समीपं गच्छेति नियुक्ता च पुनः पुनः।
अगच्छद्वडवा भूत्वाच्छाद्य रूपमनिन्दिता। कुरूनथोत्तरान् गत्वा तृणान्यथ चचार ह।
द्वितीयायान्तु संज्ञायां संज्ञेयमिति चिन्तयन्। आदित्यो जनयामास पुत्त्रमात्मसमं तदा।
पूर्व्वजस्य मनोस्तात सदृशोऽयमिति प्रभुः। मनुरेवाभवन्नाम्ना सावर्ण इति चोच्यते।
द्वितीयो यः सुतस्तस्याः स विज्ञेयः शनैश्चरः। संज्ञा तु पार्थिवी तात स्वस्य पुत्त्रस्य वै तदा।
चकाराभ्यधिकं स्नेहं न तथा पूर्व्वजेषु वै। मनुस्तस्याक्षमत्तत्तु यमस्तस्या न चक्षमे।
तां स रोषाच्च बाल्याच्च भाविनोऽर्थस्य गौरवात्। पदा सन्तर्ज्जयामास संज्ञां वैवस्वतो यमः।
तं शशाप ततः क्रोधात्सावर्णजननी नृप। चरणः पततामेष तवेति भृशदुःखिता।
यमस्तु तत्पितुः सर्व्वं प्राञ्जलिः प्रत्यवेदयत्। भृशं शापभयोद्विग्नः संज्ञावाक्यैर्विवेजितः।
शापोऽयं विनिवर्त्तेत स प्राह पितरं तदा। मात्रा स्नेहेन सर्व्वेषु वर्त्तितव्यं सुतेषु वै।
सेयमस्मानपाहाय यवीयांसं बुभूषति। तस्यां मयोद्यतः पादो न तु देहे निपातितः।
बाल्याद्वा यदि वा मोहात्तद्भवान् क्षन्तुमर्हति। यस्मात्ते पूजनीयाऽहं लङ्घिताऽस्मि त्वया सुत।
तस्मात्तवैष चरणः पतिष्यति न संशयः। शप्तोऽहमस्मि लोकेश जनन्या तपतां वर।
तव प्रसादाच्चरणो न पतेन्मम गोपते।
॥ विवस्वानुवाच ॥ असंशयं महत् पुत्त्र भविष्यत्यत्र कारणं। येन त्वामाविशत् क्रोधो धर्म्मज्ञं सत्यवादिनं।
अशक्यमन्यथाकर्त्तुं मया मातृवचस्तव। कृमयो मांसमादाय यास्यन्ति धरणीतलं।
तव पादान्महाप्राज्ञ ततस्त्वम्प्राप्स्यसे सुखं। कृतमेवं वचः सत्यं मातुस्तव भविष्यति।
शापस्य परिहारेण त्वञ्च त्रातो भविष्यसि। आदित्योऽथाब्रवीत् संज्ञां किमर्थं तनयेषु वै।
तुल्येष्वभ्यधिकः स्नेहः क्रियतेऽति पुनः पुनः। सा तत् परिहरन्ती तु नाचचक्षे विवस्वते।

आत्मानं च समाधाय वैकल्यमवाप्नुत । तां शप्तुकामो भगवानाख्याय कुपितस्तदा ।
मूर्द्धजेषु च जग्राह समयेऽतिगते तु सा । ततः सर्वं यथावृत्तमाचचक्षे विवस्वते । १८०
विवस्वानथ तच्छ्रुत्वा क्रुद्धस्त्वष्टारमभ्यगात् । त्वष्टा तु तं यथान्यायमर्चयित्वा विभावसुम् ।
निर्दग्धुकामं रोषेण सान्त्वयामास वै तदा ।
॥ त्वष्टोवाच ॥ तवातितेजसाविष्टमिदं रूपं न शोभते । असहन्ती च तत् संज्ञा वने चरति शाड्वले ।
द्रष्टा हि तां भवानद्य स्वां भार्य्यां शुभचारिणीं । नित्यं तपस्यभिरतां वडवारूपधारिणीं ।
पर्णाहारां कृशां दीनां जटिलां ब्रह्मचारिणीं । हस्तिहस्तपरिक्लिष्टां व्याकुलां पद्मिनीमिव । १८५
श्लाघ्यां योगबलोपेतां योगमास्थाय गोपते । अनुकूलन्तु ते देव यदि स्यान्मम सम्मतं ।
रूपं निवर्त्तयाम्यद्य तव कान्तमरिन्दम । रूपं विवस्वतश्चासीत्तिर्य्यगूर्द्धं समं न वै ।
तेनासौ बहुतो देवो रूपेण तु विभावसुः । तस्मात्त्वष्टुः स वै वाक्यं बहु मेने प्रजापतिः ।
समनुज्ञातवांश्चैव त्वष्टारं रूपसिद्धये । ततोऽभ्युपगमात्त्वष्टा मार्त्तण्डस्य विवस्वतः ।
भ्रमिमारोप्य तत्तेजः शातयामास भारत । ततो निर्भासितं रूपं तेजसा संहतेन वै । १९०
कान्तात् कान्ततरं द्रष्टुमधिकं शुशुभे तदा । मुखे निर्वर्त्तितं रूपं तस्य देवस्य गोपतेः ।
ततः प्रभृति देवस्य मुखमासीत्तु लोहितं । मुखरागन्तु यत् पूर्व्वं मार्त्तण्डस्य मुखच्युतं ।
आदित्या द्वादशैवेह संभूता मुखसम्भवाः । धाताऽर्य्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ।
इन्द्रो विवस्वान् पूषा च पर्ज्जन्यो दशमस्तथा । ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ।
हर्षं लेभे ततो देवो दृष्ट्वादित्यान् स्वदेहजान् । गन्धैः पुष्पैरलङ्कारैर्भास्वता मुकुटेन च । १९५
एवं संपूजयामास त्वष्टा वाक्यमुवाच ह । गच्छ देव निजां भार्य्यां कुरूंश्चरति सोत्तरान् ।
वडवारूपमास्थाय वने चरति शाड्वले । स तथा रूपमास्थाय स्वां भार्य्यां शुभलोचनां ।
ददर्श योगमास्थाय स्वां भार्य्यां वडवां ततः । अधृष्यां सर्व्वभूतानां तपसा नियमेन च ।
वडवावपुषा राजंश्चरन्तीमकुतोभयां । सोऽश्वरूपेण भगवांस्तां मुखे समभावयत् ।
मैथुनाय विचेष्टन्तीं परपुंसविशङ्कया । सा तन्निरवमच्छुक्रं नासिकाभ्यां विवस्वतः । २००
देवौ तस्यामजायेतामश्विनौ भिषजाम्वरौ । नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनाविति ।
मार्त्तण्डस्यात्मजावेतावष्टमस्य प्रजापतेः । तान्तु रूपेण कान्तेन दर्शयामास भास्करः ।
सा तु दृष्ट्वैव भर्त्तारं तुतोष जनमेजय । यमस्तु कर्म्मणा तेन भृशं पीडितमानसः ।
धर्म्मेण रञ्जयामास धर्म्मराज इमाः प्रजाः । स लेभे कर्म्मणा तेन शुभेन परमद्युतिः ।
पितॄणामाधिपत्यञ्च लोकपालत्वमेव च । मनुः प्रजापतिस्त्वासीत् सावर्णः स तदोच्यते । २०५
भाव्यः सोऽनागते तस्मिन् मनुः सावर्णिकेऽन्तरे । मेरुपृष्ठे तपो घोरमद्यापि चरति प्रभुः ।
भ्राता शनैश्चरस्तस्य ग्रहत्वमुपलब्धवान् । नासत्यौ यौ समाख्यातौ स्वर्व्वैद्यौ तौ बभूवतुः ।
सेवतोऽपि तथा राजन्नश्वानां शान्तिदोऽभवत् । त्वष्टा तु तेजसा तेन विष्णोश्चक्रमकल्पयत् ।

तदप्रतिहतं युद्धे दानवानां निवर्हणं । यवीयसी तु याऽप्यासीद्यमी कन्या यशस्विनी ।
अभवत् सा सरिच्छ्रेष्ठा यमुना लोकभाविनी । मनुरित्युच्यते लोके सावर्ण इति चोच्यते । ६१०
द्वितीयो यः सुतस्तस्य मनोर्भ्राता शनैश्चरः । ग्रहत्वं स तु लेभे वै सर्व्वलोकाभिपूजितं ।
य इदं जन्म देवानां शृणुयाद्वाऽपि धारयेत् । आपदः स विमुच्येत प्राप्नुयाच्च महद्यशः ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि वैवस्वतोत्पत्तिकथने नवमोऽध्यायः ॥ ९ ॥
॥ वैशम्पायन उवाच ॥ मनोर्वैवस्वतस्यासन् पुत्रा वै नव तत्समाः । इक्ष्वाकुश्चैव नाभागो धृष्णुः शर्यातिरेव च ।
नरिष्यन्तस्तथा प्रांशुर्नाभागारिष्टसप्तमाः । करूषश्च पृषध्रश्च नवैते भरतर्षभ ।
अकरोत् पुत्रकामस्तु मनुरिष्टिं प्रजापतिः । मित्रावरुणयोस्तात पूर्व्वमेव विशाम्पते । ६१५
अनुत्पन्नेषु नवसु पुत्रेष्वेतेषु भारत । तस्यान्तु वर्त्तमानायामिष्ट्यां भरतसत्तम ।
मित्रावरुणयोरंशे मनुराहुतिमाजुहोत् । आहुत्यां हूयमानायां देवगन्धर्व्वमानवाः ।
तुष्टिञ्च परमां जग्मुर्मुनयश्च तपोधनाः । अहोऽस्य तपसो वीर्य्यमहो श्रुतमहोऽद्भुतं ।
तत्र दिव्याम्बरधरा दिव्याभरणभूषिता । दिव्यसंहनना चैव इडा जज्ञे इति श्रुतिः ।
तामिडेत्येव होवाच मनुर्दण्डधरस्तदा । अनुगच्छस्व मां भद्रे तमिडा प्रत्युवाच ह । ६२०
धर्म्मयुक्तमिदं वाक्यं पुत्रकामं प्रजापतिं ।
॥ इडोवाच ॥ मित्रावरुणयोरंशे जाताऽस्मि वदताम्वर । तयोः सकाशं यास्यामि न मां धर्म्मो हतोऽवधीत् ।
सैवमुक्त्वा मनुं देवं मित्रावरुणयोरिडा । गत्वाऽन्तिकं वरारोहा प्राञ्जलिर्वाक्यमव्रवीत् ।
अंशेऽस्मि युवयोर्जाता देवौ किं करवाणि वां । मनुना चाहमुक्ता वै अनुगच्छस्व मामिति ।
तां तथावादिनीं साध्वीमिडां धर्म्मपरायणां । मित्रश्च वरुणश्चोभावूचतुर्यन्निबोध तत् । ६२५
अनेन तव धर्म्मेण प्रश्रयेण दमेन च । सत्येन चैव सुश्रोणि प्रीतौ स्वो वरवर्णिनि ।
आवयोस्त्वं महाभागे ख्यातिं कन्येति यास्यसि । मनोर्वंशकरः पुत्रस्त्वमेव च भविष्यसि ।
सुद्युम्न इति विख्यातस्त्रिषु लोकेषु शोभने । जगत्प्रियो धर्म्मशीलो मनोर्वंशविवर्द्धनः ।
निवृत्ता सा तु तच्छ्रुत्वा गच्छन्ती पितुरन्तिकं । बुधेनान्तरमासाद्य मैथुनायोपमन्त्रिता ।
सोमपुत्राद्बुधाद्राजंस्तस्यां जज्ञे पुरूरवाः । जनयित्वा सुतं सा तमिडा सुद्युम्नतां गता । ६३०
सुद्युम्नस्य तु दायादास्त्रयः परमधार्म्मिकाः । उत्कलश्च गयश्चैव विनताश्वश्च भारत ।
उत्कलस्योत्कला राजन् विनताश्वस्य पश्चिमा । दिक् पूर्व्वा भरतश्रेष्ठ गयस्य तु गया पुरी ।
प्रविष्टे तु मनौ तात दिवाकरमरिन्दम । दशधा तद्दधत् क्षत्रमकरोत् पृथिवीमिमां ।
यूपाङ्किता च पृथिवी यस्येयं सवनाकरा । इक्ष्वाकुर्ज्येष्ठदायादो मध्यदेशमवाप्तवान् ।
कन्याभावात्तु सुद्युम्नो नैनं गुणमवाप्तवान् । वसिष्ठवचनात्त्वासीत् प्रतिष्ठाने महात्मनः । ६३५
प्रतिष्ठा धर्म्मराजस्य सुद्युम्नस्य कुरूद्वह । तत् पुरूरवसे प्रादाद्राज्यं प्राप्य महायशाः ।
सुद्युम्नः कारयामास प्रतिष्ठाने नृपक्रियां । धुन्धुकश्चाम्बरीषश्च दण्डकश्चेति ते त्रयः ।

यश्चकार महात्मा वै दण्डकारण्यमुत्तमं । वनं तल्लोकविख्यातं तापसानामनुत्तमं ।
तत्र प्रतिष्ठमानस्तु नरः पापात् प्रमुच्यते । सुद्युम्नस्तु दिवं यात ऐलमुत्पाद्य भारत ।
मानवेयो महाराज स्त्रीपुंसोर्लक्षणैर्युतः । धृतवान् य इलेत्येवं सुद्युम्नश्चेति विश्रुतः । ६४०
नरिष्यतः शकाः पुत्रा नाभागस्य तु भारत । अम्बरीषोऽभवत् पुत्रः पार्थिवर्षभसत्तमः ।
धृष्टस्य धार्ष्टकं क्षत्रं रणे दृष्टं बभूव ह । शर्यातेर्मिथुनं त्वासीदानर्त्तो नाम विश्रुतः ।
पुत्रः कन्या सुकन्याख्या या पत्नी च्यवनस्य ह । आनर्त्तस्य तु दायादो रेवो नाम महाद्युतिः ।
आनर्त्तविषयश्चासीत् पुरी चास्य कुशस्थली । रेवस्य रैवतः पुत्रः ककुद्मी नाम धार्म्मिकः ।
ज्येष्ठः पुत्रशतस्यासीद्राज्यं प्राप्य कुशस्थलीं । स कन्यासहितः श्रुत्वा गान्धर्वं ब्रह्मणोऽन्तिके । ६४५
मुहूर्त्तभूतं देवस्य गतं बहुयुगं प्रभो । आजगाम युवैवाथ स्वां पुरीं यादवैर्वृतां ।
कृतां द्वारवतीं नाम्ना बहुद्वारां मनोरमां । भोजवृष्ण्यन्धकैर्गुप्तां वासुदेवपुरोगमैः ।
ततस्तद्रैवतो ज्ञात्वा यथातत्त्वमरिन्दम । कन्यां तां बलदेवाय सुव्रतां नाम रेवतीं ।
दत्त्वा जगाम शिखरं मेरोस्तपसि संश्रितः । रेमे रामोऽपि धर्म्मात्मा रेवत्या सहितः सुखी ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि ऐलोत्पत्तौ दशमोऽध्यायः ॥ १० ॥
॥ जनमेजय उवाच ॥ कथं बहुयुगे काले समतीते द्विजोत्तम । न जरा रेवतीं प्राप्ता रैवतं वा ककुद्मिनं । ६५०
मेरुं गतस्य वा तस्य शर्यातेः सन्ततिः कथं । स्थिता पृथिव्यामद्यापि श्रोतुमिच्छामि तत्त्वतः ।
॥ वैशम्पायन उवाच ॥ न जरा क्षुत्पिपासा वा न मृत्युर्भरतर्षभ । ऋतुचक्रं न भवति ब्रह्मलोके सदाऽनघ ।
ककुद्मिनस्तु तं लोकं रैवतस्य गतस्य ह । हृता पुण्यजनैस्तात राक्षसैः सा कुशस्थली ।
तस्य भ्रातृशतं त्वासीद्धार्म्मिकस्य महात्मनः । तद्वध्यमानं रक्षोभिर्दिशः प्राद्रवदच्युत ।
विद्रुतस्य तु राजेन्द्र तस्य भ्रातृशतस्य वै । तेषान्तु ते भयाक्रान्ताः क्षत्रियास्तत्र तत्र ह । ६५५
अन्ववायस्तु सुमहांस्तत्र तत्र विशाम्पते । येषामेते महाराज शर्याता इति विश्रुताः ।
क्षत्रिया भरतश्रेष्ठ दिक्षु सर्व्वासु विश्रुताः । सर्व्वशः पर्व्वतगणान् प्रविष्टाः कुरुनन्दन ।
नाभागारिष्टपुत्रौ द्वौ वैश्यौ ब्राह्मणतां गतौ । करूषस्य तु कारूषाः क्षत्रिया युद्धदुर्म्मदाः ।
पृषध्रो हिंसयित्वा तु गुरोर्गां जनमेजय । शापाच्छूद्रत्वमापन्नो नव ते परिकीर्त्तिताः ।
वैवस्वतस्य तनया मनोर्वै भरतर्षभ । क्षुवतस्तु मनोः पुत्र इक्ष्वाकुरभवत् सुतः । ६६०
तस्य पुत्रशतं त्वासीदिक्ष्वाकोर्भूरिदक्षिणं । तेषां ज्येष्ठो विकुक्षिस्तु विकुक्षित्वादयोधतां ।
प्राप्तः परमधर्म्मज्ञः सोऽयोध्याधिपतिः प्रभुः । शकुनिप्रमुखास्तस्य पुत्राः पञ्चाशदुत्तमाः ।
उत्तरापथदेशस्था रक्षितारो विशाम्पते । चत्वारिंशदथाष्टौ च दक्षिणस्यां तथा दिशि ।
वशातिप्रमुखास्त्वन्ये रक्षितारो विशाम्पते । इक्ष्वाकुस्तु विकुक्षिं वै अष्टकायामथादिशत् ।
मांसमानय श्राद्धार्थं मृगं हत्वा महाबल । श्राद्धकर्म्मणि चोद्दिष्टमकृते श्राद्धकर्म्मणि । ६६५
भक्षयित्वा शशं तात शशादो मृगयां गतः । इक्ष्वाकुणा परित्यक्तो वसिष्ठवचनात् प्रभुः ।

इक्ष्वाकौ संस्थिते तात शशादस्समयावसत्। शशादस्य तु दायादः ककुत्स्थो नाम वीर्य्यवान्।
इन्द्रस्य वृषभूतस्य ककुत्स्थोऽजयतासुरान्। पूर्व्वमाडीवके युद्धे ककुत्स्थस्तेन स स्मृतः।
अनेनास्तु ककुत्स्थस्य पृथुरानेनसः स्मृतः। विष्टराश्वः पृथोः पुत्रस्तस्मादार्द्रस्त्वजायत।
आर्द्रस्य युवनाश्वस्तु श्रावस्तस्तस्य चात्मजः। जज्ञे श्रावस्तको राजा श्रावस्ती येन निर्म्मिता। ६७०
श्रावस्तस्य तु दायादो बृहदश्वो महीपतिः। कुवलाश्वः सुतस्तस्य राजा परमधार्म्मिकः।
यः स धुन्धुवधाद्राजा धुन्धुमारत्वमागतः।
॥ जनमेजय उवाच ॥ धुन्धोर्व्वधमहं ब्रह्मन् श्रोतुमिच्छामि तत्त्वतः। यदर्थं कुवलाश्वः स धुन्धुमारत्वमागतः।
॥ वैशम्पायन उवाच ॥ कुवलाश्वस्य पुत्राणां शतमुत्तमधन्विनां। सर्व्वे विद्यासु निष्णाता बलवन्तो दुरासदाः।
बभूवुर्धार्म्मिकाः सर्व्वे यज्वानो भूरिदक्षिणाः। कुवलाश्वं पिता राज्ये बृहदश्वो न्ययोजयत्। ६७५
पुत्रसंक्रामितश्रीस्तु वनं राजा समाविशत्। तमुतङ्कोऽथ विप्रर्षिः प्रयान्तं प्रत्यवारयत्।
॥ उतङ्क उवाच ॥ भवता रक्षणं कार्य्यं तत्तावत् कर्त्तुमर्हसि। निरुद्विग्नस्तपश्चर्त्तुं न हि शक्नोमि पार्थिव।
ममाश्रमसमीपे वै समेषु मरुधन्वसु। समुद्रो वालुकापूर्ण उज्जानक इति श्रुतः।
देवतानामवध्यश्च महाकायो महाबलः। अन्तर्भूमिगतस्तत्र वालुकान्तर्हितो महान्।
राक्षसस्य मधोः पुत्रो धुन्धुर्नाम महासुरः। शेते लोकविनाशाय तप आस्थाय दारुणं। ६८०
संवत्सरस्य पर्य्यन्ते स निश्वासं विमुञ्चति। यदा तदा भूश्चलति सशैलवनकानना।
तस्य निश्वासवातेन रज उद्धूयते महत्। आदित्यपथमावृत्य सप्ताहं भूमिकम्पनं।
सविस्फुलिङ्गं साङ्गारं सधूममतिदारुणं। तेन तात न शक्नोमि तस्मिन् स्थातुं स्व आश्रमे।
तं मारय महाकायं लोकानां हितकाम्यया। लोकाः स्वस्था भवन्त्वद्य तस्मिन् विनिहते त्वया।
त्वं हि तस्य वधायैकः समर्थः पृथिवीपते। विष्णुना च वरो दत्तो मह्यं पूर्व्वयुगेऽनघ। ६८५
यस्तं महासुरं रौद्रं हनिष्यति महाबलं। तस्य त्वं वरदानेन तेज आप्याययिष्यसि।
न हि धुन्धुर्महातेजास्तेजसाऽल्पेन शक्यते। निर्दग्धुं पृथिवीपाल दिव्यवर्षशतैरपि।
वीर्य्यं हि सुमहत्तस्य देवैरपि दुरासदं। स एवमुक्तो राजर्षिरुतङ्केन महात्मना।
कुवलाश्वं सुतं प्रादात्तस्मिन् धुन्धुनिवर्हणे।
॥ बृहदश्व उवाच ॥ भगवन् न्यस्तशस्त्रोऽहमयन्तु तनयो मम। भविष्यति द्विजश्रेष्ठ धुन्धुमारो न संशयः। ६९०
स तं व्यादिश्य तनयं राजर्षिर्धुन्धुमारणे। जगाम पर्व्वतायैव तपसे संशितव्रतः।
कुवलाश्वस्तु पुत्राणां शतेन सह पार्थिवः। प्रायादुतङ्कसहितो धुन्धोस्तस्य निवर्हणे।
तमाविशत्तदा विष्णुस्तेजसा भगवान् प्रभुः। उतङ्कस्य नियोगाद्वै लोकानां हितकाम्यया।
तस्मिन् प्रयाते दुर्द्धर्षे दिवि शब्दो महानभूत्। एष श्रीमानवध्योऽद्य धुन्धुमारो भविष्यति।
दिव्यैर्माल्यैश्च तं देवाः समन्तात् समवाकिरन्। देवदुन्दुभयश्चैव प्रणेदुर्भरतर्षभ। ६९५
स गत्वा जयतां श्रेष्ठस्तनयैः सह वीर्य्यवान्। समुद्रं खानयामास वालुकापूर्णमव्ययं।

नारायणेन कौरव्य तेजसाऽऽप्यायितस्तदा । स बभूव महातेजा भूयो बलसमन्वितः ।
तस्य पुत्रैः खनद्भिश्च वालुकान्तर्हितस्तदा । धुन्धुरासादितो राजन् दिशमाश्रित्य पश्चिमां ।
मुखजेनाग्निना क्रोधाल्लोकानुद्वर्त्तयन्निव । वारि सुस्राव वेगेन महोदधिरिवोदये ।
सोमस्य भरतश्रेष्ठ धारोर्म्मिकलिलं महत् । तस्य पुत्रशतं दग्धं त्रिभिरूनन्तु रक्षसा । ७००
ततः स राजा कौरव्य राक्षसं तं महाबलं । आससाद महातेजा धुन्धुं धुन्धुनिवर्हणः ।
तस्य वारिमयं वेगमपिवत् स नराधिपः । योगी योगेन वह्निञ्च शमयामास वारिणा ।
निहत्य तं महाकायं बलेनोदकराक्षसं । उतङ्कं दर्शयामास कृतकर्म्मा नराधिपः ।
उतङ्कस्तु वरं प्रादात्तस्मै राज्ञे महात्मने । तस्याक्षयं ददौ वित्तं शत्रुभिश्चापराजयं ।
धर्म्मे रतिञ्च सततं स्वर्गे वासं तथाऽक्षयं । पुत्राणाञ्चाक्षयान् लोकान् स्वर्गे ये रक्षसा हताः । ७०५
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि धुन्धुवधे एकादशोऽध्यायः ॥ ११ ॥
॥ वैशम्पायन उवाच ॥ तस्य पुत्रास्त्रयः शिष्टा दृढाश्वो ज्येष्ठ उच्यते । चन्द्राश्वकपिलाश्वौ तु कुमारौ द्वौ कनीयसौ ।
धौन्धुमारिर्दृढाश्वस्तु हर्य्यश्वस्तस्य चात्मजः । हर्य्यश्वस्य निकुम्भोऽभूत् क्षत्रधर्म्मरतः सदा ।
संहताश्वो निकुम्भस्य पुत्रो रणविशारदः । अकृशाश्वकृशाश्वौ तु संहताश्वसुतौ नृप ।
तस्य हैमवती कन्या सतां माता दृषद्वती । विख्याता त्रिषु लोकेषु पुत्रश्चास्याः प्रसेनजित् ।
लेभे प्रसेनजिद्भार्य्यां गौरीं नाम पतिव्रताम् । अभिशप्ता तु सा भर्त्रा नदी वै बाहुदाऽभवत् । ७१०
तस्याः पुत्रो महानासीत् युवनाश्वो महीपतिः । मान्धाता युवनाश्वस्य त्रिलोकविजयी सुतः ।
तस्य चैत्ररथी भार्य्या शशबिन्दोः सुताऽभवत् । साध्वी बिन्दुमती नाम रूपेणासदृशी भुवि ।
पतिव्रता च ज्येष्ठा च भ्रातॄणामयुतस्य सा । तस्यामुत्पादयामास मान्धाता द्वौ सुतौ नृप ।
पुरुकुत्सञ्च धर्म्मज्ञं मुचुकुन्दञ्च धार्म्मिकं । पुरुकुत्ससुतस्त्वासीत्त्रसदस्युर्महीपतिः ।
नर्म्मदायामथोत्पन्नः सम्भूतस्तस्य चात्मजः । सम्भूतस्य च दायादः सुधन्वा नाम पार्थिवः । ७१५
सुधन्वनः सुतश्चासीत्त्रिधन्वा रिपुमर्द्दनः । राज्ञस्त्रिधर्म्मणश्चासीद्विद्वांस्त्रय्यारुणः सुतः ।
तस्य सत्यव्रतो नाम कुमारोऽभून्महाबलः । पाणिग्रहणमन्त्राणां विघ्नं चक्रे स दुर्म्मतिः ।
येन भार्य्या हृता पूर्व्वं कृतोद्वाहा परस्य वै । बाल्यात्कामाच्च मोहाच्च संहर्षाच्चापलेन च ।
जहार कामात्कन्यां स कस्यचित्पुरवासिनः । अधर्म्मशङ्कुना तेन राजा त्रय्यारुणोऽत्यजत् ।
अपध्वंसेति बहुशो वदन् क्रोधसमन्वितः । पितरं सोऽब्रवीत्त्यक्तः क्व गच्छामीति वै मुहुः । ७२०
पिता च तमथोवाच श्वपाकैः सह वर्त्तय । नाहं पुत्रेण पुत्रार्थी त्वयाऽद्य कुलपांसन ।
इत्युक्तः स निराक्रामन्नगराद्वचनात्पितुः । न च तं वारयामास वशिष्ठो भगवानृषिः ।
स तु सत्यव्रतस्तात श्वपाकावसथान्तिके । पित्रा त्यक्तोऽवसद्वीरः पिताऽप्यस्य वनं ययौ ।
ततस्तस्मिंस्तु विषये नावर्षत्पाकशासनः । समा द्वादश राजेन्द्र तेनाधर्म्मेण वै तदा ।
दारांस्तु तस्य विषये विश्वामित्रो महातपाः । संन्यस्य सागरानूपे चचार विपुलं तपः । ७२५

तस्य पत्नी गले बद्ध्वा मध्यमं पुत्रमौरसं। शेषस्य भरणार्थाय व्यक्रीणाद्गोशतेन वै ।
तन्तु बद्धं गले दृष्ट्वा विक्रयार्थं नृपात्मजः। महर्षिपुत्रं धर्मात्मा मोक्षयामास भारत ।
सत्यव्रतो महाबाहुर्भरणञ्चास्य चाकरोत्। विश्वामित्रस्य तुष्ट्यर्थमनुकम्पार्थमेव च ।
सोऽभवद्गालवो नाम गले बन्धान्महातपाः। महर्षिः कौशिकस्तात तेन वीरेण मोक्षितः ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि गालवोत्पत्तौ द्वादशोऽध्यायः ॥ १२ ॥

॥ वैशम्पायन उवाच ॥ सत्यव्रतस्तु भक्त्या च कृपया च प्रतिज्ञया। विश्वामित्रकलत्रं तद्बभार विनये स्थितः । ७१०
हत्वा मृगान् वराहांश्च महिषांश्च वनेचरान्। विश्वामित्राश्रमाभ्याशे मांसं वृक्षे बबन्ध सः ।
उपांशुव्रतमास्थाय दीक्षां द्वादशवार्षिकीं। पितुर्नियोगादवसत्तस्मिन् वनगते नृपे ।
अयोध्याञ्चैव राष्ट्रं च तथैवान्तःपुरं मुनिः। याज्योपाध्यायसम्बन्धाद्वशिष्ठः पर्य्यरक्षत ।
सत्यव्रतस्तु बाल्याद्वै भाविनोऽर्थस्य वा बलात्। वशिष्ठेऽभ्यधिकं मन्युं धारयामास नित्यदा ।
पित्रा हि तं तदा राष्ट्रात्त्यज्यमानं स्वमात्मजं। न वारयामास मुनिर्व्वशिष्ठः कारणेन ह । ७१५
पाणिग्रहणमन्त्राणां निष्ठा स्यात्सप्तमे पदे। न च सत्यव्रतस्तस्माद्धृतवान् सप्तमे पदे ।
जानन्धर्मान् वशिष्ठस्तु न मां त्रातीति भारत। सत्यव्रतस्तदा रोषं वशिष्ठे मनसाऽकरोत् ।
गुणबुद्ध्या तु भगवान् वशिष्ठः कृतवांस्तदा। न च सत्यव्रतस्तस्य तमुपांशुमबुध्यत ।
तस्मिन्नपरितोषो यः पितुरासीन्महात्मनः। तेन द्वादशवर्षाणि नावर्षत् पाकशासनः ।
तेन त्विदानीं वहता दीक्षान्तां दुर्व्वहां भुवि। कुलस्य निष्कृतिस्तात कृता सा वै भवेदिति । ७२०
न तं वशिष्ठो भगवान् पित्रा त्यक्तं न्यवारयत्। अभिषेक्ष्याम्यहं पुत्रमस्येत्येवं मतिर्मुनेः ।
स तु द्वादशवर्षाणि तां दीक्षामवहन् बली। अविद्यमाने मांसे तु वशिष्ठस्य महात्मनः ।
सर्व्वकामदुघान्दोग्ध्रीं ददर्श स नृपात्मजः। तां वै क्रोधाच्च मोहाच्च श्रमाच्चैव क्षुधार्दितः ।
दशधर्म्मगतो राजा जघान जनमेजय। मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ।
त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश। तच्च मांसं स्वयञ्चैव विश्वामित्रस्य चात्मजान् । ७२५
भोजयामास तच्छ्रुत्वा वशिष्ठोऽप्यस्य चुक्रुधे। क्रुद्धस्तु भगवान्वाक्यमिदमाह नृपात्मजं ।
॥ वशिष्ठ उवाच ॥ पातयेयमहं क्रूर तव शङ्कुमसंशयं। यदि ते द्वाविमौ शङ्कू न स्यातां वै पुनः कृतौ ।
पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च। अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः ।
॥ वैशम्पायन उवाच ॥ एवं त्रीण्यस्य शङ्कूनि तानि दृष्ट्वा महातपाः। त्रिशङ्कुरिति होवाच त्रिशङ्कुस्तेन स स्मृतः ।
विश्वामित्रस्तु दाराणामागतो भरणे कृते। स तु तस्मै वरं प्रादान्मुनिः प्रीतस्त्रिशङ्कवे । ७३०
छन्द्यमानो वरेणाथ वरं वव्रे नृपात्मजः। सशरीरो व्रजे स्वर्गमित्येवं याचितो वरः ।
अनावृष्टिभये तस्मिन् गते द्वादशवार्षिके। पित्र्येऽभिषिच्य राज्ये तु याजयामास तं मुनिः ।
मिषतां देवतानाञ्च वशिष्ठस्य च कौशिकः। सशरीरं तदा तन्तु दिवमारोपयत्प्रभुः ।
तस्य सत्यरथा नाम पत्नी कैकयवंशजा। कुमारं जनयामास हरिश्चन्द्रमकल्मषं ।

स वै राजा हरिश्चन्द्रस्त्रैशङ्कव इति स्मृतः । आहर्त्ता राजसूयस्य सम्राडिति च विश्रुतः ।
हरिश्चन्द्रस्य पुत्रोऽभूद्रोहितो नाम वीर्य्यवान् । येनेदं रोहितपुरं कारितं राज्यसिद्धये ।
कृत्वा राज्यं स राजर्षिः पालयित्वा तथा प्रजाः । संसारासारतां ज्ञात्वा द्विजेभ्यस्तत्पुरं ददौ ।
हरितो रोहितस्याथ चञ्चुर्हारित उच्यते । विजयश्च सुदेवश्च चञ्चुपुत्रौ बभूवतुः ।
जेता क्षत्रस्य सर्व्वस्य विजयस्तेन स स्मृतः । रुरुकस्तनयस्तस्य राजा धर्म्मार्थकोविदः ।
रुरुकस्य वृकः पुत्रो वृकाद्बाहुस्तु जज्ञिवान् । शकैर्यवनकाम्बोजैः पारदैः पह्लवैः सह ।
हैहयास्तालजङ्घाश्च निरस्यन्ति स्म तं नृपं । नात्यर्थं धार्म्मिकस्तात स हि धर्म्मयुगेऽभवत् ।
सगरस्तु सुतो बाहोर्जज्ञे सह गरेण वै । और्व्वस्याश्रममासाद्य भार्गवेणाभिरक्षितः ।
आग्नेयमस्त्रं लब्ध्वा च भार्गवात्सगरो नृपः । जिगाय पृथिवीं हत्वा तालजङ्घान् सहैहयान् ।
शकानां पह्लवानाञ्च धर्म्मं निरसदच्युतः । क्षत्रियाणां कुरुश्रेष्ठ पारदानां च धर्म्मवित् ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि त्रिशङ्कुचरिते त्रयोदशोऽध्यायः ॥ १३ ॥

॥ जनमेजय उवाच ॥ कथं स सगरो जातो गरेणैव सहाच्युतः । किमर्थञ्च शकादीनां क्षत्रियाणां महौजसां ।
धर्म्मं कुलोचितं क्रुद्धो राजा निरसदच्युतः । एतन्मे सर्व्वमाचक्ष्व विस्तरेण तपोधन ।
॥ वैशम्पायन उवाच ॥ बाहोर्व्यसनिनस्तात हृतं राज्यमभूत्किल । हैहयैस्तालजङ्घैश्च शकैः सार्द्धं विशाम्पते ।
यवनाः पारदाश्चैव काम्बोजाः पह्लवाः खसाः । एते ह्यपि गणाः पञ्च हैहयार्थे पराक्रमन् ।
हृतराज्यस्तदा राजा स वै बाहुर्वनं ययौ । पत्न्या चानुगतो दुःखी वने प्राणानवासृजत् ।
पत्नी तु यादवी तस्य सगर्भा पृष्ठतोऽन्वगात् । सपत्न्या तु गरस्तस्यै दत्तः पूर्व्वमभूत्किल ।
सा तु भर्त्तुश्चितां कृत्वा वने तामभ्यरोहत । और्व्वस्तां भार्गवस्तात कारुण्यात्समवारयत् ।
तस्याश्रमे च तं गर्भं गरेणैव सहाच्युत । व्यजायत महाबाहुं सगरं नाम पार्थिवं ।
और्व्वस्तु जातकर्म्मादि तस्य कृत्वा महात्मनः । अध्याप्य वेदानखिलांस्ततोऽस्त्रं प्रत्यपादयत् ।
आग्नेयन्तु महाबाहुरमरैरपि दुःसहं । स तेनास्त्रबलेनाजौ बलेन च समन्वितः ।
हैहयान्विजघानाशु क्रुद्धो रुद्रः पशूनिव । आजहार च लोकेषु कीर्त्तिं कीर्त्तिमतांवरः ।
ततः शकान् सयवनान् काम्बोजान् पारदांस्तथा । पह्लवांश्चैव निःशेषान् कर्त्तुं व्यवसितः किल ।
ते वध्यमाना वीरेण सगरेण महात्मना । वशिष्ठं शरणं गत्वा प्रणिपेतुर्मनीषिणं ।
वशिष्ठस्त्वथ तान् दृष्ट्वा समयेन महाद्युतिः । सगरं वारयामास तेषां दत्त्वाऽभयन्तदा ।
सगरः स्वाम्प्रतिज्ञाञ्च गुरोर्वाक्यं निशम्य च । धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह ।
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्ज्जयत् । यवनानां शिरः सर्व्वं काम्बोजानां तथैव च ।
पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः । निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना ।
शका यवनकाम्बोजाः पारदाः पह्लवास्तथा । कोलिसर्पाः समहिषा दार्व्वाश्चोलाः सकेरलाः ।
सर्व्वे ते क्षत्रियास्तात धर्म्मस्तेषां निराकृतः । वशिष्ठवचनाद्राजन् सगरेण महात्मना ।

खशांस्तुखारांश्चोलांश्च मद्रान् किष्किन्धकांस्तथा । कौन्तलांश्च तथा वङ्गान् साल्वान् कौङ्कणकांस्तथा ।
स धर्म्मविजयी राजा विजित्येमां वसुन्धरां । अश्वं प्रचारयामास वाजिमेधाय दीक्षितः । ७८५
तस्य चारयतः सोऽश्वः समुद्रे पूर्व्वदक्षिणे । वेलासमीपेऽपहृतो भूमिञ्चैव प्रवेशितः ।
स तं देशं तदा पुत्त्रैः खानयामास पार्थिवः । आसेदुस्ते तदा तत्र खन्यमाने महार्णवे ।
तमादिदेवं पुरुषं हरिं कृष्णं प्रजापतिं । विष्णुं कपिलरूपेण स्वपन्तं पुरुषोत्तमं ।
तस्य चक्षुःसमुत्थेन तेजसा प्रतिबुध्यतः । दग्धास्ते वै महाराज चत्वारस्त्ववशेषिताः ।
बर्हकेतुः सुकेतुश्च तथा धर्म्मरथो नृपः । शूरः पञ्चजनो नाम तस्य वंशकरा नृप । ७९०
प्रादाच्च तस्मै भगवान् हरिर्नारायणो वरं । अक्षयं वंशमिक्ष्वाकोः कीर्त्तिञ्चाप्यनिवर्त्तिनीं ।
पुत्त्रं समुद्रञ्च विभुः स्वर्गे वासन्तथाऽक्षयं । पुत्त्राणां चाक्षयान् लोकान् तस्य ये चक्षुषा हताः ।
समुद्रश्चार्घ्यमादाय ववन्दे तं महीपतिं । सागरत्वञ्च लेभे स कर्म्मणा तेन तस्य वै ।
तञ्चाश्वमेधिकं सोऽश्वं समुद्रादुपलब्धवान् । आजहाराश्वमेधानां शतं स सुमहायशाः ।
पुत्त्राणाञ्च सहस्राणि षष्टिस्तस्येति नः श्रुतं । ७९५

इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि सगरोत्पत्तिचरितकथने चतुर्द्दशोऽध्यायः ॥ १४ ॥

॥ जनमेजय उवाच ॥ सगरस्यात्मजा वीराः कथं जाता महात्मनः । विक्रान्ताः षष्टिसाहस्रा विधिना केन वा द्विज ।
॥ वैशम्पायन उवाच ॥ द्वे भार्य्ये सगरस्यास्तां तपसा दग्धकिल्बिषे । ज्येष्ठा विदर्भदुहिता केशिनी नाम विश्रुता ।
कनीयसी तु महती पत्नी परमधर्म्मिणी । अरिष्टनेमिदुहिता रूपेणाप्रतिमा भुवि ।
और्व्वस्ताभ्यां वरं प्रादात्तन्निबोध जनाधिप । षष्टिं पुत्त्रसहस्राणि गृह्णात्वेका तपस्विनी ।
एकं वंशधरं त्वेका यथेष्टं वरयत्विति । तत्रैका जगृहे पुत्त्रान् शूरान् बहूंस्तथा । ८००
एकं वंशधरं त्वेका तथेत्याह महामुनिः । केशिन्यसूत सगरादसमञ्जसमात्मजं ।
राजा पञ्चजनो नाम बभूव स महाबलः । इतरा सुषुवे तुम्बीं बीजपूर्णामिति श्रुतिः ।
तत्र षष्टिसहस्राणि गर्भास्ते तिलसंमिताः । सम्बभूवुर्यथाकालं ववृधुश्च यथाक्रमं ।
घृतपूर्णेषु कुम्भेषु तान् गर्भान्निदधे पिता । धात्रीश्चैकैकशः प्रादात्तावतीरेव पोषणे ।
ततो दशसु मासेषु समुत्तस्थुर्यथासुखं । कुमारास्ते यथाकालं सगरप्रीतिवर्द्धनाः । ८०५
षष्टिः पुत्त्रसहस्राणि तस्यैवमभवन्नृप । गर्भादलाबुमध्याद्वै जातानि पृथिवीपते ।
तेषां नारायणं तेजः प्रविष्टानां महात्मनां । एकः पञ्चजनो नाम पुत्त्रो राजा बभूव ह ।
सुतः पञ्चजनस्यासीदंशुमान्नाम वीर्य्यवान् । दिलीपस्तनयस्तस्य खट्वाङ्ग इति विश्रुतः ।
येन स्वर्गादिहागत्य मुहूर्त्तं प्राप्य जीवितं । त्रयोऽनुसन्धिता लोका बुद्ध्या सत्येन चानघ ।
दिलीपस्य तु दायादो महाराजो भगीरथः । यः स गङ्गां सरिच्छ्रेष्ठामवातारयत प्रभुः । ८१०
कीर्त्तिमान् स महाभागः शक्रतुल्यपराक्रमः । समुद्रमानयच्चैनां दुहितृत्वेन कल्पयन् ।
तस्माद्भागीरथी गङ्गा कथ्यते वंशचिन्तकैः । भगीरथसुतो राजा श्रुत इत्यभिविश्रुतः ।

नाभागस्तु श्रुतस्यासीत्पुत्रः परमधार्म्मिकः । अम्बरीषस्तु नाभागिः सिन्धुद्वीपपिताऽभवत् ।
अयुताजित्तु दायादः सिन्धुद्वीपस्य वीर्य्यवान् । अयुताजित्सुतस्त्वासीदृतपर्णो महायशाः ।
दिव्याक्षहृदयज्ञो वै राजा नलसखो बली । ऋतपर्णसुतस्त्वासीदार्त्तपर्णिर्महीपतिः । ८१५
सुदासस्तस्य तनयो राजा इन्द्रसखोऽभवत् । सुदासस्य सुतस्त्वासीत्सौदासो नाम पार्थिवः ।
ख्यातः कल्माषपादो वै नाम्ना मित्रसहोऽभवत् । कल्माषपादस्य सुतः सर्व्वकर्म्मेति विश्रुतः ।
अनरण्यस्तु पुत्रोऽभूद्विश्रुतः सर्व्वकर्म्मणः । अनरण्यसुतो निघ्नो निघ्नपुत्रौ बभूवतुः ।
अनमित्रो रघुश्चैव पार्थिवर्षभसत्तमौ । अनमित्रसुतो राजा विद्वान् दुलिदुहोऽभवत् ।
दिलीपस्तनयस्तस्य रामस्य प्रपितामहः । दीर्घबाहुर्द्दिलीपस्य रघुर्नाम्नाऽभवत्सुतः । ८२०
अयोध्यायां महाराजो रघुरासीन्महाबलः । अजस्तु रघुतो जज्ञे अजाद्दशरथोऽभवत् ।
रामो दशरथाज्जज्ञे धर्म्मात्मा सुमहायशाः । रामस्य तनयो जज्ञे कुश इत्यभिविश्रुतः ।
अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः । निषधस्य नलः पुत्रो नभः पुत्रो नलस्य तु ।
नभस्य पुण्डरीकस्तु क्षेमधन्वा ततः स्मृतः । क्षेमधन्वसुतस्त्वासीद्देवानीकः प्रतापवान् ।
आसीदहीनगुर्नाम देवानीकात्मजः प्रभुः । अहीनगोस्तु दायादः सुधन्वा नाम पार्थिवः । ८२५
सुधन्वनः सुतश्चैव ततो जज्ञे नलो नृप । उक्थो नाम स धर्म्मात्मा नलपुत्रो बभूव ह ।
वज्रनाभः सुतस्तस्य उक्थस्य च महात्मनः । शङ्खस्तस्य सुतो विद्वान् व्युषिताश्व इति श्रुतः ।
पुष्यस्तस्य सुतो विद्वानर्थसिद्धिस्तु तत्सुतः । सुदर्शनः सुतस्तस्य अग्निवर्णः सुदर्शनात् ।
अग्निवर्णसुतः शीघ्रः शीघ्रस्य तु मरुः सुतः । मरुस्तु योगमास्थाय कलापद्वीपमास्थितः ।
तस्यासीद्विश्रुतवतः पुत्रो राजा बृहद्बलः । नलौ द्वावेव विख्यातौ पुराणे भरतर्षभ । ८३०
वीरसेनात्मजश्चैव यश्चेक्ष्वाकुकुलोद्वहः । इक्ष्वाकुवंशप्रभवाः प्राधान्येनेह कीर्त्तिताः ।
एते विवस्वतो वंशे राजानोऽमिततेजसः । पठन् सम्यगिमां सृष्टिमादित्यस्य विवस्वतः ।
श्राद्धदेवस्य देवस्य प्रजानां पुष्टिदस्य च । प्रजावानेति सायुज्यमादित्यस्य विवस्वतः ।
विपाप्मा विरजाश्चैव आयुष्मांश्च भवत्युत ।

इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि आदित्यवंशानुकीर्त्तने पञ्चदशोऽध्यायः ॥ १५ ॥

॥ जनमेजय उवाच ॥ कथं वै श्राद्धदेवत्वमादित्यस्य विवस्वतः । श्रोतुमिच्छामि विप्राग्र्य श्राद्धस्य च परं विधिं । ८३५
पितॄणामादिसर्गञ्च क एते पितरः स्मृताः । एवञ्च श्रुतमस्माभिः कथ्यमानं द्विजातिभिः ।
स्वर्गस्थाः पितरोऽन्येषां देवानामपि देवताः । इति वेदविदः प्राहुरेतदिच्छामि वेदितुं ।
ये च तेषां गणाः प्रोक्ता यच्च तेषां परं बलं । यथा च कृतमस्माभिः श्राद्धं प्रीणाति वै पितॄन् ।
प्रीताश्च पितरो ये च श्रेयसा योजयन्ति हि । एवं वेदितुमिच्छामि पितॄणां सर्गमुत्तमं ।
॥ वैशम्पायन उवाच ॥ हन्त ते कथयिष्यामि पितॄणां सर्गमुत्तमं । यथा च कृतमस्माभिः श्राद्धं प्रीणाति वै पितॄन् । ८४०
प्रीताश्च पितरो ये स्म श्रेयसा योजयन्ति हि । मार्कण्डेयेन कथितं भीष्माय परिपृच्छते ।

अपृच्छद्धर्मराजो हि भरतर्षभगतं पुरा। एवमेव पुरा प्रश्नं यथा त्वं परिपृच्छसि।
तत्तेऽनुपूर्व्या वक्ष्यामि भीष्मेणोदाहृतं यथा। गीतं सनत्कुमारेण मार्कण्डेयाय पृच्छते।
॥ युधिष्ठिर उवाच ॥ पुष्टिकामेन धर्म्मज्ञ कथं पुष्टिरवाप्यते। एतदेव श्रोतुमिच्छामि किं कुर्व्वाणो न शोचति।
॥ भीष्म उवाच ॥ श्राद्धैः प्रीणाति हि पितॄन् सर्व्वकामफलैस्तु यः। तत्परः प्रयतः श्राद्धी प्रेत्य चेह च मोदते।
पितरो धर्म्मकामस्य प्रजाकामस्य च प्रजां। पुष्टिकामस्य पुष्टिञ्च प्रयच्छन्ति युधिष्ठिर।
॥ युधिष्ठिर उवाच ॥ वर्त्तन्ते पितरः स्वर्गे केषाञ्चिन्नरके पुनः। प्राणिनां नियतं ह्युक्तं कर्म्मजं फलमुच्यते।
श्राद्धानि चैव कुर्व्वन्ति फलकामाः सदा नराः। अभिसन्धाय पितरं पितुश्च पितरं तथा।
पितुः पितामहञ्चैव त्रिषु पिण्डेषु नित्यशः। तानि श्राद्धानि दत्तानि कथं गच्छन्ति वै पितॄन्।
कथञ्च शक्तास्ते दातुं निरयस्थाः फलं पुनः। के वा ते पितरोऽन्ये स्म कान् यजामो वयं पुनः।
देवा अपि पितॄन् स्वर्गे यजन्तीति च नः श्रुतं। एतदिच्छाम्यहं श्रोतुं विस्तरेण महाद्युते।
स भवान् कथयत्वेतां कथाममितबुद्धिमान्। यथा दत्तं पितॄणां वै तारणायेह कल्पते।
॥ भीष्म उवाच ॥ अत्र ते वर्त्तयिष्यामि यथाश्रुतमरिन्दम। ये च ते पितरोऽन्ये स्म यान् यजामो वयं पुनः।
पित्रा मम पुरा गीतं लोकान्तरगतेन वै। श्राद्धकाले मम पितुर्म्मया पिण्डः समुद्यतः।
तं पिता मम हस्तेन भित्त्वा भूमिमयाचत। हस्ताभरणपूर्णेन केयूराभरितेन च।
रक्ताङ्गुलितलेनाथ यथा दृष्टः पुरा मया। नैष कल्पविधिर्दृष्ट इति निश्चित्य चाप्यहं।
कुशेष्वेव तथा पिण्डं दत्तवानविचारयन्। ततः पिता मे सुप्रीतो वाचा मधुरया तदा।
उवाच भरतश्रेष्ठ प्रीयमाणो मयाऽनघ। त्वया दायादवानस्मि कृतार्थोऽमुत्र चेह च।
मत्पूर्व्वेण त्वया पुत्र धर्म्मज्ञेन विपश्चिता। मया तु तव जिज्ञासा प्रयुक्तैषा दृढव्रत।
व्यवस्थानञ्च धर्म्मेषु कर्त्तुर्ल्लोकस्य चानघ। यथा चतुर्थं धर्म्मस्य रक्षिता लभते फलं।
पापस्य हि तथा मूढः फलं प्राप्नोत्यरक्षिता। प्रमाणं यद्धि कुरुते धर्म्माचारेषु पार्थिवः।
प्रजास्तदनुवर्त्तन्ते प्रमाणाचरितं सदा। त्वया च भरतश्रेष्ठ वेदधर्म्माश्च शाश्वताः।
कृताः प्रमाणं प्रीतिश्च मम निर्वर्त्तिताऽतुला। तस्मात्तवाहं सुप्रीतः प्रीत्या वरमनुत्तमं।
ददामि तं प्रतीच्छ त्वं त्रिषु लोकेषु दुर्लभं। न ते प्रभविता मृत्युर्य्यावज्जीवितुमिच्छसि।
त्वत्तोऽभ्यनुज्ञां सम्प्राप्य मृत्युः प्रभविता तव। किं वा ते प्रार्थितं भूयो ददामि वरमुत्तमं।
तद्ब्रूहि भरतश्रेष्ठ यत्ते मनसि वर्त्तते। इत्युक्तवन्तन्तमहमभिवाद्य कृताञ्जलिः।
अवोचं कृतकृत्योऽहं प्रसन्ने त्वयि सत्तम। यदि त्वनुग्रहं भूयस्त्वत्तोऽर्हामि महाद्युते।
प्रश्नमिच्छाम्यहं किञ्चिद्व्याहृतं भवता स्वयं। स मामुवाच धर्म्मात्मा ब्रूहि भीष्म यदिच्छसि।
छेत्ताऽस्मि संशयस्यास्य यन्मां पृच्छसि भारत। अपृच्छं तमहं तातं तत्रान्तर्हितमेव च।
गतं सुकृतिनां लोकं कौतूहलसमन्वितः।
॥ भीष्म उवाच ॥ श्रूयन्ते पितरो देवा देवानामपि देवताः। देवाश्च पितरोऽन्ये वा कान् यजामो वयं पुनः।

कथञ्च दत्तमस्माभिः श्राद्धं प्रीणात्यथो पितॄन् । लोकान्तरगतांस्तात किंस्विच्छ्राद्धस्य वा फलं ।
कान् यजन्ति स्म लोकान् वै सदेवनरदानवाः । सयक्षरोगगन्धर्व्वाः सकिन्नरमहोरगाः ।
अत्र मे संशयस्तीव्रः कौतूहलमतीव च । तद्ब्रूहि मम धर्म्मज्ञ सर्व्वज्ञो ह्यसि मे मतः ।
एतच्छ्रुत्वा वचस्तस्य भीष्मश्चोवाच वै पिता । ८७५
|| शान्तनुरुवाच || सङ्क्षेपेणैव ते वक्ष्ये यन्मां पृच्छसि भारत । पितरश्च यथाभूताः फलं दत्तस्य चानघ ।
पितॄणां कारणं श्राद्धं शृणु सर्व्वं समाहितः । आदिदेवसुतास्तात पितरो दिवि देवताः ।
तान् यजन्ति स्म वै लोकाः सदेवासुरमानुषाः । सयक्षरोगगन्धर्व्वाः सकिन्नरमहोरगाः ।
आप्यायिताश्च ते श्राद्धैः पुनराप्याययन्ति च । जगत्सदेवगन्धर्व्वमिति ब्रह्मानुशासनं ।
तान् यजस्व महाभाग श्राद्धैरग्र्यैरतन्द्रितः । ते ते श्रेयो विधास्यन्ति सर्व्वकामफलप्रदाः । ८८०
त्वयैवाराध्यमानास्ते नामगोत्रानुकीर्त्तनैः । अस्मानाप्याययिष्यन्ति स्वर्गस्थानपि भारत ।
मार्कण्डेयस्तु ते शेषमेतत्सर्व्वं प्रवक्ष्यति । एष वै पितृभक्तश्च विदितात्मा च भारत ।
उपस्थितस्य श्राद्धेऽद्य ममैवानुग्रहाय वै । एनं पृच्छ महाभागमित्युक्त्वाऽन्तरधीयत ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पितृकल्पे षोडशोऽध्यायः || १६ ||
|| भीष्म उवाच || ततोऽहं तस्य वचनान्मार्कण्डेयं समाहितः । प्रश्नं तमेवाप्यपृच्छं यन्मे पृष्टः पुरा पिता ।
स मामुवाच धर्म्मात्मा मार्कण्डेयो महातपाः । भीष्म वक्ष्यामि कार्त्स्न्येन शुश्रूषुः प्रयतो भव । ८८५
अहं पितृप्रसादाद्वै दीर्घायुष्ट्वमवाप्तवान् । पितृभक्त्यैव लब्धञ्च प्राग्लोके परमं यशः ।
सोऽहं युगस्य पर्य्यन्ते बहुवर्षसहस्रिके । अधिरुह्य गिरिं मेरुं तपोऽतप्यं सुदुश्चरं ।
ततः कदाचित्पश्यामि दिवं प्रज्वाल्य तेजसा । विमानमहदायान्तमुत्तरेण गिरेस्तदा ।
तस्मिन् विमाने पर्य्यङ्कं ज्वलितादित्यवर्च्चसं । अपश्यं तत्र चैवाहं शयानं दीप्ततेजसं ।
अङ्गुष्ठमात्रं पुरुषमग्नावग्निमिवाहितं । सोऽहं तस्मै नमस्कृत्य प्रणम्य शिरसा विभुं । ८९०
सन्निविष्टं विमानस्थं पाद्यार्घ्याभ्यामपूजयं । अपृच्छञ्चैव दुर्द्धर्षं विद्याम त्वां कथं विभो ।
तपोवीर्य्यात् समुत्पन्नं नारायणगुणात्मकं । दैवतं ह्यसि देवानामिति मे वर्त्तते मतिः ।
स मामुवाच धर्म्मात्मा स्मयमान इवानघ । न ते तपः सुचरितं येन मां नावबुध्यसे ।
क्षणेनैव प्रमाणं स बिभ्रदन्यदनुत्तमं । रूपेण च पुमांस्तादृग्दृष्टपूर्व्वो न मे क्वचित् ।
|| सनत्कुमार उवाच || विद्धि मां ब्रह्मणः पुत्रं मानसम्पूर्व्वजं विभो । तपोवीर्य्यात्समुत्पन्नं नारायणगुणात्मकं । ८९५
सनत्कुमार इति यः श्रुतो वेदेषु वै पुरा । सोऽस्मि भार्गव भद्रन्ते कं कामं करवाणि ते ।
ये त्वन्ये ब्रह्मणः पुत्रा यवीयांसस्तु ते मम । भ्रातरः सप्त दुर्द्धर्षास्तेषां वंशाः प्रतिष्ठिताः ।
क्रतुर्व्वशिष्ठः पुलहः पुलस्त्योऽत्रिस्तथाऽङ्गिराः । मरीचिश्च तथा विद्वान् देवगन्धर्व्वसेविताः ।
त्रीन् लोकान् धारयन्तीमे देवदानवपूजिताः । वयन्तु यतिधर्म्माणः संयोज्यात्मानमात्मनि ।
प्रजा धर्म्मञ्च कामञ्च व्यवहाय महामुने । यथोत्पन्नस्तथैवाहं कुमार इति विद्धि मां । ९००

तस्मात्सनत्कुमारेति नामैतन्मे प्रतिष्ठितं । मद्भक्त्या ते तपश्चीर्णं मम दर्शनकाङ्क्षया ।
एष दृष्टोऽस्मि भवता कं कामं करवाणि ते । इत्युक्तवन्तं तमहं प्रत्यवोचं सनातनं ।
अनुज्ञातो भगवता प्रीयमाणेन भारत । ततोऽहमेतमर्थं वै तमपृच्छं सनातनं ।
पृष्टः पितॄणां सर्गश्च फलं श्राद्धस्य चानघ । चिच्छेद संशयं भीष्म स च देवेश्वरो मम ।
स मामुवाच धर्मात्मा कथान्ते बहुवार्षिके । रमे त्वयाऽहं विप्रर्षे शृणु सर्व्वं यथातथं । ९०५
देवानसृजत ब्रह्मा मां यक्ष्यन्तीति भार्गव । तमुत्सृज्य तदात्मानमयजंस्ते फलार्थिनः ।
ते शप्ता ब्रह्मणा मूढा नष्टसंज्ञा दिवौकसः । न स्म किञ्चिद्विजानन्ति ततो लोकोऽप्यमुह्यत ।
ते भूयः प्रणताः शप्ताः प्रार्थयन्त पितामहं । अनुग्रहाय लोकानां ततस्तानब्रवीद्विभुः ।
प्रायश्चित्तं चरध्वं वै व्यभिचारो हि वः कृतः । पुत्रांश्च परिपृच्छध्वं ततो ज्ञानमवाप्स्यथ ।
प्रायश्चित्तक्रियार्थं ते पुत्रान् पप्रच्छुरार्त्तवत् । तेभ्यस्ते प्रयतात्मानः शशंसुस्तनयास्तदा ।
प्रायश्चित्तानि धर्मज्ञा वाङ्मनःकर्म्मजानि वै । शंसन्ति कुशला नित्यं चक्षुर्भ्यामपि नित्यशः ।
प्रायश्चित्तार्थतत्त्वज्ञा लब्धसंज्ञा दिवौकसः । गम्यतां पुत्रका एवं पुत्रैरुक्ताश्च ते तदा ।
अभिशस्तास्तु वै देवाः पुत्रवाक्येन तेन वै । पितामहमुपागच्छन् संशयच्छेदनाय वै ।
ततस्तानब्रवीद्देवो यूयं वै ब्रह्मवादिनः । तस्माद्यदुक्ता यूयं तैस्तत्तथा न तदन्यथा ।
यूयं शरीरकर्त्तारस्तेषां देवा भविष्यथ । ते तु ज्ञानप्रदातारः पितरो वो न संशयः । ९१५
अन्योन्यं पितरो यूयं ते चैवेति न संशयः । देवाश्च पितरश्चैव तद्बुध्यध्वं दिवौकसः ।
ततस्ते पुनरागत्य पुत्रानूचुर्दिवौकसः । ब्रह्मणा छिन्नसन्देहाः प्रीतिमन्तः परस्परं ।
यूयं वै पितरोऽस्माकं यैर्व्वयं प्रतिबोधिताः । धर्मज्ञाः कश्च वः कामः को वरो वः प्रदीयतां ।
यदुक्तं चैव युष्माभिस्तत्तथा न तदन्यथा । उक्ता यच्च युष्माभिः पुत्रका इति वै वयं ।
तस्माद्भवन्तः पितरो भविष्यथ न संशयः । योऽनिष्ट्वा च पितॄन् श्राद्धैः क्रियाः काश्चित्करिष्यति । ९२०
राक्षसा दानवा नागाः फलं प्राप्स्यन्ति तस्य तत् । श्राद्धैराप्यायिताश्चापि पितरः सोममव्ययं ।
आप्याय्यमाना युष्माभिर्व्वर्द्धयिष्यन्ति नित्यदा । श्राद्धैराप्यायितः सोमो लोकानाप्याययिष्यति ।
समुद्रपर्व्वतवनं जङ्गमाजङ्गमैर्वृतं । श्राद्धानि पुष्टिकामाश्च ये करिष्यन्ति मानवाः ।
तेभ्यः पुष्टिं प्रजां चैव दास्यन्ति पितरः सदा । श्राद्धे ये च प्रदास्यन्ति त्रीन् पिण्डान्नामगोत्रतः ।
सर्व्वत्र वर्त्तमानांस्तान् पितरः सपितामहाः । भावयिष्यन्ति सततं श्राद्धदानेन तर्पिताः । ९२५
एवमाज्ञापितं पूर्व्वं ब्रह्मणा परमेष्ठिना । इति तद्वचनं सत्यं भवत्वद्य दिवौकसः ।
पुत्राश्च पितरश्चैव वयं सर्व्वे परस्परं ।
॥ सनत्कुमार उवाच ॥ त एते पितरो देवा देवाश्च पितरस्तथा । अन्योन्यं पितरो ह्येते देवाश्च पितरश्च ह ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पितृकल्पे सप्तदशोऽध्यायः ॥ १७ ॥
॥ मार्कण्डेय उवाच ॥ इत्युक्तोऽहं भगवता देवदेवेन भास्वता । सनत्कुमारेण पुनः पृष्टवान् देवमव्ययं ।

सन्देहममरश्रेष्ठ भगवन्नमरिन्दम । निबोध तेभ्य गाङ्गेय निखिलं सर्व्वमादितः । ९४०
कियन्तो वै पितृगणाः कस्मिन् लोके प्रतिष्ठिताः । वर्त्तन्ते देवप्रवरा देवानां सोमवर्द्धनाः ।
॥ सनत्कुमार उवाच ॥ सप्तैते यजतां श्रेष्ठ स्वर्गे पितृगणाः स्मृताः । चत्वारो मूर्त्तिमन्तश्च त्रयस्तेषाममूर्त्तयः ।
तेषां लोकं विसर्गञ्च कीर्त्तयिष्यामि तच्छृणु । प्रभावञ्च महत्त्वञ्च विस्तरेण तपोधन ।
धर्म्ममूर्त्तिधरास्तेषां त्रयो ये परमा गणाः । तेषां नामानि लोकांश्च कीर्त्तयिष्यामि तच्छृणु ।
लोकाः सनातना नाम यत्र तिष्ठन्ति भास्वराः । अमूर्त्तयः पितृगणास्ते वै पुत्राः प्रजापतेः । ९४५
विराजस्य द्विजश्रेष्ठ वैराजा इति विश्रुताः । यजन्ति तान् देवगणा विधिदृष्टेन कर्म्मणा ।
एते वै योगविभ्रष्टा लोकान् प्राप्य सनातनान् । पुनर्युगसहस्रान्ते जायन्ते ब्रह्मवादिनः ।
ते तां प्राप्य स्मृतिं भूयः साङ्ख्ययोगमनुत्तमं । यान्ति योगगतिं सिद्धाः पुनरावृत्तिदुर्लभां ।
एते स्युः पितरस्तात योगिनां योगवर्द्धनाः । आप्याययन्ति ये पूर्व्वं सोमं योगबलेन वै ।
तस्माच्छ्राद्धानि देयानि योगिनान्तु विशेषतः । एष वै प्रथमः कल्पः सोमपानां महात्मनां । ९५०
एतेषां मानसी कन्या मेना नाम महागिरेः । पत्नी हिमवतः श्रेष्ठा यस्या मैनाक उच्यते ।
मैनाकस्य सुतः श्रीमान् क्रौञ्चो नाम महागिरिः । पर्व्वतप्रवरः पुत्रो नानारत्नसमन्वितः ।
तिस्रः कन्यास्तु मेनायां जनयामास शैलराट् । अपर्णामेकपर्णाञ्च तृतीयामेकपाटलां ।
तपश्चरन्त्यः सुमहद्दुश्चरं देवदानवैः । लोकान् सन्तापयामासुस्तास्तिस्रः स्थाणुजङ्गमान् ।
आहारमेकपर्णेन एकपर्णा समाचरत् । पाटलापुष्पमेकञ्च आदधावेकपाटला । ९५५
एका तत्र निराहारा तां माता प्रत्यषेधयत् । उमा इति निषेधन्ती मातृस्नेहेन दुःखिता ।
सा तथोक्ता तदा मात्रा देवी दुश्चरचारिणी । उमेत्येवाभवत् ख्याता त्रिषु लोकेषु सुन्दरी ।
तथैव नाम्ना तेनेह विश्रुता योगधर्म्मिणी । एतत्तु त्रिकुमारीकं जगत्स्थास्यति भार्गव ।
तपःशरीरास्ताः सर्व्वास्तिस्रो योगबलान्विताः । सर्व्वाश्च ब्रह्मवादिन्यः सर्व्वाश्चैवोर्द्ध्वरेतसः ।
उमा तासां वरिष्ठा च ज्येष्ठा च वरवर्णिनी । महायोगबलोपेता महादेवमुपस्थिता । ९६०
असितस्यैकपर्णा तु देवलस्य महात्मनः । पत्नी दत्ता महाब्रह्मन् योगाचार्य्याय धीमते ।
जैगीषव्याय तु तथा विद्धि तामेकपाटलां । एते चापि महाभागे योगाचार्य्यावुपस्थिते ।
लोकाः सोमपदा नाम मरीचेर्यत्र वै सुताः । पितरो यत्र वर्त्तन्ते देवास्तान् भावयन्त्युत ।
अग्निष्वात्ता इति ख्याताः सर्व्वे एवामितौजसः । एतेषां मानसी कन्या अच्छोदा नाम निम्नगा ।
अच्छोदं नाम विख्यातं सरो यस्याः समुत्थितं । तया न दृष्टपूर्व्वास्ते पितरस्ते कदाचन । ९६५
अप्यमूर्त्तानथ पितॄन् सा ददर्श शुचिस्मिता । सम्भूता मानसास्तेषां पितॄन् स्वान् नाभिजानती ।
व्रीडिता तेन दुःखेन बभूव वरवर्णिनी । सा दृष्ट्वा पितरं वव्रे वसुं नामान्तरिक्षगं ।
अमावसुमिति ख्यातमायोः पुत्रं यशस्विनं । अद्रिकाप्सरसा युक्तं विमानेऽधिष्ठितं दिवि ।
सा तेन व्यभिचारेण मनसः कामरूपिणी । पितरं प्रार्थयित्वाऽन्यं योगभ्रष्टा पपात ह ।

त्रीण्यपश्यद्विमानानि पतमाना दिवश्च्युता । त्रसरेणुप्रमाणानि साऽपश्यत्तेषु तान् पितॄन् ।
सुसूक्ष्मानपरिव्यक्तानग्नीनग्निष्विवाहितान् । त्रायध्वमित्युवाचार्त्ता पतन्ती तानवाक्शिराः ।
तैरुक्ता सा तु माभैषीरिति व्योम्नि व्यवस्थिता । ततः प्रसादयामास तान् पितॄन् दीनया गिरा ।
ऊचुस्ते पितरः कन्यां भ्रष्टैश्वर्यां व्यतिक्रमात् । भ्रष्टैश्वर्या स्वदोषेण पतसि त्वं शुचिस्मिते ।
यैः क्रियन्ते हि कर्म्माणि शरीरैर्दिवि दैवतैः । तैरेव तत्कर्म्मफलं प्राप्नुवन्तीह देवताः ।
सद्यः फलन्ति कर्म्माणि देवत्वे प्रेत्य मानुषे । तस्मात्त्वन्तपसः पुत्रि प्रेत्येदं प्राप्स्यसे फलं ।
इत्युक्ता पितृभिः सा तु पितॄन्प्रासादयत्तकान् । ध्यात्वा प्रसादं ते चक्रुस्तस्याः सर्व्वेऽनुकम्पया ।
अवश्यम्भाविनं ज्ञात्वा तेऽर्थमूचुस्ततस्तु तां । अस्य राज्ञो वसोः कन्या त्वमपत्यं भविष्यसि ।
उत्पन्नस्य पृथिव्यान्तु मानुषेषु महात्मनः । कन्या च भूत्वा लोकान् स्वान् पुनः प्राप्स्यसि दुर्लभान् ।
पराशरस्य दायादं त्वं विप्रं जनयिष्यसि । स वेदमेकं ब्रह्मर्षिश्चतुर्द्धा विभजिष्यति ।
महाभिषस्य पुत्रौ द्वौ शान्तनोः कीर्त्तिवर्द्धनौ । विचित्रवीर्य्यं धर्म्मज्ञं तथा चित्राङ्गदं विभुं ।
एतानुत्पाद्य पुत्रांस्त्वं पुनर्ल्लोकानवाप्स्यसि । व्यतिक्रमात् पितॄणाञ्च जन्म प्राप्स्यसि कुत्सितं ।
अस्यैव राज्ञः कन्या त्वमद्रिकायां भविष्यसि । अष्टाविंशे भवित्री त्वं द्वापरे मत्स्ययोनिजा ।
एवमुक्ता तु दासेयी जाता सत्यवती तदा । मत्स्ययोनौ समुत्पन्ना राज्ञस्तस्य वसोः सुता ।
वैभ्राजा नाम ते लोका दिवि भान्ति सुदर्शनाः । यत्र बर्हिषदो नाम पितरो दिवि विश्रुताः ।
तान्वै देवगणाः सर्व्वे यक्षगन्धर्व्वराक्षसाः । नागाः सर्पाः सुपर्णाश्च भावयन्त्यमितौजसः ।
एते पुत्रा महात्मानः पुलस्त्यस्य प्रजापतेः । महात्मानो महाभागास्तेजोयुक्तास्तपस्विनः ।
एतेषां मानसी कन्या पीवरी नाम विश्रुता । योगा च योगपत्नी च योगमाता तथैव च ।
भवित्री द्वापरं प्राप्य युगं धर्म्मभृताम्बरा । पराशरकुलोद्भूतः शुको नाम महातपाः ।
भविष्यति युगे तस्मिन् महायोगी द्विजर्षभः । व्यासादरण्यां सम्भूतो विधूमोऽग्निरिव ज्वलन् ।
स तस्यां पितृकन्यायां पीवर्य्यां जनयिष्यति । कन्यां पुत्रांश्च चतुरो योगाचार्य्यान्महाबलान् ।
कृष्णं गौरं प्रभुं शम्भुं कृत्वीं कन्यान्तथैव च । ब्रह्मदत्तस्य जननीं महिषीं त्वणुहस्य च ।
एतानुत्पाद्य धर्म्मात्मा योगाचार्य्यान्महाव्रतान् । श्रुत्वा स्वजनकाद्धर्म्मान् व्यासादमितबुद्धिमान् ।
महायोगी ततो गत्वा पुनरावर्त्तिनीं गतिं । यत्तत्पदमनुद्दिश्यमव्ययं ब्रह्म शाश्वतं ।
अमूर्त्तिमन्तः पितरो धर्म्ममूर्त्तिधरा मुने । कथा यत्रेयमुत्पन्ना वृष्ण्यन्धककुलान्वया ।
सुकाला नाम पितरो वशिष्ठस्य प्रजापतेः । निरता दिवि लोकेषु ज्योतिर्भासिषु भास्वराः ।
सर्व्वकामसमृद्धेषु द्विजास्तान् भावयन्त्युत । तेषां वै मानसी कन्या गौर्नाम्ना दिवि विश्रुता ।
तवैव वंशे या दत्ता शुकस्य महिषी प्रिया । एकशृङ्गेति विख्याता साध्यानां कीर्त्तिवर्द्धिनी ।
मरीचिगर्भांस्तान्लोकान् समाश्रित्य व्यवस्थिताः । ये त्वथाङ्गिरसः पुत्राः साध्यैः संवर्द्धिताः पुरा ।
तान् क्षत्रियगणास्तात भावयन्ति फलार्थिनः । एतेषां मानसी कन्या यशोदा नाम विश्रुता ।

पत्नी सा विश्वमहतः स्नुषा वै शुक्लकर्म्मणः । राजर्षेर्ज्जननी चापि दिलीपस्य महात्मनः । ९९०
यस्य यज्ञे पुरा गीता गाथाः प्रीतैर्महर्षिभिः । तदा देवयुगे तात वाजिमेधे महामखे ।
अग्नेर्ज्जन्म तथा श्रुत्वा शाण्डिल्यस्य महात्मनः । दिलीपं यजमानं ये पश्यन्ति सुसमाहिताः ।
सत्यवन्तं महात्मानं तेऽपि स्वर्गजितो नराः । सुस्वधा नाम पितरः कर्द्दमस्य प्रजापतेः ।
समुत्पन्नास्तु पुलहान्महात्मानो द्विजर्षभाः । लोकेषु दिवि वर्त्तन्ते कामगेषु विहङ्गमाः ।
तांश्च वैश्यगणास्तात भावयन्ति फलार्थिनः । तेषां वै मानसी कन्या विरजा नाम विश्रुता । ९९५
ययातेर्ज्जननी ब्रह्मन्महिषी नहुषस्य च । त्रय एते गणाः प्रोक्ताश्चतुर्थन्तु निबोध मे ।
उत्पन्ना ये स्वधायान्तु सोमपा वै कवेः सुताः । हिरण्यगर्भस्य सुताः शूद्रास्तान् भावयन्त्युत ।
मानसा नाम ते लोका यत्र तिष्ठन्ति ते दिवि । तेषां वै मानसी कन्या नर्म्मदा सरितांवरा ।
या भावयति भूतानि दक्षिणापथगामिनी । पुरुकुत्सस्य या पत्नी त्रसदस्योर्ज्जनन्यपि ।
तेषामथाभ्युपगमान्मनुस्तात युगे युगे । प्रवर्त्तयति श्राद्धानि नष्टे धर्म्मे प्रजापतिः । १०००
पितॄणामादिसर्गे तु सर्व्वेषां द्विजसत्तम । तस्मादेनं स्वधर्म्मेण श्राद्धदेवं वदन्ति वै ।
सर्व्वेषां राजतं पात्रमथ वा रजतान्वितं । दत्तं स्वधां पुरोधाय श्राद्धं प्रीणाति वै पितॄन् ।
सोमस्याप्यायनं कृत्वा वह्नेर्व्वैवस्वतस्य च । उदगायनमप्यग्नावग्न्यभावेऽप्सु वा पुनः ।
पितॄन् प्रीणाति यो भक्त्या पितरः प्रीणयन्ति तं । यच्छन्ति पितरः पुष्टिं प्रजाश्च विपुलास्तथा ।
स्वर्गमारोग्यमेवाथ यदन्यदपि चेप्सितं । देवकार्य्यादपि मुने पितृकार्य्यं विशिष्यते । १००५
देवतानां हि पितरः पूर्व्वमाप्यायनं स्मृतं । शीघ्रप्रसादा ह्यक्रोधा लोकस्याप्यायनं परं ।
स्थिरप्रसादाश्च सदा तान् नमस्यस्व भार्गव । पितृभक्तोऽसि विप्रर्षे मद्भक्तश्च विशेषतः ।
श्रेयस्ते ऽद्य विधास्यामि प्रत्यक्षं कुरु तत् स्वयं । चक्षुर्द्दिव्यं सविज्ञानं प्रदिशामि च तेऽनघ ।
गतिमेतामप्रमत्तो मार्कण्डेय निशामय । न हि योगगतिर्द्दिव्या पितॄणाञ्च परा गतिः ।
त्वद्विधेनापि सिद्धेन दृश्यते मांसचक्षुषा । स एवमुक्त्वा देवेशो मामुपस्थितमग्रतः । १०१०
चक्षुर्दत्त्वा सविज्ञानं देवानामपि दुर्लभं । जगाम गतिमिष्टां वै द्वितीयोऽग्निरिव ज्वलन् ।
तन्निबोध कुरुश्रेष्ठ यन्मयासीन्निशामितं । प्रसादात्तस्य देवस्य दुर्ज्ञेयं भुवि मानुषैः ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पितृकल्पे अष्टादशोऽध्यायः ॥ १८ ॥
॥ मार्कण्डेय उवाच ॥ आसन् पूर्व्वयुगे तात भरद्वाजात्मजा द्विजाः । योगधर्म्ममनुप्राप्य भ्रष्टा दुश्चरितेन वै ।
अपभ्रंशमनुप्राप्ता योगधर्म्मोपचारिणः । महतः सरसः पारे मानसस्य विसंस्थिताः ।
तमेवार्थमनुध्यान्तो नष्टमप्स्विव मोहिताः । अप्राप्य योगं सर्व्वे स्म संयुक्ताः कालधर्म्मणा । १०१५
ततस्ते योगविभ्रष्टा देवेषु सुचिरोषिताः । जाताः कौशिकदायादाः कुरुक्षेत्रे नरर्षभाः ।
हिंसया विहरिष्यन्तो धर्म्मं पितृकृतेन वै । ततस्ते पुनरायान्ति भ्रष्टाः प्राप्स्यन्ति कुत्सितां ।
तेषां पितृप्रसादेन पूर्व्वजातिकृतेन च । स्मृतिरुत्पत्स्यते प्राप्य तान्तां जातिं जुगुप्सितां ।

ते धर्म्मचारिणो नित्यं भविष्यन्ति समाहिताः । ब्राह्मण्यं प्रतिलप्स्यन्ति ततो भूयः स्वकर्म्मभिः ।
ततश्च योगं प्राप्स्यन्ति पूर्व्वजातिकृतं पुनः । भूयः सिद्धिमनुप्राप्ताः स्थानं प्राप्स्यन्ति शाश्वतं ।
एवं धर्म्मे च ते बुद्धिर्भविष्यति पुनः पुनः । योगधर्म्मे च निरतः प्राप्स्यसे सिद्धिमुत्तमां ।
योगो हि दुर्लभो नित्यमल्पप्रज्ञैः कदाचन । लब्ध्वाऽपि नाशयन्त्येनं व्यसनैः कटुतामिताः ।
अधर्म्मेष्वेव वर्त्तन्ते गर्हयन्ते गुरूनपि । याचन्ते न तथाऽर्थानि रक्षन्ति शरणागतान् ।
नावजानन्ति कृपणाञ्छ्लाघन्ते न धनोष्मणा । युक्ताहारविहाराश्च युक्तचेष्टाः स्वकर्म्मसु ।
ध्यानाध्ययनयुक्ताश्च मनस्थानुगवर्षिणः । नोपभोगरता नित्यं न मांसमधुभक्षणाः ।
न कामपरमा नित्यं न विप्रोत्साहिनस्तथा । नानार्थसंकथासक्ता नालस्योपहतास्तथा ।
नात्यन्तमानसंसक्ता गोष्ठीष्वनिरतास्तथा । प्राप्नुवन्ति नरा योगं योगो हि दुर्लभो भुवि ।
प्रशान्ताश्च जितक्रोधा मानाहङ्कारवर्ज्जिताः । कल्याणभाजनं ये तु ते भवन्ति यतव्रताः ।
एवंविधास्तु ते तात ब्राह्मणा ह्यभवंस्तदा । स्मरन्ति ह्यात्मनो दोषं प्रमादं कृतमेव तु ।
ध्यानाध्ययनयुक्ताश्च शान्ते वर्त्मनि संस्थिताः । प्राप्स्यन्ते परमामाप्तिं लभन्ते नात्र संशयः ।
तस्मात्त्वमपि धर्म्मज्ञ योगधर्म्मपरो भव । योगधर्म्मे च निरतः प्राप्स्यसे सिद्धिमुत्तमां ।
योगधर्म्माद्धि धर्म्मज्ञ न धर्म्मोऽस्ति विशेषवान् । वरिष्ठः सर्व्वधर्म्माणां तं समाचर भार्गव ।
कालस्य परिमाणेन लघ्वाहारो जितेन्द्रियः । तत्परः प्रयतः श्राद्धी योगधर्म्ममवाप्स्यसि ।
इत्युक्त्वा भगवान् देवस्तत्रैवान्तरधीयत । अष्टादशैव वर्षाणि त्वेकाहमिव मेऽभवत् ।
उपासतस्तं देवेशं वर्षाण्यष्टादशैव मे । प्रसादात्तस्य देवस्य न ग्लानिरभवत्तदा ।
न क्षुत्पिपासे कालं वा प्रत्यज्ञानं तदाऽनघ । पश्चाच्छिष्यसकाशात्तु कालः संविदितो मया ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पितृकल्पे ऊनविंशोऽध्यायः ॥ १९ ॥
॥ मार्कण्डेय उवाच ॥ तस्मिन्नन्तर्हिते देवे वचनात्तस्य वै विभोः । चक्षुर्दिव्यं सविज्ञानं प्रादुरासीत्तदा मम ।
ततोऽहं तानपश्यं वै ब्राह्मणान् कौशिकात्मजान् । आपगेय कुरुक्षेत्रे यानुवाच विभुर्मम ।
ब्रह्मदत्तोऽभवद्राजा यस्तेषां सप्तमो द्विजः । पितृवर्त्तीति विख्यातो नाम्ना शीलेन कर्म्मणा ।
शुकस्य कन्या कृत्वी तं जनयामास पार्थिवं । अणुहात् पार्थिवश्रेष्ठात् काम्पिल्ये नगरोत्तमे ।
॥ भीष्म उवाच ॥ यथोवाच महाभागो मार्कण्डेयो महातपाः । तस्य वंशमहं राजन् कीर्त्तयिष्यामि तच्छृणु ।
॥ युधिष्ठिर उवाच ॥ अणुहः कस्य वै पुत्रः कस्मिन् काले बभूव ह । राजा धर्म्मभृतां श्रेष्ठो यस्य पुत्रो महायशाः ।
ब्रह्मदत्तो नरपतिः किंवीर्य्यः स बभूव ह । कथञ्च सप्तमस्तेषां स बभूव नराधिपः ।
न ह्यल्पवीर्य्याय शुको भगवान् लोकपूजितः । कन्यां प्रदद्याद्योगात्मा कृत्वीं कीर्त्तिमतीं प्रभुः ।
एतदिच्छाम्यहं श्रोतुं विस्तरेण महाद्युते । ब्रह्मदत्तस्य चरितं तद्भवान् वक्तुमर्हति ।
यथा च वर्त्तमानास्ते संसारेषु द्विजातयः । मार्कण्डेयेन कथितास्तद्भवान् प्रब्रवीतु मे ।
॥ भीष्म उवाच ॥ प्रतीपस्य तु राजर्षेस्तुल्यकालो नराधिपः । पितामहस्य मे राजन् बभूवेति मया श्रुतं ।

ब्रह्मदत्तो महाभागो योगी राजर्षिसत्तमः । रुतज्ञः सर्व्वभूतानां सर्व्वभूतहिते रतः ।
सखा स गालवो यस्य योगाचार्य्यो महायशाः । शिक्षामुत्पाद्य तपसा क्रमो येन प्रवर्त्तितः ।
कण्डरीकस्तु योगात्मा तस्यैव सचिवोऽभवत् । जात्यन्तरेषु सर्व्वेषु सहायाः सर्व्व एव ते । १०५०
सप्तजातिषु सप्तैव बभूवुरमितौजसः । यथोवाच महाभागो मार्कण्डेयो महातपाः ।
तस्य वंशमहं राजन् कीर्त्तयिष्यामि तच्छृणु । ब्रह्मदत्तस्य पौराणं पौरवस्य महात्मनः ।
बृहत्क्षत्रस्य दायादः सुहोत्रो नाम धार्म्मिकः । सुहोत्रस्यापि दायादो हस्ती नाम बभूव ह ।
तेनेदं निर्म्मितं पूर्व्वं हस्तिनापुरमुत्तमं । हस्तिनश्चापि दायादास्त्रयः परमधार्म्मिकाः ।
अजमीढो द्विमीढश्च पुरमीढस्तथैव च । अजमीढस्य धूमिन्यां जज्ञे बृहदिषुर्नृप । १०५५
बृहद्धनुर्बृहदिषोः पुत्रस्तस्य महायशाः । बृहद्धर्म्मेति विख्यातो राजा परमधार्म्मिकः ।
सत्यजित्तस्य तनयो विश्वजित्तस्य चात्मजः । पुत्रो विश्वजितश्चापि सेनजित् पृथिवीपतिः ।
पुत्राः सेनजितश्चासंश्चत्वारो लोकविश्रुताः । रुचिरः श्वेतकेतुश्च महिम्नारस्तथैव च ।
वत्सश्चावन्तको राजा यस्यैते परिवत्सकाः । रुचिरस्य तु दायादः पृथुषेणो महायशाः ।
पृथुषेणस्य पारस्तु पारान्नीपोऽथ जज्ञिवान् । नीपस्यैकशतं तात पुत्राणाममितौजसां । १०६०
महारथानां राजेन्द्र शूराणां बाहुशालिनां । नीपा इति समाख्याता राजानः सर्व्व एव ते ।
तेषां वंशकरो राजा नीपानां कीर्त्तिवर्द्धनः । काम्पिल्ये समरो नाम स चेष्टसमरोऽभवत् ।
समरस्य परः पारः सदश्व इति ते त्रयः । पुत्राः परमधर्म्मज्ञाः पारपुत्रः पृथुर्बभौ ।
पृथोस्तु सुकृतो नाम सुकृतेनेह कर्म्मणा । जज्ञे सर्व्वगुणोपेतो विभ्राजस्तस्य चात्मजः ।
विभ्राजस्य तु पुत्रोऽभूदणुहो नाम पार्थिवः । बभौ शुकस्य जामाता कृत्वीभर्त्ता महायशाः । १०६५
सुतोऽणुहस्य राजर्षिर्ब्रह्मदत्तोऽभवत् प्रभुः । योगात्मा तस्य तनयो विष्वक्सेनः परन्तपः ।
विभ्राजः पुनराजातः सुकृतेनेह कर्म्मणा । ब्रह्मदत्तस्य पुत्रोऽन्यः सर्व्वसेन इति श्रुतः ।
चक्षुषी तस्य निर्भिन्ने पक्षिण्या पूजनीयया । सुचिरोषितया राजन् ब्रह्मदत्तस्य वेश्मनि ।
अथास्य पुत्रस्त्वपरो ब्रह्मदत्तस्य जज्ञिवान् । विष्वक्सेन इति ख्यातो महाबलपराक्रमः ।
विष्वक्सेनस्य पुत्रोऽभूद्दण्डसेनो महीपतिः । भल्लाटोऽस्य कुमारोऽभूद्राधेयेन हतः पुरा । १०७०
दण्डसेनात्मजः शूरो महात्मा कुलवर्द्धनः । भल्लाटपुत्रो दुर्ब्बुद्धिरभवच्च युधिष्ठिर ।
स तेषामभवद्राजा नीपानामन्तको नृपः । उग्रायुधेन यस्यार्थे सर्व्वे नीपा विनाशिताः ।
उग्रायुधो मदोत्सिक्तो मया विनिहतो युधि । दर्पान्वितो दर्परुचिः सततञ्चानये रतः ।
॥ युधिष्ठिर उवाच ॥ उग्रायुधः कस्य सुतः कस्मिन् वंशे स जज्ञिवान् । किमर्थञ्चैव भवता निहतस्तद्ब्रवीहि मे ।
॥ भीष्म उवाच ॥ अजमीढस्य दायादो विद्वान् राजा यवीनरः । धृतिमांस्तस्य पुत्रस्तु तस्य सत्यधृतिः सुतः । १०७५
जज्ञे सत्यधृतेः पुत्रो दृढनेमिः प्रतापवान् । दृढनेमिसुतश्चापि सुधर्म्मा नाम पार्थिवः ।
आसीत् सुधर्म्मणः पुत्रः सार्व्वभौमः प्रजेश्वरः । सार्व्वभौम इति ख्यातः पृथिव्यामेकराड्विभुः ।

तस्यान्ववाये महति महान् पौरवनन्दनः । महतश्चापि पुत्रस्तु राजा रुक्मरथः स्मृतः ।
पुत्रो रुक्मरथस्यापि सुपार्श्वो नाम पार्थिवः । सुपार्श्वतनयश्चापि सुमतिर्नाम धार्म्मिकः ।
सुमतेरपि धर्म्मात्मा सन्नतिर्नाम वीर्य्यवान् । तस्य वै सन्नतिः पुत्रः कृतो नाम महाबलः । १०८०
शिष्यो हिरण्यनाभस्य कौशल्यस्य महात्मनः । चतुर्विंशतिधा तेन प्रोक्ताश्चाः सामसंहिताः ।
स्मृतास्ते प्राच्यसामानः कार्त्तयो नाम सामगाः । कार्तिरुग्रायुधः सोऽथ वीरः पौरवनन्दनः ।
बभूव येन विक्रम्य पृषतस्य पितामहः । नीपो नाम महातेजाः पञ्चालाधिपतिर्हतः ।
उग्रायुधस्य दायादः क्षेम्यो नाम महायशाः । क्षेम्यात् सुवीरो नृपतिः सुवीरात्तु नृपञ्जयः ।
नृपञ्जयाद्बहुरथ इत्येते पौरवाः स्मृताः । स चाप्युग्रायुधस्तात दुर्ब्बुद्धिरभवत्तदा । १०८५
प्रवृद्धचक्रो बलवान्नीपान्तकरणो महान् । स दर्पपूर्णो हत्वाजौ नीपानन्यांश्च पार्थिवान् ।
पितर्य्युपरते मह्यं श्रावयामास किल्बिषं । मामभ्यात्यैः परिवृतं शयानं धरणीतले ।
उग्रायुधस्य राजेन्द्र दूतोऽभ्येत्य वचोऽब्रवीत् । अद्य त्वं जननीं भीष्म गन्धकालीं यशस्विनीं ।
स्त्रीरत्नं मम भार्य्यार्थे प्रयच्छ कुरुनन्दन । एवं राज्यञ्च ते स्फीतं धनानि च न संशयः ।
प्रदास्यामि यथाकाममहं वै रत्नभाग्भुवि । मम प्रज्वलितं चक्रं निशम्येदं सुदुर्ज्जयं । १०९०
शत्रवो विद्रवन्त्याजौ दर्शनादेव भारत । राज्यस्थो यदि चेत् स्वस्ति प्राणानां वा कुलस्य वा ।
शासने मम तिष्ठस्व न हि ते शान्तिरन्यथा । अधः प्रस्तारशयने शयानस्तेन चोदितः ।
दूतान्निशम्य तद्वै वाक्यमग्निशिखोपमं । ततोऽहं तस्य दुर्ब्बुद्धेर्विज्ञाय मतमच्युत ।
आज्ञापयं वै संग्रामे सेनाध्यक्षांश्च सर्व्वशः । विचित्रवीर्य्यं बालञ्च मदुपाश्रयमेव च ।
दृष्ट्वा क्रोधपरीतात्मा युद्धायैव मनो दधे । निगृहीतस्तदाहं तैः सचिवैर्मन्त्रकोविदैः । १०९५
ऋत्विग्भिर्देवकल्पैश्च सुहृद्भिश्चार्थदर्शिभिः । स्निग्धैश्च शास्त्रविद्भिश्च संयुगस्य निवर्त्तने ।
कारणं श्रावितश्चास्मि युक्तरूपं तदाऽनघ ।
॥ मन्त्रिण ऊचुः ॥ प्रवृद्धचक्रः पापोऽसौ त्वञ्चाशौचगतः प्रभो । न चैषः प्रथमः कल्पो युद्धं नाम कदाचन ।
ते वयं सामपूर्ब्बं वै दानं भेदन्तथैव च । प्रयोक्ष्यामस्ततः शुद्धो दैवतान्यभिवाद्य च ।
कृतस्वस्त्ययनो विप्रैर्हुत्वाऽग्नीनार्च्य च द्विजान् । ब्राह्मणैरभ्यनुज्ञातः प्रयास्यसि जयाय वै । ११००
अस्त्राणि न प्रयोज्यानि न प्रवेश्यश्च सङ्गरः । अशौचे वर्त्तमानेन वृद्धानामिति शासनं ।
सामदानादिभिः पूर्ब्बमपि भेदेन वा ततः । तं हनिष्यसि विक्रम्य शम्बरं मघवानिव ।
प्राज्ञानां वचनं काले वृद्धानाञ्च विशेषतः । श्रोतव्यमिति तच्छ्रुत्वा निवृत्तोऽस्मि नराधिप ।
ततस्तैः स क्रमः सर्व्वः प्रयुक्तः शास्त्रकोविदैः । तस्मिन् काले कुरुश्रेष्ठ कर्म्म चारब्धमुत्तमं ।
स सामादिभिरप्यादावुपायैः प्राज्ञचिन्तितैः । अनुनीयमानो दुर्बुद्धिरनुनेतुं न शक्यते । ११०५
प्रवृत्तस्तस्य तच्चक्रमधर्म्मनिरतस्य वै । परदाराभिलाषेण सहसात निवर्त्तितं ।
न त्वहं तस्य जाने तन्निवृत्तं चक्रमुत्तमं । हतं स्वकर्म्मणा तत्तु पूर्ब्बं सद्भिश्च निन्दितं ।

हतभीष: शरी चापी रथी निष्क्रम्य वै पुरात् । हतमन्त्रबलो विप्रैः प्रायोधयमरं रिपुं ।
ततः संसर्गमासाद्य बलेनास्त्रबलेन च । अहमुद्धातवधुद्धं देवासुरमिवाभवत् ।
स मयाऽस्त्रप्रतापेन निर्दग्धो रणमूर्द्धनि । पपाताभिमुखः शूरस्त्यक्त्वा प्राणं नरिन्दम । १११०
एतस्मिन्नन्तरे तात काम्पिल्यात् पृषतोऽभ्ययात् । हते नीपेश्वरे चैव हते चोग्रायुधे नृपे ।
अहिच्छत्रं स्वकं राज्यं पित्र्यं प्राप महाद्युतिः । द्रुपदस्य पिता राजन्नमैवानुमते तदा ।
ततोऽभूद्द्रुपदो राजा द्रोणस्तेन निराकृतः । ततोऽर्ज्जुनेन तरसा निर्ज्जित्य द्रुपदं रणे ।
अहिच्छत्रं सकाम्पिल्यं द्रोणायाचार्यवर्ज्जितं । प्रतिगृह्य ततो द्रोण उभयं जयतांवरः ।
काम्पिल्यं द्रुपदायैव प्रायच्छदिति विद्धि तत् । एष ते द्रुपदस्यादौ ब्रह्मदत्तस्य चैव ह । १११५
वंश. कार्त्स्न्येन वै प्रोक्तो नीपस्योग्रायुधस्य च ।
॥ युधिष्ठिर उवाच ॥ किमर्थं ब्रह्मदत्तस्य पूजनीया शकुन्तिका । अन्धञ्चकार गाङ्गेय ज्येष्ठं पुत्रं पुरा विभो ।
चिरोषिता गृहे चापि किमर्थञ्चैव तस्य सा । चकार विप्रियमिदं तस्य राज्ञो महात्मनः ।
पूजनीया च कावाऽसौ किं सख्यं तेन चैव ह । एतन्मे संशयं छिन्धि सर्व्वमुक्त्वा यथातथं ।
॥ भीष्म उवाच ॥ शृणु सर्व्वं महाराज यथावृत्तमभूत् पुरा । ब्रह्मदत्तस्य भवने तन्निबोध युधिष्ठिर । ११२०
काचिच्छकुन्तिका राजन् ब्रह्मदत्तस्य वै सखी । शितिपक्षा शोणशिराः शितिपृष्ठा सितोदरी ।
सखी सा ब्रह्मदत्तस्य सुहृदं बहुभाषदा । तस्याः कुलायमभवद्गृहे तस्य नरोत्तम ।
सा सदाऽहनि निर्गत्य तस्य राज्ञो गृहोत्तमात् । चचारामोधितीरेषु पल्वलेषु सरःसु च ।
नदीपर्व्वतकुञ्जेषु वनेषूपवनेषु च । प्रफुल्लेषु तडागेषु कह्लारेषु सुगन्धिषु ।
कुमुदोत्पलकिञ्जल्कसुरभीकृतवायुषु । हंससारसघुष्टेषु कारण्डवरुतेषु च । ११२५
चरित्वा तेषु सा राजन्निशि काम्पिल्यमागमत् । नृपतेर्भवनं प्राप्य ब्रह्मदत्तस्य धीमतः ।
राज्ञा तेन सदा राजन् कथायोगं चकार सा । आश्चर्य्याणि च दृष्टानि यानि वृत्तानि कानिचित् ।
चरित्वा विविधान्देशान् कथयामास तानि सा । कदाचित्तस्य नृपतेर्ब्रह्मदत्तस्य कौरव ।
पुत्रोऽभूद्राजशार्दूल सर्व्वसेनेति विश्रुतः । पूजनीयाऽपि सा तस्मिन् प्रसूताऽण्डमथापि च ।
तस्मिन्नीडे पुरा चैकं स कालात् प्रास्फुटत्तदा । स्फुटितो मांसपिण्डस्तु बाहुपादास्यसंयुतः । ११३०
बभूव कालस्तस्य दर्शनो बभूव पृथिवीपते । चञ्चुस्तस्याप्यभूत्पश्चादीवत्पक्षोत्थितस्य ह ।
अथ सा पूजनीया वै राजपुत्रस्वपुत्रयोः । तुल्यस्नेहात् प्रीतिमती दिवसे दिवसेऽभवत् ।
आजहार सदा सायं चञ्च्वाऽमृतफलद्वयं । अमृतस्वादसदृशं सर्व्वसन्ततनूजयोः ।
स बालो ब्रह्मदत्तस्य पूजनीयासुतस्य ह । ते फले भक्षयित्वा च पृथुकौ तौ मुदा युतौ ।
अभूतां नित्यमेवेह स्वादेतौ तौ च ते फले । तस्यां गतायामथ च पूजन्यां वै सदाऽहनि । ११३५
शिशुना चटकेनाथ धात्री तस्तु शिशुं नृप । तेन प्रक्रीडयामास ब्रह्मदत्तात्मजं सदा ।
क्रीडात्समाकृष्य तदा पूजनीयात्मजात्ततः । क्रीडता राजपुत्रेण कदाचिच्चटकः स तु ।

निगृहीतः कन्धरायां शिशुना दृढमुष्टिना । दुर्बलमुष्टिना राजन्नयं स्वल्पजीवनः ।
तन्तु पञ्चत्वमापन्नं व्यात्ताक्षं बालकातिनं । कथञ्चिच्छोणितं दृष्ट्वा नृपतिर्दुःखितोऽभवत् ।
धात्रीं तस्य जगर्हे तां तदाऽमुपरमी नृपः । ततो शोकान्वितो राजा शोचंस्तं बालकं तदा । ११५०
पूजनीयाऽपि तत्कालं गृहीत्वा तु फलद्वयं । मत्प्रवृत्तान्तं भवनमाजगाम यशस्विनी ।
अथापश्यत्तदागम्य गृहे तस्मिन्नराधिप । पञ्चभूतपरित्यक्तं शावं तं स्वतनूद्भवं ।
सुमोह दृष्ट्वा तं पुत्रं पुनः संज्ञामथालभत् । लब्धसंज्ञा च सा राजन् विललाप तपस्विनी ।
॥ पूजनीयोवाच ॥ ननु त्वमागतां पुत्र याचन्तीं परिवर्जसि । कुर्व्वंश्चाटुसहस्राणि अव्यक्तकलया गिरा ।
व्यादितास्यः क्षुधार्त्तस्य पीतेनाश्येन पुत्रक । शोणेन तालुना पुत्र कथमद्य न सर्पसि । ११५५
पद्माभ्यामाशु परिष्वज्य ननु याचामि चाप्यहं । चीचीकूचीति याचन्तं त्वामद्य न शृणोमि किं ।
मनोरथो यस्तु मम पश्येयं पुत्रकं तदा । व्यात्तास्यं वारि याचन्तं स्फुरत्यद्य ममागतः ।
स मे मनोरथो भग्नस्त्वयि पञ्चत्वमागते । विलप्यैवं बहुविधं राजानमथ साऽब्रवीत् ।
ननु मूर्द्धाभिषिक्तस्त्वं धर्म्मं वेत्सि सनातनं । अथ कस्मान्मम सुतं धात्र्या घातितवानसि ।
स्वपुत्रेण समाहत्य क्षत्रियाधम शंस मे । न च नूनं श्रुता तेऽभूदियमाङ्गिरसी श्रुतिः । ११६०
शरणागतः क्षुधार्त्तश्च शत्रुभिश्चाप्युपद्रुतः । चिरोषितश्च स्वगृहे पातव्यः सर्व्वतो भवेत् ।
अपालयन्नरो याति कुम्भीपाकमसंशयं । कथमस्य हविर्दत्वा गृह्णन्ति पितरः स्वधां ।
एवमुक्त्वा महाराज दशधर्म्मगता सती । शोकार्त्ता तस्य बालस्य चक्षुषी निर्बिभेद सा ।
कराभ्यां राजपुत्रस्य ततस्तच्चक्षुरस्फुटत् । कृत्वा चान्धं नृपसुतमुत्पपात ततोऽम्बरं ।
अथ राजा सुतं दृष्ट्वा पूजनीयामुवाच ह । विशोका भव कल्याणि कृतन्ते भीरु शोभनं । ११६५
गतशोका निवर्त्तस्व अर्थ्यं सख्यमस्तु ते । पुरेव सखि भद्रन्ते निवर्त्तस्व रमस्व च ।
पुत्रपीडाद्भवश्चापि न कोपः परमस्त्वयि । ममास्ति सखि भद्रन्ते कर्त्तव्यश्च कृतं त्वया ।
॥ पूजनीयोवाच ॥ आत्मौपम्येन जानामि पुत्रशोकं तवाप्यहं । न चाहं वस्तुमिच्छामि तव पुत्रमचक्षुषं ।
कृत्वा वै राजशार्दूल त्वद्गृहे कृतकिल्बिषा । गाथाश्चाप्युशनोगीता इमाः शृणु मयेरिताः ।
कुमित्रञ्च कुदेशञ्च कुराजानं कुसौहृदं । कुपुत्रञ्च कुभार्य्याञ्च दूरतः परिवर्ज्जयेत् । ११७०
कुमित्रे सौहृदं नास्ति कुभार्य्यायां कुतो रतिः । कुतः पिण्डः कुपुत्रे तु नास्ति सत्यं कुराजनि ।
कुसौहृदे क विश्वासः कुदेशे नैव जीव्यते । कुराजनि भयं नित्यं कुपुत्रे सर्व्वतोऽसुखं ।
अपकारिणि विस्रम्भं यः करोति नराधमः । अनाथो दुर्बलो यद्वत्स चिरं स तु जीवति ।
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् । विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ।
राजर्षिषु विश्वासं गर्भसङ्करितेषु च । यः करोति नरो मूढो न चिरं स तु जीवति । ११७५
अभ्युन्नतिं प्राप्य नरः प्राकारः कीटको यथा । स विनश्यत्यसन्देहमित्येवमुशना नृप ।
अपि मार्द्दवभावेन गात्रं संलीय बुद्धिमान् । अरिर्नाशयते नित्यं यथा वल्ली महाद्रुमं ।

मृदुराज्ञैः शनैर्भूत्वा शनैः संशोषते रिपुः । कक्षोत्थ इव सुवत्स पक्वान्मूलानि दहति ।
यद्रोहं समयं कृत्वा सुनीतावपलो हरिः । जघान नमुचिं पश्चाद्यथा फेनेन पार्थिव ।
सुप्तं मत्तं प्रमत्तं वा घातयन्ति रिपुं नराः । विशेष वलिना चापि शक्रेणापत्य जायया । ११७०
न च शेषं प्रकुर्व्वन्ति पुनर्वैरभयान्नराः । घातयन्ति समूलं हि शत्रूणामुपमां नृप ।
ऋणशेषमृणाच्छेषं शेषमग्नेश्च भूमिप । पुनर्वर्द्धेत संभूय तस्माच्छेषं न शेषयेत् ।
हसते जल्पते वैरी एकपात्रे च भुञ्जते । एकासनञ्चारोहति स्मरते तच्च किल्विषं ।
कृत्वा सम्बन्धकञ्चापि विश्वसेन्नकथञ्चन हि । पुलोमानं जघानाजौ जामाता सन् शतक्रतुः ।
निधाय मनसा वैरं प्रियं वक्तीह यो नरः । उपसर्पेच्च तं प्राज्ञः कुरङ्ग इव लुब्धकं । ११७५
न चासन्नेन वस्तव्यं सवैरे वर्द्धिते रिपौ । पातयेत्तं समूलं हि नदीरय इव द्रुमं ।
अमित्रादुन्नतिं प्राप्य नोन्नतोऽस्मीति विश्वसेत् । तस्मात् प्राप्योन्नतिं नश्येत् प्रावार इव कीटकः ।
इत्येता उशनोगीता गाथा धार्य्या विपश्चिता । कुर्व्वता चात्मरक्षां वै नरेण पृथिवीपते ।
मया च किल्विषं तुभ्यं प्रयुक्तमतिदारुणं । पुत्त्रमर्थं प्रकुर्व्वन्त्या तस्मान्नो विश्वसे त्वयि ।
एवमुक्ता प्रदुद्राव तदाकाशे पतङ्गिनी । इत्येतत्ते मयाख्यातं पुराभूतमिदं नृप । ११८०
ब्रह्मदत्तस्य राजेन्द्र यद्वृत्तं पूजनीयया । श्राद्धस्य पृच्छसे यच्च युधिष्ठिर महामते ।
अतस्ते वर्णयिष्येऽहमितिहासं पुरातनं । गीतं सनत्कुमारेण मार्कण्डेयाय पृच्छते ।
श्राद्धस्य फलमुद्दिश्य नियतं सुकृतस्य च । तन्निबोध महाराज सप्तजातिषु भारत ।
सृगालवस्य चरितं कण्डरीकस्य चैव हि । ब्रह्मदत्तद्वितीयानां योगिनां ब्रह्मचारिणां ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पूजनीयोपाख्याने विंशतितमोऽध्यायः ॥ २० ॥
॥ मार्कण्डेय उवाच ॥ श्राद्धे प्रतिष्ठितो लोकः श्राद्धे योगः प्रवर्त्तते । हन्त ते वर्त्तयिष्यामि श्राद्धस्य फलमुत्तमं । ११८५
ब्रह्मदत्तेन यत्प्राप्तं सप्तजातिषु भारत । तत एव हि धर्म्मस्य बुद्धिर्निर्मीयते शुभैः ।
पीडयाऽप्यथ धर्म्मस्य कृते श्राद्धे पुराऽनघ । यत्प्राप्तं श्राद्धजैः पूर्व्वं तन्निबोध महामते ।
ततोऽहं तानधर्मिष्ठान् कुरुक्षेत्रे पितृव्रतान् । सनत्कुमारनिर्दिष्टानपश्यं सप्त वै द्विजान् ।
दिव्येन चक्षुषा तेन यानुवाच पुरा विभुः । वाग्दुष्टः क्रोधनो हिंस्रः पिशुनः कविरेव च ।
खसृमः पितृवर्त्ती च नामभिः कर्म्मभिस्तथा । कौशिकस्य सुतास्तात शिष्या गर्गस्य भारत । ११९०
पितर्य्युपरते सर्व्वे व्रतवन्तस्तदाऽभवन् । नियोगात्ते गुरोस्तस्य गां दोग्ध्रीं समकालयन् ।
समानवत्सां कपिलां सर्व्वे न्यायागतां तदा । तेषां पथि क्षुधार्त्तानां बाल्यान्मोहाच्च भारत ।
क्रूरा बुद्धिः समभवत्तां गां वै हिंसितुं तदा । तान् कविः खसृमश्चैव याचेतां नेति वै तदा ।
न चाशक्यन्त ताभ्यां ते तदा वारयितुं द्विजाः । पितृवर्त्ती तु यस्तेषां नित्यं श्राद्धाह्निको द्विजः ।
स सर्व्वानब्रवीद्भ्रातॄन् कोपाद्धर्म्मे समाहितः । यद्यवश्यं प्रहन्तव्यं पितॄनुद्दिश्य साध्विमां । ११९५
प्रकुर्व्वीमहि गां सम्यक् सर्व्व एव समाहिताः । एवमेषाऽपि गौर्द्धर्म्मं प्राप्स्यते नात्र संशयः ।

पितॄनभ्यर्च्य धर्म्मेण नाधर्म्मो नो भविष्यति । तथेत्युक्त्वा तु ते सर्व्वे प्रोक्षयित्वा च गां ततः ।
पितृभ्यः कल्पयित्वैनामुपायुञ्जत भारत । उपयुज्य च गां सर्व्वे गुरोस्तस्य न्यवेदयन् ।
शार्दूलेन हता धेनुर्वत्सोऽयं प्रतिगृह्यतां । आर्ज्जवात् स तु वत्सं तं प्रतिजग्राह वै द्विजः ।
मिथ्योपचर्य्य ते तन्तु गुरुमन्यायतो द्विजाः । कालेन समयुज्यन्त सर्व्वे एवायुषः क्षये । १२००
ते वै क्रूरतया हिंस्रा अनार्य्यत्वाद्गुरौ तथा । उग्रा हिंसाविहाराश्च सप्ताजायन्त सोदराः ।
लुब्धकस्यात्मजास्तात बलवन्तो मनीषिणः । पितॄनभ्यर्च्य धर्म्मेण प्रोक्षयित्वा च गां तदा ।
स्मृतिप्रत्यवमर्शश्च तेषां जात्यन्तरेऽभवत् । जाता व्याधा दशार्णेषु सप्त धर्म्मविचक्षणाः ।
स्वधर्म्मनिरताः सर्व्वे लोभानृतविवर्ज्जिताः । तावन्मात्रं प्रकुर्व्वन्ति यावता प्राणधारणं ।
शेषं ध्यानपराः कालमनुध्यायन्ति कर्म्म तत् । नामधेयानि चाप्येषामिमान्यासन् विशाम्पते ।
निर्वैरो निर्वृतिः क्षान्तो निर्मन्युः कृतिरेव च । वैघसो मातृवर्त्ती च व्याधाः परमधार्म्मिकाः ।
तैरेवमुषितैस्तात हिंसाधर्म्मपरैः सदा । माता च पूजिता वृद्धा पिता च परितोषितः ।
यदा माता पिता चैव संयुक्तौ कालधर्म्मणा । तदा धनूंषि ते त्यक्त्वा वने प्राणानवासृजन् ।
शुभेन कर्म्मणा तेन जाता जातिस्मरा मृगाः । त्रासानुत्पाद्य संविग्ना रम्ये कालञ्जरे गिरौ ।
उन्मुखो नित्यवित्रस्तः स्तब्धकर्णो विलोचनः । पण्डितो घस्मरो नाडी नामतस्तेऽभवन्मृगाः । १२१०
तमेवार्थमनुध्यान्तो जातिस्मरणसम्भवं । आसन् वनेचरा दान्ता निर्द्वन्द्वा निष्परिग्रहाः ।
ते सर्व्वे शुभकर्म्माणः सधर्म्माणो वनेचराः । योगधर्म्ममनुध्यान्तो विहरन्ति स्म तत्र ह ।
मरुं साध्य जहुः प्राणान् लब्धाहारास्तपस्विनः । तेषां मरुं साधयतां पदन्यासानि भारत ।
तथैवाद्यापि दृश्यन्ते गिरौ कालञ्जरे नृप । कर्म्मणा तेन ते तात शुभेनाशुभवर्ज्जिताः ।
शुभाच्छुभतरां योनिं चक्रवाकत्वमागताः । शुभे देशे शरद्वीपे सप्तैवासन् जलौकसः । १२१५
त्यक्त्वा सहचरीधर्म्मं मुनयो धर्म्मचारिणः । सुमनाः शुचिवाक् शुद्धः पञ्चमश्छिद्रदर्शनः ।
सुनेत्रश्च स्वतन्त्रश्च शकुना नामतः स्मृताः । पञ्चमः पाञ्चिकस्तत्र सप्तजातिष्वजायत ।
षष्ठस्तु कण्डरीकोऽभूद्ब्रह्मदत्तस्तु सप्तमः । तेषान्तु तपसा तेन सप्तजातिकृतेन वै ।
योगस्य चाभिनिर्वृत्त्या प्रतिभानाच्च शोभनात् । पूर्व्वजातिषु यद्वृत्तं श्रुतं गुरुकुलेषु वै ।
तथैवावस्थिता बुद्धिः संसारेष्वपि वर्त्ततां । ते ब्रह्मचारिणः सर्व्वे विहङ्गा ब्रह्मवादिनः । १२२०
योगधर्म्ममनुध्यान्तो विचरन्ति स्म तत्र ह । तेषान्तत्र विहङ्गानां चरतां सहचारिणां ।
नीपानामीश्वरो राजा विभ्राजः पौरवान्वयः । विभ्राजमानो वपुषा प्रभावेण समन्वितः ।
श्रीमानन्तःपुरवृतो वनं तत् प्रविवेश ह । स्वतन्त्रश्चक्रवाकस्तु स्पृहयामास तं नृप ।
दृष्ट्वायान्तं श्रियोपेतं भवेयमहमीदृशः । यद्यस्ति सुकृतं किञ्चित्तपो वा नियमोऽपि वा ।
खिन्नो ह्यत्युपवासेन तपसा निष्फलेन च । १२२५
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पितृकल्पे एकविंशोऽध्यायः ॥ २१ ॥

॥ मार्कण्डेय उवाच ॥ ततस्तावब्रुवाताम् तौ चक्रवाकौ ब्रह्मचारिणौ । आवां ते सचिवौ स्यावस्तव प्रियहितैषिणौ ।
तथेत्युक्ता तु तयासीत्तदा योगात्मिका मतिः । एवमेतत् समयं चक्रुः शुचिवाक्यं तमभाषत ।
यस्मात् कामप्रधानस्त्वं योगधर्म्ममपास्य वै । एवं वरं प्रार्थयसे तस्मादाक्यं निबोध मे ।
राजा त्वं भविता तात काम्पिल्ये नात्र संशयः । भविष्यतः सखायौ च द्वाविमौ सचिवौ तव ।
शप्ता तानभिभाष्याथ चत्वारश्चक्रुरुत्तमाः । तांश्चैवमभीप्सतो राज्यं व्यभिचारप्रधर्षितान् । ११९०
शप्ताः खगास्त्रयस्ते तु योगभ्रष्टा विचेतसः । तानथायाचन्त चतुरस्त्रयस्ते ब्रह्मचारिणः ।
तेषां प्रसादं चक्रुस्ते अथैनान् सुमनाऽब्रवीत् । सर्वेषामेव वचनात् प्रसादादुत्तमास्तथा ।
अन्तवान् भविता शापो युष्माकं नात्र संशयः । इतश्च्युताश्च मानुष्यं प्राप्य योगमवाप्स्यथ ।
सर्व्वसत्त्वरुतज्ञश्च स्वतन्त्रोऽयं भविष्यति । पितृप्रसादो ह्यस्माभिरस्य प्राप्तः कृतेन वै ।
गां प्रोक्षयित्वा धर्म्मेण पितृभ्य उपकल्पिता । अस्माकं ज्ञानसंयोगः सर्व्वेषां योगसाधनः । ११९५
इमञ्च वाक्यसन्दर्भं श्लोकमेकमुदाहृतम् । पुरुषान्तरितं श्रुत्वा ततो योगमवाप्स्यथ ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पितृकल्पे द्वाविंशोऽध्यायः ॥ २२ ॥
॥ मार्कण्डेय उवाच ॥ ते योगधर्म्मनिरताः सप्त मानसचारिणः । पद्मगर्भोऽरविन्दाक्षः क्षीरगर्भः सुलोचनः ।
उरुबिन्दुः सुबिन्दुश्च हेमगर्भस्तु सप्तमः । वाय्वम्बुभक्षाः सततं शरीराण्युपशोषयन् ।
राजा विभ्राजमानस्तु वपुषा तद्वनं तदा । अन्तःपुरवृतो नन्दनं मघवानिव । १२००
स तानपश्यत् खचरान् योगधर्म्मात्मकान् नृपः । निर्व्वेदाच्च ततस्तांस्तमनुध्यायन् पुरं ययौ ।
अणुहो नाम तस्यासीत् पुत्रः परमधार्म्मिकः । अणुर्धर्म्मरतिर्नित्यमणुर्योऽध्यगमत् पदम् ।
प्रादात् कन्यां शुकस्तस्मै कृत्वीं पूजितलक्षणाम् । तस्यामासीदनुप्रीतिर्योगधर्म्मरतः सदा ।
सा तु दृष्टा पुरा भीष्म पितृकन्या मनीषिणी । सनत्कुमारेण तदा पत्नी सा मम शोभना ।
सत्यधर्म्मभृता सेहा दुर्न्निरीक्ष्या कृतात्मभिः । योगा च योगपत्नी च योगमाता तथैव च ।
यथा ते कथितं पूर्व्वं पितृकल्पेषु वै मया । विभ्राजस्तु सुतं राज्ये स्थापयित्वा नरेश्वरः । १२०५
आमन्त्र्य पौरान् प्रीतात्मा ब्राह्मणान् स्वस्तिवाच्य च । प्रायात् सरस्तपस्तेपुर्यत्र ते सहचारिणः ।
स वै तत्र निराहारो वायुभक्षो महातपाः । तपसा कर्शयामास शरीरं पार्थिवः ।
तस्य सङ्कल्प आसीच्च तेषां चक्रवाकयोः वै । सुतत्वं प्राप्य योगेन युज्येयमिति भारत ।
कृत्वाऽभिसन्धिं तपसा महता च समन्वितः । महातपाः स विभ्राजो विरराजांशुमानिव ।
ततो विभ्राजितं तेन वैभ्राजं नाम तद्वनम् । सरश्च सुमहत्तेन वैभ्राजमिति विश्रुतम् । १२१०
अथ ते शकुना राजंश्चत्वारो योगधर्म्मिणः । योगभ्रष्टास्त्रयश्चैव दैवात्तत्र ततोऽभवन् ।
काम्पिल्ये नगरे ते तु ब्रह्मदत्तपुरोगमाः । जाताः सप्त महात्मानः सर्व्वे विगतकल्मषाः ।
ज्ञानध्यानतपःपूता वेदवेदाङ्गपारगाः । स्मृतिमन्तोऽत्र चत्वारस्त्रयस्तु परिमोहिताः ।
स्वतन्त्रश्चाणुहात्मजो ब्रह्मदत्तो महायशाः । यथा जातोऽत्र पतिभावे सङ्कल्पः पूर्व्वचिन्तितः ।

छिद्रदर्शी सुनेत्रश्च तथा बाभ्रव्यवत्सयोः । जातौ श्रोत्रियदायादौ वेदवेदाङ्गपारगौ । १२५५
सखायौ ब्रह्मदत्तस्य पूर्व्वजातिसहोषितौ । पाञ्चालः पाञ्चिकस्तत्र कण्डरीकस्तथाऽपरः ।
पाञ्चालो बह्वृचस्त्वासीदाचार्य्यत्वं चकार ह । द्विवेदः कण्डरीकस्तु छन्दोगोऽध्वर्य्युरेव च ।
सर्व्वसत्त्वरुतज्ञस्तु राजासीदणुहात्मजः । पाञ्चालकण्डरीकाभ्यां तस्य सख्यमभूत्तदा ।
ते ग्राम्यधर्म्मनिरताः कामस्य वशवर्त्तिनः । पूर्व्वजातिकृतेनासन् धर्म्मकामार्थकोविदाः ।
अणुहस्तु नृपश्रेष्ठो ब्रह्मदत्तमकल्मषं । अभिषिच्य तदा राज्ये परां गतिमवाप्तवान् । १२६०
ब्रह्मदत्तस्य भार्य्या तु देवलस्यात्मजाऽभवत् । असितस्य हि दुर्द्धर्षा सन्नतिर्नाम नामतः ।
तामेकभावसम्पन्नां लेभे कन्यामनुत्तमां । सन्नतिं सन्नतिमतीं देवलाद्योगधर्म्मिणीं ।
पञ्चमः पाञ्चिकस्तत्र सप्तजातिषु भारत । षष्ठस्तु कण्डरीकोऽभूद्ब्रह्मदत्तस्तु सप्तमः ।
शेषा विहङ्गमा ये वै काम्पिल्ये सहचारिणः । ते जाताः श्रोत्रियकुले सुदरिद्रे सहोदराः
धृतिमान् सुमना विद्वांस्तत्त्वदर्शी च नामतः । वेदाध्ययनसम्पन्नाश्चत्वारश्छिद्रदर्शिनः । १२६५
तेषां संविच्चयोत्पन्ना पूर्व्वजातिकृता तदा । ते योगधर्म्मनिरताः प्रस्थिताः सर्व्व एव हि ।
आमन्त्र्य पितरं तात पिता तानब्रवीत्तदा । अधर्म्म एष युष्माकं यन्मां त्यक्त्वा गमिष्यथ ।
दारिद्र्यमनपाकृत्य पुत्रार्थांश्चैव पुष्कलान् । शुश्रूषामप्रयुक्त्वैव कथं वै गन्तुमर्हथ ।
ते तमूचुर्द्विजाः सर्व्वे पितरं पुनरेव च । करिष्यामो विधानन्ते येन त्वं वर्त्तयिष्यसि ।
इमं श्लोकं महार्थं त्वं राजानं सहमन्त्रिणं । श्रावयेथाः समागम्य ब्रह्मदत्तमकल्मषं । १२७०
स ते दास्यति प्रीतात्मा ग्रामान् भोगांश्च पुष्कलान् । कामानभीप्सितान् सर्व्वान् गच्छ तात यथेप्सितं ।
एतावदुक्त्वा ते सर्व्वे पूजयित्वा च तं गुरुं । योगधर्म्ममनुप्राप्य परां निर्वृतिमाययुः ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पितृकल्पे त्रयोविंशोऽध्यायः ॥ २३ ॥
॥ मार्कण्डेय उवाच ॥ ब्रह्मदत्तस्य तनयः स वैभ्राजस्त्वजायत । योगात्मा तपसा युक्तो विष्वक्सेन इति श्रुतः ।
कदाचिद्ब्रह्मदत्तः स भार्य्यया सहितो वने । विजहार प्रहृष्टात्मा यथा शच्या शतक्रतुः ।
ततः पिपीलिकरुतं शुश्राव स नराधिप । कामिनीं कामिनस्तस्य याचतः क्रोशतो भृशं । १२७५
श्रुत्वा तु याच्यमानां तां क्रुद्धां सूक्ष्मां पिपीलिकां । ब्रह्मदत्तो महाहासमकस्मादेव चाहसत् ।
ततः सा सन्नतिर्दीना व्रीडितेवाभवत्तदा । निराहारा बहुतिथं बभूव वरवर्णिनी ।
प्रसाद्यमाना भर्त्रा सा तमुवाच शुचिस्मिता । त्वया ऽवहसिता राजन् नाहं जीवितुमुत्सहे
स तत्कारणमाचख्यौ न च सा श्रद्दधाति तत् । उवाच चैनं कुपिता नैष भावोऽस्ति मानुषे ।
को वै पिपीलिकरुतं मानुषो वेत्तुमर्हति । ऋते देवप्रसादाद्वा पूर्व्वजातिकृतेन वा । १२८०
तपोबलेन वा राजन् विद्यया वा नराधिप । यद्येष वै प्रभावस्ते सर्व्वसत्त्वरुतज्ञता ।
यथाऽहमेतज्जानीयां तथा प्रत्याययस्व मां । प्राणानहं परित्यक्ष्ये राजन् सत्येन ते शपे ।
तत्तस्या वचनं श्रुत्वा महिष्याः परुषं प्रभुः । स राजा परमापन्नो देवश्रेष्ठं प्रपद्यत ।

शरणं सर्व्वभूतेशं भक्त्या नारायणं प्रभुं । क्षमावितो निराहारः षण्मासेन महायशाः ।
ददर्श दर्शने राजा देवं नारायणं प्रभुं । उवाच चैनं भगवान् सर्व्वभूतानुकम्पकः । १२८५
ब्रह्मदत्त प्रभाते त्वं कल्याणं समवाप्स्यसि । इत्युक्त्वा भगवान् देवस्तत्रैवान्तरधीयत ।
चतुर्णान्तु पिता योऽसौ आत्मजानां महात्मनां । शोकं सोऽभीत्य पुत्रेभ्यः कृतकृत्य इवाभवत् ।
स राजानमथान्विच्छन् ब्रह्मनिष्ठमच्युतं । न ददर्शान्तरं किञ्चित् श्लोकं श्रावयितुं तदा ।
अथ राजा शिरःस्नातो लब्ध्वा नारायणाद्वरं । प्रविवेश पुरं प्रीतो रथमारुह्य काञ्चनं ।
तस्य रश्मीन् प्रत्यगृह्णात् कण्डरीको द्विजर्षभः । चामरव्यजनञ्चापि बाभ्रव्यः समवाक्षिपत् । १२९०
इदमन्तरमित्येवं ततः स ब्राह्मणस्तदा । श्रावयामास राजानं श्लोकं तं सचिवौ च तौ ।
सप्त व्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ । चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे ।
तेऽभिजाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः । प्रस्थिता दूरमध्वानं यूयं तेभ्योऽवसीदथ ।
तच्छ्रुत्वा मोहमगमद्ब्रह्मदत्तो नराधिपः । सचिवश्चास्य पाञ्चाल्यः कण्डरीकस्तथैव च ।
स्रस्तरश्मिप्रतोदौ तौ पतितव्यजनावुभौ । दृष्ट्वा बभूवुरस्वस्थाः पौराश्च सुहृदस्तथा । १२९५
मुहूर्त्तमेव राजा स सह ताभ्यां रथे स्थितः । प्रतिलभ्य ततः संज्ञां प्रत्यागच्छदरिन्दम ।
ततस्ते तत् सरः स्मृत्वा योगञ्चैवोपलभ्य च । ब्राह्मणं विपुलैरर्थैर्भोगैश्च समयोजयन् ।
अभिषिच्य स्वराज्ये तु विष्वक्सेनमरिन्दमं । जगाम ब्रह्मदत्तोऽथ सदारो वनमेव ह ।
अथ तं सन्नतिर्धीरा देवलस्य सुता तदा । उवाच परमप्रीता योगाद्वनगतं नृपं ।
जानन्त्या ते महाराज पिपीलिकरुतं श्रुतं । चोदितः क्रोधमुद्दिश्य सक्तः कामेषु वै मया । १३००
इतो वयं गमिष्यामो गतिमिष्टामनुत्तमां । तव चान्तर्हितो योगस्ततः संस्मारितो मया ।
स राजा परमप्रीतः पत्न्याः श्रुत्वा वचस्तदा । प्राप्य योगं बलादेव गतिं प्राप सुदुर्लभां ।
कण्डरीकोऽपि धर्म्मात्मा साङ्ख्ययोगमनुत्तमं । प्राप्य योगगतिं सिद्धो विशुद्धः स्वेन कर्म्मणा ।
क्रमं प्रणीय पाञ्चालः शिक्षामुत्पाद्य केवलां । योगाचार्य्यगतिं प्राप यशश्चाग्र्यं महातपाः ।
एवमेतत् पुरावृत्तं मम प्रत्यक्षमच्युत । तद्धारयस्व गाङ्गेय श्रेयसा योक्ष्यसे ततः । १३०५
ये चान्ये धारयिष्यन्ति तेषां चरितमुत्तमं । तिर्य्यग्योनिषु ते जातु न भविष्यन्ति कर्हिचित् ।
श्रुत्वा चेदमुपाख्यानं महार्थं महतां गतिं । योगधर्म्मो हृदि सदा परिवर्त्तति भारत ।
स तेनैवानुबन्धेन कदाचिल्लभते शमं । ततो योगगतिं याति सिद्धानां भुवि दुर्लभां ।
॥ वैशम्पायन उवाच ॥ एवमेतत् पुरा गीतं मार्कण्डेयेन धीमता । श्राद्धस्य फलमुद्दिश्य सोमस्याप्यायनाय वै ।
सोमो हि भगवान् देवो लोकस्याप्यायनं परं । वृष्णिवंशप्रसङ्गेन तस्य वंशं निबोध मे । १३१०
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पितृकल्पे चतुर्विंशोऽध्यायः ॥ २४ ॥
॥ वैशम्पायन उवाच ॥ पिता सोमस्य वै राजन् जज्ञेऽत्रिर्भगवानृषिः । ब्रह्मणो मानसात् पूर्व्वं प्रजासर्गं विधित्सतः ।
तत्रात्रिः सर्व्वभूतानां तस्थौ स्वतनयैर्वृतः । कर्म्मणा मनसा वाचा शुभान्येव चचार सः ।

अहिंसः सर्व्वभूतेषु धर्म्मात्मा संशितव्रतः । काष्ठकुड्यशिलाभूत ऊर्द्ध्वबाहुर्महाद्युतिः ।
अनुत्तरं नाम तपो येन तप्तं महत् पुरा । त्रीणि वर्षसहस्राणि दिव्यानीति हि नः श्रुतं ।
तस्योर्द्ध्वरेतसस्तत्र स्थितस्यानिमिषस्य ह । सोमत्वं तनुरापेदे महासत्त्वस्य भारत ।
ऊर्द्ध्वमाचक्रमे तस्य सोमत्वं भावितात्मनः । नेत्राभ्यां वारि सुस्राव दशधा द्योतयन् दिशः ।
तं गर्भं विधिना हृष्टा दश देव्यो दधुस्तदा । समेत्य धारयामासुर्न च ताः समशक्नुवन् ।
स ताभ्यः सहसैवाथ दिग्भ्यो गर्भः प्रभान्वितः । पपात भासयन् लोकान् शीतांशुः सर्व्वभावनः ।
यदा न धारणे शक्तास्तस्य गर्भस्य ता दिशः । ततस्ताभिः सहैवाशु निपपात वसुन्धरां ।
पतितं सोममालोक्य ब्रह्मा लोकपितामहः । रथमारोपयामास लोकानां हितकाम्यया ।
स हि वेदमयस्तात धर्म्मात्मा सत्यसङ्गरः । युक्तो वाजिसहस्रेण सितेनेति हि नः श्रुतं ।
तस्मिन्निपतिते देवाः पुत्रेऽत्रेः परमात्मनि । तुष्टुवुर्ब्रह्मणः पुत्रा मानसाः सप्त ये श्रुताः ।
तथैवाङ्गिरसस्तत्र भृगोरेवात्मजैः सह । ऋग्भिर्यजुर्भिः सामभिरथर्व्वाङ्गिरसैरपि ।
तस्य संस्तूयमानस्य तेजः सोमस्य भास्वतः । आप्याय्यमानं लोकांस्त्रीन् भासयामास सर्व्वतः ।
स तेन रथमुख्येन सागरान्तां वसुन्धरां । त्रिःसप्तकृत्वोऽतियशाश्चकाराभिप्रदक्षिणं ।
तस्य यच्च्यावितं तेजः पृथिवीमन्वपद्यत । ओषध्यस्ताः समुत्पन्नास्तेजसा प्रज्वलन्त्युत ।
ताभिर्द्धार्य्यास्त्रयो लोकाः प्रजाश्चैव चतुर्व्विधाः । पोष्टा हि भगवान् सोमो जगतो जगतीपते ।
स लब्धतेजा भगवान् संस्तवैस्तैश्च कर्म्मभिः । तपस्तेपे महाभाग पद्मानां दशतीर्दश ।
हिरण्यवर्णा या देव्यो धारयन्त्यात्मना जगत् । विभुस्तासामभूद्देवः प्रख्यातः स्वेन कर्म्मणा ।
ततस्तस्मै ददौ राज्यं ब्रह्मा ब्रह्मविदां वरः । वीजौषधीनां विप्राणामपाञ्च जनमेजय ।
सोऽभिषिक्तो महाराज राजराज्येन राजराट् । त्रीन् लोकान् भासयामास स्वभासा भास्वताम्वरः ।
सप्तविंशतिरिन्दोस्तु दाक्षायिण्यो महाव्रताः । ददौ प्राचेतसो दक्षो नक्षत्राणीति या विदुः ।
स तत् प्राप्य महद्राज्यं सोमः सोमवताम्वरः । समाजह्रे राजसूयं सहस्रशतदक्षिणं ।
होताऽस्य भगवानत्रिरध्वर्य्युरभवद्भृगुः । हिरण्यगर्भश्चोद्गाता ब्रह्मा ब्रह्मत्वमीयिवान् ।
सदस्यस्तत्र भगवान् हरिर्नारायणः प्रभुः । सनत्कुमारप्रमुखैराद्यैर्ब्रह्मर्षिभिर्वृतः ।
दक्षिणामददत् सोमस्त्रीन् लोकानिति नः श्रुतं । तेभ्यो ब्रह्मर्षिमुख्येभ्यः सदस्येभ्यश्च भारत ।
तं सिनी च कुहूश्चैव द्युतिः पुष्टिः प्रभा वसुः । कीर्त्तिर्धृतिश्च लक्ष्मीश्च नव देव्यः सिषेविरे ।
प्राप्यावभृथमव्यग्रः सर्व्वदेवर्षिपूजितः । विरराजाधिराजेन्द्रो दशधा भासयन् दिशः ।
तस्य तत् प्राप्य दुष्प्रापमैश्वर्य्यमृषिसंस्तुतं । विबभ्राम मतिस्तात विनयादनयाहृता ।
वृहस्पतेः स वै भार्य्यां तारां नाम यशस्विनीं । जहार तरसा सर्व्वानवमत्याङ्गिरःसुतान् ।
स याच्यमानो देवैश्च तथा देवर्षिभिः सह । नैव व्यसर्ज्जयत्तारां तस्मा आङ्गिरसे तदा ।
स संरब्धस्तस्मिन् देवाचार्य्यो वृहस्पतिः । उशनास्तस्य जग्राह पार्ष्णिमङ्गिरसस्तदा ।

स हि शिष्यो महातेजाः पितुः पूर्व्वो बृहस्पतेः । तेन स्नेहेन भगवान् रुद्रस्तस्य बृहस्पतेः ।
पार्ष्णिग्राहोऽभवद्देवः प्रगृह्याजगवं धनुः । तेन ब्रह्मशिरो नाम परमास्त्रं महात्मना ।
उद्दिश्य दैत्यानुत्सृष्टं येनैषां नाशितं यशः । तत्र तद्युद्धमभवत् प्रख्यातं तारकामयं । १३४५
देवानां दानवानाञ्च लोकक्षयकरं महत् । तत्र शिष्टास्तु ये देवास्तुषिताश्चैव भारत ।
ब्रह्माणं शरणं जग्मुरादिदेवं सनातनं । ततो निवार्य्योशनसं तं वै रुद्रञ्च शङ्करं ।
ददावङ्गिरसे तारां स्वयमेव पितामहः । तामन्तःप्रसवां दृष्ट्वा तारां प्राह बृहस्पतिः ।
मदीयायां न ते योनौ गर्भो धार्य्यः कथञ्चन । अयोनावुत्सृजत्तं वै कुमारं दस्युहन्तमं ।
इषीकास्तम्बमासाद्य ज्वलन्तमिव पावकं । जातमात्रः स भगवान् देवानामक्षिपद्वपुः । १३५०
ततः संशयमापन्नास्तारामूचुः सुरोत्तमाः । सत्यं ब्रूहि सुतः कस्य सोमस्याथ बृहस्पतेः ।
पृच्छ्यमाना यदा देवैर्नाह सा साध्वसाधु वा । तदा तां शप्तुमारब्धः कुमारो दस्युहन्तमः ।
तं निवार्य्य ततो ब्रह्मा तारां पप्रच्छ संशयं । यदत्र तथ्यं तद्ब्रूहि तारे कस्य सुतो ह्ययं ।
सा प्राञ्जलिरुवाचेदं ब्रह्माणं वरदं शनैः । सोमस्येति महात्मानं कुमारं दस्युहन्तमं ।
तं मूर्द्ध्न्याघ्राय तनयं सोमो धाता प्रजापतिः । बुध इत्यकरोन्नाम तस्य पुत्रस्य धीमतः । १३५५
प्रतिकूलञ्च गगणे समभ्युत्तिष्ठते बुधः । उत्पादयामास तदा पुत्रं वै राजपुत्रिका ।
तस्यापत्यं महाराजो बभूवैलः पुरूरवाः । उर्व्वश्यां जज्ञिरे यस्य पुत्राः सप्त महात्मनः ।
प्रसह्य धर्षितस्तत्र सोमो वै राजयक्ष्मणा । ततो यक्ष्माभिभूतस्तु सोमः प्रक्षीणमण्डलः ।
जगाम शरणायाथ पितरं सोऽत्रिमेव च । तस्य तत् पापशमनं चकारात्रिर्महातपाः ।
स राजयक्ष्मणा मुक्तः श्रिया जज्वाल सर्व्वशः । एतत् सोमस्य वै जन्म कीर्त्तितं कीर्त्तिवर्द्धनं । १३६०
वंशमस्य महाराज कीर्त्त्यमानमतः शृणु । धन्यमारोग्यमायुष्यं पुण्यं सङ्कल्पसाधकं ।
सोमस्य जन्म श्रुत्वैव पापेभ्यो विप्रमुच्यते ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि सोमोत्पत्तिकथने पञ्चविंशोऽध्यायः ॥ २५ ॥
॥ वैशम्पायन उवाच ॥ बुधस्य तु महाराज विद्वान् पुत्रः पुरूरवाः । तेजस्वी दानशीलश्च यज्वा विपुलदक्षिणः ।
ब्रह्मवादी पराक्रान्तः शत्रुभिर्युधि दुर्ज्जयः । आहर्त्ता चाग्निहोत्रस्य यज्ञानाञ्च महीपतिः ।
सत्यवादी पुण्यमतिः काम्यः संवृतमैथुनः । अतीव त्रिषु लोकेषु यशसाऽप्रतिमस्तदा । १३६५
तं ब्रह्मवादिनं क्षान्तं धर्म्मज्ञं सत्यवादिनं । उर्व्वशी वरयामास हित्वा मानं यशस्विनी ।
तया सहावसद्राजा दश वर्षाणि पञ्च च । पञ्च षट् सप्त चाष्टौ च दश चाष्टौ च भारत ।
वने चैत्ररथे रम्ये तथा मन्दाकिनीतटे । अलकायां विशालायां नन्दने च वनोत्तमे ।
उत्तरान् स कुरून् प्राप्य मनोरथफलद्रुमान् । गन्धमादनपादेषु मेरुशृङ्गे तथोत्तरे ।
एतेषु वनमुख्येषु सुरैराचरितेषु च । उर्व्वश्या सहितो राजा रेमे परमया मुदा । १३७०
देशे पुण्यतमे चैव महर्षिभिरभिष्टुते । राज्यं स कारयामास प्रयागे पृथिवीपतिः ।

तस्य पुत्रा बभूवुस्ते सप्त देवसुतोपमाः । दिवि जाता महात्मान आयुर्धीमानमावसुः ।
विश्वायुश्चैव धर्म्मात्मा श्रुतायुश्च तथाऽपरः । दृढायुश्च वनायुश्च शतायुश्चोर्व्वशीसुताः ।
॥ जनमेजय उवाच ॥ गन्धर्व्वी उर्व्वशी देवी राजानं मानुषं कथं । देवानुत्सृज्य संप्राप्ता तन्मे ब्रूहि बहुश्रुत ।
॥ वैशम्पायन उवाच ॥ ब्रह्मशापाभिभूता सा मानुषं समपद्यत । ऐलन्तु सा वरारोहा समयात् समुपस्थिता । १३७५
आत्मनः शापमोक्षार्थं समयं सा चकार ह । अनग्नदर्शनञ्चैव सकामायाश्च मैथुनं।
द्वौ मेषौ शयनाभ्याशे तदा बद्धौ च तिष्ठतः । घृतमात्रा तथाहारः कालमेकन्तु पार्थिव ।
यद्येष समयो राजन् यावत् कालञ्च ते दृढः । तावत् कालन्तु वत्स्यामि कृतः समय एष नः ।
तस्यास्तं समयं सर्व्वं स राजा समपालयत् । एवं सा वसते तत्र पुरूरवसि भाविनी ।
वर्षाण्येकोनषष्टिन्तु तत्सक्ता शापमोहिता । उर्व्वश्यां मानुषस्थायां गन्धर्व्वाश्चिन्तयाऽन्विताः । १३८०
॥ गन्धर्व्वा ऊचुः ॥ चिन्तयध्वं महाभागा यथा सा तु वराङ्गना । समागच्छेत् पुनर्देवानुर्व्वशी स्वर्गभूषणं ।
ततो विश्वावसुर्नाम तत्राह वदताम्वरः । मया तु समयस्ताभ्यां क्रियमाणः श्रुतः पुरा ।
व्युत्क्रान्तसमयं सा वै राजानं त्यक्ष्यते यथा । तदहं वेद्मि शेषेण यथा भेत्स्यत्यसौ नृपः ।
ससहायो गमिष्यामि युष्माकं कार्य्यसिद्धये । एवमुक्त्वा गतस्तत्र प्रतिष्ठानं महायशाः ।
निशायामथ चागम्य मेषमेकं जहार सः । मातृवद्वर्त्तते सा तु मेषयोश्चारुहासिनी । १३८५
गन्धर्व्वागमनं ज्ञात्वा शापान्तञ्च यशस्विनी । राजानमब्रवीत्तत्र पुत्रो मे ऽह्रियतेति सा ।
एवमुक्तो विनिश्चित्य नग्नो नैवोदतिष्ठत । नग्नं मां द्रक्ष्यते देवी समयो वितथो भवेत् ।
ततो भूयस्तु गन्धर्व्वा द्वितीयं मेषमाहरन् । द्वितीये तु हृते मेषे ऐलं देव्यब्रवीदिदं ।
पुत्रो मे ह्रियते राजन्ननाथाया इव प्रभो । एवमुक्तस्तदोत्थाय नग्नो राजा प्रधावितः ।
मेषयोः पदमन्विच्छन् गन्धर्व्वैर्विद्युदुत्थय । उत्पादिता सुमहती यया तद्भवनं महत् । १३९०
प्रकाशितं वै सहसा ततो नग्नमवैक्षत । नग्नं दृष्ट्वा तिरोभूता साऽप्सराः कामरूपिणी ।
तिरोभूतान्तु तां दृष्ट्वा गन्धर्व्वा जग्मुरन्तिकं । उत्सृष्टावुरणौ दृष्ट्वा राजा गृहमागतो गृहं ।
अपश्यन्नुर्व्वशीं तत्र विललाप सुदुःखितः । चचार पृथिवीञ्चापि मार्गमाण इतस्ततः ।
अथापश्यत् स तां राजा कुरुक्षेत्रे महाबलः । प्लक्षतीर्थे पुष्करिण्यां हैमवत्यां समाप्लुतां ।
क्रीडन्तीमप्सरोभिश्च पञ्चभिः सह शोभनां । तां क्रीडन्तीं ततो दृष्ट्वा विललाप सुदुःखितः । १३९५
सा चापि तत्र तं दृष्ट्वा राजानमविदूरतः । उर्व्वशी ताः सखीः प्राह स एष पुरुषोत्तमः ।
यस्मिन्नहमवात्सं वै दर्शयामास तं नृपं । समाविग्नास्तु ताः सर्व्वाः पुनरेव नराधिप ।
जाये हे तिष्ठ मनसि घोरे वचसि तिष्ठ ह । एवमादीनि सूक्तानि परस्परमभाषत ।
उर्व्वशी चाब्रवीदैलं सगर्भाऽहं त्वया विभो । संवत्सरात् कुमारास्ते भविष्यन्ति न संशयः ।
निशामेकाञ्च नृपते निवत्स्यसि मया सह । हृष्टो जगाम राजाऽथ स्वपुरं सुमहायशाः । १४००
गते संवत्सरे भूय उर्व्वशी पुनरागमत् । उषितश्च तया सार्द्धमेकरात्रं महायशाः ।

उर्व्वश्यथाब्रवीदैलं गन्धर्व्वा वरदास्तव। तान् वृणीष्व महाराज ब्रूहि चैतांस्त्वमेव हि।
वृणीष्व समतां राजन् गन्धर्व्वाणां महात्मनां। तथेत्युक्ता वरं वव्रे गन्धर्व्वास्तु तथाऽस्त्विति।
पूरयित्वाऽग्निना स्थालीं गन्धर्व्वा हि तमब्रुवन्। अनेनेष्ट्वा च लोकान् नः प्राप्स्यसि त्वं नराधिप।
तामादाय कुमारांस्तु नगरायोपचक्रमे। निक्षिप्याग्निमरण्ये तु सपुत्त्रस्तु गृहं ययौ। १४०५
अभ्येत्याग्निन्तु नापश्यदश्वत्थं तत्र दृष्टवान्। शमीजातन्तु तं दृष्ट्वा अश्वत्थं विस्मितस्ततः।
गन्धर्व्वेभ्यस्तदाऽशंसदग्निनाशं ततस्तु सः। श्रुत्वा तमर्थमखिलमरणीन्तु समादिशन्।
अश्वत्थादरणीं कृत्वा मथित्वाऽग्निं यथाविधि। मथित्वाऽग्निं त्रिधा कृत्वा अयजत् स नराधिपः।
इष्ट्वा यज्ञैर्व्बहुविधैर्गतस्तेषां सलोकतां। गन्धर्व्वेभ्यो वरं लब्ध्वा त्रेताग्निं समकारयत्।
एकोऽग्निः पूर्व्वमेवासीदैलस्त्रेतामकारयत्। एवं प्रभावो राजासीदैलस्तु पुरुषोत्तम। १४१०
देशे पुण्यतमे चैव महर्षिभिरभिष्टुते। राज्यं स कारयामास प्रयागे पृथिवीपतिः।
उत्तरे जाह्नवीतीरे प्रतिष्ठाने महायशाः।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि ऐलोत्पत्तिकथने षड्विंशोऽध्यायः॥ २६ ॥
॥ वैशम्पायन उवाच ॥ ऐलपुत्त्रा बभूवुस्ते सप्त देवसुतोपमाः। दिवि जाता महात्मान आयुर्धीमानमावसुः।
विश्वायुश्चैव धर्म्मात्मा श्रुतायुश्च तथाऽपरः। दृढायुश्च वनायुश्च शतायुश्चोर्व्वशीसुताः।
अमावसोस्तु दायादो भीमो राजाऽथ नग्नजित्। श्रीमान् भीमस्य दायादो राजासीत् काञ्चनप्रभः। १४१५
विद्वांस्तु काञ्चनस्यापि सुहोत्रो ऽभून्महाबलः। सुहोत्रस्याभवज्जह्नुः केशिन्या गर्भसंभवः।
आजह्रे यो महासत्त्रं सर्व्वमेधं महामखं। पतिलोभेन यं गङ्गा पतित्वेऽभिससार ह।
नेच्छतः प्लावयामास तस्य गङ्गाऽथ तत् सदः। स तथा प्लावितं दृष्ट्वा यज्ञवाटं समन्ततः।
सौहोत्रिरब्रवीद्गङ्गां क्रुद्धो भरतसत्तम। एष ते विफलं यत्नं पिबन्नम्भः करोम्यहं।
अस्य गङ्गेऽवलेपस्य सद्यः फलमवाप्नुहि। राजर्षिणा ततः पीतां गङ्गां दृष्ट्वा महर्षयः। १४२०
उपनिन्युर्महाभागां दुहितृत्वेन जाह्नवीं। युवनाश्वस्य पुत्त्रीन्तु कावेरीं जह्नुरावहत्।
युवनाश्वस्य शापेन गङ्गार्द्धेन विनिर्म्ममे। कावेरीं सरितां श्रेष्ठां जह्नोर्भार्य्यामनिन्दितां।
जह्नुस्तु दयितं पुत्त्रं सुनहं नाम धार्म्मिकं। कावेर्य्यां जनयामास अजकस्तस्य चात्मजः।
अजकस्य तु दायादो बलाकाश्वो महीपतिः। बभूव मृगयाशीलः कुशस्तस्यात्मजोऽभवत्।
कुशपुत्त्रा बभूवुर्हि चत्वारो देववर्च्चसः। कुशिकः कुशनाभश्च कुशाम्बो मूर्त्तिमांस्तथा। १४२५
पह्लवैः सह संवृद्धो राजा वनचरैस्तदा। कुशिकस्तु तपस्तेपे पुत्त्रमिन्द्रसमं विभुः।
लभेयमिति तं शक्रस्त्रासादभ्येत्य जज्ञिवान्। पूर्णे वर्षसहस्रे वै तन्तु शक्रो ह्यपश्यत।
अत्युग्रतपसं दृष्ट्वा सहस्राक्षः पुरन्दरः। समर्थः पुत्त्रजनने स्वमेवांशमवासयत्।
पुत्त्रत्वे कल्पयामास स देवेन्द्रः सुरोत्तमः। स गाधिरभवद्राजा मघवान् कौशिकः स्वयं।
पौरकुत्स्यभवद्भार्य्या गाधिस्तस्यामजायत। गाधेः कन्या महाभागा नाम्ना सत्यवती शुभा। १४३०

तां गाधिर्भृगुपुत्राय ऋचीकाय ददौ प्रभुः । तस्याः प्रीतोऽभवद्भर्त्ता भार्गवो भृगुनन्दनः ।
पुत्रार्थं कल्पयामास चरुं गाधेस्तथैव च । उवाचाहूय तां भर्त्ता ऋचीको भार्गवस्तदा ।
उपयोज्यश्चरुरयं त्वया मात्रा त्वयं तव । तस्यां जनिष्यते पुत्रो दीप्तिमान् क्षत्रियर्षभः ।
अजेयः क्षत्रियैर्लोके क्षत्रियर्षभसूदनः । तवापि पुत्रं कल्याणि धृतिमन्तं तपोधनं ।
शमात्मकं द्विजश्रेष्ठं चरुरेष विधास्यति । एवमुक्त्वा तु तां भार्य्यामृचीको भृगुनन्दनः । १४२५
तपस्यभिरतो नित्यमरण्यं प्रविवेश ह । गाधिः सदारस्तु तदा ऋचीकाश्रममभ्यगात् ।
तीर्थयात्राप्रसङ्गेन सुतां द्रष्टुं नरेश्वर । चरुद्वयं गृहीत्वा तदृषेः सत्यवती तदा ।
चरुमादाय यत्नेन सा तु मात्रे न्यवेदयत् । माता व्यत्यस्य दैवेन दुहित्रे स्वं चरुं ददौ ।
तस्याश्चरुमथाज्ञानादात्मसंस्थं चकार ह । अथ सत्यवती गर्भं क्षत्रियान्तकरं तदा ।
धारयामास दीप्तेन वपुषा घोरदर्शनं । तामृचीकस्ततो दृष्ट्वा योगेनाभ्यनुसृत्य च । १४३०
तामब्रवीद्द्विजश्रेष्ठः स्वां भार्य्यां वरवर्णिनीं । मात्राऽसि वञ्चिता भद्रे चरुव्यत्यासहेतुना ।
जनिष्यति हि पुत्रस्ते क्रूरकर्माऽतिदारुणः । भ्राता जनिष्यते चापि ब्रह्मभूतस्तपोधनः ।
विश्वं हि ब्रह्म तपसा मया तस्मिन् समर्पितं । एवमुक्ता महाभागा भर्त्रा सत्यवती तदा ।
प्रसादयामास पतिं पुत्रो मे नेदृशो भवेत् । ब्राह्मणापसदस्त्वत्त इत्युक्तो मुनिरब्रवीत ।
नैष सङ्कल्पितः कामो मया भद्रे तथाऽस्त्विति । उग्रकर्मा भवेत् पुत्रः पितुर्मातुश्च कारणात् । १४३५
पुनः सत्यवती वाक्यमेवमुक्त्वाऽब्रवीदिदं । इच्छन् लोकानपि मुने सृजेथाः किं पुनः सुतं ।
शमात्मकमृजुं त्वं मे पुत्रं दातुमिहार्हसि । काममेवंविधः पौत्रो मम स्यात्तव च प्रभो ।
यद्यन्यथा न शक्यं वै कर्त्तुमेतद्द्विजोत्तम । ततः प्रसादमकरोत् स तस्यास्तपसो बलात् ।
भद्रे नास्ति विशेषो मे पौत्रे च वरवर्णिनि । त्वया यथोक्तं वचनं तथा भद्रे भविष्यति ।
ततः सत्यवती पुत्रं जनयामास भार्गवं । तपस्यभिरतं दान्तं जमदग्निं शमात्मकं । १४४०
भृगोश्चरुविपर्य्यासे रौद्रवैष्णवयोः पुरा । जननाद्वैष्णवेऽर्थांशे जमदग्निरजायत ।
सा हि सत्यवती पुण्या सत्यधर्मपरायणा । कौशिकीति समाख्याता प्रवृत्तेयं महानदी ।
इक्ष्वाकुवंशप्रभवो रेणुर्नाम नराधिपः । तस्य कन्या महाभागा कामली नाम रेणुका ।
रेणुकायान्तु कामल्यां तपोविद्यासमन्वितः । आर्चीको जनयामास जामदग्न्यं सुदारुणं ।
सर्व्वविद्यान्तगं श्रेष्ठं धनुर्वेदस्य पारगं । रामं क्षत्रियहन्तारं प्रदीप्तमिव पावकं । १४४५
और्व्वस्यैवमृचीकस्य सत्यवत्यां महायशाः । जमदग्निस्तपोवीर्य्याज्जज्ञे ब्रह्मविदाम्वरः ।
मध्यमस्तु शुनःशेफः शुनःपुच्छः कनिष्ठकः । विश्वामित्रन्तु दायादं गाधिः कुशिकनन्दनः ।
जनयामास पुत्रन्तु तपोविद्याशमात्मकं । प्राप्य ब्रह्मर्षिसमतां योऽयं सप्तर्षितां गतः ।
विश्वामित्रन्तु धर्म्मात्मा नाम्ना विश्वरथः स्मृतः । जज्ञे भृगुप्रसादेन कौशिकाद्वंशवर्द्धनः ।
विश्वामित्रस्य च सुता देवरातादयः स्मृताः । विख्यातास्त्रिषु लोकेषु तेषां नामानि मे शृणु । १४५०

देवश्रवाः कतिश्चैव यस्मात् कात्यायनाः स्मृताः। शालावत्यां हिरण्याक्षो रेणोर्जज्ञेऽथ रेणुमान्।
साङ्कृतिर्गालवश्चैव मुद्गलश्चेति विश्रुताः। मधुच्छन्दो जयश्चैव देवलश्च तथाऽष्टकः।
कच्छपो हारितश्चैव विश्वामित्रस्य ते सुताः। तेषां ख्यातानि गोत्राणि कौशिकानां महात्मनां।
पाणिनो बभ्रवश्चैव ध्यानजप्यास्तथैव च। पार्थिवा देवराताश्च शालङ्कायनबास्कलाः।
लोहिता यामदूताश्च तथा कारीषयः स्मृताः। सौश्रुताः कौशिका राजंस्तथाऽन्ये सैन्धवायनाः। १४६५
देवला रेणवश्चैव याज्ञवल्क्याघमर्षणाः। औदुम्बरा ह्यभिष्णातास्तारकायनचुञ्चुलाः।
शालावत्या हिरण्याक्षाः साङ्कृत्या गालवास्तथा। नारायणिर्नरश्चान्यो विश्वामित्रस्य धीमतः।
ऋष्यन्तरविवाह्याश्च कौशिका बहवः स्मृताः। पौरवस्य महाराज ब्रह्मर्षेः कौशिकस्य च।
सम्बन्धोऽप्यस्य वंशेऽस्मिन् ब्रह्मक्षत्रस्य विश्रुतः। विश्वामित्रात्मजानान्तु शुनःशेफोऽग्रजः स्मृतः।
भार्गवः कौशिकत्वं हि प्राप्तः स मुनिसत्तमः। विश्वामित्रस्य पुत्रस्तु शुनःशेफोऽभवत् किल। १४७०
हरिदश्वस्य यज्ञे तु पशुत्वे विनियोजितः। देवैर्दत्तः शुनःशेफो विश्वामित्राय वै पुनः।
देवैर्दत्तः स वै यस्माद्देवरातस्ततोऽभवत्। देवरातादयः सप्त विश्वामित्रस्य वै सुताः।
दृषद्वतीसुतश्चापि विश्वामित्रात्तथाऽष्टकः। अष्टकस्य सुतो लौहिः प्रोक्तो जह्नुगणो मया।
अत ऊर्द्ध्वं प्रवक्ष्यामि वंशमायोर्महात्मनः।

इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि अमावसुवंशकीर्त्तने सप्तविंशोऽध्यायः ॥ २७ ॥

॥ वैशम्पायन उवाच ॥ आयोः पुत्रास्तथा पञ्च सर्व्वे वीरा महारथाः। स्वर्भानुतनयायाञ्च प्रभायां जज्ञिरे नृप। १४७५
नहुषः प्रथमं जज्ञे वृद्धशर्म्मा ततः परं। रम्भो रजिरनेनाश्च त्रिषु लोकेषु विश्रुताः।
रजिः पुत्रशतानीह जनयामास पञ्च वै। राजेयमिति विख्यातं क्षत्रमिन्द्रभयावहं।
यत्र देवासुरे युद्धे समुपोढे सुदारुणे। देवाश्चैवासुराश्चैव पितामहमथाब्रुवन्।
आवयोर्भगवन् युद्धे को विजेता भविष्यति। ब्रूहि नः सर्व्वभूतेश श्रोतुमिच्छाम ते वचः।
॥ ब्रह्मोवाच ॥ येषामर्थाय संग्रामे रजिरात्तायुधः प्रभुः। योत्स्यते ते विजेष्यन्ति त्रीन् लोकान्नात्र संशयः। १४८०
यतो रजिर्धृतिस्तत्र श्रीश्च तत्र यतो धृतिः। यतो धृतिश्च श्रीश्चैव धर्म्मस्तत्र जयस्तथा।
ते देवदानवाः प्रीता देवेनोक्ता रजेर्जये। अभ्ययुर्ज्जयमिच्छन्तो वृण्वानास्तं नरर्षभं।
स हि स्वर्भानुदौहित्रः प्रभायां समपद्यत। राजा परमतेजस्वी सोमवंशविवर्द्धनः।
ते हृष्टमनसः सर्व्वे रजिं दैतेयदेवताः। ऊचुरस्मज्जयाय त्वं गृहाण वरकार्म्मुकं।
अथोवाच रजिस्तत्र तयोर्व्वै देवदैत्ययोः। अर्थज्ञः स्वार्थमुद्दिश्य यशः स्वञ्च प्रकाशयन्। १४८५
॥ रजिरुवाच ॥ यदि दैत्यगणान् सर्व्वान् जित्वा वीर्य्येण वासव। इन्द्रो भवामि धर्म्मेण ततो योत्स्यामि संयुगे।
देवाः प्रथमतो भूयः प्रतीयुर्हृष्टमानसाः। एवं यथेष्टं नृपते कामः सम्पद्यतां तव।
श्रुत्वा सुरगणानान्तु वाक्यं राजा रजिस्तदा। पप्रच्छासुरमुख्यांस्तु यथा देवानपृच्छत।
दानवा दर्पपूर्णास्तु स्वार्थमेवावगम्य ह। प्रत्यूचुस्तं नृपवरं साभिमानमिदं वचः।

अस्माकमिन्द्रः प्रह्लादो यस्यार्थे विजयामहे । अस्मिंस्तु समये राजंस्तिष्ठेथा राजसत्तम । १४९०
स तथेति ब्रुवन्नेव देवैरप्यभिचोदितः । भविष्यसीन्द्रो जित्वैवं देवैरुक्तस्तु पार्थिवः ।
जघान दानवान् सर्व्वान् येऽवध्या वज्रपाणिनः । स विप्रनष्टां देवानां परमश्रीः श्रियं वशी ।
निहत्य दानवान् सर्व्वानाजहार रजिः प्रभुः । ततो रजिं महावीर्य्यं देवैः सह शतक्रतुः ।
रजेः पुत्त्रोऽहमित्युक्त्वा पुनरेवाब्रवीद्वचः । इन्द्रोऽसि तात देवानां सर्व्वेषां नात्र संशयः ।
यस्याहमिन्द्रः पुत्त्रस्ते ख्यातिं यास्यामि कर्म्मभिः । शतक्रतुवचः श्रुत्वा वञ्चितस्तेन मायया । १४९५
तथेत्येवाब्रवीद्राजा प्रीयमाणः शतक्रतुं । तस्मिंस्तु देवसदृशे दिवं प्राप्ते महीपतौ ।
दायाद्यमिन्द्रादाजह्रुराचारात्तनया रजेः । पञ्च पुत्त्रशतान्यस्य तद्वै स्थानं शतक्रतोः ।
समाक्रामन्त बहुधा स्वर्गलोकं त्रिविष्टपं । ततो बहुतिथे काले समतीते महाबलः ।
हृतराज्योऽब्रवीच्छक्रो हृतभागो बृहस्पतिं ।
॥ इन्द्र उवाच ॥ बदरीफलमात्रं वै पुरोडाशं विधत्स्व मे । ब्रह्मर्षे येन तिष्ठेयं तेजसाप्यायितः सदा । १५००
ब्रह्मन् कृशोऽहं विमना हृतराज्यो हृताशनः । हतौजा दुर्ब्बलो मूढो रजेः पुत्त्रैः कृतः प्रभो ।
॥ बृहस्पतिरुवाच ॥ यद्येवं चोदितः शक्र त्वया स्यां पूर्व्वमेव हि । नाभविष्यत् त्वत्प्रियार्थमकर्त्तव्यं ममानघ ।
प्रयतिष्यामि देवेन्द्र त्वत्प्रियार्थं न संशयः । यथा भागञ्च राज्यञ्च न चिरात् प्रतिलप्स्यसे ।
तथा तात करिष्यामि मा ते भूद्विक्लवं मनः । ततः कर्म्म चकारास्य तेजसो वर्द्धनं तदा ।
तेषाञ्च बुद्धिसंमोहमकरोद्बुद्धिसत्तमः । नास्तिवादार्थशास्त्रं हि धर्म्मविद्वेषणं परं । १५०५
परमं तर्कशास्त्राणामसतां तन्मनोनुगं । न हि धर्म्मप्रधानानां रोचते तत् कथान्तरे ।
एतद्बृहस्पतिकृतं शास्त्रं श्रुत्वाऽल्पचेतसः । पूर्व्वोक्तधर्म्मशास्त्राणामभवन् द्वेषिणः सदा ।
प्रवक्तृन्यायरहितं तन्मतं बहुमेनिरे । तेनाधर्म्मेण ते पापाः सर्व्व एव क्षयं गताः ।
त्रैलोक्यराज्यं शक्रस्तु प्राप्य दुष्प्रापमेव च । बृहस्पतिप्रसादाद्वै परां निर्वृतिमभ्यगात् ।
ते यदा तु सुसंमूढा रागोन्मत्ता विधर्म्मिणः । ब्रह्मद्विषश्च संवृत्ता हतवीर्य्यपराक्रमाः । १५१०
ततो लेभे सुरैश्वर्य्यमिन्द्रः स्थानं तथोत्तमं । हत्वा रजिसुतान् सर्व्वान् कामक्रोधपरायणान् ।
य इदं च्यावनं स्थानात् प्रतिष्ठाञ्च शतक्रतोः । शृणुयाद्धारयेद्वाऽपि न स दौरात्म्यमाप्नुयात् ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि आयुर्वंशानुकीर्त्तने अष्टाविंशोऽध्यायः ॥ २८ ॥
॥ वैशम्पायन उवाच ॥ रम्भोऽनपत्य आसीच्च वंशं वक्ष्याम्यनेनसः । अनेनसः सुतो राजा प्रतिक्षत्रो महायशाः ।
प्रतिक्षत्रसुतश्चापि सृञ्जयो नाम विश्रुतः । सृञ्जयस्य जयः पुत्त्रो विजयस्तस्य चात्मजः ।
विजयस्य कृतिः पुत्त्रस्तस्य हर्य्यत्वतः सुतः । हर्य्यत्वतसुतो राजा सहदेवः प्रतापवान् । १५१५
सहदेवस्य धर्म्मात्मा नदीन इति विश्रुतः । नदीनस्य जयत्सेनो जयत्सेनस्य संकृतिः ।
संकृतेरपि धर्म्मात्मा क्षत्त्रधर्म्मा महायशाः । अनेनसः समाख्याताः क्षत्त्रवृद्धस्य मे शृणु ।
क्षत्त्रवृद्धात्मजस्तत्र सुनहोत्रो महायशाः । सुनहोत्रस्य दायादास्त्रयः परमधार्म्मिकाः ।

काशः शलस्य दायादो तथा गृत्समदः प्रभुः। पुत्रो गृत्समदस्यापि शुनको यस्य शौनकाः।
ब्राह्मणाः क्षत्रियाश्चैव वैश्याः शूद्रास्तथैव च। शलात्मजस्यार्ष्टिषेणस्तनयस्तस्य काश्यकः।
काश्यस्य काश्यपः पुत्रो राजा दीर्घतपास्तथा। धन्वस्तु दीर्घतपसो धन्वात् धन्वन्तरिः सुतः।
तपसोऽन्ते सुमहतो जातो धन्वस्य धीमतः। पुनर्धन्वन्तरिर्देवो मानुषेष्विह जज्ञिवान्।
॥ जनमेजय उवाच ॥ कथं धन्वन्तरिर्देवो मानुषेष्विह जज्ञिवान्। एतद्वेदितुमिच्छामि तन्मे ब्रूहि यथातथं।
॥ वैशम्पायन उवाच ॥ धन्वन्तरेः सम्भवोऽयं श्रूयतां भरतर्षभ। स सम्भूतः समुद्रान्तु मथ्यमानेऽमृते पुरा।
उत्पन्नः कलसात् पूर्व्वं सर्व्वतश्च श्रिया वृतः। अभ्यवन् सिद्धिकार्य्ये हि विष्णुं दृष्ट्वा हि तस्थिवान्।
अब्जस्त्वमिति होवाच तस्मादब्जस्तु स स्मृतः। अब्जः प्रोवाच विष्णुं वै तनयोऽस्मि तव प्रभो।
विधत्स्व भागं स्थानञ्च मम लोके सुरेश्वर। एवमुक्तः स दृष्ट्वा वै तथ्यं प्रोवाच तं प्रभुः।
कृतो यज्ञविभागो हि यज्ञियैर्हि सुरैः पुरा। देवेषु विनियुक्तञ्च विधिहोत्रं महर्षिभिः।
न शक्यमुपहोमो वै तुभ्यं कर्त्तुं कदाचन। अर्व्वाग्भूतोऽसि देवानां पुत्रस्त्वं हि महीश्वरः।
द्वितीयायान्तु संभूत्यां लोके ख्यातिं गमिष्यसि। अणिमादिश्च ते सिद्धिर्गर्भस्थस्य भविष्यति।
तेनैव त्वं शरीरेण देवत्वं प्राप्स्यसे प्रभो। चरुमन्त्रैर्व्रतैर्जप्यैर्यक्ष्यन्ति त्वां द्विजातयः।
अष्टधा त्वं पुनश्चैवमायुर्व्वेदं विधास्यसि। अवश्यं भावी ह्यर्थोऽयं प्राग्दृष्टस्त्वब्जयोनिना।
द्वितीयं द्वापरं प्राप्य भविता त्वं न संशयः। इमं तस्मै वरं दत्त्वा विष्णुरन्तर्दधे पुनः।
द्वितीये द्वापरे प्राप्ते शौनहोत्रिः स काशिराट्। पुत्रकामस्तपस्तेपे धन्वा दीर्घं महत्तदा।
प्रपद्ये देवतां तान्तु या मे पुत्रं प्रदास्यति। अब्जं देवं स पुत्रार्थं तदाराधितवान्नृपः।
ततस्तुष्टः स भगवानब्जः प्रोवाच तं नृपं। यदिच्छसि वरं ब्रूहि तत्ते दास्यामि सुव्रत।
॥ नृप उवाच ॥ भगवन् यदि तुष्टस्त्वं पुत्रो मे ख्यातिमान् भव। तथेति समनुज्ञाय तत्रैवान्तरधीयत।
तस्य गेहे समुत्पन्नो देवो धन्वन्तरिस्तदा। काशिराजो महाराजः सर्व्वरोगप्रणाशनः।
आयुर्व्वेदं भरद्वाजात् प्राप्येह सभिषक्क्रियं। तमष्टधा पुनर्व्यस्य शिष्येभ्यः प्रत्यपादयत्।
धन्वन्तरेस्तु तनयः केतुमानिति विश्रुतः। अथ केतुमतः पुत्रो वीरो भीमरथः स्मृतः।
पुत्रो भीमरथस्यापि दिवोदासः प्रजेश्वरः। दिवोदासस्तु धर्म्मात्मा वाराणस्यधिपोऽभवत्।
एतस्मिन्नेव काले तु पुरीं वाराणसीं नृप। शून्यां निवेशयामास क्षेमको नाम राक्षसः।
शप्ता हि सा मतिमता निकुम्भेन महात्मना। शून्या वर्षसहस्रं वै भवित्रीति न संशयः।
तस्यान्तु शप्तमात्रायां दिवोदासः प्रजेश्वरः। विषयान्ते पुरीं रम्यां गोमत्यां संन्यवेशयत्।
भद्रश्रेण्यस्य पूर्व्वन्तु पुरी वाराणसी अभूत्। भद्रश्रेण्यस्य पुत्राणां शतमुत्तमधन्विनां।
हत्वा निवेशयामास दिवोदासो नराधिपः। भद्रश्रेण्यस्य तद्राज्यं हृतं येन बलीयसा।
॥ जनमेजय उवाच ॥ वाराणसीं निकुम्भस्तु किमर्थं शप्तवान् प्रभुः। निकुम्भः कश्च धर्म्मात्मा सिद्धिक्षेत्रं शशाप यः।
॥ वैशम्पायन उवाच ॥ दिवोदासस्तु राजर्षिर्नगरीं प्राप्य पार्थिवः। वसति स्म महातेजाः स्फीतायान्तु नराधिपः।

एतस्मिन्नेव काले तु कृतदारो महेश्वरः । देव्याः स प्रियकामस्तु न्यवसच्छ्वशुरान्तिके ।
देवाज्ञया पार्षदा ये अभिरूपास्तपोधनाः । पूर्व्वोक्तैरुपदेशैश्च तोषयन्ति स्म पार्व्वतीं । १५५०
हृष्यते वै महादेवी मेना नैव प्रहृष्यति । जुगुप्सत्यसकृत्तां वै देवीं देवं तथैव सा ।
सपार्षदस्त्वनाचारस्तव भर्त्ता महेश्वरः । दरिद्रः सर्व्वदैवासौ शीलं तस्य न वर्त्तते ।
मात्रा तथोक्ता वरदा स्त्रीस्वभावाच्च चुक्रुधे । स्मितं कृत्वा तु वरदा भवपार्श्वमथागमत् ।
विवर्णवदना देवी महादेवमभाषत । नेह वत्स्याम्यहं देव नय मां स्वं निवेशनं ।
तथा कर्त्तुं महादेवः सर्व्वान् लोकानवैक्षत । वासार्थं रोचयामास पृथिव्यां कुरुनन्दन । १५५५
वाराणस्यां महादेवः सिद्धिक्षेत्रं महेश्वरः । दिवोदासेन तां ज्ञात्वा निविष्टां नगरीं भवः ।
पार्श्वे तिष्ठन्तमाहूय निकुम्भमिदमब्रवीत् । गणेश्वर पुरीं गत्वा शून्यां वाराणसीं कुरु ।
मृदुनैवाभ्युपायेन अतिवीर्य्यः स पार्थिवः । ततो गत्वा निकुम्भस्तु पुरीं वाराणसीं तदा ।
स्वप्ने निदर्शयामास कण्डुकं नाम नापितं । श्रेयस्तेऽहं करिष्यामि स्थानं मे रोचयानघ ।
मद्रूपां प्रतिमां कृत्वा नगर्य्यन्ते तथैव च । ततः स्वप्ने यथोद्दिष्टं सर्व्वं कारितवान्नृप । १५६०
पुरीद्वारि तु विज्ञाप्य राजानञ्च यथाविधि । पूजाञ्च महतीन्तत्र नित्यमेवाप्रयोजयत् ।
गन्धैश्च धूपमाल्यैश्च प्रोक्षणीयैस्तथैव च । अन्नपानप्रयोगैश्च अत्यद्भुतमिवाभवत् ।
एवं सम्पूज्यते तत्र नित्यमेव गणेश्वरः । ततो वरसहस्रन्तु नगर्य्यां सम्प्रयच्छति ।
पुत्रान् हिरण्यमायुश्च सर्व्वान् कामांस्तथैव च । राज्ञस्तु महिषी श्रेष्ठा सुयशा नाम विश्रुता ।
पुत्रार्थमागता देवी साध्वी राज्ञा प्रचोदिता । पूजान्तु विपुलां कृत्वा देवी पुत्रमयाचत । १५६५
पुनः पुनरथागत्य बहुशः पुत्रकारणात् । न प्रयच्छति पुत्रं हि निकुम्भः कारणेन हि ।
राजा तु यदि नः क्रुध्येत्कार्य्यसिद्धिस्ततो भवेत् । अथ दीर्घेण कालेन क्रोधो राजानमाविशत् ।
भूत एष महाद्वारि नागराणां प्रयच्छति । प्रीतो वरान् वै शतशो मम किं न प्रयच्छति ।
मामकैः पूज्यते नित्यं नगर्य्यां मे सदैव हि । विज्ञापितो मयाऽत्यर्थं देव्या मे पुत्रकारणात् ।
न ददाति च पुत्रं मे कृतघ्नः केन हेतुना । ततो नार्हति सत्कारं मत्सकाशाद्विशेषतः । १५७०
तस्मात्तु नाशयिष्यामि स्थानमस्य दुरात्मनः । एवं स तु विनिश्चित्य दुरात्मा राजकिल्बिषी ।
स्थानं गणपतेस्तस्य नाशयामास दुर्म्मतिः । भग्नमायतनं दृष्ट्वा राजानमशपत् प्रभुः ।
यस्मादनपराधस्य त्वया स्थानं विनाशितं । पुरी शून्या तथाऽकस्मात्तव नूनं भविष्यति ।
ततस्तेन तु शापेन शून्या वाराणसी तदा । शप्त्वा पुरीं निकुम्भस्तु महादेवमथागमत् ।
अकस्माच्च पुरी सा तु विद्रुता सर्व्वतो दिशं । तस्यां पुर्य्यां ततो देवो निर्म्ममे परमात्मनः । १५७५
रमते तत्र वै देवो रममाणो गिरेः सुतां । न रतिं तत्र वै देवी लभते गृहविस्मयात् ।
वसाम्यत्र न पुर्य्यान्तु देवी देवमथाऽब्रवीत् ।
॥ देव उवाच ॥ नाहं वेश्म विमोक्ष्यामि अविमुक्तं हि मे गृहं । नाहं तत्र गमिष्यामि गच्छ देवि गृहं प्रति ।

प्रहस्योवाच भगवांस्त्र्यम्बकस्त्रिपुरान्तकः । तस्मात्तदविमुक्तं हि प्रोक्तं देवेन वै स्वयं ।
एवं वाराणसी शप्ता अविमुक्तञ्च कीर्त्तितं । यस्मिन् वसति वै देवः सर्व्वदेवनमस्कृतः ।
युगेषु त्रिषु धर्म्मात्मा सह देव्या महेश्वरः । अन्तर्द्धानं कलौ याति तत्पुरं हि महात्मनः ।
अन्तर्हिते पुरे तस्मिन् पुरी तु वसते पुनः । एवं वाराणसी शप्ता निवेशं पुनरागता ।
भद्रश्रेण्यस्य पुत्रस्तु दुर्द्दमो नाम विश्रुतः । दिवोदासेन बालेति घृणया स विसर्ज्जितः ।
हैहयस्य तु दायाद्यं हृतवान् वै महीपतिः । आजह्रे पितृदायाद्यं दिवोदासहृतं बलात् ।
भद्रश्रेण्यस्य पुत्रेण दुर्द्दमेन महात्मना । वैरस्यान्तं महाराज क्षत्रियेण विधित्सता ।
दिवोदासाद्दृषद्वत्यां वीरो जज्ञे प्रतर्द्दनः । तेन पुत्रेण बालेन प्रहृतं तस्य वै पुनः ।
प्रतर्द्दनस्य पुत्रौ द्वौ वत्सभार्गौ सुविश्रुतौ । वत्सपुत्रस्त्वलर्कस्तु सन्नतिस्तस्य चात्मजः ।
अलर्कः काशिराजस्तु ब्रह्मण्यः सत्यसङ्गरः । अलर्कं प्रति राजर्षिं श्लोको गीतः पुरातनैः ।
षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च । युवा रूपेण सम्पन्न आसीत् काशिकुलोद्वहः ।
लोपामुद्राप्रसादेन परमायुरवाप सः । तस्यासीत् सुमहद्राज्यं रूपयौवनशालिनः ।
शापस्यान्ते महाबाहुर्हत्वा क्षेमकराक्षसं । रम्यां निवेशयामास पुरीं वाराणसीं पुनः ।
सन्नतेरपि दायादः सुनीथो नाम धार्म्मिकः । सुनीथस्य तु दायादः क्षेम्यो नाम महायशाः ।
क्षेमस्य केतुमान् पुत्रः सुकेतुस्तस्य चात्मजः । सुकेतुतनयस्यापि धर्म्मकेतुरिति श्रुतः ।
धर्म्मकेतोस्तु दायादः सत्यकेतुर्म्महारथः । सत्यकेतुसुतस्यापि विभुर्नाम प्रजेश्वरः ।
सुविभुस्तु विभोः पुत्रः सुकुमारस्तु तत्सुतः । सुकुमारस्य पुत्रस्तु धृष्टकेतुः सुधार्म्मिकः ।
धृष्टकेतोस्तु दायादो वेणुहोत्रः प्रजेश्वरः । वेणुहोत्रसुतस्यापि भर्गो नाम प्रजेश्वरः ।
वत्सस्य वत्सभूमिस्तु भृगुभूमिस्तु भार्गवात् । एते त्वङ्गिरसः पुत्रा जाता वंशेऽथ भार्गवे ।
ब्राह्मणाः क्षत्रिया वैश्यास्त्रयः पुत्राः सहस्रशः । इत्येते काशयः प्रोक्ता नहुषस्य निबोध च ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि ऊनत्रिंशोऽध्यायः ॥ २९ ॥

॥ वैशम्पायन उवाच ॥ उत्पन्नाः पितृकन्यायां विरजायां महौजसः । नहुषस्य तु दायादाः षडिन्द्रोपमतेजसः ।
यतिर्य्ययातिः संयातिरायातिः पाञ्चिकोभवः । सुयातिः षष्ठस्तेषां वै ययातिः पार्थिवोऽभवत् ।
यतिर्ज्येष्ठस्तु तेषां वै ययातिस्तु ततः परं । ककुत्स्थकन्यां गां नाम लेभे परमधार्म्मिकः ।
यतिस्तु मोक्षमास्थाय ब्रह्मभूतोऽभवन्मुनिः । तेषां ययातिः पञ्चानां विजित्य वसुधामिमां ।
देवयानीमुशनसः सुतां भार्य्यामवाप सः । शर्म्मिष्ठामासुरीञ्चैव तनयां वृषपर्व्वणः ।
यदुञ्च तुर्व्वसुञ्चैव देवयानी व्यजायत । द्रुह्युञ्चानुञ्च पूरुञ्च शर्म्मिष्ठा वार्षपर्व्वणी ।
तस्मै शक्रो ददौ प्रीतो रथं परमभास्वरं । असङ्गं काञ्चनं दिव्यं दिव्यैः परमवाजिभिः ।
युक्तं मनोजवैः शुभ्रैर्येन कार्य्यं समुद्वहन् । स तेन रथमुख्येन षड्रात्रेणाजयन्महीं ।
ययातिर्युधि दुर्द्धर्षस्तथा देवान् सदानवान् । स रथः पौरवाणान्तु सर्व्वेषामभवत्तदा ।

यावत्तु वसुनाम्नो वै कौरवाज्जनमेजयात्। कुरोः पुत्रस्य राजेन्द्र राज्ञः पारिक्षितस्य ह ।
जगाम स रथो नाशं शापाद्गार्ग्यस्य धीमतः। गर्ग्यस्य हि सुतं बालं स राजा जनमेजयः।
वाक्क्रूरं हिंसयामास ब्रह्महत्यामवाप सः। स लोहगन्धो राजर्षिः परिधावन्नितस्ततः। १६१०
पौरजानपदैस्त्यक्तो न लेभे शर्म कर्हिचित्। ततः स दुःखसन्तप्तो नालभत् संविदं क्वचित्।
इन्द्रोतं शौनकं राजा शरणं प्रत्यपद्यत। याजयामास चेन्द्रोतः शौनको जनमेजयं।
अश्वमेधेन राजानं पावनार्थं द्विजोत्तमः। स लोहगन्धो व्यनशत्तस्यावभृथमेत्य ह।
स च दिव्यो रथो राजन् वसोश्चेदिपतेस्तदा। दत्तः शक्रेण तुष्टेन लेभे तस्माद्बृहद्रथः।
बृहद्रथात् क्रमेणैव प्राप्तो बार्हद्रथं नृपं। ततो हत्वा जरासन्धं भीमस्तु रथमुत्तमम्। १६१५
प्रददौ वासुदेवाय प्रीत्या कौरवनन्दन। सप्तद्वीपां ययातिस्तु जित्वा पृथ्वीं ससागरां।
व्यभजत् पञ्चधा राजा पुत्राणां नाहुषस्तदा। दिशि दक्षिणपूर्व्वस्यां तुर्व्वसुं मतिमान्नृपः।
प्रतीच्यामुत्तरस्याञ्च द्रुह्युञ्चानुञ्च नाहुषः। दिशि पूर्व्वोत्तरस्यान्तु यदुं ज्येष्ठं न्ययोजयत्।
मध्ये पूरुञ्च राजानमभ्यषिञ्चत् स नाहुषः। तैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना।
यथाप्रदेशमद्यापि धर्म्मेण परिपाल्यते। प्रजास्तेषां पुरस्तात्तु वक्ष्यामि नृपसत्तम। १६२०
धनुर्न्यस्य पृषत्कांश्च पञ्चभिः पुरुषर्षभैः। जरावानभवद्राजा भारमावेश्य बन्धुषु।
निक्षिप्तशस्त्रः पृथिवीं निरीक्ष्य पृथिवीपतिः। प्रीतिमानभवद्राजा ययातिरपराजितः।
एवं विभज्य पृथिवीं ययातिर्यदुमब्रवीत्। जरां मे प्रतिगृह्णीष्व पुत्र कृत्यान्तरेण वै।
तरुणस्तव रूपेण चरेयं पृथिवीमिमां। जरां त्वयि समाधाय तं यदुः प्रत्युवाच ह।
अनिर्द्दिष्टा मया भिक्षा ब्राह्मणस्य प्रतिश्रुता। अनपाकृत्य तां राजन्न ग्रहीष्यामि ते जरां। १६२५
जरायां बहवो दोषाः पानभोजनकारिताः। तस्माज्जरां न ते राजन् ग्रहीतुमहमुत्सहे।
सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप। प्रतिग्रहीतुं धर्म्मज्ञ पुत्रमन्यं वृणीष्व वै।
स एवमुक्तो यदुना राजा कोपसमन्वितः। उवाच वदतां श्रेष्ठो ययातिर्गर्हयन् सुतं।
क आश्रमस्तवान्योऽस्ति को वा धर्म्मो विधीयते। मामनादृत्य दुर्ब्बुद्धे यदहं तव देशिकः।
एवमुक्त्वा यदुं तात शशापैनं स मन्युमान्। अराज्या ते प्रजा मूढ भवित्रीति नराधिप। १६३०
स तुर्व्वसुञ्च द्रुह्युञ्चाप्यनुञ्च भरतर्षभ। एवमेवाब्रवीद्राजा प्रत्याख्यातस्तु तैरपि।
शशाप तानपि क्रुद्धो ययातिरपराजितः। यथा ते कथितं पूर्व्वं मया राजर्षिसत्तम।
एवं शप्त्वा सुतान् सर्व्वांश्चतुरः पूरुपूर्व्वजान्। तदेव वचनं राजा पूरुमप्याह भारत।
तरुणस्तव रूपेण चरये पृथिवीमिमां। जरां त्वयि समाधाय त्वं पूरो यदि मन्यसे।
स जरां प्रतिजग्राह पितुः पूरुः प्रतापवान्। ययातिरपि रूपेण पूरोः पर्य्यचरन्महीं। १६३५
स मार्गमाणः कामानामन्तं भरतसत्तम। विश्वाच्या सहितो रेमे वने चैत्ररथे प्रभुः।
यदा तृप्तः स कामानां भोगेषु च नराधिप। तदा पूरोः सकाशाद्वै स्वां जरां प्रत्यपद्यत।

अत्र गाथा महाराज शृणु गीता ययातिना । याभिः प्रत्याहरेत् कामान् सर्व्वशोऽङ्गानि कूर्म्मवत् ।
न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ।
यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः । नालमेकस्य तत् सर्व्वमिति मत्वा न मुह्यति । १६४०
यदा भावं न कुरुते सर्व्वभूतेषु पापकं । कर्म्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा ।
यदाऽन्येभ्यो न बिभेति यदा चास्मान्न बिभ्यति । यदा नेच्छति न द्वेष्टि ब्रह्म सम्पद्यते तदा ।
या दुस्त्यजा दुर्म्मतिभिर्या न जीर्य्यति जीर्य्यतः । योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखं ।
जीर्य्यन्ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः । धनाशा जीविताशा च जीर्य्यतोऽपि न जीर्य्यति ।
यच्च काममुखं लोके यच्च दिव्यं महत्सुखं । तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलां । १६४५
एवमुक्त्वा स राजर्षिः सदारः प्राविशद्वनं । कालेन महता चापि चचार विपुलं तपः ।
भृगुतुङ्गे तपस्तीर्त्वा तपसोऽन्ते महायशाः । अनश्नन् देहमुत्सृज्य सदारः स्वर्गमाप्तवान् ।
तस्य वंशे महाराज पञ्च राजर्षिसत्तमाः । यैर्व्याप्ता पृथिवी सर्व्वा सूर्य्यस्येव गभस्तिभिः ।
यदोस्तु शृणु राजर्षेर्वंशं राजर्षिसत्कृतं । यत्र नारायणो जज्ञे हरिर्वृष्णिकुलोद्वहः ।
स्वस्थः प्रजावानायुष्मान् कीर्त्तिमांश्च भवेन्नरः । ययातेश्चरितं पुण्यं पठन् शृण्वन्नराधिप । १६५०
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि ययातिचरिते त्रिंशत्तमोऽध्यायः ॥ ३० ॥
॥ जनमेजय उवाच ॥ पूरोर्वंशमहं ब्रह्मन् श्रोतुमिच्छामि तत्त्वतः । द्रुह्योश्चानोर्यदोश्चैव तुर्व्वसोश्च पृथक् पृथक् ।
वृष्णिवंशप्रसङ्गेन स्ववंशं पूर्व्वमेव हि । विस्तरेणानुपूर्व्व्या च तद्भवान् वक्तुमर्हति ।
॥ वैशम्पायन उवाच ॥ शृणु पूरोर्म्महाराज वंशमुत्तमपौरुषं । विस्तरेणानुपूर्व्व्या च यत्र जातोऽसि पार्थिव ।
हन्त ते कीर्त्तयिष्यामि पूरोर्वंशमनुत्तमं । द्रुह्योश्चानोर्यदोश्चैव तुर्व्वसोश्च नराधिप ।
पूरोः पुत्रो महावीर्य्यो राजासीज्जनमेजयः । प्रचिन्वांस्तु सुतस्तस्य यः प्राचीमजयद्दिशं । १६५५
प्रचिन्वतः प्रवीरोऽभून्मनस्युस्तस्य चात्मजः । राजा चाभयदो नाम मनस्योरभवत् सुतः ।
तथैवाभयदस्यासीत् सुधन्वा नाम पार्थिवः । सुधन्वनो बहुगवः सम्यातिस्तस्य चात्मजः ।
सम्यातेस्तु रहम्पाती रौद्राश्वस्तस्य वै सुतः । रौद्राश्वस्य घृताच्यां वै दशाप्सरसि सूनवः ।
ऋचेयुः प्रथमस्तेषां कृकणेयुस्तथैव च । कक्षेयुः स्थण्डिलेयुश्च सन्नतेयुस्तथैव च ।
दशार्णेयुर्जलेयुश्च स्थलेयुश्च महाबलः । वननित्यो वनेयुश्च पुत्रिकाश्च दश स्त्रियः । १६६०
रुद्रा शूद्रा च भद्रा च मलदा मलहा तथा । खलदा चैव राजेन्द्र नलदा सुरसाऽपि च ।
तथा गोचपला च स्त्रीरत्नकूटा च ता दश । ऋषिर्जातोऽत्रिवंशे तु तासां भर्त्ता प्रभाकरः ।
रुद्रायां जनयामास सुतं सोमं यशस्विनं । स्वर्भानुना हते सूर्य्ये पतमाने दिवो महीं ।
तमोऽभिभूते लोके च प्रभा येन प्रवर्त्तिता । स्वस्ति तेऽस्त्विति चोक्तो वै पतमानो दिवाकरः ।
वचनात्तस्य विप्रर्षेर्न्न पपात दिवो महीं । अत्रिश्रेष्ठानि गोत्राणि यश्चकार महातपाः । १६६५
यज्ञेष्वत्रेर्बलञ्चैव देवैर्यस्य प्रवर्त्तितं । स तासु जनयामास पुत्रिकासु सनामकान् ।

इमे पुत्रा महासत्त्वास्तपस्युग्रे रतान् सदा । ते तु गोत्रकरा राजन्नृषयो वेदपारगाः ।
[illegible]चेया इतिख्याताः किन्त्वश्रिधनवर्ज्जिताः । कक्षेयोस्तनयास्त्वासंस्त्रय एव महारथाः ।
सभानरश्चाक्षुषश्च परमन्युस्तथैव च । सभानरस्य पुत्रस्तु विद्वान् कालानलो नृपः ।
कालानलस्य धर्मज्ञः सृञ्जयो नाम वै सुतः । सृञ्जयस्याभवत् पुत्रो वीरो राजा पुरञ्जयः ।
जनमेजयो महाराज पुरञ्जयसुतोऽभवत् । जनमेजयस्य राजर्षेर्महाशालोऽभवत् सुतः ।
देवेषु स परिज्ञातः प्रतिष्ठितयशा भुवि । महामना नाम सुतो महाशालस्य धार्म्मिकः ।
जज्ञे वीरः सुरगणैः पूजितः सुमहामनाः । महामनास्तु पुत्रौ द्वौ जनयामास भारत ।
उशीनरञ्च धर्मज्ञं तितिक्षुञ्च महाबलं । उशीनरस्य पत्न्यस्तु पञ्च राजर्षिवंशजाः ।
नृगा कृमिर्नवा दर्व्वा पञ्चमी च दृषद्वती । उशीनरस्य पुत्रास्तु पञ्च तासु कुलोद्वहाः ।
तपसा चैव महता जाता वृद्धस्य चात्मजाः । नृगायास्तु नृगः पुत्रः कृम्या कृमिरजायत ।
नवायास्तु नवः पुत्रो दर्व्वायाः सुव्रतोऽभवत् । दृषद्वत्यास्तु संजज्ञे शिविरौशीनरो नृपः ।
शिवेस्तु शिवयस्तात यौधेयास्तु नृगस्य ह । नवस्य नवराष्ट्रन्तु कृमेस्तु कृमिला पुरी ।
सुव्रतस्य तथाऽम्बाष्ठा शिविपुत्रान् निबोध मे । शिवेस्तु शिवयः पुत्राश्चत्वारो लोकविश्रुताः ।
वृषदर्भः सुवीरश्च कैकेयो मद्रकस्तथा । तेषां जनपदाः स्फीताः कैकेया मद्रकास्तथा ।
वृषदर्भाः सुवीराश्च तितिक्षोस्तु प्रजाः शृणु । तैतिक्षवोऽभवद्राजा पूर्व्वस्यां दिशि भारत ।
उषद्रथो महाराज फेनस्तस्य सुतोऽभवत् । फेनात्तु सुतपा जज्ञे सुतः सुतपसो बलिः ।
जातो मानुषयोनौ तु स राजा काञ्चनेषुधिः । महायोगी स तु बलिर्ब्बभूव नृपतिः पुरा ।
पुत्रानुत्पादयामास पञ्च वंशकरान् भुवि । अङ्गः प्रथमतो जज्ञे वङ्गः सुह्मस्तथैव च ।
पुण्ड्रः कलिङ्गश्च तथा बालेयं क्षत्रमुच्यते । बालेया ब्राह्मणाश्चैव तस्य वंशकरा भुवि ।
बलेस्तु ब्रह्मणा दत्तो वरः प्रीतेन भारत । महायोगित्वमायुश्च कल्पस्य परिमाणतः ।
संग्रामे चाप्यजेयत्वं धर्म्मे चैव प्रधानता । त्रैलोक्यदर्शनञ्चापि प्राधान्यं प्रसवे तथा ।
बले चाप्रतिमत्वं वै धर्म्मतत्त्वार्थदर्शनं । चतुरो नियतान् वर्णांस्त्वञ्च स्थापयितेति च ।
इत्युक्तो विभुना राजा बलिः शान्तिं परां ययौ । तस्यैते तनयाः सर्व्वे क्षेत्रजा मुनिपुङ्गवात् ।
सम्भूता दीर्घतपसः सुदेष्णायां महौजसः । बलिस्तानभिषिच्येह पञ्च पुत्रानकल्मषान् ।
कृतार्थः सोऽपि योगात्मा योगमाश्रित्य स प्रभुः । अधृष्यः सर्व्वभूतानां कालापेक्षी चरन्नृपः ।
कालेन महता राजन् स्वञ्च स्थानमुपागमत् । तेषां जनपदाः पञ्च अङ्गा वङ्गाः ससुह्मकाः ।
कलिङ्गाः पुण्ड्रकाश्चैव प्रजास्त्वङ्गस्य मे शृणु । अङ्गपुत्रो महानासीद्राजेन्द्रो दधिवाहनः ।
दधिवाहनपुत्रस्तु राजा दिविरथोऽभवत् । पुत्रो दिविरथस्यासीच्छक्रतुल्यपराक्रमः ।
विद्वान्धर्म्मरथो नाम तस्य चित्ररथः सुतः । तेन धर्म्मरथेनाथ तदा विष्णुपदे गिरौ ।
यजता सह शक्रेण सोमः पीतो महात्मना । अथ चित्ररथस्यापि पुत्रो दशरथोऽभवत् ।

लोमपाद इति ख्यातो यस्य शान्ता सुताऽभवत्। तस्य दाशरथिर्वीरश्चतुरङ्गो महायशाः।
ऋष्यशृङ्गप्रसादेन जज्ञे कुलविवर्द्धनः। चतुरङ्गस्य पुत्रस्तु पृथुलाक्ष इति श्रुतः।
पृथुलाक्षसुतो राजा चम्पो नाम महायशाः। चम्पस्य तु पुरी चम्पा या मालिन्यभवत् पुरा।
पूर्णभद्रप्रसादेन हर्य्यङ्गोऽस्य सुतोऽभवत्। ततो वैभाण्डकिस्तस्य वारणं शक्रवारणं। १७००
अवतारयामास महीं मन्त्रैर्वाहनमुत्तमं। हर्य्यङ्गस्य तु दायादो राजा भद्ररथः स्मृतः।
पुत्रो भद्ररथस्यासीद्बृहत्कर्म्मा प्रजेश्वरः। बृहद्दर्भः सुतस्तस्य यस्माज्जज्ञे बृहन्मनाः।
बृहन्मनास्तु राजेन्द्रो जनयामास वै सुतं। नाम्ना जयद्रथं वीरं यस्माद्दृढरथो नृपः।
आसीद्दृढरथस्यापि विश्वजिज्जनमेजय। दायादस्तस्य कर्णस्तु विकर्णस्तस्य चात्मजः।
तस्य पुत्रशतन्त्वासीदङ्गानां कुलवर्द्धनं। बृहद्भसुतो यस्तु राजा नाम्ना बृहन्मनाः। १७०५
तस्य पत्नीद्वयञ्चासीच्चैद्यस्यैते सुते शुभे। यशोदेवी च सत्या च ताभ्यां वंशस्तु भिद्यते।
जयद्रथस्तु राजेन्द्र यशोदेव्यां व्यजायत। ब्रह्मक्षत्रोत्तरः सत्यां विजयो नाम विश्रुतः।
विजयस्य धृतिः पुत्रस्तस्य पुत्रो धृतव्रतः। धृतव्रतस्य पुत्रस्तु सत्यकर्म्मा महायशाः।
सत्यकर्म्मसुतश्चापि सूतस्त्वधिरथस्तु वै। यः कर्णं प्रतिजग्राह तेन कर्णस्तु सूतजः।
एतद्वः कथितं सर्व्वं कर्णं प्रति महाबलं। कर्णस्य वृषसेनस्तु वृषस्तस्यात्मजः स्मृतः। १७१०
एतेषां वंशजाः सर्व्वे राजानः कीर्त्तिता मया। सत्यव्रता महात्मानः प्रजावन्तो महारथाः।
ऋचेयोस्तु महाराज रौद्राश्वतनयस्य वै। शृणु वंशमनुप्रोक्तं यत्र जातोऽसि पार्थिव।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि कक्षेयुवंशानुकीर्त्तने एकत्रिंशोऽध्यायः॥ ३१॥
॥ वैशम्पायन उवाच॥ अनाधृष्यस्तु राजर्षिर्ऋचेयुस्त्वेकराट् सुतः। ऋचेयोर्ज्वलना नाम भार्या वै तक्षकात्मजा।
तस्यां देव्यां स राजर्षिर्मतिनारो महीपतिः। मतिनारसुतास्त्वासंस्त्रयः परमधार्म्मिकाः। १७१५
तंसुरोधः प्रतिरथः सुबाहुश्चैव धार्म्मिकः। गौरी कन्या च विख्याता मान्धातुर्जननी तथा।
सर्व्वे वेदविदश्चैव ब्रह्मण्याः सत्यवादिनः। सर्व्वे कृतास्त्रा बलिनः सर्व्वे युद्धविशारदाः।
पुत्रः प्रतिरथस्यासीत् कण्वः समभवन्नृपः। मेधातिथिः सुतस्तस्य यस्मात् काण्वोऽभवद्द्विजः।
इलिनी नाम यस्यासीत् कन्या वै जनमेजय। ब्रह्मवादिन्यधिस्त्री च तंसुस्तामभ्यगच्छत।
तंसोः सुरोधो राजर्षिर्द्धर्म्मनेत्रः प्रतापवान्। ब्रह्मवादी पराक्रान्तस्तस्य भार्य्योपदानवी। १७२०
उपदानवी सुतान् लेभे चतुरस्त्वैलिकात्मजान्। दुष्मन्तमथ सुष्मन्तं प्रवीरमनघन्तथा।
दुष्मन्तस्य तु दायादो भरतो नाम वीर्य्यवान्। स सर्व्वदमनो नाम नागायुतबलो महान्।
चक्रवर्त्ती सुतो जज्ञे दुष्मन्तस्य महात्मनः। शकुन्तलायां भरतो यस्य नाम्ना स्म भारताः।
दुष्मन्तं प्रति राजानं वागुवाचाशरीरिणी। माता भस्त्रा पितुः पुत्रो येन जातः स एव सः।
भरस्व पुत्रं दुष्मन्त माऽवमंस्थाः शकुन्तलां। रेतोधाः पुत्र उन्नयति नरदेव यमक्षयात्। १७२५
त्वञ्चास्य धाता गर्भस्य सत्यमाह शकुन्तला। भरतस्य विनष्टेषु तनयेषु महीपतेः।

मातृणाम्नात कोपेन मया ते कथितं यथा । वृहस्पतेराङ्गिरसः पुत्रो राजन्महामुनिः ।
संक्रामितो भरद्वाजो मरुद्भिः क्रतुभिर्विभुः । अत्रैवोदाहरन्तीमं भरद्वाजस्य धीमतः ।
धर्म्मसंक्रमणञ्चापि मरुद्भिर्भरताय वै । अयाजयद्भरद्वाजो मरुद्भिः क्रतुभिर्हि तं ।
पूर्व्वन्तु वितथे तस्य कृते वै पुत्रजन्मनि । ततोऽथ वितथो नाम भरद्वाजात् सुतोऽभवत् ।
ततोऽथ वितथे जाते भरतस्तु दिवं ययौ । वितथञ्चाभिषिच्याथ भरद्वाजो वनं ययौ ।
स चापि वितथः पुत्रान् जनयामास पञ्च वै । सुहोत्रञ्च सुहोतारं गयं गर्गं तथैव च ।
कपिलञ्च महात्मानं सुहोत्रस्य सुतद्वयं । काशकञ्च महासत्त्वं तथा गृत्समतिं नृपः ।
तथा गृत्समतेः पुत्रा ब्राह्मणाः क्षत्रिया विशः । काशस्य काशयो राजन् पुत्रो दीर्घतपास्तथा ।
बभूव दीर्घतपसो विद्वान् धन्वन्तरिः सुतः । धन्वन्तरेस्तु तनयः केतुमानिति विश्रुतः ।
अथ केतुमतः पुत्रो विद्वान् भीमरथः स्मृतः । दिवोदास इति ख्यातः सर्व्वरक्षःप्रणाशनः ।
एतस्मिन्नेव काले तु पुरीं वाराणसीं नृप । शून्यां निवेशयामास क्षेमको नाम राक्षसः ।
शप्ता हि सा मतिमता निकुम्भेन महात्मना । शून्या वर्षसहस्रं वै भवित्रीति नराधिप ।
तस्यान्तु शप्तमात्रायां दिवोदासः प्रजेश्वरः । विषयान्ते पुरीं रम्यां गोमत्यां संन्यवेशयत् ।
भद्रश्रेण्यस्य पुत्राणां शतमुत्तमधन्विनां । हत्वा निवेशयामास दिवोदासः प्रजेश्वरः ।
दिवोदासस्य पुत्रस्तु वीरो राजा प्रतर्द्दनः । प्रतर्द्दनस्य पुत्रौ द्वौ वत्सो भार्गव एव च ।
अलर्को राजपुत्रस्तु राजा सन्नतिमान् भुवि । हैहयस्य तु दायाद्यं हृतवान् वै महीपतिः ।
आजह्रे पितृदायाद्यं दिवोदासहृतं बलात् । भद्रश्रेण्यस्य पुत्रेण दुर्द्दमेन महात्मना ।
दिवोदासेन बालेति घृणया स विसर्ज्जितः । अष्टारथो नाम नृपः सुतो भीमरथस्य वै ।
तेन पुत्रेषु बालेषु प्रहृतं तस्य भारत । वैरस्यान्तं महाराज क्षत्रियेण विधित्सता ।
अलर्कः काशिराजस्तु ब्रह्मण्यः सत्यसङ्गरः । षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च ।
तस्यासीत् सुमहद्राज्यं रूपयौवनशालिनः । युवा रूपेण सम्पन्न आसीत् काशिकुलोद्वहः ।
लोपामुद्राप्रसादेन परमायुरवाप सः । वयसोऽन्ते महाबाहुर्हत्वा क्षेमकराक्षसं ।
रम्यां निवेशयामास पुरीं वाराणसीं नृपः । अलर्कस्य तु दायादः क्षेमको नाम पार्थिवः ।
सुनीथस्य तु दायादः क्षेम्यो नाम महायशाः । क्षेम्यस्य केतुमान् पुत्रो वर्षकेतुस्ततोऽभवत् ।
वर्षकेतोस्तु दायादो विभुर्नाम प्रजेश्वरः । आनर्त्तस्तु विभोः पुत्रः सुकुमारस्ततोऽभवत् ।
सुकुमारस्य पुत्रस्तु सत्यकेतुर्महारथः । सुतोऽभवन्महातेजा राजा परमधार्म्मिकः ।
वत्सस्य वत्सभूमिस्तु भार्गभूमिस्तु भार्गवात् । एते त्वङ्गिरसः पुत्रा जाता वंशेऽथ भार्गवे ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च भरतर्षभ । सुहोत्रस्य बृहत् पुत्रो बृहतस्तनयास्त्रयः ।
अजमीढो द्विमीढश्च पुरुमीढश्च वीर्य्यवान् । आजमीढस्य पत्न्यस्तु तिस्रो वै यशसाऽन्विताः ।
नीली च केशिनी चैव धूमिनी च वराङ्गना । अजमीढस्य केशिन्यां जज्ञे जह्नुः प्रतापवान् ।

आजहे यो महासत्रं सर्व्वमेधं महामखं । पतिलोभेन यं गङ्गा पतिं त्वऽभिससार ह ।
नेच्छतः प्लावयामास तस्य गङ्गाऽथ तत्सदः । तत्तया प्लावितं दृष्ट्वा यज्ञवाटं समन्ततः ।
जह्नुरप्यब्रवीद्गङ्गां क्रुद्धो भरतसत्तम । एष ते त्रिषु लोकेषु संक्षिप्याप: पिबाम्यहं ।
अस्य गङ्गेऽवलेपस्य सद्यः फलमवाप्नुहि । ततः पीतां महात्मानो दृष्ट्वा गङ्गां महर्षयः । १७६०
उपनिन्युर्महाभागां दुहितृत्वेन जाह्नवीं । युवनाश्वस्य पुत्त्रीन्तु कावेरीं जह्नुरावहत् ।
गङ्गाशापेन देहार्द्धं यस्याः पश्चान्नदीकृतं । जह्नोस्तु दयितः पुत्रो अजको नाम वीर्य्यवान् ।
अजकस्य तु दायादो बलाकाश्वो महीपतिः । बभूव मृगयाशीलः कुशिकस्तस्य चात्मजः ।
पह्लवैः सह संवृद्धो राजा वनचरैस्तदा । कुशिकस्तु तपस्तेपे पुत्त्रमिन्द्रसमप्रभं ।
लभेयमिति तं शक्रस्त्रासादभ्येत्य जज्ञिवान् । स गाधिरभवद्राजा मघवान् कौशिकः स्वयं । १७६५
विश्वामित्रस्तु गाधेयो राजा विश्वरथस्तदा । विश्वकृद्विश्वजिच्चैव तथा सत्यवती नृप ।
ऋचीकाज्जमदग्निस्तु सत्यवत्यामजायत । विश्वामित्रस्य तु सुता देवरातादयः स्मृताः ।
प्रख्यातास्त्रिषु लोकेषु तेषां नामानि मे शृणु । देवश्रवाः कतिश्चैव यस्मात् कात्यायनाः स्मृताः ।
शालावत्या हिरण्याक्षो रेणोर्ज्जज्ञेऽथ रेणुमान् । सांकृत्यो गालवो राजन् मौद्गल्यश्चेति विश्रुताः ।
तेषां ख्यातानि गोत्राणि कौशिकानां महात्मनां । पाणिनो बभ्रवश्चैव ध्यानजप्यास्तथैव च । १७७०
पार्थिवा देवरातास्च शालङ्कायनसौश्रवाः । लोहित्या यामदूतास्च तथा कारीषयः स्मृताः ।
विश्रुताः कौशिका राजंस्तथाऽन्ये सैन्धवायनाः । ऋष्यन्तरविवाह्याश्च कौशिका बहवः स्मृताः ।
पौरवस्य महाराज ब्रह्मर्षेः कौशिकस्य च । सम्बन्धो ह्यस्य वंशेऽस्मिन् ब्रह्मक्षत्त्रस्य विश्रुतः ।
विश्वामित्रात्मजानान्तु शुनःशेफोऽग्रजः स्मृतः । भार्गवः कौशिकत्वं हि प्राप्तः स मुनिपुङ्गवः ।
देवरातादयश्चान्ये विश्वामित्रस्य वै सुताः । दृषद्वतीसुतश्चापि विश्वामित्रात्तथाष्टकः । १७७५
अष्टकस्य सुतो लौहिः प्रोक्तो जह्नुगणो मया । आजमीढोऽपरो वंशः श्रूयतां भरतर्षभ ।
अजमीढात्तु नीलिन्यां सुशान्तिरुदपद्यत । पुरुजातिः सुशान्तेस्तु वाह्याश्वः पुरुजातितः ।
वाह्याश्वतनयाः पञ्च बभूवुरमरोपमाः । मुद्गलः सृञ्जयश्चैव राजा वृहदिषुस्तथा ।
यवीनरस्च विक्रान्तः कपिलाश्वस्च पञ्चमः । पञ्चैते रक्षणायालं देशानामिति नः श्रुतं ।
पञ्चानां विद्धि पाञ्चालान् स्फीतैर्जनपदैर्वृतान् । अलं संरक्षणे तेषां पञ्चाला इति विश्रुताः । १७८०
मुद्गलस्य तु दायादो मौद्गल्यः सुमहायशाः । सर्व्व एते महात्मानः क्षत्त्रोपेता द्विजातयः ।
एते ह्यङ्गिरसः पक्षं संश्रिताः काण्वमुद्गलाः । मौद्गल्यस्य सुतो ज्येष्ठो ब्रह्मर्षिः सुमहायशाः ।
इन्द्रसेना यतो गर्भं वध्र्यश्वं प्रत्यपद्यत । वध्र्यश्वान्मिथुनं जज्ञे मेनकायामिति श्रुतिः ।
दिवोदासश्च राजर्षिरहल्या च यशस्विनी । शरद्वतस्तु दायादमहल्या समसूयत ।
शतानन्दमृषिश्रेष्ठं तस्यापि सुमहायशाः । पुत्त्रः सत्यधृतिर्नाम धनुर्व्वेदस्य पारगः । १७८५
तस्य सत्यधृतेरेतो दृष्ट्वाऽप्सरसमग्रतः । अवस्कन्नं शरस्तम्बे मिथुनं समपद्यत ।

कृपया तत्र जग्राह शान्तनुर्मृगयां गतः । कृपः स्मृतः स वै तस्माद्गौतमी च कृपी तथा ।
एते शारद्वताः प्रोक्ता एते ते गौतमाः स्मृताः । अत ऊर्द्ध्वं प्रवक्ष्यामि दिवोदासस्य सन्ततिं ।
दिवोदासस्य दायादो ब्रह्मर्षिर्मित्रयुर्नृपः । मैत्रायणो ततः सोमो मैत्रेयास्तु ततः स्मृताः ।
एते वै संश्रिताः पक्षं क्षत्त्रोपेतास्तु भार्गवाः । आसीत् पञ्चजनः पुत्रः सृञ्जयस्य महात्मनः । १७९०
सुतः पञ्चजनस्यापि सोमदत्तो महीपतिः । सोमदत्तस्य दायादः सहदेवो महायशाः ।
सहदेवसुतश्चापि सोमको नाम पार्थिवः । अजमीढात् पुनर्ज्जातः क्षीणे वंशे तु सोमकः ।
सोमकस्य सुता जन्तुर्यस्य पुत्रशतं बभौ । तेषां यवीयान् पृषतो द्रुपदस्य पिता प्रभुः ।
धृष्टद्युम्नः सुतस्तस्य धृष्टकेतुश्च तत्सुतः । आजमीढाः स्मृता ह्येते महात्मानस्तु सोमकाः ।
पुत्राणामजमीढस्य सोमकत्वं महात्मनः । महिषी त्वजमीढस्य धूमिनी पुत्रगर्द्धिनी । १७९५
तृतीया तत्र पूर्व्वेषां जननी पृथिवीपते । सा तु पुत्रार्थिनी देवी व्रतचर्य्यासमन्विता ।
तेपे वर्षायुतं तप्ता तपः परमदुश्चरं । हुत्वाऽग्निं विधिवत् सा तु पवित्रमितभोजना ।
अग्निहोत्रकुशेष्वेव सुष्वाप जनमेजय । धूमिन्या स तया देव्या त्वजमीढः समीयिवान् ।
ऋक्षं सञ्जनयामास धूम्रवर्णं सुदर्शनं । ऋक्षात् सम्वरणो जज्ञे कुरुः संवरणात्तथा ।
यः प्रयागादतिक्रम्य कुरुक्षेत्रञ्चकार ह । पुण्यञ्च रमणीयञ्च पुण्यकृद्भिर्निषेवितं । १८००
तस्यान्ववायः सुमहान् यस्य नाम्ना स्म कौरवाः । कुरोस्तु पुत्राश्चत्वारः सुधन्वा सुधनुस्तथा ।
परिक्षिच्च महाबाहुः प्रवरश्चारिमेजयः । सुधन्वनस्तु दायादः सुहोत्रो मतिमान् स्मृतः ।
च्यवनस्तस्य पुत्रस्तु राजन् धर्म्मार्थकोविदः । च्यवनात् कृतयज्ञस्तु इष्ट्वा यज्ञैः स धर्म्मवित् ।
विश्रुतं जनयामास पुत्रमिन्द्रसमं नृपः । चैद्योपरिचरं वीरं वसुं नामान्तरिक्षगं ।
चैद्योपरिचराज्जज्ञे गिरिका सप्त मानवान् । महारथो मगधराट् विश्रुतो यो बृहद्रथः । १८०५
प्रत्यग्रहः कुशश्चैव यमाहुर्म्मणिवाहनं । मारुतश्च यदुश्चैव मत्स्यकालो च सप्तमः ।
बृहद्रथस्य दायादः कुशाग्रो नाम विश्रुतः । कुशाग्रस्यात्मजो विद्वानृषभो नाम वीर्य्यवान् ।
वृषभस्यापि दायादः पुष्पवान्नाम धार्म्मिकः । दायादस्तस्य विक्रान्तो राजा सत्यहितः स्मृतः ।
तस्य पुत्रः स धर्म्मात्मा नाम्ना ऊर्ज्जस्तु जज्ञिवान् । ऊर्ज्जस्य सम्भवः पुत्रो यस्य यज्ञे स वीर्य्यवान् ।
शकले द्वे स वै जातो जरया सन्धितः स तु । जरया सन्धितो यस्माज्जरासन्धस्ततः स्मृतः । १८१०
सर्व्वक्षत्रस्य जेताऽसौ जरासन्धो महाबलः । जरासन्धस्य पुत्रो वै सहदेवः प्रतापवान् ।
सहदेवात्मजः श्रीमानुदायुः स महायशाः । उदायुर्ज्जनयामास पुत्रं परमधार्म्मिकं ।
श्रुतशर्म्मेति नामानं मगधान् योऽवसत् प्रभुः । परिक्षितस्तु दायादो धार्म्मिको जनमेजयः ।
जनमेजयस्य दायादास्त्रय एव महारथाः । श्रुतसेनोग्रसेनौ च भीमसेनश्च नामतः ।
एते सर्व्वे महाभागा विक्रान्ता बलशालिनः । जनमेजयस्य पुत्रौ तु सुरथो मतिमांस्तथा । १८१५
सुरथस्य तु विक्रान्तः पुत्रो जज्ञे विदूरथः । विदूरथस्य दायाद ऋक्ष एव महारथः ।

द्वितीयः स बभौ राजा नाम्ना तेनैव विश्रुतः । द्वावेतौ तव वंशेऽस्मिन् द्वावेव च परिक्षितौ ।
भीमसेनास्त्रयो राजन् द्वौ चापि जनमेजयौ । ऋक्षस्य च द्वितीयस्य भीमसेनोऽभवत् सुतः ।
प्रतीपो भीमसेनात्तु प्रतीपस्य तु शान्तनुः । देवापिर्बाह्लिकश्चैव त्रय एव महारथाः ।
शान्तनोः प्रसवस्तेष यत्र जातोऽसि पार्थिव । बाह्लिकस्य तु राज्यं वै सप्तबाह्यं नरेश्वर । १८२०
बाह्लिकस्य सुतश्चैव सोमदत्तो महायशाः । जज्ञिरे सोमदत्तात्तु भूरिर्भूरिश्रवाः शलः ।
उपाध्यायस्तु देवानां देवापिरभवन्मुनिः । च्यवनस्य कृतः पुत्र इष्टश्चासीन्महात्मनः ।
शान्तनुस्त्वभवद्राजा कौरवाणां धुरन्धरः । शान्तनोः संप्रवक्ष्यामि यत्र जातोऽसि पार्थिव ।
गाङ्गं देवव्रतं नाम पुत्रं सोऽजनयत् प्रभुः । स तु भीष्म इति ख्यातः कौरवाणां पितामहः ।
काली विचित्रवीर्य्यन्तु जनयामास भारत । शान्तनोर्दयितं पुत्रं धर्म्मात्मानमकल्मषं । १८२५
कृष्णद्वैपायनश्चैव क्षेत्रे वैचित्रवीर्य्यके । धृतराष्ट्रञ्च पाण्डुञ्च विदुरञ्चाप्यजीजनत् ।
धृतराष्ट्रस्तु गान्धार्य्यां पुत्रानजनयच्छतं । तेषां दुर्य्योधनः श्रेष्ठः सर्व्वेषामेव स प्रभुः ।
पाण्डोर्धनञ्जयः पुत्रः सौभद्रस्तस्य चात्मजः । अभिमन्योः परिक्षित्तु पिता तव जनेश्वर ।
एष ते पौरवो वंशो यत्र जातोऽसि पार्थिव । तुर्व्वसोश्च प्रवक्ष्यामि द्रुह्योश्चानोर्यदोस्तथा ।
तुर्व्वसोश्च सुतो वह्निर्गोभानुस्तस्य चात्मजः । गोभानोस्तु सुतो राजा त्रैसानुरपराजितः । १८३०
करन्धमस्तु त्रैसानोर्मरुत्तस्तस्य चात्मजः । अन्यस्त्वाविक्षितो राजा मरुत्तः कथितस्तव ।
अनपत्योऽभवद्राजा यज्वा विपुलदक्षिणः । दुहिता सम्मता नाम तस्यासीत् पृथिवीपतेः ।
दक्षिणार्थं तु सा दत्ता सम्वर्त्ताय महात्मने । दुष्मन्तं पौरवञ्चापि लेभे पुत्रमकल्मषं ।
एवं ययातेः शापेन जरासंक्रमणे तदा । पौरवं तुर्व्वसोर्व्वंशः प्रविवेश नृपोत्तम ।
दुष्मन्तस्य तु दायादः करुत्थामः प्रजेश्वरः । करुत्थामात्तथाक्रीडश्चत्वारस्तस्य चात्मजाः । १८३५
पाण्ड्यश्च केरलश्चैव कोलश्चोलश्च पार्थिवः । तेषां जनपदाः स्फीताः पाण्ड्याश्चोलाः सकेरलाः ।
द्रुह्योश्च तनयौ राजन् बभ्रुः सेतुश्च पार्थिवः । अङ्गारः सेतुपुत्रश्च मरुतां पतिरुच्यते ।
यौवनाश्वेन समरे कृच्छ्रेण निहतो बली । युद्धं सुमहदासीच्च मासान् परिचतुर्द्दश ।
अङ्गारस्य तु दायादो गान्धारो नाम पार्थिवः । ख्यायते यस्य नाम्ना वै गान्धारविषयो महान् ।
गान्धारदेशजाश्चैव तुरगा वाजिनाम्वराः । अनोस्तु पुत्रो धर्म्मोऽभूद् घृतस्तस्यात्मजोऽभवत् । १८४०
घृतात्तु दुदुहो जज्ञे प्रचेतास्तस्य चात्मजः । प्रचेतसः सुचेतास्तु कीर्त्तिता ह्यनवो मया ।
यदोर्व्वंशं प्रवक्ष्यामि ज्येष्ठस्योत्तमतेजसः । विस्तरेणानुपूर्व्व्या च गदतो मे निबोध तं ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पूरुवंशानुकीर्त्तने द्वात्रिंशोऽध्यायः ॥ ३२ ॥
॥ वैशम्पायन उवाच ॥ बभूवुस्तु यदोः पुत्राः पञ्च देवसुतोपमाः । सहस्रदः पयोदश्च क्रोष्टा नीलोऽञ्जिकस्तथा ।
सहस्रदस्य दायादास्त्रयः परमधार्म्मिकाः । हैहयश्च हयश्चैव राजा वेणुहयस्तथा ।
हैहयस्याभवत् पुत्रो धर्म्मनेत्र इति श्रुतः । धर्म्मनेत्रस्य कार्त्तस्तु साहञ्जस्तस्य चात्मजः । १८४५

साहञ्जनी नाम पुरी तेन राज्ञा निवेशिता। साहञ्जस्य तु दायादो महिष्मान्नाम पार्थिवः।
माहिष्मती नाम पुरी येन राज्ञा निवेशिता। आसीन्महिष्मतः पुत्रो भद्रश्रेण्यः प्रतापवान्।
वाराणस्यधिपो राजा कथितः पूर्व्वमेव तु। भद्रश्रेण्यस्य दायादो दुर्द्दमो नाम विश्रुतः।
दुर्द्दमस्य सुतो राजा कनको नाम नामतः। कनकस्य तु दायादाश्चत्वारो लोकविश्रुताः।
कृतवीर्य्यः कृतौजाश्च कृतवर्म्मा तथैव च। कृताग्निस्तु चतुर्थोऽभूत् कृतवीर्य्यादथार्ज्जुनः। १८५०
यः स बाहुसहस्रेण सप्तद्वीपेश्वरोऽभवत्। जिगाय पृथिवीमेको रथेनादित्यवर्च्चसा।
स हि वर्षायुतं तप्त्वा तपः परमदुश्चरं। दत्तमाराधयामास कार्त्तवीर्य्योऽत्रिसम्भवं।
तस्मै दत्तो वरान् प्रादाच्चतुरो भूरितेजसः। पूर्व्वं बाहुसहस्रन्तु प्रार्थितं सुमहद्वरं।
अधर्म्मं धीयमानस्य सद्भिस्तत्र निवारणं। उग्रेण पृथिवीं जित्वा धर्म्मेणैवानुरञ्जनं।
संग्रामान् सुबहून् जित्वा हत्वा चारीन् सहस्रशः। संग्रामे वर्त्तमानस्य वधञ्चाभ्यधिकाद्रणे। १८५५
तस्य बाहुसहस्रन्तु युध्यतः किल भारत। योगाद्योगेश्वरस्येव प्रादुर्भवति मायया।
तेनेयं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना।ससमुद्रा सनगरा उग्रेण विधिना जिता।
तेन सप्तसु द्वीपेषु सप्त यज्ञशतानि वै। प्राप्तानि विधिना राज्ञा श्रूयन्ते जनमेजय।
सर्व्वे यज्ञा महाबाहो सहस्रशतदक्षिणाः। सर्व्वे काञ्चनयूपाश्च सर्व्वे काञ्चनवेदयः।
सर्व्वे देवैर्म्महाराज विमानस्थैरलङ्कृताः। गन्धर्व्वैरप्सरोभिश्च नित्यमेवोपशोभिताः। १८६०
यस्य यज्ञे जगौ गाथा गन्धर्व्वो नारदस्तथा। वरी दासात्मजो विद्वान्महिम्ना तस्य विस्मितः।
॥ नारद उवाच ॥ न नूनं कार्त्तवीर्य्यस्य गतिं यास्यन्ति पार्थिवाः। यज्ञैर्द्दानैस्तपोभिर्व्वा विक्रमेण श्रुतेन वा।
स हि सप्तसु द्वीपेषु चर्म्मी खड्गी शरासनी। रथी द्वीपाननुचरन् योगी संदृश्यते नृभिः।
अनष्टद्रव्यता चैव न शोको न च विभ्रमः। प्रभावेण महाराज्ञः प्रजा धर्म्मेण रक्षतः।
पञ्चाशीतिसहस्राणि वर्षाणां वै नराधिपः। स सर्व्वरत्नभाक् सम्राट् चक्रवर्त्ती बभूव ह। १८६५
स एव पशुपालोऽभूत् क्षेत्रपालः स एव च। स एव वृष्ट्या पर्ज्जन्यो योगित्वादर्ज्जुनोऽभवत्।
स वै बाहुसहस्रेण ज्याघातकठिनत्वचा। भाति रश्मिसहस्रेण शरदीव च भास्करः।
स हि नागान्मनुष्येषु माहिष्मत्यां महाद्युतिः। कर्क्कोटकसुतान् जित्वा पुर्य्यां तस्यां न्यवेशयत्।
स वै वेगं समुद्रस्य प्रावृट्कालेऽम्बुजेक्षणः। क्रीडन्नेव भुजोद्भिन्नं प्रतिस्रोतश्चकार ह।
लुण्ठता क्रीडता तेन फेनस्रग्दाममालिनी। चलदूर्म्मिसहस्रेण शङ्किताभ्येति नर्म्मदा। १८७०
तस्य बाहुसहस्रेण क्षुभ्यमाणे महोदधौ। भयान्निलीना निश्चेष्टाः पातालस्था महासुराः।
चूर्णीकृतमहावीचिं चलन्मीनमहातिमिं। मारुताविद्धफेनौघमावर्त्तक्षोभदुःसहं।
प्रावर्त्तयत्तदा राजा सहस्रेण च बाहुना। देवासुरसमाक्षिप्तः क्षीरोदमिव मन्दरः।
मन्दरक्षोभचकिता अमृतोत्पादशङ्किताः। सहसोत्पतिता भीता भीमं दृष्ट्वा नृपोत्तमं।
नता निश्चलमूर्द्धानो बभूवुस्ते महोरगाः। सायाह्ने कदलीषण्डाः कम्पितास्तस्य वायुना। १८७५

स वै बद्धा धनुर्ज्याभिरुत्सिक्तं पञ्चभिः शरैः । लङ्केशं मोहयित्वा तु सबलं रावणं बलात् ।
निर्ज्जित्यैव समानीय माहिष्मत्यां बबन्ध तं । श्रुत्वा तु बद्धं पौलस्त्यं रावणन्त्वर्ज्जुनेन तु ।
ततो गत्वा पुलस्त्यस्तमर्ज्जुनं ददृशे स्वयं । मुमोच रक्षः पौलस्त्यं पुलस्त्येनानुयाचितः ।
यस्य बाहुसहस्रस्य बभूव ज्यातलस्वनः । युगान्ते त्वम्बुदस्येव स्फुटतो ह्यशनेरिव ।
अहो बत मृधे वीर्य्यं भार्गवस्य यदच्छिनत् । राज्ञो बाहुसहस्रन्तु हैमं तालवनं यथा । १८८०
तृषितेन कदाचित् स भिक्षितश्चित्रभानुना । स भिक्षामददद्वीरः सप्तद्वीपान् विभावसोः
पुराणि ग्रामघोषांश्च विषयांश्चैव सर्व्वशः । जज्वाल तस्य सर्व्वाणि चित्रभानुर्द्दिधक्षया ।
स तस्य पुरुषेन्द्रस्य प्रभावेण महात्मनः । ददाह कार्त्तवीर्य्यस्य शैलांश्चैव वनानि च ।
स शून्यमाश्रमं रम्यं वरुणस्यात्मजस्य वै । ददाह वनवद्भीतश्चित्रभानुः सहैहयः ।
यं लेभे वरुणः पुत्रं पुरा भास्वन्तमुत्तमं । वशिष्ठं नाम स मुनिः ख्यात आपव इत्युत । १८८५
यत्रापवस्तु तं क्रोधाच्छप्तवानर्ज्जुनं प्रभुः । यस्मान्न वर्जितमिदं वनं ते मम हैहय ।
तस्मात्ते दुष्करं कर्म्म कृतमन्यो हनिष्यति । रामो नाम महाबाहुर्जामदग्न्यः प्रतापवान् ।
छित्वा बाहुसहस्रं ते प्रमथ्य तरसा बली । तपस्वी ब्राह्मणस्त्वां वधिष्यति स भार्गवः ।
॥ वैशम्पायन उवाच ॥ अनष्टद्रव्यता यस्य बभूवामित्रकर्षण । प्रभावेण नरेन्द्रस्य प्रजा धर्म्मेण रक्षतः ।
रामात्ततोऽस्य मृत्युर्वै तस्य शापान्मुनेर्नृप । वरस्तथैष कौरव्य स्वयमेव वृतः पुरा । १८९०
तस्य पुत्रशतस्यासन् पञ्च शेषा महात्मनः । कृतास्त्रा बलिनः शूरा धर्म्मात्मानो यशस्विनः ।
शूरसेनश्च शूरश्च धृष्टोक्तः कृष्ण एव च । जयध्वजश्च नामासीदावन्त्यो नृपतिर्म्महान् ।
कार्त्तवीर्य्यस्य तनया वीर्य्यवन्तो महाबलाः । जयध्वजस्य पुत्रस्तु तालजङ्घो महाबलः ।
तस्य पुत्राः शतं ख्यातास्तालजङ्घा इति श्रुताः । तेषां कुले महाराज हैहयानां महात्मनां ।
वीतिहोत्राः सुजाताश्च भोजाश्चावन्तयः स्मृताः । तौण्डिकेराश्च विख्यातास्तालजङ्घास्तथैव च । १८९५
भरताश्च सुजात्याश्च बहुलत्वान्नानुकीर्त्तिताः । वृषप्रभृतयो राजन् यादवाः पुण्यकर्म्मिणः ।
वृषो वंशधरस्तत्र तस्य पुत्रोऽभवन्मधुः । मधोः पुत्रशतं त्वासीद्वृषणस्तस्य वंशकृत् ।
वृषणाद्वृष्णयः सर्व्वे मधोस्तु माधवाः स्मृताः । यादवा यदुना चाग्रे निरुच्यन्ते च हैहयाः ।
न तस्य वित्तनाशोऽस्ति नष्टं प्रतिलभेच्च सः । कार्त्तवीर्य्यस्य यो जन्म कथयेदिह नित्यशः ।
एते ययातिपुत्राणां पञ्च वंशा विशाम्पते । कीर्त्तिता लोकवीराणां ये लोकान् धारयन्ति वै । १९००
भूतानीव महाराज पञ्च स्थावरजङ्गमान् । श्रुत्वा पञ्चविसर्गांश्च राजा धर्म्मार्थकोविदः ।
वशी भवति पञ्चानामात्मजानां तथेश्वरः । लभेत् पञ्च वरांश्चैव दुर्ल्लभानिह लौकिकान् ।
आयुः कीर्त्तिं तथा पुत्रानैश्वर्य्यं भूमिमेव च । धारणाच्छ्रवणाच्चैव पञ्चवर्गस्य भारत ।
क्रोष्टोस्तु शृणु राजेन्द्र वंशमुत्तमपौरुषं । यदोर्व्वंशधरस्याथ यज्वनः पुण्यकर्म्मणः ।

क्रोष्टुवंशं हि श्रुत्वेमं सर्व्वपापैः प्रमुच्यते । यस्यान्ववायजो विष्णुर्हरिर्वृष्णिकुलोद्वहः ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥
॥ वैशम्पायन उवाच ॥ गान्धारी चैव माद्री च क्रोष्टोर्भार्य्ये बभूवतुः । गान्धारी जनयामास अनमित्रं महाबलं ।
माद्री युधाजितं पुत्रं ततोऽन्यं देवमीढुषं । तेषां वंशस्त्रिधाभूतो वृष्णीनां कुलवर्द्धनः ।
माद्र्याः पुत्रौ तु जज्ञाते सुतौ वृष्ण्यन्धकावुभौ । जज्ञाते तनयौ वृष्णेः श्वफल्कश्चित्रकस्तथा ।
श्वफल्कस्तु महाराज धर्म्मात्मा यत्र वर्त्तते । नास्ति व्याधिभयं तत्र नावर्षभयमप्युत ।
कदाचित् काशिराजस्य विभोर्भरतसत्तम । त्रीणि वर्षाणि विषये नावर्षत् पाकशासनः ।
स तत्र वासयामास श्वफल्कं परमार्चितं । श्वफल्कपरिवर्त्ते च ववर्ष हरिवाहनः ।
श्वफल्कः काशिराजस्य सुतां भार्य्यामविन्दत । गान्दिनीं नाम सा गास्तु ददौ विप्रेषु नित्यशः ।
सा मातुरुदरस्था तु बहून् वर्षगणान् किल । निवसन्ती न वै जज्ञे गर्भस्थां तां पिताऽब्रवीत् ।
जायस्व शीघ्रं भद्रन्ते किमर्थमिह तिष्ठसि । प्रोवाच चैनं गर्भस्था कन्या गाश्च दिने दिने ।
यदि दद्यां ततो जाये पितरं प्रत्युवाच ह । तथेत्युक्त्वा च तां तस्याः पिता काममपूरयत् ।
दाता यज्वा च वीरश्च श्रुतवानतिथिप्रियः । अक्रूरः सुषुवे तस्मात् श्वफल्काद्भूरिदक्षिणः ।
उपमद्गुस्तथामद्गुर्मुदरश्चारिमेजयः । अविक्षिपस्तथोपेक्षः शत्रुघ्नोऽथारिमर्द्दनः ।
धर्म्मधृग्यतिधर्म्मा च गृध्रमोजान्धकस्तथा । आवाहप्रतिवाहौ च सुन्दरी च वराङ्गना ।
अक्रूरेणोग्रसेनायां सुगात्र्यां कुरुनन्दन । प्रसेनश्चोपदेवश्च जज्ञाते देववर्च्चसौ ।
चित्रकस्याभवन् पुत्राः पृथुर्विपृथुरेव च । अश्वग्रीवोऽश्वबाहुश्च सुपार्श्वकगवेषणौ ।
अरिष्टनेमिरश्वश्च सुधर्म्मा धर्म्मभृत्तथा । सुबाहुर्बहुबाहुश्च श्रविष्ठाश्रवणे स्त्रियौ ।
अश्मक्यां जनयामास शूरं वै देवमीढुषः । महिष्यां जज्ञिरे शूराद्भोज्यायां पुरुषा दश ।
वसुदेवो महाबाहुः पूर्व्वमानकदुन्दुभिः । जज्ञे यस्य प्रसूतस्य दुन्दुभ्यः प्राणदन् दिवि ।
आनकानाञ्च संह्रादः सुमहानभवद्दिवि । पपात पुष्पवर्षञ्च शूरस्य भवने महत् ।
मनुष्यलोके कृत्स्नेऽपि रूपे नास्ति समो भुवि । यस्यासीत् पुरुषाग्र्यस्य कान्तिश्चन्द्रमसो यथा ।
देवभागस्ततो जज्ञे तथा देवश्रवाः पुनः । अनाधृष्टिः कनवको वत्सवानथ गृञ्जिमः ।
श्यामः शमीको गण्डूषः पञ्च चास्य वराङ्गनाः । पृथुकीर्त्तिः पृथा चैव श्रुतदेवा श्रुतश्रवा ।
राजाधिदेवी च तथा पञ्चैता वीरमातरः । पृथां दुहितरं वव्रे कुन्तिस्तां कुरुनन्दन ।
शूरः पूज्याय वृद्धाय कुन्तिभोजाय तां ददौ । तस्मात् कुन्तीति विख्याता कुन्तिभोजात्मजा पृथा ।
श्रमस्य श्रुतदेवायां जगृहुः सुषुवे सुतः । श्रुतश्रवायां चैद्यस्य शिशुपालो महाबलः ।
हिरण्यकशिपुर्य्योऽसौ दैत्यराजोऽभवत् पुरा । पृथुकीर्त्यान्तु सञ्जज्ञे तनयो वृद्धशर्म्मणः ।
करूषाधिपतिर्वीरो दन्तवक्रो महाबलः । पृथां दुहितरं चक्रे कुन्तिस्तां पाण्डुरावहत् ।

यस्यां स धर्म्मविद्राजा धर्म्माज्जज्ञे युधिष्ठिरः । भीमसेनस्तथा वातादिन्द्राच्चैव धनञ्जयः ।
लोकेऽप्रतिरथो वीरः शक्रतुल्यपराक्रमः । अनमित्राच्छिनिर्ज्जज्ञे कनिष्ठाद्वृष्णिनन्दनात् ।
शैनेयः सत्यकस्तस्मात् युयुधानश्च सात्यकिः । उद्धवो देवभागस्य महाभागः सुतोऽभवत् । १९४५
पण्डितानां परं प्राहुर्द्देवश्रवसमुद्भवं । अश्मक्यां प्राप्तवान् पुत्रमनाधृष्टिर्यशस्विनं ।
निवर्त्तशत्रुं शत्रुघ्नं देवश्रवा व्यजायत । श्रुतदेवाप्रजातस्तु नैषादिर्य्यः प्रतिश्रुतः ।
एकलव्यो महाराज निषादैः परिवर्द्धितः । वत्सावते त्वपुत्राय वसुदेवः प्रतापवान् ।
अद्भिर्ददौ सुतं वीरं शौरिः कौशिकमौरसं । गण्डूषाय त्वपुत्राय विष्वक्सेनो ददौ सुतान् ।
चारुदेष्णं सुचारुञ्च पञ्चालं कृतलक्षणं । असंग्रामेण यो वीरो नावर्त्तत कदाचन । १९५०
रौक्मिणेयो महाबाहुः कनीयान् भरतर्षभ । वायसानां सहस्राणि यं यान्तं पृष्ठतोऽन्वयुः ।
चारुमांसानि भोक्ष्यामश्चारुदेष्णहतानि तु । तन्त्रिजस्तन्त्रिपालश्च सुतौ कनवकस्य तु ।
वीरश्चाश्वहनुश्चैव वीरौ तावथ सृञ्जिमौ । श्यामपुत्रः शमीकस्तु शमीको राज्यमावहत् ।
जुगुप्समानो भोजत्वाद्राजसूयमवाप सः । अजातशत्रुः शत्रूणां जज्ञे तस्य विनाशनः ।
वसुदेवसुतान् वीरान् कीर्त्तयिष्यामि तच्छृणु । वृष्णेस्त्रिविधमेवन्तु बह्वशाखं महौजसं । १९५५
धारयन् विपुलं वंशं नानर्थैरिह युज्यते ।

इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

॥ वैशम्पायन उवाच ॥ याः पत्न्यो वसुदेवस्य चतुर्द्दश वराङ्गनाः । पौरवी रोहिणी नाम मदिरापि तथा धरा ।
वैशाखी च तथा भद्रा सुनाम्नी चैव पञ्चमी । सहदेवा शान्तिदेवा श्रीदेवा देवरक्षिता ।
वृकदेव्युपदेवी च देवकी चैव सप्तमी । सुतनुर्वडवा चैव द्वे एते परिचारिके ।
पौरवी रोहिणी नाम बाह्लीकस्यात्मजाऽभवत् । ज्येष्ठा पत्नी महाराज दयितानकदुन्दुभेः । १९६०
लेभे ज्येष्ठं सुतं रामं शारणं शठमेव च । दुर्द्दमं दमनं श्वभ्रं पिण्डारकमुशीनरं ।
चित्रां नाम कुमारीञ्च रोहिणीतनया दश । चित्रा सुभद्रेति पुनर्व्विख्याता कुरुनन्दन ।
वसुदेवाच्च देवक्यां जज्ञे शौरिर्म्महायशाः । रामाच्च निशठो जज्ञे रेवत्यां दयितः सुतः ।
सुभद्रायां रथी पार्थादभिमन्युरजायत । अक्रूरात् काशिकन्यायां सत्यकेतुरजायत ।
वसुदेवस्य भार्य्यासु महाभागासु सप्तसु । ये पुत्रा जज्ञिरे शूरा नामतस्तान्निबोध मे । १९६५
भोजश्च विजयश्चैव शान्तिदेवासुतावुभौ । वृकदेवः सुदेवायां गदश्चास्तां सुतावुभौ ।
अगावहं महात्मानं वृकदेवी व्यजायत । कन्या त्रिगर्त्तराजस्य भर्त्ता वै शिशिरायणः ।
जिज्ञासां पौरुषे चक्रे न चस्कन्देऽथ पौरुषे । कृष्णायससमप्रख्यो वर्षे द्वादशमे तथा ।
मिथ्याभिशस्तो गार्ग्यस्तु मन्युनाभिसमीरितः । गोपकन्यामुपादाय मैथुनायोपचक्रमे ।
गोपाली त्वप्सरास्तस्य गोपस्त्रीवेशधारिणी । धारयामास गार्ग्यस्य गर्भं दुर्द्धरमच्युत । १९७०
मानुष्यां गार्ग्यभार्य्यायां नियोगाच्छूलपाणिनः । स कालयवनो नाम जज्ञे राजा महाबलः ।

वृषपूर्व्वार्द्धकायास्तमवहन् वाजिनो रणे। अपुत्रस्य स राज्ञस्तु ववृधेऽन्तःपुरे शिशुः।
यवनस्य महाराज स कालयवनोऽभवत्। स युद्धकामो नृपतिः पर्य्यपृच्छद्द्विजोत्तमान्।
वृष्ण्यन्धककुलं तस्य नारदोऽकथयद्विभुः। अक्षौहिण्या तु सैन्यस्य मथुरामभ्ययात्तदा।
दूतं सम्प्रेषयामास वृष्ण्यन्धकनिवेशनं। ततो वृष्ण्यन्धकाः कृष्णं पुरस्कृत्य महामतिं। १९६५
समेता मन्त्रयामासुर्यवनस्य भयात्तदा। कृत्वा च निश्चयं सर्व्वे पलायनमरोचयन्।
विहाय मथुरां रम्यां मानयन्तः पिनाकिनं। कुशस्थलीं द्वारवतीं निवेशयितुमीप्सवः।
इति कृष्णस्य जन्मेदं यः शुचिर्नियतेन्द्रियः। पर्व्वसु श्रावयेद्विद्वाननृणः सुमुखी भवेत्।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि षट्त्रिंशोऽध्यायः ॥ ३६ ॥
॥ वैशम्पायन उवाच ॥ क्रोष्टोरेवाभवत् पुत्रो वृजिनीवान्महायशाः। वार्जिनीवतमिच्छन्ति स्वाहिं स्वाहाकृताम्वरं।
स्वाहेः पुत्रोऽभवद्राजा उषद्गुर्व्वदताम्वरः। महाक्रतुभिरीजे यो विविधैर्भूरिदक्षिणैः। १९७०
ततः प्रसूतिमिच्छन् वै उषद्गुः सोऽग्र्यमात्मजं। जज्ञे चित्ररथस्तस्य पुत्रः कर्म्मभिरन्वितः।
आसीच्चैत्ररथिर्व्वीरो यज्वा विपुलदक्षिणः। शशबिन्दुः परं वृत्तं राजर्षीणामनुष्ठितः।
पृथुश्रवाः पृथुयशाः राजासीच्छशबिन्दुजः। शंसन्ति च पुराणज्ञाः पार्थश्रवसमुत्तरं।
अनन्तरं सुयज्ञस्तु सुयज्ञतनयोऽभवत्। उषन् यो यज्ञमखिलं स्वधर्म्ममुषताम्वरः।
शिनेयुरभवत् पुत्र उषतः शत्रुतापनः। मरुत्तस्तस्य तनयो राजर्षिरभवन्नृप। १९७५
मरुत्तोऽलभत ज्येष्ठं सुतं कम्बलबर्हिषं। चचार विपुलं धर्म्ममर्षात् प्रेत्यभागपि।
शतप्रसूतिमिच्छन्ति सुतं कम्बलबर्हिषः। बभूव रुक्मकवचः शतप्रसवतः सुतः।
निहत्य रुक्मकवचः शतं कवचिनां रणे। धन्विनां निशितैर्बाणैरवाप श्रियमुत्तमां।
जज्ञेऽथ रुक्मकवचात् पराजित् परवीरहा। जज्ञिरे पञ्च पुत्रास्तु महावीर्य्याः पराजितः।
रुक्मेषुः पृथुरुक्मश्च ज्यामघः पालितो हरिः। पालितञ्च हरिञ्चैव विदेहेभ्यः पिता ददौ। १९८०
रुक्मेषुरभवद्राजा पृथुरुक्मस्य संश्रयात्। ताभ्यां प्रव्राजितो राज्याज्ज्यामघोऽवसदाश्रमे।
प्रशान्तश्चाश्रमस्थश्च ब्राह्मणेनावबोधितः। जगाम धनुरादाय देशमन्यं ध्वजी रथी।
नर्म्मदाकूलमेकाकी मेकलां मृत्तिकावतीं। ऋक्षवन्तं गिरिं जित्वा शुक्तिमत्यामुवास सः।
ज्यामघस्याभवद्भार्य्या शैब्या बलवती सती। अपुत्रोऽपि च राजा स नान्यां भार्य्यामविन्दत।
तस्यासीद्विजयो युद्धे तत्र कन्यामवाप सः। भार्य्यामुवाच सन्त्रस्तः स्नुषेति स जनेश्वरः। १९८५
एतच्छ्रुत्वाब्रवीद्देवी कस्य चेयं स्नुषेति वै। अब्रवीत्तदुपश्रुत्य ज्यामघो राजसत्तमः।
यस्ते जनिष्यते पुत्रस्तस्य भार्य्योपदानवी। उग्रेण तपसा तस्याः कन्यायाः स व्यजायत।
पुत्रं विदर्भं सुभगा शैब्या परिणता सती। राजपुत्र्यान्तु विद्वांसौ स्नुषायां क्रथकैशिकौ।
पश्चाद्विदर्भोऽजनयच्छूरौ रणविशारदौ। भीमो विदर्भस्य सुतः कुन्तिस्तस्यात्मजोऽभवत्।
कुन्तेर्धृष्टः सुतो जज्ञे रणधृष्टः प्रतापवान्। धृष्टस्य जज्ञिरे शूरास्त्रयः परमधार्म्मिकाः। १९९०

आवन्तस्य दशार्हस्य अजो विषहरश्च यः । दशार्हस्य सुतो व्योमा व्योम्नो जीमूत उच्यते ।
जीमूतपुत्रो विकृतिस्तस्य भीमरथः सुतः । अथ भीमरथस्यासीत् पुत्रो नवरथस्तथा ।
तस्य चासीद्दशरथः शकुनिस्तस्य चात्मजः । तस्मात् करम्भः कारम्भिर्देवरातोऽभवन्नृपः ।
देवक्षत्रोऽभवत्तस्य दैवक्षत्रिर्महायशाः । देवगर्भसमो जज्ञे देवक्षत्रस्य नन्दनः ।
मधूनां वंशकृद्राजा मधुर्मधुरवागपि । मधोर्जज्ञेऽथ वैदर्भ्यां पुरुद्वान् पुरुषोत्तमः । १९९५
मधुर्जज्ञेऽथ पौरव्यां भद्रवत्यां कुरूद्वह । ऐक्ष्वाकी चाभवद्भार्य्या सत्वांस्तस्या व्यजायत ।
सत्वान् सर्व्वगुणोपेतः सात्वतां कीर्त्तिवर्द्धनः । इमां विसृष्टिं विज्ञाय ज्यामघस्य महात्मनः ।
युज्यते परमप्रीत्या प्रजावांश्च भवेत्तथा ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥
॥ वैशम्पायन उवाच ॥ सात्वतान् सत्त्वसम्पन्नान् कौशल्या सुषुवे सुतान् । भजिनं भजमानञ्च दिव्यं देवावृधं नृपं ।
अन्धकञ्च महाबाहुं वृष्णिञ्च यदुनन्दनं । तेषां विसर्गाश्चत्वारो विस्तरेणेह तान् शृणु । २०००
भजमानस्य सृञ्जय्यौ बाह्यकाचोपबाह्यका । आस्तां भार्य्ये तयोस्तस्मात् जज्ञिरे बहवः सुताः ।
क्रिमिश्च क्रमणश्चैव धृष्टः शूरः पुरञ्जयः । एते बाह्यकसृञ्जय्यां भजमानाद्विजज्ञिरे ।
अयुताजित् सहस्राजित् शताजिदथ दासकः । उपबाह्यकसृञ्जय्यां भजमानाद्विजज्ञिरे ।
यज्वा देवावृधो राजा चचार विपुलं तपः । पुत्रः सर्व्वगुणोपेतो मम स्यादिति निश्चितः ।
संयुज्यात्मानमेवन्तु पर्णाशाया जलं स्पृशन् । सदोपस्पृशतस्तस्य चकार प्रियमापगा । २००५
चिन्तयाभिपरीता सा जगामैकविनिश्चयं । कल्याणत्वान्नरपतेस्तस्य सा निम्नगोत्तमा ।
नाध्यगच्छत तां नारीं यस्यामेवंविधः सुतः । भवेत्तस्मात् स्वयं गत्वा भवाम्यस्य सहव्रता ।
अथ भूत्वा कुमारी सा बिभ्रती परमं वपुः । वरयामास नृपतिं तामियेष च स प्रभुः ।
तस्यामाधत्त गर्भञ्च तेजस्विनमुदारधीः । अथ सा दशमे मासि सुषुवे सरितांवरा ।
पुत्रं सर्व्वगुणोपेतं बभ्रुं देवावृधान्नृपात् । अत्र वंशे पुराणज्ञा गायन्तीति परिश्रुतं । २०१०
गुणान्देवावृधस्याथ कीर्त्तयन्तो महात्मनः । यथैवाग्रे तथा दूरात्पश्याम तथाऽन्तिकात् ।
बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः । षष्टिश्च षट् च पुरुषाः सहस्राणि च सप्त च ।
एतेऽमृतत्वं संप्राप्ता बभ्रुर्देवावृधावपि । यज्वा दानपतिर्व्विद्वान् ब्रह्मण्यः सुदृढायुधः ।
तस्यान्ववायः सुमहान् भोजा ये मार्त्तिकावताः । अन्धकात् काश्यदुहिता चतुरोऽलभतात्मजान् ।
कुकुरं भजमानञ्च शमं कम्बलबर्हिषं । कुकुरस्य सुतो धृष्णुर्धृष्णोस्तु तनयस्तथा । २०१५
कपोतरोमा तस्याथ तैत्तिरिस्तनयोऽभवत् । जज्ञे पुनर्व्वसुस्तस्मादभिजिच्च पुनर्व्वसोः ।
तथा वै पुत्रमिथुनं बभूवाभिजितः किल । आहुकश्चाहुकी चैव ख्यातौ ख्यातिमतां वरौ ।
इमाश्चोदाहरन्त्यत्र गाथाः प्रति तमाहुकं । श्वेतेन परिवारेण किशोरप्रतिमो महान् ।
अशीतिचर्म्मणा युक्त आहुकः प्रथमं व्रजेत् । नापुत्रवानाशतदो नासहस्रशतायुधः ।

नाग्रङ्कुकर्म्मा नायज्वा यो भोजमभितो व्रजेत्। पूर्व्वस्यां दिशि नागानां भोजस्य प्रययुः किल। २०२०
सापासङ्गानुकर्षाणां ध्वजिनां सवरूथिनां। रथानां मेघघोषाणां सहस्राणि दशैव तु।
रौप्यकाञ्चनकक्षाणां सहस्राण्येकविंशतिः। तावन्त्येव सहस्राणि कुञ्जराणां तथा दिशि।
आभूमिपालान् भोजान् स्वानामन्त्र्य किङ्किणीकिनः। आहुको ह्यप्यवन्तिभ्यः स्वसारं ददुरन्धकाः।
आहुकस्य तु काश्यायां द्वौ पुत्रौ सम्बभूवतुः। देवकश्चोग्रसेनश्च देवगर्भसमावुभौ।
देवकस्याभवन् पुत्राश्चत्वारस्त्रिदशोपमाः। देववानुपदेवश्च सुदेवो देवरक्षितः। २०२५
कुमार्य्यः सप्त चाप्यासन् वसुदेवाय ता ददौ। देवकी शान्तिदेवा च सुदेवा देवरक्षिता।
वृकदेव्युपदेवी च सुनाम्नी चैव सप्तमी। नवोग्रसेनस्य सुतास्तेषां कंसस्तु पूर्व्वजः।
न्यग्रोधश्च सुनामा च कङ्कः शङ्कुः सुभूमयः। राष्ट्रपालोऽथ सुतनुरनाधृष्टिस्तु पुष्टिमान्।
तेषां स्वसारः पञ्चासन् कंसा कंसवती तथा। सुतनू राष्ट्रपाली च कङ्का चैव वराङ्गना।
उग्रसेनः सहापत्यो व्याख्यातः कुकुरोद्भवः। कुकुराणामिमं वंशं धारयन्नमितौजसां। २०३०
आत्मनो विपुलं वंशं प्रजावानाप्नुयान्नरः।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

॥ वैशम्पायन उवाच ॥ भजमानस्य पुत्रोऽथ रथमुख्यो विदूरथः। राजाधिदेवः शूरस्तु विदूरथसुतोऽभवत्।
राजाधिदेवस्य सुता जज्ञिरे वीर्य्यवत्तराः। दत्तातिदत्तौ बलिनौ शोणाश्वः श्वेतवाहनः।
शमी च दत्तशर्म्मा च दत्तशत्रुश्च शत्रुजित्। श्रवणा च श्रविष्ठा च स्वसारौ सम्बभूवतुः।
शमीपुत्रः प्रतिक्षत्रः प्रतिक्षत्रस्य चात्मजः। स्वयं भोजः स्वयं भोजाद्धृदिकः सम्बभूव ह। २०३५
तस्य पुत्रा बभूवुर्हि सर्व्वे भीमपराक्रमाः। कृतवर्म्माऽग्रजस्तेषां शतधन्वा तु मध्यमः।
देवार्हश्चैव नाभश्च भिषग्वैतरणश्च यः। सुदन्तश्चातिदन्तश्च कामदा कामदन्तिका।
देववान् दत्तको नाम पुत्रः कम्बलबर्हिषः। असमौजाः सुतस्तस्य नासमौजाश्च तावुभौ।
अजातपुत्राय सुतान् प्रददावसमौजसे। सुदंष्ट्रश्च सुचारुश्च कृष्ण इत्यन्धकास्त्रयः।
गान्धारी चैव माद्री च क्रोष्टोर्भार्य्ये बभूवतुः। गान्धारी जनयामास अनमित्रं महाबलं। २०४०
माद्री युधाजितं पुत्रं ततो वै देवमीढुषं। अनमित्रममित्राणां जेतारमपराजितं।
अनमित्रसुतो निघ्नो निघ्नस्य द्वौ बभूवतुः। प्रसेनश्चाथ सत्राजिच्छत्रुसेनजितावुभौ।
प्रसेनो द्वारवत्यान्तु निवसन्त्या महामणिं। दिव्यं स्यमन्तकं नाम समुद्रादुपलब्धवान्।
तस्य सत्राजितः सूर्य्यः सखा प्राणसमोऽभवत्। स कदाचिन्निशापाये रथेन रथिनां वरः।
तोयं कूलमुपस्प्रष्टुमुपस्थातुं ययौ रविं। तस्योपतिष्ठतः सूर्य्यो विवस्वानग्रतः स्थितः। २०४५
अस्पष्टमूर्त्तिर्भगवांस्तेजोमण्डलवान् प्रभुः। अथ राजा विवस्वन्तमुवाच स्थितमग्रतः।
यथैव व्योम्नि पश्यामि सदा त्वां ज्योतिषां पते। तेजोमण्डलिनं देवं तथैव पुरतः स्थितं।
को विशेषोऽस्ति मे त्वत्तः सख्येनोपगतस्य वै। एतच्छ्रुत्वा च भगवान्मणिरत्नं स्यमन्तकं।

स्वकण्ठादवमुच्याथ एकान्ते न्यस्तवान् विभुः । ततो विग्रहवन्तं तं ददर्श नृपतिस्तदा ।
प्रीतिमानथ तं दृष्ट्वा मुहूर्त्तं कृतवान् कथां । तमभिप्रस्थितं भूयो विवस्वन्तं स सत्राजित् । २०५०
लोकान् भासयसे येन त्वं सततं प्रभो । तदेतन्मणिरत्नं मे भगवान् दातुमर्हसि ।
ततः स्यमन्तकमणिं दत्तवांस्तस्य भास्करः । स तमाबध्य नगरीं प्रविवेश महीपतिः ।
तं जनाः पर्य्यधावन्त सूर्य्योऽयं गच्छतीति च । स तां पुरीं च विस्माप्य राजा त्वन्तःपुरं तदा ।
तत् प्रसेनजिते दिव्यं मणिरत्नं स्यमन्तकं । ददौ भ्रात्रे नरपतिः प्रेम्णा सत्राजिदुत्तमं ।
स मणिः स्यन्दते रुक्मं वृष्ण्यन्धकनिवेशने । कालवर्षी च पर्ज्जन्यो न च व्याधिभयं ह्यभूत् । २०५५
लिप्सां चक्रे प्रसेनात्तु मणिरत्ने स्यमन्तके । गोविन्दो न च तं लेभे शक्तोऽपि न जहार सः ।
कदाचिन्मृगयां यातः प्रसेनस्तेन भूषितः । स्यमन्तककृते सिंहाद्वधं प्राप वनेचरात् ।
अथ सिंहं प्रधावन्तमृक्षराजो महाबलः । निहत्य मणिरत्नं तदादाय बिलमाविशत् ।
ततो वृष्ण्यन्धकाः कृष्णं प्रसेनवधकारणात् । प्रार्थनां तां मणेर्बुद्ध्वा सर्व्व एव शशङ्किरे ।
स शङ्क्यमानो धर्म्मात्मा नकारी तस्य कर्म्मणः । आहरिष्ये मणिमिति प्रतिज्ञाय वनं ययौ । २०६०
यत्र प्रसेनो मृगयामचरत्तत्र चाप्यथ । प्रसेनस्य पदं गृह्य पुरुषैराप्तकारिभिः ।
ऋक्षवन्तं गिरिवरं विन्ध्यञ्च गिरिमुत्तमं । अन्वेषयन् परिश्रान्तः स ददर्श महामनाः ।
साश्वं हतं प्रसेनन्तु नाविन्दत च तन्मणिं । अथ सिंहः प्रसेनस्य शरीरस्याविदूरतः ।
ऋक्षेण निहतो दृष्टः पदैर्ऋक्षस्य सूचितः । पदैस्तैरन्वियायाथ गुहामृक्षस्य माधवः ।
महत्यृक्षबिले वाणीं शुश्राव प्रमदेरितां । धात्र्या कुमारमादाय सुतं जाम्बवतो नृप । २०६५
क्रीडापयन्त्या मणिना मा रोदीरित्यथेरितां ।
॥ धात्र्युवाच ॥ सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः । सुकुमारक मा रोदीस्तव ह्येष स्यमन्तकः ।
व्यक्तीकृतश्च शब्दः स तूर्णञ्चापि बिलं ययौ । प्रविश्य तत्र भगवांस्तमृक्षबिलमञ्जसा ।
स्थापयित्वा बिलद्वारि यदून् लाङ्गलिना सह । शार्ङ्गधन्वा बिलस्थन्तु जाम्बवन्तं ददर्श ह ।
युयुधे वासुदेवस्तु बिले जाम्बवता सह । बाहुभ्यामेव गोविन्दो दिवसानेकविंशतिं । २०७०
प्रविष्टे तु बिलं कृष्णे वासुदेवपुरःसराः । पुरीं द्वारवतीमेत्य हतं कृष्णं न्यवेदयन् ।
वासुदेवस्तु निर्ज्जित्य जाम्बवन्तं महाबलं । लेभे जाम्बवतीं कन्यामृक्षराजस्य सम्मतां ।
मणिं स्यमन्तकञ्चैव जग्राहात्मविशुद्धये । अनुनीयर्क्षराजन्तु निर्ययौ च ततो बिलात् ।
उपायाद्द्वारकां कृष्णः स विना तैः पुरःसरैः । एवं स मणिमाहृत्य विशोध्यात्मानमच्युतः ।
ददौ सत्राजिते तं वै सर्व्वसात्वतसंसदि । एवं मिथ्याभिशप्तेन कृष्णेनामित्रघातिना । २०७५
आत्मा विशोधितः पापाद्विनिर्ज्जित्य स्यमन्तकं । सत्राजितो दश त्वासन् भार्य्यास्तासां शतं सुताः ।
ख्यातिमन्तस्त्रयस्तेषां भङ्गकारस्तु पूर्व्वजः । वीरो वातपतिश्चैव उपस्वापांस्तथैव च ।
कुमार्य्यश्चापि तिस्रो वै दिक्षु ख्याता नराधिप । सत्यभामोत्तमा तासां व्रतिनी च दृढव्रता ।

तथा प्रस्वापिनी चैव भार्य्याः कृष्णाय ता ददौ । सभाक्षो भङ्गकारस्तु नारेयश्च नरोत्तमौ ।
जज्ञाते गुणसम्पन्नौ विश्रुतौ रूपसम्पदा । माद्र्याः पुत्रस्तु जज्ञेऽथ पृश्निः पुत्रो युधाजितः । १०८०
जज्ञाते तनयौ पृश्नेः श्वफल्कश्चित्रकस्तथा । श्वफल्कः काशिराजस्य सुतां भार्य्यामविन्दत ।
गान्दिनीनाम तस्याथ गाः सदा प्रददौ पिता । तस्यां जज्ञे महाबाहुः श्रुतवानिति विश्रुतः ।
अक्रूरोऽथ महाभागो यज्वा विपुलदक्षिणः । उपमद्गुस्तथा मद्गुर्मुदरश्चारिमर्द्दनः ।
गिरिक्षिपस्तथोपेक्षः शत्रुघ्नो चारिमेजयः । धर्म्मभृच्चापि धर्म्मा च गृध्रमोजान्धकस्तथा ।
आवाहप्रतिवाहौ च सुन्दरी च वराङ्गना । विश्रुता शाम्बमहिषी कन्या चास्य वसुन्धरा । १०८५
रूपयौवनसम्पन्ना सर्व्वसत्त्वमनोहरा । अक्रूरेणोग्रसेन्यान्तु सुतौ द्वौ कुरुनन्दन ।
सुदेवश्चोपदेवश्च जज्ञाते देववर्चसौ । चित्रकस्याभवन् पुत्राः पृथुर्विपृथुरेव च ।
अश्वसेनोऽश्वबाहुश्च सुपार्श्वकगवेषणौ । अरिष्टनेमेस्तु सुता धर्म्माधर्म्मभृदेव च ।
सुबाहुर्बहुबाहुश्च श्रविष्ठाश्रवणे स्त्रियौ । इमां मिथ्याभिशस्तिं यः कृष्णस्य समुदाहृतां ।
वेद मिथ्याभिशापास्तं न स्पृशन्ति कदाचन । १०९०
इति श्री महाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि ऊनचत्वारिंशोऽध्यायः ॥ ३९ ॥
॥ वैशम्पायन उवाच ॥ यत्नात् सत्राजिते कृष्णो मणिरत्नं स्यमन्तकं । अदात्तद्धारयामास बभ्रवे शतधन्वना ।
सदा हि प्रार्थयामास सत्यभामामनिन्दितां । अक्रूरोऽन्तरमन्विच्छन्मणिश्चैव स्यमन्तकं ।
सत्राजितं ततो हत्वा शतधन्वा महाबलः । रात्रौ तं मणिमादाय ततोऽक्रूराय दत्तवान् ।
अक्रूरस्तु तदा रत्नमादाय भरतर्षभ । समयं कारयाञ्चक्रे नावेद्योऽहं त्वयेत्युत ।
वयमभ्युपगच्छामः कृष्णेन त्वां प्रधर्षितं । ममाद्य द्वारका सर्व्वा वशे तिष्ठत्यसंशयं । १०९५
हते पितरि दुःखार्त्ता सत्यभामा मनस्विनी । प्रययौ रथमारुह्य नगरं वारणावतं ।
सत्यभामा तु तद्वृत्तं भोजस्य शतधन्वनः । भर्त्तुर्निवेद्य दुःखार्त्ता पार्श्वस्थाऽश्रूण्यवर्त्तयत् ।
पाण्डवानान्तु दग्धानां हरिः कृत्वोदकक्रियां । कुल्यार्थे चापि पाण्डूनां न्ययोजयत सात्यकिं ।
ततस्त्वरितमागम्य द्वारकां मधुसूदनः । पूर्व्वजं हलिनं श्रीमानिदं वचनमब्रवीत् ।
हतः प्रसेनः सिंहेन सत्राजिच्छतधन्वना । स्यमन्तकः स मद्गामी तस्य प्रभुरहं विभो । ११००
तदारोह रथं शीघ्रं भोजं हत्वा महारथं । स्यमन्तको महाबाहो अस्माकं स भविष्यति ।
ततः प्रववृते युद्धं तुमुलं भोजकृष्णयोः । शतधन्वा ततोऽक्रूरं सर्व्वतो दिशमैक्षत ।
संरब्धौ तावुभौ दृष्ट्वा तत्र भोजजनार्द्दनौ । शक्तोऽपि शाठ्याद्धार्द्दिक्यमक्रूरो नाभ्यपद्यत ।
अपयाने ततो बुद्धिं भोजश्चक्रे भयार्द्दितः । योजनानां शतं साग्रं वडवा प्रत्यपद्यत ।
विख्याता हृदया नाम शतयोजनगामिनी । भोजस्य वडवा राजन् यया कृष्णमयोधयत् । ११०५
क्षीणां जवेन हृदयामध्वनः शतयोजने । दृष्ट्वा रथस्य स्वां वृद्धिं शतधन्वानमार्द्दयत् ।
ततस्तस्या हयायास्तु श्रमात् खेदाच्च भारत । खमुत्पेतुरथ प्राणाः कृष्णो राममथाब्रवीत् ।

तिष्ठेह त्वं महाबाहो दृढदोषा हया मम। पद्भ्यां गत्वा हरिष्यामि मणिरत्नं महाबल।
पद्भ्यामेव ततो गत्वा शतधन्वानमच्युतः। मिथिलामभितो राजन् जघान परमास्त्रवित्।
स्यमन्तकञ्च नापश्यद्धत्वा भोजं महाबलं। निवृत्तञ्चाब्रवीत् कृष्णं रत्नं देहीति लाङ्गली। २११०
नास्तीति कृष्णः प्रोवाच ततो रामो रुषान्वितः। धिक्शब्दपूर्व्वमसकृत् प्रत्युवाच जनार्द्दनं
भ्रातृत्वान्मर्षयाम्येष स्वस्ति तेऽस्तु व्रजाम्यहं। कृत्यं न मे द्वारकया न त्वया न च वृष्णिभिः।
प्रविवेश ततो रामो मिथिलामरिमर्द्दनः। सर्व्वकामैरुपहृतैर्मैथिलेनाभिपूजितः।
एतस्मिन्नेव काले तु बभ्रुर्मतिमतांवरः। नानारूपान् क्रतून् सर्व्वानाजहार निरर्गलान्।
दीक्षामयं स कवचं रक्षार्थं प्रविवेश ह। स्यमन्तककृते प्राज्ञो गान्दीपुत्रो महायशाः। २११५
अथ रत्नानि चान्यानि धनानि विविधानि च। षष्टिं वर्षाणि धर्म्मात्मा यज्ञेष्वेव न्ययोजयत्।
अक्रूरयज्ञा इति ते ख्यातास्तस्य महात्मनः। बह्वन्नदक्षिणाः सर्व्वे सर्व्वकामप्रदायिनः।
अथ दुर्य्योधनो राजा गत्वा स मिथिलां प्रभुः। गदाशिक्षां ततो दिव्यां बलभद्रादवाप्तवान्।
प्रसाद्य तु तदा रामो वृष्ण्यन्धकमहारथैः। आनीतो द्वारकामेव कृष्णेन च महात्मना।
अक्रूरस्त्वन्धकैः सार्द्धमपायात् पुरुषर्षभ। हत्वा सत्राजितं युद्धे सहबन्धुं महाबलं। २१२०
ज्ञातिभेदभयात् कृष्णस्तमुपेक्षितवांस्तदा। अपयाते तथाऽक्रूरे नावर्षत् पाकशासनः।
अनावृष्ट्या तदा राष्ट्रमभवत् बहुधा कृशं। ततः प्रसादयामासुरक्रूरं कुकुरान्धकाः।
पुनर्द्वारवतीं प्राप्ते तस्मिन्दानपतौ ततः। प्रववर्ष सहस्राक्षः कच्छे जलनिधेस्ततः।
कन्याञ्च वासुदेवाय स्वसारं शीलसम्मतां। अक्रूरः प्रददौ धीमान् प्रीत्यर्थं कुरुनन्दन।
अथ विज्ञाय योगेन कृष्णो बभ्रुगतं मणिं। सभामध्यगतं प्राह तमक्रूरं जनार्द्दनः। २१२५
यत्तद्रत्नं मणिवरं तव हस्तगतं विभो। तत् प्रयच्छस्व मानार्ह मयि मानार्य्यकं कृथाः।
षष्टिवर्षगते काले यद्रोषोऽभून्ममानघ। स संरूढोऽसकृत् प्राप्तस्तदा कालात्ययो महान्।
स ततः कृष्णवचनात् सर्व्वसात्वतसंसदि। प्रददौ तन्मणिं बभ्रुरक्लेशेन महामतिः।
ततस्तमार्जवप्राप्तं बभ्रोर्हस्तादरिन्दमः। ददौ हृष्टमनाः कृष्णस्तं मणिं बभ्रवे पुनः।
स कृष्णहस्तात् संप्राप्य मणिरत्नं स्यमन्तकं। आबध्य गान्दिनीपुत्रो विरराजांशुमानिव। २१३०
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि चत्वारिंशत्तमोऽध्यायः॥ ४०॥
॥ जनमेजय उवाच॥ प्रादुर्भावं पुराणेषु विष्णोरमिततेजसः। सतां कथयतामेव वाराह इति नः श्रुतं।
न जाने तस्य चरितं न विधिं न च विस्तरं। न कर्म्मगुणसन्तानं न हेतुं न मनीषितं।
किमात्मको वराहः स का मूर्त्तिः का च देवता। किमाचारप्रभावो वा किं वा तेन तदा कृतं।
यज्ञार्थं समवेतानां मिषताञ्च द्विजन्मनां। महावराहचरितं कृष्णद्वैपायनेरितं।
यत्र नारायणो ब्रह्मन् वराहरूपमास्थितः। दंष्ट्रया गां समुद्रस्थामुज्जहारारिसूदनः। २१३५
विस्तरेणैव कर्म्माणि सर्व्वाणि रिपुघातिनः। श्रोतुमिच्छाम्यशेषेण हरेः कृष्णस्य धीमतः।

कर्म्मणामानुपूर्व्व्या च प्रादुर्भावाश्च ये विभोः । याश्चास्य प्रकृतिर्माद्यो ताश्च व्याख्यातुमर्हसि ।
कथञ्च भगवान् विष्णुः सुरेशो रिपुसूदनः । वसुदेवकुले धीमान् वासुदेवत्वमागतः ।
अमरैरावृतं पुण्यं पुण्यकृद्भिरलङ्कृतं । देवलोकं समुत्सृज्य मर्त्यलोकमिहागतः ।
देवमानुषयोर्नेता भूर्भुवःप्रभवो विभुः । किमर्थं दिव्यमात्मानं मानुषे संन्ययोजयत् । १२४०
यश्चक्रं वर्त्तयत्येको मानुषाणामनामयं । मानुष्ये स कथं बुद्धिं चक्रे चक्रभृतांवरः ।
गोपायनं यः कुरुते जगतः सार्व्वलौकिकं । स कथं गां गतो विष्णुर्गोपत्वमगमत् प्रभुः ।
महाभूतानि भूतात्मा यो दधार चकार च । श्रीगर्भः स कथं गर्भे स्त्रिया भूचरया धृतः ।
येन लोकान् क्रमैर्ज्जित्वा त्रिभिस्त्रींस्त्रिदशेप्सया । स्थापिता जगतो मार्गास्त्रिवर्गप्रभवास्त्रयः ।
योऽन्तकाले जगत् पीत्वा कृत्वा तोयमयं वपुः । लोकमेकार्णवं चक्रे दृश्यादृश्येन वर्त्मना । २१४५
यः पुराणे पुराणात्मा वाराहं रूपमास्थितः । विषाणाग्रेण वसुधामुज्जहारारिसूदनः ।
यः पुरा पुरुहूतार्थे त्रैलोक्यमिदमव्ययं । ददौ जित्वा वसुमतीं सुराणां सुरसत्तमः ।
येन सैंहं वपुः कृत्वा द्विधा कृत्वा च तत् पुनः । पूर्व्वदैत्यो महावीर्य्यो हिरण्यकशिपुर्हतः ।
यः पुरा ह्यनलो भूत्वा ओर्व्वः संवर्त्तको विभुः । पातालस्थोऽर्णवगतं पपौ तोयमयं हविः ।
सहस्रशिरसं यन्नाम सहस्राक्षं सहस्रदं । सहस्रचरणं देवं यमाहुर्व्वै युगे युगे । २१५०
नाभ्यारण्यां समुत्पन्नं यस्य पैतामहं गृहं । एकार्णवगते काले तत्पङ्कजमपङ्कजं ।
येन ते निहता दैत्याः संग्रामे तारकामये । सर्व्वदेवमयं कृत्वा सर्व्वायुधधरं वपुः ।
गरुडस्थेन चोत्सिक्तः कालनेमिर्निपातितः । निर्ज्जितश्च महादैत्यस्तारकश्च महासुरः ।
उत्तरान्ते समुद्रस्य क्षीरोदस्यामृतोदधेः । यः शेते शाश्वतं योगमास्थाय तिमिरं महत् ।
सुरारणी गर्भमधत्त दिव्यं तपःप्रकर्षाददितिः पुरा यं । शक्रञ्च यो दैत्यगणावरुद्धं गर्भावधानेन कृतं चकार । २१५५
पदानि यो लोकमयानि कृत्वा चकार दैत्यान् सलिलाशयस्थान् । कृत्वा च देवांस्त्रिदिवस्य देवांश्चक्रे सुरेशं त्रिदशाधिपत्ये ।
पात्राणि दक्षिणां दीक्षां चमसोलूखलानि च । गार्हपत्यञ्च विधिना अन्वाहार्य्यञ्च कर्म्मणां ।
अग्निमाहवनीयञ्च वेदीञ्चैव कुशं स्रुवं । प्रोक्षणीयं ध्रुवञ्चैव आवभृथ्यं तथैव च ।
आवांस्त्रीणि च यश्चक्रे हव्यकव्यप्रदान्मखे । हव्यादांश्च सुरांश्चक्रे कव्यादांश्च पितॄनपि ।
भागार्थे मन्त्रविधिना यश्चक्रे यज्ञकर्म्मणि । यूपान् समित् स्रुवं सोममाद्रांश्च समिधस्तथा । २१६०
यज्ञियानि च द्रव्याणि यज्ञांश्च सचयानलान् । सदस्यान् यजमानांश्च मेधादींश्च क्रतूत्तमान् ।
विबभाज पुरा सर्व्वं पारमेष्ठ्येन कर्म्मणा । युगानुरूपं यः कृत्वा लोकाननुपरिक्रमात् ।
क्षणा लवाश्च काष्ठाश्च कलास्त्रैकाल्यमेव च । मुहूर्त्तास्तिथयो मासाः पक्षाः संवत्सरास्तथा ।
ऋतवः कालयोगाश्च प्रमाणं त्रिविधं त्रिषु । आयुः क्षेत्राण्युपचयो लक्षणं रूपसौष्ठवं ।
त्रयो वर्णास्त्रयो लोकास्त्रैविद्यं पावकास्त्रयः । त्रैकाल्यं त्रीणि कर्म्माणि त्रयोऽपायास्त्रयो गुणाः । २१६५
सृष्टा लोकास्त्रयोऽनन्ता येनानन्येन वर्त्मना । सर्व्वभूतगणाः सृष्टाः सर्व्वभूतगुणात्मकाः ।

नृणामिन्द्रियपूर्व्वेण योगेन रमते च यः । सतामसताञ्च यो नेता धर्म्मेण जगतीश्वरः ।
यो गतिर्द्धर्म्मयुक्तानामगतिः पापकर्म्मणां । चातुर्वर्ण्यस्य प्रभवश्चातुर्वर्ण्यस्य रक्षिता ।
चातुर्विद्यस्य यो वेत्ता चातुराश्रम्यसंश्रयः । दिगन्तरो नभो भूमिरापो वायुर्विभावसुः ।
चन्द्रसूर्य्यद्वयोर्ज्योतिर्योगीशः क्षणदान्तकः । यः परं श्रूयते ज्योतिर्यः परं श्रूयते तपः । ११७०
यः परं प्राक्परं यः परः परमात्मनः । नारायणपरा वेदा नारायणपराः क्रियाः ।
नारायणपरो धर्म्मो नारायणपरा गतिः । नारायणपरं सत्यं नारायणपरं तपः ।
नारायणपरो मोक्षो नारायणपरं पदं । आदित्यादिश्च यो दिव्यो यश्च दैत्यान्तको विभुः ।
युगान्तेष्वन्तको यश्च यश्च लोकान्तकान्तकः । सेतुर्यो लोकसेतूनां मेध्यो यो मेध्यकर्म्मणां ।
वेद्यो यो वेदविदुषां यः प्रभुः प्रभवात्मनां । सोमभूतस्तु सौम्यानामग्निभूतोऽग्निवर्च्चसां । ११७५
मनुष्याणां मनोभूतस्तपोभूतस्तपस्विनां । विनयो नयवृत्तानां तेजस्तेजस्विनामपि ।
सर्गाणां सर्गकारश्च लोकहेतुरनुत्तमः । विग्रहो विग्रहार्हाणां गतिर्गतिमतामपि ।
आकाशप्रभवो वायुर्व्वायुप्राणो हुताशनः । देवा हुताशनप्राणाः प्राणोऽग्नेर्मधुसूदनः ।
रसाद्वै शोणितं जातं शोणितान्मांसमुच्यते । मांसात्तु मेदसो जन्म मेदसोऽस्थि निरुच्यते ।
अस्थ्नो मज्जा समभवन्मज्ज्ञातः शुक्रसम्भवः । शुक्राद्गर्भः समभवद्रसमूलेन कर्म्मणा । ११८०
तत्रापः प्रथमो भागः स सौम्यो राशिरुच्यते । गर्भोष्मसम्भवोऽग्निर्यो द्वितीयो राशिरुच्यते ।
शुक्रं सोमात्मकं विद्यादार्त्तवं पावकात्मकं । भावौ रसानुगावेतौ वीर्य्यञ्च शशिपावकौ ।
कफवर्गेऽभवच्छुक्रं पित्तवर्गे च शोणितं । कफस्य हृदयं स्थानं पित्तं नाभ्यां प्रतिष्ठितं ।
देहस्य मध्ये हृदयं स्थानं तन्मनसः स्मृतं । नाभीकोष्ठान्तरं यत्तु तत्र देवो हुताशनः ।
मनः प्रजापतिर्ज्ञेयः कफः सोमो विभाव्यते । पित्तमग्निः स्मृतो ह्येवमग्नीषोमात्मकं जगत् । ११८५
एवं प्रवर्त्तिते गर्भे वर्द्धितेऽर्व्वुदसन्निभे । वायुः प्रवेशनं चक्रे सङ्गतः परमात्मना ।
ततोऽङ्गानि विसृजति बिभर्त्ति परिवर्त्तयन् । स पञ्चधा शरीरस्थो भिद्यते वर्द्धयन् पुनः ।
प्राणोऽपानः समानश्च उदानो व्यान एव च । प्राणोऽस्य प्रथमं स्थानं वर्द्धयन् परिवर्त्तते ।
अपानः पश्चिमं कायमुदानोर्द्ध्वं शरीरिणः । व्यानो व्यायच्छते येन समानः सन्निवर्त्तते ।
भूतावाप्तिस्ततस्तस्य जायतेन्द्रियगोचरा । पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमं । ११९०
तस्येन्द्रियनिविष्टानि स्वं स्वं योगं प्रचक्रिरे । पार्थिवं देहमाहुस्तु प्राणात्मानञ्च मारुतं ।
छिद्राण्याकाशयोनीनि जलात् स्रावः प्रवर्त्तते । ज्योतिश्चक्षुस्तेज आत्मा तेषां यन्तृ मनः स्मृतं ।
ग्रामाश्च विषयाश्चैव यस्य वीर्य्यात् प्रवर्त्तिताः । इत्येतान् पुरुषः सर्व्वान् सृजन् लोकान् सनातनान् ।
नैधनेऽस्मिन् कथं लोके नरत्वं विष्णुरागतः । एष मे संशयो ब्रह्मन्नेष मे विस्मयो महान् ।
कथं गतिर्गतिमतां प्राप्तो मानुषतां ननु । श्रुतो मे स्वस्य वंशस्य सर्व्वेषाञ्चैव सम्भवः । ११९५
श्रोतुमिच्छामि विष्णोस्तु वृष्णीनाञ्च यथाक्रमं । आश्चर्य्यं परमं विष्णुर्देवैर्दैत्यैश्च कथ्यते ।

विष्णोरुत्पत्तिमाश्चर्य्यं समाचक्ष्व महामुने । एतदाश्चर्य्यमाख्यानं कथयस्व सुखावहं ।
प्रख्यातबलवीर्य्यस्य विष्णोरमिततेजसः । कर्म्मणाश्चर्य्यभूतस्य विष्णोस्तत्त्वमिहोच्यतां ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि एकचत्वारिंशोऽध्यायः ॥ ४१ ॥
॥ वैशम्पायन उवाच ॥ प्रश्नभारो महांस्तात त्वयोक्तः शार्ङ्गधन्वनि । यथाशक्ति प्रवक्ष्यामि श्रूयतां वैष्णवं यशः ।
विष्णोः प्रभावश्रवणे दिष्ट्या ते मतिरुत्थिता । हन्त विष्णोः प्रवृत्तिं त्वं शृणु दिव्यां मयेरितां । ११००
सहस्रास्यं सहस्राक्षं सहस्रचरणञ्च यं । सहस्रशिरसं देवं सहस्रकरमव्ययं ।
सहस्रजिह्वं भास्वन्तं सहस्रमुकुटं प्रभुं । सहस्रदं सहस्रादिं सहस्रभुजमव्ययं ।
हवनं सवनञ्चैव हव्यं होतारमेव च । पात्राणि च पवित्राणि वेदीं दीक्षां चरुं स्रुवं ।
स्रुक्सोमसूर्पमुषलं प्रोक्षणीं दक्षिणायनं । अध्वर्य्युं सामगं विप्रं सदस्यं सदनं तथा ।
यूपं समित्कुशं दर्व्वीं चमसोलूखलानि च । प्राग्वंशं यज्ञभूमिञ्च होतारं चयनञ्च यत् । ११०५
ह्रस्वानि प्रमाणानि चराणि स्थावराणि च । प्रायश्चित्तानि चार्घ्यञ्च स्थण्डिलानि कुशांस्तथा ।
मन्त्रं यज्ञवहं वह्निं भागं भागवहञ्च यत् । अग्रेभुजं सोमभुजं हुतार्च्चिषमुदायुधं ।
आहुर्वेदविदो विप्रा यं यज्ञे शाश्वतं विभुं । तस्य विष्णोः सुरेशस्य श्रीवत्साङ्कस्य धीमतः ।
प्रादुर्भावसहस्राणि समतीतान्यनेकशः । भूयश्चैव भविष्यन्तीत्येवमाह प्रजापतिः ।
यत् पृच्छसि महाराज पुण्यां दिव्यां कथां शुभां । यदर्थं भगवान् विष्णुर्वसुदेवकुलेऽभवत् । १११०
तत्तेऽहं सम्प्रवक्ष्यामि शृणु सर्व्वमशेषतः । वासुदेवस्य माहात्म्यं चरितञ्च महाद्युतेः ।
हितार्थं सुरमर्त्यानां लोकानां प्रभवाय च । बहुशः सर्व्वभूतात्मा प्रादुर्भवति कार्य्यतः ।
प्रादुर्भावांश्च वक्ष्यामि पुण्यान्दिव्यान् गुणैर्युतान् । शुचिः प्रयतवान् भूत्वा निबोध जनमेजय ।
इदं पुराणं परमं पुण्यं वेदैश्च सम्मितं । हन्त ते कथयिष्यामि विष्णोर्दिव्यां कथां शृणु ।
यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत । धर्म्मसंस्थापनार्थाय तदा सम्भवति प्रभुः । १११५
तस्यैका महाराज मूर्त्तिर्भवति सत्तमा । नित्यं दिविष्ठा या राजंस्तपश्चरति दुश्चरं ।
द्वितीया चास्य शयने निद्रायोगमुपाययौ । प्रजासंहारसर्गार्थं किमध्यात्मविचिन्तकं ।
सुप्ता युगसहस्रं यः प्रादुर्भवति कार्य्यतः । पूर्णे वर्षसहस्रे तु देवदेवो जगत्प्रभुः ।
पितामहो लोकपालाश्चन्द्रादित्यौ हुताशनः । ब्रह्मा च कपिलश्चैव परमेष्ठी तथैव च ।
देवाः सप्तर्षयश्चैव त्र्यम्बकश्च महायशाः । वायुः समुद्राः शैलाश्च तस्य देहे समाश्रिताः । ११२०
सनत्कुमारश्च महानुभावो मनुर्म्महात्मा भगवान् प्रजाकरः । पुराणदेवोऽथ पुराणि चक्रे प्रदीप्तवैश्वानरतुल्यतेजाः ।
येन चार्णवमध्यस्था नष्टे स्थावरजङ्गमे । नष्टे देवासुरगणे प्रनष्टोरगराक्षसे ।
योद्धुकामौ दुराधर्षौ दानवौ मधुकैटभौ । हतौ प्रभवता तेन तयोर्दत्त्वामितं वरं ।
पुरा कमलनाभस्य स्वपतः सागराम्भसि । पुष्करे यस्य सम्भूता देवाः सर्षिगणाः पुरा ।
यत्र पौष्करो नाम प्रादुर्भावो महात्मनः । पुराणं कथ्यते यत्र वेदश्रुतिसमाहितं । ११२५

वराहस्तु श्रुतिमुखः प्रादुर्भावो महात्मनः । यत्र विष्णुः सुरश्रेष्ठो वाराहं रूपमास्थितः ।
महीं सागरपर्य्यन्तां सशैलवनकाननां । वेदपादो यूपदंष्ट्रः क्रतुदन्तश्चितीमुखः ।
अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः । अहोरात्रेक्षणोदिव्यो वेदाङ्गश्रुतिभूषणः ।
आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान् । धर्म्मसत्यमयः श्रीमान् कर्म्मविक्रमसत्क्रियः ।
प्रायश्चित्तनखो घोरः पशुजानुर्म्महाभुजः । उद्गात्रन्त्रो होमलिङ्गः फलबीजमहौषधिः । २२२०
वाय्वन्तरात्मा वेदस्फिग्विकृतः सोमशोणितः । वेदीस्कन्धो हविर्गन्धो हव्यकव्यातिवेगवान् ।
प्राग्वंशकायो द्युतिमान्नानादीक्षाभिरर्चितः । दक्षिणाहृदयो योगी महासत्रमयो महान् ।
उपाकर्म्मोष्ठरुचकः प्रवर्ग्यावर्त्तभूषणः । नानाच्छन्दोगतिपथो गुह्योपनिषदासनः ।
छायापत्नीसहायो वै मेरुशृङ्ग इवोच्छ्रितः । महीं सागरपर्य्यन्तां सशैलवनकाननां ।
एकार्णवजले मग्नामेकार्णवगतः प्रभुः । दंष्ट्रया मां समुद्धृत्य लोकानां हितकाम्यया । २२२५
सहस्रशीर्षो लोकादिश्चकार पृथिवीं पुनः । एवं यज्ञवराहेण भूत्वा भूतहितार्थिना ।
उद्धृता पृथिवी देवी सागराम्बुधरा पुरा । वाराह एष कथितो नारसिंहमतः शृणु ।
यत्र भूत्वा मृगेन्द्रेण हिरण्यकशिपुर्हतः । पुरा कृतयुगे राजन् सुरारिर्बलदर्पितः ।
दैत्यानामादिपुरुषश्चकार तप उत्तमं । दशवर्षसहस्राणि दशवर्षशतानि च ।
जलोपवासनिरतः स्थानमौनदृढव्रतः । ततः शमदमाभ्याञ्च ब्रह्मचर्य्येण चानघ । २२३०
ब्रह्मा प्रीतमनास्तस्य तपसा नियमेन च । तं वै स्वयम्भूर्भगवान् स्वयमागम्य भूपते ।
विमानेनार्कवर्णेन हंसयुक्तेन भास्वता । आदित्यैर्वसुभिः साध्यैर्मरुद्भिर्दैवतैः सह ।
रुद्रैर्विश्वसहायैश्च यक्षराक्षसकिन्नरैः । दिशाभिर्विदिशाभिश्च नदीभिः सागरैस्तथा ।
नक्षत्रैश्च मुहूर्त्तैश्च खेचरैश्च महाग्रहैः । देवर्षिभिस्तपोवृद्धैः सिद्धैः सप्तर्षिभिस्तथा ।
राजर्षिभिः पुण्यतमैर्गन्धर्व्वैरप्सरोगणैः । चराचरगुरुः श्रीमान् वृतः सर्व्वैः सुरैस्तथा । २२३५
ब्रह्मा वेदविदां श्रेष्ठो दैत्यं वचनमब्रवीत् । प्रीतोऽस्मि तव भक्तस्य तपसानेन सुव्रत ।
वरं वरय भद्रं ते यथेष्टं काममाप्नुहि ।
॥ हिरण्यकशिपुरुवाच ॥ न देवासुरगन्धर्व्वा न यक्षोरगराक्षसाः । न मानुषाः पिशाचा वा हन्युर्मां देवसत्तम ।
ऋषयो वा न मां शापैः क्रुद्धा लोकपितामह । शपेयुस्तपसा युक्ता वरमेवं वृणोम्यहं ।
न शस्त्रेण न चास्त्रेण गिरिणा पादपेन वा । न शुष्केण न चार्द्रेण स्यान्न चान्येन मे वधः । २२४०
पाणिप्रहारेणैकेन सभृत्यबलवाहनं । यो मां नाशयितुं शक्तः स मे मृत्युर्न संशयः ।
भवेयमहमेवार्कः सोमो वायुर्हुताशनः । सलिलञ्चान्तरीक्षञ्च नक्षत्राणि दिशो दश ।
अहं क्रोधश्च कामश्च वरुणो वासवो यमः । धनदश्च धनाध्यक्षो यक्षः किंपुरुषाधिपः ।
॥ ब्रह्मोवाच ॥ एते दिव्या वरास्तात मया दत्तास्तवाद्भुताः । सर्व्वान् कामानिमांस्तात प्राप्स्यसि त्वं न संशयः ।
एवमुक्त्वा तु भगवान् जगामाकाशमेव तु । वैराजं ब्रह्मसदनं ब्रह्मर्षिगणसेवितं । २२४५

श्रुत्वा चैव वरं तस्य दत्तं कमलयोनिना । ततो देवाश्च नागाश्च गन्धर्व्वा मुनयस्तथा ।
वरप्रदानं श्रुत्वैव पितामहमुपस्थिताः । विभुं विज्ञापयामासुर्द्देवा इन्द्रपुरोगमाः ।
॥ देवा ऊचुः ॥ वरेणानेन भगवन् बाधिष्यति स नोऽसुरः । तत् प्रसीदस्व भगवन् बधोऽप्यस्य विचिन्त्यताम् ।
भगवन् सर्व्वभूतानां स्वयम्भूरादिकृद्विभुः । स्रष्टा च हव्यकव्यानामव्यक्तप्रकृतिर्ध्रुवः ।
ततो लोकहितं वाक्यं श्रुत्वा देवः प्रजापतिः । प्रोवाच भगवान् वाक्यं सर्व्वान्देवगणांस्तदा । २२६०
॥ ब्रह्मोवाच ॥ अवश्यं त्रिदशास्तेन प्राप्तव्यं तपसः फलं । तपसोऽन्तेऽस्य भगवान् बधं विष्णुः करिष्यति ।
एतच्छ्रुत्वा सुराः सर्व्वे वाक्यं पङ्कजजन्मनः । स्वानि स्थानानि दिव्यानि जग्मुस्ते वै मुदायुताः ।
लब्धमात्रे वरे चापि सर्व्वाः सोऽबाधत प्रजाः । हिरण्यकशिपुर्दैत्यो वरदानेन दर्पितः ।
आश्रमेषु महाभागान् मुनीन् वै संशितव्रतान् । सत्यधर्म्मरतान्दान्तान् पुरा धर्षितवांस्तु सः ।
देवांस्त्रिभुवनस्थांश्च पराजित्य महाबलः । त्रैलोक्यं वशमानीय स्वर्गेऽवसदथासुरः । २२६५
यदा वरमदोन्मत्तो न्यवसद्दानवो दिवि । यज्ञियान् कृतवान् दैत्यान् देवांश्चैवाप्ययज्ञियान् ।
आदित्याश्च तथा रुद्रा विश्वे च वसवस्तथा । शरण्यं शरणं विष्णुमुपतस्थुर्म्महाबलं ।
वेदयज्ञमयं ब्रह्म ब्रह्मदेवं सनातनं । भूतं भव्यं भविष्यञ्च प्रभुं लोकनमस्कृतं ।
नारायणं विभुं देवं शरण्यं शरणं गताः ।
॥ देवा ऊचुः ॥ त्रायस्व नोऽद्य देवेश हिरण्यकशिपोर्भयात् । त्वं हि नः परमो देवस्त्वं हि नः परमो गुरुः । २२७०
त्वं हि नः परमो धाता ब्रह्मादीनां सुरेश्वर । उत्फुल्लाम्बुजपत्राक्ष शत्रुपक्षक्षयावह ।
क्षयाय दितिवंशस्य शरणं त्वं भवाद्य नः ।
॥ विष्णुरुवाच ॥ भयं त्यजध्वममरा अभयं वो ददाम्यहं । तथैव त्रिदिवं देवाः प्रतिपत्स्यथ मा चिरं ।
एष त्वं सगणं दैत्यं वरदानेन दर्पितं । अवध्यममरेन्द्राणां दानवेन्द्रं निहन्म्यहं ।
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा स भगवान् विसृज्य त्रिदशेश्वरान् । सभां हिरण्यकशिपोर्ज्जगाम हरिरीश्वरः । २२७५
नरस्य कृत्वार्द्धतनुं सिंहस्यार्द्धतनुं तथा । नारसिंहेन वपुषा पाणिं संस्पृश्य पाणिना ।
जीमूतघनसङ्काशो जीमूतघननिस्वनः । जीमूतघनदीप्तौजा जीमूत इव वेगवान् ।
दैत्यं सोऽतिबलं दृप्तं दृप्तशार्द्दूलविक्रमं । दृप्तैर्द्दैत्यगणैर्गुप्तं हतवानेकपाणिना ।
नृसिंह एष कथितो भूयोऽयं वामनोऽपरः । यत्र वामनमाश्रित्य रूपं दैत्यविनाशनं ।
बलेर्ब्बलवतो यज्ञे बलिना विष्णुना पुरा । विक्रमैस्त्रिभिरक्षोभ्याः क्षोभितास्ते महासुराः । २२८०
विप्रचित्तिः शिविः शङ्कुरयःशङ्कुस्तथैव च । अयःशिरा अश्वशिरा हयग्रीवश्च वीर्य्यवान् ।
वेगवान् केतुमानुग्रः सोग्रव्यग्रो महासुरः । पुष्करः पुष्कलश्चैव साश्वाश्वपतिरेव च ।
प्रह्लादोऽश्वशिराः कुम्भः संह्रादो गगनप्रियः । अनुह्रादो हरिहरौ वराहः संहरो रुजः ।
शरभः शलभश्चैव कुपनः कोपनः क्रथः । बृहत्कीर्त्तिर्म्महाजिह्वः शङ्कुकर्णो महास्वनः ।
दीर्घजिह्वोऽर्कनयनो मृदुचापो मृदुप्रियः । वायुर्गविष्ठो नमुचिः शम्बरो विचरो महान् । २२८५

चन्द्रहन्ता क्रोधहन्ता क्रोधवर्द्धन एव च । कालकः कालकेयश्च वृत्रः क्रोधी विरोचनः ।
गविष्ठश्च वरिष्ठश्च प्रलम्बनरकावुभौ । इन्द्रतापनवातापी केतुमान् बलदर्पितः ।
असिलोमा पुलोमा च बाष्कलः प्रमदो मदः । खसमः शालवदनः करालः कौशिकः शरः ।
एकाक्षश्चन्द्रहा राहुः संह्रादो महदुस्वनः । शतघ्नीचक्रहस्ताश्च तथा परिघपाणयः ।
अश्मयन्त्रायुधोपेता भिन्दिपालायुधास्तथा । शूलोलूखलहस्ताश्च परश्वधधरास्तथा ।
पाशमुद्गरहस्ताश्च तथा मुषलपाणयः । महाशिलाप्रहरणाः शूलहस्ताश्च दानवाः ।
नानाप्रहरणा घोरा नानावेशा महाजवाः । कूर्म्मकुक्कुटवक्त्राश्च काकोलूकमुखास्तथा ।
खरोष्ट्रवदनाश्चैव वराहवदनास्तथा । भीमा मकरवक्त्राश्च क्रोष्टुवक्त्राश्च दानवाः ।
आखुदर्दुरवक्त्राश्च घोरा वृकमुखास्तथा । मार्ज्जारशशवक्त्राश्च महावक्त्रास्तथापरे ।
नक्रमेषाननाः शूरा गोजाविमहिषाननाः । गोधाशल्लकवक्त्राश्च क्रौञ्चवक्त्राश्च दानवाः ।
गरुडाख्याः खड्गमुखा मयूरवदनास्तथा । गजेन्द्रचर्म्मवसनास्तथा कृष्णाजिनाम्बराः ।
चीरसंवृतगात्राश्च तथा वल्कलवाससः । उष्णीषिणो मुकुटिनस्तथा कुण्डलिनोऽसुराः ।
कवचिनो लम्बशिखाः कम्बुग्रीवाः सुवर्चसः । नानावेशधरा दैत्या नानामाल्यानुलेपनाः ।
स्वान्यायुधानि संगृह्य प्रदीप्तानीव तेजसा । क्रममाणं हृषीकेशमुपावर्त्तन्त सर्व्वशः ।
प्रमथ्य सर्व्वान् दैतेयान् पादहस्ततलैस्ततः । रूपं कृत्वा महाभीमं जहाराशु स मेदिनीं ।
तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे । नभः प्रक्रममाणस्य नाभ्यां किल समास्थितौ ।
परमाक्रममाणस्य जानुदेशे व्यवस्थितौ । विष्णोरतुलवीर्य्यस्य वदन्त्येवं द्विजातयः ।
हृत्वा स मेदिनीं कृत्स्नां हत्वा चासुरपुङ्गवान् । ददौ शक्राय त्रिदिवं विष्णुर्ब्बलवतां वरः ।
एष ते वामनो नाम प्रादुर्भावो महात्मनः । वेदविद्भिर्द्विजैरेतत् कथ्यते वैष्णवं यशः ।
भूयो भूतात्मनो विष्णोः प्रादुर्भावो महात्मनः । दत्तात्रेय इति ख्यातः क्षमया परया युतः ।
तेन नष्टेषु वेदेषु प्रक्रियासु मखेषु च । चातुर्वर्ण्ये च संकीर्णे धर्म्मे शिथिलतां गते ।
अभिवर्द्धति चाधर्म्मे सत्ये नष्टेऽनृते स्थिते । प्रजासु शीर्य्यमाणासु धर्म्मे चाकुलतां गते ।
सयज्ञाः सक्रिया वेदाः प्रत्यानीता हि तेन वै । चातुर्वर्ण्यमसङ्कीर्णं कृतं तेन महात्मना ।
तेन हैहयराजस्य कार्त्तवीर्य्यस्य धीमतः । वरदेन वरो दत्तो दत्तात्रेयेण धीमता ।
एतद्बाहुद्वयं यत्ते तत्ते मम कृते नृप । शतानि दश बाहूनां भविष्यन्ति न संशयः ।
पालयिष्यसि कृत्स्नाञ्च वसुधां वसुधेश्वर । दुर्न्निरीक्ष्योऽरिवृन्दानां युद्धस्थश्च भविष्यसि ।
एष ते वैष्णवः श्रीमान् प्रादुर्भावोऽद्भुतः शुभः । कथितो वै महाराज यथाश्रुतमरिन्दम ।
भूयश्च जामदग्न्योऽपि प्रादुर्भावो महात्मनः । यत्र बाहुसहस्रेण निर्जितं दुर्जयं रणे ।
रामोऽर्जुनमनीकस्थं जघान नृपतिं प्रभुः । रथस्थं पार्थिवं रामः पातयित्वार्ज्जुनं भुवि ।
धर्षयित्वा यथाकामं क्रोशमानञ्च मेघवत् । कृत्स्नं बाहुसहस्रञ्च चिच्छेद भृगुनन्दनः ।

परश्वधेन दीप्तेन ज्ञातिभिः सहितस्य वै। कीर्णा क्षत्रियकोटीभिर्मेरुमन्दरभूषणा।
त्रिःसप्तकृत्वः पृथिवी तेन निःक्षत्रिया कृता। कृत्वा निःक्षत्रियाञ्चैव भार्गवः सुमहाबलः।
सर्व्वपापविनाशाय वाजिमेधेन चेष्टवान्। तस्मिन् यज्ञे महादाने दक्षिणां भृगुनन्दनः।
मारीचाय ददौ प्रीतः काश्यपाय वसुन्धरां। वारणांस्तुरगान् शुभ्रान् रथांश्च रथिनाम्वरः।
हिरण्यमक्षयं धेनूर्गजेन्द्रांश्च महामनाः। ददौ तस्मिन्महायज्ञे वाजिमेधे महायशाः। २२१०
अद्यापि च हितार्थाय लोकानां भृगुनन्दनः। चरमाणस्तपो दीप्तं जामदग्न्यः पुनः प्रभुः।
तिष्ठते देववच्छ्रीमान्महेन्द्रे पर्व्वतोत्तमे। एष विष्णोः सुरेशस्य श्रीवत्साङ्कस्य धीमतः।
जामदग्न्य इति ख्यातः प्रादुर्भावो महात्मनः। चतुर्विंशे युगे चापि विश्वामित्रपुरःसरः।
राज्ञो दशरथस्याथ पुत्त्रः पद्मदलेक्षणः। कृत्वात्मानं महाबाहुश्चतुर्द्धा प्रभुरीश्वरः।
लोके राम इति ख्यातस्तेजसा भास्करोपमः। प्रसादनार्थं लोकस्य रक्षसां निग्रहाय च। २२१५
धर्म्मस्य च विवृद्ध्यर्थं जज्ञे तत्र प्रतापवान्। तमप्याहुर्मनुष्येन्द्रं सर्व्वभूतपतेस्तनुं।
तस्मै दत्तानि शस्त्राणि विश्वामित्रेण धीमता। वधार्थं देवशत्रूणां दुर्द्धर्षाणि सुरैरपि।
यज्ञविघ्नकरौ येन मुनीनां भावितात्मनां। मारीचश्च सुबाहुश्च बालेन बलिनाम्वरौ।
निहतौ च निराशौ च कृतौ तेन महात्मना। वर्त्तमाने मखे येन जनकस्य महात्मनः।
भग्नं माहेश्वरं चापं क्रीडता लीलया पुरा। यः समाः सर्व्वधर्म्मज्ञश्चतुर्द्दश वनेऽवसत्। २२२०
लक्ष्मणानुचरो रामः सर्व्वभूतहिते रतः। रूपिणी यस्य पार्श्वस्था सीतेति प्रथिता जनैः।
पूर्व्वोचितत्वात्सा लक्ष्मीर्भर्त्तारमनुगच्छति। चतुर्द्दश वने तप्त्वा तपो वर्षाणि राघवः।
जनस्थाने वसन् कार्य्यं त्रिदशानां चकार ह। सीतायाः पदमन्विच्छन् लक्ष्मणानुचरो विभुः।
विराधञ्च कबन्धञ्च राक्षसौ भीमविक्रमौ। जघान पुरुषव्याघ्रो गन्धर्व्वौ शापविक्षतौ।
हुताशनार्कांशुतडिद्घनाभैः प्रतप्तजाम्बूनदचित्रपुङ्खैः। महेन्द्रवज्राशनितुल्यसारैः शरैः शरीरेण वियोजितो बलात्। २२२५
सुग्रीवस्य कृते येन वानरेन्द्रो महाबलः। वाली विनिहतो युद्धे सुग्रीवश्चाभिषेचितः।
देवासुरगणानां वै यक्षराक्षसपक्षिणां। यश्चावध्यं राक्षसेन्द्रं रावणं युद्धदुर्म्मदं।
युक्तं राक्षसकोटीभिर्नीलाञ्जनचयोपमं। त्रैलोक्यद्रावणं क्रूरं दुराचारं महाबलं।
दुर्जयं दुर्द्धरं दृप्तं शार्दूलसमविक्रमं। दुर्निरीक्ष्यं सुरगणैर्वरदानेन दर्पितं।
महाभ्रघनसङ्काशं महाकायं महाबलं। तमागस्कारिणं पौलस्त्यं युधि दुर्ज्जयं। २२३०
सभ्रातृपुत्त्रसचिवं ससैन्यं क्रूरनिश्चयं। रावणं निजघानाजौ रामो भूतपतिः पुरा।
मधोस्तु तनयो दृप्तो लवणो नाम राक्षसः। हतो मधुवने भीमो वरदत्तो महासुरः।
समरे युद्धशौण्डेन तथान्येऽपि च राक्षसाः। एतानि कृत्वा कर्म्माणि रामो धर्म्मभृताम्वरः।
दशाश्वमेधान् जारूथ्यानाजहार निरर्गलान्। नाश्रूयन्ताशुभा वाचो नाकुलो मारुतो ववौ।
न वित्तहरणञ्चासीद्रामे राज्यं प्रशासति। पर्य्यदेवन् विधवा नानाथाश्चाभवन् क्वचित्। २२३५

सर्व्वमासीत्तदा दान्तं रामे राज्यं प्रशासति । न प्राणिनां भयञ्चासीज्जलानिलविघातजं ।
न च स्म वृद्धा बालानां प्रेतकार्य्याणि कुर्व्वते । ब्रह्म पर्य्यचरत् क्षत्रं विशः क्षत्रमनुव्रताः ।
शूद्राश्चैव हि वर्णांस्त्रीन् शुश्रूषन्त्यनहङ्कृताः । भार्य्यां नात्यचरद्भर्त्ता भार्य्या नात्यचरत् पतिं ।
सर्व्वमासीज्जगद्दान्तं निर्द्दस्युरभवन्मही । राम एकोऽभवद्भर्त्ता रामः पालयिताऽभवत् ।
सहस्रपुत्त्रिणस्त्वासंस्तथा वर्षसहस्रिणः । अरोगाः प्राणिनश्चासन् रामे राज्यं प्रशासति । ११४०
देवतानामृषीणाञ्च मानुषाणाञ्च सर्व्वशः । पृथिव्यां समवायोऽभूद्रामे राज्यं प्रशासति ।
गाथाश्चाप्यत्र गायन्ति ये पुराणविदो जनाः । रामे निबद्धास्तत्त्वार्था माहात्म्यं तस्य धीमतः ।
श्यामो युवा लोहिताक्षो दीप्तास्यो मितभाषणः । आजानुबाहुः सुमुखः सिंहस्कन्धो महाभुजः ।
दशवर्षसहस्राणि दशवर्षशतानि च । अयोध्याधामयोध्यायां रामो राज्यमकारयत् ।
ऋक्सामयजुषां घोषो ज्याघोषश्च महात्मनः । अव्युच्छिन्नोऽभवद्राष्ट्रे दीयतां भुज्यतामिति । ११४५
सत्त्ववान् गुणसम्पन्नो दीप्यमानः स्वतेजसा । अतिसूर्य्यश्च चन्द्रश्च रामो दाशरथिर्बभौ ।
ईजे क्रतुशतैः पुण्यैः समाप्तवरदक्षिणैः । हित्वाऽयोध्यां दिवं यातो राघवः सुमहाबलः ।
एवमेष महाबाहुरिक्ष्वाकुकुलनन्दनः । रावणं सगणं हत्वा दिवमाचक्रमे प्रभुः ।
॥ वैशम्पायन उवाच ॥ अपरः केशवस्यायं प्रादुर्भावो महात्मनः । विख्यातो माथुरे कल्पे सर्व्वलोकहिताय वै ।
यत्र शाल्वञ्च मैन्दञ्च कंसं द्विविदमेव च । अरिष्टं वृषभं केशिं पूतनां दैत्यदारिकां । ११५०
नागं कुवलयापीडं चाणूरं मुष्टिकं तथा । दैत्यान्मानुषदेहस्थान् सूदयामास वीर्य्यवान् ।
छिन्नं बाहुसहस्रञ्च बाणस्याद्भुतकर्म्मणः । नरकश्च हतः सङ्ख्ये यवनश्च महाबलः ।
हृतानि च महीपानां सर्व्वरत्नानि तेजसा । दुराचाराश्च निहताः पार्थिवा ये महीतले ।
नवमे द्वापरे विष्णोरष्टाविंशे पुराभवत् । वेदव्यासस्तथा जज्ञे जातूकर्ण्यपुरःसरः ।
एको वेदश्चतुर्द्धा तु कृतस्तेन महात्मना । जनितो भारतो वंशः सत्यवत्याः सुतेन च । ११५५
एते लोकहितार्थाय प्रादुर्भावा महात्मनः । अतीताः कथिता राजन् कथ्यन्ते चाप्यनागताः ।
कल्की विष्णुयशा नाम शम्भलग्रामको द्विजः । सर्व्वलोकहितार्थाय भूयश्चोत्पत्स्यते प्रभुः ।
दशमो भाव्यसम्पन्नो याज्ञवल्क्यपुरःसरः । क्षपयित्वा च तान् सर्व्वान् भाविनोऽर्थेन चोदितान् ।
गङ्गायमुनयोर्म्मध्ये निष्ठां प्राप्स्यति सानुगः । ततः कुले व्यतीते तु सामात्ये सहसैनिके ।
नृपेष्वथ प्रनष्टेषु तदा त्वप्रग्रहाः प्रजाः । रक्षेण निर्हते चैव हत्वा चान्योन्यमाहवे । ११६०
परस्परहतस्वास्च निराक्रन्दाः सुदुःखिताः । एवं कष्टमनुप्राप्ताः कलिसन्ध्यांशके तदा ।
प्रजाः क्षयं प्रयास्यन्ति सार्द्धं कलियुगेन ह । क्षीणे कलियुगे तस्मिंस्ततः कृतयुगं पुनः ।
प्रवर्त्स्यते यथान्यायं स्वभावाच्चैव नान्यथा । एते चान्ये च बहवो दिव्या दिव्यगणैर्युताः ।
प्रादुर्भावाः पुराणेषु गीयन्ते ब्रह्मवादिभिः । यत्र देवा विमुह्यन्ते प्रादुर्भावानुकीर्त्तने ।
पुराणं वर्त्तते यत्र वेदश्रुतिसमाहितं । एतदुद्देशमात्रेण प्रादुर्भावानुकीर्त्तनं । ११६५

कीर्त्तितं कीर्त्तनीयस्य सर्व्वलोकगुरोः प्रभोः । प्रीयन्ते पितरस्तस्य प्रादुर्भावानुकीर्त्तनात् ।
विष्णोरमितवीर्य्यस्य वदन्त्येवं द्विजातयः ।
एतास्तु योगेश्वरयोगमायाः श्रुत्वा विमुच्येत नरस्तु पापैः । ऋद्धिं समृद्धिं विपुलांश्च भोगान् प्राप्नोति दीर्घं भगवत्प्रसादात् ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥
॥ वैशम्पायन उवाच ॥ विस्मितं शृणु मे विष्णोर्हरित्वञ्च कृते युगे । वैकुण्ठत्वञ्च देवेषु कृष्णत्वं मानुषे युगे ।
ईश्वरत्वं हि तस्येदं कर्म्मणां गहनां गतिं । संप्रत्यतीतान् भाव्यांश्च शृणु राजन् यथातथं । २२८०
अव्यक्तो व्यक्तलिङ्गस्थो य एष भगवान् प्रभुः । नारायणो ह्यनन्तात्मा प्रभवोऽव्यय एव च ।
एष नारायणो भूत्वा हरिरासीत् कृते युगे । ब्रह्मा शक्रश्च सोमश्च धर्म्मः शुक्रो बृहस्पतिः ।
अदितेरपि पुत्त्रत्वमेत्य यादवनन्दनः । एष विष्णुरिति ख्यात इन्द्रादवरजोऽभवत् ।
प्रसादजं ह्यस्य विभोरदित्याः पुत्त्रजन्म तत् । वधार्थं सुरशत्रूणां दैत्यदानवरक्षसां ।
प्रधानात्मा पुरा ह्येष ब्रह्माणमसृजत् प्रभुः । सोऽसृजत् पूर्व्वपुरुषः पुराकल्पे प्रजापतीन् । २२८५
ते तन्वानास्तनूस्तत्र ब्रह्मवंशाननुत्तमान् । तेभ्योऽभवन्महात्मभ्यो बहुधा ब्रह्म शाश्वतं ।
एतदाश्चर्य्यभूतञ्च विष्णोः कर्म्मानुकीर्त्तनं । कीर्त्तनीयस्य लोकेषु कीर्त्त्यमानं निबोध मे ।
वृत्ते वृत्रवधे तात वर्त्तमाने कृते युगे । आसीत् त्रैलोक्यविख्यातः संग्रामस्तारकामयः ।
तत्र स्म दानवा घोराः सर्व्वे संग्रामदर्पिताः । घ्नन्ति देवगणान् सर्व्वान् सयक्षोरगराक्षसान् ।
ते वध्यमाना विमुखाः क्षीणप्रहरणा रणे । त्रातारं मनसा जग्मुर्देवं नारायणं प्रभुं । २२९०
एतस्मिन्नन्तरे मेघा निर्व्वाणाङ्गारवर्च्चसः । सार्कचन्द्रग्रहगणं छादयामासुरम्बरं ।
चलद्विद्युद्गणाविद्धा घोरा निर्ह्रादकारिणः । तेऽन्योन्यवेगाभिहताः प्रववुः सप्त मारुताः ।
दीप्ततोयाशनीपातैर्वज्रवेगानिलानलैः । ररास घोरैरुत्पातैर्दह्यमानमिवाम्बरं ।
पेतुरुल्कासहस्राणि पेतुराकाशगान्यपि । न्युब्जानि च विमानानि प्रपतन्त्युत्पतन्ति च ।
चतुर्युगान्तपर्य्याये लोकानां यद्भयं भवेत् । तादृशान्येव रूपाणि तस्मिन्नुत्पातदर्शने । २२९५
तमसा निष्प्रभं सर्व्वं न प्राज्ञायत किञ्चन । तिमिरौघपरिक्षिप्ता न रेजुश्च दिशो दश ।
निशेव रूपिणी काली कालमेघावगुण्ठिता । द्यौर्न भात्यभिभूतार्का घोरेण तमसा वृता ।
तान् घनौघान् सतिमिरान् दोर्भ्यां संक्षिप्य स प्रभुः । वपुः सन्दर्शयामास दिव्यं कृष्णवपुर्हरिः ।
बलाहकाञ्जननिभं बलाहकतनूरुहं । तेजसा वपुषा चैव कृष्णं कृष्णमिवाचलं ।
दीप्तपीताम्बरधरं तप्तकाञ्चनभूषणं । धूमान्धकारवपुषं युगान्ताग्निमिवोत्थितं । २३००
चतुर्द्विगुणपीनांसं किरीटच्छन्नमूर्द्धजं । चामीकरकराकारैरायुधैरुपशोभितं ।
चन्द्रार्ककिरणोद्योतं गिरिकूटमिवोच्छ्रितं । नन्दकानन्दितकरं शराशीविषधारिणं ।
शक्तिचित्रं हलोदग्रं शङ्खचक्रगदाधरं । विष्णुशैलं क्षमामूलं श्रीवत्सं शार्ङ्गशृङ्गिणं ।
हर्य्यश्ववरसंयुक्ते सुपर्णध्वजशोभिते । चन्द्रार्कचक्ररचिते मन्दराक्षधृतान्तरे ।

अनन्तरश्मिसंयुक्ते दुर्द्दर्शे मेरुकूबरे । तारकाचित्रकुसुमे ग्रहनक्षत्रबन्धुरे । २४०५
भयेष्वभयदं व्योम्नि देवा दैत्यपराजिताः । ददृशुस्ते स्थितं देवं दिव्यलोकमये रथे ।
ते कृताञ्जलयः सर्व्वे देवाः शक्रपुरोगमाः । जयशब्दं पुरस्कृत्य शरण्यं शरणङ्गताः ।
स तेषां ता गिरः श्रुत्वा विष्णुर्दैवतदैवतः । मनश्चक्रे विनाशाय दानवानां महामृधे ।
आकाशे तु स्थितो विष्णुरुत्तमे पुरुषोत्तमः । उवाच देवताः सर्व्वाः सप्रतिज्ञमिदं वचः ।
शान्तिं व्रजत भद्रं वो माभैष्ट मरुतां गणाः । जिता मे दानवाः सर्व्वे त्रैलोक्यं प्रतिगृह्यतां । २४१०
ते तस्य सत्यसन्धस्य विष्णोर्वाक्येन तोषिताः । देवाः प्रीतिं परां जग्मुः प्राप्येवामृतमुत्तमं ।
ततस्तमः संह्रियते विनेशुश्च बलाहकाः । प्रववुश्च शिवा वाताः प्रसन्नाश्च दिशो दश ।
ज्योतींषि च प्रभावन्ति चन्द्रं चक्रुः प्रदक्षिणं । प्रदीप्तानि च तेजांसि चक्रुरर्कं प्रदक्षिणं ।
न विग्रहं ग्रहाश्चक्रुः प्रसेदुश्चापि सिन्धवः । नीरजस्का बभुर्मार्गा नाकमार्गादयस्तथा ।
यथार्थमूहुः सरितो नापि चुक्षुभिरेऽर्णवाः । आसन् शुभा भूतेन्द्रियगणा नराणामन्तरात्मसु । २४१५
महर्षयो वीतशोका वेदानुच्चैरधीयत । यज्ञेषु च हविः स्वादु शिवमप्राप पावकः ।
प्रवृत्तधर्म्माः संवृत्ता लोका मुदितमानसाः । प्रीत्या परमया युक्ता देवदेवस्य भूपते ।
विष्णोर्द्दत्तप्रतिज्ञस्य श्रुत्वारिनिधने गिरं ।
इतिश्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥
॥ वैशम्पायन उवाच ॥ ततोऽभयं विष्णुमयं श्रुत्वा दैतेयदानवाः । उद्योगं परमं चक्रुर्युद्धाय युधि दुर्ज्जयाः ।
मयस्तु काञ्चनमयं त्रिनल्वान्तरमव्ययं । चतुश्चक्रं सुविपुलं सुकल्पितमहायुधं । २४२०
किङ्किणीजालनिर्घोषं द्वीपिचर्म्मपरिष्कृतं । रुचिरं रत्नजालैश्च हेमजालैश्च भूषितं ।
ईहामृगगणाकीर्णं पक्षिभिश्च विराजितं । दिव्यास्त्रतूणीरधरं पयोधरनिनादितं ।
स्वक्षं ध्वजवरं धुर्य्यं सूपस्थमगमोपमं । गदापरिघसम्पूर्णं मूर्त्तिमन्तमिवार्णवं ।
हेमकेयूरवलयं स्वर्णमण्डलकूबरं । सपताकध्वजोदयं सादित्यमिव मन्दरं ।
गजेन्द्राम्भोदसदृशं लम्बकेशरवर्षभं । युक्तमृक्षसहस्रेण सहस्राम्बुदनादितं । २४२५
दीप्तमाकाशगं दिव्यं रथं पररथारुजं । अध्यतिष्ठद्रणाकाङ्क्षी मेरुं दीप्त इवांशुमान् ।
तारस्तु क्रोशविस्तारमायसं वायसध्वजं । शैलाकारसमाकीर्णं नीलाञ्जनचयोपमं ।
काललोहाष्टचरणं लोहेषायुगकूबरं । तिमिरोद्गारकिरणं गर्ज्जन्तमिव तोयदं ।
लोहजालेन महता सगवाक्षेण दंशितं । आयसैः परिघैः शूलैः क्षेपणीयैश्च लेष्टुभिः ।
प्रासैः पाशैश्च विततैरसंसक्तैश्च मुद्गरैः । शोभितं चापनीयैश्च तोमरैः सपरश्वधैः । २४३०
उद्यतं द्विषतां हेतोर्द्वितीयमिव मन्दरं । युक्तं खरसहस्रेण सोऽध्यारोहद्रथोत्तमं ।
विरोचनस्तु संक्रुद्धो गदापाणिरवस्थितः । प्रमुखे तस्य सैन्यस्य दीप्तशृङ्ग इवाचलः ।
युक्तं हयसहस्रेण हयग्रीवस्तु दानवः । स्यन्दनं वाहयामास सपत्नानीकमर्दनं ।

आयतं वज्रसारस्थं धनुर्विस्फारयन्महत् । वराहः प्रमुखे तस्थौ सावरोह इवाचलः ।
खरस्तु विक्षरन्दर्पान्नेत्राभ्यां रोषजं जलं । स्फुरद्दन्तोष्ठवदनः संग्रामं सोऽभ्यकाङ्क्षत । २५४०
त्वष्टा त्वष्टादशहयं यानमास्थाय दानवः । व्यूहितो दानवैर्व्यूहैः परिचक्राम वीर्य्यवान् ।
विप्रचित्तिसुतः श्वेतः श्वेतकुण्डलभूषणः । श्वेतशैलप्रतीकाशो युद्धायाभिमुखः स्थितः ।
अरिष्टो बलिपुत्रस्तु वरिष्ठोऽद्रिशिलायुधः । युद्धायाभिमुखस्तस्थौ धराधर इवाचलः ।
किशोरस्त्वभिसंहर्षात् किशोर इव चोदितः । अभवद्दैत्यसैन्यस्य मध्ये रविरिवोदितः ।
लम्बस्तु लम्बमेघाभ प्रलम्बाम्बरभूषणः । दैत्यव्यूहगतो भाति सनीहार इवांशुमान् । २५४५
स्वर्भानुर्वक्त्रयोधी च दशनौष्ठेक्षणायुधः । हसंस्तिष्ठति दैत्यानां प्रमुखे स महाग्रहः ।
अन्ये हयगता भान्ति गजस्कन्धेषु चापरे । सिंहव्याघ्रगताश्चान्ये वराहेषु चापरे ।
केचित् खरोष्ट्रयातारः केचित्तोयदवाहनाः । नानापक्षिगताश्चान्ये केचित् पवनवाहनाः ।
पत्तिनस्त्वपरे दैत्या भीषणा विकृताननाः । एकपादा द्विपादाश्च नर्द्दन्तो युद्धकाङ्क्षिणः ।
प्रक्ष्वेलमाना बहवः स्फोटयन्तश्च ते भुजान् । दृप्तशार्दूलनिर्घोषा नेदुर्दानवपुङ्गवाः । २५५०
ते गदापरिघैरुग्रैर्धनुर्व्यायामशालिनः । बाहुभिः परिघाकारैस्तर्ज्जयन्ति स्म देवताः ।
प्रासैः पाशैश्च खड्गैश्च तोमराङ्कुशपट्टिशैः । चिक्रीडुस्ते शतघ्नीभिः शितधारैश्च मुद्गरैः ।
गण्डशैलैश्च शैलैश्च परिघैश्चोत्तमायुधैः । चक्रैश्च दैत्यप्रवराश्चक्रुरानन्दितं बलं ।
एवं दानवसैन्यन्तत् सर्व्वं युद्धमदोत्कटं । देवताभिमुखं तस्थौ मेघानीकमिवोद्धतं ।
मदद्धुतं दैत्यसहस्रगाढं वाय्वग्नितोयाम्बुदशैलकल्पं । बलं रणायाभ्युदयादुदीर्णं युयुत्सयोन्मत्तमिवावभासे । २५५५

इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

॥ वैशम्पायन उवाच ॥ श्रुतस्ते दैत्यसैन्यस्य विस्तरस्तात विग्रहे । सुराणां सर्व्वसैन्यस्य वैष्णवं विस्तरं शृणु ।
आदित्या वसवो रुद्रा अश्विनौ च महाबलौ । सबलाः सानुगाश्चैव सन्नह्यन्त यथाक्रमं ।
पुरुहूतस्तु पुरतो लोकपालः सहस्रदृक् । ग्रामणीः सर्व्वदेवानामारुरोह सुरद्विपं ।
सव्ये चास्य रथः पार्श्वे पक्षिप्रवरवेगवान् । सुचारुचक्रचरणो हेमवज्रपरिष्कृतः ।
देवगन्धर्व्वयक्षौघैरनुयातः सहस्रशः । दीप्तिमद्भिः सदस्यैश्च महर्षिभिरभिष्टुतः । २५६०
वज्रविस्फूर्ज्जितोद्धूतैर्विद्युदिन्द्रायुधार्पितैः । गुप्तो बलाहकगणैः पर्व्वतैरिव कामगैः ।
यमारूढः स भगवान् पर्य्येति मघवान् जगत् । हविर्द्धाने स्म गायन्ति विप्रा मखमुखे स्थिताः ।
स्वर्गे शक्रानुयानेषु देवतूर्य्यनिनादिषु । चेन्द्रं समुपनृत्यन्ति शतशोऽप्सरोगणाः ।
केतुना वंशराजेन भ्राजमानो यथा रविः । युक्तो हयसहस्रेण मनोमारुतरंहसा ।
स स्यन्दनवरो भाति युक्तो मातलिना तदा । कृत्स्नः परिवृतो मेरुर्भास्करस्येव तेजसा । २५६५
यमस्तु दण्डमुद्यम्य कालयुक्तश्च मुद्गरं । तस्थौ सुरगणानीके दैत्यान्नादेन भीषयन् ।
चतुर्भिः सागरैर्गुप्तो लेलिहानैश्च पन्नगैः । शङ्खमुक्ताङ्गदधरो बिभ्रत्तोयमयं वपुः ।

कालपाशांस्तु संदृश्य हयै: शशिकरोपमै: । वाय्वीरितजलोद्गारै: कुर्व्वन् लीला: सहस्रश: ।
पाण्डुरोद्धूतवसन: प्रवालरुचिराङ्गद: । मणिश्यामोत्तमवपुर्हारैरुत्तमविभूषित: ।
वरुण: पाशहस्तोऽग्रे देवानीकस्य तस्थिवान् । युद्धवेलामभिलषन् भिन्नवेल इवार्णव: । २८६५
यक्षराक्षससैन्येन गुह्यकानां गणैरपि । मणिश्यामोत्तमवपु: कुवेरो नरवाहन: ।
युक्तश्च शङ्खपद्माभ्यां निधीनामधिप: प्रभु: । देवो विश्वेश्वर: श्रीमान् गदापाणिरदृश्यत ।
विमानयोधी धनदो विमाने पुष्पके स्थित: । स राजराज: शुशुभे युद्धार्थी नरवाहन: ।
प्रेक्षमाण: शिवसख: साक्षादिव शिव: स्वयं । दैत्यस्य संमुखे देव: स्थितवान् समरोत्सुक: ।
पूर्व्वं पक्षं सहस्राक्ष: पितृराजस्तु दक्षिणं । वरुण: पश्चिमं पक्षमुत्तरं नरवाहन: । २८७०
चतुर्युगाश्च चत्वारो लोकपाला महोत्कटा: । स्वासु दिक्ष्वभ्यरक्षन् वै तस्य देवबलस्य ते ।
सूर्य्य: सप्ताश्वयुक्तेन रथेनाम्बरगामिना । श्रिया जाज्वल्यमानेन दीप्यमानैश्च रश्मिभि: ।
उदयास्तमयचक्रेण मेरुपर्य्यन्तगामिना । त्रिदिवद्वारचित्रेण तपता लोकमव्ययं ।
सहस्ररश्मियुक्तेन भ्राजमानेन तेजसा । रराज मध्ये देवानां द्वादशात्मा दिनेश्वर: ।
सोम: श्वेतरथे भाति स्यन्दने शीतरश्मिवान् । हिमतोयप्रपूर्णाभिर्भाभिराप्लावयन् जगत् । २८७५
तमृक्षयोगानुगतं शिशिरांशुं द्विजेश्वरं । गजच्छायाङ्किततनुं नैशस्य तमस: क्षयं ।
ज्योतिषामीश्वरं व्योम्नि रसानां रसदं प्रभुं । ओषधीनां परित्राणान्निधानममृतस्य च ।
जगत: प्रथमं भागं सौम्यं शीतमयं रसं । ददृशुर्दानवा: सोमं हिमप्रहरणं स्थितं ।
य: प्राण: सर्व्वभूतानां पञ्चधा भिद्यते नृषु । सप्तस्कन्धगतो लोकांस्त्रीन्दधार चराचरान् ।
यमाहुरग्नेर्यन्तारं शब्दप्रभवमीश्वरं । सप्तस्वरगता यस्य योनिर्गीतिरुदीर्य्यते । २८८०
यं वदन्त्युत्तमं भूतं यं वदन्त्यशरीरिणं । यमाहुराकाशगमं शीघ्रगं शब्दयोनिनं ।
स वायु: सर्व्वभूतायुरुद्धूतस्वेन तेजसा । ववौ प्रव्यथयन्दैत्यान् प्रतिलोम: स तोयद: ।
मरुतो देवगन्धर्व्वा विद्याधरगणै: सह । चिक्रीडुरसिभि: शुभ्रैर्निर्मुक्तै: पन्नगैरिव ।
सृजन्त: सर्पपतयस्तीव्रं रोषमयं विषं । शरभूता: सुरेन्द्राणां चेरुर्व्यात्तमुखा दिवि ।
पर्व्वतास्तु शिलाशृङ्गै: शतशाखैश्च पादपै: । उपतस्थु: सुरगणान् प्रहर्त्तुं दानवं बलं । २८८५
य: स देवो हृषीकेश: पद्मनाभस्त्रिविक्रम: । कृष्णवर्त्मा युगान्ताभो विश्वस्य जगत: प्रभु: ।
समुद्रयोनिर्मधुहा हव्यभुक् क्रतुसत्कृत: । भूरापो व्योम भूतात्मा शम: शान्तिकरोऽरिहा ।
जगद्योनिर्जगद्बीजो जगद्गुरुरुदारधी: । सोऽर्कमग्निमिवोद्यन्तमुद्यम्योत्तमतेजसं ।
चरिष्णुममरानीके चक्रशङ्खगदाधर: । सपरीवेशमुद्यन्तं सवितुर्मण्डलं यथा ।
सव्येनालम्ब्य महतीं सर्व्वासुरविनाशिनीं । करेण कालीं महतीं शत्रुकालप्रदां गदां । २८९०
शेषैर्भुजै: प्रदीप्तानि भुजगारिध्वज: प्रभु: । दधारायुधजालानि शार्ङ्गादीनि महायशा: ।
स कश्यपस्यात्मभवं द्विजं भुजगभोजनं । पवनाधिकसम्पातं गगनक्षोभणं खगं ।

भुजगेन्द्रेण वदने निविष्टेन विराजितं । अमृतारम्भनिर्मुक्तं मन्दराद्रिमिवोच्छ्रितं ।
देवासुरविमर्द्देषु शतशो दृष्टविक्रमं । महेन्द्रेणामृतस्यार्थे वज्रेण कृतलक्षणं ।
शिखिनं कुण्डलिनञ्चैव तप्तकुण्डलभूषणं । विचित्रपत्रवसनं धातुमन्तमिवाचलं । २४९५
स्फीतक्रोडावलम्बेन शीतांशुसमतेजसा । भोगिभोगावसक्तेन मणिरत्नेन भास्वता ।
पक्षाभ्याञ्चारुपत्राभ्यां छादयन्तञ्च लीलया । युगान्ते सेन्द्रचापाभ्यां तोयदाभ्यामिवाम्बरं ।
नीललोहितपीताभिः पताकाभिरलङ्कृतं । केतुवेशप्रतिच्छन्नं महाकायनिकेतनं ।
अरुणावरजं श्रीमानारुरोह रणे हरिः । सुवर्णं स्वेन वपुषा सुपर्णं खेचरोत्तमं ।
तमन्वयुर्देवगणा मुनयश्च समाहिताः । गीर्भिः परममन्त्राभिस्तुष्टुवुश्च गदाधरं । २५००
तद्वैश्रवणसंश्लिष्टं वैवस्वतपुरःसरं । वारिराजपरिक्षिप्तं देवराजविराजितं ।
चन्द्रप्रभाभिर्विमलं युद्धमत्सरवेगितं । पवनाबद्धनिर्घोषं सम्प्रदीप्तहुताशनं ।
विष्णोर्जिष्णोः सहिष्णोश्च भ्राजिष्णोस्तेजसा वृतं । बलं बलवदुद्धूतं युद्धाय समवर्त्तत ।
स्वस्त्यस्तु देवेभ्य इति स्तुवंस्तत्राङ्गिरा जगौ । स्वस्त्यस्तु दैत्येभ्य इति उशना वाक्यमब्रवीत् ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥
॥ वैशम्पायन उवाच ॥ ताभ्यां बलाभ्यां संजज्ञे तुमुलो विग्रहस्तदा । असुराणां सुराणाञ्च परस्परजयैषिणां । २५०५
दानवा दैवतैः सार्द्धं नानाप्रहरणोद्यताः । समीयुर्युध्यमाना वै पर्व्वता इव पर्व्वतैः ।
तत्सुरासुरसंयुक्तं युद्धमत्यद्भुतं ह्यभूत् । धर्म्माधर्म्मेण संयुक्तं दर्पेण विनयेन च ।
ततो रथैः प्रजवितैर्व्वाजिभिश्च प्रचोदितैः । उत्पतद्भिश्च गगनं सासिहस्तैः समन्ततः ।
विक्षिप्यमाणैर्म्मुषलैः प्रेष्यमाणैश्च सायकैः । चापैर्व्विस्फार्य्यमाणैश्च पात्यमानैश्च मुद्गरैः ।
तद्युद्धमभवद्घोरं देवदानवसङ्कुलं । जगतस्त्रासजननं युगसम्वर्त्तकोपमं । २५१०
स्वहस्तमुक्तैः परिघैः क्षिप्रमुक्तैश्च पर्व्वतैः । दानवाः समरे जघ्नुर्द्देवानिन्द्रपुरोगमान् ।
ते बध्यमाना बलिभिर्द्दानवैर्ज्जितकाशिभिः । विषण्णमनसो देवा जग्मुरार्त्तिं परां मृधे ।
तेऽस्त्रजालैः प्रमथिताः परिघैर्भिन्नमस्तकाः । भिन्नोरस्का दितिसुतैर्वमू रक्तं व्रणैर्बहु ।
सन्दिताः पाशजालैश्च निष्प्रयत्नाः सुराः कृताः । प्रविष्टा दानवीं मायां न शेकुस्ते विचेष्टितुं ।
संस्तम्भितमिवाभाति निष्प्राणसदृशाकृति । बलं सुराणामसुरैर्निष्प्रयत्नायुधं कृतं । २५१५
मायापाशान् विकर्षंश्च छिन्दन् वज्रेण तान् शरान् । शक्रो दैत्यबलं घोरं विवेश बहुलोचनः ।
स दैत्यान् प्रमुखे हत्वा तद्दानवबलं महत् । तामसेनास्त्रजालेन तमोभूतमथाकरोत् ।
तेऽन्योन्यं नावबुध्यन्त देवा वा दानवास्तथा । घोरेण तमसा विष्टाः पुरुहूतस्य तेजसा ।
मायापाशैर्व्विमुक्ताश्च यत्नवन्तः सुरोत्तमाः । वपूंषि दैत्यसङ्घानां तमोभूतान्यपातयन् ।
अपध्वस्ता विसंज्ञाश्च तमसा नीलवर्चसः । पेतुस्ते दानवगणाश्छिन्नपक्षा इवाचलाः । २५२०
दैत्यानां तद्घनीभूतमन्धकारमहार्णवं । प्रविष्टं बलमुख्यं तत् तमोभूतमिवाबभौ ।

अथासृजन्महामायां मयस्तां तामसीं दहन् । युगान्ते लोकदहनीं सृष्टामौर्व्वेण वह्निना ।
सा ददाह ततः सर्व्वं मायामयविकल्पिता । दैत्याश्चादित्यवपुषः सद्य उत्तस्थुराहवे ।
मायामौर्व्वीं समासाद्य दह्यमाना दिवौकसः । भेजिरे चन्द्रविषयं शीतांशुसलिलं ह्रदं ।
ते दह्यमाना और्व्वेण तेजसा भ्रष्टतेजसः । शंसुर्व्वज्रिणं देवाः सन्तप्ताः शरणैषिणः । २५२५
सन्तप्ते मायया सैन्ये दह्यमाने च दानवैः । चोदितो देवराजेन वरुणो वाक्यमब्रवीत् ।
॥ वरुण उवाच ॥ पुरा ब्रह्मर्षिजः शक्र तपस्तेपे सुदारुणं । ऊर्व्वः पूर्व्वं स तेजस्वी सदृशो ब्रह्मणो गुणैः ।
तं तपन्तमिवादित्यं तपसा जगदव्ययं । उपतस्थुर्मुनिगणा देवा देवर्षिभिः सह ।
हिरण्यकशिपुश्चैव दानवो दानवेश्वरः । ऋषिं विज्ञापयामास पुरा परमतेजसं ।
ते तमूचुर्ब्रह्मर्षयो वचनं धर्म्मसंहितं । ऋषिवंशेषु भगवंश्छिन्नमूलमिदं कुलं । २५३०
एकस्त्वमनपत्यश्च गोत्रं यन्नानुवर्त्तसे । कौमारं व्रतमास्थाय क्लेशमेवानुवर्त्तसे ।
बहूनि विप्रगोत्राणि मुनीनां भावितात्मनां । एकदेहानि तिष्ठन्ति विभक्तानि विना प्रजाः ।
कुलेषूच्छिन्नभूतेषु तेषु नो नास्ति कारणं । भवांश्च तपसा श्रेष्ठः प्रजापतिसमद्युतिः ।
तत् प्रवर्त्तस्व वंशाय वर्द्धयात्मानमात्मना । त्वमाधत्स्वोर्ज्जितं तेजो द्वितीयां कुरु वै तनुं ।
स एवमुक्तो मुनिभिर्मुनिर्म्मर्म्मणि ताडितः । जगर्हे तानृषिगणान् वचनञ्चेदमब्रवीत् । २५३५
यथायं शाश्वतो धर्म्मो मुनीनां विहितः पुरा । आर्षं हि सेवतां कर्म्म वन्यमूलफलाशिनां ।
ब्रह्मयोनौ प्रसूतस्य ब्राह्मणस्यात्मवर्त्तिनः । ब्रह्मचर्य्यं सुचरितं ब्रह्माणमपि चालयेत् ।
द्विजानां वृत्तयस्तिस्रो ये गृहाश्रमवासिनः । अस्माकन्तु वने वृत्तिर्वन्याश्रमनिवासिनां ।
अब्भक्ष्या वायुभक्ष्याश्च दन्तोलूखलिकास्तथा । अश्मकुट्टा निरशना दशपञ्चतपाश्च ये ।
एते तपसि तिष्ठन्तो व्रतैरपि सुदुश्चरैः । ब्रह्मचर्य्यं पुरस्कृत्य प्रार्थयन्ते परां गतिं । २५४०
ब्रह्मचर्य्या ब्राह्मणस्य ब्राह्मणत्वं विधीयते । एवमाहुः परे लोके ब्रह्म ब्रह्मविदो जनाः ।
ब्रह्मचर्य्ये स्थितं धैर्य्यं ब्रह्मचर्य्ये स्थितं तपः । ये स्थिता ब्रह्मचर्य्येषु ब्राह्मणास्ते दिवि स्थिताः ।
नास्ति योगं विना सिद्धिं नास्ति सिद्धिं विना यशः । नास्ति लोके यशोमूलं ब्रह्मचर्य्यात् परं तपः ।
सन्निगृह्येन्द्रियग्रामं भूतग्रामञ्च पञ्चकं । ब्रह्मचर्य्यं समाधत्ते किमतः परमं तपः ।
अयोगे केशधरणमसङ्कल्पे व्रतक्रिया । अब्रह्मचर्य्ये चर्य्या च त्रयः स्याद्दम्भसंज्ञितं । २५४५
क्व दाराः क्व च संयोगः क्व च भावविपर्य्ययः । यथेयं ब्रह्मणा सृष्टा मनसा मानसी प्रजा ।
यद्यस्ति तपसो वीर्य्यं युष्माकमनितात्मनां । सृजध्वं मानसान् पुत्रान् प्राजापत्येन कर्म्मणा ।
मनसा निर्म्मिता योनिराधातव्या तपस्विना । न दारयोगो बीजं वा व्रतमुक्तं तपस्विना ।
यदिदं लुप्तधर्म्मार्थं युष्माभिरपि निर्भयैः । व्याहृतं सद्भिरत्यर्थमसद्भिरिव मे मतं ।
वपुर्दीप्तान्तरात्मानमेष कृत्वा मनोमयं । दारयोगं विना स्रक्ष्ये पुत्रमात्मतनूरुहं । २५५०
एवमात्मानमात्मा मे द्वितीयं जनयिष्यति । वन्येनानेन विधिना दिधक्षन्तमिव प्रजाः ।

ऊर्व्वस्तु तपसा विष्टो निवेश्योरुं हुताशने । ममन्थैकेन दर्भेण सुतस्य प्रभवारणिं ।
तस्योरुं सहसा भित्त्वा ज्वालामाली निरिन्धनः । जगतो दहनाकाङ्क्षी पुत्रोऽग्निः समपद्यत ।
ऊर्व्वस्योरुं विनिर्भिद्य और्व्वो नामान्तको ऽनलः । दिधक्षन्निव लोकांस्त्रीन् जज्ञे परमकोपनः ।
उत्पन्नमात्रश्चोवाच पितरं दीनया गिरा । क्षुधा मे वर्त्तते तात जगद्भक्ष्ये त्यजस्व मां । २५५५
त्रिदिवारोहिभिर्ज्वालैर्जृम्भमाणो दिशो दश । निर्दहन् सर्व्वभूतानि ववृधे सोऽन्तकोऽनलः ।
एतस्मिन्नन्तरे ब्रह्मा सर्व्वलोकार्च्चितः प्रभुः । आजगाम मुनिर्यत्र व्यसृजत् पुत्रमुत्तमं ।
स ददर्शोरुमूर्व्वस्य दीप्यमानं सुताग्निना । और्व्वकोपाग्निसन्तप्तान् लोकांश्च ऋषिभिः सह ।
तमुवाच ततो ब्रह्मा मुनिमूर्व्वं सभाजयन् । पुत्त्रेदं धार्य्यतां तेजो लोकानां क्रियतां दया ।
अस्यापत्यस्य ते विप्र करिष्ये स्थानमुत्तमं । निवासं तस्य दास्यामि प्राशनं चामृतोपमं । २५६०
तथ्यमेतन्मम वचः शृणु त्वं वदताम्वर ।
॥ ऊर्व्व उवाच ॥ धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे भगवान् शिशोः । मतिमेतां ददातीह परमानुग्रहाय वै ।
प्रभातकाले सम्प्राप्ते काङ्क्षितव्ये समागमे । भगवंस्तर्पितः पुत्रः कैर्हव्यैः प्राप्स्यते सुखं ।
कुत्र वास्य निवासः स्याद्भोजनञ्च किमात्मकं । विधास्यति भवानस्य वीर्य्यतुल्यं महौजसः ।
॥ ब्रह्मोवाच ॥ वडवामुखेऽस्य वसतिः समुद्रास्ये भविष्यति । मम योनिर्जलं विप्र तस्य तोयमयं वपुः । २५६५
तत्राहमासे नियतः पिबन् वारिमयं हविः । तद्धविस्तव पुत्रस्य विसृजाम्यालयञ्च तत् ।
ततो युगान्ते भूतानामेष चाहञ्च सुव्रत । सहितौ विचरिष्यावो निष्पुराणकरावुभौ ।
एषोऽग्निरन्तकाले तु सलिलाशी मया कृतः । दहनः सर्व्वभूतानां सदेवासुररक्षसां ।
एवमस्त्विति सोऽप्यग्निः संवृतज्वालमण्डलः । प्रविवेशार्णवमुखं निक्षिप्य पितरि प्रभां ।
प्रतियातस्ततो ब्रह्मा ते च सर्व्वे महर्षयः । और्व्वस्याग्नेः प्रभावज्ञाः स्वां स्वां गतिमुपाश्रिताः । २५७०
हिरण्यकशिपुर्दृष्ट्वा तदद्भुतमपूजयत् । ऊर्व्वं प्रणतसर्व्वाङ्गो वाक्यमेतदुवाच ह ।
॥ हिरण्यकशिपुरुवाच ॥ भगवन्नद्भुतमिदं निर्वृत्तं लोकसाक्षिकं । तपसा ते मुनिश्रेष्ठ परितुष्टः पितामहः ।
अहन्तु तव पुत्रस्य तव चैव महाव्रत । भृत्य इत्यवगन्तव्यः साध्योऽस्मि यदि कर्म्मणा ।
तव वश्यत्वमापन्नस्तथैवाराधने रतः । सीदेयञ्च मुनिश्रेष्ठ तवैव स्यात् पराजयः ।
॥ ऊर्व्व उवाच ॥ धन्योऽस्म्यनुगृहीतोऽस्मि यस्य तेऽहं गुरुः स्मृतः । नास्ति ते मत्प्रसादेन भयमद्येह सुव्रत । २५७५
इमाञ्च मायां गृह्णीष्व मम पुत्रेण निर्म्मितां । निरिन्धनामग्निमयीं दुःस्पर्शां पावकैरपि ।
एषा ते स्वस्य वंशस्य वशगारिविनिग्रहे । रक्षिष्यत्यात्मपक्षञ्च परञ्च प्रधक्ष्यति ।
एवमस्त्विति संहृष्टः प्रणम्य मुनिपुङ्गवं । जगाम त्रिदिवं हृष्टः कृतार्थो दानवेश्वरः ।
सैषा दुर्व्विषहा माया देवैरपि दुरासदा । और्व्वेण निर्म्मिता पूर्व्वं पावकेनोर्व्वसूनुना ।
तस्मिंस्तु व्युत्थिते दैत्ये निर्व्वीर्य्यैषा न संशयः । शापो ह्यस्याः पुरा दत्तः सृष्टा येनैव तेजसा । २५८०
यद्येषा प्रतिहन्तव्या कर्त्तव्यश्च भवान् सुखी । दीयतां मे सखा शक्र तोययोनिर्निशाकरः ।

तेनाहं सहितः सङ्ख्ये यादोभिश्च समाश्रितः । मायामेतां हनिष्यामि त्वत्प्रसादान्न संशयः ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥
॥ वैशम्पायन उवाच ॥ एवमस्त्विति संहृष्टः शक्रस्त्रिदशवर्द्धनः । सन्दिदेशाग्रतः सोमं युद्धाय शिशिरायुधं ।
॥ शक्र उवाच ॥ गच्छ सोम सहायत्वं कुरु पाशधरस्य वै । असुराणां विनाशाय जयार्थञ्च दिवौकसां ।
त्वमप्रतिमवीर्य्यश्च ज्योतिषाञ्चेश्वरेश्वरः । त्वन्मयं सर्व्वलोकानां रसं रसविदो विदुः ।
क्षयवृद्धी तवाव्यक्ते सागरस्येव मण्डले । परिवर्त्तस्यहोरात्रं कालं जगति योजयन् ।
लोकच्छायामयं लक्ष्म तवाङ्के शशसंस्थितं । न विदुः सोम देवाश्च ये च नक्षत्रयोगिनः ।
त्वमादित्यपथादूर्द्ध्वं ज्योतिषाञ्चोपरि स्थितः । तमः प्रोत्सार्य्य सहसा भासयस्यखिलं जगत् ।
श्वेतभानुर्हिमज्योतिर्ज्योतिषामधिपः शशी । अब्दकृत् कालयोगात्मा इज्यो यज्ञरसो ऽव्ययः ।
ओषधीशः क्रियायोनिरब्जयोनिरनुष्णभाक् । शीतांशुरमृताधारश्चपलः श्वेतवाहनः ।
त्वं कान्तिः कान्तवपुषां त्वं सोमः सोमपायिनां । सौम्यस्त्वं सर्व्वलोकानां तिमिरघ्नस्त्वमृक्षराट् ।
तद्गच्छ त्वं सहानेन वरुणेन वरूथिना । शमयस्वासुरीं मायां यया दह्याम संयुगे ।
॥ सोम उवाच ॥ यन्मां वदसि युद्धार्थे देवराज वरप्रद । एष वर्षामि शिशिरं दैत्यमायापकर्षणं ।
एतान्मच्छीतनिर्द्दग्धान् पश्यस्व हिमवेष्टितान् । विमायान् विमदांश्चैव दानवांस्तु महामृधे ।
॥ वैशम्पायन उवाच ॥ ततो हिमकरोत्सृष्टाः सशाम्बा हिमवृष्टयः । वेष्टयन्ति स्म तान् घोरान् दैत्यान्मेघगणा इव ।
तौ पाशशुक्लायुधरौ वरुणेन्दू महाहवे । जघ्नतुर्हिमपातैश्च पाशपातैश्च दानवान् ।
द्वावम्बुनाथौ समरे तौ पाशहिमयोधिनौ । मृधे चेरतुरम्भोभिः क्षुब्धाविव महार्णवौ ।
ताभ्यामाप्लावितं सैन्यं तद्दानवमदृश्यत । जगत्संवर्त्तकाम्भोदैः प्रवृष्टैरिव संवृतं ।
तावुद्यतांशुपाशौ तु शशाङ्कवरुणावुभौ । शमयामासतुर्मायां देवौ तां दैत्यनिर्म्मितां ।
शीतांशुजालनिर्द्दग्धाः पाशैश्च यन्त्रिता मृधे । न शेकुश्चलितुं दैत्या विशिरस्का इवाद्रयः ।
शीतांशुनिहतास्ते तु पेतुर्दैत्या हिमार्द्दिताः । हिमप्लावितसर्व्वाङ्गा निरूष्माण इवाग्नयः ।
तेषान्तु दिवि दैत्यानां विपरीतप्रभाणि ह । विमानानि विचित्राणि पतन्ति चोत्पतन्ति च ।
तान् पाशहस्तग्रथितांश्छादितान् शीतरश्मिना । मयो ददर्श मायावी दानवान्दिवि दानवः ।
स शिलाजालविततां गण्डशैलाट्टहासिनीं । पादपोत्कटकूटाग्रां कन्दराकीर्णकाननां ।
सिंहव्याघ्रगणाकीर्णां नदन्तीं दैत्ययूथपैः । ईहामृगगणाकीर्णां पवनाघूर्णितद्रुमां ।
निर्म्मितां स्वेन पुत्त्रेण क्रौञ्चेन दिवि कामगां । प्रथितां पार्व्वतीं मायां ससृजे स समन्ततः ।
सा सशब्दैः शिलावर्षैः सम्पतद्भिश्च पादपैः । निजघ्ने देवसङ्घांस्तान्दानवांश्चाप्यजीवयत् ।
नैशाकरी वारुणी च माये ऽन्तर्द्दधतुस्ततः । अश्मभिश्चायसघनैः कीर्णा देवगणा रणे ।
साश्मसङ्घातविषमा द्रुमपर्व्वतसङ्कटा । अभवद्घोरसञ्चारा पृथिवी पर्व्वतैरिव ।
नानाहतोऽश्मभिः कश्चिच्छिलाच्छाप्यताडितः । नानिकृत्तो द्रुमगणैर्देवो ऽदृश्यत संयुगे ।

तदपभ्रष्टधनुषं भग्नप्रहरणाविलं । निष्प्रयत्नं सुरानीकं वर्ज्जयित्वा गदाधरं ।
स हि युद्धगतः श्रीमानीशो न स्म व्यकम्पत । सहिष्णुत्वाज्जगत्स्वामी न चुक्रोध गदाधरः ।
कालज्ञः कालमेघाभः समैक्षत कालमाहवे । देवासुरविमर्द्दं स द्रष्टुकामो जनार्द्दनः ।
ततो भगवता दिष्टौ रणे पावकमारुतौ । मायाया मयसृष्टायाः प्रवृद्धायाः शमाय वै ।
ततः प्रवृत्तावन्योन्यं प्रहृष्टौ ज्वालवेगिनौ । चोदितौ विष्णुवाक्येन तां मायामपकर्षतां । २११५
ताभ्यामुद्भ्रान्तमेघाभ्यां प्रवृद्धाभ्यां महामृधे । दग्धा सा पार्व्वती माया भस्मीभूता ननाश ह ।
सोऽनिलोऽनलसंयुक्तः सोऽनलश्चानिलाकुलः । दैत्यसेनां ददहतुर्युगान्तेष्विव मूर्च्छितौ ।
वायुः प्रधावितस्तत्र पश्चादग्निश्च मारुतात् । चेरतुर्दानवानीके क्रीडन्तावनिलानलौ ।
भस्मावयवभूतेषु प्रपतत्सु पतत्सु च । दानवानां विमानेषु हतकर्म्मणि पावके ।
वातस्कन्धापविद्धेषु विमानेषु समन्ततः । मायाबधे विनिर्वृत्ते स्तूयमाने गदाधरे । २१२०
निष्प्रयत्नेषु दैत्येषु त्रैलोक्ये मुक्तबन्धने । संप्रहृष्टेषु देवेषु साधु साध्विति सर्व्वशः ।
जये दशशताक्षस्य मयस्य च पराजये । दिक्षु सर्व्वासु शुद्धासु प्रवृत्ते धर्म्मसंस्तरे ।
अपावृते चन्द्रपथे अयनस्थे दिवाकरे । प्रकृतिस्थेषु लोकेषु त्रिषु चारित्रबन्धुषु ।
अभिन्नबन्धने मृत्यौ हूयमाने हुताशने । यज्ञभागिषु देवेषु स्वर्गार्थं दर्शयत्सु च ।
लोकपालेषु सर्व्वेषु दिक्षु संयानवर्त्तिषु । भावे तपसि शुद्धानामभावे पापकर्म्मिणां । २१२५
देवपक्षे प्रमुदिते दैत्यपक्षे पराजिते । त्रिपादविग्रहे धर्म्मे अधर्म्मे पादविग्रहे ।
अपावृतमहाद्वारे वर्त्तमाने च सत्पथे । स्वधर्म्मस्थेषु वर्णेषु लोकेऽस्मिन्नाश्रमेषु च ।
प्रजारक्षणयुक्तेषु भ्राजमानेषु राजसु । गीयमानासु गाथासु देवसंस्तवनादिषु ।
प्रशान्तकल्मषे लोके शान्ते तमसि दारुणे । अग्निमारुतयोस्तस्मिन् वृत्ते संग्रामकर्म्मणि ।
तन्मया विमला लोकास्ताभ्यां जयकृतप्रियाः । पूर्व्वदैत्यभयं श्रुत्वा मारुताऽग्निकृतं महत् । २१३०
कालनेमिरिति ख्यातो दानवः प्रत्यदृश्यत । भास्कराकारमुकुटः शिञ्जिताङ्गदभूषणः ।
मन्दराचलसङ्काशो महारजतसंवृतः । शतप्रहरणोदग्रः शतबाहुः शताननः ।
शतशीर्षः स्थितः श्रीमान् शतशृङ्ग इवाचलः । कक्षे महति संवृद्धो निदाघ इव पावकः ।
धूम्रकेशो हरितश्मश्रुर्दंष्ट्रालोष्ठपुटाननः । त्रैलोक्यान्तरविस्तारी नामयन् वपुषा क्षितिं ।
बाहुभिस्तुलयन् व्योम क्षिपन् पद्भ्यां महीधरान् । ईरयन्मुखनिश्वासैर्वृष्टिमन्तो बलाहकान् । २१३५
तिर्य्यगायतरक्ताक्षं मन्दरोदग्रवर्च्चसं । दिधक्षन्तमिवायान्तं सर्व्वान् देवगणान्मृधे ।
तर्जयन्तं सुरगणान् छादयन्तं दिशो दश । संवर्त्तकाले तृषितं दृप्तं मृत्युमिवोत्थितं ।
सुतलेनोच्छ्रयवता विपुलाङ्गुलिपर्व्वणा । माल्याभरणपूर्णेन किञ्चिच्चलितवर्म्मणा ।
उच्छ्रितेनाग्रहस्तेन दक्षिणेन वपुष्मता । दानवान् देवनिहतानुत्तिष्ठध्वमिति ब्रुवन् ।
समरे कालनेमिं तं द्विषतां कालनेमिनं । वीक्षन्ति स्म सुराः सर्व्वे भयवित्रस्तलोचनाः । २१४०

तं स्म वीक्षन्ति भूतानि क्रमन्तं कालनेमिनं। त्रिविक्रमं विक्रमन्तं नारायणमिवापरं।
सोऽच्छ्रयन्प्रथमं पादं मारुताघूर्णिताम्बरः। प्राक्रामदसुरो युद्धे त्रासयन् सर्व्वदेवताः।
समयेनासुरेन्द्रेण परिष्वक्तः क्रमन् रणे। कालनेमिर्बभौ दैत्यः सविष्णुरिव मन्दरः।
अथ विव्यथिरे देवाः सर्व्वे सेन्द्रपुरोगमाः। दृष्ट्वा कालमिवायान्तं कालनेमिं भयावहं।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि सप्तचत्वारिंशोऽध्यायः॥ ४७॥

॥वैशम्पायन उवाच॥ दानवांस्तांस्तु पिप्रीषुः कालनेमिर्म्महासुरः। व्यवर्द्धत महातेजास्तपान्ते जलदो यथा।
तं त्रैलोक्यान्तरगतं दृष्ट्वा ते दानवेश्वराः। उत्तस्थुरपरिश्रान्ताः प्राप्येवामृतमुत्तमं।
ते वीतभयसंत्रासा मयतारपुरोगमाः। तारकामयसंग्रामे सततं जितकाशिनः।
रेजुरायोधनगता दानवा युद्धदुर्म्मदाः। अस्त्रमभ्यस्यतां तेषां व्यूहांश्च परिधावतां।
प्रेक्षताञ्चाभवत् प्रीतिर्द्दानवं कालनेमिनं। ये तु तत्र मयस्यासन् मुख्या युद्धविशारदाः।
तेऽपि सर्व्वे भयं त्यक्त्वा हृष्टा योद्धुमुपस्थिताः। मयस्तारो वराहश्च हयग्रीवश्च वीर्य्यवान्।
विप्रचित्तिसुतः श्वेतः खरलम्बावुभावपि। अरिष्टो बलिपुत्रश्च किशोरोष्ट्रौ तथैव च।
स्वर्भानुश्चामरप्रख्यो वक्त्रयोधी महासुरः। एते चास्त्रविदः सर्व्वे सर्व्वे तपसि संस्थिताः।
दानवाः कृतिनो जग्मुः कालनेमिमनुत्तमं। ते गदाभिश्च गुर्व्वीभिश्चक्रैश्च सपरश्वधैः।
कालकल्पैश्च मुषलैः क्षेपणीयैश्च मुद्गरैः। अश्मभिश्चाद्रिसङ्काशैर्गण्डशैलैश्च दंशितैः।
पट्टिशैर्भिन्दिपालैश्च परिघैश्चोत्तमायुधैः। घातनीभिश्च गुर्व्वीभिः शतघ्नीभिस्तथैव च।
युगैर्यन्त्रैश्च निर्म्मुक्तैरर्गलैश्चायताडितैः। दोर्भिश्चायतपीनांसैः पाशैः प्रासैश्च मूर्च्छितैः।
सर्पैर्लेलिह्यमानैश्च विसर्पद्भिश्च सायकैः। वज्रैः प्रहरणीयैश्च दीप्यमानैश्च तोमरैः।
विकोषैश्चासिभिस्तीक्ष्णैः शूलैश्च शितनिर्म्मलैः। ते वै सन्दीप्तमनसः संगृहीतोत्तमायुधाः।
कालनेमिं पुरस्कृत्य तस्थुः संग्राममूर्द्धनि। सा दीप्तशस्त्रप्रवरा दैत्यानां रुरुचे चमूः।
द्यौर्निमीलितनक्षत्रा सघनेवाम्बुदागमे। देवतानामपि चमूर्म्मुमुदे शक्रपालिता।
दीप्ताशीतोष्णरूपेण चन्द्रभास्करवर्चसा। वायुवेगवती सौम्या तारागणपताकिनी।
तोयदाविद्धवसना ग्रहनक्षत्रहासिनी। यमेन्द्रवरुणैर्गुप्ता धनदेन च धीमता।
सम्प्रदीप्ताग्निपवना नारायणपरायणा। सा समुद्रौघसदृशी दिव्या देवमहाचमूः।
रराजास्त्रवती भीमा यक्षगन्धर्व्वशालिनी। तयोश्चम्वोस्तदानीन्तु बभूव स समागमः।
द्यावापृथिव्योः संयोगे यथा स्याद्युगपर्य्यये। तद्युद्धमभवद्घोरं देवदानवसङ्कुलं।
क्षमापराक्रममयं दर्पस्य विनयस्य च। निश्चक्रमुर्म्बलाभ्यान्तु ताभ्यां भीमाः सुरासुराः।
पूर्व्वापराभ्यां संरब्धाः सागराभ्यामिवाम्बुदाः। ताभ्यां बलाभ्यां संहृष्टास्ते देवदानवाः।
वनाभ्यां पर्व्वतीयाभ्यां पुष्पिताभ्यां यथा गजाः। समाजघ्नुस्तदा भेरीः शङ्खान्दध्मुश्च नैकशः।
स शब्दो द्यां भुवञ्चैव दिशश्च समपूरयत्। ज्याघाततलनिर्घोषो धनुषामपि निस्वनः।

दुन्दुभीनाञ्च नदतां दैत्यानन्वहृषुः खगाः । तेऽन्योन्यमभिसम्पेतुः पातयन्तः परस्परं ।
बभञ्जुर्ब्बाहुभिर्बाहून् द्वन्द्वमन्ये युयुत्सवः । देवतास्त्वासृजन् घोरान् परिघांश्चोत्तमायसान् ।
सस्रजुराजौ निस्त्रिंशान् गदा गुर्व्वीश्च दानवाः । गदानिपातैर्भग्नाङ्गा बाणैश्च शकलीकृताः ।
परिपेतुर्भृशं केचित् न्युब्जाः केचित् ससर्ज्जिरे । ततो रथैः सतुरगैर्विमानैश्चाशुगामिभिः ।
संपेतुस्ते सुसंरब्धा रोषादन्योन्यमाहवे । संवर्त्तमानाः समरे निवर्त्तन्तस्तथापरे ।
रथा रथैर्न्यरुध्यन्त पदाताश्च पदातिभिः । तेषां रथानां तुमुलः स शब्दः शब्दवाहिनां ।
बभूवाथ प्रसक्तानां नभसीव पयोमुचां । बभञ्जिरे रथान् केचित् केचित् संमर्द्दिता रथैः ।
सम्बाधमेके संप्राप्य न शेकुश्चलितुं रथाः । अन्योऽन्यं समरेऽन्ये तु दोर्भ्यामुत्क्षिप्य दर्पिताः ।
संह्रादमानाभरणा जघ्नुस्तत्रासिचर्म्मिणः । अस्त्रैरन्ये विनिर्भिन्ना वेमू रक्तं हता युधि ।
चरज्जलानां सदृशा जलदानां समागमे । तदस्त्रशस्त्रग्रथितं क्षिप्तोत्क्षिप्तगदाविलं ।
देवदानवसंक्षुब्धं सङ्कुलं युद्धमाबभौ । तद्दानवमहामेघं देवायुधतडित्प्रभं ।
अन्योऽन्यबाणवर्षेन्तत् युद्धदुर्द्दिनमाबभौ । एतस्मिन्नन्तरे क्रुद्धः कालनेमिर्महासुरः ।
व्यवर्द्धत समुद्रौघैः पूर्य्यमाण इवाम्बुदः । तस्य विद्युच्चलापीडाः प्रदीप्ताशनिवर्षिणः ।
गात्रान्नगशिरप्रख्यादभिनिष्पेतुर्बलाहकाः । क्रोधान्निश्वसतस्तस्य भ्रुभेदस्वेदवर्षिणः ।
साग्निनिस्फुलिङ्गपवनान्मुखान्निश्चेरुरर्च्चिषः । तिर्य्यगूर्द्धञ्च गगणे ववृधुस्तस्य बाहवः ।
पञ्चास्याः कृष्णवपुषो लेलिह्यन्त इवोरगाः । सोऽस्त्रजालैर्बहुविधैर्द्धनुर्भिः परिघैरपि ।
दिव्यमाकाशमावव्रे पर्व्वतैरुच्छ्रितैरिव । सोऽनिलोद्धूतवसनस्तस्थौ संग्राममूर्द्धनि ।
सन्ध्यातपग्रस्तशिखः साचाग्मेरुरिवाचलः । ऊरुवेगपरिक्षिप्तैः शैलशृङ्गाग्रपादपैः ।
अपातयद्देवगणान् वज्रेणेव महागिरीन् । बाहुभिः शस्त्रनिस्त्रिंशैश्छिन्नभिन्नशिरोरसः ।
न शेकुश्चलितुं देवाः कालनेमिहता युधि । मुष्टिभिर्निहताः केचित् केचिच्च विदलीकृताः ।
यक्षगन्धर्व्वपतयः पेतुः सह महोरगैः । तेन वित्रासिता देवाः समरे कालनेमिना ।
न शेकुर्य्यत्नवन्तोऽपि यत्नं कर्त्तुं विचेतसः । तेन शक्रः सहस्राक्षः स्यन्दितः शरबन्धनैः ।
ऐरावतगतः सङ्ख्ये चलितुं न शशाक ह । निर्ज्जलाम्भोदसदृशो निर्ज्जलार्णवसप्रभः ।
निर्व्यापारः कृतस्तेन विपाशो वरुणो मृधे । रणे वैश्रवणस्तेन परिघैः कालरूपिभिः ।
विलपन् लोकपालेशस्त्याजितो धनदः क्रियां । यमः सर्व्वहरस्तेन मृत्युप्रहरणो रणे ।
याम्यामवस्थाममरोनीतः स्वां दिशमाविशत् । स लोकपालान्निर्जित्य कृत्वा तेषाञ्च कर्म्म तत् ।
दिक्षु सर्व्वासु देहं स्वं चतुर्द्धा विदधे तदा । स नक्षत्रपथं गत्वा दिव्यं स्वर्भानुदर्शितं ।
जहार लक्ष्मीं सोमस्य यच्चास्य विषयं महत् । चालयामास दीप्तांशुं स्वर्गद्वारात् सभास्करं ।
सायनञ्चास्य विषयं जहार दिनकर्म्म च । सोऽग्निं देवमुखे दृष्ट्वा चकारात्ममुखे शये ।
वायुञ्च तरसा जित्वा चकारात्मवशानुगं । स समुद्रान् समानीय सर्व्वाश्च सरितो बलात् ।

चकारात्मवशे वीर्य्यादिद्भूतांश्च विभ्ववः । अपः स वरुणः कृत्वा दिविजा याश्च भूमिजाः ।
स्थापयामास जगतीं सुगुप्तां धरणीधरैः । स स्वयम्भूरिवाभाति महाभूतपतिर्म्महान् ।
सर्व्वलोकमयो दैत्यः सर्व्वलोकभयावहः । स लोकपालैकवपुश्चन्द्रसूर्य्यग्रहात्मवान् ।
पावकानिलसङ्घातो रराज युधि दानवः । पारमेष्ठ्ये स्थितं स्थाने लोकानां प्रभवाप्यये ।
तं तुष्टुवुर्दैत्यगणा देवा इव पितामहं ।

इति श्री महाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

॥ वैशम्पायन उवाच ॥ पश्च तं नाभ्यवर्त्तन्त विपरीतेन कर्म्मणा । वेदा धर्म्मः क्षमा सत्यं श्रीश्च नारायणाश्रया ।
स तेषामनुपस्थानात् सक्रोधो दानवेश्वरः । वैष्णवं पदमन्विच्छन् ययौ नारायणान्तिकं ।
स ददर्श सुपर्णस्थं शङ्खचक्रगदाधरं । दानवानां विनाशाय भ्रामयन्तं गदां शुभां ।
सजलाम्भोदसदृशं विद्युत्सदृशवाससं । स्वारूढं स्वर्णपक्षाढ्यं शिखिनं काश्यपं खगं ।
दृष्ट्वा दैत्यविनाशाय रणे स्वस्थमिव स्थितं । दानवो विष्णुमक्षोभ्यं बभाषे क्षुब्धमानसः ।
अयं स रिपुरस्माकं पूर्व्वेषां दानववर्षिणां । अर्णवावासिनश्चैव मधोर्वै कैटभस्य च ।
अयं सविग्रहोऽस्माकमशाम्यः किल कथ्यते । येन नः संयुगेष्वद्य बहवो दानवा हताः ।
अयं स निर्घृणो युद्धे स्त्रीबालवधकारकः । येन दानवनारीणां सीमन्तोद्धरणं कृतं ।
अयं स विष्णुर्देवानां वैकुण्ठश्च दिवौकसां । अनन्तो भोगिनामप्सु स्वयम्भूश्च स्वयम्भुवः ।
अयं स नाथो देवानामस्माकं विप्रिये स्थितः । अस्य क्रोधेन महता हिरण्यकशिपुर्हतः ।
अस्य छायामुपाश्रित्य देवा मखमुखे स्थिताः । आज्यं महर्षिभिर्द्दत्तमश्नुवन्ति त्रिधा हुतं ।
अयं नो निधने हेतुः सर्व्वेषां देवविद्विषां । अस्य चक्रं प्रविष्टानि कुलान्यस्माकमाहवे ।
अयं स किल युद्धेषु सुरार्थे त्यक्तजीवितः । सवितुस्तेजसा युक्तं चक्रं क्षिपति शत्रुषु ।
अयं स कालो दैत्यानां कालभूते मयि स्थिते । अतिक्रान्तस्य कालस्य फलं प्राप्स्यति दुर्म्मतिः ।
दिष्ट्येदानीं समक्षं मे विष्णुरेष समागतः । अद्य मद्बाणनिष्पिष्टो मामेव प्रणमिष्यति ।
यास्याम्यपचितिं दिष्ट्या पूर्व्वेषामद्य संयुगे । इमं नारायणं हत्वा दानवानां भयावहं ।
क्षिप्रमेव वधिष्यामि रणे नारायणाश्रयान् । जात्यन्तरगतोऽप्येष मृधे बाधति दानवान् ।
एषोऽनन्तः पुरा भूत्वा पद्मनाभ इति स्मृतः । जघानैकार्णवे घोरे तावुभौ मधुकैटभौ ।
विनिवेश्य स्वके ऊरौ निहतौ दानवेश्वरौ । द्विधा भूतं वपुः कृत्वा सिंहार्द्धं नरसंस्थितं ।
पितरं मे जघानैको हिरण्यकशिपुं पुरा । शुभं गर्भमधत्तैनमदितिर्द्देवतारणिः ।
यज्ञकाले बलेर्य्यो वै कृत्वा वामनरूपतां । त्रीन् लोकानाजहारैव क्रममाणस्त्रिभिः क्रमैः ।
भूयस्त्विदानीं समरे सम्प्राप्ते तारकामये । मया सह समागम्य सह देवैर्विनङ्क्ष्यति ।
स एवमुक्त्वा बहुधा क्षिपन्नारायणं रणे । वाग्भिरप्रतिरूपाभिर्युद्धमेवाभ्यरोचयत् ।
क्षिप्यमाणोऽसुरेन्द्रेण न चुकोप गदाधरः । क्षमाबलेन महता सस्मितं वाक्यमब्रवीत् ।

अल्पं दर्पबलं दैत्य स्थिरमक्रोधजं बलं । हतस्त्वं दर्पजैर्द्दोषैः क्षमां योऽतीत्य भाषसे ।
अधमस्त्वं मम मतो धिगेतत्तव वाग्बलं । न तत्र पुरुषाः सन्ति यत्र गर्ज्जन्ति योषितः ।
अहं त्वां दैत्य पश्यामि पूर्व्वेषां मार्गगामिनं । प्रजापतिकृतं सेतुं को भित्त्वा स्वस्तिमान् व्रजेत् ।
अद्य त्वां नाशयिष्यामि देवव्याघातकारिणं । स्वेषु स्वेषु च स्थानेषु स्थापयिष्यामि देवताः ।
॥ वैशम्पायन उवाच ॥ एवं ब्रुवति वाक्यन्तु मृधे श्रीवत्सधारिणि । जहास दानवः क्रोधाद्धस्तांश्चक्रे च सायुधान् ।
स बाहुशतमुद्यम्य सर्व्वास्त्रग्रहणं रणे । क्रोधाद्द्विगुणरक्ताक्षो विष्णुं वक्षस्यताडयत् ।
दानवाश्चापि समरे मयतारपुरोगमाः । उद्यतायुधनिस्त्रिंशा दृष्ट्वा विष्णुमभिद्रवन् ।
स ताड्यमानोऽतिबलैर्दैत्यैः सर्व्वायुधोद्यतैः । न चचाल हरिर्युद्धेऽकम्पमान इवाचलः ।
सम्यक्त्त्व सुपर्णेन कालनेमी महासुरः । सर्व्वप्राणेन महतीं गदामुद्यम्य बाहुभिः ।
मुमोच ज्वलितां घोरां संरब्धो गरुडोपरि । कर्म्मणा तेन दैत्यस्य विष्णुर्विस्मयमागतः ।
येन तस्य सुपर्णस्य पातिता मूर्द्ध्नि सा गदा । तदा गमत्पदा भूमिं पक्षी व्यथितविग्रहः ।
सुपर्णं व्यथितं दृष्ट्वा क्षतञ्च वपुरात्मनः । क्रोधात् संरक्तनयनो वैकुण्ठश्चक्रमाददे ।
व्यवर्द्धत च वेगेन सुपर्णेन समं प्रभुः । भुजाश्चास्य व्यवर्द्धन्त व्याप्नुवन्तो दिशो दश ।
सदिशः प्रदिशश्चैव खञ्च गाञ्च प्रपूरयन् । ववृधेऽथ पुनर्लोकान् क्रान्तुकाम इवौजसा ।
तं जयाय सुरेन्द्राणां वर्द्धमानं नभस्तले । ऋषयः सह गन्धर्व्वैस्तुष्टुवुर्म्मधुसूदनं ।
स द्यां किरीटेन लिखन् साभ्रमम्बरमम्बरैः । पद्भ्यामाक्रम्य वसुधां दिशः प्रच्छाद्य बाहुभिः ।
सूर्य्यस्य रश्मितुल्याभं सहस्रारमरिक्षयं । दीप्ताग्निसदृशं घोरं दर्शनीयं सुदर्शनं ।
सुवर्णनेमिपर्य्यन्तं वज्रनाभं भयावहं । मेदोऽस्थिमज्जरुधिरैर्दिग्धं दानवसम्भवैः ।
अद्वितीयं प्रहारेषु क्षुरपर्य्यन्तमण्डलं । स्रग्दाममालाविततं कामगं कामरूपिणं ।
स्वयं स्वयम्भुवा सृष्टं भयदं सर्व्वविद्विषां । महर्षिरोषैराविष्टं नित्यमाहवदर्पितं ।
क्षेपणाद्यस्य मुह्यन्ति लोकाः सस्थाणुजङ्गमाः । क्रव्यादानि च भूतानि तृप्तिं यान्ति महामृधे ।
तमप्रतिमकर्म्माणं समानं सूर्य्यवर्च्चसा । चक्रमुद्यम्य समरे क्रोधदीप्तो गदाधरः ।
सम्मुष्णन् दानवं तेजः समरे स्वेन तेजसा । चिच्छेद बाहूंश्चक्रेण श्रीधरः कालनेमिनः ।
तच्च वक्त्रशतं घोरं साग्निचूर्णाट्टहासि वै । तस्य दैत्यस्य चक्रेण प्रममाथ बलाद्धरिः ।
सञ्छिन्नबाहुर्व्विशिराः प्राकम्पत न दानवः । कबन्धोऽवस्थितः सङ्ख्ये विशाख इव पादपः ।
स वितत्य महापक्षौ वायोः कृत्वा समं जवं । उरसा पातयामास गरुडः कालनेमिनं ।
स तस्य देहो विमुखो विशाखः खात् परिभ्रमन् । निपपात दिवं त्यक्त्वा क्षोभयन्धरणीतलं ।
तस्मिन्निपतिते दैत्ये देवाः सर्षिगणास्तदा । साधु साध्विति वैकुण्ठं समेताः प्रत्यपूजयन् ।
अपरे ये तु दैत्या वै युद्धे दृष्टपराक्रमाः । ते सर्व्वे बाहुभिर्व्याप्ता न शेकुश्चलितुं रणे ।
कांश्चित् केशेषु जग्राह कांश्चित्कण्ठेन्यपीडयत् । पाटयन् कस्यचिद्वक्त्रं मध्ये कांश्चिदथाग्रहीत् ।

ते गदाचक्रनिर्दग्धा गतसत्त्वा गतासवः। गगणाद्भ्रष्टसर्व्वाङ्गा निपेतुर्द्धरणीतले।
तेषु सर्व्वेषु दैत्येषु हतेषु पुरुषोत्तमः। तस्थौ शक्रप्रियं कृत्वा कृतकर्म्मा गदाधरः। २०५
तस्मिन् विमर्द्दे निर्वृत्ते संग्रामे तारकामये। तं देशमाजगामाशु ब्रह्मा लोकपितामहः।
सर्व्वै ब्रह्मर्षिभिः सार्द्धं गन्धर्व्वैः साप्सरोगणैः। देवदेवो हरिं देवं पूजयन् वाक्यमब्रवीत्।
॥ ब्रह्मोवाच ॥ कृतं देव महत् कर्म्म सुराणां शल्यमुद्धृतं। बधेनानेन दैत्यानां वयञ्च परितोषिताः।
योऽयं हतस्त्वया विष्णो कालनेमी महासुरः। त्वमेकोऽस्य मृधे हन्ता नान्यः कश्चन विद्यते।
एष देवान् परिभवन् लोकांश्च सचराचरान्। ऋषीणां कदनं कृत्वा मामपि प्रतिगर्ज्जति। २१०
तदनेन तवोग्रेण परितुष्टोऽस्मि कर्म्मणा। यदयं कालतुल्याभः कालनेमी त्वया हतः।
तदा गच्छस्व भद्रन्ते गच्छाम दिवमुत्तमां। ब्रह्मर्षयस्त्वां तत्रस्थाः प्रतीक्षन्ते सदोगताः।
अहं महर्षयश्चैव तत्र त्वां वदताम्बर। अर्च्चयिष्याम विधिवद्गोर्भिर्द्दिव्याभिरच्युत।
किञ्चाहं तव दास्यामि वरं वरभृताम्वर। सुरेष्वपिसदैत्येषु वराणां वरदो भवान्।
निर्यातयैतत्त्रैलोक्यं स्फीतं निहतकण्टकं। तस्मिन्नेव मृधे विष्णो शक्राय सुमहात्मने। २१५
एवमुक्तो भगवता ब्रह्मणा हरिरव्ययः। देवान् शक्रमुखान् सर्व्वानुवाच शुभया गिरा।
॥ विष्णुरुवाच ॥ श्रूयतां त्रिदशाः सर्व्वे यावन्तो वै समागता। श्रवणावहितैर्द्देवैः पुरस्कृत्य पुरन्दरं।
अस्मिन्नः समरे सर्व्वे कालनेमिमुखा हताः। दानवा विक्रमोपेताः शक्रादपि महत्तराः।
तस्मिन्महति संक्रन्दे द्वावेव तु विनिःसृतौ। वैरोचनिश्च दैत्येन्द्रः स्वर्भानुश्च महाग्रहः।
तदिष्टां भजतां शक्रो दिशं वरुण एव च। याम्यां यमः पालयतामुत्तराञ्च धनाधिपः। २२०
ऋक्षैः सह गतो योगं काले चरतु चन्द्रमाः। अब्दं ऋतुमुखं सूर्य्यो भजतामयनैः सह।
आज्यभागाः प्रवर्त्तन्तां सदस्यैरभिपूजिताः। हूयन्तामग्नयो विप्रैर्वेददृष्टेन कर्म्मणा।
देवाश्च वलिहोमेन स्वाध्यायेन महर्षयः। श्राद्धेन पितरश्चैव तृप्तिं यान्तु यथासुखं।
वायुश्चरतु मार्गस्थस्त्रिधा दीप्यतु पावकः। त्रयो वर्णाश्च लोकांस्त्रींस्तर्पयन्त्वात्मजैर्गुणैः।
क्रतवः संप्रवर्त्स्यन्तां दीक्षणीयैर्द्विजातिभिः। दक्षिणाश्चोपवर्त्तन्तां यथार्थं सत्रयाजिनां। २२५
गाश्च सूर्य्यो रसान् सोमो वायुः प्राणांश्च प्राणिषु। तर्पयन्तः प्रवर्त्तन्तां शिवैः सौम्यैश्च कर्म्मभिः।
यथावदानुपूर्व्व्येण महेन्द्रसलिलोद्भवाः। त्रैलोक्यमातरः सर्व्वाः सागरं यान्तु सिन्धवः।
दैत्येभ्यस्त्यज्यतां भीतिः शान्तिं व्रजत देवताः। स्वस्ति वोऽस्तु गमिष्यामि ब्रह्मलोकं सनातनं।
स्वगृहे स्वर्गलोके वा संग्रामे वा विशेषतः। विस्रम्भो हि न कर्त्तव्यो नित्यं क्षुद्रा हि दानवाः।
छिद्रेषु प्रहरन्त्येते नैतेषां संस्थितिर्ध्रुवा। सौम्यानामृजुभावानां भवतामार्ज्जवा मतिः। २३०
अहन्तु दुष्टभावानां युष्मासु सुदुरात्मनां। असम्यग्वर्त्तमानानां मार्गं दास्यामि देवताः।
यदा च सुदुराधर्षं दानवेभ्यो भयं भवेत्। तदा समुपगम्याशु विधास्ये वस्ततोऽभयं।
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा सुरगणान् विष्णुः सत्यपराक्रमः। जगाम ब्रह्मणा सार्द्धं ब्रह्मलोकं महायशाः।

एतदाश्चर्य्यमभवत् संग्रामे तारकामये । दानवानाञ्च विष्णोश्च यन्मां त्वं परिपृच्छसि ।

इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि ऊनपञ्चाशोऽध्यायः ॥ ४९ ॥

॥ जनमेजय उवाच ॥ ब्रह्मणा देवदेवेन सार्द्धं सलिलयोनिना ब्रह्मलोकं गतो ब्रह्मन् वैकुण्ठः किं चकार ह । २७९०

किमर्थञ्चादिदेवेन नीतः सलिलयोनिना । विष्णुर्दैत्यवधे वृत्ते देवैश्च कृतसत्क्रियः ।

ब्रह्मलोके च किं स्थानं कं वा योगमुपास्त सः । कं वा दधार नियमं स विभुर्भूतभावनः ।

कथं तस्यामतस्तत्र विश्वं जगदिदं महत् । श्रियमाप्नोति विपुलां सुरासुरनरार्च्चितां ।

कथं स्वपिति घर्म्मान्ते बुध्यते जलदक्षये । कथञ्च ब्रह्मलोकस्थो धुरं वहति लौकिकीं ।

चरितं तस्य विप्रेन्द्र दिव्यं भगवतो विधिं । विस्तरेण यथातत्त्वं सर्व्वमिच्छामि वेदितुं । २७९५

॥ वैशम्पायन उवाच ॥ शृणु नारायणस्यादौ प्रवृत्तिं विस्तरेण तु । ब्रह्मलोके यथा गत्वा ब्रह्मणा सह मोदते ।

कामं तस्य गतिः सूक्ष्मा देवैरपि दुरासदा । यच्च वक्ष्याम्यहं राजंस्तन्मे निगदतः शृणु ।

एष लोकमयो देवो लोकाश्चैतन्मयास्त्रयः । एष देवमयश्चैव देवाश्चैतन्मया दिवि ।

अस्य पारं न पश्यन्ति बहवः पारचिन्तकाः । एष पारं परस्यैव लोकानां वेद माधवः ।

अस्य देवान्धकारस्य मार्गितव्यस्य दैवतैः । शृणु वै यत्तदा वृत्तं ब्रह्मलोके पुरातनं । २८००

स गत्वा ब्रह्मणो लोकं दृष्ट्वा पैतामहं पदं । ववन्दे तानृषीन् सर्व्वान् विष्णुरार्षेण कर्म्मणा ।

सोऽग्निं प्राक्भवने दृष्ट्वा हूयमानं महर्षिभिः । अवन्दत महातेजाः कृत्वा पौर्व्वाह्णिकीं क्रियां ।

स ददर्श मखेष्वाज्यैरिज्यमानं महर्षिभिः । भागं यज्ञियमग्र्यं स्वदेहमपरं स्थितं ।

अभिवाद्याभिवाद्यानामृषीणां ब्रह्मवर्च्चसां । परिचक्राम सोऽचिन्त्यो ब्रह्मलोकं सनातनं ।

स ददर्शोच्छ्रितान् यूपांश्चषालाग्रविभूषितान् । मखेषु च ब्रह्मर्षिभिः शतशः कृतलक्षणान् । २८०५

आज्यधूमं समाघ्राय शृण्वन् वेदान् द्विजेरितान् । यज्ञैरिज्यन्तमात्मानं पश्यंस्तत्र चचार ह ।

ऊचुस्तमृषयो देवाः सदस्याः सदसि स्थिताः । अर्घोद्यतभुजाः सर्व्वे पवित्रान्तरपाणयः ।

देवेषु वर्त्तते यद्वै सर्व्वं तद्धि जनार्द्दनात् । यत् प्रवृत्तञ्च देवेभ्यस्तद्विद्धि मधुसूदनात् ।

अग्नीषोममयं लोकं ये विदुर्विदुषो जनाः । तं सोममग्निं लोकञ्च वेद विष्णुं पितामहः ।

क्षीराद्यथा दधि भवेद्दध्नः सर्पिर्यथा भवेत् । मथ्यमानेषु भूतेषु तथा लोका जनार्द्दनात् । २८१०

यथेन्द्रियेषु भूतेषु परमात्माभिधीयते । तथा देवेषु वेदेषु लोकेषु विदितो हरिः ।

यथा भूतेन्द्रियावाप्तिर्विहिता भुवि देहिनां । तथा प्राणेश्वरावाप्तिर्देवानां दिवि वैष्णवी ।

मन्त्रिणां सत्रफलदः पवित्रं परमात्मवान् । लोकतन्त्रकरो ह्येष मन्त्रैर्मन्त्र इवार्च्यते ।

॥ ऋषय ऊचुः ॥ स्वागतं ते सुरश्रेष्ठ पद्मनाभ महाद्युते । इदं यज्ञियमातिथ्यं मन्त्रतः प्रतिगृह्यतां ।

नमस्य यज्ञपूतस्य पात्रं पाद्यस्य पावनः । अतिथिस्त्वं हि मन्त्रात्मा स्वदृष्टः परमो मतः । २८१५

त्वयि योद्धुं गते विष्णो न प्रावर्त्तन्त नः क्रियाः । अवैष्णवस्य यज्ञस्य न हि कर्म्म विधीयते ।

महत्त्विमस्य यज्ञस्य त्वत्प्रसूतिः फलं लभेत् । अथात्मानमिहास्माभिरिज्यमानं निरीक्षसे ।

एवमस्त्विति तान् विप्रान् भगवान् प्रतिपूजयन्। मुमुदे ब्रह्मलोकस्थो ब्रह्मेव हि पितामहः।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पञ्चाशत्तमोऽध्यायः ॥ ५० ॥
॥ वैशम्पायन उवाच ॥ ऋषिभिः पूजितस्तैस्तु विवेश हरिरीश्वरः। पौराणं गुह्यसदनं दिव्यं नारायणाश्रयं।
स तद्विवेश हृष्टात्मा तानामन्त्र्य सदोगतान्। प्रणम्य चादिदेवाय ब्रह्मणे पद्मयोनये। २८२०
स्वेन नाम्ना परिज्ञातं स तन्नारायणाश्रमं। प्रविशन्नेव भगवानायुधानि व्यसर्ज्जयत्।
स तत्राम्बुपतिप्रख्यं ददर्शालयमात्मनः। स्वधिष्ठितं देवगणैः शाश्वतैश्च महर्षिभिः।
सम्वर्त्तकाम्बुदोपेतं नक्षत्रस्थानसङ्कुलं। तिमिरौघपरिच्छिन्नमप्रधृष्यं सुरासुरैः।
न तत्र विषयो वायोर्नेन्दोर्नापि विवस्वतः। वपुषा पद्मनाभस्य स देशस्तेजसा वृतः।
स तत्र प्रविशन्नेव जटाभारं समुद्वहन्। सहस्रशीर्षो भूत्वा च शयनायोपचक्रमे। २८२५
लोकानामन्तकालज्ञा काली नयनशालिनी। उपतस्थे महात्मानं निद्रा तं कालरूपिणी।
स शिश्ये शयने दिव्ये समुद्राम्भोदशीतले। हरिरेकार्णवाङ्केन व्रतेन व्रतिनाम्बरः।
तं शयानं महात्मानं भवाय जगतः प्रभुं। उपासाञ्चक्रिरे विष्णुं देवाः सर्षिगणास्तथा।
तस्य सुप्तस्य शुशुभे नाभिमध्यात् समुत्थितं। आद्यं तस्यासनं पद्मं ब्रह्मणः सूर्य्यसन्निभं।
सहस्रपत्रं वर्णाढ्यं सुकुमारं सुपुष्पितं। ब्रह्मसूत्रोद्यतकरः स्वपन्नेव महामुनिः। २८३०
आवर्त्तयति लोकानां सर्व्वेषां कालपर्य्ययं। निश्चेरुस्तस्य वदनान्निश्वासपवनेरिताः।
प्रजानां पङ्क्तयो ह्योघैर्निष्पतन्त्युत्पतन्ति च। ते सृष्टाः प्राणिनामोघा विभक्ता ब्रह्मणा स्वयं।
चतुर्द्धा स्वां गतिं जग्मुः कृतान्तोक्तेन कर्म्मणा। न तं वेद स्वयं ब्रह्मा नापि ब्रह्मर्षयोऽव्ययाः।
विष्णुं निद्रामयं योगं प्रविष्टं तमसा वृतं। ते तु ब्रह्मर्षयः सर्व्वे पितामहपुरोगमाः।
न विदुस्तं क्वचित् सुप्तं क्वचिदासीनमासने। जागर्त्ति कोऽत्र कः शेते कश्च सुप्तश्च नेङ्गते। २८३५
को भोगवान् को द्युतिमान् कृष्णात् कृष्णतरश्च कः। विमृषन्ति स्म तं देवा दिव्याभिरुपपत्तिभिः।
न चैनं शेकुरन्वेष्टुं कर्म्मतो जन्मतोऽपि वा। गाथाभिस्तत्प्रतिष्ठाभिर्ये तस्य चरितं विदुः।
पुराणास्तं पुराणेषु ऋषयः संप्रचक्षते। श्रूयते चास्य चरितं वेदेष्वपि पुरातनं।
महापुराणात् प्रभृति परं तस्य न विद्यते। यच्चास्य देवदेवस्य चरितं सुप्रभावजं।
ते नेमाः श्रुतयो व्याप्ता लौकिक्यो देवजाश्च याः। भवकाले भवत्येष भूतानां भूतभावनः। २८४०
दानवानामभावाय जागर्त्ति मधुसूदनः। यदेनं वीक्षितुं देवा न शेकुः सुप्तमव्ययं।
ततः स्वपिति घर्म्मान्ते जागर्त्ति जलदक्षये। तस्मिन् सुप्ते न वर्त्तन्ते मन्त्रपूताः क्रतुक्रियाः।
स हि यज्ञाश्च वेदाश्च यज्ञाङ्गानि च सर्व्वशः। या हि यज्ञगतिः प्रोक्ता स एष पुरुषोत्तमः।
शरत्प्रवृत्तयज्ञो हि जागर्त्ति मधुसूदनः। तदिदं वार्षिकं चक्रं धारयत्यम्बुदेश्वरः।
वैष्णवं कर्म्म कुर्व्वाणः सुप्ते विष्णौ पुरन्दरः। या त्वेषा शङ्करी माया निद्रेति जगति स्थिता। २८४५
साऽकस्माद्रूपिणी घोरा कालरात्रिर्महोच्छ्रिता। तस्यास्तनुस्तमोद्वारा निशा दिवसनाशिनी।

जीवितार्द्धहरा सा तु सर्व्वप्राणभृतां भुवि । नैतया कश्चिदाविष्टो जृम्भमाणो मुहुर्मुहुः ।
शक्तः प्रसहितुं वेगं मज्जन्निव महार्णवे । अन्नजा भुवि मर्त्यानां श्रमजा वा कथञ्चन ।
सैषा भवति मर्त्यस्य निद्रा सर्व्वस्य लौकिकी । स्वप्नान्ते चीयते ह्येषा प्रायशो भुवि देहिनां ।
मृत्युकाले च भूतानां प्राणान् क्षपयते भृशं । देवेष्वपि दधारैनां नान्यो नारायणादृते । १८५०
सखी सर्व्वहरस्यैषा पाप्मा विष्णोः शरीरजा । सैषा नारायणमुखे दृष्ट्वा कमललोचना ।
लोकानल्पेन कालेन भजते भूतमोहिनी । एवमेषा हितार्थाय लोकानां कृष्णवर्त्मना ।
भ्रियते सेवनीया हि पत्येव हि पतिव्रता । स तया निद्रयाच्छन्नस्तस्मिन्नारायणाश्रमे ।
शेते स्म भगवान् विष्णुर्मोहयन् जगदव्ययः । तस्य वर्षसहस्राणि शयानस्य महात्मनः ।
जग्मुः कृतयुगश्चैव त्रेता चैव युगोत्तमं । स तु द्वापरपर्य्यन्ते दृष्ट्वा लोकान् सुदुःखितान् । १८५५
प्राबुध्यत महातेजाः स्तूयमानो महर्षिभिः ।
॥ ऋषय ऊचुः ॥ जहीहि निद्रां सहजां भुक्तपूर्व्वामिव स्रजं । इमे ते ब्रह्मणा सार्द्धं देवा दर्शनकाङ्क्षिणः ।
इमे ते ब्रह्मविद्वांसो ब्रह्मसंस्तववादिनः । वर्द्धयन्ते हृषीकेश ऋषयः संशितव्रताः ।
एतेषामात्मभूतानां भूतानामात्मभावन । शृणु विष्णो शुभा वाचो भूयोमाम्यनिलाम्भसां ।
इमं त्वां सप्त मुनयः सहिता मुनिमण्डलैः । स्तुवन्ति देव दिव्याभिर्गेयाभिर्गीर्भिरञ्जसा । १८६०
उत्तिष्ठ शतपत्राक्ष पद्मनाभ महाद्युते । कारणं किञ्चिदुत्पन्नं देवानां कार्य्यगौरवात् ।
॥ वैशम्पायन उवाच ॥ स संक्षिप्य जगत् सर्व्वं तिमिरौघं विदारयन् । उदतिष्ठद्धृषीकेशः श्रिया परमया ज्वलन् ।
स ददर्श सुरान् सर्व्वान् समेतान् सपितामहान् । विवक्षून् क्षुभितांश्चैव जगत्यर्थे समागतान् ।
तानुवाच हरिर्द्देवान्निद्राविश्रान्तलोचनः । तत्त्वदृष्टार्थया वाचा धर्म्महेत्वर्थयुक्तया ।
॥ विष्णुरुवाच ॥ कुतो वो विग्रहो देवाः कुतो वो भयमागतं । कस्य वा केन वा कार्य्यं किं वा मयि न वर्त्तते । १८६५
न खल्वकुशलं लोके वर्त्तते दानवोत्थितं । नृणामायासजननं शीघ्रमिच्छामि वेदितुं ।
एष ब्रह्मविदां मध्ये विहाय शयनोत्तमं । शिवाय भवतामर्थे स्थितः किं करवाणि वः ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि एकपञ्चाशोऽध्यायः ॥ ५१ ॥
॥ वैशम्पायन उवाच ॥ तच्छ्रुत्वा विष्णुगदितं ब्रह्मा लोकपितामहः । उवाच परमं वाक्यं हितं सर्व्वदिवौकसां ।
नास्ति किञ्चिद्भयं विष्णो सुराणामसुरान्तक । येषां भवानभयदः कर्णधारो रणे रणे ।
शक्रे जयति देवेशे त्वयि चारिनिसूदने । धर्म्मे प्रयतमानानां दानवानां कुतो भयं । १८७०
सत्ये धर्म्मे च निरतान्मानवान् विगतज्वरान् । नाकालधर्म्मणो मृत्युः शक्नोति प्रसमीक्षितुं ।
मामवामाश्च पतयः पार्थिवा वै परस्परं । षड्भागमुपयुञ्जाना न भेदं कुर्व्वते मिथः ।
ते प्रजानां शुभकराः करदैरविगर्हिताः । आकरैर्विप्रयुक्तार्थाः कोषमापूरयन्त्युत ।
स्फीतान् जनपदान् स्वान् स्वान् पालयन्तः क्षमापराः । प्रतीक्ष्णदण्डाश्चतुरो वर्णान् जुगुपुरञ्जसा ।
मोहनीया भूतानां सचिवैः साधुपूजिताः । चतुरङ्गैर्बलैर्युक्ताः षड्गुणानुपभुञ्जते । १८७५

धनुर्व्वेदपराः सर्व्वे सर्व्वे वेदेषु निष्ठिताः । यजन्ते च यथाकालं यज्ञैर्विपुलदक्षिणैः ।
वेदानधीत्य दीक्षाभिर्महर्षीन् ब्रह्मचर्य्यया । आद्यैर्व्वैश्व शतशस्तर्पयन्ति पितामहान् ।
नैषामविदितं किञ्चित्त्रिषु लोकेषु विद्यते । वैदिकं लौकिकञ्चैव धर्म्मशास्त्रोक्तमेव च ।
ते परापरदृष्टार्था महर्षिसमतेजसः । भूयः कृतयुगं कर्त्तुमुत्सहन्ते नराधिपाः ।
तेषामेव प्रभावेण शिवं वर्षति वासवः । यथार्थञ्च ववुर्व्वाता विरजस्का दिशो दश ।
निरुत्पाता च वसुधा सुप्रचाराश्च वै ग्रहाः । चन्द्रमाश्च सनक्षत्रः सौम्यश्चरति योगतः ।
अनुलोमकरः सूर्य्यो अयने द्वे चचार ह । हव्यैश्च विविधैस्तृप्तः शुभगन्धो हुताशनः ।
एवं सम्यक् प्रवृत्तेषु निमित्तेषु मखादिषु । तर्पयत्सु महीं कृत्स्नां नृणां कालभयं कुतः ।
तेषां ज्वलितकीर्त्तीनामन्योन्यमनुवर्त्तिनां । राज्ञां बलैर्व्वलवतां पीड्यते वसुधातलं ।
सेयं भारपरिश्रान्ता पीड्यमाना नराधिपैः । पृथिवी समनुप्राप्ता नौरिवासन्नविक्लवा ।
युगान्तसदृशं रूपं शैलोच्चलितबन्धनं । जलोत्पीडाकुलञ्चेदं दर्शयन्ती मुहुर्म्मुहुः ।
क्षत्त्रियाणां वपुर्भिश्च तेजसा च बलेन च । नृणाञ्च राष्ट्रैर्विस्तीर्णैः श्राम्यतीव वसुन्धरा ।
पुरे पुरे नरपतिः कोटिसङ्ख्यैर्वलैर्वृतः । राष्ट्रे राष्ट्रे च बहवो ग्रामाः शतसहस्रशः ।
भूमिपानां सहस्रैश्च तेषाञ्च बलिनां बलैः । ग्रामायुताढ्यै राष्ट्रैश्च भूमिर्निर्व्वेदमागता ।
सेयं निरामयं ज्ञात्वा निश्चेष्टं कालमच्युत । प्राप्ता तवालयं विष्णो भवांश्चास्याः परा गतिः ।
कर्म्मभूमिरिहस्थानां भूमिरेषा व्यथाकुला । यथा न सीदेत्सत कुर्य्याज्जगत्येषा हि शाश्वती ।
यस्या हि पीडने दोषो महान् स्यान्मधुसूदन । क्रियालोपश्च भूतानां दूषितश्च जगद्भवेत् ।
श्राम्यते व्यक्तमेवैषा पार्थिवौघप्रपीडिता । सहजां या क्षमां त्यक्त्वा चलत्वमचला गता ।
यदस्याः श्रुतवन्तः स्म तच्चापि भवता श्रुतं । भारावतरणार्थं हि मन्त्रयामस्त्वया सह ।
सत्पथे हि स्थिताः सर्व्वे राजानो राज्यवर्द्धनाः । नराणाञ्च त्रयो वर्णा ब्राह्मणाननुयायिनः ।
सर्व्वं सत्यमयं वाक्यं वर्णा धर्म्मपरास्तथा । सर्व्वे वेदपरा विप्राः सर्व्वे विप्रपरा नराः ।
एवं जगति वर्त्तन्ते मनुष्या धर्म्मकारणात् । यथा धर्म्मबधो न स्यात्तथा मन्त्रः प्रवर्त्त्यतां ।
सतां गतिरियं नान्या धर्म्मस्यास्याः सुसाधनं । राज्ञाञ्चैव बधः कार्य्यो धरण्या भारनिर्णये ।
तदागच्छ महाभाग सह वै मन्त्रकारणात् । व्रजामो मेरुशिखरं पुरस्कृत्य वसुन्धरां ।
इतिश्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि द्विपञ्चाशोऽध्यायः ॥ ५२ ॥
॥ वैशम्पायन उवाच ॥ वाढमित्येव सह तैर्दुर्द्दिनाम्भोदनिस्वनः । प्रतस्थे दुर्द्दिनाकारः सदुर्द्दिन इवाचलः ।
समुक्तामणिविद्योतं सचन्द्रांशोदवर्च्चसं । सजटामण्डलं कृत्स्नं बिभ्रत् कृष्णवपुर्हरिः ।
स चास्योरसि विस्तीर्णे रोमाञ्चोद्धतराजिमान् । श्रीवत्सो राजते श्रीमान् लक्ष्मद्वयमुखाङ्कितः ।
पीते वसानो वसने लोकानां गुरुरव्ययः । हरिः सोऽभवद्दालक्ष्यः सन्ध्याभ्र इवाचलः ।
तं व्रजन्तं सुपर्णेन पद्मयोनिगतानुगं । अनुजग्मुः सुराः सर्व्वे तद्गतासक्तचक्षुषः ।

नातिदीर्घेण कालेन ते गत्वा रत्नपर्व्वतं । ददृशुर्द्देवतास्तत्र स्वां सभां कामरूपिणीं । २९८५
मेरोः शिखरविन्यस्तां संसक्तां सूर्य्यवर्च्चसा । काञ्चनस्तम्भरचितां वज्रवैदूर्य्यतोरणां ।
मनोनिर्म्माणचित्राढ्यां विमानशतमालिनीं । रत्नजालान्तरवतीं कामगां रत्नभूषितां ।
पुष्परत्नसमाकीर्णां सर्व्वर्त्तुकुसुमोत्कटां । देवमायाधरां दिव्यां निर्म्मितां विश्वकर्म्मणा ।
तां हृष्टमनसः सर्व्वे यथास्थानं यथाविधि । यथानिवेशं त्रिदशा विविशुस्तां सभां शुभां ।
ते निषेदुर्यथोक्तेषु विमानेष्वासनेषु च । भद्रासनेषु पीठेषु कुशेष्वास्तरणेषु च । २९९०
ततः प्रभञ्जनो वायुर्ब्रह्मणा साधु चोदितः । मा शब्द इति सर्व्वत्र प्रचक्रामाथ तां सभां ।
निःशब्दस्तिमिते तस्मिन् समाजे त्रिदिवौकसां । बभाषे धरणी वाक्यं खेदात् करुणभाषिणी ।
॥ धरण्युवाच ॥ त्वया धार्य्या त्वहं देव त्वया वै धार्य्यते जगत् । त्वं धारयसि भूतानि भुवनं त्वं बिभर्षि च ।
यत्त्वया धार्य्यते किञ्चित्तेजसा च बलेन च । ततस्तव प्रसादेन मया पश्चात्तु धार्य्यते ।
त्वया धृतं धारयामि नाधृतं धारयाम्यहं । न हि तद्विद्यते भूतं यत्त्वया न तु धार्य्यते । २९९५
त्वमेव कुरुषे वीर नारायण युगे युगे । महाभारावतरणं जगतो हितकाम्यया ।
तवैव तेजसा क्रान्ता रसातलतलं गता । त्रायस्व मां सुरश्रेष्ठ तवैव शरणं गतां ।
दानवैः पीड्यमानाहं राक्षसैश्च दुरात्मभिः । त्वामेव शरणं नित्यमुपयास्ये सनातनं ।
तावन्मेऽस्ति भयं भूयो यावन्न त्वां ककुद्मिनं । शरणं यामि मनसा शतशोऽथ सहस्रशः ।
अहमादौ पुराणस्य संक्षिप्ता पद्मयोनिना । मास्म कृत्वा कृतौ पूर्व्वं मृण्मयौ द्वौ महासुरौ । ३०००
कर्णस्रोतोभवौ द्वौ हि विष्णोरस्य महात्मनः । महार्णवे प्रस्वपतः काष्ठकुड्यसमौ स्थितौ ।
तौ विवेश स्वयं वायुर्ब्रह्मणा साधु चोदितः । तौ दिवं छादयन्तौ तु ववृधाते महासुरौ ।
वायुप्राणौ तु तौ दृष्ट्वा ब्रह्मा परिमृषञ्छनैः । एकं मृदुतरं मेने कठिनं वेद चापरं ।
नामनी तु तयोश्चक्रे सवितुः सलिलोद्भवः । मृदुस्त्वयं मधुर्नाम कठिनः कैटभोऽभवत् ।
तौ दैत्यौ कृतनामानौ चेरतुर्ब्बलदर्पितौ । सर्व्वमेकार्णवं लोकं युद्धकामौ सुनिर्भयौ । ३००५
तावागतौ समालोक्य ब्रह्मा लोकपितामहः । एकार्णवाम्बुनिचये तत्रैवान्तरधीयत ।
स पद्मे पद्मनाभस्य नाभिमध्यात् समुत्थिते । रोचयामास वसतिं गुह्यं ब्रह्मा चतुर्म्मुखः ।
तावुभौ जलगर्भस्थौ नारायणपितामहौ । बहून् वर्षगणानप्सु शयानौ न चकम्पतुः ।
अथ दीर्घस्य कालस्य तावुभौ मधुकैटभौ । आजग्मतुस्तमुद्देशं यत्र ब्रह्मा व्यवस्थितः ।
दृष्ट्वा तावसुरौ घोरौ महाकायौ दुरासदौ । ब्रह्मणा ताडितो विष्णुः पद्मनालेन वै पुरा । ३०१०
उत्पपाताथ शयनात् पद्मनाभो महाद्युतिः । तद्युद्धमभवद्घोरं तयोस्तस्य च वै तदा ।
एकार्णवे तदा लोके त्रैलोक्ये जलतां गते । तदाभूत्तुमुलं युद्धं वर्षसङ्ख्याः सहस्रशः ।
न च तावसुरौ युद्धे तदाश्रममवापतुः । अथ दीर्घस्य कालस्य तौ दैत्यौ युद्धदुर्म्मदौ ।
ऊचतुः प्रीतमनसौ देवं नारायणं प्रभुं । प्रीतौ स्वस्तव युद्धेन श्लाघ्यस्त्वं मृत्युरावयोः ।

आवां जहि न यत्रोर्व्वी सलिलेन परिप्लुता । हतौ च तव पुत्रत्वं प्राप्नुयाव सुरोत्तम । २९३५
यो ह्यावां युधि निर्ज्जेता तस्यावां विहितौ सुतौ । स तु गृह्य मृधे दोर्भ्यां दैत्यौ समभिपीडयत् ।
जग्मतुर्निधनञ्चापि तावुभौ मधुकैटभौ । तौ हतौ चाप्लुतौ तोये वपुर्भ्यामेकतां गतौ ।
मेदो मुमुचतुर्दैत्यौ मथ्यमानौ जलोर्म्मिभिः । मेदसा तज्जलं व्याप्तं ताभ्यामन्तर्दधे ततः ।
नारायणश्च भगवानसृजत् स पुनः प्रजाः । दैत्ययोर्मेदसा छन्ना मेदिनीति ततः स्मृता ।
प्रभावात् पद्मनाभस्य शाश्वती जगती कृता । वराहेण पुरा भूत्वा मार्कण्डेयस्य पश्यतः । २९४०
विषाणेनाहमेकेन तोयमध्यात् समुद्धृता । हृताहं क्रमता भूयस्तदा युष्माकमग्रतः ।
बलेः सकाशाद्दैत्यस्य विष्णुना प्रभविष्णुना । साम्प्रतं खिद्यमानाहं एतमेव गदाधरं ।
अनाथा जगतो नाथं शरण्यं शरणङ्गता । अग्निः सुवर्णस्य गुरुर्गवां सूर्य्यो गुरुः स्मृतः ।
नक्षत्राणां गुरुः सोमो मम नारायणो गुरुः । यदहं धारयाम्येका जगत्स्थावरजङ्गमं ।
मया धृतं धारयते सर्व्वमेतद्गदाधरः । जामदग्न्येन रामेण भारावतरणेच्छया । २९४५
रोषात्त्रिःसप्तकृत्वोऽहं क्षत्रियैर्व्विप्रयोजिता । सास्मि वेद्यां समारोप्य तर्पिता नृपशोणितैः ।
भार्गवेण पितुः श्राद्धे कश्यपाय निवेदिता । मांसमेदोऽस्थिदुर्गन्धा दिग्धा क्षत्रियशोणितैः ।
रजस्वलेव युवतिः कश्यपं समुपस्थिता । स मां ब्रह्मर्षिरप्याह किमुर्व्वि त्वमवाङ्मुखी ।
वीरपत्नीव्रतमिदं धारयन्ती विषीदसि । साहं विज्ञापितवती कश्यपं लोकभावनं ।
पतयो मे हता ब्रह्मन् भार्गवेण महात्मना । साहं विहीना विक्रान्तैः क्षत्रियैः शस्त्रवृत्तिभिः । २९५०
विधवा शून्यनगरा न धारयितुमुत्सहे । तन्मह्यं दीयतां भर्त्ता भगवंस्तत्समो नृपः ।
रक्षेत् सग्रामनगरां यो मां सागरमालिनीं । स श्रुत्वा भगवान्वाक्यं वाढमित्यब्रवीत् प्रभुः ।
ततो मां मानवेन्द्राय मनवे संप्रदत्तवान् । सा मनुप्रभवं पुण्यं प्राप्येक्ष्वाकुकुलं महत् ।
विपुलेनास्मि कालेन पार्थिवात् पार्थिवं गता । एवं दत्तास्मि मनवे मानवेन्द्राय धीमते ।
भुक्ता राजसहस्रैस्तु महर्षिकुलसम्भवैः । बहवः क्षत्रियाः शूरा मां जित्वा दिवमाश्रिताः । २९५५
ते स्म कालवशं प्राप्य मय्येव प्रलयं गताः । मत्कृते विग्रहा लोके वृत्ता वर्त्तन्त एव च ।
क्षत्रियाणां बलवतां संग्रामेष्वनिवर्त्तिनां । एतद्युगसप्रवृत्तेन दैवेन परिणाम्यता ।
जगद्धितार्थं कुरुत राज्ञां हेतुं रणक्षये । यद्यस्ति मयि कारुण्यं भारशैथिल्यकारणात् ।
एकश्चक्रधरः श्रीमानभयं मे प्रयच्छतु । यमहं भारसन्तप्ता संप्राप्ता शरणार्थिनी ।
भारावतरणार्थं मे विष्णुरेष ब्रवीतु मां । २९६०
॥ इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि धरणीवाक्ये त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥
॥ वैशम्पायन उवाच ॥ तच्छ्रुत्वा पृथिवीवाक्यं सर्व्व एव दिवौकसः । तदर्थकृत्यं सञ्चिन्त्य पितामहमथाब्रुवन् ।
भगवन् क्रियतामस्याः पृथिव्या भारसन्नतिः । शरीरकर्त्ता लोकानां त्वं हि लोकसमुद्भवः ।
यत् कर्त्तव्यं महेन्द्रेण यमेन वरुणेन वा । यद्वा कार्य्यं धनेशेन स्वयं नारायणेन वा ।

यदा चन्द्रमसा कार्य्यं भास्करेणानिलेन वा । आदित्यैर्व्वसुभिर्व्वापि रुद्रैर्व्वा लोकभावनैः ।
अश्विभ्यां वा सुराग्र्याभ्यां साध्यैर्व्वा त्रिदिवालयैः । बृहस्पत्युशनोभ्यां वा कालेन कलिनापि वा । २९६५
महेश्वरेण वा ब्रह्मन् विशाखेन गुहेन वा । यक्षराक्षसगन्धर्व्वैश्चारणैश्च महोरगैः ।
पर्व्वतैः शैलमुख्यैर्व्वा सागरैर्व्वा महोर्म्मिभिः । गङ्गामुखाभिर्द्दिव्याभिः सरिद्भिर्व्वा सुरेश्वर ।
क्षिप्रमाज्ञापय विभो कथमंशः प्रयुज्यतां । यदि ते पार्थिवं कार्य्यं कार्य्यं पार्थिवविग्रहे ।
कथमंशावतरणं कुर्म्मः सर्व्वे पितामह । अन्तरीक्षगता ये च पृथिव्यां ये च पार्थिवाः ।
सदस्यानाञ्च विप्राणां पार्थिवानां कुलेषु च । अयोनिजाश्चैव तनूः सृजाम जगतीतले । २९७०
सुराणामेककार्य्याणां श्रुत्वैतन्निश्चितं महत् । देवैः परिवृतः प्राह वाक्यं लोकपितामहः ।
रोचते मे सुरश्रेष्ठा युष्माकमपि निश्चयः । सृजध्वं स्वशरीरांशांस्तेजसात्मसमान् भुवि ।
सर्व्व एव सुरश्रेष्ठास्तेजोभिरवरोहत । भावयन्तो भुवं देवीं लब्ध्वा त्रिभुवनश्रियं ।
पार्थिवे भारते वंशे पूर्व्वमेव विजानता । पृथिव्यां सम्भवमिदं श्रूयतां यन्मया कृतं ।
समुद्रोऽहं पुरा पूर्व्वं वेलामासाद्य पश्चिमां । आसे सार्द्धं तनूजेन काश्यपेन महात्मना । २९७५
कथाभिः पूर्व्ववृत्ताभिर्लोकवृत्तानुगामिभिः । इतिवृत्तैश्च बहुभिः पुराणप्रभवैर्गुणैः ।
कुर्व्वतास्तु कथास्तास्ताः समुद्रः सह गङ्गया । समीपमाजगामाशु युक्तस्तोयदमारुतैः ।
सवीचीं विषमां कुर्व्वन् गतिं वेगतरङ्गिणीं । यादोगणविचित्रेण सङ्कुलस्तोयवाससा ।
शङ्खमुक्तामलतनुः प्रवालमणिभूषणः । युक्तश्चन्द्रमसा पूर्णः साभ्रगम्भीरनिःस्वनः ।
स मां परिभवन्नेव स्वां वेलामत्यतिक्रमत् । क्लेदयामास चपलैस्तोयैरम्बुविस्रवैः । २९८०
तस्य देशं व्यवसितः समुद्रो हि ममार्हितुं । उक्तः संरब्धया वाचा शान्तोऽसीति ततो मया ।
शान्तोऽसीत्युक्तमात्रस्तु तनुत्वं सागरो गतः । संहतोर्म्मितरङ्गौघः स्थितो राजश्रिया ज्वलन् ।
भूयश्चैव मया शप्तः समुद्रः सह गङ्गया । सकारणां मतिं कृत्वा युष्माकं हितकाम्यया ।
यस्मात्त्वं राजतुल्येन वपुषा समुपस्थितः । गच्छार्णव महीपालो राजैव त्वं भविष्यसि ।
तत्रापि सहजां लीलां धारयन् स्वेन तेजसा । भविष्यसि नृणां भर्त्ता भरतानां कुलोद्वहः । २९८५
शान्तोऽसीति मयोक्तस्त्वं यच्चासि तनुतां गतः । सुतनुर्थेन सा लोके शान्तनुस्त्वं भविष्यसि ।
इयमप्यायतापाङ्गी गङ्गा सर्व्वाङ्गशोभना । रूपिणी वै सरिच्छ्रेष्ठा तत्र त्वामपि यास्यति ।
एवमुक्तस्तु मां क्षुब्धः सोऽभिगम्यार्णवोऽब्रवीत् । मां प्रभो देव देवानां किमर्थं शप्तवानसि ।
अहं तव विधेयात्मा त्वत्कृतस्त्वत्परायणः । अशपोऽसदृशैर्व्वाक्यैरात्मजं मां किमात्मना ।
भगवंस्त्वत्प्रमादेन वेगात् पर्व्वणि वर्द्धितः । यद्यहं चलितो ब्रह्मन् कोऽत्र दोषो ममात्मनः । २९९०
क्षिप्ताभिः पवनेनाद्भिः स्पृष्टो यद्यसि पर्व्वणि । अत्र मे भगवन् किन्नु विद्यते शापकारणं ।
उद्धूतैश्च महावातैः प्रवृद्धश्च बलाहकैः । पर्व्वणा चेन्दुयुक्तेन त्रिभिः क्षुब्धोऽस्मि कारणैः ।
एवं यद्यपराध्योऽहं कारणैस्त्वत्प्रवर्त्तितैः । क्षन्तुमर्हसि मे ब्रह्मन् शापोऽयं विनिवर्त्ततां ।

एवं मयि निरालम्बे शापाच्छिथिलतां गते। कारणं त्वत्र देवेश प्रमाणं यद्यवेक्षसे।
प्रसाद देव गङ्गाया गाङ्गमाधायवाग्यया। महोदधिमहोर्म्मायाः प्रसादं कर्त्तुमर्हसि। १९९५
तमहं श्लक्ष्णया वाचा महार्णवमथाब्रुव। अकारणज्ञं देवानां त्वत्तं शापानिलेङ्गितं।
शान्तिं व्रज न भेतव्यं प्रसन्नोऽस्मि महोदधे। शापेऽस्मिन् सरितां नाथ भविष्यं शृणु कारणं।
तद्गच्छ भारते वंशे स्वदेहं स्वेन तेजसा। आधत्स्व सरितां नाथ त्यक्त्वेमां सागरीं तनुं।
महोदधे महीपालस्तत्र राजश्रिया वृतः। पालयंश्चतुरो वर्णान्यथाबलेन सलिलेश्वर।
इयञ्च तां सरिच्छ्रेष्ठा बिभ्रती मानुषीं तनुं। तत्कालरमणीयाङ्गी गङ्गा परिचरिष्यति। १०००
अनया सह जाह्नव्या मोदमानो ममाज्ञया। इमं सलिलसंक्लेदं विस्मरिष्यसि सागर।
त्वरयाचैव कर्त्तव्यं त्वयेदं मम शासनं। प्राजापत्येन विधिना गङ्गया सह सागर।
वसवः प्रच्युताः स्वर्गात् प्रविष्टाश्च रसातलं। तेषामुत्पादनार्थाय मया त्वं विनियोजितः।
अष्टौ तान् जाह्नवी गर्भानपत्यार्थं दधातु त्विथं। विभावसोस्तुल्यगुणान् सुराणां प्रीतिवर्द्धनान्।
उत्पाद्य तं वसूनष्टौ कृत्वा कुरुकुलं महत्। प्रवेक्ष्यसि तनुं त्यक्त्वा पुनः सागर सागरीं। १००५
एवमेतन्मया पूर्व्वं हितार्थं वः सुरोत्तमाः। भविष्यं पश्यता भारं पृथिव्याः पार्थिवात्मकं।
तत्रैव शान्तनोर्व्वंशः पृथिव्यां रोपितो मया। वसवो यत्र गङ्गायामुत्पन्नास्त्रिदिवौकसः।
अद्यापि भुवि गाङ्गेयस्तत्रैव वसुरष्टमः। सप्तेमे वसवः प्राप्ताः स एकः परिलम्बते।
शन्तनोस्त्वपरस्यां द्वितीयायां द्वितीया शान्तनोस्तनुः। विचित्रवीर्य्यो द्युतिमानासीद्राजा प्रतापवान्।
वैचित्रवीर्य्यौ द्वावेतौ पार्थिवौ भुवि साम्प्रतं। पाण्डुश्च धृतराष्ट्रश्च विख्यातौ पुरुषर्षभौ। १०१०
तत्र पाण्डोः प्रिया पुष्टे द्वे भार्य्ये यौवनस्थिते। शुभे कुन्ती च माद्री च देवयोषोपमे भुवि।
धृतराष्ट्रस्य राज्ञस्तु भार्य्यैका तुल्यरूपिणी। गान्धारी भुवि विख्याता नित्यं भर्त्तृव्रते स्थिता।
तत्र वंशा विभज्यन्तां विपक्षाः पञ्च एव च। पुत्त्राणां हि तयो राज्ञोर्भविता विग्रहो महान्।
तेषां विमर्द्दे दायाद्ये नृपाणां भविता क्षयः। युगान्तप्रतिमश्चैव भविष्यति महद्भयं।
सबलेषु नरेन्द्रेषु शातयत्स्वितरेतरं। विभक्तपुरराष्ट्रौघा क्षितिः शैथिल्यमेष्यति। १०१५
द्वापरस्य युगस्यान्ते मया दृष्टं पुरातने। क्षयं यास्यन्ति शस्त्रेण पार्थिवाः सह वाहनैः।
तत्रावशिष्टान् मनुजान् सुप्ताञ्जिघ्नन्निशि विचेतसः। धक्ष्यन्ते शङ्करस्यांशः पावकेनाद्भुततेजसा।
अन्तकप्रतिमे तस्मिन्निवृत्ते क्रूरकर्म्मणि। समाप्तमिदमाख्यानं तृतीयं द्वापरं युगं।
महेश्वरांशेऽपसृते ततो माहेश्वरं युगं। तिष्यं प्रवर्त्स्यते पश्चाद्युगं दारुणदर्शनं।
अधर्म्मप्रायपुरुषं स्वल्पधर्म्मपरिग्रहं। उत्सन्नसत्यसंयोगं वर्द्धितानृतसञ्चयं। १०२०
महेश्वरं कुमारश्च द्वौ च देवौ समाश्रिताः। भविष्यन्ति नराः सर्व्वे लोकेन स्वल्पचिरायुषः।
तदेष निर्णयः प्रोक्तः पृथिव्यां पार्थिवात्मकः। अंशावतरणं सर्व्वे सुराः कुरुत मा चिरं।
धर्म्मस्यांशोऽद्य कुन्त्यां वै माद्र्याञ्च विनियुज्यतां। विग्रहस्य कलिर्मूलं गान्धार्य्यां विनियुज्यतां।

एते पश्चाद्भविष्यन्ति राजानः कालचोदिताः । जातरागाः पृथिव्यर्थे सर्व्वे संग्रामलालसाः ।
गच्छ त्वियं वसुमती स्वां योनिं लोकधारिणीं । सृष्टोऽयं नैष्ठिको राज्ञामुपायो लोकविश्रुतः । १०२५
श्रुत्वा पितामहवचः सा जगाम यथागतं । पृथिवी सह कालेन बधाय पृथिवीक्षितां ।
देवानचोदयद्ब्रह्मा निग्रहार्थं सुरद्विषां । नरश्चैव पुराणर्षिं शेषञ्च धरणीधरं ।
सनत्कुमारं साध्यांश्च देवानग्निपुरोगमान् । वरुणञ्च यमञ्चैव सूर्य्याचन्द्रमसौ तथा ।
गन्धर्व्वाप्सरसश्चैव रुद्रान्विश्वानथाश्विनौ । ततोंशानवनिं देवाः सर्व्व एवावतारयन् ।
यथा ते कथितं पूर्व्वमंशावतरणे मया । अयोनिजा योनिजाश्च ते देवाः पृथिवीतले । १०३०
दैत्यदानवहन्तारः संभूताः पुरुषेश्वराः । चीरिकावृक्षसङ्काशा वज्रसंहननास्तथा ।
नागायुतबलाः केचित् केचिदोघबलान्विताः । गदापरिघशक्तीनां सहाः परिघबाहवः ।
गिरिशृङ्गप्रहर्त्तारः सर्व्वे परिघयोधिनः । वृष्णिवंशे समुत्पन्नाः शतशोऽथ सहस्रशः ।
कुरुवंशे च ये देवाः पञ्चालेषु च पार्थिवाः । याजकानां समृद्धानां ब्राह्मणानाञ्च योनिषु ।
सर्व्वास्त्रज्ञा महेष्वासा वेदव्रतपरायणाः । सर्व्वर्द्धिगुणसम्पन्ना यज्वानः पुण्यकर्म्मिणः । १०३५
आचालयेयुः शैलांस्ते क्रुद्धा भिन्द्युर्महीतलं । उत्पतेयुरथाकाशं क्षोभयेयुर्महोदधिं ।
एवमादिश्य तान् ब्रह्मा भूतभव्यभवत्प्रभुः । नारायणे समावेश्य लोकान् शान्तिमुपागमत् ।
भूयः शृणु यथा विष्णुरवतीर्णो महीतलं । प्रजानां वै हितार्थाय प्रभुः प्राणधनेश्वरः ।
ययातिवंशजस्याथ वसुदेवस्य धीमतः । कुले पूज्ययशःकर्म्मा जज्ञे नारायणः प्रभुः ।
इतिश्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि देवानामंशावतरणे चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥
॥ वैशम्पायन उवाच ॥ कृतकार्य्ये गते काले जगत्याञ्च यथालयं । अंशावतरणे वृत्ते सुराणां भारते कुले । १०४०
भागेऽवतीर्णे धर्म्मस्य शक्रस्य पवनस्य च । अश्विनोर्देवभिषजोर्भागे च भास्करस्य च ।
पूर्व्वमेवावनिगते भागे देवपुरोधसः । वसूनामष्टमे भागे प्रागेव धरणीं गते ।
मृत्योर्भागे विनिगते कलेर्भागे तथैव च । भागे सोमस्य च तथा वरुणस्य च गाङ्गते ।
शङ्करस्य गते भागे मित्रस्य धनदस्य च । गन्धर्व्वोरगयक्षाणां भागांशेषु गतेष्वपि ।
भागेष्वेतेषु गगणाद्गतेषु धरणीतलं । तिष्ठन्नारायणस्यांशे नारदः प्रत्यदृश्यत । १०४५
ज्वलिताग्निप्रतीकाशो बालार्कसदृशेक्षणः । सव्यापवृत्तं विपुलं जटामण्डलमुद्वहन् ।
चन्द्रांशुशुक्ले वसने वसानो रुक्मभूषणः । वीणां गृहीत्वा महतीं कक्षासक्तां सखीमिव ।
कृष्णाजिनोत्तरासङ्गी हेममयज्ञोपवीतवान् । दण्डी कमण्डलुधरः साक्षाच्छक्र इवापरः ।
भेत्ता जगति गुह्यानां विग्रहाणां गुहोपमः । महर्षिविग्रहरुचिर्व्विद्वान् गान्धर्व्ववेदवित् ।
वैरकेलिकिलो विप्रो ब्राह्मः कलिरिवापरः । देवगन्धर्व्वलोकानामादिवक्ता मुनिः परः । १०५०
गाता चतुर्णां वेदानामुद्गाता प्रथमर्त्विजां । स नारदोऽथ विप्रर्षिर्ब्रह्मलोकचरोऽव्ययः ।
स्थितो देवसभामध्ये संरब्धो विष्णुमब्रवीत । अंशावतरणं विष्णो यदिदं त्रिदशैः कृतं ।

लयाय पृथिवीशानां सर्व्वमेतदकारणं। यदेतत् पार्थिवं चत्रं क्षतं त्वयि दिवीश्वर।
न नारायणयुक्तोऽयं कार्य्यार्थः प्रतिभाति मे। न युक्तं जानता देव त्वया तत्त्वार्थदर्शिना।
देवदेव पृथिव्यर्थे प्रयोक्तुं कार्य्यमीदृशं। त्वं हि चचुष्मतां चक्षुः स्राष्यः प्रभवतां प्रभुः। ३०५५
श्रेष्ठो योगवतां योगी गतिर्गतिमतामपि। देवभागान् गतान्दृष्ट्वा किं त्वं सर्व्वाग्रगो विभुः।
वसुन्धरायाः सह्यार्थमंशं स्वं नानुयुञ्जसे। त्वया सनाथा देवांशास्त्वन्मयास्त्वत्प्रचोदिताः।
जगत्यां सञ्चरिष्यन्ति कार्य्याकार्य्यान्तरज्ञताः। तदहं त्वरया विष्णो प्राप्तः सुरसभामिमां।
तव सम्पादनार्थाय शृणु चाप्यत्र कारणं। ये त्वया निहता दैत्याः संग्रामे तारकामये।
तेषां शृणु गतिं विष्णो ये गताः पृथिवीतलं। पुरी पृथिव्यां मुदिता मथुरा नाम विश्रुता। ३०६०
निविष्टा यमुनातीरे स्फीता जनपदायुता। मधुर्नाम महानासीत् दानवो युधि दुर्ज्जयः।
त्रासनः सर्व्वभूतानां बलेन महताऽन्वितः। तस्य तत्र महद्व्यासीन्महापादपसङ्कुलं।
घोरं मधुवनं नाम यत्रासौ न्यवसत् पुरा। तस्य पुत्रो महानासील्लवणो नाम दानवः।
त्रासनः सर्व्वभूतानां बले महति तिष्ठवान्। स तत्र दानवः क्रीडन्वर्षपूगाननेकशः।
सदैवतगणांल्लोकानुद्वासयति दर्पितः। अयोध्यायामयोध्यायां रामे दाशरथौ स्थिते। ३०६५
राज्यं शासति धर्म्मज्ञे राचसानां भयावहे। स दानवो बलश्लाघी घोरं वनमुपाश्रितः।
प्रेषयामास रामाय दूतं परुषवादिनं। विषयासन्नभूतो हि तव रामरिपुस्स सः।
न च सामन्तमिच्छन्ति राजानो बलशालिनं। राज्ञा राजव्रतस्थेन प्रजानां शुभमिच्छता।
जेतव्या रिपवः सर्व्वे स्फीतं विषयमिच्छता। अभिषेकार्द्रकेशेन राज्ञा रञ्जनकाम्यया।
जेतव्यानीन्द्रियाण्यादौ तज्जये हि ध्रुवो जयः। सम्यक् वर्त्तितुकामस्य विशेषेण महीपते। ३०७०
नयानामुपदेशेन नास्ति लोकसमो गुरुः। व्यसनेषु जघन्यस्य धर्म्ममध्यस्य धीमतः।
बलज्येष्ठस्य नृपतेर्नास्ति सामन्तजं भयं। प्रवृद्धैर्हन्यते सर्व्वः सहजैरिन्द्रियारिभिः।
अमित्राणां प्रियकरैर्मोहैरधृतिरीश्वरः। यत्त्वया श्रीकृते मोहात् सबलो रावणो हतः।
नैतदौपयिकं मन्ये महत्तत् कर्म्म कुत्सितं। वनवासप्रवृत्तेन यत्त्वया व्रतशालिना।
प्रहृतं राक्षसे नीचे नैष दृष्टः सतां विधिः। सतामक्रोधजा धर्म्माः शुभां नयति सद्गतिं। ३०७५
यत्त्वया निहता मोहाद्दूषिताश्चाश्रमौकसः। स एव रावणो धन्यो यत्त्वया व्रतचारिणा।
स्त्रीनिमित्ते हतो युद्धे ग्राम्यान्धर्म्मानवेक्षता। यदि ते स हतः संख्ये दुर्ब्बुद्धिरजितेन्द्रियः।
युध्यस्वाद्य मया सार्द्धं मृधे यद्यसि वीर्य्यवान्। तस्य दूतस्य तच्छ्रुत्वा भाषितं रूक्षवादिनः।
धैर्य्यादसम्भ्रान्तवपुः सस्मितं राघवोऽब्रवीत्। असदेतत्त्वया दूत भाषितं तस्य गौरवात्।
यन्मां क्षिपसि दोषेण वदात्मानञ्च सुस्थितं। यद्यहं सत्पथे मूढो यदि वा रावणो हतः। ३०८०
यदि वा मे हृता भार्य्या तत्र का परिदेवना। न वाङ्मात्रेण दुष्यन्ति साधवः सत्पथे स्थिताः।
जागर्त्ति च यथा देवः सदा सत्त्वितरेषु च। श्रुतं दूतेन यत् कार्य्यं गच्छ त्वं दूत माचिरं।

नात्मश्लाघिषु नीचेषु प्रहरन्तीह मद्विधाः । अयं ममानुजो भ्राता शत्रुघ्नः शत्रुतापनः ।
तस्य दैत्यस्य दुर्बुद्धेर्मृधे प्रतिकरिष्यति । एवमुक्तः स दूतस्तु ययौ सौमित्रिणा सह ।
अनुज्ञातो नरेन्द्रेण राघवेण महात्मना । स शीघ्रयानः संप्राप्तस्तदा मधुवनं महत् । ३०८५
चक्रे निवेशं सौमित्रिर्वनान्ते युद्धलालसः । ततो दूतस्य वचनात् स दैत्यः क्रोधमूर्च्छितः ।
जघन्ये तद्वनं कृत्वा युद्धायाभिमुखे स्थितः । तद्युद्धमभवद्घोरं सौमित्रेर्दानवस्य च ।
उभयोर्द्धनुर्द्धरयोः शूरयोरणमूर्द्धनि । तौ शरैः साधुनिशितैरन्योन्यमभिजघ्नतुः ।
न च तौ युद्धवैमुख्यं श्रमं वाप्युपजग्मतुः । अथ सौमित्रिणा वाणैः पीडितो दानवो युधि ।
ततः स शूलरहितः पर्य्यहीयत दानवः । स गृहीत्वाऽङ्कुशञ्चैव देवैर्द्दुस्सवरं रणे । ३०९०
कर्षणं सर्व्वभूतानां लवणो विननाद ह । शिरोधरायां जग्राह सोऽङ्कुशेन चकर्ष च ।
प्रवेशयितुमारब्धो लवणो राघवानुजं । स रुक्मत्सरुमुद्यम्य शत्रुघ्नः खड्गमुत्तमं ।
अङ्कुशञ्चैव चिच्छेद दैत्यस्य च शिरो महत् । स हत्वा दानवं सङ्ख्ये सौमित्रिर्मित्रनन्दनः ।
तद्वनं तस्य दैत्यस्य चिच्छेदास्त्रेण बुद्धिमान् । छित्त्वा वनञ्च सौमित्रिर्निवेशं सोऽभ्यरोचयत् ।
भवाय तस्य देशस्य पूर्य्याः परमधर्म्मवित् । तस्मिन्मधुवनस्थाने मथुरा नाम सा पुरी । ३०९५
शत्रुघ्नेण पुरा सृष्टा हत्वा तं दानवं रणे । सा पुरी परमोदारा सुवप्रद्वारतोरणा ।
स्फीता राष्ट्रसमाकीर्णा समृद्धभवनाकुला । उद्यानवनसञ्छन्ना सुभौमा सुप्रतिष्ठिता ।
प्रांशुप्राकारसम्पन्ना परिखार्गलमेखला । चयाट्टालककेयूरा प्रासादवरकुण्डला ।
सुसंवृतद्वारमुखी चत्वरोद्गारहासिनी । अरोगवीरपुरुषा हस्त्यश्वरथसङ्कुला ।
अर्द्धचन्द्रप्रतीकाशा यमुनातीरशोभिता । पुण्यापणवती दुर्गा रत्नसञ्चयगर्व्विता । ३१००
क्षेत्राणि सस्यवन्त्यस्यां काले देवश्च वर्षति । नरनारीसमुदिता सा पुरी स्म प्रकाशते ।
निविष्टविषयश्चैव शूरसेनस्ततोऽभवत् । तस्यां पुर्य्यां महावीर्य्यो राजा भोजकुलोद्वहः ।
उग्रसेन इति ख्यातो महासेनपराक्रमः । तस्य पुत्त्रत्वमापन्नो योऽसौ विष्णो त्वया हतः ।
कालनेमिर्म्महादैत्यः संग्रामे तारकामये । कंसो नाम विशालांसो भोजवंशविवर्द्धनः ।
राजा पृथिव्यां विख्यातः सिंहविस्पष्टविक्रमः । राज्ञां भयङ्करो घोरः शङ्कनीयो महीक्षिता । ३१०५
भयदः सर्व्वभूतानां सत्पथाद्वाह्यताङ्गतः । दारुणाभिनिवेशेन दारुणेनान्तरात्मना ।
युक्तस्तेनैव दर्पेण प्रजानां रोमहर्षणः । न राजधर्म्माभिरतो नात्मपक्षसुखावहः ।
नात्मराज्यप्रियकरश्चण्डः क्रूररुचिः सदा । स कंसस्तत्र संभूतो यस्ते युद्धे पराजितः ।
क्रव्यादो बाधते लोकानासुरेणान्तरात्मना । योऽप्यसौ हयविक्रान्तो हयग्रीव इति स्मृतः ।
केशी नाम हयो जातः कंसस्यैव जघन्यजः । स दुष्टो हेषितपटुः केशरी निरवग्रहः । ३११०
वृन्दावने वसत्येको नृणां मांसानि भक्षयन् । अरिष्टो बलिपुत्त्रस्तु ककुद्मी वृषरूपवान् ।
गवामरित्वमापन्नः कामरूपी महासुरः । रिष्टो नाम दितेः पुत्त्रो वरिष्ठो दानवेषु यः ।

कुञ्जरत्वमगाद्दैत्यः कंसस्यैव स वाहनः । लम्बो नामेति विख्यातो योऽसौ दैत्येषु दारुणः ।
प्रलम्बो नाम भूत्वाऽसौ वटं भाण्डीरमाश्रितः । खर इत्युच्यते दैत्यो धेनुकः सोऽसुरोत्तमः ।
घोरस्तालवनं दैत्यश्चरत्युत्सादयन् प्रजाः । वराहश्च किशोरश्च यौ तौ दानवसत्तमौ । ३११५
मल्लौ रङ्गगतौ तत्र जातौ चाणूरमुष्टिकौ । यौ तौ मयश्च तारश्च दानवौ दानवान्तक ।
प्राग्ज्योतिषे तौ भौमस्य नरकस्य पुरे रतौ । एते दैत्या विनिहतास्त्वया विष्णो निराकृताः ।
मानुषीं तनुमास्थाय बाधन्ते भुवि मानवान् । त्वत्कथाद्वेषिणः सर्व्वे त्वद्भक्तान् घ्नन्ति मानवान् ।
तव प्रसादात्तेषां वै दानवानां क्षयो भवेत् । त्वत्तस्ते बिभ्यति दिवि त्वत्तो बिभ्यति सागरे ।
पृथिव्यां बिभ्यति त्वत्तो नान्यतस्तु कदाचन । दुर्वृत्तस्य हतस्यापि त्वया नान्येन श्रीधर । ३१२०
दिवश्च्युतस्य दैत्यस्य गतिर्भवति मेदिनी । व्युत्थितस्य तु मेदिन्यां हतस्य नृशरीरिणः ।
दुर्लभं स्वर्गगमनं त्वयि जाग्रति माधव । तदा गच्छ स्वयं विष्णो गच्छाम पृथिवीतलं ।
दानवानां विनाशाय विसृजात्मानमात्मना । मूर्त्तयो हि तवाव्यक्ता दृश्यादृश्याः सुरोत्तमैः ।
तासु सृष्टास्त्वया देवाः सम्भविष्यन्ति भूतले । तवावतरणे विष्णो कंसः स न भविष्यति ।
सेत्स्यते स च कार्य्यार्थो यस्यार्थे भूमिरागता । त्वं भारते कार्य्यगुरुस्त्वं चक्षुस्त्वं परायणः । ३१२५
तदा गच्छ हृषीकेश क्षितौ तान् जहि दानवान् ।

इतिश्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि नारदवाक्ये पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

॥ वैशम्पायन उवाच ॥ नारदस्य वचः श्रुत्वा सस्मितं मधुसूदनः । प्रत्युवाच शुभं वाक्यं देवानां प्रभुरीश्वरः ।
त्रैलोक्यस्य हितार्थाय यन्मां वदसि नारद । तस्य सम्यक्प्रवृत्तस्य श्रूयतामुत्तरं वचः ।
विदिता देहिनो जाता मयैते भुवि दानवाः । यां च यस्तनुमास्थाय दैत्यः पुष्यति विग्रहं ।
जानामि कंसं सम्भूतमुग्रसेनसुतं भुवि । केशिनञ्चैव जानामि दैत्यं तुरगरूपिणं । ३१३०
नागं कुवलयापीडं मल्लौ चाणूरमुष्टिकौ । अरिष्टञ्चैव जानामि दैत्यं वृषभरूपिणं ।
विदितो मे खरश्चैव प्रलम्बश्च महासुरः । सा च मे विदिता विप्र पूतना दुहिता बलेः ।
कालियञ्चापि जानामि यमुनाह्रदगोचरं । वैनतेयभयाद्यस्तु यमुनाह्रदमाविशत् ।
विदितो मे जरासन्धः स्थितो मूर्द्ध्नि महीक्षितां । प्राग्ज्योतिषपुरे चापि नरकं साधु तर्कये ।
मानुषे पार्थिवे लोके मानुषत्वमुपागतं । बाणञ्च शोणितपुरे गुहप्रतिमतेजसं । ३१३५
दृप्तं बाहुसहस्रेण देवैरपि सुदुर्जयं । मय्यासक्तां च जानामि भारतीं महतीं धुरं ।
तच्च सर्व्वं विजानामि यथा यास्यन्ति ते नृपाः । क्षयो भुवि मया दृष्टः शक्रलोके च सत्क्रिया ।
तेषां पुरुषदेहानामपरावृत्तिवर्त्तिनां । संप्रवेक्ष्याम्यहं योगमात्मनश्चापरस्य च ।
संप्राप्य मानुषं लोकं मानुषत्वमुपागतः । कंसादींस्तांश्च सर्व्वांश्च वधिष्यामि महासुरान् ।
तेन तेन विधानेन येन यः शान्तिमेष्यति । अनुप्रविश्य योगेन तास्ता हि गतयो मया । ३१४०
अमीषां हि सुरेन्द्राणां हन्तव्या रिपवो युधि । जगत्यर्थे कृतो योऽयमंशोत्सर्गो महात्मभिः ।

सुरदेवर्षिगन्धर्वैरितिश्चानुमतं मम । विनिश्चयो हि प्रागेव नारदार्थं कृतो मया ।
निश्चयं तत्र मे ब्रह्मा विदधातु पितामहः । यत्र देशे यथा जातो येन वेशेन वा वसन् ।
तानहं समरे हन्यां तन्मे ब्रूहि पितामह ।
॥ ब्रह्मोवाच ॥ नारायणेमं सिद्धार्थमुपायं शृणु मे विभो । भुवि यस्ते जनयिता जननी च भविष्यति । ११४५
यत्र त्वञ्च महाबाहो जातः कुलकरो भुवि । यादवानां महद्वंशमखिलं धारयिष्यसि ।
तांश्चासुरान् समुत्साद्य वंशं कृत्वात्मनो महत् । स्थापयिष्यसि मर्य्यादां यथा तन्मे निशामय ।
पुरा हि कश्यपो विष्णो वरुणस्य महात्मनः । जहार यज्ञिया गा वै पयोदास्तु महामखे ।
अदितिः सुरभिश्चैव द्वे भार्य्ये काश्यपस्य तु । प्रदीयमाना गास्तास्तु नैच्छतां वरुणस्य तु ।
ततो मां वरुणोऽभ्येत्य प्रणम्य शिरसा ततः । उवाच भगवन् गावो गुरुणा मे हृता इति । ११५०
कृतकार्य्योऽपि गास्तात नानुजानाति मे गुरुः । अन्ववर्त्तत भार्य्ये द्वे अदितिं सुरभीं ततः ।
मम ता ह्यक्षया गावो दिव्याः कामदुघाः प्रभो । चरन्ति सागरान् सर्व्वान् रक्षिताः स्वेन तेजसा ।
कस्ता धर्षयितुं शक्तो मम गाः काश्यपादृते । अक्षयं याः क्षरन्त्यग्र्यं पयो देवामृतोपमं ।
प्रभुर्व्वा व्यथितो ब्रह्मन् गुरुर्व्वा यदि वेतरः । त्वया नियम्याः सर्व्वे वै त्वं हि नः परमा गतिः ।
यदि प्रभवतां दण्डो लोके कार्य्यमजानतां । न विद्यते लोकगुरो नामते लोकसेतवः । ११५५
यथा वाऽस्तु तथा वाऽस्तु कर्त्तव्ये भगवान् प्रभुः । मम गावः प्रदीयन्तां ततो गन्ताऽस्मि सागरं ।
आत्मा मम हि ता गावो या गावः सत्वमव्ययं । लोकानां त्वत्प्रवृत्तानामेकं गोब्राह्मणं स्मृतं ।
त्रातव्याः प्रथमं गावस्त्रातास्त्रायन्ति ता द्विजान् । गोब्राह्मणपरित्राणे परित्रातं जगद्भवेत् ।
इत्यम्बुपतिना प्रोक्तो वरुणेनाहमच्युत । गवां कारणतत्त्वज्ञः काश्यपे शापमुत्सृजं ।
येनांशेन हृता गावः कश्यपेन महात्मना । स तेनांशेन जगतीं गत्वा गोपत्वमेष्यति । ११६०
या च सा सुरभिर्नाम अदितिश्च सुरारणी । उभे ते तस्य वै भार्य्ये सह तेनैव यास्यतः ।
ताभ्यां सह स गोपत्वे कश्यपो भुवि रंस्यते । तदस्य कश्यपस्यांशस्तेजसा कश्यपोपमः ।
वसुदेव इति ख्यातो गोषु तिष्ठति भूतले । गिरिर्गोवर्द्धनो नाम मथुरायास्त्वदूरतः ।
तत्रासौ गोष्वभिरतः कंसस्य करदायकः । तस्य भार्य्याद्वयञ्चैव अदितिः सुरभिस्तथा ।
देवकी रोहिणी चैव वसुदेवस्य धीमतः । तत्रावतर लोकानां भवाय मधुसूदन । ११६५
जयाशीर्व्वचनैस्त्वेते वर्द्धयन्ति दिवौकसः । आत्मानमात्मना हि त्वमवतार्य्य महीतले ।
देवकीं रोहिणीञ्चैव गर्भाभ्यां परितोषय । तत्र त्वं शिशुरेवादौ गोपालकृतलक्षणः ।
वर्द्धयस्व महाबाहो पुरा त्रैविक्रमे यथा । छादयित्वाऽऽत्मनाऽऽत्मानं मायया गोपरूपया ।
गोपकन्यासहस्राणि रमयंश्चर मेदिनीं । गाश्च ते रक्षतो विष्णो वनानि परिधावतः ।
वनमालापरिक्षिप्तं धन्या द्रक्ष्यन्ति ते वपुः । विष्णौ पद्मपलाशाक्ष गोपालवसतिं गते । ११७०
बाले त्वयि महाबाहो लोको बालत्वमेष्यति । त्वद्भक्ताः पुण्डरीकाक्ष तव चित्तवशानुगाः ।

गोषु गोपा भविष्यन्ति सहायाः सततन्तव । वने चारयतो गास्तु गोष्ठेषु परिधावतः ।
मज्जतो यमुनायान्तु रतिमाप्स्यन्ति ते भृशं । जीवितं वसुदेवस्य भविष्यति सुजीवितं ।
यस्त्वया तात इत्युक्तः स पुत्र इति वक्ष्यति । अथवा कस्य पुत्रत्वं गच्छेथाः कश्यपादृते ।
का वा धारयितुं शक्ता विष्णो त्वामदितिं विना । योगेनात्मसमुत्थेन गच्छ त्वं विजयाय वै । ११७५
वयमप्यालयान् स्वान् स्वान् गच्छामो मधुसूदन ।
॥ वैशम्पायन उवाच ॥ स तु देवाननुज्ञाप्य विविक्ते त्रिदिवालये । जगाम विष्णुः स्वन्देशं क्षीरोदस्योत्तरां दिशं ।
तत्रैव पार्व्वती नाम गुहा मेरोः सुदुर्गमा । त्रिभिस्तस्यैव विक्रान्तैर्नित्यं पर्व्वसु पूजिता ।
पुराणं तत्र विन्यस्य देहं हरिरुदारधीः । आत्मानं योजयामास वसुदेवगृहे प्रभुः ।
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्व्वणि पितामहवाक्ये षट्पञ्चाशोऽध्यायः ॥ ५६ ॥ समाप्तञ्चेदं हरिवंशपर्व्व ॥

॥ अथ विष्णुपर्व्व ॥

॥ वैशम्पायन उवाच ॥ ज्ञात्वा विष्णुं क्षितिगतं भागांश्च त्रिदिवौकसां । विनाशशंसी कंसस्य नारदो मथुरां ययौ । ११८०
त्रिपिष्टपादापतितो मथुरोपवने स्थितः । प्रेषयामास कंसस्य दूतं स मुनिपुङ्गवः ।
स दूतः कथयामास मुनेरागमनं नृपे । स नारदस्य गमनं श्रुत्वा त्वरितविक्रमः ।
निर्जगामासुरः कंसः स्वपुर्य्याः पद्मलोचनः । स ददर्शातिथिं श्लाघ्यं देवर्षिं वीतकल्मषं ।
तेजसा ज्वलनाकारं वपुषा सूर्य्यवर्च्चसं । सोऽभिवाद्यर्षये तस्मै पूजाञ्चक्रे यथाविधि ।
आसनञ्चाग्निवर्णाभं विसृज्योपजहार वै । निषसादासने तस्मिन् स वै शक्रसखो मुनिः । ११८५
उवाच चोग्रसेनस्य सुतं परमकोपनं । पूजितोऽहं त्वया वीर विधिदृष्टेन कर्म्मणा ।
गते त्विदं मम वचः श्रूयतां गृह्यताञ्च तत् । अनुसृत्य दिवो लोकानहं ब्रह्मपुरोगमान् ।
गतः सूर्य्यसखं तात विपुलं मेरुपर्व्वतं । स नन्दनवनञ्चैव दृष्ट्वा चैत्ररथं वनं ।
आप्लुतं मे सुतीर्थासु सरित्सु सह दैवतैः । दिव्या त्रिधारा दृष्टा मे गङ्गा त्रिपथगामिनी ।
स्मरणादेव सर्व्वेषामहंसां या विभेदिनी । उपस्पृष्टञ्च तीर्थेषु दिव्येषु च यथाक्रमं । ११९०
दृष्टं मे ब्रह्मसदनं ब्रह्मर्षिगणसेवितं । देवगन्धर्व्वनिर्घोषैरप्सरोभिश्च नादितं ।
सोऽहं कदाचिद्देवानां समाजे मेरुमूर्द्धनि । संगृह्य वीणां संसक्तामगच्छं ब्रह्मणः सभां ।
सोऽहं तत्र सितोष्णीषान्नानारत्नविभूषितान् । दिव्यासनगतान्देवानपश्यं सपितामहान ।
तत्र मन्त्रयतामेवं दैवतानां मया श्रुतः । भवतः सानुगस्येह वधोपायः सुदारुणः ।
तत्रैषा देवकी या ते मथुरायां पितृष्वसा । योऽस्या गर्भोऽष्टमः कंस स ते मृत्युर्भविष्यति । ११९५
देवानां स हि सर्व्वस्वं त्रिदिवस्य गतिश्च सः । परं रहस्यं देवानां स ते मृत्युर्भविष्यति ।
परतोऽपि परस्तेषां स्वयम्भूश्च दिवौकसां । ततस्ते तन्महद्भूतं दिव्यञ्च कथयाम्यहं ।
साध्यश्च स हि ते मृत्युर्भूतपूर्व्वश्च तं स्मर । यत्नश्च क्रियतां कंस देवक्या गर्भकृन्तने ।

एषा मे त्वद्गता प्रीतिरित्यर्थश्चाहमागतः । भुज्यन्तां सर्व्वकामार्थाः स्वस्ति तेऽस्तु व्रजाम्यहं ।
॥ वैशम्पायन उवाच ॥ इत्युक्त्वा नारदे याते तस्य वाक्यं विचिन्तयन् । जहासोच्चैस्ततः कंसः प्रकाशदशनश्चिरं । १२००
प्रोवाच सस्मितश्चैव स भृत्यानग्रतः स्थितान् । हास्यः खलु स सर्व्वेषु नारदो न विशारदः ।
नाहं भीषयितुं शक्यो देवैरपि सवासवैः । आहवस्थः शयानो वा प्रमत्तो मत्त एव वा ।
योऽहं दोर्भ्यामुदाराभ्यां क्षोभयेयं धरामिमां । कोऽस्ति यो मानुषे लोके मां क्षोभयितुमुत्सहेत् ।
अद्यप्रभृति भूतानामहं देवानुवर्त्तिनां । नृपविगश्चमत्तानां करोमि कदनं महत् ।
आज्ञाप्यतां हयः केशी प्रलम्बो धेनुकस्तथा । अरिष्टो वृषभश्चैव पूतना कालियस्तथा । १२०५
अटध्वं पृथिवीं कृत्स्नां यथेष्टं कामरूपिणः । प्रहरध्वञ्च सर्व्वेषु येऽस्माकं पक्षदूषकाः ।
गर्भस्थानामपि गतिर्व्विज्ञेया भुवि देहिनां । नारदेन हि गर्भेभ्यो भयन्नः समुदाहृतं ।
भवन्तोऽपि यथाकामं मोदन्तां विगतज्वराः । मां च वो नाथमाश्रित्य नास्ति देवकृतं भयं ।
स तु कलिकिलो विप्रो भेदशीलश्च नारदः । सुश्लिष्टमपि लोकेषु भेदयन्लभते रतिं ।
कण्डूयमानः सततं लोकानटति चञ्चलः । चक्रयानो नरेन्द्राणां तन्त्रीर्वैराणि चैव च । १२१०
एवं स विलपन्नेव वाङ्मात्रेण तु केवलं । विवेश भवनं कंसो दह्यमानेन चेतसा ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि नारदागमने कंसवाक्ये सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥
॥ वैशम्पायन उवाच ॥ सोऽज्ञापयत संरब्धः सचिवानात्मनो हितान् । यत्ता भवत सर्व्वे वै देवक्या गर्भकृन्तने ।
प्रथमादेव हन्तव्या गर्भास्ते सर्व्व एव तु । मूलादेव हि हन्तव्यः सोऽनर्थो यत्र संशयः ।
देवकी च गृहे गुप्ता प्रच्छन्नमभिरक्षिता । स्वैरञ्चरतु विस्रब्धा गर्भकाले च रक्ष्यतां ।
मासांश्च पुष्पमासादीन् गणयन्तु मम स्त्रियः । परिणामे हि गर्भस्य शेषं ज्ञास्यामहे वयं । १२१५
वसुदेवश्च संरक्ष्यः स्त्रीमनाथासु भूमिषु । अप्रमत्तैर्नरैर्हितै रात्रावहनि चैव च ।
स्त्रीभिर्व्वर्षवरैश्चैव वक्तव्यं न च कारणं । एष मानुषको यत्नो मानुषैरेव साध्यते ।
श्रूयतां येन दैवं हि मद्विधैः प्रतिहन्यते । मन्त्रयानैः सुविहितैरौषधैश्च सुयोजितैः ।
यत्नेन चानुकूल्येन दैवमप्यनुलोम्यते ।
॥ वैशम्पायन उवाच ॥ एवं स यत्नवान् कंसो देवक्या गर्भकृन्तने । भयेन मन्त्रयामास श्रुतार्थो नारदात् स वै । १२२०
एवं श्रुत्वा प्रयत्नं तु कंसस्य गृहसंश्रितं । अन्तर्द्धानगतो विष्णुश्चिन्तयामास वीर्य्यवान् ।
सप्तेमान्देवकीगर्भान् भोजपुत्रो वधिष्यति । अष्टमे च मया गर्भे कार्य्यसाधनमात्मनः ।
तस्य चिन्तयतस्त्वेवं पातालमगमन्मनः । यत्र ते गर्भशयनाः षड्गर्भा नाम दानवाः ।
विक्रान्तवपुषो दीप्तास्तेऽमृतप्राशनोपमाः । अमरप्रतिमाः सर्व्वे पुत्रा वै कालनेमिनः ।
तेऽध्यकं वै परित्यज्य हिरण्यकशिपुं पुरा । उपासाञ्चक्रिरे दैत्याः पुरा लोकपितामहं । १२२५
तप्यमानास्तपस्तीव्रं जटामण्डलधारिणः । तेषां प्रीतोऽभवद्ब्रह्मा षड्गर्भाणां वरं ददौ ।
॥ ब्रह्मोवाच ॥ भो भो दानवशार्दूलास्तपसाऽहं सुतोषितः । ब्रूत यो यश्च वः कामस्तं तं ते ददाम्यहं ।

ते तु सर्व्वे समागम्य दैत्या ब्रह्माणमब्रुवन् । यदि नो भगवान् प्रीतो दीयतां नो वरो वरः ।
अवध्याः स्याम भगवन्देवतैः समहोरगैः । शापप्रहरणैश्चापि नियतैः परमर्षिभिः ।
यक्षगन्धर्व्वपतिभिः सिद्धचारणमानवैः । माभूद्वधो नो भगवन् ददासि यदि नो वरं । ३३३०
तानुवाच ततो ब्रह्मा सुप्रीतेनान्तरात्मना । भवद्भिर्यदिदं प्रोक्तं सर्व्वमेतद्भविष्यति ।
षड्गर्भाणां वरं दत्त्वा स्वयम्भूस्त्रिदिवङ्गतः । ततो हिरण्यकशिपुः सरोषो वाक्यमब्रवीत् ।
मामुत्सृज्य वरो यस्माद्वृतो वः पद्मसम्भवात् । तस्माद्वस्त्याजितः स्नेहः शत्रुभूतांस्त्यजाम्यहं ।
षड्गर्भा इति योऽयं वः शब्दः पित्रा विवर्द्धितः । स एव वो गर्भगतान् पिता सर्व्वान् वधिष्यति ।
षडेव देवकीगर्भे षड्गर्भा वै महासुराः । भविष्यथ ततः कंसो गर्भस्थान् वो वधिष्यति । ३३३५
|| वैशम्पायन उवाच || जगामाथ ततो विष्णुः पातालं यत्र तेऽसुराः । षड्गर्भाः संवृताः सन्ति जले गर्भस्थदेहशाः ।
स ददर्श जले सुप्तान् षड्गर्भान् गर्भसंस्थितान् । निद्रया कालरूपिण्या सर्व्वानन्तर्हितानिव ।
स्वप्नरूपेण तेषां वै विष्णुर्देहमथाविशत् । प्राणेश्वरांश्च निष्कृष्य निद्रायै प्रददौ तदा ।
तांश्चोवाच ततो निद्रां विष्णुः सत्यपराक्रमः । गच्छ निद्रे मयोत्सृष्टा देवकीभवनान्तिकं ।
इमान् प्राणेश्वरान् गृह्य षड्गर्भासुरदेहिनः । षट्सु गर्भेषु देवक्या योजयस्व यथाक्रमं । ३३४०
जातेष्वेतेषु गर्भेषु नीतेषु च यमक्षयं । कंसस्य विफले यत्ने देवक्याः सफले श्रमे ।
प्रसादं ते करिष्यामि मत्प्रभावसमं भुवि । येन सर्व्वस्य लोकस्य देवि देवी भविष्यति ।
सप्तमो देवकीगर्भो योऽस्याः सौम्यो ममाग्रजः । स संक्रामयितव्यस्ते सप्तमे मासि रोहिणीं ।
सङ्कर्षणात्तु गर्भस्य स तु सङ्कर्षणो युवा । भविष्यत्यग्रजो भ्राता मम शीतांशुदर्शनः ।
पतितो देवकीगर्भः सप्तमोऽयं भयादिति । अष्टमे मयि गर्भस्थे कंसो यत्नं करिष्यति । ३३४५
या तु सा नन्दगोपस्य वसुदेवानुगस्य वै । यशोदा नाम भद्रं ते भार्य्या गोपकुलोद्वहा ।
तस्यास्त्वं नवमो गर्भः कुलेऽस्माकं भविष्यसि । नवम्यामेव संजाता कृष्णपक्षस्य वै तिथौ ।
अहन्यभिजिते योगे निशाया यौवने स्थिते । अर्द्धरात्रे करिष्यामि गर्भमोक्षं यथासुखं ।
अष्टमस्य तु मासस्य जातावावां ततः समं । प्राप्स्यावो गर्भव्यत्यासं प्राप्ते कंसस्य शासने ।
अहं यशोदां यास्यामि त्वं देवि भज देवकीं । आवयोर्गर्भव्यत्यासात् कंसो गच्छतु मूढतां । ३३५०
ततस्त्वां गृह्य चरणे शिलायां निरसिष्यति । निरस्यमाना गगने स्थानं प्राप्स्यसि शाश्वतं ।
मच्छवीसदृशी कृष्णा सङ्कर्षणसमानना । बिभ्रती विपुलौ बाहू मम बाहूपमौ दिवि ।
त्रिशिखं शूलमुद्यम्य खड्गञ्च कनकत्सरुं । पात्रीञ्च पूर्णां मधुनः पङ्कजञ्च सुनिर्म्मलं ।
नीलकौशेयसंवीता पीतेनोत्तरवाससा । शशिरश्मिप्रकाशेन हारेणोरसि राजता ।
दिव्यकुण्डलपूर्णाभ्यां श्रवणाभ्यां विभूषिता । इन्दोः सपत्नभूतेन त्वं मुखेन विराजता । ३३५५
मुकुटेन विचित्रेण केशबन्धेन शोभिता । भुजगाभैर्भुजैर्भीमैर्भीषयन्ती दिशो दश ।
ध्वजेन शिखिवर्हेण उच्छ्रितेन विराजता । अङ्गजेन मयूराणां अङ्गदेन च भास्वता ।

कीर्णा भूतगणैर्घोरैर्मन्निदेशानुवर्त्तिनी । कौमारं व्रतमास्थाय त्रिदिवं त्वं गमिष्यसि ।
तत्र त्वां शतदृक् शक्रो मत्प्रदिष्टेन कर्म्मणा । अभिषेकेण दिव्येन दैवतैः सह योक्ष्यते ।
तत्रैव त्वां भगिन्यर्थे गृहीष्यति स वासवः । कुशिकस्य तु गोत्रेण कौशिकी त्वं भविष्यसि । ३२२०
स ते विन्ध्ये नगश्रेष्ठे स्थानं दास्यति शाश्वतं । ततः स्थानसहस्रैस्त्वं पृथिवीं शोभयिष्यसि ।
तत्र शुम्भनिशुम्भौ द्वौ दानवौ नगचारिणौ । तांश्च कृत्वा मनसि तौ सानुगौ नाशयिष्यसि ।
त्रैलोक्यचारिणी सा त्वं भुवि सत्योपयाचना । चरिष्यसि महाभागे वरदा कामरूपिणी ।
कृतानुयात्रा भूतैस्त्वं नित्यं मांसबलिप्रिया । तिथौ नवम्यां पूजां त्वं प्राप्स्यसे स पशुक्रियां ।
ये च त्वां मत्प्रभावज्ञाः प्रणमिष्यन्ति मानवाः । न तेषां दुर्लभं किञ्चित् पुत्रतो धनतोऽपि वा । ३२२५
कान्तारेष्ववसन्नानां मग्नानाञ्च महार्णवे । दस्युभिर्व्वा निरुद्धानां त्वं गतिः परमा नृणां ।
त्वां स्तोष्यन्ति तु ये भक्त्या स्तवेनानेन वै शुभे । तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ।
इतिश्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि भारावतरणे निद्रासम्विज्ञानो नामाष्टपञ्चाशोऽध्यायः ॥ ५८ ॥
॥ वैशम्पायन उवाच ॥ आर्य्यास्तवं प्रवक्ष्यामि यथोक्तमृषिभिः पुरा । नारायणीं नमस्यामि देवीं त्रिभुवनेश्वरीं ।
त्वं सिद्धिः श्रीर्धृतिः कीर्त्तिर्ह्रीर्व्विद्या सन्नतिर्म्मतिः । सन्ध्या रात्रिः प्रभा निद्रा कालरात्रिस्त्वमेव च ।
आर्य्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी । जननी सिद्धसेनस्य उग्रचारी महातपाः । ३२३०
जया च विजया चैव तुष्टिः पुष्टिः क्षमा दया । ज्येष्ठा यमस्य भगिनी नीलकौशेयवासिनी ।
बहुरूपा विरूपा च अनेकविधरूपिणी । विरूपाक्षी विशालाक्षी भक्तानां परिरक्षणी ।
पर्व्वताग्रेषु घोरेषु नदीषु च गुहासु च । वससि त्वं महादेवि वनेषूपवनेषु च ।
शवरैर्ब्बर्ब्बरैश्चैव पुलिन्दैश्च सुपूजिता । मयूरपक्षध्वजिनी लोकान् क्रामसि सर्व्वशः ।
कुक्कुटैश्छागलैर्म्मेषैः सिंहैर्व्याघ्रैः समाकुला । घण्टानिनादबहुला विन्ध्ये वससि सर्व्वदा । ३२३५
त्रिशूलपट्टिशधरा चन्द्रसूर्य्यपताकिनी । नवमी कृष्णपक्षस्य शुक्लस्यैकादशी तथा ।
भगिनी बलदेवस्य रजनी कलहप्रिया । आवासः सर्व्वभूतानां निष्ठा च परमा गतिः ।
नन्दगोपसुता चैव देवी त्वमपराजिता । चीरवासाः सुवासाश्च रौद्री सन्ध्या त्वमेव च ।
प्रकीर्णकेशी मृत्युश्च सुरामांसबलिप्रिया । लक्ष्मीरलक्ष्मीरूपेण दानवानां बधाय च ।
सावित्री चासि वेदानां माता भूतगणस्य च । अन्तर्व्वेदीषु यज्ञानामृत्विजाञ्चैव दक्षिणा । ३२४०
ऋषीणां धर्म्मबुद्धिस्त्वं देवानामदितीति च । कर्षकाणाञ्च सीतेति भूतानां धरणीति च ।
सिद्धिश्च देवि यात्राणां वेला त्वं सागरस्य च । यक्षाणां प्रथमा यक्षी नागानां सुरसेति च ।
कन्यानां ब्रह्मचर्य्या त्वं सौभाग्यं प्रमदासु च । ब्रह्मवादिन्यथो दीक्षा शोभा च परमा तथा ।
ज्योतिषां त्वं प्रभा देवि नक्षत्राणाञ्च रोहिणी । राजद्वारेषु दुर्गेषु नदीनां सङ्गमेषु च ।
पूर्णा च पूर्णिमाचन्द्रे कृत्तिवासा इति स्मृता । सरस्वती च वाल्मीके स्मृतिर्द्वैपायने तथा । ३२४५
ऋषीणां धर्म्मबुद्धिस्त्वं देवानां मानसी तथा । सुरादेवीति भूतेषु स्तूयसे त्वं स्वकर्म्मभिः ।

इन्द्रस्य चारुदृष्टिस्त्वं सहस्रनयनेति च । तापसानाञ्च देवी त्वमरणी चाग्निहोत्रिणां ।
क्षुधा च सर्व्वभूतानां तृप्तिस्त्वञ्च दिवौकसां । स्वाहा तुष्टिर्धृतिश्चैव वसूनां त्वं वसुमती ।
आशा चासि मनुष्याणां तुष्टिश्च कृतकर्म्मणां । दिशश्च विदिशश्चैव तथा ह्यग्निशिखा प्रभा ।
शकुनी पूतना च त्वं रेवती च सुदारुणा । निद्रा च सर्व्वभूतानां मोहनी क्षत्रिया तथा । ३२९०
विद्यानां ब्रह्मविद्या च त्वमोङ्कारो वषट् तथा । नारीणां पार्व्वतीं त्वान्तु पौराणा ऋषयोऽब्रुवन् ।
अरुन्धत्येकभर्त्तॄणां प्रजापतिवचो यथा । भेदो विवादशीलानां त्वमिन्द्राणीति विश्रुता ।
त्वया व्याप्तमिदं सर्व्वं जगत् स्थावरजङ्गमं । संग्रामेषु च सर्व्वेषु वह्निप्रज्वलिते तथा ।
नदीतीरेषु चौरेषु वनेषु च गुहासु च । प्रवासे राजबन्धे च शत्रूणाञ्च प्रमर्द्दने ।
प्राणात्ययेषु सर्व्वेषु त्वं हि रक्षा न संशयः । त्वयि मे हृदयं देवि त्वयि बुद्धिर्मनस्त्वयि । ३२९५
रक्ष मां सर्व्वपापेभ्यः प्रसादं कर्त्तुमर्हसि । इमं देव्याः स्तवं पुण्यमितिहाससमन्वितं ।
यः पठेत् प्रातरुत्थाय शुचिः प्रयतमानसः । त्रिभिश्च काङ्क्षितं मासैः फलं वै संप्रयच्छति ।
षण्मासान् पठते यस्तु काङ्क्षितञ्च लभेत सः । अर्च्चिता नवभिर्मासैर्दिव्यञ्चक्षुः प्रयच्छति ।
संवत्सरेण सिद्धिन्तु यथाकामं प्रयच्छति । सत्यञ्च ब्रह्मचर्य्यञ्च द्वैपायनवचो यथा ।
नृणां बन्धं वधं घोरं पुत्त्रनाशं धनक्षयं । व्याधिमृत्युभयञ्चैव पूजिता शमयिष्यसि । ३३००
मोहयित्वा च तं कंसमेका त्वं भोक्ष्यसे जगत् । अहमप्यात्मनो वृत्तिं विधास्ये गोषु गोपवत् ।
स्वबृद्ध्यर्थं तथा चैव करिष्ये कंसगोपतां । एवं तान्तु समादिश्य गतोऽन्तर्द्धानमीश्वरः ।
सा चापि तं नमस्कृत्य तथाऽस्त्विति विनिश्चिता ।

॥ इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि स्वप्नगर्भविधाने आर्य्यास्तवे ऊनषष्टितमोऽध्यायः ॥ ५८ ॥

॥ वैशम्पायन उवाच ॥ कृते गर्भविधाने तु देवकी देवतोपमा । जग्राह सप्त तान् गर्भान् यथावत् समुदाहृतान् ।
षड्गर्भान् निःसृतान् कंसस्तान् जघान शिलातले । आपन्नं सप्तमं गर्भं सा निनायाथ रोहिणीं । ३३०५
सार्द्धरात्रे स्थितं गर्भं पातयन्ती रजस्वला । निद्रया सहसाविष्टा पपात धरणीतले ।
सा स्वप्नमिव तं दृष्ट्वा स्वे गर्भे गर्भमादधत् । अपश्यन्ती च तं गर्भं मूहूर्त्तं व्यथिताऽभवत् ।
तामाह निद्रा संविग्नां नैशे तमसि रोहिणीं । रोहिणीमिव सोमस्य वसुदेवस्य धीमतः ।
कर्षणेनास्य गर्भस्य स्वगर्भाच्चाहितस्य वै । सङ्कर्षणो नाम शुभे तव पुत्त्रो भविष्यति ।
सा तं पुत्त्रमवाप्यैव हृष्टा किञ्चिदवाङ्मुखी । विवेश रोहिणी वेश्म सुप्रभा रोहिणी यथा । ३३१०
तस्य गर्भस्य मार्गेण गर्भमाधत्त देवकी । यदर्थं सप्त ते गर्भाः कंसेन विनिपातिताः ।
तन्तु गर्भं प्रयत्नेन ररक्षुस्तस्य रक्षिणः । स तत्र गर्भवसतौ वसत्यात्मेच्छया हरिः ।
यशोदाऽपि समं धत्त गर्भं तद्दहरेव तु । विष्णोः शरीरजां निद्रां विष्णोर्निर्द्देशकारिणीं ।
गर्भकाले त्वसंपूर्णे अष्टमे मासि ते स्त्रियौ । देवकी च यशोदा च सुषुवाते समं तदा ।
यामेव रजनीं विष्णुर्जज्ञे वृष्णिकुले प्रभुः । तामेव रजनीं कन्यां यशोदाऽपि व्यजायत । ३३१५

नन्दगोपस्य भार्य्यैका वसुदेवस्य चापरा । तुल्यकालं हि गर्भिण्यौ यशोदा देवकी तथा ।
देवक्यजनयद्विष्णुं यशोदा तान्तु कन्यकां । मुहूर्त्तेऽभिजिते प्राप्ते सार्द्धरात्रे विभूषिते ।
सागराः समकम्पन्त चेलुश्च धरणीधराः । जज्वलुश्चाग्नयः शान्ता जायमाने जनार्द्दने ।
शिवाः संप्रववुर्व्वाताः प्रशान्तमभवद्रजः । ज्योतींषि व्यत्यकाशन्त जायमाने जनार्द्दने ।
अभिजिन्नाम नक्षत्रं जयन्ती नाम शर्व्वरी । मुहूर्त्तो विजयो नाम यत्र जातो जनार्द्दनः ।
अव्यक्तः शाश्वतः कृष्णो हरिर्नारायणः प्रभुः । जायते भगवांस्तत्र नयनैर्मोहयन् जगत् ।
अनाहता दुन्दुभयो देवानां प्राणदंस्तदा । आकाशात् पुष्पवर्षञ्च ववर्ष त्रिदशेश्वरः ।
गीर्भिर्म्मङ्गलयुक्ताभिः स्तुवन्तो मधुसूदनं । महर्षयः सगन्धर्व्वा उपतस्थुः सहाप्सराः ।
जायमाने हृषीकेशे प्रहृष्टमभवज्जगत् । इन्द्रश्च त्रिदशैः सार्द्धं तुष्टाव मधुसूदनं ।
वसुदेवस्तु तं रात्रौ जातं पुत्रमधोक्षजं । श्रीवत्सलक्षणं दृष्ट्वा युतं दिव्यैश्च लक्षणैः ।
उवाच वसुदेवस्तं रूपं संहर वै प्रभो । भीतोऽहं देव कंसस्य तस्मादेवं वदाम्यहं ।
मम पुत्रा हतास्तेन तव ज्येष्ठाऽम्बुजेक्षण ।
॥ वैशम्पायन उवाच ॥ वसुदेववचः श्रुत्वा रूपं संहरदच्युतः । अनुज्ञाप्य पितृत्वेन नन्दगोपगृहं नय ।
वसुदेवस्तु संगृह्य दारकं क्षिप्रमेव च । यशोदाया गृहं रात्रौ विवेश सुतवत्सलः ।
यशोदायास्त्वविज्ञातस्तत्र निक्षिप्य दारकं । गृहीत्वा दारिकां तास्तु देवकीशयने न्यसत् ।
परिवर्त्ते कृते ताभ्यां गर्भाभ्यां भयविक्लवः । वसुदेवः कृतार्थो वै निर्जगाम निवेशनात् ।
उग्रसेनसुतायाथ कंसायानकदुन्दुभिः । निवेदयामास तदा कन्यां तां वरवर्णिनीं ।
तच्छ्रुत्वा त्वरितः कंसो रक्षिभिः सह वेगितः । आजगाम गृहद्वारं वसुदेवस्य वीर्य्यवान् ।
स तत्र त्वरितं द्वारि किं जातमिति चाब्रवीत् । दीयतां शीघ्रमित्येवं वाग्भिः समभितर्ज्जयन् ।
ततो हाहाकृताः सर्व्वा देवकीभवने स्त्रियः । उवाच देवकी दीना वाष्पविक्लवया गिरा ।
दारिका पुत्र जातेति कंसं समभियाचती । श्रीमन्तो मे हताः सप्त पुत्र गर्भास्त्वया विभो ।
दारिकेयं हतैवैषा पश्यस्व यदि मन्यसे । दृष्ट्वा कंसस्तु तां कन्यामकृष्यत मुदा युतः ।
हतैवैषा यदा कन्या जातेत्युक्ता वृथामतिः । सा गर्भशयनक्लिष्टा गर्भाम्बुक्लिन्नमूर्द्धजा ।
कंसस्य पुरतो न्यस्ता पृथिव्यां पृथिवीसमा । पादे तां गृह्य पुरुषः समाविध्यावधूय च ।
उद्यच्छन्नेव सहसा शिलायां समपोथयत् । सावधूता शिलापृष्ठे निष्पिष्टा दिवमुत्पतत् ।
हित्वा गर्भतनुं सा तु सहसा मुक्तमूर्द्धजा । जगामाकाशमाविश्य दिव्यस्रगनुलेपना ।
कन्यैव चाभवत् सा तु दिव्या देवैरभिष्टुता । नीलपीताम्बरधरा गजकुम्भोपमस्तनी ।
रथविस्तीर्णजघना चन्द्रवक्त्रा चतुर्भुजा । विद्युद्विस्पष्टवर्णाभा बालार्कसदृशेक्षणा ।
पयोधरस्तनवती सन्ध्येव सपयोधरा । सा वै निशि तमोग्रस्ते सर्व्वभूतगणाकुले ।
नृत्यती हसती चैव विपरीतेन भास्वती । विहायसि गता रौद्री पपौ पानमनुत्तमं ।

जहास च महाहासं कंसञ्च रुषिताऽब्रवीत् । कंस कंसात्मनाशाय यदहं घातिता त्वया ।
सहसा च समुत्क्षिप्य शिलायामभिपोथिता । तस्मात्तवान्तकालेऽहं कृष्यमाणस्य शत्रुणा ।
पाटयित्वा करैर्देहमुष्णं पास्यामि शोणितं । एवमुक्त्वा वचो घोरं सा यथेष्टेन वर्त्मना ।
खं सा देवालयं देवी गत्वा विचचार ह । सा कन्या ववृधे तत्र वृष्णिसद्मनि पूजिता ।
पुत्रवत् पाल्यमाना सा देवदेवाज्ञया तदा । विद्धि चैनामथोत्पन्नामंशाद्देवीं प्रजापतेः । ३३५०
एकानंशां योगकन्यां रक्षार्थं केशवस्य च । तां वै सर्व्वे सुमनसः पूजयन्ति स्म यादवाः ।
देवीञ्च दिव्यवपुषं कृष्णः संरक्षितो यया । तस्यां गतायां कंसस्तु तां मेने मृत्युमात्मनः ।
विविक्ते देवकीञ्चैव व्रीडितः समभाषत ।
॥ कंस उवाच ॥ पितृष्वसः कृतो यत्नस्तव गर्भा हता मया । अन्य एवान्यतो देवि मम मृत्युरुपस्थितः ।
नैराश्येन कृतो यत्नः स्वजने प्रहृतं मया । दैवं पुरुषकारेण न चातिक्रान्तवानहं । ३३५५
त्यज गर्भगतां चिन्तां सन्तापं पुत्रजं त्यज । हेतुभूतस्त्वहं तेषां मति कालविपर्य्यये ।
काल एव नृणां शत्रुः कालश्च परिणामकः । कालो नयति सर्व्वं वै हेतुभूतास्तु मद्विधाः ।
आगमिष्यन्ति वै देवि यथाभागमुपद्रवाः । इदन्तु कष्टं यज्जन्तुः कर्त्ताऽहमिति मन्यते ।
माकार्षीः पुत्रजां चिन्तां विलापं शोकजं त्यज । एवं प्राया नृणां योनिर्नास्ति कालस्य संस्थितिः ।
पतामि पादयोर्मूर्द्ध्ना पुत्रवत्तव देवकि । मद्गतस्त्यज्यतां रोषो जानाम्यपकृतं त्वयि । ३३६०
इत्युक्तवन्तं कंसं सा देवकी वाक्यमादर्दे । साश्रुपूर्णमुखी दीना भर्त्तारमभिवीक्षती ।
उत्तिष्ठोत्तिष्ठ वत्सेति कंसं मातेव जल्पती ।
॥ देवक्युवाच ॥ ममाग्रतो हता गर्भा ये त्वया कालरूपिणा । कारणं त्वन्न वै पुत्र कृतान्तो ह्यत्र कारणं ।
गर्भकृन्तनमेतन्मे सहनीयं त्वया कृतं । पादयोः पतता मूर्द्ध्ना स्वञ्च कर्म्म जुगुप्सता ।
गर्भे च नियतो मृत्युर्बाल्येऽपि न निवर्त्तते । युवा पि मृत्योर्वशगः स्थविरो मृत एव च । ३३६५
कालपक्वमिदं सर्व्वं हेतुभूतस्त्वमेव तु । अजाते दर्शनं नास्ति यथा नास्ति तथैव सः ।
जातोऽप्यजाततां याति विधात्रा यत्र नीयते । तद्गच्छ पुत्र मा ते भून्मद्गतं मन्युकारणं ।
मृत्युनाऽपहृते पूर्व्वं शेषो हेतुः प्रवर्त्तते । विधिना पूर्व्वदृष्टेन प्रजासर्गेण तत्त्वतः ।
मातापित्रोस्तु कार्य्येण जन्मतस्तूपपद्यते । निशम्य देवकीवाक्यं स कंसः स्वं निवेशनं ।
प्रविवेश सुसंरब्धो दह्यमानेन चेतसा । कृत्ये प्रतिहते दीनो जगाम विमना भृशं । ३३७०
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि श्रीकृष्णजन्मनि षष्टितमोऽध्यायः ॥ ६० ॥
॥ वैशम्पायन उवाच ॥ प्रागेव वसुदेवस्तु व्रजे शुश्राव रोहिणीं । प्रजातां पुत्रमेवाग्रे चन्द्रात् कान्ततराननं ।
स नन्दगोपं त्वरितः प्रोवाच शुभया गिरा । गच्छानया सह त्वं वै व्रजमेव यशोदया ।
तत्रेमौ दारकौ गत्वा जातकर्म्मादिभिर्गुणैः । योजयित्वा व्रजे तात संवर्द्धय यथासुखं ।
रौहिणेयञ्च मे पुत्रं परिरक्ष शिशुं व्रजे । अहं वाच्यो भविष्यामि पितृपक्षेषु पुत्रिणां ।

योऽहमेकस्य पुत्रस्य न पश्यामि शिशोर्मुखं । ह्रियते हि बलात् प्रज्ञा प्राज्ञस्यापि सतो मम ।
अस्माद्धि मे भयं कंसान्निर्घृणाद्वै शिशोर्वधे । यथा च रौहिणेयं त्वं नन्दगोप ममात्मजं ।
गोपायसि शिशुं तात तत्त्वान्वेषी तथा कुरु । विघ्ना हि बहवो लोके बालानुत्रासयन्ति च ।
स च पुत्रो मम ज्यायान् कनीयांश्चाप्ययं तव । उभावपि समं नाम्ना निरीक्षस्व यथासुखं ।
वर्द्धमानावुभावेतौ समानवयसौ यथा । शोभेतां गोव्रजे तस्मिन्नन्दगोप तथा कुरु ।
बाल्ये केलिकिलः सर्व्वो बाल्ये मुह्यति मानवः । बाल्ये चण्डतमः सर्व्वस्तत्र यत्नपरो भव ।
न च वृन्दावने कार्य्यो गवां घोषः कदाचन । तत्र वासे तु भेतव्यं केशिनः पापदर्शिनः ।
सरीसृपेभ्यः कीटेभ्यः शकुनीभ्यस्तथैव च । गोष्ठेषु गोभ्यो वत्सेभ्यो रक्ष्यौ ते बालकौ शिशू ।
नन्दगोप गता रात्रिः शीघ्रयानो व्रजान्वितः । इमे त्वां त्वरयन्तीव पक्षिणः सव्यदक्षिणाः ।
रहस्यं वसुदेवेन सोऽनुज्ञातो महात्मना । यानं यशोदया सार्द्धमारुरोह मुदा युतः ।
कुमारस्कन्धवाह्यायां शिबिकायां समाहितः । संवेशयामास शिशुं शिबिकायां महामतिः ।
जगाम च विविक्तेन शीतलानिलसर्पिणा । बहूदकेन मार्गेन यमुनातीरगामिना ।
स ददर्श शुभे देशे गोवर्द्धनवनोपगे । यमुनातीरसम्बद्धं शीतमारुतसेवितं ।
विगतश्वापदं रम्यं लतागुल्मसमाकुलं । गोभिस्तृणविलग्नाभिः स्यन्दन्तीभिरलङ्कृतं ।
समप्रचारस्थ गवां समतीर्थजलाशयं । वृषाणां स्कन्धघातैश्च विषाणोद्धृष्टपादपं ।
भासामिषादानुसृतं श्येनैश्चामिषगृध्नुभिः । सृगालमृगसिंहैश्च वसामेदाशिभिर्वृतं ।
शार्दूलशब्दाभिरुतं नानापक्षिसमाकुलं । स्वादुवृक्षफलं रम्यं पर्य्याप्ततृणसंस्तरं ।
गोव्रजं गोरुतशिवं गोपनारीभिरावृतं । हम्बारवैश्च वत्सानां सर्व्वतः कृतनिस्वनं ।
शकटावर्त्तविपुलं कण्टकीवाटसङ्कुलं । पर्य्यन्तेष्वावृतं वन्यैर्वृहद्भिः पतितैर्द्रुमैः ।
वत्सानां रोपितैः कीलैर्दामभिश्च विभूषितं । करीषाकीर्णवसुधं कटच्छन्नकुटीमठं ।
क्षेम्यं प्रचारबहुलं हृष्टपुष्टजनावृतं । दामनीप्रायबहुलं गर्गरोद्गारनिस्वनं ।
तक्रनिस्रावबहुलं दधिमण्डार्द्रमृत्तिकं । मन्थानवलयोद्गारैर्गोपीनां जनितस्वनं ।
काकपक्षधरैर्बालैर्गोपालैः क्रीडनाकुलं । सार्गलद्वारगोवाटं मध्ये गोस्थानसङ्कुलं ।
सर्पिषा पच्यमानेन सुरभीकृतमारुतं । नीलपीताम्बराभिश्च तरुणीभिरलङ्कृतं ।
वन्यपुष्पावतंसाभिर्गोपकन्याभिरावृतं । शिरसा धृतकुम्भाभिर्बद्धैरुपरिस्तनाम्बरैः ।
यमुनातीरमार्गेण जलहारीभिरावृतं । स तत्र प्रविशन् हृष्टो गोव्रजं गोपनादितं ।
प्रत्युद्गतो गोपवृद्धैः स्त्रीभिर्वृद्धाभिरेव च । निवेशं रोचयामास परिवर्त्ते सुखाश्रये ।
सा यत्र रोहिणी देवी वसुदेवसुखावहा । तत्र तं बालसूर्य्याभं कृष्णं गूढं न्यवेशयत् ।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि गोव्रजगमने एकषष्टोऽध्यायः ॥ ६१ ॥

॥ वैशम्पायन उवाच ॥ तत्र तस्यासतः कालः सुमहानत्यवर्त्तत । गोव्रजे नन्दगोपस्य वसतो सङ्कुर्षणः ।

दारकौ कृतनामानौ वर्द्धाते सुखञ्च तौ । ज्येष्ठः सङ्कर्षणो नाम कनीयान् कृष्ण एव च ।
मेघकृष्णस्तु कृष्णोऽभूद्देहान्तरगतो हरिः । अवर्द्धत गवां मध्ये सागरस्थ इवाम्बुदः । ३३०५
शकटस्याधः सुप्तं कदाचित् कृष्णमङ्गिनी । यशोदा तं समुत्सृज्य जगाम यमुनां नदीं ।
शिशुलीलां ततः कुर्व्वन् स हस्तचरणौ क्षिपन् । ररोद मधुरं कृष्णः पादावूर्द्ध्वं प्रसारयन् ।
स तत्रैकेन पादेन शकटं पर्य्यवर्त्तयत् । न्युब्जं पयोधराकाङ्क्षी चकार च ररोद च ।
एतस्मिन्नन्तरे प्राप्ता यशोदा भीमविक्रमा । स्नाता प्रस्रवदिग्धाङ्गी बद्धवत्सेव सौरभी ।
सा ददर्श विपर्य्यस्तं शकटं वायुना विना । हाहेति कृत्वा त्वरितं दारकं जगृहे तदा । ३३१०
न सा बुबोध तत् केन शकटं परिवर्त्तितं । स्वस्ति मे दारकस्येति प्रीता भीता च साऽभवत ।
किन्नु वक्ष्यति ते तात पिता परमकोपनः । त्वय्यधःशकटे सुप्ते शकटात्तु विलोडिते ।
किं मे स्नानेन दुःस्नानं नद्याश्च गमनेन किं । पर्य्यस्ते शकटे तात यत्त्वां पश्याम्यपावृतं ।
एतस्मिन्नन्तरे गोभिराजगाम वनेचरः । काषाये वाससी बिभ्रन्नन्दगोपो व्रजान्तिकं ।
स ददर्श विपर्य्यस्तं भिन्नभाण्डघटीघटं । अपास्तधूर्व्विभग्नाक्षं शकटं चक्रमौलिनं । ३३१५
भीतस्त्वरितमागम्य सहसा साश्रुलोचनः । अपि मे स्वस्ति पुत्रायेत्यसकृद्वचनं वदन् ।
पिबन्तं स्तनमालोक्य पुत्रं स्वस्थोऽब्रवीत् पुनः । वृषयुद्धं विना केन पर्य्यस्तं शकटं मम ।
प्रत्युवाच यशोदा तं भीता गद्गदभाषिणी । न हि जानाम्यहं केन शकटं भुवि पातितं ।
अहं गता नदीमार्य्य चैलप्रक्षालनार्थिनी । आगता च विपर्य्यस्तमपश्यं शकटं भुवि ।
तयोः कथयतोरेवमब्रुवंस्तत्र दारकाः । अनेन शिशुना यानमेतत् पादेन पातितं । ३३२०
अस्माभिः सम्पतद्भिश्च दृष्टमेतद्यदृच्छया । आश्चर्य्यमिति ते सर्व्वे विस्मयोत्फुल्ललोचनाः ।
स्वे स्थाने शकटस्याथ चक्रबन्धमकारयन् ।

इतिश्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि शिशुचर्य्यायां शकटभङ्गे द्विषष्टोऽध्यायः ॥ ६२ ॥

॥ वैशम्पायन उवाच ॥ कस्यचित्त्वथ कालस्य शकुनीवेशधारिणी । धात्री कंसस्य भोजस्य पूतनेति परिश्रुता ।
पूतना नाम शकुनी घोरा प्राणिभयङ्करी । आजगामार्द्धरात्रे वै पक्षौ क्रोधाद्विधुन्वती ।
ततोऽर्द्धरात्रसमये पूतना प्रत्यदृश्यत । व्याघ्रगम्भीरनिर्घोषा व्याहरन्ती पुनः पुनः । ३३२५
निलिल्ये शकटाक्षे सा प्रस्नवोत्पीडवर्षिणी । ददौ स्तनं सा कृष्णाय तस्मिन् सुप्तजने निशि ।
तस्याःस्तनं पपौ कृष्णः प्राणैः सह ननाद च । छिन्नस्तनी सा सहसा पपात शकुनी भुवि ।
तेन शब्देन वित्रस्तास्ततो बुबुधिरे जनाः । स नन्दगोपो गोपाश्च यशोदा च सुविक्लवा ।
ते तामपश्यन् पतितां विसंज्ञां विपयोधरां । पूतनां पतितां भूमौ वज्रेणेवावदारितां ।
इदं किन्त्विति सन्त्रस्ताः कस्येदं कर्म्म चेत्यपि । नन्दगोपं पुरस्कृत्य गोपास्ते पर्य्यवारयन् । ३३३०
नाध्यगच्छन्त च तदा हेतुं तत्र कदाचन । आश्चर्य्यमाश्चर्य्यमिति ब्रुवन्तोऽनुययुर्गृहान ।
गतेषु तेषु गोपेषु विस्मितेषु यथागृहं । यशोदां नन्दगोपस्तु पप्रच्छागतसंभ्रमः ।

कोऽयं विधिर्न जानामि विस्मयो मे महानयं। पुनश्च मे भयं भीरु भीरुत्वं समुपागतं।
यशोदा त्वब्रवीद्भीता नार्य्य जानामि किं न्विदं। दारकेण सहानेन सुप्ता शब्देन बोधिता।
यशोदायामजानन्त्यां नन्दगोपः सबान्धवः। कंसाद्भयं चकारोग्रं विस्मयञ्च जगाम ह।
इतिश्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि शिशुचर्य्यायां पूतनावधे त्रिषष्टोऽध्यायः ॥ ६२ ॥

॥ वैशम्पायन उवाच ॥ काले गच्छति तौ सौम्यौ दारकौ कृतनामकौ। कृष्णः सङ्कर्षणश्चोभौ रिङ्गिणौ समपद्यतां।
तावन्योन्यगतौ बालौ बाल्यादेवैकताङ्गतौ। एकमूर्त्तिधरौ कान्तौ बालचन्द्रार्कवर्चसौ।
एकनिर्म्माणनिर्युक्तावेकशय्यासनाशनौ। एकवेशधरावेकं पुष्यमाणौ शिशुव्रतं।
एककार्य्यान्तरगतावेकदेहौ द्विधाकृतौ। एककार्य्यौ महावीर्य्यावेकस्य शिशुतां गतौ।
एकप्रमाणौ लोकानां देववृत्त्यान्मानुषौ। कृत्स्नस्य जगतो गोपौ संवृत्तौ गोपदारकौ।
अन्योन्यव्यतिषक्ताभिः क्रीडाभिरभिशोभितौ। अन्योन्यकिरणग्रस्तौ चन्द्रसूर्य्याविवाम्बरे।
विसर्पन्तौ तु सर्व्वत्र सर्पभोगभुजावुभौ। रेजतुः पांशुदिग्धाङ्गौ दृप्तौ कलभकाविव।
क्वचिद्भस्मप्रदिग्धाङ्गौ करीषप्रोक्षितौ क्वचित्। तौ तत्र पर्य्यधावेतां कुमाराविव पावकौ।
क्वचिज्जानुभिरुद्घृष्टैः सर्पमाणौ विरेजतुः। क्रीडन्तौ वत्सशालासु शकृद्दिग्धाङ्गमूर्द्धजौ।
शुशुभाते श्रिया जुष्टावानन्दजननौ पितुः। जनञ्च विप्रकुर्व्वाणौ विहसन्तौ क्वचित् क्वचित्।
तौ तत्र कौतूहलिनौ मूर्द्धजव्याकुलेक्षणौ। रेजतुश्चन्द्रवदनौ दारकौ सुकुमारकौ।
अतिप्रसक्तौ तौ दृष्ट्वा सर्व्वव्रजविचारिणौ। नाशकत्तौ वारयितुं नन्दगोपः सुदुर्द्दमौ।
ततो यशोदा संक्रुद्धा कृष्णं कमललोचनं। आनाय्य शकटीमूले भर्त्सयन्ती पुनः पुनः।
दाम्ना चैवोदरे बद्ध्वा प्रत्यबन्धदुलूखले। यदि शक्नोषि गच्छेति तमुक्त्वा कर्म्म साऽकरोत्।
व्यग्रायान्तु यशोदायां निर्जगाम ततोऽङ्गणात्। शिशुलीलां ततः कुर्व्वन् सर्व्वं विस्मापयन् व्रजं।
सोऽङ्गणान्निःसृतः कृष्णः कर्षमाण उलूखलं। यमलाभ्यां प्रवृद्धाभ्यामर्ज्जुनाभ्यां निवारितः।
मध्यान्निश्चक्राम तयोः शिशुः कर्षन्नुलूखलं। तत्तस्य कर्षतो बद्धं तिर्य्यग्गतमुलूखलं।
लग्नं ताभ्यां समूलाभ्यामर्ज्जुनाभ्यां चकर्ष सः। तावर्ज्जुनौ कृष्यमाणौ तेन बालेन रंहसा।
समूलविटपौ भग्नौ स च मध्ये जहास वै। निदर्शनार्थं गोपानां दिव्यं स्वबलमास्थितः।
तद्दाम तस्य बालस्य प्रभावादभवद्दृढं। यमुनातीरमार्गस्था गोप्यस्तं ददृशुः शिशुं।
क्रन्दन्त्यो विस्मयन्त्यश्च यशोदानिकटं ययुः। तास्तु संभ्रान्तवदना यशोदामूचुरङ्गनाः।
एह्यागच्छ यशोदे त्वं संभ्रमात् किं विलम्बसे। यौ तावर्ज्जुनवृक्षौ तु व्रजे सत्योपयाचनौ।
पुत्त्रस्योपरि तावेतौ पतितौ ते महीरुहौ। दृढेन दाम्ना तत्रैव बद्धो वत्स इवोदरे।
जहास वृक्षयोर्म्मध्ये तव पुत्त्रः स बालकः। उत्तिष्ठ गच्छ दुर्म्मेधे मूढे पण्डितमानिनि।
पुत्त्रमानय जीवन्तं मुक्तं मृत्युमुखादिव। सा भीता सहसोत्थाय हाहाकारं प्रकुर्व्वती।
तं देशमगमच्चत्र पातितौ तौ महाद्रुमौ। ददर्श सा तयोर्म्मध्ये द्रुमयोरात्मजं शिशुं।

दाम्ना निबद्धमुदरे कर्षमाणमुलूखलं । सगोपीगोपवृद्धश्च सयुवा च व्रजस्तदा ।
पर्य्यगच्छत तद्द्रष्टुं गोपेषु महदद्भुतं । जजल्पुश्च यथाकामं गोपा वनविचारिणः ।
केनेमौ पातितौ वृक्षौ घोषस्यायतनोपमौ । विना वातं विना वर्षं विद्युत्प्रपतनं विना ।
विना हस्तिकृतं दोषं केनेमौ पातितौ द्रुमौ । अहो बत न शोभेते विमूलावर्ज्जुनाविमौ ।
भूमाविमौ निपतितौ वितोयौ जलदाविव । यदीमौ घोषरचितौ घोषकल्याणकारिणौ ।
नन्दगोप प्रसन्नौ ते द्रुमावेवं गतावपि । यद्वाभ्यां दारको मुक्तो विमूलाभ्यामविक्षतः ।
औत्पातिकमिदं घोषे तृतीयं वर्त्तते त्विह । पूतनाया विनाशश्च द्रुमयोः शकटस्य च ।
अस्मिन् स्थाने निवासोऽयं घोषस्यास्य न युज्यते । उत्पाता ह्यत्र दृश्यन्ते कथयन्तो न शोभनं ।
नन्दगोपस्तु सहसा मुक्त्वा कृष्णमुलूखलात् । निवेश्य चाङ्के सुचिरं मृतं पुनरिवागतं ।
नातृप्यत प्रेक्षमाणो वै कृष्णं कमललोचनं । ततो यशोदां गर्हन् वै नन्दगोपो विवेश ह ।
स च गोपजनः सर्व्वो व्रजमेव जगाम ह । स च तेनैव नाम्ना तु कृष्णो वै दामबन्धनात् ।
घोषे दामोदर इति गोपीभिः परिगीयते । एतदाश्चर्य्यभूतं हि बालस्यासीद्विचेष्टितं ।
कृष्णस्य भरतश्रेष्ठ घोषे निवसतस्तदा ।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि शिशुचर्य्यायां यमलार्ज्जुनभङ्गे चतुःषष्टोऽध्यायः ॥ ६४॥

॥ वैशम्पायन उवाच ॥ एवं तौ बाल्यमुत्तीर्णौ कृष्णसङ्कर्षणावुभौ । तस्मिन्नेव व्रजस्थाने सप्तवर्षौ बभूवतुः ।
नीलपीताम्बरधरौ पीतश्वेतानुलेपनौ । बभूवतुर्वत्सपालौ काकपक्षधरावुभौ ।
पर्णवाद्यं श्रुतिसुखं वादयन्तौ वराननौ । शुशुभाते वनगतौ त्रिशीर्षाविव पन्नगौ ।
मयूराङ्गजकर्णौ तौ पल्लवापीडधारिणौ । वनमालाकुलोरस्कौ द्रुमपोताविवोद्गतौ ।
अरविन्दकृतापीडौ रज्जुयज्ञोपवीतिनौ । सशिक्यतुम्बकरकौ गोपवेणुप्रवादकौ ।
क्वचिद्धसन्तावन्योन्यं क्रीडमानौ क्वचित् क्वचित् । पर्णशय्यासु संसुप्तौ क्वचिन्निद्रान्तरैषिणौ ।
एवं वत्सान् पालयन्तौ शोभयन्तौ महावनं । चञ्चूर्य्येते रमन्तौ स्म किशोराविव चञ्चलौ ।
अथ दामोदरः श्रीमान् सङ्कर्षणमभाषत । आर्य्य नास्मिन्वने शक्यं गोपालैः सह क्रीडितुं ।
अवगीतमिदं सर्व्वमावाभ्यां भुक्तकाननं । प्रक्षीणतृणकाष्ठञ्च गोपैर्मथितपादपं ।
घनीभूतानि यान्यासन् काननानि वनानि च । तान्याकाशनिकाशानि दृश्यन्ते स्म यथासुखं ।
गोवाटेषु च ये वृक्षाः परिरक्ष्यार्गलेषु च । सर्व्वे गोष्ठाग्निषु गताः क्षयमक्षयवर्च्चसः ।
सन्निकृष्टानि यान्यासन् काष्ठानि च तृणानि च । तानि दूरावकृष्टासु मार्गितव्यानि भूमिषु ।
अरण्यमिदमल्पोदमल्पकक्षं निराश्रयं । अन्वेषितव्यविश्रामं दारुणं विरलद्रुमं ।
अकर्म्मण्येषु वृक्षेषु स्थितविप्रस्थितद्विजं । संवासस्यास्य महतो जनेनोत्सादितद्रुमं ।
निरानन्दं निरास्वादं निष्प्रयोजनमारुतं । निर्विहङ्गमिदं शून्यं निर्व्यञ्जनमिवाशनं ।
विक्रीयमाणैः काष्ठैश्च शाकैश्च वनसम्भवैः । उत्सवस्थबहुतृणो घोषोऽयं नगरायते ।

शैलानां भूषणं घोषो घोषाणां भूषणं वनं । वनानां भूषणं गावस्ताश्चास्माकं परा गतिः ।
तस्मादन्यद्वनं यावः प्रत्यग्रयवसेन्धनं । इष्टान्यनुपभुक्तानि भोक्तुं गावस्तृणानि वै ।
तस्माद्वनं नवतृणं गच्छन्तु धनिनो व्रजाः । न द्वारबन्धावरणा न गृहक्षेत्रिणस्तथा ।
प्रशस्ता हि व्रजा लोके यथा वै चक्रचारिणः । शकृन्मूत्रेषु तेष्वेव जातं क्षाररकानुगं ।
न तृणं भुञ्जते गावो नापि तत् पयसे हितं । शाद्वलप्रायासु रम्यासु नवासु वनराजिषु । ३४९५
चरावः सहिता गोभिः क्षिप्रं संचाल्यतां व्रजः । श्रूयते हि वनं रम्यं पर्य्याप्ततृणसंचयं ।
नाम्ना वृन्दावनं नाम स्वादुवृक्षफलोदकं । अझिल्लिकण्टकवनं सर्व्वैर्व्वनगुणैर्युतं ।
कदम्बपादपप्रायं यमुनातीरसंश्रितं । स्निग्धशीतानिलवनं सर्व्वर्त्तुनिलयं शुभं ।
गोपीनां सुखसञ्चारि चारुचित्रवनान्तरं । तत्र गोवर्द्धनो नाम नातिदूरे गिरिर्महान् ।
भ्राजते दीर्घशिखरो नन्दनस्येव मन्दरः । मध्ये चास्य महाशाखो न्यग्रोधो योजनोच्छ्रितः । ३५००
भण्डीरो नाम शुशुभे नीलमेघ इवाम्बरे । मध्येन चास्य कालिन्दी सीमन्तमिव कुर्व्वती ।
प्रयाता नन्दनस्येव नलिनी सरितांवरा । तत्र गोवर्द्धनञ्चैव भण्डीरञ्च वनस्पतिं ।
कालिन्दीञ्च नदीं रम्यां द्रक्ष्यावश्चरतः सुखं । तत्रापि वसतां घोषस्त्यज्यतां निर्गुणं वनं ।
सज्जासयाव भद्रन्ते किञ्चिदुत्पाद्य कारणं । एवं कथयतस्तस्य वासुदेवस्य धीमतः ।
प्रादुर्ब्बभूवुः शतशो रक्तमांसवसाशनाः । घोराश्चिन्तयतस्तस्य स्वतनूरुहजास्तदा । ३५०५
विनिष्पेतुर्भयकराः सर्व्वशः शतशो वृकाः । वृकान्निष्पतितान्दृष्ट्वा गोषु वत्सेष्वथो नृषु ।
गोपीषु च यथाकामं व्रजे त्रासोऽभवन्महान् । ते वृकाः पञ्चवद्धाश्च दशवद्धास्तथाऽपरे ।
विंशद्विंशतिवद्धाश्च शतवद्धाश्च यूथशः । निश्चेरुस्तस्य गात्रेभ्यः श्रीवत्सकृतलक्षणाः ।
कृष्णाश्च कृष्णवदना गोपानां भयकारिणः । भक्षयन्तिश्च तैर्व्वत्सांस्त्रासयन्तिश्च गोव्रजं ।
निशि बालान् हरन्तिश्च वृकैरुत्साद्यते व्रजः । न वनं शक्यते गन्तुं न च गाः परिरक्षितुं । ३५१०
न वनात् किञ्चिदाहर्त्तुं न चावतरितुं नदीं । त्रस्ता उद्विग्नमनसो गतास्तस्मिन्वने वसन् ।
एवं वृकैरुदीर्णैश्च व्याघ्रतुल्यपराक्रमैः । व्रजो निष्पन्दचेष्टः स एकस्थानचरः कृतः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि शिशुचर्य्यायां वृकदर्शने पञ्चषष्टोऽध्यायः ॥ ६५ ॥

॥ वैशम्पायन उवाच ॥ एवं वृकांश्च तान्दृष्ट्वा वर्द्धमानान् दुरासदान् । सस्त्रीपुंसोऽथ घोषो वै समस्तोऽमन्त्रयत्तदा ।
स्थानेनेह न नः कार्य्यं व्रजामोऽन्यन्महद्वनं । यच्छिवञ्च सुखोष्यञ्च गवाञ्चैव सुखावहं ।
अद्यैव किञ्चिरेण स्म व्रजामः सह गोधनैः । यावद्वृकैर्व्वधं घोरं न नः सर्व्वो व्रजो व्रजेत् । ३५१५
एषां धूम्रारुणाङ्गानां दंष्ट्रिणां नखकर्षिणां । वृकाणां कृष्णवक्त्राणां बिभीमो निशि गर्ज्जतां ।
मम पुत्रो मम भ्राता मम वत्सोऽथ गौर्म्मम । वृकैर्व्यापादितेत्येवं क्रन्दन्ति स्म गृहे गृहे ।
तासां रुदितशब्देन गवां हम्भारवेण च । व्रजस्योत्थापनं चक्रुर्घोषवृद्धाः समागताः ।
तेषां मतमथाज्ञाय गन्तुं वृन्दावनं वनं । व्रजस्य च निवासाय गवाञ्चैव हिताय च ।

वृन्दावननिवेशाय तान् श्रुत्वा कृतनिश्चयान् । नन्दगोपो बृहद्वाक्यं बृहस्पतिरिवाददे । ३५२०
अद्यैव निश्चयप्राप्तिर्यदि गन्तव्यमेव नः । शीघ्रमाज्ञाप्यतां घोषः सज्जीभवत मा चिरं ।
ततोऽवघुष्यत तदा घोषे तत्प्राकृतैर्जनैः । शीघ्रं गावः प्रकाल्यन्तां भाण्डं समभिरोप्यतां ।
वत्सयूथानि काल्यन्तां युज्यन्तां शकटानि च । वृन्दावनमितः स्थानान्निवेशाय च गम्यतां ।
तच्छ्रुत्वा नन्दगोपस्य वचनं साधु भाषितं । उदतिष्ठद्व्रजः सर्व्वः शीघ्रं गमनलालसः ।
प्रयाह्युत्तिष्ठ गच्छामः किं शेषे साधि योजय । उत्तिष्ठति व्रजे तस्मिन्नासीत् कोलाहलो महान् । ३५२५
उत्तिष्ठमानः शुशुभे शकटीशकटस्तु सः । व्याघ्रघोषमहाघोषो घोषः सागरघोषवान् ।
गोपीनां गर्गरीभिश्च मूर्द्ध्नि चोत्क्षिप्तैर्घटैः । निष्पपात व्रजात् पङ्क्तिस्तारापङ्क्तिरिवाम्बरात् ।
नीलपीतारुणैस्तासां वस्त्रैरग्र्यतराम्बरैः । शक्रचापायते पङ्क्तिर्गोपीनां मार्गगामिनी ।
दामनीदामभारैश्च केचित् कायावलम्बिभिः । गोपा मार्गगता भान्ति सावरोहा इव द्रुमाः ।
स व्रजो व्रजतां भाति शकटौघेन भास्वता । पोतैः पवनविक्षिप्तैर्निष्पतद्भिरिवार्णवः । ३५३०
क्षणेन तद्व्रजस्थानमीरिणं समपद्यत । द्रव्यावयवनिर्द्धूतं कीर्णं वायसमण्डलैः ।
ततः क्रमेण घोषः स प्राप्तो वृन्दावनं महत् । निवेशं विपुलं चक्रे गवाञ्चैव हिताय च ।
शकटावर्त्तपर्य्यन्तञ्चन्द्रार्द्धाकारसंस्थितं । मध्ये योजनविस्तारं तावद्द्विगुणमायतं ।
कण्टकीभिः प्रवृद्धाभिस्तथा कण्टकितैर्द्रुमैः । निखातोच्छ्रितशाखाग्रैरभिगुप्तं समन्ततः ।
मन्थैरारोप्यमाणैश्च मन्थबन्धानुकर्षणैः । अद्भिः प्रक्षाल्यमानाभिर्गर्गरीभिः समन्ततः । ३५३५
कीलैरारोप्यमाणैश्च दामनीपाशपाशितैः । स्तम्भनीयन्त्रितैश्चापि शकटैः परिवर्त्तितैः ।
नियोगपाशैरासक्तैर्गर्गरीस्तम्भमूर्द्धसु । छादनार्थं प्रकीर्णैश्च कटैश्च तृणसङ्कटैः ।
शाखाविटङ्कैर्वृक्षाणां क्रियमाणैरितस्ततः । शोध्यमानैर्गवां स्थानैः स्थाप्यमानैरुलूखलैः ।
प्राङ्मुखैः सिच्यमानैश्च सन्दीप्यद्भिश्च पावकैः । सवत्सचर्म्मास्तरणैः पर्य्यङ्कैश्चावरोपितैः ।
तोयमुत्सारयन्तीभिः प्रेषन्तीभिश्च तद्वनं । शाखाश्चाकर्षमाणाभिर्गोपीभिश्च समन्ततः । ३५४०
युवभिः स्थविरैश्चैव गोपैर्व्यग्रकरैर्भृशं । विशसद्भिः कुठारैश्च काष्ठान्यपि तरूनपि ।
तद्व्रजस्थानमधिकं शुशुभे काननावृतं । रम्यं वननिवेशं वै स्वादुमूलफलोदकं ।
ताश्च कामदुघा गावः सर्व्वपक्षिरुतं वनं । वृन्दावनमनुप्राप्ता नन्दनोपमकाननं ।
पूर्व्वमेव तु कृष्णेन गवां वै हितकारिणा । शिवेन मनसा दृष्टं तद्वनं वनचारिणा ।
पश्चिमेऽपि ततो रूक्षे घर्म्ममासे निरामये । वर्षतीवामृतं देवे तृणं तत्र व्यवर्द्धत । ३५४५
न तत्र वत्साः सीदन्ति न गावो नेतरे जनाः । यत्र तिष्ठति लोकानां हिताय मधुसूदनः ।
ताश्च गावः स घोषश्च स च सङ्कर्षणो युवा । कृष्णेन विहितं वासं तमध्यासत निर्वृताः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वृन्दावनप्रवेशे षट्षष्टोऽध्यायः ॥ ६६ ॥
॥ वैशम्पायन उवाच ॥ तौ तु वृन्दावनं प्राप्तौ वसुदेवसुतावुभौ । चेरतुर्वत्सयूथानि चारयन्तौ सुहृत्प्रियौ ।

पूर्णेषु वर्ष्मसमयस्तयोस्तत्र वने सुखं । क्रीडतोः सह गोपालैर्यमुनायामवगाहिनोः ।
ततः प्रावृडनुप्राप्ता मनसः कामदीपनी । प्रवृत्तपुंख्यमेघाः शक्रचापाङ्कितोदराः । ३५५०
बभूवादर्शनः सूर्य्यो भूमिश्चादर्शनं गता । महता मेघवातेन नवतोयानुकर्षिणा ।
संमार्ज्जिततला भूमिर्यौवनस्थेव लक्ष्यते । नववर्षावसिक्तानि शक्रगोपाकुलानि च ।
नष्टदावाग्निमार्गाणि वनानि प्रचकाशिरे । नृत्यव्यापारकालश्च मयूराणां कलापिनां ।
मदरक्ताः प्रवृत्ताश्च केकाः पटुरवास्तथा । नवप्रावृषि कान्तानां षट्पदाचारदायिनां ।
यौवनस्थं कदम्बानां नवाब्दैर्भ्राजते वपुः । वासितं कुटजैः पुष्पैः कदम्बैर्व्वासितं वनं । ३५५५
वासितं जलदैस्त्वम्भ तोषिता च वसुन्धरा । सन्तप्ता भास्करकरैरभितप्ता दवाग्निना ।
जलैर्व्वलाहकोत्सृष्टैरुच्छ्वसन्तीव पर्व्वताः । महावातसमुद्धूतं महामेघगणार्पितं ।
मही महाराजपुरैस्तुल्यमापद्यते नभः । क्वचित् कन्दलहासाढ्यं शिलीन्ध्राभरणं क्वचित् ।
संप्रदीप्तमिवाभाति फुल्लनीपद्रुमं वनं । ऐन्द्रेण पयसा सिक्तं मारुतेन नवोद्धतं ।
पार्थिवं गन्धमाघ्राय लोकः क्षुभितमानसः । दृप्तसारङ्गनादेन दर्दुरव्याहृतेन च । ३५६०
नवैश्च शिखिविक्रुष्टैरवकीर्णा वसुन्धरा । भ्रमत्पूर्णमहावर्त्ता वर्षप्राप्तमहारयाः ।
हरन्त्यस्तीरजान् वृक्षान् विस्तारं यान्ति निम्नगाः । सन्ततासारनिर्धौताः क्लिन्नपत्रोत्तरच्छदाः ।
न त्यजन्ति नगाग्राणि श्रान्ता इव पतत्त्रिणः । तोयगम्भीरलम्बेषु प्रस्रवत्सु नदत्सु च ।
उदरेषु नवाभ्राणां मज्जतीव दिवाकरः । महीरुहैस्त्पतितैः सलिलोत्पीडसङ्कुला ।
अन्वेष्यमार्गा वसुधा भाति शाद्वलमालिनी । वज्रेणेवावरुग्णानां नगानां नगशालिनां । ३५६५
स्रोतोभिः परिक्लृप्तानि पतन्ति शिखराण्यधः । पतता मेघवर्षेण यथा निम्नानुसारिणा ।
पर्व्वतोद्गीर्णमुक्तेन पूर्य्यन्ते वनराजयः । हस्तोच्छ्रितमुखा वन्या मेघनादानुसारिणः ।
भान्त्यनिर्दृष्ट्या मातङ्गा गाङ्गता इव तोयदाः । प्रावृट्प्रवृत्तिं संदृश्य दृष्ट्वा चाम्बुधरान् घनान् ।
रौहिणेयो मिथः काले कृष्णं वचनमब्रवीत् । पश्य कृष्ण घनान् कृष्णान् बलाकाङ्गदभूषणान् ।
गगने तव गात्राणां वर्णचौरानिवोत्थितान् । तव निद्राकरः कालस्तव गात्रोपमं नभः । ३५७०
त्वमिवाज्ञातवसतिं चन्द्रो वसति वार्षिकीं । एतन्नीलाम्बदश्यामं नीलोत्पलदलप्रभं ।
संप्राप्ते दुर्द्दिने काले दुर्द्दिनम्भाति वै नभः । पश्य कृष्ण जलोदयैः कृष्णैरुद्धूयितैर्घनैः ।
गोवर्द्धनो यथा रम्यो भाति गोवर्द्धनो गिरिः । पतितेनाम्भसा ह्येते समन्तान्मददर्पिताः ।
भ्राजन्ते कृष्णसारङ्गाः काननेषु मदान्विताः । एतान्यम्बुप्रहृष्टानि हरितानि मृदूनि च ।
तृणानि शतपत्राक्षपत्रैर्गूहन्ति मेदिनीं । चरन्तानां शैलानां वनानाञ्च घनागमे । ३५७५
सस्यानाञ्च सीमानां न लक्ष्मीर्व्यतिरिच्यते । शीघ्रवातसमुद्धूताः प्रोषितोत्सुक्यकारिणः ।
दामोदरोद्दामरवाः प्रागल्भ्यं यान्ति तोयदाः । हरे हर्य्यश्वचापेन त्रिवर्णेन त्रिविक्रम ।
विषाणव्येन रचितं तवेदं मध्यमं पदं । नभश्चैव नभस्युत्तं भात्येव चराभः ।

मेघैः शीतातपकरो निरश्मिरिव रश्मिवान्। धाराप्रच्छिन्नाः सर्वैः सततं प्रततैः क्षतः।
अत्यर्थच्छिन्नधारौघैः समुद्रोद्भवसमैर्घनैः। नीपार्जुनकदम्बानां पृथिव्यां वातहृष्टयः। ३५८०
गन्धैः कोलाहला यान्ति वाता मदनदीपनाः। संप्रवृत्तमहावर्षं लम्बमानमिवाम्बरं।
भात्यगाधमपर्य्यन्तं ससागरमिवाम्बरं। धारानिर्म्मलनाराचं विद्युत्कवचवर्म्मितं।
शक्रचापायुधधरं युद्धसज्जमिवाम्बरं। शैलानाञ्च वनानाञ्च द्रुमाणाञ्च वरानन।
प्रतिच्छन्नानि भासन्ते शिखराणि घनैर्घनैः। गजानीकैरिवाकीर्णं सलिलोद्गारिभिर्घनैः।
वर्णसारूप्यतां याति गगनं सागरस्य वै। समुद्रोद्धूतिजननाः लोलशाद्वलकम्पिनः। ३५८५
शीताः सपृषदुद्दामाः कर्कशा यान्ति मारुताः। निशासु सुप्तचन्द्रासु मुक्ततोयासु तोयदैः।
मग्नसूर्य्यस्य नभसो न विभान्ति दिशो दश। चेतनं पुष्करं तोयैः सुधाधौतैः समन्ततः।
न घर्णीनां न रम्याणां विशेषं यान्ति दृष्टयः। सर्व्वदोषपरित्यक्तं मेघशोभातिभूषितं।
पश्य वृन्दावनं कृष्ण वनं चैत्ररथं यथा। एवं प्रावृड्गुणान् सर्व्वान् श्रीमान् कृष्णस्य पूर्व्वजः।
कथयन्नेव बलवान् व्रजमेव जगाम ह। तौ रामकृष्णावन्योन्यं कृष्णारङ्गगावुरौ। ३५९०
तत्कालं ज्ञातिभिः सार्द्धं चेरतुस्तन्महावनं।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि प्रावृड्वर्णने सप्तषष्टोऽध्यायः॥ ६७॥
॥ वैशम्पायन उवाच॥ कदाचित्तु तदा कृष्णो विना सङ्कर्षणेन वै। चचार तद्वनवरं कामरूपी वराननः।
काकपक्षधरः श्रीमान् श्यामः पद्मदलेक्षणः। श्रीवत्सेनोरसि युतः शशाङ्क इव लक्ष्मणा।
साङ्गदेनाग्रपादेन पद्मगोत्थितवर्च्चसा। सकुमाराभितार्येण क्रान्तविक्रान्तगामिना।
पीते प्रीतिकरे नृणां पद्मकिञ्जल्कसन्निभे। सूक्ष्मे वसानो वसने ससन्ध्य इव तोयदः। ३५९५
वत्सव्यापारयुक्ताभ्यां व्यग्राभ्यां दण्डरज्जुभिः। भुजाभ्यां साधुवृत्ताभ्यां पूजिताभ्यां सदाऽमरैः।
सदृशं पुण्डरीकस्य गन्धेन कमलस्य च। रराज तस्य तद्वक्त्रं रुचिरोष्ठपुटं मुखं।
शिखाभिस्तस्य मुक्ताभीरराज मुखपङ्कजं। वृतं षट्पदपङ्क्तीभिर्यथा स्यात् पद्ममण्डलं।
तस्यार्ज्जुनकदम्बाढ्या नीपकन्दलमालिनी। रराज माला शिरसि नक्षत्राणि यथा दिवि।
स तया मालया वीरः शुशुभे सर्व्वपुष्पया। मेघकालाम्बुदश्यामो नभस्य इव मूर्त्तिमान्। ३६००
एकेनामलपत्रेण कण्ठसूत्रावलम्बिना। रराज बर्हिपत्रेण मन्दमारुतकम्पिना।
क्वचिद्गायन् क्वचित् क्रीडन् सन्नृत्यंश्च क्वचित् क्वचित्। पर्णवाद्यं श्रुतिसुखं वादयंश्च क्वचिद्वने।
गोपवेणुं सुमधुरं कामात्तमपि वादयन्। प्रह्लादनार्थञ्च गवां क्वचिद्वनगतो युवा।
गोकुलेऽम्बुदश्यामश्चचार द्युतिमान् प्रभुः। रेमे च तत्र रम्यासु चित्रासु वनराजिषु।
मयूरवरघुष्टासु मदनोद्दीपनीषु च। मेघनादप्रतिव्यूहैर्नादितासु समन्ततः। ३६०५
शाद्वलच्छन्नमार्गासु शिलिन्ध्राभरणासु च। कन्दलामलदन्तीषु स्रवन्तीषु नवं जलं।
केशराणां नवैर्गन्धैर्मदनिश्वसितोपमैः। सभीरणं निश्वसन्तीषु योषित्स्विव समन्ततः।

सेव्यमानो नवैश्चान्तैर्द्रुमवातानिःसृतैः । तासु कृष्णो मुदं लेभे सौम्यासु वनराजिषु ।
स कदाचिद्वने तस्मिन् गोभिः सह परिभ्रमन् । ददर्श विपुलोदग्रं शाखिनं शाखिनाम्वरं ।
स्थितं धरण्यां मेघाभं निविडं पत्रसञ्चयैः । गगनार्द्धोच्छ्रिताकारं पवनाभोगधारिणं ।
नीलचित्राङ्गवर्णैश्च सेवितं बहुभिर्द्विजैः । फलैः प्रवालैश्च घनं सेन्द्रचापघनोपमं ।
भवनाकारविटपं लतापुष्पसुमण्डितं । विशालमूलावनतं पवनाम्भोदधारिणं ।
आधिपत्यमिवान्येषां तस्य देशस्य शाखिनां । कुर्व्वाणं शुभकर्म्माणं निरावर्षं निरातपं ।
न्यग्रोधं पर्व्वताग्राभं भाण्डीरं नाम नामतः । दृष्ट्वा तत्र मतिञ्चक्रे निवासाय तदा प्रभुः ।
स तत्र वयसा तुल्यैर्व्वत्सपालैः सहानघः । रेमे वै दिवसं कृष्णः पुरा स्वर्गगतो यथा ।
तं क्रीडमानं गोपालाः कृष्णं भाण्डीरवासिनं । रमयन्ति स्म बहवो वन्यैः क्रीडनकैस्तदा ।
अन्ये स्म परिगायन्ति गोपा मुदितमानसाः । गोपालाः कृष्णमेवान्ये गायन्ति स्म रतिप्रियाः ।
तेषां स गायतामेव वादयामास वीर्य्यवान् । पर्णवाद्यान्तरे वेणुं तुम्बीवीणाञ्च तत्र ह ।
कदाचिच्चारयन्नेव गाः स गोवृषभेक्षणः । जगाम यमुनातीरं लतालङ्कृतपादपं ।
तरङ्गापाङ्गकुटिलां वारिस्पर्शसुखानिलां । ताञ्च पद्मोत्पलवतीं ददर्श यमुनां नदीं ।
जलजैः प्राणिभिः कीर्णां जलजैर्भूषितां गुणैः । जलजैः कुसुमैश्चित्रां जलजैर्हरितोदकां ।
सुतीर्थां स्वादुसलिलां ह्रदिनीं वेगगामिनीं । तोयकालोद्धुतैर्व्वेगैरवनामितपादपां ।
हंसकारण्डवोद्घुष्टां सारसैश्च निनादितां । अन्योन्यमिथुनैश्चैव सेवितां मिथुनेचरैः ।
प्रस्थितस्रोतचरणां पुलिनश्रोणिमण्डलां । आवर्त्तनाभिगम्भीरां पद्मरोमानुरञ्जितां ।
तटच्छेदोदरां कान्तां तरङ्गत्रिवलीधरां । चक्रवाकस्तनतटीं तीरपार्श्वायताननां ।
फेनप्रकृष्टदशनां प्रसन्नां हंसहासिनीं । रुधिरोत्पलदन्तोष्ठीं नतभ्रूं जलजेक्षणां ।
ह्रददीर्घललाटान्तां कान्तशैवलमूर्द्धजां । दीर्घस्रोतायतभुजामाभोगश्रवणायतां ।
कारण्डवाकुण्डलिनीं श्रीमत्पङ्कजलोचनां । काशपुष्पमयं वासो वसानां हंसलक्षणां ।
तटजाभरणोपेतां मीननिर्म्मलमेखलां । पारिप्लवप्लवक्षौमां सारसारावनूपुरां ।
स्वपनकानुलिप्ताङ्गीं कूर्म्मलक्षणभूषितां । निपानश्वापदापीतां नृभिः पीतपयोधरां ।
श्वापदोच्छिष्टसलिलामाश्रमस्थानसङ्कुलां । तां समुद्रस्य महिषीं वीक्षमाणः समन्ततः ।
चचार रुचिरं कृष्णो यमुनामुपशोभयन् । ताञ्चरन् स नदीं श्रेष्ठां ददर्श ह्रदमुत्तमं ।
दीर्घं योजनविस्तारं दुस्तरं त्रिदशैरपि । गम्भीरमक्षोभ्यजलं निष्कम्पमिव सागरं ।
तोयजैः श्वापदैस्त्यक्तं शून्यं तोयचरैः खगैः । अगाधेनाम्भसा पूर्णं मेघपूर्णमिवाम्बरं ।
दुःखोपसर्प्यं तीरेषु ससर्पैर्व्विपुलैर्व्विलैः । विषारणिभवस्याग्नेर्धूमेन परिवेष्टितं ।
अभोज्यं तत् पशूनां हि अपेयञ्च जलार्थिनां । उपभोगैः परित्यक्तं सर्व्वैस्त्रिषवणार्थिभिः ।
आकाशादप्यसञ्चार्य्यं खगैराकाशगोचरैः । तृणेष्वपि पतत्स्वप्सु ज्वलन्तमिव तेजसा ।

समन्ताद्योजनं साग्रं तीरेष्वपि दुरासदं। विषानलेन घोरेण ज्वालाप्रज्वलितोदकं।
प्रजस्रोत्तरतस्तस्य क्रोशमात्रे निराश्रये। तं दृष्ट्वा चिन्तयामास कृष्णो वै विपुलं ह्रदं।
अगाधं तोयमानस्य कक्षोरं सुमहद्ध्रदं। अस्मिन् स कालियो नाम नीलाञ्जनचयोपमः। ३६४०
उरगाधिपतिः साक्षाद्ध्रदे वसति दारुणः। उत्सृज्य सागरे वासं यो मया विदितः पुरा।
भयात् पतगराजस्य सुपर्णस्योरगाशिनः। तेनेयं दूषिता सर्व्वा यमुना सागरङ्गमा।
भयादस्योरगपतेर्नायं देशो निषेव्यते। तदिदं दारुणाकारमरण्यं रुक्षदर्शनं।
सावरोधद्रुमं घोरं कीर्णं नानालताद्रुमैः। रक्षितं सर्पराजस्य सचिवैर्व्वनचारिभिः।
वनं निर्व्विषयाकारं विषाक्तमिव दुर्गमं। तैराप्तकारिभिर्नित्यं सर्व्वतः परिरक्षितं। ३६४५
शैवालमलिनैश्चापि वृक्षैः क्षुपलताकुलैः। कर्त्तव्यमार्गौ भ्राजेते ह्रदस्यास्य तटावुभौ।
तदस्य सर्पराजस्य कर्त्तव्यो निग्रहो मया। यथेयं सरिदक्षोभ्या भवेच्छिवजलाश्रया।
व्रजोपभोग्या च शुभा नागे वै दमिते मया। सर्व्वत्र सुखसञ्चारा सर्व्वतीर्थसुखाश्रया।
एतदर्थञ्च वासो मे व्रजेऽस्मिन् गोपजन्म च। अमीषामुत्पथस्थानां निग्रहार्थं दुरात्मनां।
एतं कदम्बमारुह्य तदेव शिशुलीलया। विनिपत्य ह्रदे घोरे दमयिष्यामि कालियं। ३६५०
एवं कृते बाहुवीर्य्ये लोके ख्यातिङ्गमिष्यति।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि शिशुचर्य्यायां कालियह्रददर्शने अष्टषष्टोऽध्यायः ॥ ६८ ॥

॥ वैशम्पायन उवाच ॥ सोऽपसृत्य नदीतीरं बद्ध्वा परिकरं दृढं। आरोहच्चपलः कृष्णः कदम्बशिखरं मुदा।
कृष्णः कदम्बशिखरात्तस्मात्सोऽम्बुदाकृतिः। ह्रदमध्ये ऽकरोत् क्ष्वेडं निपतन्नम्बुजेक्षणः।
स कृष्णेनाभिपतता क्षोभितो यमुनाह्रदः। सम्प्राविध्यत वेगेन भिद्यमान इवाम्बुदः।
तेन शब्देन संक्षुब्धं तत्सर्पभवनं महत्। उदतिष्ठज्जलात् सर्पो रोषपर्य्याकुलेक्षणः। ३६५५
स चोरगपतिः क्रुद्धो मेघराशिसमप्रभः। ततो रक्तान्तनयनः कालियः समदृश्यत।
पञ्चास्यः पावकोच्छ्वासचलज्जिह्वोऽनलाननः। पृथुभिः पञ्चभिर्घोरैः शिरोभिः परिवारितः।
पूरयित्वा ह्रदं सर्व्वं भोगेनानलवर्चसा। स्फुरन्निव स रोषेण ज्वलन्निव च तेजसा।
क्रोधेन तज्जलं तस्य सर्व्वं शृतमिवाभवत्। प्रतिस्रोतश्च भीतेव जगाम यमुना नदी।
तस्य क्रोधाग्निपूर्णेभ्यो वक्त्रेभ्योऽभूच्च मारुतः। दृष्ट्वा कृष्णं ह्रदगतं क्रीडन्तं शिशुलीलया। ३६६०
सधूमाः पन्नगेन्द्रस्य मुखान्निश्चेरुरर्च्चिषः। ज्वलता तेन रोषाग्निं समीपे तीरजा द्रुमाः।
क्षणेन भस्मसान्नीता युगान्तप्रतिमेन वै। तस्य पुत्राश्च दाराश्च भृत्याश्चान्ये महोरगाः।
वमन्तः पावकं घोरं वक्त्रेभ्यो विषसम्भवं। सधूमं पन्नगेन्द्रास्ते निष्पेतुरमितौजसः।
प्रवेष्टितश्च तैः सर्पैः स कृष्णो भोगबन्धनैः। निश्चलश्चरणाकारस्तस्थौ गिरिरिवाचलः।
ददंशुर्दशनैस्तीक्ष्णैर्व्विषोत्पीडजलाविलैः। ते कृष्णं सर्पपतयो न ममार च वीर्य्यवान्। ३६६५
एतस्मिन्नन्तरे भीता गोपालाः सर्व्व एव ते। क्रन्दमाना व्रजं जग्मुर्बाष्पसंदिग्धया गिरा।

॥ गोपा ऊचुः ॥ एष मोहङ्गतः कृष्णो मग्नो वै कालिये ह्रदे । भक्ष्यते सर्पराजेन तदागच्छत मा चिरं ।
नन्दगोपाय वै क्षिप्रं सवत्साय निवेद्यतां । एष ते कृष्यते पुत्रः सर्पेणेह महाह्रदे ।
नन्दगोपस्तु तच्छ्रुत्वा वज्रपातोपमं वचः । आर्त्तः स्खलितविक्रान्तस्तं जगाम ह्रदोत्तमं ।
सबालयुवतीवृद्धः स च सङ्कर्षणो युवा । आक्रीडं पन्नगेन्द्रस्य जवात्तं समुपागमत् ।
नन्दगोपादयो गोपास्ते सर्व्वे साश्रुलोचनाः । हाहाकारं प्रकुर्वन्तस्तस्थुस्तीरे ह्रदस्य वै ।
ह्रीतिता विस्मिताश्चैव शोकार्त्ताश्च पुनः पुनः । केचित्तु पुत्र हा हेति हा धिगित्यपरे पुनः ।
अपरे हा हताः स्मेति रुरुदुर्भृशदुःखिताः । स्त्रियश्चैव यशोदां तां हा हताऽसीति चुक्रुशुः ।
या पश्यसि प्रियं पुत्रं सर्पराजवशं गतं । सन्दष्टं सर्पभोगेन कृष्यमाणं यथा मृगं ॥
अश्मसारमयं नूनं हृदयं तेऽभिलक्ष्यते । पुत्रं कथमिमं दृष्ट्वा यशोदे नावदीर्य्यसे ।
दुःखितं वत पश्यामो नन्दगोपं ह्रदान्तिके । न्यस्य पुत्रमुखे दृष्टिं निश्चेतनमिव स्थितं ।
यशोदामनुगच्छन्त्यः सर्पावासमिमं ह्रदं । प्रविशामो न यास्यामः सर्व्वा दामोदरं विना ।
दिवसः को विना सूर्य्यं विना चन्द्रेण का निशा । विना वृषेण का गावो विना कृष्णेन को व्रजः ।
विना कृष्णं न यास्यामो विवत्सा इव धेनवः । तासां विलपितं श्रुत्वा तेषाञ्च व्रजवासिनां ।
विलापं नन्दगोपस्य यशोदारुदितं तथा । एकभावशरीरस्य एकदेहो द्विधाकृतः ।
सङ्कर्षणस्तु संक्रुद्धो बभाषे कृष्णमव्ययं । कृष्ण कृष्ण महाबाहो गोपानां नन्दिवर्द्धन ।
दम्यतामेष वै क्षिप्रं सर्पराजो विषायुधः । इमे नो बान्धवास्तात त्वां मत्वा मानुषं विभो ।
परिदेवन्ति करुणं सर्व्वे मानुषबुद्धयः । तच्छ्रुत्वा रौहिणेयस्य वाक्यं संज्ञासमीरितं ।
विक्रीड्यास्फोटयद्बाहू भित्त्वा तं भोगबन्धनं । तस्य पद्भ्यां समाक्रम्य भोगराशिं जलोत्थितं ।
शिरःसु कृष्णो जग्राह स्वहस्तेनावनाम्य च । तस्यारुरोह सहसा मध्यमं तन्महच्छिरः ।
सोऽस्य मूर्द्ध्नि स्थितः कृष्णो ननर्त्त रुचिराङ्गदः । मृद्यमानः स कृष्णेन श्रान्तमूर्द्धा भुजङ्गमः ।
आस्यैः सरुधिरोद्गारैः कातरो वाक्यमब्रवीत् । अविज्ञानान्मया कृष्ण रोषोऽयं सम्प्रदर्शितः ।
दमितोऽहं हतविषो वशगस्ते वरानन । तदाज्ञापय किं कुर्य्यां सदारापत्यबान्धवः ।
कस्य वा दीयतां यामि जीवितं मे प्रदीयतां । पञ्चमूर्द्धानतं दृष्ट्वा सर्पं सर्पारिकेतनः ।
अक्रुद्ध एव भगवान् प्रत्युवाचोरगेश्वरं । तवास्मिन् यमुनातोये नैव स्थानं ह्रदाश्रयं ।
गच्छार्णवजलं सर्प सभार्य्यः ससबान्धवः । यश्चेह भूयो दृश्येत स्थले वा यदि वा जले ।
तव भृत्यस्तनूजो वा क्षिप्रं वध्यः स मे भवेत् । शिवश्चास्य जलस्यास्तु त्वञ्च गच्छ महार्णवं ।
स्थाने त्विह भवेद्दोषस्तवान्यः कारणो महान् । मत्पदानि च ते सर्प दृष्ट्वा मूर्द्धसु सागरे ।
गरुडः पन्नगरिपुस्त्वयि न प्रहरिष्यति । इत्युक्त्वा मूर्द्धा वचस्तस्य कृष्णस्योरगपुङ्गवः ।
पश्यतामेव गोपानां जगामादर्शनं ह्रदात् । निर्जिते तु गते सर्पे कृष्णमुत्तार्य्य धिष्ठितं ।
विस्मिताः पुरुषा गोपाश्चक्रुश्चैव प्रदक्षिणं । ऊचुश्च सर्व्वे सम्प्रीता नन्दगोपं वनेचराः ।

धन्योऽस्यनुगृहीतोऽसि यस्य ते पुत्र ईदृशः । अद्यप्रभृति गोपानां गवां गोष्ठस्य चानघ ।
आपत्सु शरणं कृष्णः प्रभुश्चायतलोचनः । जाता शिवजला सर्वा यमुना मुनिसेविता ।
तीरे चाश्चाः सुखं गावो विचरिष्यन्ति नः सदा । व्यक्तमेव वने जाता वयं यत्कृष्णमीदृशं ।
प्रच्छन्नं न जानीमस्त्वग्निमिव व्रजे । एवं ते विस्मिताः सर्व्वे स्तुवन्तः कृष्णमव्ययं ।
जग्मुर्गोपगणा घोषं देवाश्चैत्ररथं यथा ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि शिशुचर्य्यायां कालियदमने ऊनसप्ततोऽध्यायः ॥ ६९ ॥
॥ वैशम्पायन उवाच ॥ दमिते सर्पराजे तु कृष्णेन यमुनाह्रदे । तमेव चेरतुर्देशं सहितौ रामकेशवौ ।
आजग्मतुस्तौ सहितौ गोधनैः सह गोमिनौ । गिरिं गोवर्द्धनं रम्यं वसुदेवसुतावुभौ ।
गोवर्द्धनस्योत्तरतो यमुनातीरमाश्रितं । ददृशाते ततो वीरौ रम्यं तालवनं महत् ।
तौ तालपर्णप्रतते रम्ये तालवने रतौ । चेरतुः परमप्रीतौ वृषपोताविवोद्धतौ ।
स तु देशः समः स्निग्धः सुमहान् कृष्णमृत्तिकः । दर्भप्रायः स्थलीभूतो लोष्टपाषाणवर्जितः ।
तालैस्तैर्विपुलस्कन्धैरुच्छ्रितैः श्यामपर्व्वभिः । फलाग्रशाखिभिर्भाति नागहस्तैरिवोच्छ्रितैः ।
तत्र दामोदरो वाक्यमुवाच वदतांवरः । अहो तालफलैः पक्वैर्वासितेयं वनस्थली ।
स्वादून्यार्य्य सुगन्धीनि श्यामानि रसवन्ति च । पक्वतालानि सहितौ पातयाव लघुक्रमौ ।
यद्येषामीदृशो गन्धो माधुर्य्यघ्राणतर्पणः । रसेनामृतकल्पेन भवितव्यञ्च मे मतिः ।
दामोदरवचः श्रुत्वा रौहिणेयो हसन्निव । पातयन् पक्वतालानि चालयामास तान् द्रुमान् ।
तत्तु तालवनं नृणामसेव्यं दुरतिक्रमं । निर्म्माणभूतमीरिणं पुरुषादालयोपमं ।
दारुणो धेनुको नाम दैत्यो गर्द्दभरूपवान् । खरयूथेन महता वृतो बलवतांवरः ।
स तु तालवनं घोरं गर्द्दभः परिरक्षति । नृपक्षिश्वापदगणांस्त्रासयन्नतिदर्पितः ।
तालशब्दं स तं श्रुत्वा संघुष्टं फलपातने । नामर्षयत तं क्रुद्धस्तालस्वनमिव द्विपः ।
शब्दानुसारी संक्रुद्धो दर्पाविद्धसटाननः । स्तब्धाक्षो हेषितपटुः खुरैर्निर्द्दारयन्महीं ।
आविद्धपुच्छो हेषितो व्यात्तानन इवान्तकः । आपतन्नेव ददृशे रौहिणेयमुपस्थितं ।
तालानां तमधो दृष्ट्वा सध्वजाकारमव्ययं । रौहिणेयं खरो दुष्टः सोऽदशद्दशनायुधः ।
पद्भ्यामुभाभ्याञ्च पुनः पश्चिमाभ्यां पराङ्मुखः । जघानोरसि दैत्योऽसौ रौहिणेयं निरायुधं ।
ताभ्यामेव स जग्राह पद्भ्यां तं दैत्यगर्द्दभं । आविध्य तमुरःस्कन्धं प्रेरयंस्तालमूर्द्धनि ।
स भग्नोरुकटीग्रीवो भग्नपृष्ठो दुराकृतिः । खरस्तालफलैः सार्द्धं पपात धरणीतले ।
तं गतासुं गतश्रीकं पतितं वीक्ष्य गर्द्दभं । ज्ञातींस्तथाऽपरांस्तस्य तृणराजनि सोऽक्षिपत् ।
सा भूर्गर्द्दभदेहैश्च तालपक्वैश्च पातितैः । बभासे छन्नजलदा द्यौरिवाव्यक्तशारदी ।
तस्मिन् गर्द्दभदैत्ये तु सानुगे विनिपातिते । रम्यं तालवनं तद्धि भूयो रम्यतरं बभौ ।
विप्रमुक्तभयं शुभ्रं विविक्ताकारदर्शनं । चरन्ति स्म सुखं गावस्तत्तालवनमुत्तमं ।

ततः प्रहृष्टास्ते सर्व्वे गोपा वनविचारिणः। वीतशोकभयायासाश्चचुर्य्यन्ते स्म ते वनं।
ततः सुखं प्रकीर्णासु गोषु नागेन्द्रविक्रमौ। द्रुमपर्णासने कृत्वा यथार्हं तौ निषेदतुः।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि शिशुचर्य्यायां धेनुकवधे सप्ततितमोऽध्यायः॥ ७० ॥
॥ वैशम्पायन उवाच॥ अथ तौ जातहर्षौ तु वसुदेवसुतावुभौ। तत्तालवनमुत्सृज्य भूयो भाण्डीरमागतौ।
चारयन्तौ विवृद्धानि गोधनानि शुभाननौ। स्फीतशष्पप्ररूढानि वीक्षमाणौ वनानि च।
क्ष्वेडयन्तौ प्रगायन्तौ विचिन्वन्तौ च पादपान्। नामभिर्व्याहरन्तौ च वत्सा गाः परन्तपौ।
नियोगपाशैरासक्तैः स्कन्धाभ्यां शुभलक्षणौ। वनमालाकुलोरस्कौ बालशृङ्गाविवर्षभौ।
सुवर्णाञ्जनचूर्णाभ्यामन्योन्यसदृशाम्बरौ। महेन्द्रायुधसंसक्तौ शुक्लकृष्णाविवाम्बुदौ।
कुशाग्रकुसुमानाञ्च कर्णपूरमनोरमौ। वनमार्गेषु कुर्व्वाणौ वन्यवेशधरावुभौ।
गोवर्द्धनस्यानुचरौ वने सानुचरौ च तौ। चेरतुर्लोकसिद्धाभिः क्रीडाभिरपराजितौ।
तावेव मानुषीं दीक्षां वहन्तौ सुरपूजितौ। तज्जातिगुणयुक्ताभिः क्रीडाभिश्चेरतुर्व्वनं।
तौ तु भाण्डीरमुषिते काले क्रीडानुवर्त्तिनौ। प्राप्तौ परमशाखाढ्यं न्यग्रोधं शाखिनाम्वरं।
तत्र स्पन्दोलिकाभिश्च युद्धमार्गविशारदौ। अश्मभिः क्षेपणीयैश्च व्यायामं कुरुतः स्म तौ।
युद्धमार्गैश्च विविधैर्गोपालैः सहितावुभौ। मुदितौ सिंहविक्रान्तौ यथाकामं विचेरतुः।
तयोरमयतोरेवं तल्लिप्सुरसुरोत्तमः। प्रलम्बोऽभ्यागमत्तत्र छिद्रान्वेषी तयोस्तदा।
गोपालवेशमास्थाय वन्यपुष्पविभूषितः। लोभयानः स्म तौ वीरौ हासैः क्रीडनकैस्तदा।
सोऽवगाहत निःशङ्कस्तेषां मध्यममानुषः। मानुषं वपुरास्थाय प्रलम्बो दानवोत्तमः।
प्रक्रीडितास्तु ते सर्व्वे सह तेनामरारिणा। गोपालवपुषं गोपा मन्यमानाः स्वबान्धवं।
स तु छिद्रान्तरप्रेप्सुः प्रलम्बो गोपतां गतः। दृष्टिं परिदधे कृष्णे रौहिणेये च दारुणां।
अविषह्यं ततो मत्वा कृष्णमद्भुतविक्रमं। रौहिणेयवधे यत्नमकरोद्दानवोत्तमः।
हरिणाक्रीडितं नाम बालक्रीडनकं ततः। प्रक्रीडिताश्च ते द्वन्द्वमुत्पेतुर्युगपत्तदा।
कृष्णः श्रीदामसहितः पुप्लुवे गोपसूनुना। सङ्कर्षणस्तु सुनवान् प्रलम्बेन सहानघ।
गोपालास्त्वपरे द्वन्द्वं गोपालैरपरैः सह। प्रद्रुता लङ्घयन्तो वै अन्योन्यं लघुविक्रमाः।
श्रीदामानमजयत् कृष्णः प्रलम्बं रोहिणीसुतः। गोपालैः कृष्णपक्षीयैर्गोपालास्त्वपरे जिताः।
ते वाहयन्तस्त्वन्योन्यं संहर्षात् सहसा द्रुताः। भाण्डीरस्कन्धमुद्दिश्य मर्य्यादां पुनरागमन्।
सङ्कर्षणन्तु स्कन्धेन शीघ्रमुत्क्षिप्य दानवः। द्रुतं जगाम विमुखः सचन्द्र इव तोयदः।
स भारमसहंस्तस्य रौहिणेयस्य धीमतः। ववृधे सुमहाकायः शक्राक्रान्त इवाम्बुदः।
स भाण्डीरवटप्रख्यं स्निग्धाञ्जनगिरिप्रभं। स्वं वपुर्दर्शयामास प्रलम्बो दानवोत्तमः।
पञ्चस्तबकयुक्तेन मुकुटेनार्कवर्चसा। दीप्यमानाननो दैत्यः सूर्य्याक्रान्त इवाम्बुदः।
महाननो महाग्रीवः सुमहानन्तकोपमः। रौद्रः शकटचक्राक्षो नामयंश्चरणैर्महीं।

स्रग्दामलम्बाभरणः प्रलम्बाम्बरभूषणः । धीरं प्रलम्बः प्रययौ तोयपूर्ण इवाम्बुदः । ३७५५
स जहारैव वेगेन रौहिणेयं महासुरः । सागरोपप्लवगतं कृत्स्नं लोकमिवान्तकः ।
ह्रियमाणः प्रलम्बेन स तु सङ्कर्षणो बभौ । उह्यमान इवाकाशे कालमेघेन चन्द्रमाः ।
स सन्दिग्धमिवात्मानं मेने सङ्कर्षणस्तदा । दैत्यस्कन्धगतः श्रीमान् कृष्णं चेदमुवाच ह ।
ह्रियेऽहं कृष्ण दैत्येन पर्वतोदग्रवर्ष्मणा । दर्शयित्वा सुमहतीं मायां मानुषरूपिणीं ।
कथमस्य मया कार्यं शासनं दुष्टचेतसः । प्रलम्बस्य प्रवृद्धस्य दर्पाद्द्विगुणवर्चसः । ३७६०
तमाह सस्मितं कृष्णः साम्ना हर्षकरेण वै । अभिज्ञो रौहिणेयस्य वृत्तस्य च बलस्य च ।
अहोऽयं मानुषो भावो व्यक्तमेवानुपाल्यते । यस्त्वं जगन्मयं गुह्यं गुह्याद्गुह्यतरं गतः ।
स्मर नारायणात्मानं लोकानां त्वं विपर्यये । अवगच्छात्मनात्मानं समुद्राणां समागमे ।
पुरातनानां देवानां ब्रह्मणः सलिलस्य च । आत्मवृत्तप्रवृत्तांश्च संहारांश्च वै वपुः ।
शिरः खं ते जलं मूर्तिः क्षमा भूर्दहनो मुखं । वायुर्लोकायुरुच्छ्वासो मनः स्रष्टा ह्यभूत्तव । ३७६५
सहस्रास्यः सहस्राङ्गः सहस्रचरणेक्षणः । सहस्रपद्मनाभस्त्वं सहस्रांशुधरोऽरिहा ।
यत्त्वया दर्शितं लोके तत् पश्यन्ति दिवौकसः । यत्त्वया नोक्तपूर्वं हि कस्तदन्वेष्टुमर्हति ।
यद्वेदितव्यं लोकेऽस्मिंस्तत्त्वया समुदाहृतं । विदितं यत्त्वैकस्य देवा अपि न तद्विदुः ।
आत्मजं ते वपुर्योनि न पश्यन्त्यात्मसम्भवं । यत्तु ते कृत्रिमं रूपं तदर्चन्ति दिवौकसः ।
देवैर्न दृष्टश्चान्तस्ते तेनानन्त इति स्मृतः । त्वं हि सूक्ष्मो महानेकः सूक्ष्मैरपि दुरासदः । ३७७०
त्वय्येव जगतः स्तम्भे शाश्वती जगती स्थिता । अचला प्राणिनां योनिर्धारयत्यखिलं जगत् ।
चतुःसागरभोगस्त्वं चातुर्वर्ण्यविभागवित् । चतुर्युगेशो लोकानां चातुर्होत्रफलाशनः ।
यथाऽहमपि लोकानां तथा त्वं तच्च मे मतं । उभावेकशरीरौ स्वो जगदर्थे द्विधा कृतौ ।
अहं वा शाश्वतः कृष्णस्त्वं वा शेषः पुरातनः । स्वबलेन भवान् पूर्णस्त्रैलोक्यान्तरदर्शनः ।
लोकानां शाश्वतो देवस्त्वं हि शेषः सनातनः । आवयोर्देहमात्रेण द्विधेदं धार्यते जगत् । ३७७५
अहं यः स भवानेव यस्त्वं सोऽहं सनातनः । द्वाविव विहितौ ह्यावामेकदेहौ महाबलौ ।
तदास्से मूढवत् किं त्वं बलेन जहि दानवं । मूर्ध्नि देवरिपुं देव वज्रकल्पेन मुष्टिना ।
॥ वैशम्पायन उवाच ॥ संस्मारितः स कृष्णेन रौहिणेयः पुरातनं । स बलेन तदा पूर्णस्त्रैलोक्यान्तरचारिणा ।
ततः प्रलम्बं दुर्वृत्तं सुबद्धेन महाभुजः । मुष्टिना वज्रकल्पेन मूर्ध्नि चैनमताडयत् ।
तस्योत्तमाङ्गं स्वे काये विकपालं विवेश ह । जानुभ्यां च ततः शेते गतासुर्दानवोत्तमः । ३७८०
जगत्यां विप्रकीर्णस्य तस्य देहमभूत्तदा । प्रलम्बस्याम्बरस्थस्य मेघस्येव विदीर्यतः ।
तस्य भग्नोत्तमाङ्गस्य देहात् सुस्राव शोणितं । बहु गैरिकसंयुक्तं शैलशृङ्गादिवोदकं ।
तं निहत्य प्रलम्बन्तु संहृत्य बलमात्मनः । पर्यष्वजत वै कृष्णं रौहिणेयः प्रतापवान् ।
तन्तु कृष्णञ्च गोपाश्च दिविष्ठाश्च दिवौकसः । तुष्टुवुर्निहते दैत्ये जयाशीर्भिर्महाबलं ।

बलेनायं हतो दैत्यो बालेनाक्लिष्टकर्म्मणा । बलदेवेति नामास्य देवैरुक्तं दिवि स्थितैः । ३७८५
बलन्तु बलदेवस्य तदा भुवि जना विदुः । कर्म्मणं निहते दैत्ये देवैरपि दुरासदे ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि शिशुचर्य्यायां प्रलम्बवधे एकसप्ततोऽध्यायः ॥ ७१ ॥
॥ वैशम्पायन उवाच ॥ तयोः प्रवृत्तयोरेवं कृष्णस्य च बलस्य च । वने विचरतोर्मासौ व्यतियातौ स्म वार्षिकौ ।
व्रजमाजग्मतुस्तौ तु व्रजे शुश्रुवतुस्तदा । प्राप्तं शक्रमहं वीरौ गोपांश्चोत्सवलालसान् ।
कौतूहलादिदं वाक्यं कृष्णः प्रोवाच तत्र तान् । कोऽयं शक्रमहो नाम येन वो हर्ष आगतः ।
तत्र वृद्धतमस्त्वेको गोपो वाक्यमुवाच ह । श्रूयतां तात शक्रस्य यदर्थं ध्वज इष्यते । ३७९०
देवानामीश्वरः शक्रो मेघानाञ्चारिसूदन । तस्य चायं महः कृष्ण लोकनाथस्य शाश्वतः ।
तेन सञ्चोदिता मेघास्तस्य चायुधभूषिताः । तस्यैवाज्ञाकराः शस्यं जनयन्ति नवाम्बुभिः ।
मेघस्य पयसो दाता पुरुहूतः पुरन्दरः । संप्रहृष्टः स भगवान् प्रीणयत्यखिलं जगत् ।
तेन सम्पादितं शस्यं वयमन्ये च देहिनः । वर्त्तयामोपयुञ्जानास्तर्पयामश्च देवताः ।
देवे वर्षति लोकेऽस्मिंस्ततः शस्यं प्ररोहते । पृथिव्यां तर्पितायान्तु शाश्वतं लभ्यते जगत् । ३७९५
क्षीरवत्य इमा गावो वत्सवत्यश्च निर्वृताः । तेन संवर्द्धितास्तात तृणैः पुष्टाः सपुङ्गवाः ।
नाशस्या नातृणा भूमिर्न बुभुक्षार्द्दितो जनः । दृश्यते यत्र दृश्यन्ते वृष्टिमन्तो बलाहकाः ।
दुदोह सवितुर्गा वै शक्रो दिव्याः पयस्वलाः । ताः क्षरन्ति नवं क्षीरं मेध्यं मेघौघधारितं ।
वाय्वीरितन्तु मेघेषु करोति निनदं महत् । जवेनावर्ज्जितञ्चैव गर्ज्जतीति जना विदुः ।
तस्य चैवोह्यमानस्य वायुयुक्तैर्व्वलाहकैः । वज्राशनिसमाः शब्दाः श्रूयन्तेऽगमभेदिनः । ३८००
तज्जलं वज्रनिष्पेषैर्व्विमुञ्चति नभोगतैः । बहुभिः कामगैर्म्मेघैः शक्रो भृत्यैरिवेश्वरः ।
क्वचिद्दुर्द्दिनसङ्काशैः क्वचिच्छिन्नाभ्रसन्निभैः । क्वचिद्भिन्नाञ्जनाकारैः क्वचिच्छीकरवर्षिभिः ।
सच्छादयतीव देवेन्द्रो विश्वमेवं नभोघनैः । क्वचिच्छीकरमूकत्वं कुर्व्वद्भिर्गगणे घनैः ।
एवमेतत्पयो दुग्धं गोभिः सूर्य्यस्य शाश्वतं । पर्ज्जन्यः सर्व्वभूतानां भवाय भुवि वर्षति ।
यस्मात् प्रावृडियं कृष्ण शक्रस्य भुवि भाविनी । तस्मात् प्रावृषि राजानः सर्व्वे शक्रं मुदा युताः । ३८०५
महैः सुरेशमर्च्चन्ति वयमन्ये च मानवाः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि शिशुचर्य्यायां गोपवाक्ये द्विसप्ततोऽध्यायः ॥ ७२ ॥
॥ वैशम्पायन उवाच ॥ गोपवृद्धस्य वचनं श्रुत्वा शक्रपरिग्रहे । प्रभावज्ञोऽपि शक्रस्य वाक्यं दामोदरोऽब्रवीत् ।
वयं वनचरा गोपाः सदा गोधनजीविनः । गावोऽस्मद्दैवतं विद्धि गिरयश्च वनानि च ।
कर्षकाणां कृषिर्वृत्तिः पण्यं विपणिजीविनां । गावोऽस्माकं परा वृत्तिरेतत्त्रैविद्यमुच्यते ।
विद्यया यो यया युक्तस्तस्य सा दैवतं परं । सैव पूज्याऽर्च्चनीया च सैव तस्योपकारिणी । ३८१०
योऽन्यस्य फलमश्नानः करोत्यन्यस्य सत्क्रियां । द्वावनर्थौ स लभते प्रेत्य चेह च मानवः ।
कृष्यन्ता प्रथिता सीमा सीमान्तं श्रूयते वनं । वनान्ता गिरयः सर्व्वे सा चास्माकं गतिर्ध्रुवा ।

भूयन्ते गिरयश्चापि वनेऽस्मिन् कामरूपिणः । प्रविश्य तास्तास्तनवो रमन्ते स्वेषु सानुषु ।
भूत्वा केशरिणः सिंहा व्याघ्राश्च नखिनाम्बराः । वनानि स्वानि रक्षन्ति त्रासयन्तो वनच्छिदः ।
यदा चैषां विकुर्व्वन्ति ते वनालयजीविनः । घ्नन्ति तानेव दुर्वृत्तान् पौरुषादेन कर्म्मणा । ३८१५
मन्त्रयज्ञपरा विप्राः सीतायज्ञाश्च कर्षकाः । गिरियज्ञा वयं गोपा इज्योऽस्माभिर्गिरिर्व्वने ।
तन्मह्यं रोचते गोपा गिरियज्ञः प्रवर्त्त्यतां । कर्म्म कृत्वा सुखं स्थाने पादपेऽथवा गिरौ ।
तत्र हत्वा पशून् मेध्यान् वितत्यायतने शुभे । सर्व्वघोषस्य सन्दोहः क्रियतां किं विचार्य्यते ।
तं शरत्कुसुमापीडाः परिवार्य्य प्रदक्षिणं । गावो गिरिवरं सर्व्वास्ततो यान्तु पुनर्व्वनं ।
प्राप्ता किलेयं हि गवां स्वादुतोयतृणा गुणैः । शरत्प्रमुदिता रम्या गतमेघजलाशया । ३८२०
प्रियकैः पुष्पितैर्गौरं श्यामं बाणासनैः क्वचित् । कठोरतृणमाभाति निर्म्मयूररुतं वनं ।
विजला विमला व्योम्नि विबलाका विविद्युतः । विचरन्ति जलधरा विदन्ता इव कुञ्जराः ।
पटुना मेघवातेन नवतोयानुकर्षिणा । पर्णोत्करघनाः सर्व्वाः प्रसादं यान्ति निम्नगाः ।
सितवर्षाम्बुदोष्णीषं हंसचामरवीजितं । पूर्णचन्द्रामलच्छत्रं साभिषेकमिवाम्बरं ।
हंसैर्व्विहसितानीव समुत्कृष्टानि सारसैः । सर्व्वाणि तनुतां यान्ति जलानि जलदक्षये । ३८२५
चक्रवाकस्तनतटाः पुलिनश्रोणिमण्डलाः । हंसलक्षणहासिन्यः पतिं यान्ति समुद्रगाः ।
कुमुदोत्फुल्लमुदकं ताराभिश्चित्रमम्बरं । समम्भ्युत्स्मयन्तीव शर्व्वरीष्वितरेतरं ।
मत्तक्रौञ्चावघुष्टेषु कलमापक्वपाण्डुषु । निर्व्वृष्टरमणीयेषु वप्रेषु रमते मनः ।
पुष्करिण्यस्तडागानि वाप्यश्च विकचोत्पलाः । केदाराः सरितश्चैव सरांसि च श्रिया ज्वलन् ।
पङ्कजानि च ताम्राणि तथाऽन्यानि सितान्यपि । उत्पलानि च नीलानि भेजिरे वारिजां श्रियं । ३८३०
मदं जहुः सितापाङ्गा मन्दं ववृधिरेऽनिलाः । अभवद्व्यभ्रमाकाशमभूच्च निभृतोऽर्णवः ।
ऋतुपर्य्यायशिथिलैर्नृत्तनृत्यसमुच्छ्रितैः । मयूराङ्गरुहैर्भूमिर्व्वसनेनेव लक्ष्यते ।
सुपङ्कमलिनैस्तीरैः काशपुष्पलताकुलैः । हंससारसविन्यासैर्यमुना साऽतिशोभना ।
कलमपक्वेषु शस्येषु केदारेषु वनेषु च । शस्यादा जलजादाश्च मत्ता विरुरुवुः खगाः ।
सिषिचुर्य्यानि जलदा जलेन जलदागमे । तानि शस्यानि बालानि कठिनत्वङ्गतानि वै । ३८३५
त्यक्त्वा मेघमयं वासः शरद्गुणविदीपितः । एष वै विमले व्योम्नि हृष्टो वसति चन्द्रमाः ।
क्षीरिण्यो द्विगुणं गावः प्रमत्ता द्विगुणं वृषाः । वनानां द्विगुणा लक्ष्मीः शस्यैर्गुणवती मही ।
ज्योतींषि घनमुक्तानि पद्मवन्ति जलानि च । मनांसि च मनुष्याणां प्रसादमुपयान्ति वै ।
असृजत् सविता व्योम्नि निर्मुक्तो जलदैर्भृशं । शरत्प्रज्वलितं तेजस्तीक्ष्णरश्मिर्व्विशोषयन् ।
नीराजयित्वा सैन्यानि प्रयान्ति विजिगीषवः । अन्योन्यराष्ट्राभिमुखाः पार्थिवाः पृथिवीक्षितः । ३८४०
बन्धुजीवाभिताम्रासु पङ्कपङ्कवतीषु च । मनस्तिष्ठति कान्तासु चित्रासु वनराजिषु ।
वनेषु च विराजन्ते पादपा वनशोभिनः । असनाः सप्तपर्णाश्च कोविदाराश्च पुष्पिताः ।

दृषमाङ्का निकुम्भाश्च प्रियकाः स्वर्णकास्तथा । भ्रमराः पेचिकाश्चैव कोविदार्यश्च समन्ततः ।
अजेषु च विशेषेण गर्गरोद्गारहारिषु । शरत्प्रकाशयोगेन गोष्ठेष्वटति रूपिणी ।
नूनं त्रिदशभूयिष्ठं मेघकालसुखोषितं । पश्चिमेऽन्तं देवं बोधयन्ति दिवौकसः । ३८४५
शरद्येवं प्रपन्नायां प्राप्तायां प्रावृषः क्षये । नीलचन्द्रार्कवर्णैश्च रचितं बहुभिर्द्विजैः ।
फलैः प्रवालैश्च घनमिन्द्रचापघनोपमं । भवनाकारविटपं लतापरमभण्डितं ।
विशालमूलावततं पवनाभोगधारिणं । अर्चयामो गिरिं देवं गाश्चैव सविशेषतः ।
सावतंसैर्विषाणैश्च बर्हापीडैश्च दंशितैः । घण्टाभिश्च प्रलम्बाभिः पुष्पैः शारदिकैस्तथा ।
शिवाय गावः पूज्यन्तां गिरियज्ञः प्रवर्त्यतां । पूज्यतां त्रिदशैः शक्रो गिरिरस्माभिरिज्यतां । ३८५०
गोयज्ञं कारयिष्यामि बलादेव न संशयः । यद्यस्ति मयि वः प्रीतिर्यदि वा सुहृदो वयं ।
गावो हि पूज्याः सततं सर्वेषां नात्र संशयः । स्यात्तु साम्ना भवेत् प्रीतिर्भवतां वै भवाय च ।
एतन्मम वचस्तथ्यं क्रियतामविचारितं ।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि शरद्वर्णने त्रिसप्ततोऽध्यायः ॥ ७३ ॥

॥ वैशम्पायन उवाच ॥ दामोदरवचः श्रुत्वा हृष्टास्ते गोषु जीविनः । तद्वागमृतमश्नानाः प्रत्यूचुरविशङ्कया ।
तवैषा बाल महती गोपानां हर्षवर्द्धिनी । प्रीणयत्येव नः सर्वान् बुद्धिर्वृद्धिकरी गवां । ३८५५
त्वं गतिस्त्वं रतिश्चैव त्वं वेत्ता त्वं परायणं । भयेष्वभयदस्त्वं नस्त्वमेव सुहृदां सुहृत् ।
त्वत्कृते कृष्ण घोषोऽयं क्षेमी मुदितगोकुलः । हृष्टो वसति शान्तारिर्यथा स्वर्गगतस्तथा ।
जन्मप्रभृति दिव्यैस्ते विक्रान्तैर्भुवि दुष्करैः । बेडुग्याचाभिमानाच विस्मितानि मनांसि नः ।
बलेन च पराढ्येन यशसा विक्रमेण च । उत्तमस्त्वञ्च मर्त्येषु देवेष्विव पुरन्दरः ।
प्रतापेन च तीक्ष्णेन दीप्त्या पूर्णतयाऽपि च । उत्तमस्त्वञ्च मर्त्येषु देवेष्विव दिवाकरः । ३८६०
कान्त्या लक्ष्म्या प्रसादेन वदनेन स्मितेन च । उत्तमस्त्वञ्च मर्त्येषु देवेष्विव निशाकरः ।
बलेन वपुषा चैव बाल्येन चरितेन च । स्यात्ते शक्तिधरस्तुल्यो न तु कश्चन मानुषः ।
यत्त्वयाऽभिहितं वाक्यं गिरियज्ञं प्रति प्रभो । कस्तल्लङ्घयितुं शक्तो वेलामिव महोदधेः ।
स्थितः शक्रमहस्तात श्रीमान् गिरिमहस्त्वयं । त्वत्प्रणीतोऽद्य गोपानां गवां हेतोः प्रवर्त्यतां ।
भाजनान्युपकल्प्यन्तां पयसः पेशलानि च । कुम्भाश्च विनिवेश्यन्तामुदपानेषु शोभनाः । ३८६५
पूर्य्यन्तां पयसा नद्यो द्रोण्यश्च विपुलायताः । भक्ष्यं भोज्यञ्च पेयञ्च तत्सर्व्वमुपनीयतां ।
भाजनानि च मांसस्य न्यस्यन्तामोदनस्य च । त्रिरात्रश्चैव सन्दोहः सर्व्वघोषस्य गृह्यतां ।
विशस्यन्तां च पशवो भोज्या ये महिषादयः । प्रवर्त्यतां च यज्ञोऽयं सर्व्वगोपसुसङ्कुलः ।
आनन्दजननो घोषो महान्मुदितगोकुलः । तूर्य्यप्रणादघोषैश्च वृषभाणाञ्च गर्ज्जितैः ।
हम्भारवैश्च वत्सानां गोपानां हर्षवर्द्धनः । दधिह्रदः शरावर्त्तः पयःकुल्यासमाहृतः । ३८७०
मांसराशिप्रकूटाढ्यः प्रकाशौदनपर्व्वतः । संप्रावर्त्तत यज्ञः स गिरेर्गोभिः समाकुलः ।

तुष्टगोपगणाकीर्णो गोपनारीमनोहरः। अथाभिवृत्तपर्य्यन्ते पर्य्याप्ते यज्ञसंविधौ।
यज्ञं गिरेस्तथौ सौम्ये चक्रुर्गोपा द्विजैः सह। यजनान्ते तदन्नन्तु तत्पयो दधि चोत्तमं।
मांसञ्च मायया कृष्णो गिरिर्भूत्वा समश्नुते। तर्पिताश्चापि विप्राग्र्यास्तुष्टाः सम्पूर्णभोजनाः।
उत्तस्थुः प्रीतमनसः स्वस्ति वाच्य यथासुखं। भुक्त्वा चावभृथे कृष्णः पयः पीत्वा च कामतः। ३८७५
संतृप्तोऽस्मीति दिव्येन रूपेण प्रजहास वै। तं गोपाः पर्व्वताकारं दिव्यस्रगनुलेपनं।
गिरिमूर्द्धि स्थितं दृष्ट्वा कृष्णं जग्मुः प्रधानतः। भगवानपि तेनैव रूपेणाच्छादितः प्रभुः।
सह तैः प्रणतो गोपैर्व्ववन्दात्मानमात्मना। तमूचुर्व्विस्मिता गोपा देवं गिरिवरे स्थितं।
भगवंस्त्वद्वशे युक्ता दासाः किं कुर्म्म किङ्कराः। स उवाच ततो गोपान् गिरिप्रभवया गिरा।
अद्यप्रभृति याज्योऽहं गोषु यद्यस्ति वो दया। अहं वः प्रथमो देवः सर्व्वकामकरः शुभः। ३८८०
मम प्रभावाच्च गवामयुतान्युपभोक्ष्यथ। शिवश्च वो भविष्यामि मद्भक्तानां वने वने।
रंस्येऽहं सह युष्माभिर्यथा दिवि गतस्तथा। ये चेमे प्रथिता गोपा नन्दगोपपुरोगमाः।
एषां प्रीतः प्रयच्छामि गोपानां विपुलं धनं। पर्य्याप्नुवन्तु क्षिप्रं मां गावो वत्ससमाकुलाः।
एवं मम परा प्रीतिर्भविष्यति न संशयः। ततो नीराजनार्थं वै वृन्दशो गोकुलानि च।
परिवव्रुर्गिरिवरं सवृषाणि समन्ततः। ता गावः प्रद्रुता हृष्टाः सापीडस्तवकाङ्गदाः। ३८८५
सस्रगापीडशृङ्गाग्र्याः शतशोऽथ सहस्रशः। अनुजग्मुश्च गोपालाः कालयन्तो धनानि च।
भक्तिच्छेदानुलिप्ताङ्गा रक्तपीतासिताम्बराः। मयूरचित्राङ्गदिनो भुजैः प्रहरणावृतैः।
मयूरचित्रपत्रैस्तु केशबन्धैः सुयोजितैः। बभ्राजुरधिकं गोपाः समवाये तदाऽद्भुते।
अन्ये वृषानारुरुहुर्नृत्यन्ति चापरे मुदा। गोपालास्त्वपरे गा वै जगृहुर्व्वेगगामिनः।
अस्मिन् पर्य्यायनिर्व्वृत्ते गवां नीराजनोत्सवे। अन्तर्द्धानं जगामाशु तेन देहेन सोऽचलः। ३८९०
कृष्णोऽपि गोपसहितो विवेश व्रजमेव ह। गिरियज्ञप्रवृत्तेन तेनाश्चर्य्येण विस्मिताः।
गोपाः सबालवृद्धा वै तुष्टुवुर्म्मधुसूदनं।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि गिरियज्ञप्रवर्त्तने चतुःसप्ततोऽध्यायः॥ ७४॥

॥ वैशम्पायन उवाच॥ मखे प्रतिहते शक्रः सक्रोधस्त्रिदशेश्वरः। संवर्त्तकं नाम गणं तोयदानामथाब्रवीत्।
भो बलाहकमातङ्गाः श्रूयतां मम भाषितं। यदि वो मत्प्रियं कार्य्यं राजभक्तिपुरस्कृतं।
एते वृन्दावनगता दामोदरपरायणाः। नन्दगोपादयो गोपा विद्विषन्ति ममोत्सवं। ३८९५
आजीवो यः परस्तेषां गोपत्वञ्च यतः स्मृतं। ता गावः सप्तरात्रेण पीड्यन्तां वृष्टिमारुतैः।
ऐरावतगतश्चाहं स्वयमेवाम्बु दारुणं। स्रक्ष्यामि वृष्टिवातञ्च वज्राशनिसमस्वनं।
भवद्भिश्चण्डवर्षेण चरता मारुतेन च। हतास्ताः सव्रजा गावस्त्यक्ष्यन्ति भुवि जीवितं।
एवमाज्ञापयामास सर्व्वान् स जलदान् प्रभुः। प्रत्याहते वै कृष्णेन शासने पाकशासनः।
ततस्ते जलदाः कृष्णा घोरनादा भयावहाः। आकाशं छादयामासुः सर्व्वतः पर्व्वतोपमाः। ३९००

विद्युत्सम्पातजननाः शक्रचापविभूषिताः । तिमिरावृतमाकाशं चक्रुस्ते जलदास्तदा ।
गजा इवान्ये संसक्ताः केचिन्मकरवर्चसः । नागा इवान्ये गगने चेरुर्जलदपुङ्गवाः ।
तेऽन्योन्यवपुषा बद्धा नागयूथायुतोपमाः । दुर्दिनं विपुलं चक्रुश्छादयन्तो नभस्तलम् ।
नृहस्तनागहस्तानां वेणूनां चैव वर्चसः । धाराभिस्तुल्यरूपाभिर्ववृषुस्ते बलाहकाः ।
समुद्रं मेनिरे तद्धि खमारूढं नृचक्षुषः । दुर्विगाह्यमपर्यन्तमगाधं दुर्दिनं महत् । ३९०५
नैवापतन्वै खगमा दुद्रुवुर्मृगजातयः । पर्वताभेषु मेघेषु खे नदत्सु समन्ततः ।
नष्टसूर्येन्दुनक्षत्रैर्मेघैर्नभसि दारुणैः । अतिवृष्टेन लोकस्य विरूपमभवद्वपुः ।
मेघौघैर्निष्प्रभाकारमदृश्यग्रहतारकम् । चन्द्रसूर्यांशुरहितं खं बभूवातिनिष्प्रभम् ।
वारिणा मेघमुक्तेन मुच्यमानेन चासकृत् । आबभौ सर्वतस्तत्र भूमिस्तोयमयी यथा ।
विनेदुर्बर्हिणस्तत्र स्तोककाल्परुताः खगाः । विवृद्धिं निम्नगा याताः प्लवगाः संप्लवं गताः । ३९१०
गर्जितेन च मेघानां पर्जन्यनिनदेन च । तर्जितानीव कम्पन्ते तृणानि तरुभिः सह ।
प्राप्तोऽन्तकालो लोकानां व्यक्तमेकार्णवा मही । इति गोपगणा वाक्यं व्याहरन्ति भयार्दिताः ।
तेनोत्पाताम्बुवर्षेण गावो विप्रहता भृशम् । हम्भारवैः क्रन्दमाना न चेलुस्तम्भितोपमाः ।
निष्कम्पसक्थिचरणा निष्प्रयत्नखुराननाः । हृष्टरोमार्द्रतनवः क्षामकुक्षिपयोधराः ।
काश्चित् प्राणान् जहुः श्रान्ता निपेतुः काश्चिदातुराः । काश्चित् सवत्साः पतिता गावः शीकरवेजिताः । ३९१५
काश्चिदाक्रम्य क्रोडेन वत्सांस्तिष्ठन्ति मातरः । विमुखाः श्रान्तसक्थ्यश्च निराहाराः कृशोदराः ।
पेतुरार्त्ता वेपमाना गावो वर्षपराजिताः । वत्साश्चोन्मुखका बाला दामोदरमुखाः स्थिताः ।
त्राहीति वदनैर्दीनैः कृष्णमूचुरिवार्दिताः । गवां तत्कदनं दृष्ट्वा दुर्दिनागमजं महत् ।
गोपांश्चासन्ननिधनान् कृष्णः कोपं समादधे । स चिन्तयित्वा संरब्धो दृष्टोपायो मयेति च ।
आत्मानमात्मना वाक्यमिदमूचे प्रियंवदः । अद्याहमिममुत्पाट्य सकाननवनं गिरिम् । ३९२०
कल्पयेयं गवां स्थानं वर्षत्राणाय दुर्धरम् । अयं धृतो मया शैलः पृथ्वीगृहमिवापरम् ।
त्रास्यते सव्रजा गा वै मद्वश्यश्च भविष्यति । एवं संचिन्तयित्वा तु कृष्णः सत्यपराक्रमः ।
बाह्वोर्बलं दर्शयिष्यन् समीपे तं महीधरम् । दोर्भ्यामुत्पाटयामास कृष्णो गिरिरिवापरः ।
स धृतः सङ्गतो मेघैर्गिरिः सव्येन पाणिना । गृहभावङ्गतस्तत्र गृहाकारेण वर्चसा ।
भूमेरुत्पाट्यमानस्य तस्य शैलस्य सानुषु । शिलाः प्रशिथिलाश्चेलुर्निपेतुश्च सपादपाः । ३९२५
शिखरैर्घूर्णमानैश्च शीर्यमाणैश्च सर्वशः । विवृतैश्चोत्सृतैः शृङ्गैरगमः खगमोऽभवत् ।
चलत्प्रस्रवणः पार्श्वे मेघौघैरङ्किताकृतिः । भिद्यमानाश्मनिचयश्चचाल धरणीधरः ।
न मेघानां प्रवृष्टानां न शैलस्याश्मवर्षिणः । न विदुस्ते जनाः रूपं वायोस्तस्य च गर्जतः ।
मेघैश्च शैलसंस्थानैर्जलप्रस्रवणार्पितैः । मिश्रीकृत इवाभाति गिरिरुद्दामबर्हिमान् ।
आप्लुतोऽयं गिरिः पक्षैरिति विद्याधरोरगाः । गन्धर्वाप्सरसश्चैव वाचोऽमुञ्चन्त सर्वशः । ३९३०

स हस्ततलविन्यस्तो मुक्तमूलः शिलोच्चयात्। रीतीर्निर्वर्तयामास काञ्चनाञ्जनराजतीः।
कानिचिच्छिथिलानीव सच्छिन्नार्द्धानि कानिचित्। गिरेर्मेघसहस्राणि तस्य शृङ्गाणि चाभवन्।
गिरिणा कम्पमानेन कम्पितानाञ्च शाखिनां। पुष्पमुच्चावचं भूमौ व्यशीर्य्यत समन्ततः।
निःसृताः पृथुमूर्द्धानः स्वस्तिकार्द्धविभूषिताः। द्विजिह्वपतयः क्रुद्धाः खेचराः खे समन्ततः।
आर्त्तिं जग्मुः खगगणा वर्षेण च भयेन च। उत्पत्योत्पत्य गगनात् पुनः पेतुरवाङ्मुखाः।
रेसुश्चारोषिताः सिंहाः सजला इव तोयदाः। गर्गरा इव मथ्यन्तो नेदुः शार्दूलपुङ्गवाः।
विषमैश्च समीभूतैः समैश्चात्यन्तदुर्गमैः। व्यावृत्तदेहः स गिरिरन्य एवोपलक्ष्यते।
अतिवृष्टस्य तैर्मेघैस्तस्य रूपं बभूव ह। स्तम्भितस्येव रुद्रेण त्रिपुरस्य विहायसि।
बाहुदण्डेन कृष्णस्य विधृतं सुमहत्तदा। नीलाभ्रपटलच्छन्नं तद्गिरिच्छत्रमाबभौ।
स्वप्नायमानो जलदैर्निमीलितगुहामुखः। बाहूपधाने कृष्णस्य प्रसुप्त इव खे गिरिः।
निर्व्विहङ्गैर्वृक्षैर्निर्मयूरकलैर्वनैः। निरालम्ब इवाभाति स गिरिः खचरैर्व्वृतः।
पर्य्यस्तैर्घूर्णमानैश्च प्रचलद्भिश्च सानुभिः। सञ्चराणीव शैलस्य वनानि शिखराणि च।
उत्तमाङ्गगतास्तस्य मेघाः पवनवाहनाः। तर्य्यमाणा महेन्द्रेण तोयं मुमुचुरक्षयं।
स लम्बमानः कृष्णस्य भुजाग्रे सघनो गिरिः। चक्रारूढ इवाभाति देशो नृपतिपीडितः।
स मेघनिचयस्तस्थौ गिरिं तं परिवार्य्य ह। पुरं पुरस्कृत्य यथा स्फीतो जनपदो महान्।
निवेश्य तं करे शैलं तुलयित्वा च सुस्थितं। प्रोवाच गोप्ता गोपानां प्रजापतिरिव स्थितः।
एतद्देवैरसम्भाव्यं दिव्येन विधिना मया। कृतं गिरिगृहं गोपा निवातशरणं गवां।
क्षिप्रं विशन्तु यूथानि गवामिह हि शान्तये। निवातेषु च देशेषु निवसन्तु यथासुखं।
यथाश्रेष्ठं यथायूथं यथासारं यथासुखं। विभज्यतामयं देशः कृतं वर्षनिवारणं।
शैलोत्पाटनभूरेषा महती निर्म्मिता मया। त्रैलोक्यमप्युत्सहते रक्षितुं किं पुनर्व्रजं।
ततः किलकिलाशब्दो गवां हम्भारवैः सह। गोपानां तुमुलो जज्ञे मेघनादश्च वाह्यतः।
प्रविशन्ति ततो गावो गोपैर्यूथप्रकल्पिताः। तस्य शैलस्य विपुलं विमलं गह्वरोदरं।
कृष्णोऽपि मूले शैलस्य शैलस्तम्भ इवोच्छ्रितः। दधारैकेन हस्तेन शैलं प्रियमिवातिथिं।
ततो व्रजस्य भाण्डानि युक्तानि शकटानि च। विविशुर्वर्षभीतानि तद्गृहं गिरिनिर्म्मितं।
अतिदैवन्तु कृष्णस्य दृष्ट्वा तत् कर्म्म वज्रभृत्। मिथ्याप्रतिज्ञो जलदान् वारयामास वै विभुः।
सप्तरात्रे तु निर्वृत्ते धरण्यां विगतोत्सवे। जगाम संवृतो मेघैर्वृत्रहा स्वर्गमेव च।
निवृत्ते सप्तरात्रे तु निष्फले शतक्रतौ। गताभ्रे विमले व्योम्नि दिवसे दीप्तभास्करे।
गावस्तेनैव मार्गेण परिजग्मुर्गतश्रमाः। स्वञ्च स्थानं गतो घोषः प्रत्ययात् पुनरेव सः।
कृष्णोऽपि तं गिरिश्रेष्ठं स्वे स्थाने स्थावरात्मवान्। प्रीतो निवेशयामास शिवाय वरदो विभुः।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि गोवर्द्धनधारणे पञ्चसप्ततितमोऽध्यायः॥ ७५॥

॥ वैशम्पायन उवाच ॥ धृतं गोवर्द्धनं दृष्ट्वा परित्रातञ्च गोकुलं । कृष्णस्य दर्शनं शक्रो रोचयामास विस्मितः । ३९९०
स निर्ज्जलाम्बुदाकारं मत्तं मदनलोचितं । आरुह्यैरावतं नागमाजगाम महीतलं ।
स ददर्शोपविष्टं वै गोवर्द्धनशिलातले । कृष्णमक्लिष्टकर्म्माणं पुरुहूतः पुरन्दरः ।
तं वीक्ष्य बालं महता तेजसा दीप्तमव्ययं । गोपवेशधरं विष्णुं प्रीतिं लेभे पुरन्दरः ।
तं शाम्बुजलदश्यामं कृष्णं श्रीवत्सलक्षणं । पर्य्याप्तनयनः शक्रः सर्व्वैर्नेत्रैरुदैक्षत ।
दृष्ट्वा चैनं श्रिया जुष्टं मर्त्यलोकेऽमरोपमं । सूपविष्टं शिलापृष्ठे शक्रः स व्रीडितोऽभवत् । ३९९५
तस्योपविष्टस्य सुखं पक्षाभ्यां पक्षिपुङ्गवः । अन्तर्द्धानगतश्छायां चकारोरगभोजनः ।
तं विविक्ते वनगतं लोकवृत्तान्ततत्परं । उपतस्थे गजं हित्वा कृष्णं बलनिसूदनः ।
स समीपगतस्तस्य दिव्यस्रगनुलेपनः । रराज देवराजो वै वज्रपूर्णकरः प्रभुः ।
किरीटेनार्कतुल्येन विद्युदुद्योतकारिणा । कुण्डलाभ्यां सवज्राभ्यां सततं शोभिताननः ।
सहस्रपत्रकान्तेन देहभूषणकारिणा । पञ्चस्तवकलम्बेन हारेणोरसि भूषितः । ४०००
ईक्षमाणः सहस्रेण नेत्राणां कामरूपिणां । त्रिदशाश्रापनोत्थेन मेघनिर्घोषघोषिणा ।
अथ दिव्येन मधुरं व्याजहार स्वरेण तं । कृष्ण कृष्ण महाबाहो ज्ञातीनां नन्दिवर्द्धन ।
अतिदैवं कृतं कर्म्म त्वया प्रीतिमता गवां । मयोत्सृष्टेषु मेघेषु युगान्तावर्त्तकारिषु ।
यत्त्वया रक्षिता गावस्तेनास्मि परितोषितः । स्वायम्भुवेन योगेन यश्चायं पर्व्वतोत्तमः ।
धृतो वेश्मवदाकाशे को ह्यनेन न विस्मयेत् । प्रतिषिद्धे मम मखे मयेयं रुषितेन वै । ४००५
अतिवृष्टिः कृता कृष्ण गवां वै साप्तरात्रिकी । सा त्वया प्रतिषिद्धेयं मेघवृष्टिर्दुरासदा ।
देवैः सदानवगणैर्दुर्निर्व्वार्य्या मयि स्थिते । अहो मे सुप्रियं कृष्ण यत्त्वं मानुषदेहवान् ।
समग्रं वैष्णवं तेजो विनिगूहसि रोषितः । साधितं देवतानां हि मन्येऽहं कार्य्यमव्ययं ।
त्वयि मानुष्यमापन्ने युक्ते चैवं स्वतेजसा । सेत्स्यते वीर कार्य्यार्थो न किञ्चित् परिहास्यते ।
देवानां यज्ञवान्नेता सर्व्वकार्य्यपुरोगमः । एकस्त्वमसि देवानां लोकानाञ्च सनातनः । ४०१०
द्वितीयं नानुपश्यामि धुरं यस्ते समुद्वहेत् । यथा हि पुङ्गवः श्रेष्ठो मग्ने धुरि नियुज्यते ।
एवं त्वमसि देवानां मग्नानां द्विजवाहनः । तच्छरीरगतं कृष्ण जगत्प्रकरणं त्विदं ।
ब्रह्मणा साधु निर्द्दिष्टं धातुभ्य इव काञ्चनं । स्वयं स्वयम्भूर्भगवान् बुद्ध्याऽथ वयसाऽपि वा ।
न त्वानुगन्तुं शक्नोति पङ्गुर्द्रुतगतिं यथा । स्थाणुभ्यो हिमवान् श्रेष्ठो हृदानां वरुणालयः ।
गरुत्मान् पक्षिणां श्रेष्ठो देवानाञ्च भवान् वरः । अपामधस्ताल्लोको वै तस्योपरि महीधराः । ४०१५
नागानामुपरिष्टाद्भूः पृथिव्युपरि मानुषाः । मनुष्यलोकादूर्द्ध्वन्तु खगानां गतिरुच्यते ।
आकाशस्योपरि रविर्द्वारं स्वर्गस्य भानुमान् । देवलोकः परस्तस्माद्विमानगमनो महान् ।
यत्राहं कृष्ण देवानामैन्द्रे विनिहितः पदे । स्वर्गादूर्द्ध्वं ब्रह्मलोको महर्षिगणपूजितः ।
तत्र सोमगतिश्चैव ज्योतिषाञ्च महात्मनां । तस्योपरि गवां लोकः साध्यास्तं पालयन्ति ह ।

स हि सर्व्वगतः कृष्ण महाकाशगतो महान्। उपर्य्युपरि तत्रापि गतिस्तव तपोमयी। ३९९०
यां न विद्मो वयं सर्व्वे पृच्छन्तोऽपि पितामहं। लोकास्त्वधो दुष्कृतिनां नागलोकस्तु दारुणः।
पृथिवीकर्म्मशीलानां क्षेत्रं सर्व्वस्य कर्म्मणः। खमस्थिराणां विषयो वायुना तुल्यवृत्तिनां।
गतिः शमदमाढ्यानां स्वर्गः सुकृतकर्म्मणां। ब्राह्मे तपसि युक्तानां ब्रह्मलोकः परा गतिः।
गवामेव तु गोलोको दुरारोहा हि सा गतिः। स तु लोकस्त्वया कृष्ण सीदमानः कृतात्मना।
धृतो धृतिमता वीर निघ्नतोपद्रवं गवां। तदहं समनुप्राप्तो गवां वाक्येन चोदितः। ३९९५
ब्रह्मणश्च महाभाग गौरवात्तव चानघ। अहं भूतपतिः कृष्ण देवराजः पुरन्दरः।
अदितेर्गर्भपर्य्याये पूर्व्वजस्ते पुरातनः। तेजस्तेजस्विनश्चैव यत्ते दर्शितवानहं।
मेघरूपेण तत्सर्व्वं क्षन्तुमर्हसि मे विभो। एवं क्षान्तमनाः कृष्ण स्वेन सौम्येन तेजसा।
ब्रह्मणः शृणु मे वाक्यं गवाञ्च गजविक्रम। आह त्वां भगवान् ब्रह्मा गावश्चाकाशगा दिवि।
कर्म्मभिस्तोषिता दिव्यैस्तव संरक्षणादिभिः। भवता रक्षिता लोका गोलोकस्य महानघं। ४०००
यदयं पुङ्गवैः सार्द्धं वर्द्धामः प्रसवैस्तथा। कर्षकान् पुङ्गवैर्य्योक्ष्ये मेध्येन हविषा सुरान्।
श्रियं शकृत्प्रवृत्तेन तर्पयिष्यामि कामदाः। तदस्माकं गुरुस्त्वं हि प्राणदश्च महाबल।
अद्यप्रभृति नो राजा त्वमिन्द्रो वै भव प्रभो। तस्मात्त्वं काञ्चनैः पूर्णैर्दिव्यस्य पयसो घटैः।
एभिरद्याभिषिच्यस्व मया हस्तावनामितैः। अहं किलेन्द्रो देवानां त्वङ्गवामिन्द्रतां गतः।
गोविन्द इति लोकास्त्वां स्तोष्यन्ति भुवि शाश्वतं। ममोपरि यथेन्द्रस्त्वं स्थापितो गोभिरीश्वरः। ४००५
उपेन्द्र इति कृष्ण त्वां गास्यन्ति दिवि देवताः। ये चेमे वार्षिका मासाश्चत्वारो विहिता मम।
एषामर्द्धं प्रयच्छामि शरत्कालन्तु पश्चिमं। अद्यप्रभृति मासौ द्वौ ज्ञास्यन्ति मम मानवाः।
वर्षार्द्धे च ध्वजो मह्यं ततः पूजामवाप्स्यसि। ममाम्बुप्रभवं दर्पं तदा त्यक्ष्यन्ति बर्हिणः।
अल्पनादमदाश्चैव ये चान्ये मेघनादिनः। शान्तिं सर्व्वे गमिष्यन्ति मम कालविचारिणः।
त्रिशङ्कुचरितामाशामगस्त्यो विचरिष्यति। सहस्ररश्मिरादित्यस्तापयन् स्वेन तेजसा। ४०१०
ततः शरदि युक्तायां मौनकालेषु बर्हिषु। धावमाने खगे तोयं विप्लुतेषु प्लुतेषु च।
हंससारसपूर्णेषु नदीनां पुलिनेषु च। मत्तक्रौञ्चप्रणादेषु मत्तेषु वृषभेषु च।
गोषु चैव प्रहृष्टासु क्षरन्तीषु पयो बहु। निवृत्तेषु च मेघेषु निर्यात्य जगतो जलं।
आकाशे शस्त्रसङ्काशे हंसेषु विचरत्सु च। जातपद्मेषु तोयेषु वापीषु च सरःसु च।
तडागेषु च कान्तेषु तोयेषु विमलेषु च। कलमावनतायासु पक्वकेदारपङ्क्तिषु। ४०१५
मध्यस्थं सलिलारम्भं कुर्व्वन्तीषु नदीषु च। सुसस्यायाञ्च सीमायां मनोज्ञायां मुनेरपि।
पृथिव्यां पृथुराष्ट्रायां रम्यायां वर्षसंक्षये। श्रीमत्सु पङ्क्तिमार्गेषु फलवत्सु तृणेषु च।
इक्षुमत्सु च देशेषु प्रवृत्तेषु मखेषु च। ततः प्रवर्त्स्यते पूजा शरत् सुप्तोत्थिते मयि।
लोकेऽस्मिन् कृष्ण निखिले यथैव त्रिदिवे तथा। नराश्चैव माञ्चैव ध्वजाकारासु यष्टिषु।

महेन्द्रश्चाप्युपेन्द्रश्च पूजयन्तु महीतले । ये चावयोः स्थिरे वृत्ते महेन्द्रोपेन्द्र संज्ञिते ।
मानवाः प्रणमिष्यन्ति तेषां नास्त्यनयागमः । ततः शक्रस्तु तान् गृह्य घटान् दिव्यपयोधरान् ।
अभिषेकेण गोविन्दं योजयामास योगवित् । दृष्ट्वाऽभिषिच्यमानं तं गावस्ताः सह यूथपैः ।
स्तनैः प्रस्रवसंयुक्तैः सिषिचुः कृष्णमव्ययं । मेघाश्च दिवि मुक्ताभिः साम्रताभिः समन्ततः ।
सिषिचुस्तोयधाराभिः सिच्यमानं तमव्ययं । वनस्पतीनां सर्व्वेषां सुस्राविन्दुनिभं पयः ।
ववर्ष पुष्पवर्षञ्च नेदुस्तूर्य्याणि चाम्बरे । स्तुवन्ति मुनयः सर्व्वे वाग्भिर्मन्त्रपरायणाः ।
एकार्णवविनिर्मुक्ता दधार वसुधा वपुः । प्रसादं सागरा जग्मुर्व्ववुर्व्वाता जगद्धिताः ।
मार्गस्थो विबभौ भानुः सोमो नक्षत्रसंयुतः । ईतयः प्रशमं जग्मुर्जग्मुर्निर्व्वैरतां नृपाः ।
प्रवालपत्रशबला: पुष्पवन्तश्च पादपाः । मदं प्रसुस्रुवुर्नागा याताश्चोषं वने मृगाः ।
अलङ्कृता गात्ररत्नैर्धातुभिर्भान्ति पर्व्वताः । देवलोकोपमो लोकस्तृप्तोऽमृतरसैरिव ।
आसीत् कृष्णाभिषेके हि दिव्यः स्वर्गरसोक्षितः । अभिषिक्तन्तु तं गोभिः शक्रो गोविन्दमव्ययं ।
दिव्यमाल्याम्बरधरं देवदेवोऽब्रवीदिदं । एष ते प्रथमः कृष्ण नियोगो गोषु यः कृतः ।
श्रूयतामपरश्चापि ममागमनकारणं । क्षिप्रं संसाध्यतां कंसः केशी च तुरगाधमः ।
अरिष्टश्च महाऽरिष्टो राजराज्यं ततः कुरु । पितृष्वसरि जातस्ते ममांशोऽहमिव स्थितः ।
स ते रक्ष्यश्च मान्यश्च सख्ये च विनियुज्यतां । त्वया ह्यनुगृहीतः स तव वृत्तानुवर्त्तकः ।
त्वद्वशे वर्त्तमानश्च प्राप्स्यते विपुलं यशः । भारतस्य च वंशस्य स वरिष्ठो धनुर्द्धरः ।
भविष्यत्यनुरूपश्च त्वत्कृते न च रंस्यते । भारतं त्वयि चायत्तं तस्मिंश्च पुरुषोत्तमे ।
उभाभ्यामपि संयोगे यास्यन्ति निधनं नृपाः । प्रतिज्ञातश्च मे कृष्ण ऋषिमध्ये सुरेषु च ।
मम पुत्रोऽर्ज्जुनो नाम सृष्टः कुन्त्यां कुलोद्वहः । सोऽस्त्राणां पारतत्त्वज्ञः श्रेष्ठश्चापभृतां क्षितौ ।
तं प्रवेक्ष्यन्ति वै सर्व्वे राजानः शस्त्रयोधिनः । अक्षौहिणीस्तु शूराणां राज्ञां संग्रामयोधिनां ।
सैकः क्षत्रियधर्म्मेण योजयिष्यति मृत्युना । तस्यास्त्रचरितं मार्गं धनुषो लाघवस्य च ।
नानुयास्यन्ति राजानो देवा वा त्वां विना प्रभो । स ते बन्धुः सहायश्च संग्रामेषु भविष्यति ।
तस्य योगो विधातव्यस्त्वया गोविन्द मत्कृते । द्रष्टव्यः स यथाऽहं वै त्वया मान्यश्च नित्यशः ।
त्राता त्वमेव लोकानामर्ज्जुनस्य च नित्यशः । त्वया च नित्यं संरक्ष्य आहवेषु महत्सु सः ।
रक्षितस्य त्वया तस्य न मृत्युः प्रभविष्यति । अर्ज्जुनं विद्धि मां कृष्ण मामेवात्मानमात्मना ।
आत्मा तेऽहं यथा शश्वत्तथैव तव सोऽर्ज्जुनः । त्वया लोकानिमान् जित्वा बलेर्हस्तात्त्रिभिः क्रमैः ।
देवतानां कृतो राजा पुरा ज्येष्ठक्रमादहं । त्वाञ्च सत्यमयं ज्ञात्वा सत्येष्टं सत्यविक्रमं ।
सर्व्वेनात्मत्य देवा वै योजयन्ति रिपुक्षये । सोऽर्ज्जुनो नाम मे पुत्रः पितुस्ते भगिनीसुतः ।
इह सौहार्दमायातु भूत्वा सहचरस्तव । तस्य ते युध्यतः कृष्ण स्वे स्थाने ऽथ गृहेऽपि वा ।
वोढव्या पुङ्गवेनेव धूः सदा रणमूर्द्धनि । कंसे विनिहते कृष्ण त्वया भाव्यर्थदर्शिना ।

अभितस्तां महद्युद्धं भविष्यति महोच्छितं । तत्र तेषां सुवीराणामतिमानुषकर्म्मणां । ४०५०
विजयस्यार्ज्जुनो भोक्ता यशसा तस्य योत्स्यते । एतत्ते कृष्ण कात्स्न्येन कर्त्तुमर्हसि भाषितं ।
यथाहं ते सुराश्चैव वक्ष्यन्ति प्रियमच्युत । शक्रस्य वचनं श्रुत्वा कृष्णो गोविन्दतां गतः ।
प्रीतेन मनसा युक्तं प्रतिवाक्यं जगाद ह । प्रीतोऽस्मि दर्शनादेव तव शक्र शचीपते ।
यत्त्वयाऽभिहितञ्चेदं न किञ्चित् परिहास्यते । जानामि भवतो भावं जानाम्यर्ज्जुनसम्भवं ।
जाने पितृष्वसारञ्च पाण्डोर्भार्य्यां महात्मनः । युधिष्ठिरञ्च जानामि कुमारं धर्म्मनिर्म्मितं । ४०५५
भीमसेनञ्च जानामि वायोः सन्तानजं सुतं । अश्विभ्याञ्चैव जानामि सृष्टं पुत्रद्वयं शुभं ।
नकुलं सहदेवञ्च माद्रीकुक्षिगतावुभौ । कानीनञ्चापि जानामि सवितुः प्रथमं सुतं ।
पितृष्वसरि कर्णं वै प्रसूतं सूततां गतं । धार्त्तराष्ट्राश्च मे सर्व्वे विदिता युद्धकाङ्क्षिणः ।
पाण्डोरुपरमञ्चैव शापाशनिनिपातजं । तद्गच्छ त्रिदिवं शक्र सुखाय त्रिदिवौकसां ।
नार्ज्जुनस्य रिपुः कश्चिन्ममाग्रे प्रभविष्यति । अर्ज्जुनार्थञ्च तान् सर्व्वान् पाण्डवानक्षतान् युधि । ४०६०
कुन्त्या निर्य्यातयिष्यामि निवृत्ते भारते मृधे । यत्र वक्ष्यति मां शक्र तनूजस्तव सोऽर्ज्जुनः ।
भृत्यवत्तत्करिष्यामि तव स्नेहेन यन्त्रितः । सत्यसन्धस्य तच्छ्रुत्वा प्रियं प्रीतस्य भाषितं ।
कृष्णस्य साधात्त्रिदिवं जगाम त्रिदशेश्वरः ।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि गोविन्दाभिषेके षट्सप्ततोऽध्यायः ॥ ७६ ॥

॥ वैशम्पायन उवाच ॥ गते शक्रे ततः कृष्णः पूज्यमानो व्रजालयैः । गोवर्द्धनधरः श्रीमान् जगाम व्रजमेव ह ।
तन्तु वृद्धाः स्म नन्दन्ति ज्ञातयश्च सहोषिताः । धन्याः स्मोऽनुगृहीताः स्म त्वद्वृत्तेन नयेन च । ४०६५
गावो वर्षभयात्तीर्णा वयं तीर्णा महाभयात् । तव प्रसादाद्गोविन्द देवतुल्यपराक्रम ।
अमानुषाणि कर्म्माणि पश्यामस्तव गोपते । धारणेनास्य शैलस्य विद्मस्त्वां कृष्ण दैवतं ।
कस्त्वं भवसि रुद्राणां मरुतां वा महाबल । वसूनां वा किमर्थञ्च वसुदेवः पिता तव ।
बलञ्च बाल्ये क्रीडा च जन्म चास्मासु गर्हितं । कृष्ण दिव्या च ते चेष्टा शङ्कितानि मनांसि नः ।
किमर्थं गोपवेशेन रमसेऽस्मासु गर्हितं । लोकपालोपमश्चैव गास्त्वं किं परिरक्षसि । ४०७०
देवो वा दानवो वा त्वं यक्षो गन्धर्व्व एव वा । अस्माकं बान्धवो जातो योऽसि सोऽसि नमोऽस्तु ते ।
केनचिद्यदि कार्य्येण वससीह यदृच्छया । वयं तवानुगाः सर्व्वे भवन्तं शरणङ्गताः ।
॥ वैशम्पायन उवाच ॥ गोपानां वचनं श्रुत्वा कृष्णः पद्मनिभेक्षणः । प्रत्युवाच स्मितं कृत्वा ज्ञातींस्तान् समुपागतान् ।
मन्यन्ते मां यथा सर्व्वे भवन्तो भीमविक्रमाः । तथाऽहं नावगन्तव्यः सजातीयोऽस्मि बान्धवः ।
यदि त्ववश्यं श्रोतव्यं कालः स प्रतिपाल्यतां । ततो भवन्तः श्रोष्यन्ति मांश्च द्रक्ष्यन्ति तत्त्वतः । ४०७५
यद्यहं भवतां श्लाघ्यो बान्धवो देवसप्रभः । परिज्ञानेन किं कार्य्यं यद्येषोऽनुग्रहो मम ।
एवमुक्तास्ततो गोपा वसुदेवसुतेन वै । बद्धमौना दिशः सर्व्वा भेजिरे पिहिताननाः ।

कृष्णस्तु यौवनं दृष्ट्वा निशि चन्द्रमसो नवं । शारदीञ्च निशां रम्यां मनश्चक्रे रतिं प्रति ।
स करीषाङ्गरागासु व्रजरथ्यासु वीर्य्यवान् । वृषाणां जातदर्पाणां युद्धानि समयोजयत् ।
गोपालांश्च बलोदग्रान् योधयामास वीर्य्यवान् । वने स वीरो गाश्चैव जग्राह ग्राहवद्विभुः । ४०८०
युवतीर्गोपकन्याश्च रात्रौ सङ्काल्य कालवित् । कैशोरकं मानयन् वै सह ताभिर्मुमोद च ।
तास्तस्य वदनं कान्तं कान्ता गोपस्त्रियो निशि । पिबन्ति नयनाक्षेपैर्गां गतं शशिनं यथा ।
हरितालार्द्रपीतेन स कौशेयेन वाससा । वसानो भद्रवसनं कृष्णः कान्ततरोऽभवत् ।
स बद्धाङ्गदनिर्य्यूहश्चित्रया वनमालया । शोभमानो हि गोविन्दः शोभयामास तं व्रजं ।
नाम दामोदरेत्येवं गोपकन्यास्तदाऽब्रुवन् । विचित्रं चरितं घोषे दृष्ट्वा तत्तस्य भास्वतः । ४०८५
तास्तं पयोधरोत्तानैरुरोभिः समपीडयन् । भ्रामिताक्षैश्च वदनैर्निरीक्षन्ते वराङ्गनाः ।
ता वार्य्यमाणाः पितृभिर्भ्रातृभिर्मातृभिस्तथा । कृष्णं गोपाङ्गना रात्रौ मृगयन्ते रतिप्रियाः ।
तास्तु पङ्क्तीकृताः सर्व्वा रमयन्ति मनोरमं । गायन्त्यः कृष्णचरितं द्वन्द्वशो गोपकन्यकाः ।
कृष्णलीलानुकारिण्यः कृष्णप्रणिहितेक्षणाः । कृष्णस्य गतिगामिन्यस्तरुण्यस्ता वराङ्गनाः ।
वनेषु तालहस्ताग्रैः कुट्टयन्त्यस्तथाऽपराः । चेरुर्व्वै चरितं तस्य कृष्णस्य व्रजयोषितः । ४०९०
तास्तस्य नृत्यं गीतञ्च विलाससस्मितवीक्षितं । मुदितास्त्वनुकुर्व्वन्त्यः क्रीडन्त्यो व्रजयोषितः ।
भावनिस्यन्दमधुरं गायन्त्यस्ता वराङ्गनाः । व्रजं गताः सुखं चेरुर्दामोदरपरायणाः ।
करीषपांशुदिग्धाङ्गास्ताः कृष्णमनुवव्रिरे । रमयन्त्यो यथा नागं सम्प्रमत्तं करेणवः ।
तमन्या भावविकचैर्नेत्रैः प्रहसिताननाः । पिबन्त्यतृप्ता वनिताः कृष्णं कृष्णमृगेक्षणाः ।
मुखमस्याब्जसङ्काशं तृषिता गोपकन्यकाः । रत्यन्तरगता रात्रौ पिबन्ति रतिलालसाः । ४०९५
हा हेति कुर्व्वतस्तस्य प्रहृष्टास्ता वराङ्गनाः । जगृहुर्निःसृतां वाणीं साम्ना दामोदरेरितां ।
तासां ग्रथितसीमन्ता रतिश्रान्त्याकुलीकृताः । चारु विस्रंसिरे केशाः कुचाग्रे गोपयोषितां ।
एवं स कृष्णो गोपीनां चक्रवालैरलङ्कृतः । शारदीषु सचन्द्रासु निशासु मुमुदे सुखी ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि हल्लीशक्रीडने सप्तसप्ततोऽध्यायः ॥ ७७ ॥
॥ वैशम्पायन उवाच ॥ प्रदोषार्द्धे कदाचित्तु कृष्णे रतिपरायणे । त्रासयन् समदो गोष्ठानरिष्टः प्रत्यदृश्यत ।
निर्व्वाणाङ्गारमेघाभस्तीक्ष्णशृङ्गोऽर्कलोचनः । क्षुरतीक्ष्णाग्रचरणः कालः काल इवापरः । ४१००
लेलिहानः सनिष्पेषं जिह्वयौष्ठ पुनः पुनः । गर्व्विताविद्धलाङ्गूलः कठिनस्कन्धबन्धनः ।
ककुदोदग्रनिर्म्माणं प्रमाणाद्दुरतिक्रमः । शकृन्मूत्रोपलिप्ताङ्गो गवामुद्वेजनो भृशं ।
महाकटिः स्थूलमुखो गूढजानुर्महोदरः । विषाणावलितगतिर्लम्बता कण्ठचर्म्मणा ।
गवाकर्षेषु चपलस्तरुघाताङ्किताननः । युद्धसज्जविषाणाग्रो द्विषद्वृषभसूदनः ।
अरिष्टो नाम हि गवामरिष्टो दारुणाकृतिः । दैत्यो वृषभरूपेण गोष्ठान् विपरिधावति । ४१०५
पातयन् स गवां गर्भान् दृप्तो गच्छत्यनार्त्तवं । भजमानश्च चपलो गृष्टीः स प्रचचार ह ।

शृङ्गप्रहरणो रौद्रः प्रचरन् गोषु दुर्द्दमः। गोष्ठेषु न रतिं लेभे विना युद्धेन गोवृषः।
स तत्र गास्तु सततं बाधमानो मदोत्कटः। चकार निर्वृषं गोष्ठं निर्व्वत्सशिशुपुङ्गवं।
एतस्मिन्नेव काले तु गा वै कृष्णसमीपगाः। चासयामास दुष्टात्मा वैवस्वतपथे स्थितः।
मेघाभ्रगिरिवाम्भोदो नर्द्दमानो महावृषः। तमायान्तं महाकायं नर्द्दमानं महावृषं। ४२१०
तालशब्देन तं कृष्णः सिंहनादैश्च मोहयन्। अभ्यधावत गोविन्दो दैत्यं वृषभरूपिणं।
स कृष्णं गोवृषो दृष्ट्वा हृष्टलाङ्गूललोचनः। रोषितस्तालशब्देन युद्धाकाङ्क्षी ननर्द्द ह।
तमापतन्तं दुर्द्धर्षं दृष्ट्वा वृषभरूपिणं। तस्मात् स्थानाच्च व्यचलत् कृष्णो गिरिरिवाचलः।
स कुक्षौ वृषभो दृष्टिं प्रणिधाय धृताननः। कृष्णस्य निधनाकाङ्क्षी तूर्णमभ्युत्पपात ह।
तमापतन्तं वेगेन प्रतिजग्राह दुर्द्धरं। कृष्णः कृष्णाञ्जननिभं वृषं प्रतिवृषोपमः। ४२१५
स संसक्तस्तु कृष्णेन वृषेणेव महावृषः। मुमोच वक्त्रजं फेनं नस्ततोऽथ सशब्दवत्।
तावन्योन्यावरुद्धाङ्गौ युद्धे कृष्णवृषावुभौ। रेजतुर्मेघसमये संसक्ताविव तोयदौ।
तस्य दर्पबलं हत्वा कृत्वा शृङ्गान्तरे पदं। सोऽपीडयदरिष्टस्य कण्ठं क्लिन्नमिवाम्बरं।
शृङ्गञ्चास्य पुनः सव्यमुत्पाट्य यमदण्डवत्। तेनैव प्राहरद्वक्त्रे स ममार वृषो हतः।
स भिन्नशृङ्गो भग्नास्यो भग्नस्कन्धश्च दानवः। पपात रुधिरोद्गारी साम्बुधार इवाम्बुदः। ४२२०
गोविन्देन हतं दृष्ट्वा दृप्तं वृषभदानवं। साधु साध्विति भूतानि तत्कर्म्मास्याभितुष्टुवुः।
स चोपेन्द्रो वृषं हत्वा कान्तचन्द्रे निशामुखे। अरविन्दाभनयनः पुनरेव रराम ह।
ते तु गोपास्ततः सर्व्वे कृष्णं कमललोचनं। उपासाञ्चक्रिरे हृष्टाः स्वर्गे शक्रमिवामराः।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि अरिष्टवधे अष्टसप्ततोऽध्यायः ॥ ७८ ॥
॥ वैशम्पायन उवाच ॥ कृष्णं व्रजगतं श्रुत्वा वर्द्धमानमिवानलं। उद्वेगमगमत् कंसः शङ्कमानस्ततो भयं।
पूतनायां हतायाञ्च कालिये च पराजिते। धेनुके प्रलयं नीते प्रलम्बे च निपातिते। ४२२५
धृते गोवर्द्धने शैले विफले शक्रशासने। गोषु चातासु च तथा स्पृहणीयेन कर्म्मणा।
ककुद्मिनि हते ऽरिष्टे गोपेषु मुदितेषु। दृश्यमाने विनाशे च सन्निकृष्टे महाभये।
वृक्षयोः कर्षणेनापि शकटस्य तथैव च। अचिन्त्यं कर्म्म तच्छ्रुत्वा वर्द्धमानेषु शत्रुषु।
प्राप्तारिष्टमिवात्मानं मेने स मथुरेश्वरः। विषण्णेन्द्रियभूतात्मा गतासुप्रतिमो बभौ।
ततो ज्ञातीन् समानाय्य पितरञ्चोग्रशासनः। निशि स्तिमितमूकायां मथुरायां जनाधिपः। ४२३०
वसुदेवञ्च देवाभं कङ्कञ्चाहूय यादवं। सत्यकं दारुकञ्चैव कङ्कावरजमेव च।
भोजं वैतरणञ्चैव विकद्रुञ्च महाबलं। भयेसखञ्च राजानं विपृथुञ्च पृथुश्रियं।
बभ्रुं दानपतिञ्चैव कृतवर्म्माणमेव च। भूरितेजसमक्षोभ्यं भूरिश्रवसमेव च।
एतान् स यादवान् सर्व्वानाभाष्य शृणुतेति च। उग्रसेनसुतो राजा प्रोवाच मथुरेश्वरः।
भवन्तः सर्व्वकार्य्यज्ञाः सर्व्वे वेदेषु निष्ठिताः। न्यायवृत्तान्तकुशलास्त्रिवर्गस्य प्रवर्त्तकाः। ४२३५

कर्त्तव्यानाञ्च कर्त्तारो लोकस्य विबुधोपमाः । पर्व्वता इव निष्कम्पा दृते भवति तत्सुपः ।
षड्गुणस्य नयः सर्व्वे सर्व्वे गुरुकुलोषिताः । राजमन्त्रधराः सर्व्वे सर्व्वे धनुषि पारगाः ।
यशःप्रदीपा लोकानां वेदार्थानाञ्च विवक्षवः । आश्रमाणां निसर्गज्ञा वर्णानां क्रमपारगाः ।
प्रवक्तारः सुनियमा नेतारो नयदर्शिनां । भेत्तारः परराष्ट्राणां त्रातारः शरणार्थिनां ।
एवमक्षतचारित्रैः श्रीमद्भिरुदितोदितैः । द्यौरप्यनुगृहीता स्याद्भवद्भिः किं पुनर्मही । ४१४०
ऋषीणामिव वो वृत्तं प्रभावो मरुतामिव । रुद्राणामिव वः क्रोधो दीप्तिरङ्गिरसामिव ।
व्यावर्त्तमानन्तु महद्भवद्भिः पृथुकीर्त्तिभिः । धृतं यदुकुलं वीरैर्भूतलं पर्व्वतैरिव ।
एवं भवत्सु युक्तेषु मम चित्तानुवर्त्तिषु । वर्द्धमानो ममानर्थो भवद्भिः किमुपेक्षितः ।
एष कृष्ण इति ख्यातो नन्दगोपसुतो व्रजे । वर्द्धमान इवाम्भोदो मूलं नः परिकृन्तति ।
अनमात्यस्य शून्यस्य चारान्धस्य ममैव तु । कारणान्नन्दगोपस्य स सुतो गोपितो गृहे । ४१४५
उपेक्षित इव व्याधिः पूर्य्यमाण इवाम्बुधिः । मदन्मेघ इवोष्णान्ते स दुरात्मा विवर्द्धते ।
तस्य नाहं गतिं जाने न योगं न पराक्रमं । नन्दगोपस्य भवने जातस्याद्भुतकर्म्मणः ।
किं तद्भूतं समुद्भूतं देवापत्यं न विद्महे । अतिदैवैरमानुष्यैः कर्म्मभिः सोऽनुमीयते ।
पूतना शकुनी बाल्ये शिशुनोत्तानशायिना । स्तनपानेप्सुना पीता प्राणैः सह दुरासदा ।
यमुनाया ह्रदे नागः कालियो दमितस्तथा । रसातलचरो नीतः क्षणेनादर्शनं ह्रदात् । ४१५०
नन्दगोपसुतो योगं कृत्वा च पुनरुत्थितः । धेनुकस्तालशिखरात् पातितो जीवितं विना ।
प्रलम्बं यं मृधे देवा न शेकुरभिवर्त्तितुं । बालेन मुष्टिनैकेन स हतः प्राकृतो यथा ।
वासवस्योत्सवं भङ्क्त्वा वर्षं वासवरोषजं । निर्जित्य गोगणस्यार्थाय धृतो गोवर्द्धनो गिरिः ।
हतस्त्वरिष्टो बलवान् विशृङ्गश्च कृतो व्रजे । अबालो बालमास्थाय रमते शिशुलीलया ।
प्रबन्धः कर्म्मणामेष तस्य गोव्रजवासिनः । सन्निकृष्टं भयस्यैव केशिनो मम च ध्रुवं । ४१५५
भूतपूर्व्वश्च मे मृत्युः स नूनं पौर्व्वदेहिकः । युद्धाकाङ्क्षी स च यथा तिष्ठतीव ममाग्रतः ।
क्व गोपत्वमशुभं मानुष्यं प्राप्य दुर्लभं । क्व च देवप्रभावेण क्रीडितव्यं व्रजे मम ।
अहो नीचेन वपुषा छादयित्वात्मनो वपुः । कोऽप्येष रमते देवः श्मशानस्थ इवानलः ।
श्रूयते हि पुरा विष्णुः सुराणां कारणान्तरे । वामनेन तु रूपेण जहार पृथिवीमिमां ।
कृत्वा केशरिणो रूपं विष्णुना प्रभविष्णुना । हतो हिरण्यकशिपुर्दानवानां पितामहः । ४१६०
अचिन्त्यं रूपमास्थाय श्वेतशैलस्य मूर्द्धनि । भवेन च्याविता दैत्याः पुरा तत्त्रिपुरं घ्नता ।
चालितो गुरुपुत्रेण भार्गवोऽङ्गिरसेन वै । प्रविष्टो दार्दुरीं मायामनावृष्टिश्चकार ह ।
अनन्तः शाश्वतो देवः सहस्रशिरसोऽव्ययः । वाराहं रूपमास्थाय प्रोज्जहारार्णवान्महीं ।
अमृते निर्म्मिते पूर्व्वं विष्णुः स्त्रीरूपमास्थितः । सुराणामसुराणाञ्च युद्धं चक्रे सुदारुणं ।
अमृतार्थे पुरा चापि देवदैत्यसमागमे । दधार मन्दरं विष्णुरकूपार इति श्रुतिः । ४१६५

येन वामनमास्थाय निगूढमीयं पुरा वपुः । त्रिभिः क्रमैस्त्रीँल्लोकान् जहार त्रिदिवौकसां ।
चतुर्थं तेजसो भागं कृत्वा दाशरथे गृहे । स एव रामसंज्ञो वै रावणं व्यवधत्प्रभुः ।
एवमेव निकृत्या वै तत्तद्रूपमुपागतः । साधयत्यात्मनः कार्यं सुराणामर्थसिद्धये ।
तदेष नूनं विष्णुर्वा शक्रो वा मरुताम्पतिः । मद्बाधनेच्छया प्राप्तो नारदो मां यदुक्तवान् ।
अत्र मे शङ्कते बुद्धिर्वसुदेवं प्रति ध्रुवं । यस्य बुद्धिविशेषेण वयं कातरतां गताः ।
अहं हि खट्वाङ्गवने नारदेन समागतः । द्वितीयं च हि मां विप्रः पुनरेवाब्रवीद्वचः ।
यत्त्वयाऽनुष्ठितो यत्नः कंस गर्भकृते महान् । वसुदेवेन ते रात्रौ तत्कर्म विफलीकृतं ।
दारिका या त्वया रात्रौ शिलायां कंस पातिता । तां यशोदासुतां विद्धि कृष्णञ्च वसुदेवजं ।
रात्रौ व्यावर्त्तितावेतौ गर्भौ तव वधाय वै । वसुदेवेन कंसाय मित्ररूपेण शत्रुणा ।
सा तु कन्या यशोदाया विन्ध्ये पर्वतसत्तमे । हत्वा शुम्भनिशुम्भौ द्वौ दानवौ नगचारिणौ ।
कृताभिषेका वरदा भूतसङ्घनिषेविता । अर्च्यते दस्युभिर्घोरैर्महापशुबलिप्रिया ।
सुरापिशितपूर्णाभ्यां कुम्भाभ्यामुपशोभिता । मयूराङ्गदचित्रैश्च बर्हभारैर्विभूषिता ।
हृष्टकुक्कुटसन्नादं वनं वायसनादितं । छागयूथैश्च संपूर्णं विहङ्गैश्च पक्षिभिः ।
सिंहव्याघ्रवराहाणां नादेन प्रतिनादितं । वृक्षगम्भीरनिविडं कान्तारैः सर्वतो वृतं ।
दिव्यभृङ्गारचमरैरादर्शैश्च विभूषितं । देवतूर्यनिनादैश्च शतशः प्रतिनादितं ।
स्थानं तस्या नगे विन्ध्ये निर्मितं स्वेन तेजसा । रिपूणां त्रासजननी नित्यं तत्र मनोरमे ।
वसते परमप्रीता दैवतैरभिपूजिता । यश्चायं नन्दगोपस्य कृष्ण इत्युच्यते सुतः ।
अत्र मे नारदः प्राह सुमहत् कार्यकारणं । द्वितीयो वसुदेवाद्धि वासुदेवो भविष्यति ।
स हि ते सहजो मृत्युर्बान्धवश्च भविष्यति । स एव वासुदेवो वै वसुदेवसुतो बली ।
बान्धवो धर्मतो मह्यं हृदयेनान्तको रिपुः । यथा हि वायसो मूर्द्ध्नि पद्भ्यां यथावतिष्ठते ।
नेत्रे तुदति तद्वैव बान्धवानिवगर्हिता । वसुदेवस्तथैवायं सपुत्रस्तातिबान्धवः ।
छिनत्ति मम मूलानि भुङ्क्ते च मम पार्श्वतः । भ्रूणहत्याऽपि सन्तार्या गोवधः स्त्रीवधोऽपि वा ।
न कृतघ्नस्य लोकोऽस्ति बान्धवस्य विशेषतः । पतितानुगतं मार्गं निषेवत्यचिरेण सः ।
यः कृतघ्नोऽनुबन्धेन प्रीतिं वहति दारुणां । नरकाध्युषितः पन्था गन्तव्यस्तेन दारुणः ।
अपापे पापहृदयो यः पापमनुतिष्ठति । अहं वा स्वजनश्लाघ्यः स वा श्लाघ्यतरः सुतः ।
नियमैर्गुणयुक्तेन मया बान्धवकाम्यया । पक्षिणां कलहे घोरे वधमर्हन्ति वीरुधः ।
युद्धव्युपरमे ते तु सहासन्ति महावने । बान्धवानामपि तथा भेदकाले समुत्थिते ।
बध्यते योऽन्तरप्रेप्सुः स्वजनो यदि चेतरः । ज्ञातव्यं हि विनाशाय मया पुष्टो विजानता ।
वसुदेव कुलस्यास्य यद्विरोधवधे कृतं । अमर्षी वैरशीलश्च सदा पापमतिः शठः ।
स्थाने यदुकुलं मूढ शोचनीयं त्वया कृतं । वसुदेव वृथा वृद्धो यन्मया त्वं पुरस्कृतः ।

श्वेतेन शिरसा वृद्धो नैव वर्षशती भवेत्। यस्य बुद्धिः परिणता स वै वृद्धतरो नृणां।
त्वञ्च कर्कशशीलश्च बुद्ध्या च न बहुश्रुतः। केवलं वयसा वृद्धो यथा शरदि तोयदः।
किन्तु त्वं साधु जानीषे वसुदेव वृथामते। हते कंसे मम सुतो मथुरां पालयिष्यति।
छिन्नाशस्त्वं वृथावृद्धो मिथ्या चैतद्विचारितं। जिजीविषुर्न स ह्यस्ति यो वै तिष्ठेत्समापतः।
प्रहर्त्तुकामो विश्वस्ते यस्त्वं दुष्टेन चेतसा। तत्ते प्रतिकरिष्येऽहं पुत्रयोस्तव पश्यतः। ४२००
न मे वृद्धवधः कश्चिद्द्विजस्त्रीवध एव च। कृतपूर्वः करिष्ये वा विशेषेण तु बान्धवे।
इह त्वं जातसंवृद्धो मम पित्रा विवर्द्धितः। पितृष्वसुश्च मे भर्त्ता यदूनां प्रथमो गुरुः।
कुले महति विख्यातः प्रथिते चक्रवर्त्तिनां। गुर्व्वर्थं पूजितः सद्भिर्यदुभिर्द्धर्मबुद्धिभिः।
किं करिष्यामहे सर्व्वे सत्सु वक्तव्यतां गताः। यदूनां यूथमुख्यस्य यस्य ते कृत्समीदृशं।
मद्वधो वा जयो वाऽद्य वसुदेवस्य दुर्नयैः। सत्सु यास्यन्ति परुषा यदूनामवगुण्ठिताः। ४२०५
त्वया हि मद्वधोपायं तर्कयानेन वै मृधे। अविश्वास्यं कृतं कर्म वाच्याश्च यादवाः कृताः।
अशाम्यं वैरमुत्पन्नं मम कृष्णस्य चोभयोः। शान्तिमेकतरे शान्तिं गते यास्यन्ति यादवाः।
गच्छत्वयं दानपतिः क्षिप्रमानयितुं व्रजात्। नन्दगोपञ्च गोपांश्च करदान्मम शासनात्।
वाच्यश्च नन्दगोपो वै करमादाय वार्षिकं। शीघ्रमागच्छ नगरं गोपैः सर्व्वैः समन्वितः।
कृष्णसङ्कर्षणौ चैव वसुदेवसुतावुभौ। द्रष्टुमिच्छति वै कंसः सभृत्यः सपुरोहितः। ४२१०
एतौ युद्धविदौ रङ्गे कालनिर्माणयोधिनौ। दृढप्रतिकृती चैव शृणोमि व्यायतोद्यमौ।
अस्माकमपि मल्लौ द्वौ सज्जौ युद्धकृतोद्यमौ। ताभ्यां सह नियोत्स्येते तौ युद्धकुशलावुभौ।
द्रष्टव्यौ च मयाऽवश्यं बालौ तावमरोपमौ। पितृष्वसृसुतौ वीरौ व्रजवासौ वनेचरौ।
वक्तव्यश्च व्रजे तस्मिन् समीपे व्रजवासिनां। राजा धनुर्मखं नाम कारयिष्यति वै सुखी।
सन्निकृष्टे व्रजास्तत्र निवसन्तु यथासुखं। जनस्यागच्छतस्तत्र यथा स्यात् सर्व्वमव्ययं। ४२१५
पयसः सर्पिषश्चैव दध्नो दध्युत्तरस्य च। यथाकामं प्रदानाय भोज्याभिश्रयणाय च।
अक्रूर गच्छ शीघ्रं त्वं तावानय ममाज्ञया। सङ्कर्षणस्य कृष्णस्य द्रष्टुं कौतूहलं हि मे।
तयोरागमने प्रीतिः परा मम कृता भवेत्। दृष्ट्वा तु तौ महावीर्य्यौ तद्विधास्यामि यद्धितं।
स्यातां नाम वाक्यं श्रुत्वैव मम तौ परिभाषितं। नागच्छेतां यथाकालं निग्राह्यावपि तौ मया।
सान्त्वमेव तु बालेषु प्रधानं प्रथमो नयः। मधुरेणैव तौ मल्लौ त्वयमेवानयाशु वै। ४२२०
अक्रूर कुरु मे प्रीतिमेतां परमदुर्लभां। यदि वा नोपजप्तोऽसि वसुदेवेन सुव्रत।
तथा कर्त्तव्यमेतद्धि यथा तावागमिष्यतः। एवमाक्रुश्यमानस्तु वसुदेवो वसूपमः।
सागराकारमात्मानं निष्कम्पमधारयत्। वाक्छल्यैस्तुद्यमानस्तु कंसेनादीर्घदर्शिना।
क्षमां मनसि सन्धाय नोत्तरं प्रत्यपद्यत। ये तु तं ददृशुस्तत्र क्षिप्यमाणमनेकशः।
धिग्धिगित्यसकृत्ते वै शनैरूचुरवाङ्मुखाः। अक्रूरस्तु महातेजा जानन् दिव्येन चक्षुषा। ४२२५

जलं दृष्ट्वेव तृषितः प्रेषितः प्रीतिमानहम् । तस्मिन्नेव मुहूर्त्ते तु मथुरायाः स निर्ययौ ।
प्रीतिमान् पुण्डरीकाक्षं द्रष्टुं दानपतिः स्वयं ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि अक्रूरप्रस्थापने ऊनाशीतोऽध्यायः ॥ ७९ ॥
॥ वैशम्पायन उवाच ॥ चित्रं यदुबलं दृष्ट्वा सर्व्वे ते यदुपुङ्गवाः । निपीड्य श्रवणान् हस्तैर्मेनिरे तं गतायुषं ।
अन्धकस्तु ततः प्रीतमना धैर्य्यादविकृतं वचः । प्रोवाच वदतां श्रेष्ठः समाजे कंसमोजसा ।
अश्लाघ्यो वदतः पुत्र तवायं वाक्परिश्रमः । अयुक्तो गर्हितः सद्भिर्ब्बान्धवेषु विशेषतः । ४२३५
अयादवो यदि भवान् शृणु तावद्युच्यसे । न हि त्वा यादवा वीर बलात् कुर्व्वन्ति यादवं ।
अश्लाघ्या वृष्णयः पुत्र येषां त्वमनुशासिता । इक्ष्वाकुवंशजो राजा विनिकृष्टः स्ववंशजात् ।
भोजो वा यादवो वाऽसि कंसो वाऽसि यथा तथा । सहजन्ते शिरस्तात जटी मुण्डोऽपि वा भव ।
उग्रसेनस्त्वयं प्रोक्तो योऽस्माकं कुलपांसनः । दुर्ज्जातोऽनेन येन त्वमोदृशो जनितः सुतः ।
न ह्यात्मना गुणांस्तात प्रवदन्ति मनीषिणः । परैरुक्ता गुणा गौरवं यान्ति सर्व्वार्थसाधिताः । ४२४०
पृथिव्यां यदुवंशोऽयं निन्दनीयो मनीषिणां । बालः कुलाङ्गारमूढो येषां त्वमनुशासिता ।
एतैरसाधुभिर्व्वाक्यैस्त्वया साधिति भाषितैः । न चाप्यवसितं कार्य्यमात्मा च विवृतः कृतः ।
गुरोरनवलिप्तस्य मान्यस्य महतामपि । चेतयन् कः शुभं मन्येद्द्विजस्येव वधं कृतं ।
मान्याश्चैवाभिगम्याश्च वृद्धास्तात यथाऽग्नयः । क्रोधो हि तेषां प्रदहेल्लोकानन्तर्गतानपि ।
बुधेन तात दान्तेन नित्यमभ्युत्थितात्मना । अर्थस्य गतिरन्वेष्या मत्स्यस्य गतिरप्स्विव । ४२४५
केवलं त्वन्तु दर्पेण वृद्धानधिक्षिपन्निह । बाधां तुदसि मर्म्मघ्नां अमन्त्रोक्तां यथाकृतिः ।
वसुदेवस्य पुत्रार्थे यदिमं परिगर्हसि । तत्र मिथ्याप्रलापन्ते निन्दामि कृपणं वचः ।
दारुणोऽपि पिता पुत्रे नैव दारुणतां व्रजेत् । पुत्रार्थे ह्यापदः कष्टाः पितरः प्राप्नुवन्ति च ।
छादितो वसुदेवेन यदि पुत्रः शिशुः पुरा । मन्यसे यद्यकर्त्तव्यं तत्पृच्छ पितरं स्वकं ।
गर्हता वसुदेवस्य यदुवंशस्य निन्दता । त्वया यादवपुत्राणां वैरञ्च विवर्द्धितं । ४२५०
अकर्त्तव्यं यदि कृतं वसुदेवेन पुत्रजं । किमर्थमुग्रसेनेन शिशुस्त्वं न विनाशितः ।
पुन्नाम्नो नरकात् पुत्रो यस्मात्त्राति पितॄन् सदा । तस्माद्ब्रुवन्ति पुत्रेति पुत्रं धर्म्मविदो जनाः ।
जात्या हि यादवः कृष्णः स च सङ्कर्षणो युवा । त्वस्यापि विहतस्ताभ्यां जातवैरेण चेतसा ।
उद्धृतानीह सर्व्वेषां यदूनां हृदयानि वै । वसुदेवे तथाक्षिप्ते वासुदेवे च कोपिते ।
कृष्णो च भवतो द्वेष्ये वसुदेवविगर्हणात् । शंसन्ति येमानि भयं निमित्तान्यभिवान्ति ते । ४२५५
सर्पाणां दर्शनं तीव्रं स्वप्नानाञ्च निशाक्षये । पुर्य्यां वैधव्यशंसीनि कारणैरनुमीमहे ।
एष घोरो ग्रहः स्वातिमभितिष्ठन् खे नभस्तिभिः । वक्रमङ्गारकस्तत्र चित्रायां घोरदर्शनः ।
बुधेन पश्चिमा सन्ध्या व्याप्ता घोरेण तेजसा । वैश्वानरपथे शुक्रो ह्यतिचारञ्चचार च ।
केतुना धूमकेतोस्तु नक्षत्राणि चकोरदृश । भरण्यादीनि भिन्नानि मानुयान्ति निशाकरं ।

प्राक्सन्ध्यापरिघग्रस्ता नाभिर्व्वाधति भास्करं । शिवा श्मशानान्निष्क्रम्य निश्यासाङ्गारवर्षिणी । ४९६०
उभे सन्ध्ये पुरीं घोरा पर्य्येति बहु वाशती । उल्कानिर्घातनादेन पपात धरणीतले ।
चलन्त्यपर्व्वणि मही गिरीणां शिखराणि च । प्रतिलोमं प्रजल्पन्ते व्याहरन्तो मृगद्विजाः ।
ग्रस्तः स्वर्भानुना सूर्य्यो दिवा नक्तमजायत । धूमोत्पातैर्द्दिशो व्याप्ताः शुष्काशनिसमाहताः ।
प्रस्रवन्ति घना रक्तं साशनिस्तनयित्नवः । चलिता दैवताः स्थानात्त्यजन्ति विहगा नगान् ।
यानि राजविनाशाय दैवज्ञाः कथयन्ति ह । तानि सर्व्वाणि पश्यामो निमित्तान्यशुभानि वै । ४९६५
त्वञ्चापि स्वजनद्वेषी राजधर्म्मपराङ्मुखः । अनिमित्तागतक्रोधः सन्निकृष्टभयो ह्यसि ।
यस्त्वं देवोपमं वृद्धं वसुदेवं वसूपमं । मोहात् क्षिपसि दुर्ब्बुद्धे कुतस्ते शान्तिरात्मनः ।
त्वद्गता यो हि नः स्नेहः सन्त्यजामोऽद्य तं वयं । अहितं स्वस्य वंशस्य न त्वां वयमुपास्महे ।
स हि दामपतिर्द्धन्यो यो द्रक्ष्यति वने गतं । पुण्डरीकपलाशाक्षं कृष्णमक्लिष्टकारिणं ।
छिन्नमूलो ह्ययं वंशो यदूनां त्वत्कृते कृतः । कृष्णो ज्ञातीन् समानाय्य स सन्धानं करिष्यति । ४९७०
सान्त्वेनैव तवानेन वसुदेवेन धीमता । कालसम्पक्वविज्ञानो ब्रूहि त्वं यद्यदिच्छसि ।
सहास्तु रोषनं कंस वसुदेवसहायवान् । गच्छ कृष्णस्य निलयं प्रीतिस्ते तेन रोचतां ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि अन्धकवाक्ये अशीतितमोऽध्यायः ॥ ८० ॥
॥ वैशम्पायन उवाच ॥ अन्धकस्य वचः श्रुत्वा कंसः संरक्तलोचनः । न किञ्चिदब्रवीत् क्रोधाद्विवेश स्वं निवेशनं ।
ते तु सर्व्वे यथावेश्म यादवाः श्रुतविस्तराः । जग्मुर्व्विदितसङ्कल्पाः कंसवैकृतशंसिनः ।
अक्रूरोऽपि यथाज्ञप्तः कृष्णदर्शनलालसः । जगाम रथमुख्येन मनसस्तुल्यगामिना । ४९७५
कृष्णस्यापि निमित्तानि शुभान्यङ्गगतानि वै । पितृतुल्येन शंसन्ति बान्धवेन समागमं ।
प्रागेव तु नरेन्द्रेण माथुरेणोग्रसेनिना । केशिनः प्रेषितो दूतो बधायोपेन्द्रकारणात् ।
स तु दूतवचः श्रुत्वा केशी क्लेशकरो नृणां । वृन्दावनगतो गोपान् बाधते स्म दुरासदः ।
मानुषं मांसमश्नानः क्रुद्धो दुष्टपराक्रमः । दुर्द्दान्तो वाजिदैत्योऽसावकरोत् कदनं महत् ।
निघ्नन् गा वै सगोपालान् गवां पिशितभोजनः । उद्दामः कामचारी च स केशी निरवग्रहः । ४९८०
तदरण्यं श्मशानाभं नृणामस्थिभिरावृतं । यत्रास्ते स हि दुष्टात्मा केशी तुरगदानवः ।
खुरैर्द्दारयते भूमिं वेगेनारुजते द्रुमान् । हेषितैः स्पर्द्धते वायुं प्लुतैर्लङ्घयते नभः ।
अतिप्रवृद्धो मत्तश्च दुष्टाश्वो वनगोचरः । प्रकम्पितसटो रौद्रः कंसस्य चरितानुगः ।
ईरिणं तद्वनं सर्व्वं तेनासीत् पापकारिणा । हतं तुरगदैत्येन सर्व्वान् गोपान् जिघांसता ।
तेन दुष्टप्रचारेण दूषितं तद्वनं महत् । न नृभिर्गोधनैश्चापि सेव्यते वनवृत्तिभिः । ४९८५
निःसम्पातः कृतः पन्थास्तेन तद्विषयाश्रितः । मदावलिप्तवृत्तेन नृमांसान्यश्नता भृशं ।
नृशब्दानुसरः क्रुद्धः स कदाचिद्दिवागमे । जगाम घोषसंवासं चोदितः कालधर्म्मणा ।
तं दृष्ट्वा दुद्रुवुर्गोपाः स्त्रियश्च शिशुभिः सह । क्रन्दमाना जगन्नाथं कृष्णं नाथमुपाश्रिताः ।

तासां रुदितशब्देन गोपानां क्रन्दितेन च । दत्त्वाऽभयन्तु कृष्णो वै केशिनं सोऽभिदुद्रुवे ।
केशी चाप्युद्धतग्रीवः प्रकाशदशनेक्षणः । हेषमाणो जवोदग्रो गोविन्दाभिमुखो ययौ ।
तमापतन्तं सम्प्रेक्ष्य केशिनं हयदानवं । प्रत्युज्जगाम गोविन्दस्तोयदः शशिनं यथा ।
केशिनस्तु तमभ्यासे दृष्ट्वा कृष्णमवस्थितं । मनुष्यबुद्धयो गोपाः कृष्णमूचुर्हितैषिणः ।
कृष्ण तात न खल्वेष सहसा ते हयाधमः । उपसर्प्यो भवान् बालः पापश्चैष दुरासदः ।
एष कंसस्य सहजः प्राणस्तात बहिश्चरः । उत्तमश्च हयेन्द्राणां दानवोऽप्रतिमो युधि ।
त्रासनः परसैन्यानां तुरगाणां महाबलः । अवध्यः सर्व्वभूतानां प्रथमः पापकर्म्मणां ।
गोपानां तद्वचः श्रुत्वा वदतां मधुसूदनः । केशिना सह युद्धाय मतिञ्चक्रेऽरिसूदनः ।
ततः सव्यं दक्षिणञ्च मण्डलानि परिभ्रमन् । पद्भ्यामुभाभ्यां स हयः क्रोधेनारुजते द्रुमान् ।
मुखे लम्बशटे चास्य स्कन्धे केशघनावृते । वलयो भ्रूतरङ्गाभाः सुस्रुवुः क्रोधजं जलं ।
सफेनं वक्त्रजञ्चैव ववर्ष रजसावृतं । हिमकाले यथा व्योम्नि नीहारमिव चन्द्रमाः ।
गोविन्दमरविन्दाक्षं हेषितोद्गारशीकरैः । सफेनैर्व्वक्त्रनिर्गीर्णैः प्रोक्षयामास भारत ।
खुरोद्धूतावसक्तेन मधुकक्षोदपाण्डुना । रजसा स हयः कृष्णं चकारारुणमूर्द्धजं ।
प्लुतावल्गितपादस्तु तक्षमाणो धरां खुरैः । दन्तान् निर्दशमानस्तु केशी कृष्णमुपाद्रवत ।
स संसक्तस्तु कृष्णेन केशी तुरगसत्तमः । पूर्व्वाभ्याञ्चरणाभ्यां वै कृष्णं वक्षस्यताडयत् ।
पुनः पुनश्च स बली प्राहिणोत्पार्श्वतः खुरान् । कृष्णस्य दानवो घोरं प्रहारममितौजसः ।
वक्त्रेण चास्य घोरेण तीक्ष्णदंष्ट्रायुधेन वै । अदशद्बाहुशिखरं कृष्णस्य रुषितो हयः ।
स लम्बकेशरशटः कृष्णेन सह सङ्गतः । रराज केशी मेघेन संयुक्तः ख इवांशुमान् ।
उरसा स्योरसा हन्तुमियेष बलवान् हयः । वेगेन वासुदेवस्य क्रोधाद्द्विगुणविक्रमः ।
तस्योत्सिक्तस्य बलवान् कृष्णोऽप्यमितविक्रमः । बाहुमाभोगिनं कृत्वा मुखे क्रुद्धः समादधत ।
स तं बाहुमशक्तो वै खादितुं भेत्तुमेव वा । दशनैर्मूलनिर्मुक्तैः सफेनं रुधिरं वमन् ।
विपाटिताभ्यामोष्ठाभ्यां कटाभ्यां विदलीकृतः । अक्षिणी विकृते चक्रे विसृते मुक्तबन्धने ।
निरस्तहनुराविष्टः शोणिताक्तविलोचनः । उत्कर्णो नष्टचेतास्तु स केशी बह्वचेष्टत ।
उत्पतन्नसकृत् पादैः शकृन्मूत्रं समुत्सृजन् । खिन्नार्द्ररोमा श्रान्तस्तु निर्यत्नचरणोऽभवत् ।
केशिवक्त्रविलग्नस्तु कृष्णबाहुरशोभत । व्याभुग्न इव घर्म्मान्ते चन्द्रार्द्धकिरणैर्घनः ।
केशी च कृष्णसंसक्तः श्रान्तगात्रो व्यरोचत । प्रभातावनतश्चन्द्रः श्रान्तो मेरुमिवाश्रितः ।
तस्य कृष्णभुजोद्धूताः केशिनो दशना मुखात् । पेतुः शरदि निस्तोयाः सिताभ्रावयवा इव ।
स तु केशी भृशं श्रान्तः कृष्णेनाक्लिष्टकर्म्मणा । स्वभुजं स्वायतं कृत्वा पाटितो बलवत्तदा ।
स पाटितो भुजेनाजौ कृष्णेन विकृताननः । केशी नदन्महानादं दानवो व्यथितस्तदा ।

विघूर्णमानः स्रस्ताङ्गो मुखाद्रुधिरमुद्वमन् । भग्नं व्यङ्गीकृतवपुर्भिन्नकृत्तार्द्ध इवाचलः ।
व्यादितास्यो महारौद्रः सोऽसुरः कृष्णबाहुना । निपपात यथा कृत्तो नागो द्विविदलीकृतः ।
बाहुना कृत्तदेहस्य केशिनो रूपमाबभौ । पशोरिव महाघोरं निहतस्य पिनाकिना । ४३१०
द्विपादपृष्ठपुच्छार्द्धे श्रवणैकाक्षिनासिके । केशिनस्ते द्विधाभूते द्वे अर्द्धे रेजतुः क्षितौ ।
केशिदन्ताहतस्यापि कृष्णस्य शुशुभे भुजः । वृद्धसाल इवारण्ये गजेन्द्रदशनाङ्कितः ।
तं हत्वा केशिनं युद्धे कल्पयित्वा च भागशः । कृष्णः पद्मपलाशाक्षो हसंस्तत्रैव तस्थिवान् ।
तं हतं केशिनं दृष्ट्वा गोपा गोपस्त्रियस्तथा । बभूवुर्मुदिताः सर्व्वे हतविघ्ना हतक्लमाः ।
दामोदरन्तु श्रीमन्तं यथास्थानं यथावयः । अभ्यनन्दन् प्रियैर्वाक्यैः पूजयन्तः पुनः पुनः । ४३१५
॥ गोपा ऊचुः ॥ अहो तात कृतं कर्म्म हतोऽयं लोककण्टकः । दैत्यः क्षितिचरः कृष्ण हयरूपं समास्थितः ।
कृतं वृन्दावनं क्षेम्यं सेव्यं नृमृगपक्षिणां । घ्नता पापमिमं तात केशिनं हयदानवं ।
हता नो बहवो गोपा गावो वत्सेषु वत्सलाः । नैके चान्ये जनपदा हतानेन दुरात्मना ।
एष संवर्त्तकं कर्त्तुमुद्यतः किल पापकृत् । नृलोकं निर्नरं कृत्वा चर्त्तुकामो यथासुखं ।
नैतस्य प्रमुखे स्थातुं कश्चिच्छक्तो जिजीविषुः । अपि देवसमूहेषु किं पुनः पृथिवीतले । ४३२०
॥ वैशम्पायन उवाच ॥ अथाह्यान्तर्हितो विप्रो नारदः खगमो मुनिः । प्रीतोऽस्मि विष्णो देवेति कृष्ण कृष्णेति चाब्रवीत् ।
यदिदं दुष्करं कर्म्म कृतं केशिजिघांसया । त्वय्येव केवलं युक्तं त्रिदिवे त्र्यम्बकेऽपि वा ।
अहं युद्धोत्सुकस्तात त्वद्गतेनान्तरात्मना । इदं नरहयं युद्धं द्रष्टुं स्वर्गादिहागतः ।
पूतनानिधनादीनि कर्म्माणि तव दृष्टवान् । अहं त्वनेन गोविन्द कर्म्मणा परितोषितः ।
हयादस्मान्महेन्द्रोऽपि बिभेति बलसूदनः । कुर्व्वाणाच्च वपुर्घोरं केशिनो दुष्टचेतसः । ४३२५
यत्त्वया पाटितं देहं भुजेनायतपर्व्वणा । एषोऽस्य मृत्युरन्नाथ विहितो विश्वयोनिना ।
यस्मात्त्वया हतः केशी तस्मान्मच्छासनं शृणु । केशवो नाम नाम्ना त्वं ख्यातो लोके भविष्यसि ।
स्वस्त्यस्तु भवतो लोके साधु याम्यहमाशुगः । कृत्यशेषञ्च ते कार्य्यं शक्रस्त्वमसि मा चिरं ।
त्वयि कार्य्यान्तरगते नरा इव दिवौकसः । विडम्बयन्तः क्रीडन्ति लीलां त्वद्बलमाश्रिताः ।
अभ्याशे वर्त्तते कालो भारतस्याहवोदधेः । हस्तप्राप्तानि युद्धानि राज्ञां त्रिदिवगामिनाम् । ४३३०
पन्थानः शोधिता व्योम्नि विमानारोहिणाऽध्वगाः । अवकाशा विभज्यन्ते शक्रलोके महीक्षितां ।
उग्रसेनसुते शान्ते पदस्थे त्वयि केशव । अभितस्तुमुलं युद्धं भविष्यति महीक्षितां ।
त्वाञ्चाप्रतिमकर्म्माणं संश्रयिष्यन्ति पाण्डवाः । भेदकाले नरेन्द्राणां पक्षग्राहो भविष्यसि ।
त्वयि राजासनस्थे हि राजश्रियमनुत्तमां । शुभां त्यक्ष्यन्ति राजानस्त्वत्प्रभावान्न संशयः ।
एष मे कृष्ण सन्देशः श्रुतिभिः ख्यातिमेष्यति । देवतानां दिविष्ठानां जगतश्च जगत्पते । ४३३५
दृष्टं मे भवतः कर्म्म द्रष्टव्यानि मया प्रभो । कंसे भूयः समेष्यामि साधिते साधयाम्यहं ।

एवमुक्त्वा तु स तदा नारदः खं जगाम ह। नारदस्य वचः श्रुत्वा देवसङ्गीतयोनिनः।
गोपान् कृष्णः समाभाष्य विवेश व्रजमेव ह।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि केशिवधे एकाशीतोऽध्यायः ॥ ८१ ॥
॥ वैशम्पायन उवाच ॥ अथास्तं गच्छति तदा मन्दरश्मौ दिवाकरे। सन्ध्यारक्ततले व्योम्नि शशाङ्के पाण्डुमण्डले।
नीडस्थेषु विहङ्गेषु सत्सु प्रादुष्कृताग्निषु। ईषत्तमःसंवृतासु दिक्षु सर्व्वासु सर्व्वशः। ४४५०
घोषवासिषु सुप्तेषु वाशन्तीषु शिवासु च। नक्तञ्चरेषु हृष्टेषु पिशितामिषकाङ्क्षिषु।
शक्रगोपाङ्कयामोदे प्रदोषेऽभ्यासतस्करे। अधिश्रयणवेलायां प्राप्तायां गृहमेधिनां।
वन्यैर्वैखानसैर्मन्त्रैर्हूयमाने हुताशने। उपावृत्तासु वै गोषु दुह्यमानासु च व्रजे।
असकृद्व्याहरन्तीषु बद्धवत्सासु धेनुषु। प्रकीर्णदामनीकेषु गास्तथैवाह्वयत्सु च।
घनिनादेषु गोपेषु काल्यमाने च गोधने। कारीषेषु प्रकृतेषु दीप्यमानेषु सर्व्वशः। ४४५५
काष्ठभारावनतस्कन्धैर्गोपैरभ्यागतैस्तदा। किञ्चिदभ्युत्थिते सोमे मन्दरश्मौ विराजति।
ईषद्विगाह्यमानायां रजन्यां दिवसे गते। प्राप्ते दिनव्युपरमे प्रवृत्ते क्षणदामुखे।
भास्करे तेजसि गते सौम्ये तेजस्युपस्थिते। अग्निहोत्राकुले काले सौम्येन्दौ प्रत्युपस्थिते।
अग्नीषोमात्मके सन्ध्यौ वर्त्तमाने जगन्मये। पश्चिमेनाग्निदीप्तेन पूर्व्वेणोत्तरवर्च्चसा।
दग्धाङ्गसदृशे व्योम्नि किञ्चित्तारागणाकुले। वयोभिर्व्वासमुशतां बन्धुभिश्च समागमं। ४४६०
रश्मिभिः स्यन्दनेनाशु प्राप्तो दानपतिर्व्रजं। प्रविशन्नेव पप्रच्छ सान्निध्यं केशवस्य सः।
रौहिणेयस्य चाक्रूरो नन्दगोपस्य चासकृत्। स नन्दगोपस्य गृहं वासाय वसुदोपमः।
अवतीर्य्य ततो यानात् प्रविवेश महाबलः। हर्षपूर्णेन वक्त्रेण साश्रुनेत्रेण चैव ह।
प्रविशन्नेव च द्वारि ददर्श दोहने गवां। वत्समध्ये स्थितं कृष्णं सवत्समिव गोवृषं।
स तं हर्षपरीतेन वचसा गद्गदेन च। एहि केशव तातेति व्याजहार स धर्म्मवित्। ४४६५
उत्तानशायिनं दृष्ट्वा पुनर्दृष्ट्वा श्रियाऽन्वितं। अव्यक्तयौवनं कृष्णमक्रूरः प्रशशंस ह।
अयं स पुण्डरीकाक्षः सिंहशार्दूलविक्रमः। सम्पूर्णजलमेघाभः पर्व्वतप्रवराकृतिः।
मृधेष्वधर्षणीयेन सश्रीवत्सेन वक्षसा। द्विषन्निधनदक्षाभ्यां भुजाभ्यां साधु भूषितः।
मूर्त्तिमान् स रहस्यात्मा जगतोऽग्र्यस्य भाजनं। गोपवेशधरो विष्णुरुदग्रायतमूर्द्धजः।
किरीटलाञ्छनेनापि शिरसा छत्रवर्च्चसा। कुण्डलोत्तमयोग्याभ्यां श्रवणाभ्यां विशेषतः। ४४७०
हारार्हेण च पीनेन सुविस्तीर्णेन वक्षसा। द्वाभ्यां भुजाभ्यां दीर्घाभ्यां वृत्ताभ्यामुपशोभितः।
स्त्रीसहस्रोपचर्य्येण वपुषा मन्मथाग्निना। पीते वसानो वसने सोऽयं विष्णुः सनातनः।
धरण्याश्रयभूताभ्यां चरणाभ्यामरिन्दमः। त्रैलोक्याक्रान्तिभूताभ्यां भुवि पद्भ्यां व्यवस्थितः।
रथिराश्वकरस्यास्य चक्राङ्कित इवेक्ष्यते। द्वितीय उद्यतस्यापि गदासंयोगमिच्छति।
अवतीर्णो भवायेह प्रथमं परमात्मनः। शोभतेऽद्य भुवि श्रेष्ठस्त्रिदशानां धुरन्धरः। ४४७५

अयं भविष्ये दृष्टो वै भविष्यकुशलैर्नरैः। गोपालो यादवं वंशं क्षीणं विस्तारयिष्यति।
तेजसा यादवाश्चास्य शतशोऽथ सहस्रशः। वंशमापूरयिष्यन्ति स्रोता इव महार्णवं।
अस्यैव शासने सर्व्वं जगत् स्थास्यति शाश्वतं। निहतामित्रसामन्तं स्फीतं कृतयुगे यथा।
अयमास्थाय वसुधां स्थापयित्वा जगद्वशे। राज्ञां भविष्यत्युपरि न च राजा भविष्यति।
नूनं त्रिभिः क्रमैर्जित्वा यथाऽनेन कृतः प्रभुः। पुरा पुरन्दरो राजा देवतानां त्रिपिष्टपे। ४९८०
तथैव वसुधां जित्वा जितपूर्व्वां त्रिभिः क्रमैः। स्थापयिष्यति राजानमुग्रसेनं न संशयः।
प्रसृष्टैरगाधोऽयं प्रशस्तश्च बहुभिः श्रुतः। शास्त्रगैर्ब्रह्मवादैश्च पुराणोऽयं हि गीयते।
स्पृहणीयो हि लोकस्य भविष्यति च केशवः। तथा ह्यस्योत्थिता बुद्धिर्गामुख्यमुपजीवितुं।
अहन्त्वस्याद्य वसतिं पूजयिष्ये यथाविधि। विष्णुत्वं मनसा चैव पूजयिष्यामि मन्त्रवित्।
यच्च जातिपरिभ्रंशं प्रादुर्भावाश्च वै नृषु। अनामुखं वेद्मि चैनं ये चान्ये दिव्यचक्षुषः। ४९८५
सोऽहं कृष्णेन वै रात्रौ संमन्त्र्य विदितात्मना। सहानेन गमिष्यामि यशसो यदि मंस्यते।
एवं बहुविधं कृष्णं दृष्ट्वा हेत्वर्थकारणैः। विवेश नन्दगोपस्य कृष्णेन सह संसदं।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि अक्रूरागमने द्व्यशीतोऽध्यायः ॥ ८२ ॥
॥ वैशम्पायन उवाच ॥ स नन्दगोपस्य गृहं प्रविष्टः सह केशवः। गोपवृद्धान् समानीय प्रोवाचामितदक्षिणः।
कृष्णश्चैवाब्रवीत् प्रीतो रौहिणेयेन सङ्गतं। श्वः पुरीं मथुरां तात गमिष्यामः सुखाय च।
यास्यन्ति च व्रजाः सर्व्वे सगोकुलपरिग्रहाः। कंसाज्ञया समुचितं करमादाय वार्षिकं। ४९९०
वयञ्चैव प्रगन्तारो रथमारुह्य संगताः। सम्वृद्धस्तत्र कंसस्य भविष्यति धनुर्म्महः।
तं द्रक्ष्यथ समृद्धञ्च स्वजनैश्च समेष्यथ। पितरं वसुदेवञ्च सततं दुःखभाजनं।
दीनं पुत्रवधश्रान्तं युवामद्य समेष्यथः। सततं पीड्यमानञ्च कंसेनाशुभबुद्धिना।
दशान्ते शोषितं वृद्धं दुःखैः शिथिलतां गतं। कंसस्य भयसन्त्रस्तं भवद्भ्याञ्च विना कृतं।
दह्यमानं दिवारात्रौ सोत्कण्ठेनान्तरात्मना। तांश्च द्रक्ष्यसि गोविन्द पुत्रैरम्हदिनस्तनीं। ४९९५
देवकीं देवसङ्काशां सीदन्तीं विहतप्रभां। पुत्रशोकेन शुष्यन्तीं त्वद्दर्शनपरायणां।
वियोगदुःखसन्तप्तां विवत्सामिव सौरभीं। उपप्लुतेक्षणां दीनां नित्यं मलिनवाससं।
स्वर्भानुवदनग्रस्तां शशाङ्कस्य प्रभामिव। त्वद्दर्शनपरां नित्यं तवागमनकाङ्क्षिणीं।
त्वत्प्रवृत्तेन शोकेन सीदन्तीं वै तपस्विनीं। त्वत्प्रलापेष्वकुशलां त्वया बाल्ये वियोजितां।
अल्पपुण्या तव विभो बाल्यस्यास्येन्दुवर्च्चसः। यदि त्वां अनथित्वा सा देवकी तात तप्यते। ५०००
अपत्यार्थोऽत्र कस्तस्या वरं स्त्रीत्वानपत्यता। एकः शोको हि नारीणामपुत्राणां विधीयते।
सपुत्रा त्वफले पुत्रे धिक् प्रजातेन तप्यते। त्वन्तु शक्रसमः पुत्रो यस्यास्त्वसदृशो गुणैः।
परेषामप्यभयदो न सा शोचितुमर्हति। वृद्धौ तवाद्य पितरौ परभृत्यत्वमागतौ।
त्वत्कृते भर्त्सितौ नित्यं कंसमादोषदर्शिना। यदि ते देवकी मान्या पृथिवी वात्मधारिणी।

तां शोकसलिले मग्नामुत्तारयितुमर्हसि । यथा दृष्टुं प्रियसुतं वसुदेवं सुदुःखितं । ४४०५
पुत्रयोगेन संयोज्य कृष्ण धर्म्ममवाप्स्यसि । यथा नागः सुदुर्दान्तो दमितो यमुनाह्रदे ।
विमूलश्च कृतः शैलो यथा वै भूधरस्त्वया । दर्पोत्सिक्तश्च बलवानरिष्टो विनिपातितः ।
परप्राणहरः केशी दुष्टात्मा च हयो हतः । एतेनैव प्रयत्नेन कृच्छ्रादुद्धृत्य दुःखितौ ।
यथा धर्म्ममवाप्नोषि तत् कृष्ण परिचिन्त्यतां । निर्भर्त्स्यमानो यद्दृष्टः पिता ते कंससंसदि ।
ते सर्व्वे चक्रुरश्रूणि नेत्रैर्दुःखान्विता भृशं । गर्भावकृन्तनादीनि दुःखानि सुबहूनि सा । ४४१०
माता ते देवकी कृष्ण कंसस्य सहते ऽवशा । मातापितृभ्यां सर्व्वेण जातेन तनयेन वै ।
ऋणं वै प्रतिकर्त्तव्यं यथा योगमुदाहृतं । एवं ते कुर्व्वतः कृष्ण मातापित्रोरनुग्रहं ।
परित्यजेतां तौ शोकं स्याच्च धर्म्मस्तवातुलः ।
॥ वैशम्पायन उवाच ॥ कृष्णस्तु विदितार्थो वै तमाहामितदक्षिणं । वाढमित्येव तेजस्वी न च चुक्रोध केशवः ।
ते च गोपाः समागम्य नन्दगोपपुरःसराः । अक्रूरवचनं श्रुत्वा सञ्चेलुः कंसशासनात् । ४४१५
गमनाय च ते सज्जा बभूवुर्व्रजवासिनः । सज्जश्चोपायनं कृत्वा गोपवृद्धाः प्रतस्थिरे ।
करश्चानडुहः सर्पिर्म्महिषांश्चोपनायिकान् । यथासारं यथायूथमुपानीय पयोघृतं ।
तं सज्जयित्वा कंसस्य करश्चोपायनानि च । ते सर्व्वे गोपपतयो गमनायोपतस्थिरे ।
अक्रूरस्य कथाभिस्तु सह कृष्णेन जाग्रतः । रौहिणेयद्वितीयस्य निशा सा व्यत्यवर्त्तत ।
ततः प्रभाते विमले पक्षिव्याहारसंकुले । नैशाकरे रश्मिजाले क्षणदाक्षयसंवृते । ४४२०
नक्षत्रगणसंस्तीर्णे पर्य्यस्ते ज्योतिषां गणे । प्रत्यूषपवनासारैः क्लेदिते धरणीतले ।
क्षीणाकारासु तारासु सुप्तनिष्प्रतिभासु च । नैशमन्तर्दधे रूपमुद्गच्छद्दिवाकरः ।
शीतांशुः शान्तकिरणो निष्प्रभः समपद्यत । एको नाशयते रूपमेको वर्द्धयते वपुः ।
गोभिः समवकीर्णासु व्रजनिर्याणभूमिषु । मन्थनावर्त्तपूर्णेषु गर्गरेषु नदत्सु च ।
दामभिर्य्यम्यमानेषु वत्सेषु तरुणेषु च । गोपैरापूर्य्यमाणासु घोषरथ्यासु सर्व्वशः । ४४२५
तत्रैव गुरुकं भाण्डं शकटारोपितं बहु । त्वरिताः पृष्ठतः कृत्वा जग्मुः स्यन्दनवाहनाः ।
कृष्णोऽथ रौहिणेयश्च स चैवामितदक्षिणः । त्रयो रथगता जग्मुस्त्रिलोकपतयो यथा ।
अथाह कृष्णमक्रूरो यमुनातीरमाश्रितः । स्यन्दनं तात रक्षस्व यत्नश्च कुरु वाजिषु ।
हयेभ्यो यवसं दत्त्वा हयभाण्डे रथे तथा । प्रगाढं यत्नमादाय क्षणं तात प्रतीक्ष मां ।
यमुनाया ह्रदे ह्यस्मिन् स्तोष्यामि भुजगेश्वरं । दिव्यैर्भागवतैर्म्मन्त्रैः सर्व्वलोकप्रभुं यतः । ४४३०
गुह्यं भागवतं देवं सर्व्वलोकस्य भावनं । श्रीमत्स्वस्तिकमूर्द्धानं प्रणमिष्यामि भोगिनं ।
सहस्रशिरसं देवमनन्तं नीलवाससं । धर्म्मदेवस्य तस्याख्यादिदं प्रभविष्यति ।
सर्व्वं तदमृतप्रख्यमशिष्यन्त्यमरा यथा । स्वस्तिकायतनं दृष्ट्वा द्विजिह्वं श्रीविभूषितं ।
समाजस्तत्र सर्पाणां आश्चर्यं वै भविष्यति । आसातां मां समुदीक्षन्तौ भवन्तौ सङ्गतावुभौ ।

निवृत्तो भुजगेन्द्रस्य यावदस्मि ह्रदोत्तमात् । तमाह कृष्णः संहृष्टो गच्छ पर्य्येहि माचिरं । ४४३५
आवां खलु न शक्तौ स्वस्त्वया हीनावुपासितुं । स ह्रदे यमुनायास्तु ममज्जामितदक्षिणः ।
रसातले स ददृशे नागलोकमिमं यथा । तस्य मध्ये सहस्रास्यं हेमतालोच्छ्रितध्वजं ।
लाङ्गलासक्तहस्ताग्रं मुषलापाश्रितोदरं । असिताम्बरसंवीतं पाण्डुरं पाण्डुराननं ।
कुण्डलैकधरं मत्तं सुप्तमम्बुजेक्षणं । भोगोत्करासने शुभ्रे स्वेन देहेन शोभिते ।
स्वासीनं स्वस्तिकाभ्यां च वराहाभ्यां महीधरं । किञ्चित्सव्यापवृत्तेन मौलिना हेमचूलिना । ४४४०
जातरूपमयैः पद्मैर्मालया च्छन्नवक्षसं । रक्तचन्दनदिग्धाङ्गं दीर्घबाहुमरिन्दमं ।
पद्मनाभं सिताभ्राभं भाभिर्ज्वलितवर्चसं । ददर्श भोगिनां नाथमेकमेकार्णवेश्वरं ।
पूज्यमानं द्विजिह्वेन्द्रैर्वासुकिप्रमुखैः प्रभुं । कम्बलाश्वतरौ नागौ तौ चामरकरावुभौ ।
आवीजयेतां तं देवं धर्म्मासनगतं प्रभुं । तस्याभ्यासगतो भाति वासुकिः पन्नगेश्वरः ।
वृतोऽन्यैः सचिवैः सर्पैः कर्कोटकपुरःसरैः । तं घटैः काञ्चनैर्दिव्यैः पङ्कजोद्गतमस्तकैः । ४४४५
राजानं स्नापयामासुः स्नातमेकार्णवाम्बुभिः । तस्योत्सङ्गे घनश्यामं श्रीवत्साच्छादितोरसं ।
पीताम्बरधरं विष्णुं सूपविष्टं ददर्श ह । अपरञ्चैव सोमेन तुल्यसंहननं प्रभुं ।
सङ्कर्षणमिवासीनं तं दिव्यं विष्टरं विना । स कृष्णं तत्र तरसा व्याहर्त्तुमुपचक्रमे ।
तस्य संस्तम्भयामास वाक्यं कृष्णः स्वतेजसा । सोऽनुभूय भुजङ्गानां तं भागवतमव्ययं ।
उदतिष्ठत् पुनस्तोयात् विस्मितोऽमितदक्षिणः । स तौ रथस्थावासीनौ तथैव बलकेशवौ । ४४५०
निरीक्षमाणावन्योन्यं ददर्शाद्भुतरूपिणौ । अथामज्जत् पुनस्तत्र तदाऽक्रूरः कुतूहलात् ।
दृश्यते यत्र देवोऽसौ नीलवासाः सिताननः । तथैवासीनमुत्सङ्गे सहस्रास्योरगस्य वै ।
ददर्श कृष्णमक्रूरः पूज्यमानं तदा प्रभुं । भूयश्च सहसोत्थाय तन्मन्त्रं सहसा वहन् ।
रथं तेनैव मार्गेण जगामामितदक्षिणः । तमाह केशवो हृष्टः स्थितमक्रूरमागतं ।
कीदृशं नागलोकस्य वृत्तं भागवते ह्रदे । चिरन्तु भवता कालं व्यावेशेन विलम्बितं । ४४५५
मन्ये दृष्टं त्वयाश्चर्य्यं हृदयं ते यथाऽचलं । प्रत्युवाच स तं कृष्णमाश्चर्य्यं भवता विना ।
किं भविष्यति लोकेषु स्थावरेषु चरेषु च । तत्राश्चर्य्यं मया दृष्टं कृष्ण यद्भुवि दुर्लभं ।
तदिहापि यथा तत्र पश्यामि च रमामि च । सङ्गतस्यास्मि लोकानामाश्चर्य्येणेह रूपिणा ।
अतः परतरं कृष्ण नाश्चर्य्यं द्रष्टुमुत्सहे । तदागच्छ गमिष्यामः कंसराजपुरीं प्रभो ।
यावन्नास्तं व्रजत्येष दिवसान्ते दिवाकरः । ४४६०

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि अक्रूरस्य नागलोकदर्शने त्र्यशीतोऽध्यायः ॥ ८३ ॥

॥ वैशम्पायन उवाच ॥ स तु युक्त्वा रथवरमारुह्यामितदक्षिणः । कृष्णेन सार्द्धं संप्रायात्तथा सङ्कर्षणेन च ।
आससाद पुरीं रम्यां मथुरां कंसपालितां । विविशुस्तां पुरीं रम्यां काले रक्तदिवाकरे ।
तौ तु स्वभवनं वीरौ कृष्णसंकर्षणावुभौ । प्रवेशितौ बुद्धिमता अक्रूरेणार्कतेजसा ।

तावाह वरवर्णाभौ भीतो दानपतिस्तदा । त्वमस्या तात गमने वसुदेवस्त्वहं स्पृहा ।
युवयोर्हि कृते दुष्टः कंसेन स निरस्यते । भर्त्स्यते च दिवारात्रौ नेह स्थातव्यमित्यपि ।
तद्युवाभ्यां हि कर्त्तव्यं पित्रर्थं सुखमुत्तमं । यथा सुखमवाप्नोति तद्धि कार्य्यं हितान्वितं ।
तमुवाच ततः कृष्णो यास्यावावामतर्किंतौ । प्रेक्षन्तौ मथुरां वीर राजमार्गञ्च धार्म्मिक ।
तस्यैव तु गृहं साधो गच्छावो यदि मन्यसे ।
॥ वैशम्पायन उवाच ॥ अनुशिष्टौ च तौ वीरौ प्रस्थितौ प्रेक्षकावुभौ । आलानाभ्यामिवोन्मुक्तौ कुञ्जरौ युद्धकाङ्क्षिणौ ।
तौ तु मार्गगतं दृष्ट्वा रजकं रङ्गकारकं । अयाचेतां ततस्तानि वासांसि रुचिराणि वै ।
रजकः स तु तौ प्राह युवां कस्य वनेचरौ । राज्ञो वासांसि यौ मौर्ख्याद्याचेतां निर्भयावुभौ ।
अहं कंसस्य वासांसि नानादेशभवानि वै । कामरागाणि शतशो रञ्जयामि विशेषतः ।
युवां कस्य वने जातौ मृगैः सह विवर्द्धितौ । जातरागाविदं दृष्ट्वा रक्तमाच्छादनं बहु ।
अहो वां जीवितं त्यक्तं यौ भवन्ताविहागतौ । मूर्खौ प्राकृतविज्ञानौ वासो याचितुमिच्छथः ।
तस्मै चुक्रोध वै कृष्णो रजकायाल्पमेधसे । प्राणारिष्टाय मूर्खाय सृजते वाङ्मयं विषं ।
तलेनाशनिकल्पेन स तं मूर्द्ध्न्यताडयत् । स गतासुः पपातोर्व्यां रजको व्यस्तमस्तकः ।
तं हतं परिदेवन्त्यो भार्य्यास्तस्य विचुक्रुशुः । त्वरितं मुक्तकेश्यश्च जग्मुः कंसनिवेशनं ।
तावप्युभौ सुवसनौ जग्मतुर्माल्यकारणात् । वीथीं माल्यापणानां वै गन्धाघ्रातौ द्विपाविव ।
गुणको नाम तत्रासीत् माल्यवृत्तिः प्रियंवदः । प्रभूतमाल्यापणवान् लक्ष्मीवान् प्रियदर्शनः ।
तं कृष्णः श्लक्ष्णया वाचा माल्यार्थमभिसृष्टया । देहीत्युवाच तत्कालं मालाकारमकातरं ।
ताभ्यां प्रीतो ददौ माल्यं प्रभूतं माल्यजीवकः । भवतोः स्वमिदञ्चेति प्रोवाच प्रियदर्शनौ ।
प्रीतस्तु मनसा कृष्णो गुणकाय वरं ददौ । श्रीस्त्वां मत्संश्रया सौम्य धनौघैरभिवर्त्स्यति ।
स लब्ध्वा वरमव्यग्रो माल्यवृत्तिरधोमुखः । कृष्णस्य पतितो मूर्द्ध्ना प्रतिजग्राह तं वरं ।
यथाविमाविति तदा स मेने माल्यजीवकः । स भृशं भयसंविग्नो नोत्तरं प्रत्यपद्यत ।
वसुदेवसुतौ तौ च राजमार्गगतावुभौ । कुब्जां ददृशतुर्भूयः सानुलेपनभाजनां ।
तामाह कृष्णः कुब्जेति कस्येदमनुलेपनं । नयस्वाम्बुजपत्राक्षि क्षिप्रमाख्यातुमर्हसि ।
सा स्मितावेक्षणी भूत्वा प्रत्युवाचाम्बुजेक्षणं । कृष्णं जलदगम्भीरं विद्युत्कुटिलगामिनि ।
राज्ञः स्नानगृहं यामि तद्गृहाणानुलेपनं । स्थिताऽस्म्यागच्छ भद्रं ते हृदयस्यासि मे प्रियः ।
कुतस्त्वागम्यते सौम्य यस्मां त्वं नावबुध्यसे । महाराजस्य दयितां नियुक्तामनुलेपने ।
तामुवाच हसन्नीलं कृष्णः कुब्जामवस्थितां । आवयोर्गात्रसदृशं दीयतामनुलेपनं ।
वयं हि देशातिथयो मल्लाः प्राप्ता वरानने । द्रष्टुं धनुर्महं दिव्यं राष्ट्रञ्चैव महर्द्धिमत् ।
प्रत्युवाचाथ सा कृष्णं प्रियोऽसि मम दर्शने । राजार्हमिदमव्यग्रं तद्गृहाणानुलेपनं ।
तावुभावनुलिप्ताङ्गौ चारुगात्रौ विरेजतुः । तीर्थगौ पङ्कदिग्धाङ्गौ यमुनायां यथा वृषौ ।

ताञ्च कुब्जां स्वकोर्मध्ये शुभ्राङ्गुलिनाग्रपाणिना । शनैः सम्पीडयामास कृष्णो लीलाविधानवित् ।
सा तु मत्वा स्वकं मध्यं स्वायताङ्गी शुचिस्मिता । जहासोच्चस्तनतटी ऋजुयष्टिर्लता यथा । ४४९५
प्रणयाच्चापि कृष्णं सा बभाषे मत्तकाशिनी । क्व यास्यसि मया रुद्धः कान्त तिष्ठ गृहाण मां ।
तौ जातहर्षावन्योन्यं सतलाक्षेपमव्ययौ । वीक्षमाणौ प्रहसितौ कुब्जायाः श्रुतविस्तरौ ।
कृष्णस्तु कुब्जां कामार्त्तां सस्मितं विससर्ज्ज ह । ततस्तौ कुब्जया मुक्तौ प्रविष्टौ राजसंसदं ।
तावुभौ व्रजसंवृद्धौ गोपवेशविभूषितौ । गूढचेष्टाननौ भूत्वा प्रविष्टौ नृपवेश्म तत् ।
धनुःशालाङ्गतौ तौ तु बालावपरितर्कितौ । हिमवद्वनसंभूतौ सिंहाविव बलोत्कटौ । ४५००
दिदृक्षू तौ महत्तत्र धनुरायोगभूषितं । पप्रच्छतुश्च तौ वीरावायुधागारिकं तदा ।
भोः कंसधनुषां पाल श्रूयतामावयोर्व्वचः । कतरत्तद्धनुः सौम्य महोऽयं यस्य वर्त्तते ।
आयोगभूतं कंसस्य दर्शयस्व यदीच्छसि । स तयोर्द्दर्शयामास तद्धनुः स्तम्भसन्निभं ।
असारोप्यमसम्भेद्यं देवैरपि सवासवैः । तद्गृहीत्वा ततः कृष्णस्तुलयामास वीर्य्यवान् ।
दोर्भ्यां कमलपत्राक्षः प्रहृष्टेनान्तरात्मना । तुलयित्वा यथाकामं तद्धनुर्दैत्यपूजितं । ४५०५
आरोपयामास बली नामयामास चासकृत् । आनाम्यमानं कृष्णेन प्रहर्षादुरगोपमं ।
द्विधाभूतमभून्मध्ये धनुरायोगभूषितं । भङ्क्त्वा तु तद्धनुःश्रेष्ठं कृष्णस्त्वरितविक्रमः ।
निश्चक्राम महावेगः स च संकर्षणो युवा । धनुषो भङ्गनादेन वायुनिर्घोषकारिणा ।
सवातान्तःपुरं सर्व्वं दिशश्चैव पुपूरिरे । स त्वायुधागारनरो भीतस्त्वरितविक्रमः ।
समीपं नृपतेर्गत्वा काकोच्छ्वासोऽभ्यभाषत । श्रूयतां मम विज्ञाप्यमाश्चर्य्यं धनुषो गृहे । ४५१०
निर्वृत्तमस्मिन् काले यच्चागतः संभ्रमोपमं । नरौ कस्यापि सहितौ शिखाविततमूर्द्धजौ ।
नीलपीताम्बरधरौ पीतश्वेतानुलेपनौ । तावन्तःपुरमज्ञातौ प्रविष्टौ कामवेशिनौ ।
देवपुत्रोपमौ वीरौ बालाविव हुताशनौ । स्थितौ धनुर्गृहे सौम्यौ सहसा खादिवागतौ ।
मया दृष्टौ परिव्यक्तं रुचिराच्छादनस्रजौ । तयोरेकस्तु पद्माक्षः श्यामः पीताम्बरस्रजः ।
अथाह तद्धनूरत्नं दुर्ग्राह्यं देवतैरपि । तत् स बालो महाचापं बलाच्चक्रमिवायसं । ४५१५
आरोपयित्वा वेगेन नामयामास लीलया । आकृष्यमाणं तत्तेन विवाणं बाहुशालिना ।
मुष्टिदेशेन कूजित्वा द्विधाभूतमभज्यत । ततः प्रचलिता भूमिर्न प्रभाति च भास्करः ।
धनुषो भङ्गनादेन भ्रमतीव नभस्तलं । तदद्भुतमहं दृष्ट्वा विस्मयं परमं गतः ।
भयाद्भयदं शत्रूणां तदिहाख्यातुमागतः । न जानामि महाराज कौ तावमितविक्रमौ ।
एकः कैलाससङ्काश एकोऽञ्जनगिरिप्रभः । स तु तच्चापरत्नन्तु भङ्क्त्वा स्तम्भमिव द्विपः । ४५२०
निष्पपातानिलगतिः सानुगोऽमितविक्रमः । स धनुस्तद्द्विधाकृत्वा न जाने क्वापि निर्गतः ।
श्रुत्वैवं धनुषो भङ्गं कंसो विदितविस्तरः । विसृज्यायुधपालं वै प्रविवेश गृहोत्तमं ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि धनुर्भङ्गे चतुरशीतोऽध्यायः ॥ ८४ ॥

॥ वैशम्पायन उवाच ॥ स चिन्तयित्वा धनुषो भङ्गं भोजविवर्द्धनः । बभूव विमना राजा चिन्तयन् भृशदुःखितः ।
कथं बालो विगतभीरवमन्य महाबलं । प्रेक्ष्यमाणस्तु पुरुषैर्द्धनुर्भङ्क्त्वा विनिर्गतः ।
यस्यार्थे दारुणं कर्म्म कृत्वा लोकविगर्हितं । पितृष्वसात्मजान् भीतः षड्वाहं न्यपोथयं ।
दैवं पुरुषकारेण न शक्यमतिवर्त्तितुं । नारदोक्तन्तु वचनं नूनं मत्प्रमुपस्थितं ।
एवं राजा विचिन्त्याथ निष्क्रम्य स गृहोत्तमात् । प्रेक्षागारं जगामाशु मञ्चानामवलोककः ।
स दृष्ट्वा सर्व्वनिर्युक्तं प्रेक्षागारं नृपोत्तमः । श्रेणीनां दृढसंयुक्तैर्मञ्चवाटैर्निरन्तरं ।
उत्तरागारयुक्ताभिर्व्वडभीभिर्व्विभूषितं । कुटीभिश्च प्रष्टाभिरेकस्तम्भैश्च भूषितं ।
सर्व्वतः सारनिर्युक्तं स्वायतं सुप्रतिष्ठितं । उदग्राक्लिष्टसुश्लिष्टं मञ्चारोहणमुत्तमं ।
नृपासनपरिक्षिप्तं सञ्चारपथसङ्कुलं । कृत्वं तद्वेदिकाभिश्च मानवौघभरक्षमं ।
स दृष्ट्वा भूषितं रङ्गमाज्ञापयत बुद्धिमान् । श्वः सचिवाः समाल्याश्च सपताकास्तथैव च ।
सुवासिता वपुष्मन्त उपनीतोत्तरच्छदाः । क्रियन्तां मञ्चवाटाश्च वडभ्यो वीथयस्तथा ।
रङ्गवाटे करीषस्य कल्प्यन्तां राशयोऽव्ययाः । घण्टातोरणशोभाश्च वलयश्चानुरूपतः ।
स्थाप्यन्तां सुनिखाताश्च पानकुम्भा यथाक्रमं । उदभारसहाः सर्व्वे सकाञ्चनघटोत्तराः ।
वलयश्चोपकल्प्यन्तां कषायाश्चैव कुम्भशः । प्राश्निकाश्च निमन्त्र्यन्तां श्रेण्यश्च सपुरोगमाः ।
आज्ञा च देया मल्लानां प्रेक्षकाणां तथैव च । समाजे मञ्चशोभाश्च कल्प्यन्तां सुपकल्पिताः ।
एवमाज्ञाप्य राजा स समाजविधिमुत्तमं । समाजवाटान्निष्क्रम्य विवेश स्वं निवेशनं ।
आह्वानं तत्र सञ्चक्रे तस्य मल्लद्वयस्य वै । चाणूरस्याप्रमेयस्य मुष्टिकस्य तथैव च ।
तौ मल्लौ सुमहावीर्य्यौ बलिनौ बाहुशालिनौ । कंसस्याज्ञां पुरस्कृत्य हृष्टौ विविशतुस्तदा ।
तौ समीपगतौ दृष्ट्वा मल्लौ जगति विश्रुतौ । उवाच कंसो नृपतिः सोपन्यासमिदं वचः ।
भवन्तौ मम विख्यातौ मल्लौ वीरध्वजोच्छ्रितौ । पूजितौ च यथान्यायं सत्कारार्हौ विशेषतः ।
तन्मत्तो यदि सत्काराः स्मर्य्यन्ते सुकृतानि वा । कर्त्तव्यं मे महत् कर्म्म भवद्भ्यां स्वेन तेजसा ।
यावेतौ मम संवृद्धौ व्रजे गोपालकावुभौ । सङ्कर्षणश्च कृष्णश्च बालावपि जितश्रमौ ।
एतौ रङ्गगतौ युद्धे युध्यमानौ वनेचरौ । निपातानन्तरं शीघ्रं हन्तव्यौ नात्र संशयः ।
बालाविमौ चपलकावक्रियाविति सर्व्वथा । नावज्ञा तत्र कर्त्तव्या कर्त्तव्यो यत्न एव हि ।
ताभ्यां युधि निरस्ताभ्यां गोपाभ्यां रङ्गसन्निधौ । आयत्याञ्च तदात्वे च श्रेयो मम भविष्यति ।
नृपतेः स्नेहसंयुक्तैर्व्वचोभिर्हृष्टमानसौ । ऊचतुर्युद्धमत्तौ तौ मल्लौ चाणूरमुष्टिकौ ।
यद्यावयोस्तौ प्रमुखे स्थास्येते गोपकिल्बिषौ । हतावित्यवगन्तव्यौ प्रेतरूपौ तपस्विनौ ।
यद्यावां प्रतियोत्स्येते तावरिष्टपरिश्रुतौ । आवाभ्यां रोषयुक्ताभ्यां प्रमुखे तौ वनौकसौ ।
एवं वाग्विषमुत्सृज्य तावुभौ मल्लपुङ्गवौ । अनुज्ञातौ नरेन्द्रेण स्वगृहं प्रतिजग्मतुः ।
महामात्रं ततः कंसो बभाषे हस्तिजीविनं । हस्ती कुवलयापीडः समाजद्वारि तिष्ठतु ।

बलवान्मदलोलश्च चपलः क्रोधनो नृषु । दन्तोत्कटकटस्तब्धः प्रतिवारणवारणः ।
स सन्नोदयितव्यस्ते तावुद्दिश्य वनौकसौ । वसुदेवसुतौ गोपौ यथा स्यातां गतासुषौ ।
त्वया चैव गजेन्द्रेण यदि तौ गोषु जीविनौ । भवेतां घातितौ रङ्गे न पश्येयं मदोत्कटौ । ४५५५
ततस्तौ पातितौ दृष्ट्वा वसुदेवः सबान्धवः । छिन्नमूलो निरालम्बः सभार्य्यो विनशिष्यति ।
ये चेमे यादवा मूर्खाः सर्व्वे कृष्णपरायणाः । ते नशिष्यन्ति छिन्नाशा दृष्ट्वा कृष्णं निपातितं ।
एतौ हत्वा गजेन्द्रेण मल्लैर्व्वा स्वयमेव वा । पुरीं निर्यादवां कृत्वा विचरिष्याम्यहं सुखी ।
पिताऽपि मे परित्यक्तो यादवानां कुलोद्वहः । प्रेषाश्च मे परित्यक्ता यादवा कृष्णपक्षिणः ।
न चाहमुग्रसेनेन जातः किल सुतार्थिना । मानुषेणाल्पवीर्य्येण यथा मामाह नारदः । ४५६०
॥ महामात्र उवाच ॥ कथमुक्तं नारदेन राजन् देवर्षिणा पुरा । आश्चर्य्यमेतत् कथितं त्वत्तः श्रुतमरिन्दम ।
कथमन्येन जातस्त्वमुग्रसेनात् पितुर्विना । तव माता कथं राजन् कृतं कर्म्मेदमीदृशं ।
अन्याऽपि प्राकृता नारी न कुर्य्यात्तु जुगुप्सितं । विस्तरं श्रोतुमिच्छामि अत्र कौतूहलं हि मे ।
॥ कंस उवाच ॥ यथा कथितवान्विप्रो महर्षिर्नारदः प्रभुः । तथाऽहं सम्प्रवक्ष्यामि यदि ते श्रवणे मतिः ।
आगतः शक्रसदनात् स वै ब्रह्मसखो मुनिः । चन्द्रांशुशुक्लवसनो जटामण्डलमुद्वहन् । ४५६५
कृष्णाजिनोत्तरीयेण रुक्मयज्ञोपवीतवान् । दण्डी कमण्डलुधरः प्रजापतिरिवापरः ।
गाता चतुर्णां वेदानां विद्वान् गन्धर्व्ववेदवित् । स नारदोऽथ देवर्षिर्ब्रह्मलोकचरोऽव्ययः ।
तमागतमृषिं दृष्ट्वा पूजयित्वा यथाविधि । पाद्यार्घमासनं दत्त्वा सम्प्रवेश्योपविश्य च ।
सुखोपविष्टोऽथ मुनिः पृष्ट्वा च कुशलं मम । उवाच मां प्रीतमना देवर्षिर्भावितात्मवान् ।
पूजितोऽहं त्वया वीर विधिदृष्टेन कर्म्मणा । इदमेकं मम वचः श्रूयतां प्रतिगृह्यतां । ४५७०
गतोऽहं देवसदनं सौवर्णं मेरुपर्व्वतं । सोऽहं कदाचिद्देवानां समाजे मेरुमूर्द्धनि ।
तत्र मन्त्रयतामेवं देवतानां मया श्रुतः । भवतः सानुगस्येह वधोपायः सुदारुणः ।
तत्रैष देवकीगर्भो विष्णुर्लोकनमस्कृतः । योऽस्या गर्भोऽष्टमः कंस स ते मृत्युर्भविष्यति ।
देवानां स तु सर्व्वस्वं त्रिदिवस्य गतिश्च सः । परं रहस्यं देवानां स ते मृत्युर्भविष्यति ।
यत्नश्च क्रियतां कंस गर्भाणां पातनं प्रति । नावज्ञा रिपवे कार्य्या दुर्ब्बले स्वजनेऽपि वा । ४५७५
न चायमुग्रसेनस्तु पिता तव महाबल । द्रुमिलो नाम तेजस्वी सौभस्य पतिरूर्ज्जितः ।
श्रुत्वाऽहं तद्वचस्तस्य किञ्चिद्रोषसमन्वितः । भूयोऽपृच्छं कथं ब्रह्मन् द्रुमिलो नाम दानवः ।
मम मात्रा कथं तस्य ब्रूहि विप्र समागमः । एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधन ।
॥ नारद उवाच ॥ हन्त ते वर्त्तयिष्यामि शृणु राजन् यथार्थतः । द्रुमिलस्य च मात्रा ते संवादश्च समागमं ।
सुयामुनं नाम गिरिं तव माता रजस्वला । प्रेक्षितुं सहिता स्त्रीभिर्गता वन कुतूहलात् । ४५८०
सा तत्र रमणीयेषु रुचिरद्रुमसानुषु । चचार नगशृङ्गेषु कन्दरेषु नदीषु च ।
किन्नरोद्गीतमधुराः प्रतिश्रुत्याऽभिनन्दिताः । शृण्वती कामजननीर्व्वाचः श्रोत्रसुखावहाः ।

वर्हिणाञ्चैव विरुतं खगानाञ्च विकूजितं । अभीक्ष्णमभिहृष्यन्ती श्रोत्रयोः सा न्यरोचयत् ।
एतस्मिन्नन्तरे वायुर्वनराजिविनिःसृतः । ववौ कुसुमगन्धाढ्यो वनी मन्मथबोधनः ।
द्विरेफाभरणाश्चैव कदम्बा वायुघट्टिताः । मुमुचुर्गन्धमधिकं सन्ततासारमूर्च्छिताः । ८५८५
केसराः पुष्पवर्षैश्च वहन्तुन्मादबोधनाः । नीपा दीपा इवाभान्ति पुष्पकर्णिकधारिणः ।
मही नवतृणच्छन्ना शक्रगोपविभूषिता । यौवनस्थेव वनिता सन्धारार्त्तं वपुः ।
अथ सौभपतिः श्रीमान् द्रुमिलो नाम दानवः । भविष्यद्दैवयोगेन विधात्रा यच्च नीयते ।
कामगेन रथेनाशु तरुणादित्यवर्चसा । यदृच्छया गतस्तत्र सुयामुनदिदृक्षया ।
विहायसा कामगमो मनसोऽप्याशुगामिना । स तं प्राप्य पर्व्वतेन्द्रं ह्यवतीर्य्य रथोत्तमात् । ८५९०
पर्व्वतोपवने न्यस्य रथं पररथारुजः । उभौ तौ सूतसहितौ चेरतुर्नगमूर्द्धनि ।
ततो बहून्यपश्येतां काननानि वनानि च । सर्व्वर्त्तुगुणसम्पन्ने नन्दनस्येव कानने ।
चेरतुर्नगशृङ्गेषु कन्दरेषु नदीषु च । नानाधातुपिनद्धैश्च शृङ्गैर्व्वहुभिरुच्छ्रितैः ।
नानावर्णैर्विचित्रैश्च काञ्चनाञ्जनराजतैः । नानाकुसुमगन्धाढ्यां नानासत्त्वगणैर्युताम् ।
नानाद्विजगणाद्युष्टां नानापुष्पफलद्रुमाम् । नानौषधिसमायुक्तामृषिसिद्धानुसेविताम् । ८५९५
विद्याधरान् किम्पुरुषानृक्षवानरराक्षसान् । सिंहान् व्याघ्रान् वराहांश्च महिषाञ्छरभान्गजान् ।
सृमरांश्चमरान्कृष्णान्मातङ्गान् यक्षराक्षसान् । एवं बहुविधान् पश्यंश्चरमाणो नगोत्तमं ।
दूराद्ददर्श नृपतिर्देवीं सुरसुतोपमां । क्रीडमानां सखीभिश्च पुष्पाण्येव प्रचिन्वतीं ।
ततश्चरन्तीं सुश्रोणीं सखीभिः सह संवृतां । दृष्ट्वा सौभपतिर्दूराद्विस्मयन् सूतमब्रवीत् ।
कस्येयं मृगशावाक्षी वनान्तरविचारिणी । रूपौदार्य्यगुणोपेता मन्मथस्य रतिर्यथा । ८६००
शचीव पुरुहूतस्य उताहो वा तिलोत्तमा । नारायणोरुं निर्भिद्य सम्भूता वरवर्णिनी ।
ऐलस्य दयिता देवी योषिद्रत्नं किमुर्व्वशी । क्षीरार्णवे मथ्यमाने सुरासुरगणैः सह ।
मन्थानं मन्दरं कृत्वा अमृतार्थेति नः श्रुतं । ततोऽमृतात् समुत्पन्ना देवी श्रीर्लोकभाविनी ।
नारायणाङ्कललिता किं श्रीरेषा वराङ्गना । नीलमेघान्तरगता द्योतन्तीवाचिरप्रभा ।
तथा योषिद्गणान्मध्ये रूपं प्रद्योतयद्वनं । अतीव सुकुमाराङ्गी सुप्रभेन्दुनिभानना । ८६०५
दृष्ट्वा रूपमनिन्द्याङ्ग्या विभ्रान्तो व्याकुलेन्द्रियः । कामस्य वशमापन्नो मनो विक्लवतीव मे ।
स्वयं कृन्तन्ति मेऽङ्गानि कुसुमायुधसायकाः । भित्त्वा हृदि शराः पञ्च निर्द्दहन्तीव मे तनुं ।
इच्छयाग्निर्व्वर्द्धयति प्राज्यसिक्त इवानलः । कथमस्य भवेत् कार्य्यं प्रमाथि मन्मथाग्निना ।
केनोपायेन किं कुर्म्मः भजेन्मां मत्तकामिनी । एवं बहुंश्चिन्तयानो नोपलभ्य च दानवः ।
सूतमाह मुहूर्त्तं त्वं तिष्ठ स्थैरमिहानघ । अहं यास्यामि तां द्रष्टुं काचेयमिति सुन्दरी । ८६१०
प्रतीक्षमाणस्तिष्ठस्व यावदागमनं मम । श्रुत्वा तु वचनं सूतस्तथाऽस्त्विति च सोऽब्रवीत् ।
एवमुक्त्वा दानवेन्द्रो गमनाय मनो दधे । इच्छयाविद्धहृदयो दृष्ट्वा तामसितेक्षणां ।

वार्य्युपस्पृश्य बलवान् ध्यानेनैवान्वचिन्तयत् । मुहूर्त्तं ध्यानमात्रे तु दृष्टं ज्ञानबलात्ततः ।
उग्रसेनस्य पत्नीति ज्ञात्वा हर्षमवाप सः । उग्रसेनस्य वै रूपं कृत्वा स्वं परिवर्त्य च ।
उपासर्पन्महाबाहुः प्रसभं दानवेश्वरः । स्मयमानश्च शनकैस्तामाहामितवीर्य्यवान् । ४८१५
उग्रसेनस्य रूपेण मातरं ते व्यधर्षयत् । सा पतिस्निग्धहृदया भावेनोपससर्प तं ।
शङ्किता चाभवत् पश्चात्तस्य गौरवदर्शनात् । सा तमाहोत्थिता भीता न त्वं मम पतिर्ध्रुवं ।
कस्य त्वं विकृताचारो येनास्मि मलिनीकृता । एकपत्नीव्रतमिदं मम संदूषितं त्वया ।
पत्युर्मे रूपमास्थाय नीच नीचेन कर्म्मणा । किं मां वक्ष्यन्ति रुषिता बान्धवाः कुलपांसनीं ।
जुगुप्सिता च वत्स्यामि पतिपक्षैर्निराकृता । धिक् त्वामीदृशमत्यन्तं दुष्कुलं व्युत्थितेन्द्रियं । ४८२०
अविश्वास्यमनार्य्यञ्च परदाराभिमर्षणं । स तामाह प्रसज्जन्तीं क्षिप्रः क्रोधेन दानवः ।
अहं वै द्रुमिलो नाम सौभस्य पतिरूर्ज्जितः । किं मां क्षिपसि रोषेण मूढे पण्डितमानिनि ।
मानुषं पतिमाश्रित्य नीचं मृत्युवशे स्थितं । व्यभिचाराश्च दुष्यन्ति स्त्रियः स्त्रीमानगर्व्विते ।
न ह्यासां नियता बुद्धिर्म्मानुषीणां विशेषतः । श्रूयन्ते हि स्त्रियो बह्व्यो व्यभिचारव्यतिक्रमैः ।
प्रसूता देवसदृशान् पुत्रानमितविक्रमान् । अतीव हि त्वं स्त्रीलोके पतिधर्म्मरता सती । ४८२५
प्रगृह्य केशान् विधुन्वन्ती भाषसे यद्यदिच्छसि । कस्य त्वमिति यच्चाहं त्वयोक्तो मत्तकाशिनि ।
कंसस्तस्माद्रिपुध्वंसी तव पुत्रो भविष्यति । सा सरोषा पुनर्भूत्वा निन्दन्ती तस्य तं वरं ।
उवाच व्यथिता देवी दानवं दुष्टवादिनं । धिक् ते वृत्तं सुदुर्वृत्त यः सर्व्वा निन्दसि स्त्रियः ।
सन्ति स्त्रियो नीचवृत्ताः सन्ति चैव पतिव्रताः । यास्त्वेकपत्न्यः श्रूयन्ते ऽरुन्धतीप्रमुखाः स्त्रियः ।
याभिर्धृताः प्रजाः सर्व्वा लोकाश्चैव कुलाधम । यस्त्वया मम पुत्रो वै दत्तो वृत्तविनाशनः । ४८३०
न मे बहुमतस्त्वेष शृणु चापि यदुच्यसे । उत्पत्स्यति पुमान्नीच पतिवंशे ममाव्ययः ।
भविष्यति स ते मृत्युर्यश्च दत्तस्त्वया सुतः । द्रुमिलस्त्वेवमुक्तस्तु जगामाकाशमेव तु ।
तेनैव रथमुख्येन दिव्येनाकाशगामिना । जगाम च पुरीं दीना माता तदहरेव ते ।
स एवमुक्त्वा भगवान्नारदो मुनिसत्तमः । दीप्यमानस्तपोवीर्य्यात् साक्षादग्निरिव ज्वलन् ।
वल्लकीवाद्यमातन्वन् सप्तस्वरविमूर्च्छनात् । गायनो लब्धशोभोऽथ जगाम ब्रह्मणोऽन्तिकं । ४८३५
शृणुष्वेदं महामात्र निबोध वचनं मम । तथ्यञ्चोक्तं नारदेन त्रैकाल्यज्ञेन धीमता ।
अहं बलेन वीर्य्येण मदेन च नयेन च । प्रभावेणैव शौर्य्येण तेजसा विक्रमेण च ।
सत्येन चैव दानेन नान्योऽस्ति सदृशः पुमान् । विदित्वा सर्व्वमात्मानं वचनं श्रद्दधाम्यहं ।
त्यक्तोऽहं सुतस्त्वेवमुग्रसेनस्य हस्तिप । मातापितृभ्यां सन्त्यक्तः स्थितोऽहं स्वेन तेजसा ।
उभाभ्याञ्चैव विद्विष्टो बान्धवैश्च विशेषतः । एतानपि हनिष्यामि हत्वा वनचरावुभौ । ४८४०
तद्गच्छ गजमारुह्य चाङ्कुशप्रासतोमरः । स्थिरो भव महामात्र समाजद्वारि माचिरं ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि कंसवाक्ये पञ्चाशीतोऽध्यायः ॥ ८५ ॥

॥ वैशम्पायन उवाच ॥ तस्मिन्नहनि निर्वृत्ते द्वितीये समुपस्थिते। आपूर्यत महारङ्गः पौरैर्युद्धदिदृक्षुभिः।
स चित्राष्टास्रिचरणः सार्गलद्वारवेदिकः। सगवाक्षार्द्धचन्द्रश्च स तलोत्तमभूषितः।
प्राङ्मुखैश्चारुनिर्मुक्तैर्माल्यदामावतंसितैः। अलङ्कृतैर्विराजद्भिः शारदैरिव तोयदैः।
मञ्चागारैः सुनिर्युक्तैर्युद्धार्थे सुविभूषितैः। समाजवाटः शुशुभे समेघौघ इवार्णवः। ४६४५
स्वकर्मद्रव्ययुक्ताभिः पताकाभिर्निरन्तरं। श्रेणीनाञ्च गणानाञ्च मञ्चा भान्त्यचलोपमाः।
अन्तःपुरगतानाञ्च प्रेक्षागाराण्यनेकशः। रेजुः काञ्चनचित्राणि रत्नज्वालाकुलानि च।
तानि रत्नौघकृप्तानि समानुप्रग्रहाणि च। रेजुर्जवनिकाक्षेपैः सपक्षा इव खे नगाः।
तत्र चामरहासैश्च भूषणानाञ्च शिञ्जितैः। मणीनाञ्च वरार्हाणां विचित्राश्चेतरर्चिषः।
गणिकानां पृथङ्मञ्चाः शुभैरास्तरणाम्बरैः। शोभिता वारमुख्याभिर्विमानप्रतिमौजसः। ४६५०
तत्रासनानि मुख्यानि पर्य्यङ्काश्च हिरण्मयाः। प्रकीर्णाश्च कुथाचित्राः सपुष्पस्तवकैर्वृताः।
सौवर्णाः पानकुम्भाश्च पानभूम्यश्च शोभिताः। फलावदंशपूर्णाश्च चाङ्गेर्य्यः पानयोजिताः।
अन्ये च मञ्चा बहवः काष्ठसञ्चयबन्धनाः। रेजुः प्रस्तरणास्तत्र शतशोऽथ सहस्रशः।
उत्तरागारिकाश्चान्ये सूक्ष्मजालावलोकिनः। स्त्रीणां प्रेक्षागृहा भान्ति राजहंसा इवाम्बरे।
प्राङ्मुखश्चारुनिर्युक्तो मेरुशृङ्गसमप्रभः। रुक्मारत्नविभस्तम्भश्चारुनिर्य्यूहशोभितः। ४६५५
प्रेक्षागारः स कंसस्य प्रचकाशेऽधिकं श्रिया। शोभितो माल्यदामौघैर्निवासकृतलक्षणः।
तस्मिन्नानाजनाकीर्णे जनौघप्रतिनादिते। समाजवाटे संरब्धे कम्पमानार्णवप्रभे।
राज्ञा कुवलयापीडः समाजद्वारि कुञ्जरः। तिष्ठत्विति समाज्ञाप्य प्रेक्षागारमुपाययौ।
स शुक्ले वाससी बिभ्रच्छुक्लव्यजनचामरः। शुशुभे श्वेतमुकुटः श्वेताभ्रेष्विव चन्द्रमाः।
तस्य सिंहासनस्थस्य सुखासीनस्य धीमतः। रूपमप्रतिमं दृष्ट्वा पौराः प्रोचुर्जयाशिषः। ४६६०
ततः प्रविविशुर्मल्ला रङ्गमावल्गिताम्बराः। तिस्रश्च भागशः कक्षाः प्रविश्य बलशालिनः।
ततस्तूर्य्यनिनादेन क्ष्वेडितास्फोटितेन च। वसुदेवसुतौ हृष्टौ रङ्गद्वारमुपस्थितौ।
तावापतन्तौ त्वरितौ प्रतिषिद्धौ वराननौ। तेन मत्तेन नागेन चोद्यमानेन वै भृशं।
स मत्तहस्ती दुष्टात्मा कृत्वा कुण्डलिनं करं। चकार चोदितो यत्नं निहन्तुं वसुदेवजौ।
ततः प्रहसितः कृष्णस्त्रास्यमानो गजेन वै। कंसस्य तन्मतं चैव जगर्हे सुदुरात्मनः। ४६६५
त्वरते खलु कंसोऽयं गन्तुं वैवस्वतक्षयं। यो मामनेन नागेन प्रधर्षयितुमिच्छति।
सन्निकृष्टे ततो नागे गर्ज्जमाने यथा घने। सहसोत्पत्य गोविन्दश्चक्रे तालस्वनं प्रभुः।
क्ष्वेडितास्फोटितरवं कृत्वा नागस्य सोऽग्रतः। करं सशीकरं तस्य प्रतिजग्राह वक्षसा।
विषाणान्तरगो भूत्वा पुनश्चरणमध्यगः। बबाधे तं गजं कृष्णः पवनस्तोयदं यथा।
स हस्ताग्राद्विनिष्क्रान्तो विषाणाग्राच्च दन्तिनः। विमुक्तः पादमध्याच्च कृष्णो द्विपमयोधयत्। ४६७०
सोऽतिकायस्तु संमूढो हन्तुं कृष्णमशक्नुवन्। गजः स्विद्यते गात्रेषु मथ्यमानो ररास च।

पपात भूमौ जानुभ्यां दशनाभ्यां तुतोद च । मदं सुस्राव रोषाच्च घर्म्मापाये यथा घनः ।
कृष्णस्तु तेन नागेन क्रीडित्वा शिशुलीलया । निधनाय मतिञ्चक्रे कंसद्विष्टेन चेतसा ।
स तस्य प्रमुखे पादं कृत्वा कुम्भान्तरं । दोर्भ्यां विषाणमुत्पाट्य तेनैव प्राहरत्तदा ।
स तेन वज्रकल्पेन स्वेन दन्तेन कुञ्जरः । हन्यमानः शकृन्मूत्रं मुमोचार्त्तो रराम ह । ४८७५
कृष्णजर्ज्जरिताङ्गस्य कुञ्जरस्यार्त्तचेतसः । कटाभ्यामति सुस्राव वेगवद्भूरि शोणितं ।
लाङ्गूलञ्चास्य वेगेन निष्कर्ष हलायुधः । शैलपृष्ठार्द्धसंलीनं वैनतेय इवोरगं ।
तेनैव गजदन्तेन कृष्णो हत्वा तु कुञ्जरं । जघानैकप्रहारेण गजारोहणमुल्वणं ।
सोऽर्त्तनादं महत् कृत्वा विदन्तो दन्तिनाम्वरः । पपात समहामात्रो वज्रभिन्न इवाचलः ।
ततस्तौ तु गजाङ्गानि प्रगृह्य रणकर्कशौ । गजस्य पादरक्षांश्च जघ्नतुः पुरुषर्षभौ । ४८८०
तांश्च हत्वा विविशतुर्मध्यं रङ्गस्य तावुभौ । नासत्यावश्विनौ स्वर्गादवतीर्णाविवेच्छया ।
वृष्णयन्धकाश्च भोजाश्च ददृशुर्व्वनमालिनौ । क्ष्वेडितोत्कृष्टनादेन बाहुरास्फोटितेन च ।
सिंहनादैश्च तालैश्च हर्षयामासतुर्ज्जनं । तौ दृष्ट्वा भोजराजस्तु विषसाद कृशामतिः ।
पौराणामनुरागश्च हर्षश्चासञ्च भारत । तं हत्वा पुण्डरीकाक्षो मदन्तं दन्तिनाम्वरं ।
अवतीर्णोऽर्णवाकारं समाजं सह पूर्व्वजः । ४८८५

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि कुवलयापीडवधे षडशीतोऽध्यायः ॥ ८६ ॥

॥ वैशम्पायन उवाच ॥ प्रविशन्तन्तु वेगेन मारुतावलितांम्वरं । पूर्व्वजं पुरतः कृत्वा कृष्णं कमललोचनं ।
गजदन्तकृतोत्संव सभुजं देवकीसुतं । लीलाकृताङ्गदं वीरं मदेन रुधिरेण च ।
वल्गमानं यथा सिंहं व्यूहमानं यथा घनं । बाहुशब्दप्रहारेण चालयन्तं वसुन्धरां ।
औग्रसेनिः समालोक्य दन्तिदन्तोद्यतायुधं । कृष्णं भृशायतमुखः सरोषं समुदैक्षत ।
भुजासक्तेन शुशुभे गजदन्तेन केशवः । चन्द्रार्द्धविम्वसंसक्तो यथैकशिखरो गिरिः । ४८९०
वल्गमाने तु गोविन्दे स कृत्स्नो रङ्गसागरः । जनौघप्रतिनादेन पूर्य्यमाण इवावभौ ।
ततः क्रोधानिताम्राक्षः कंसः परमकोपनः । चाणूरमादिशद्युद्धे कृष्णस्य सुमहावलं ।
अन्ध्रमल्लञ्च निर्क्रान्तं मुष्टिकञ्च महावलं । वलदेवाय सक्रोधो दिदेशाद्रिचयोपमं ।
कंसेनापि समाज्ञप्तश्चाणूरः पूर्व्वमेव तु । योद्धव्यं सह कृष्णेन त्वया यत्नवतेति वै ।
स रोषेण तु चाणूरः कषायीकृतलोचनः । अभ्यवर्त्तत युद्धार्थमपां पूर्णो यथा घनः । ४८९५
अवघुष्टे समाजे तु निःशब्दस्तिमिते जने । यादवास्तत्र सहिता इदं वचनमब्रुवन् ।
वाहुयुद्धमिदं रङ्गे समाश्रितमकातरं । क्रियावलसमाज्ञातमशस्त्रं निर्म्मितं पुरा ।
अङ्गिरसापि श्रमो नित्यं विनेयः कालदर्शिभिः । करीषेण च मल्लस्य सततं सत्क्रिया स्मृता ।
स्थितो भूमिगतश्चैव यो यथामार्गतः स्थितः । नियुध्यतस्य पर्य्यायः प्राश्निकैः समुदाहृतः ।
बालो वा यदि वा मध्यः कृशो वा स्थविरोऽपि वा । वलस्थो वा स्थितो रङ्गे ज्ञेयः कक्षान्तरेण वै । ४९००

बलतश्च क्रियातश्च बाहुयुद्धविधिर्युधि। निपातानन्तरं किञ्चिन्न कर्त्तव्यं कदाचन।
तदिदं प्रस्तुतं रङ्गे युद्धं कृष्णान्ध्रमल्लयोः। बालः कृष्णो महानन्ध्रः कथं न स्याद्विचारणा।
ततः किलकिलाशब्दः समाजे समवर्त्तत। प्रावल्गत च गोविन्दो वाक्यञ्चेदमुवाच ह।
अहं बालो महानन्ध्रो वपुषा पर्व्वतोपमः। युद्धं ममानेन सह रोचते बाहुशालिना।
युद्धव्यतिक्रमः कश्चिन्न भविष्यति मत्कृतः। न ह्यहं बाहुयोधानां दूषयिष्यामि यन्मतं। ४७०५
योऽयं करीषधर्म्मश्च तोयधर्म्मश्च रङ्गजः। कषायस्य च संसर्गः समयो ह्येष कल्पितः।
संयमः स्थिरता शौर्य्यं व्यायामः सत्क्रिया बलं। रङ्गे च नियता सिद्धिरेतद्युद्धविदां मतं।
यदयं बाहुयुद्धं वै सवैरं कर्त्तुमुद्यतः। अत्र वै निग्रहः कार्य्यस्तोषयिष्याम्यहं जगत्।
करूषेषु प्रसूतोऽयं चाणूरो नाम नामतः। बाहुयोधी शरीरेण कर्म्मभिश्चाप्य चिन्त्यतां।
एतेन बहवो मल्ला निपातानन्तरं हताः। रङ्गप्रतापकामेन मल्लमार्गश्च दूषितः। ४७१०
शस्त्रसिद्धिश्च योधानां संग्रामे शस्त्रयोधिनां। रङ्गे सिद्धिस्तु मल्लानां प्रतिमल्लनिपातजा।
रणे विजयमानस्य कीर्त्तिर्भवति शाश्वती। हतस्यापि रणे शस्त्रैर्नाकपृष्ठं विधीयते।
रणे ह्युभयतः सिद्धिर्हतस्येह हतोऽपि वा। सा हि प्राणान्तिकी यात्रा महद्भिः साधुपूजिता।
अयन्तु मार्गो बलतः क्रियातश्च विनिःसृतः। मृतस्य रङ्गे कः स्वर्गो जयतो वा कुतो रतिः।
ये तु केचित् स्वदोषेण राज्ञः पण्डितमानिनः। प्रतापार्थे हता मल्ला मल्लहन्तुर्बधो हि सः। ४७१५
एवं सञ्जल्पतस्तस्य ताभ्यां युद्धं सुदारुणं। उभाभ्यामभवद्घोरं वारणाभ्यां यथा वने।
कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सकङ्कटैः। सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा।
तावुभावपि संश्लिष्टौ यथा शैलमयौ तथा। क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिःस्वनैः।
कीलैर्व्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च। शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः।
जानुभिश्चाश्मनिर्घोषैः शिरोभ्याञ्चावघट्टितैः। तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा। ४७२०
बाहुप्राणेन शूराणां समाजोत्सवसन्निधौ। अरज्यत जनः सर्व्वः सोत्कुष्टनिनदोत्थितः।
साधुवादांश्च मञ्चेषु घोषयन्त्यपरे जनाः। ततः प्रस्विन्नवदनः कृष्णप्रणिहितेक्षणः।
न्यवारयत तूर्य्याणि कंसः सव्येन पाणिना। प्रतिषिद्धेषु तूर्य्येषु मृदङ्गादिषु तेषु वै।
खे सङ्गतान्यवाद्यन्त देवतूर्य्याण्यनेकशः। युध्यमाने हृषीकेशे पुण्डरीकनिभेक्षणे।
स्वयमेव प्रवाद्यन्त तूर्य्यघोषास्तु सर्व्वशः। अन्तर्द्धानगता देवा विमानैः कामरूपिणः। ४७२५
खेचरैर्व्विद्याधरैः सार्द्धं कृष्णस्य जयकाङ्क्षिणः। जयस्व कृष्ण चाणूरं दानवं मल्लरूपिणं।
इति सप्तर्षयः सर्व्वे ऊचुश्चैव नभोगताः। चाणूरेण चिरं कालं क्रीडित्वा देवकीसुतः।
बलमाहारयामास कंसस्याभावदर्शिवान्। ततश्चचाल वसुधा मञ्चाश्चैव जुघूर्णिरे।
मुकुटाच्चापि कंसस्य पपात मणिरुत्तमः। दोर्भ्यामानम्य कृष्णस्तु चाणूरं पूर्णजीवितं।
प्राहरन्मुष्टिना मूर्द्ध्नि वक्षस्याहत्य जानुना। निःसृते साश्रुरुधिरे तस्य नेत्रे सबन्धने। ४७३०

तापनीयं यथा घण्टं कक्षोपरि विलम्बिते । पपात स तुरङ्गस्य मध्ये निःसृतलोचनः ।
चाणूरो विगतप्राणो जीवितान्ते महीतले । देहेन तस्य मल्लस्य चाणूरस्य गतायुषः ।
सन्निरुद्धो महारङ्गः स शैलेनेव लक्ष्यते । रौहिणेयो हते तस्मिंश्चाणूरे बलदर्पिते ।
जग्राह मुष्टिकं रङ्गे कृष्णस्तोषलकं पुनः । सन्निपाते तु तौ मल्लौ प्रथमे क्रोधमूर्च्छितौ ।
समेयातां रामकृष्णौ कालस्य वशवर्त्तिनौ । निर्घातावमतौ भूत्वा रङ्गमध्ये ववल्गतुः ।
कृष्णस्तोषलमुद्यम्य गिरिकूटोपमं बली । भ्रामयित्वा शतगुणं निष्पिपेष महीतले ।
तस्य कृष्णाभिपन्नस्य पीडितस्य बलीयसः । मुखाद्रुधिरमत्यर्थमुज्जगाम मुमूर्षतः ।
सङ्कर्षणस्तु सुचिरं योधयित्वा महाबलः । अन्ध्रमल्लं महामल्लो मण्डलानि व्यदर्शयत् ।
मुष्टिनैकेन तेजस्वी साशनिस्तनयित्नुना । शिरस्यभ्यहनद्वीरो वज्रेणेव महागिरिं ।
स निष्पतितमस्तिष्को विस्रस्तनयनाननः । पपात निहतस्तेन ततो नादो महानभूत् ।
अन्ध्रतोषलकौ हत्वा कृष्णसङ्कर्षणावुभौ । क्रोधसंरक्तनयनौ रङ्गमध्ये ववल्गतुः ।
समाजवाटो निर्मल्लः सोऽभवद्भीमदर्शनः । अन्ध्रे तदा महामल्ले मुष्टिके च निपातिते ।
ये च सम्प्रेक्षका गोपा नन्दगोपपुरोगमाः । भयक्षोभितसर्व्वाङ्गाः सर्व्वे तत्रावतस्थिरे ।
हर्षजं वारि नेत्राभ्यां वर्षमाणा प्रवेपती । प्रस्नवोत्पीडिता कृष्णं देवकी समुदैक्षत ।
कृष्णदर्शनमुक्तेन वाष्पेणाकुलितेक्षणः । वसुदेवो जरां त्यक्त्वा स्नेहेन तरुणायते ।
वारमुख्याश्च ताः सर्व्वाः कृष्णस्य मुखपङ्कजं । पपुर्हि नेत्रभ्रमरैर्निमिषान्तरगामिभिः ।
कंसस्याथ मुखस्वेदो भ्रूभेदाम्बरगोचरः । अवभङ्गरोषनिश्वासः कृष्णसन्दर्शनेरितः ।
केशवायामधूमेन रोषनिश्वासवाहिना । दीप्तमन्तर्गतं तस्य हृदयं मानसाग्निना ।
तस्य प्रस्फुरितोष्ठस्य स्विन्नालिकतलस्य वै । कंसवक्त्रस्य रोषेण रक्तसूर्य्यायते वपुः ।
क्रोधरक्तान्मुखात्तस्य प्रसृताः स्वेदबिन्दवः । यथा रविकरस्पृष्टा तुषारावश्यायबिन्दवः ।
सोऽज्ञापयत संक्रुद्धः पुरुषान् व्यायतान् बहून् । गोपाविमौ समाजौघान्निष्क्राम्येतां वनेचरौ ।
नैवैतौ द्रष्टुमिच्छामि विकृतौ पापदर्शनौ । गोपानामपि मे राज्ये न कश्चित् स्यातुमर्हति ।
नन्दगोपश्च दुर्म्मेधाः पापेष्वभिरतो मम । आयसैर्निगडाकारैर्लोहपाशैर्निरुध्यतां ।
वसुदेवश्च दुर्वृत्तो नित्यमकृत्यकरो मम । अवृद्धार्हेण दण्डेन क्षिप्रमद्यैव शास्यतां ।
ये चेमे प्राकृता गोपा दामोदरपरायणाः । ह्रियन्तां गाव एतेषां यच्चास्ति वसु किञ्चन ।
एवमाज्ञापयानं तं कंसं परुषभाषिणं । ददर्शायतनयनः कृष्णः सत्यपराक्रमः ।
क्षिप्ते पितरि चुक्रोध नन्दगोपे च केशवः । ज्ञातीनाञ्च व्यथां दृष्ट्वा विसंज्ञाञ्चैव देवकीं ।
स सिंह इव वेगेन केशवो जातविक्रमः । आरुरुक्षुर्महाबाहुः कंसमाशार्य्यमच्युतः ।
रङ्गमध्यादुत्पपात कृष्णः कंसासनान्तिके । असज्जद्वायुनाक्षिप्तो यथा खस्थो घनाघनः ।
ददृशुर्न हि तं सर्व्वे रङ्गमध्यादवप्लुतं । केवलं कंसपार्श्वस्थं ददृशुः पुरवासिनः ।

सोऽपि कंसस्तदायस्तः परीतः कालधर्म्मणा। आकाशादिव गोविन्दं मेने तत्रागतं विभुं।
स कृष्णेनायतं कृत्वा बाहुं परिघसन्निभं। मूर्द्धजेषु परामृष्टः कंसो वै रङ्गसंसदि।
मुकुटश्चापतत्तस्य काञ्चनो वज्रभूषितः। शिरसस्तच्च कृष्णेन परामृष्टस्य पाणिना।
स हस्तग्रस्तकेशस्तु कंसो निर्य्यत्नतां गतः। तथैव च विसंमूढो विक्लवः समपद्यत।
निग्टहीतस्य केशेषु गतासुरिव निःश्वसन्। न शशाक मुखं द्रष्टुं कंसः कृष्णस्य वै तदा। ४०६५
विकुण्डलाभ्यां कर्णाभ्यां छिन्नहारेण वक्षसा। प्रलम्बाभ्याञ्च बाहुभ्यां गात्रैर्व्विस्रस्तभूषणैः।
भ्रंसितेनोत्तरीयेण सहसा चलिताननः। चेष्टमानः समाक्षिप्तः कंसः कृष्णेन तेजसा।
चकर्ष च महारङ्गे मञ्चान्निष्क्रम्य केशवः। केशेषु तं बलात्कृष्य कंसं क्रोशार्द्दिताननं।
कृष्यमाणः स कृष्णेन भोजराजो महाद्युतिः। समाजवाटे परिखां देहकृष्टाञ्चकार ह।
समाजवाटे विक्रोश्य विकृष्य च गतायुषं। कृष्णो विसर्ज्जयामास कंसदेहमदूरतः। ४०७०
धरण्यां मृदितः शिश्ये कंसदेहः सुखोचितः। क्रमेण विपरीतेन पांशुभिः परुषीकृतः।
तस्य तद्वदनं श्यामं सुप्ताक्षं मुकुटं विना। न विभाति विपर्य्यस्तं विपलाशं यथाऽम्बुजं।
असंग्रामे हतः कंसः स वीरैरपरिक्षतः। कण्ठग्रहाभिरस्तासुर्व्वीरमार्गान्निराकृतः।
तस्य देहे प्रकाशन्ते सहसा केशवार्पिताः। मांसच्छेदघनाः सर्व्वे नखाग्रा जीवितच्छिदः।
तं हत्वा पुण्डरीकाक्षः प्रहर्षाद्द्विगुणप्रभः। ववन्दे वसुदेवस्य पादौ निहतकण्टकः। ४०७५
मातुश्च शिरसा पादौ निपीड्य यदुनन्दनः। साऽसिञ्चत् प्रस्रवोत्पीडैः कृष्णमानन्दनिःसृतैः।
यादवांश्चैव तान् सर्व्वान् यथास्थानं यथावयः। पप्रच्छ कुशलं कृष्णो दीप्यमानः स्वतेजसा।
बलदेवोऽपि धर्म्मात्मा कंसभ्रातरमूर्च्छितं। बाहुभ्यामेव तरसा सुनामानमपोथयत्।
तौ जितारी जितक्रोधौ चिरविप्रोषितौ व्रजे। स्वपितुर्भवनं वीरौ जग्मतुर्हृष्टमानसौ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि कंसवधे सप्ताशीतोऽध्यायः॥ ८७॥
॥ वैशम्पायन उवाच॥ भर्त्तारं पतितं दृष्ट्वा क्षीणपुण्यमिव ग्रहं। कंसपत्न्यो हतं कंसं समन्तात् पर्य्यवारयन्। ४०८०
तं महीशयने सुप्तं क्षितिनाथं गतायुषं। भार्य्याः स्म दृष्ट्वा क्रोशन्ति मृग्यो मृगपतिं यथा।
हा हताः स्म महाबाहो हताशा हतबान्धवाः। वीरपत्न्यो हते वीरे त्वयि वीरव्रतप्रिये।
इमामवस्थां पश्यन्त्यः पश्चिमां तव नैष्ठिकीं। कृपणं राजशार्द्दूल विलपामः सबान्धवाः।
छिन्नमूलाः स्म संवृत्ताः परित्यक्तास्त्वया विभो। त्वयि पञ्चत्वमापन्ने नार्य्योऽस्माकं महाबले।
को नः कोपपरीताङ्गी रतिसंसर्गलालसाः। लता इव विचेष्टन्तीः शयनीयानि नेष्यति। ४०८५
इदन्ते सदृशं सौम्य उष्णनिश्वाससमाहतं। दहत्यर्को मुखं कान्तं निस्तोयमिव पङ्कजं।
इमे ते श्रवणे शून्ये न शोभेते विकुण्डले। शिरोधरायां संलीने सततं कुण्डलप्रिय।
क्व ते स मुकुटो वीर सर्व्वरत्नविभूषितः। अत्यर्थं शिरसो लक्ष्मीं यो दधारार्कसप्रभः।
अनेन हि कलत्रेण त्वदन्तःपुरशोभिना। कथं दीनेन कर्त्तव्यं त्वयि लोकान्तरं गते।

ननु नाम स्त्रियः साध्व्यः प्रियभोगेष्ववस्थिताः । पतीनामपरित्याज्यास्त्वन्नु नस्त्यज्य गच्छसि ।
अहो कालो महावीर्य्यो येन पर्य्यायकर्म्मणा । कालतुल्यः सपत्नानां त्वं क्षिप्रमपनीयसे ।
वयं दुःखेष्वनुचिताः सुखेष्वेव त्वयैधिताः । कथन्नाम विधवा नाथ कथं कार्पण्यमाश्रिताः ।
स्त्रीणां चारित्रलुब्धानां पतिरेकः परा गतिः । त्वं हि नः सा गतिश्छिन्ना कृतान्तेन बलीयसा ।
वैधव्येनाभिभूताः स्म शोकसन्तापमागताः । अहो कृतान्तस्य वशं गन्तव्यं सर्व्वजन्तुभिः ।
रोदितव्ये भृशं मग्नाः क्व गच्छामस्त्वया विना । सह त्वया गतः कालस्त्वदर्थे क्रीडितं गतं ।
क्षणेनाद्य विहीनाः स्म अनित्या हि नृणां गतिः । अहो बत विपन्नाः स्म विपन्ने त्वयि मानद ।
एकदुष्कृतकारिण्यः सर्व्वा वैधव्यलक्षणाः । त्वया स्वर्गप्रतिच्छन्दे लालिताः स्म रतिप्रियाः ।
त्वयि कामवशाः सर्व्वाः स नस्त्यज्य क्व गच्छसि । अस्माकं त्वमनाथानां नाथो भव सुरोपम ।
आसां विलपमानानां कुररीणामिव प्रभो । प्रतिवाक्यं जगन्नाथ दातुमर्हसि मानद ।
एवमार्त्तकलत्रस्य शाम्यमानेषु बन्धुषु । गमनं ते महाराज दारुणं प्रतिभाति नः ।
नूनं कान्ततराः कान्त परलोके वरस्त्रियः । यतस्त्वं प्रस्थितो वीर विहायेमं गृहे जनं ।
किन्न ते करुणा वीर भार्य्यास्वेतासु भूरिषु । आर्त्तनादं वदन्तीषु यन्नेहायावबुध्यसे ।
अहो निष्करुणा यात्रा नराणामौर्द्धदेहिकी । यत् परित्यज्य दारान् स्वान्निरपेक्षा व्रजन्ति ह ।
अपतित्वं खलु श्रेयो न तु शूरः स्त्रियाः पतिः । स्वर्गस्त्रीणां प्रियाः शूरास्तेषामपि च ताः प्रियाः ।
अहो क्षिप्रमदृश्येन नयता त्वां रणप्रियं । प्रहृतं नः कृतान्तेन सर्व्वासामन्तरात्मसु ।
हत्वा जरासन्धबलं जित्वा यक्षांश्च संयुगे । कथं मानुषमात्रेण हतस्त्वं जगतीपते ।
इन्द्रेण सह गङ्गायां कृत्वा सायकविग्रहं । अमर्त्यैरजितो युद्धे मर्त्येनासि कथं हतः ।
त्वया सागरमक्षोभ्यं विक्षोभ्य शरवृष्टिभिः । रत्नसर्व्वस्वहरणं जित्वा पाशधरं कृतं ।
त्वया पौरजनस्यार्थे मन्दं वर्षति वासवे । सायकैर्ज्जलदान् भित्वा बलाद्वर्षं प्रवर्त्तितं ।
प्रतापावनताः सर्व्वे तव तिष्ठन्ति पार्थिवाः । प्रेषयन्तो वरार्हाणि रत्नान्याच्छादनानि च ।
तवैवं देवकल्पस्य दृष्टवीर्य्यस्य शत्रुभिः । कथं प्राणान्तिकं घोरमीदृशं भयमागतं ।
प्राप्ताः स्मो विधवाशब्दं त्वयि नाथे निपातिते । अप्रमत्ताः प्रमत्तेन कृतान्तेन निराकृताः ।
यद्येवं नाथ गन्तव्यं यदि वा विस्मृता वयं । वाङ्मात्रेणापि यामीति वक्तव्ये कः परिश्रमः ।
प्रसीद नाथ भीताः स्म पादौ ते याम मूर्द्धभिः । अलं दूरप्रवासेन निवर्त्त मथुराधिप ।
अहो वीर कथं शेषे निषण्णस्तृणपांशुषु । शयानस्य हि ते भूमौ कस्मान्नोद्विजते वपुः ।
केन मुष्टिप्रहारोऽयं दत्तोऽस्माकमतर्कितः । प्रहृतं केन सर्व्वासु नारीष्वेवं सुदारुणं ।
रुदितानुशयो भार्य्या जीवन्त्याः परिदेवनं । किं वयं सति गन्तव्ये सह भर्त्रा वदामहे ।
एतस्मिन्नन्तरे दीना कंसमाता प्रवेपती । क्व मे वत्सः क्व मे पुत्र इति रोरुदती भृशं ।
साऽपश्यन्निहतं पुत्रं निष्प्रभं शशिनं यथा । हृदयेनावदीर्णेन आस्यमाना पुनः पुनः ।

पुत्रं समभिवीक्षन्ती सा हताऽसीति वादिनी । कुर्वाणा मार्त्तनादेन विललाप रुरोद च । ४८२०
सा तस्य वदनं दीनमुत्सङ्गे पुत्रवत्सला । कृत्वा पुत्रेति कारुण्यं विललापार्त्तया गिरा ।
पुत्र शूरव्रते युक्त ज्ञातीनां नन्दिवर्द्धन । किमिदं त्वरितं वत्स प्रस्थानं कृतवानसि ।
प्रसुप्तश्चासि विवृतो किं पुत्र नियमं विना । वत्स नैवंविधा भूमौ शेरते कृतलक्षणाः ।
रावणेन पुरा गीतः श्लोकोऽयं साधुसम्मतः । बलस्थेन लोकस्य राक्षसानां समागमे ।
एवमूर्ज्जितवीर्य्यस्य समामरविघातिनः । बान्धवेभ्यो भयं घोरं दुर्न्निवार्य्यं भविष्यति । ४८२५
तथैव ज्ञातिलुब्धस्य मम पुत्रस्य धीमतः । ज्ञातिभ्यो भयमुत्पन्नं शरीरान्तकरं महत् ।
सा पतिं नृपतिं दृष्ट्वोग्रसेनं विचेतसं । उवाच रुदती वाक्यं विवत्सा हरिणी यथा ।
एह्येहि राजन् शुद्धात्मन् पश्य पुत्रं जनेश्वरं । शयानं वीरशयने वज्राहतमिवाचलं ।
अस्य कुर्म्मो महाराज निर्याणसदृशीं क्रियां । प्रेतत्वमुपपन्नस्य गतस्य यमसादनं ।
वीरभोज्यानि राज्यानि वयञ्चापि पराजिताः । गच्छ विज्ञाप्यतां कृष्णः कंससत्कारकारणात् । ४८३०
मरणान्तानि वैराणि शान्ते शान्तिर्भविष्यति । प्रेतकार्य्याणि कार्य्याणि मृतः किमपराध्यति ।
एवमुक्त्वा पतिं भोजं केशानारुह्य दुःखिता । पुत्रस्य मुखमीक्षन्ती विललापैव सा भृशं ।
इमास्ते किं करिष्यन्ति भार्य्या राजन् सुखोषिताः । त्वां पतिं सुपतिं प्राप्य या विपन्नमनोरथाः ।
इमं ते पितरं वृद्धं कृष्णस्य वशवर्त्तिनं । कथं द्रक्ष्यामि शुष्यन्तं कासारसलिलं यथा ।
अहं ते जननी पुत्र किमर्थं नाभिभाषसे । प्रस्थितो दीर्घमध्वानं परित्यज्य प्रियं जनं । ४८३५
अहो वीराल्पभाग्यायाः कृतान्तेनाभिवर्त्तिना । आक्षिप्य मम मन्दाया गोप्ता नयकोविदः ।
दानमानगृहीतानि दृष्टान्येतानि ते गुणैः । रुदन्ति तव भृत्यानां कुलानि कुलयूथप ।
उत्तिष्ठ नृपशार्दूल दीर्घबाहो महाबल । पाहि दीनं जनं सर्व्वं पुरमन्तःपुरं तथा ।
एवं विलपतीनान्तु कंसस्त्रीणां सुविस्तरं । जगामास्तं दिनकरः सन्ध्यारागेण रञ्जितः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि कंसस्त्रीविलापे अष्टाशीतोऽध्यायः ॥ ८८ ॥
॥ वैशम्पायन उवाच ॥ उग्रसेनस्तु कृष्णस्य समीपं दुःखितो ययौ । पुत्रशोकाभिसन्तप्तो विषपीत इव स्खलन् । ४८४०
स ददर्श गृहे कृष्णं यादवैः परिवारितं । पश्चात्तापाद्ध्यायन्तं कंसस्य निधनाविलं ।
कंसनारीप्रलापांश्च श्रुत्वा सकरुणान् बहून् । गर्हमाणं तथात्मानं तस्मिन् यादवसंसदि ।
अहो मयाऽतिबालेन नवरोषानुवर्त्तिना । वैधव्यं स्त्रीसहस्राणां कंसस्यास्य कृते कृतं ।
कारुण्यं खलु नारीषु प्राकृतस्यापि जायते । एवमार्त्तं रुदन्तीषु मया भर्त्तरि पातिते ।
परिदेवितमात्रेण शोकः खलु विधीयते । कृतान्तस्यानभिज्ञानां स्त्रीणां कारुण्यसम्भवः । ४८४५
कंसस्य निधनः श्रेयान् प्रागेवाभिमतो मम । सतामुद्वेजनीयस्य पापेष्वभिरतस्य च ।
लोके पतितवृत्तस्य पक्षपाताल्पमेधसः । अक्लिष्टं मरणं श्रेयो न विदिष्टस्य जीवितं ।
कंसः पापरुचिश्चैव साधूनामप्यसम्मतः । धिक्शब्दपतितस्यैव जीविते तस्य का दया ।

स्वर्गे तपोभृतां वासः फलं पुण्यस्य कर्म्मणः । इहापि यशसा युक्तास्तच्चैरेव धार्य्यते ।
यदि स्युर्निर्वृता लोकाः स्युः स्वकर्म्मपरायणाः । नरा धर्म्मप्रवृत्ताश्च न राज्ञामनयः स्पृशेत् ।
नियच्छेद्दुष्टवृत्तीनां हतान्तः कुरुते वधं । दृष्टधर्म्मेषु लोकेषु कर्त्तव्यं पारलौकिकं ।
अतीव देवा रक्षन्ति नरं धर्म्मपरायणं । कर्त्तारः सुलभा लोके दुष्कृतस्य हि कर्म्मणः ।
हतः सोऽयं मया कंसः साध्वेतदवगम्यतां । मूलच्छेदः कृतस्तस्य विपरीतस्य कर्म्मणः ।
तदेष सान्त्वयतां सर्व्वैः शोकार्त्तः प्रमदाजनः । पौराश्च पुर्य्यां श्रेण्यश्च सान्त्वयतां सर्व्व एव हि ।
एवं ब्रुवति गोविन्दे विवेशावनताननः । उग्रसेनो यदून् दृष्ट्वा पुत्त्रकिल्बिषशङ्कितः ।
स कृष्णं पुण्डरीकाक्षमुवाच यदुसंसदि । वाष्पसन्दिग्धया वाचा दीनया सज्जमानया ।
पुत्त्रो निर्यातितः क्रोधो नीतो याम्यां दिशं रिपुः । स्वधर्म्मोऽधिगता कीर्त्तिर्नाम विश्रावितं भुवि ।
स्थापितं सत्तु माहात्म्यं शङ्किता रिपवः कृताः । स्थापितो यादवो वंशो गर्व्विताः सुहृदः कृताः ।
सामन्तेषु नरेन्द्रेषु प्रतापस्ते प्रकाशितः । मित्राणि त्वां भजिष्यन्ति संश्रयिष्यन्ति पार्थिवाः ।
प्रकृतयोऽनुयास्यन्ति स्तोष्यन्ति च द्विजातयः । सन्धिविग्रहमुख्यास्त्वां प्रणमिष्यन्ति मन्त्रिणः ।
हस्त्यश्वरथसंपूर्णं पदातिगणसङ्कुलं । प्रतिगृह्णीष्व कृष्णेदं कंसस्य बलमव्ययं ।
धनं धान्यञ्च यत्किञ्चिद्रत्नान्याच्छादनानि च । प्रतीच्छन्तु नियुक्ता वै त्वदीयाः कृष्ण पूरुषाः ।
स्त्रियो हिरण्यं यानानि यच्चान्यदस्ति किञ्चन । एवं सुविहिते योगे पर्य्याप्ते कृष्ण विग्रहे ।
प्रतिष्ठितायां मेदिन्यां यदूनां मधुसूदन । त्वं गतिश्चागतिश्चैव यदूनां यदुनन्दन ।
शृणुष्व ब्रुवतां वीर कृपणानामिदं वचः । अस्य त्वत्कोपदग्धस्य कंसस्याशुभकर्म्मणः ।
तव प्रसादाद्गोविन्द प्रेतकार्य्यं क्रियेत ह । तस्य कृत्वा नरेन्द्रस्य विपन्नस्यौर्द्ध्वदैहिकं ।
सस्नुषोऽहं सभार्य्यश्च चरिष्यामि मृगैः सह । प्रेतसत्कारमात्रेण कृते बान्धवकर्म्मणि ।
आनृण्यं लौकिकं कृष्ण गताः किल भवन्ति ह । अस्याग्निं पश्चिमं कृत्वा पितृस्थाने विधानतः ।
तोयप्रदानमात्रेण कंसस्यानृण्यमाप्नुयां । एतन्मे कृष्ण विज्ञाप्यं स्नेहोऽत्र मयि युज्यतां ।
प्राप्नोतु सुगतिं तत्र कृपणः पश्चिमां क्रियां । एतच्छ्रुत्वा वचस्तस्य कृष्णः परमविस्मितः ।
प्रत्युवाचोग्रसेनं वै सान्त्वपूर्व्वमिदं वचः । कालयुक्तमिदं तात त्वयैतत् प्रतिभाषितं ।
सदृशं राजशार्दूल वृत्तस्य च कुलस्य च । यत्त्वमेवंविधं ब्रूषे गतेऽर्थे दुरतिक्रमे ।
प्राप्स्यते नृपसत्कारं कंसः प्रेतगतोऽपि सन् । कुले महति ते जन्म वेद्यं विदितवानसि ।
कथं न ज्ञायते तात नियतिर्दुरतिक्रमा । स्थावराणाञ्च भूतानां जङ्गमानाञ्च पार्थिव ।
पूर्व्वजन्मकृतं कर्म्म कालेन परिपच्यते । श्रुतवन्तोऽर्थवन्तश्च दातारः प्रियदर्शनाः ।
ब्रह्मण्या नयसम्पन्ना दीनानुग्रहकारिणः । लोकपालसमास्तात महेन्द्रसमविक्रमाः ।
क्षितिपालाः कृतान्तेन नीयन्ते नृपसत्तम । धार्म्मिकाः सर्व्वभावज्ञाः प्रजापालनतत्पराः ।
सत्यधर्म्मरता दान्ताः कालेन निधनं गताः । स्वयमेव कृतं कर्म्म शुभं वा यदि वाऽशुभं ।

प्राप्तकालस्य तत् सर्व्वं दृश्यते खलु देहिनः। एषा स्वकर्त्तिता माया दुर्व्विज्ञेया सुरैरपि।
यथाऽयं मुह्यते लोकः पश्य कर्म्मैव कारणं। कालेनाभिहतः कंसः पूर्व्वकर्म्मप्रचोदितः। ४८८०
न ह्यहं कारणं तत्र कालः कर्म्म च कारणं। सूर्य्यसोममयं तात कृत्स्नं स्थावरजङ्गमं।
कालेन निधनं गत्वा कालेनैव च जायते। कालस्तु सर्व्वभूतानां नियहप्रग्रहे रतः।
तस्मात् सर्व्वाणि भूतानि कालस्य वशगानि वै। स्वदोषेणैव दग्धस्य सुतोऽस्तव नराधिप।
नाहं वै कारणं तत्र कालस्तत्र तु कारणं। अथवाऽहं भविष्यामि कारणं नात्र संशयः।
परायणपरः कालः किं करिष्यत्यकारणः। कालस्तु बलवान् राजन् दुर्व्विज्ञेया हि सा गतिः। ४८८५
परावरविशेषज्ञा यां यान्ति समदर्शिनः। गतिं कालस्य ये सिद्धा मोक्षतत्त्वस्य पारगाः।
ब्रवीमि यदहं तात तदनुष्ठीयतां वचः। न हि राज्येन मे कार्य्यं नाप्यहं नृप काङ्क्षितः।
न चापि राज्यलुब्धेन मया कंसो निपातितः। किन्तु लोकहितार्थाय कीर्त्त्यर्थञ्च सुतस्तव।
व्यङ्गभूतः कुलस्यास्य सानुगो विनिपातितः। अहं स एव गोमध्ये गोपैः सह वनेचरः।
प्रीतिमान् विचरिष्यामि कामचारी यथा गजः। एतावच्छतशोऽप्येवं सत्येनैतद्ब्रवीमि ते। ४८९०
न मे कार्य्यं नृपत्वेन विज्ञाप्यं क्रियतामिदं। भवान् राजाऽस्तु मान्यो मे यदूनामग्रणीः प्रभुः।
विजयायाभिषिच्यस्व स्वराज्ये राजसत्तम। यदि ते मत्प्रियं कार्य्यं यदि वा नास्ति ते व्यथा।
मया निसृष्टं राज्यं स्वं चिराय प्रतिगृह्यतां।
॥ वैशम्पायन उवाच ॥ एतच्छ्रुत्वा तु वचनं नोत्तरं प्रत्यभाषत। व्रीडिताधोमुखं तन्तु राजानं यदुसंसदि।
अभिषेकेण गोविन्दो योजयामास धर्म्मवित्। स बद्धमुकुटः श्रीमानुग्रसेनो महीपतिः। ४८९५
चकार सह कृष्णेन कंसस्य निधनक्रियां। तं सर्व्वे यादवा मुख्या राजानं कृष्णशासनात्।
अनुजग्मुः पुरीमार्गे देवा इव शतक्रतुं। रजन्यान्तु निवृत्तायां ततः सूर्य्ये विराजति।
पश्चिमं कंससत्कारं चक्रुस्ते यदुपुङ्गवाः। शिविकायामथारोप्य कंसदेहं यथाक्रमं।
नैष्ठिकेन विधानेन चक्रुस्ते तस्य सत्क्रियां। स नीतो यमुनातीरमुत्तरं नृपतेः सुतः।
संस्कृतस्य यथान्यायं मैथुनेन चिताग्निना। तथैव भ्रातरञ्चास्य सुनामानं महाभुजं। ४९००
सत्कारं लम्भयामासुः सह कृष्णेन यादवाः। ताभ्यान्ते सलिलञ्चक्रुर्वृष्ण्यन्धकपुरोगमाः।
अव्ययञ्चापि प्रेतेभ्यो भाषमाणाः पुनः पुनः। तयोस्ते सलिलं दत्त्वा यादवा दीनमानसाः।
पुरस्कृत्योग्रसेनं वै विविशुर्मथुरां पुरीं।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि कंससत्कारे उग्रसेनाभिषेके ऊननवतितमोऽध्यायः॥ ८९॥
॥ वैशम्पायन उवाच ॥ स कृष्णस्तत्र बलवान् रौहिणेयेन सङ्गतः। मथुरां यादवाकीर्णां पुरीं तां सुखमावसत्।
प्राप्तयौवनदेहस्तु युक्तो राजश्रिया ज्वलन्। चचार मथुरां वीरः सरत्नाकरभूषणां। ४९०५
कस्यचित्त्वथ कालस्य सहितौ रामकेशवौ। गुरुं सान्दीपनिं काश्यमवन्तिपुरवासिनं।
धनुर्व्वेदचिकीर्षार्थमुभौ तावभिजग्मतुः। निवेद्य गोत्रं स्वाध्यायमाचारेणाभ्यलङ्कृतौ।

शुश्रूषू निरहङ्कारावुभौ रामजनार्द्दनौ । प्रतिजग्राह तौ काश्यो विद्याः प्रादाच्च केवलाः ।
तौ च श्रुतिधरौ वीरौ यथावत् प्रत्यपद्यतां । अहोरात्रैश्चतुःषष्ट्या साङ्गं वेदमधीयतां ।
चतुष्पादं धनुर्व्वेदं शस्त्रग्रामं ससंग्रहं । अचिरेणैव कालेन गुरुस्तावभ्यशिक्षयत् ।
अतीवाभामुषीं मेधां चिन्तयित्वा तयोर्गुरुः । मेने तावागतौ वीरौ देवौ चन्द्रदिवाकरौ ।
ददर्श च महात्मानावुभौ तावपि पर्व्वसु । पूजयन्तौ महादेवं साक्षाद्विष्णुमवस्थितं ।
गुरुं सान्दीपनिं कृष्णः कृतकृत्यो ऽभ्यभाषत । गुर्व्वर्थं किं ददानीति रामेण सह भारत ।
तयोः प्रभावं स ज्ञात्वा गुरुः प्रोवाच हृष्टवत् । पुत्त्रमिच्छाम्यहं दत्तं योम्हतो लवणाम्भसि ।
पुत्त्र एको हि मे जातः स चापि तिमिना हृतः । प्रभासे तीर्थयात्रायां तमेव पुनरानय ।
तथेत्येवाब्रवीत् कृष्णो रामस्यानुमते स्थितः । गत्वा समुद्रं तेजस्वी विवेशान्तर्ज्जलं हरिः ।
समुद्रः प्राञ्जलिर्भूत्वा दर्शयामास तन्तदा । तमाह कृष्णः क्वासौ भो पुत्त्रः सान्दीपनेरिति ।
समुद्रः प्रत्युवाचेदं दैत्यः पञ्चजनो महान् । तिमिरूपेण तं बालं ग्रस्तवानिति भारत ।
स पञ्चजनमासाद्य जघान पुरुषोत्तमः । न चाससाद तं बालं गुरुपुत्त्रं तदाऽच्युतः ।
स तु पञ्चजनं हत्वा शङ्खं लेभे जनार्द्दनः । यः स देवमनुष्येषु पाञ्चजन्य इति श्रुतः ।
ततो वैवस्वतं देवं गतः स पुरुषोत्तमः । ततो यमोऽप्युपागम्य ववन्दे च गदाधरं ।
किमागमनकृत्यन्ते किङ्करोमीति चाब्रवीत् । तमुवाचाथ गोविन्दो गुरुपुत्त्रः प्रदीयतां ।
श्रुत्वा न तद्वचो युद्धमकरोत् सुमहत्तदा । ततो वैवस्वतं देवं निर्ज्जित्य पुरुषोत्तमः ।
आससाद च तं बालं गुरुपुत्त्रं तदाऽच्युतः । आनिनाय गुरोः पुत्त्रं चिरनष्टं यमक्षयात् ।
ततः सान्दीपनेः पुत्त्रः प्रसादादमितौजसः । दीर्घकालगतः प्रेतः पुनरासीच्छरीरवान् ।
तदशक्यमचिन्त्यञ्च दृष्ट्वा सुमहदद्भुतं । सर्व्वेषामेव भूतानां विस्मयः समजायत ।
स गुरोः पुत्त्रमादाय पाञ्चजन्यञ्च माधवः । रत्नानि च महार्हाणि पुनरायाज्जगत्प्रभुः ।
रात्रिमेतत्र रत्नानि महार्हाणि बहूनि च । आनाय्य वेदयामास गुरवे वासवानुजः ।
गदापरिघयुद्धेषु सर्व्वास्त्रेषु च तावुभौ । अचिरान्मुख्यतां प्राप्तौ सर्व्वलोके धनुष्मतां ।
ततः सान्दीपनेः पुत्त्रं तद्रूपवयसं तथा । प्रादात् कृष्णः प्रतीतात्मा सह रत्नैरुदारधीः ।
चिरनष्टेन पुत्त्रेण काश्यः सान्दीपनिस्तदा । समेत्य मुमुदे राजन् पूजयन्रामकेशवौ ।
कृतास्त्रौ तावयो वीरौ गुरुमामन्त्र्य सुव्रतौ । आयातौ मथुरां भूयो वसुदेवसुतावुभौ ।
ततः प्रत्युद्ययुः सर्व्वे यादवा यदुनन्दनौ । सबला हृष्टमनसः उग्रसेनपुरोगमाः ।
श्रेण्यः प्रकृतयश्चैव मन्त्रिणः सपुरोहिताः । सबालवृद्धयुवतिः पुरी समभिवर्त्तत ।
नन्दितूर्य्याण्यवाद्यन्त तुष्टुवुश्च जनार्द्दनं । रथ्याः पताकामालिन्यो भ्राजन्ते स्म समन्ततः ।
प्रहृष्टमुदितं सर्व्वमन्तःपुरमशोभत । गोविन्दागमनेऽत्यर्थं यथैवेन्द्रमहे तथा ।
मुदिताश्चाप्यगायन्त राजमार्गेषु गायनाः । स्तवाशीःप्रथिता गाथा यादवानां प्रियङ्कराः ।

गोविन्दरामौ सम्प्राप्तौ भ्रातरौ लोकविश्रुतौ । स्वपुरे निर्भयाः सर्व्वे क्रीडध्वं सह बान्धवैः ।
न तत्र कश्चिद्दीनो वा मलिनो वा विचेतनः । मथुरायामभूद्राजन् गोविन्दे समुपस्थिते ।
वयांसि साधुवाक्यानि प्रहृष्टा गोहयद्विपाः । नरनारीगणाः सर्व्वे भेजिरे मनसः सुखं । ४९४०
शिवाश्च वाताः प्रववुर्विरजस्का दिशो दश । दैवतानि च हृष्टानि सर्व्वेष्वायतनेषु च ।
यानि लिङ्गानि लोकस्य बभुः कृतयुगे पुरा । तानि सर्व्वाण्यदृश्यन्त पुरीं प्राप्ते जनार्द्दने ।
ततः काले शिवे पुण्ये स्यन्दनेनारिमर्द्दनः । हरियुक्तेन गोविन्दो विवेश मथुरां पुरीं ।
विशन्तं मथुरां रम्यां तमुपेन्द्रमरिन्दमं । अनुजग्मुर्यदुगणाः शक्रं देवगणा इव ।
वसुदेवस्य भवनं ततस्तौ यदुनन्दनौ । प्रविष्टौ हृष्टवदनौ चन्द्रादित्याविवाचलं । ४९४५
परेण तेजसोपेतौ रवीन्द्राविव रूपिणौ । तावायुधानि विन्यस्य गृहे खे खेरचारिणौ ।
मुमुदाते यदुवरौ वसुदेवसुतावुभौ । उद्यानेषु विचित्रेषु फलपुष्पावनामिषु ।
चेरतुः सुमहात्मानौ यादवैः परिवारितौ । रैवतस्य समीपे तु सरित्सु विमलासु च ।
पद्मपत्रसमृद्धासु कारण्डवयुतासु च । एवं तावेकनिर्म्माणौ मथुरायां शुभाननौ ।
उग्रसेनानुगौ भूत्वा किञ्चित् कालमथोषतुः । ४९५०
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि कृष्णप्रत्यागमने नवतितमोऽध्यायः ॥ ९० ॥
॥ वैशम्पायन उवाच ॥ स कृष्णस्तत्र बलवान् रौहिणेयेन सङ्गतः । मथुरां यादवाकीर्णां पुरीं तां सुखमावसत ।
प्राप्तयौवनदेहस्तु युक्तो राजश्रिया विभुः । चचार मथुरां वीरः सवनाकरभूषणां ।
कस्यचित्त्वथ कालस्य राजा राजगृहेश्वरः । शुश्राव निहतं कंसं दुहितृभ्यां महीपतिः ।
ततो नातिचिरात् कालाज्जरासन्धः प्रतापवान् । आजगाम षडङ्गेन बलेन महता वृतः ।
जिघांसुर्हि यदून् क्रुद्धः कंसस्यापचितिं स्मरन् । अस्तिः प्राप्तिश्च नाम्नास्तां मागधस्य सुते नृप । ४९५५
जरासन्धस्य कल्याण्यौ पीनश्रोणिपयोधरे । उभे कंसस्य ते भार्य्ये प्रादाद्बार्हद्रथो नृपः ।
स ताभ्यां मुमुदे राजा बद्ध्वा पितरमाहुकं । समाश्रित्य जरासन्धमनादृत्य च यादवान् ।
शूरसेनेश्वरो राजा यथा ते बहुशः श्रुतः । शान्तिकार्य्यार्थसिद्ध्यर्थमुग्रसेनहिते रतः ।
वसुदेवोऽभवन्नित्यं कंसो न मम्हषे च तं । रामकृष्णौ व्यपाश्रित्य हते कंसे दुरात्मनि ।
उग्रसेनोऽभवद्राजा भोजवृष्ण्यन्धकैर्वृतः । दुहितृभ्यां जरासन्धः प्रियाभ्यां बलवान्नृपः । ४९६०
चोदितो वीरपत्नीभ्यामुपायान्मथुरां ततः । कृत्वा सर्व्वसमुद्योगं क्रोधादग्निसमो ज्वलन् ।
प्रतापावनता ये च जरासन्धस्य पार्थिवाः । मित्राणि ज्ञातयश्चैव संयुक्ताः सुहृदस्तथा ।
तमेवानुययुः सर्व्वे सैन्यैः समुदितैर्वृताः । महेष्वासा महावीर्य्या जरासन्धप्रियैषिणः ।
कारूषो दन्तवक्रश्च चेदिराजश्च वीर्य्यवान् । कलिङ्गाधिपतिश्चैव पौण्ड्रश्च बलिनाम्वरः ।
आकृतिः कैशिकश्चैव भीष्मकश्च नराधिपः । पुत्त्रश्च भीष्मकस्यापि रुक्मी मुख्यो धनुर्भृतां । ४९६५
वासुदेवार्ज्जुनाभ्यां यः स्पर्द्धते स महाहवे । वेणुदारिः श्रुतर्व्वा च क्राथश्चैवांशुमानपि ।

अङ्गराजश्च बलवान् वङ्गानामधिपस्तथा । कौशल्यः काशिराजश्च दशार्णाधिपतिस्तथा ।
सुह्मेश्वरश्च विक्रान्तो विदेहाधिपतिस्तथा । मद्रराजश्च बलवांस्त्रिगर्त्तानामधीश्वरः ।
शाल्वराजश्च विक्रान्तो दरदश्च महाबलः । यवनाधिपतिश्चैव भगदत्तश्च वीर्य्यवान् ।
सौवीरराजः शैव्यश्च पाण्ड्यश्च बलिनाम्वरः । गन्धारराजः सुबलो नग्नजिच्च महाबलः । ४९७०
काश्मीरराजो गोनर्द्दो दरदाधिपतिर्नृपः । दुर्य्योधनादयश्चैव धार्त्तराष्ट्रा महाबलाः ।
एते चान्ये च राजानो बलवन्तो महारथाः । तमन्वयुर्ज्जरासन्धं विद्विषन्तो जनार्द्दनं ।
ते शूरसेनानाविश्य प्रभूतयवसेन्धनान् । ऊषुः संरुध्य मथुरां पुरस्कृत्य बलं तदा ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि मथुरोपरोधे जरासन्धोद्योगे एकनवतोऽध्यायः ॥ ९१ ॥
॥ वैशम्पायन उवाच ॥ मथुरोपवने मत्वा निविष्टांस्तान्नराधिपान् । अपश्यन् वृष्णयः सर्व्वे पुरस्कृत्य जनार्द्दनं ।
ततो हृष्टमनाः कृष्णो रामं वचनमब्रवीत् । त्वरते खलु कार्य्यार्थी देवतानां न संशयः । ४९७५
यथाऽयं सन्निकृष्टो हि जरासन्धो नराधिपः । लक्ष्यन्ते हि ध्वजाग्राणि रथानां वातरंहसां ।
एतानि शशिकल्पानि नृपाणां विजिगीषतां । छत्राण्यार्य्य विराजन्ते प्रोच्छ्रितानि सितानि च ।
अहो नृपरथोदग्रा विमला छत्रपङ्क्तयः । अभिवर्त्तन्ति नः शुभ्रा यथा खे हंसपङ्क्तयः ।
कान्ते खलु नृपः प्राप्तो जरासन्धो महीपतिः । आवयोर्य्युद्धनिकषः प्रथमः समरातिथिः ।
आर्य्य तिष्ठाव सहितावनुप्राप्ते महीपतौ । युद्धारम्भः प्रयोक्तव्यो बलन्तावत् विमृश्यतां । ४९८०
एवमुक्त्वा ततः कृष्णः सुस्थः संग्रामलालसः । जरासन्धमभिप्रेप्सुश्चकार बलदर्शनं ।
वीक्षमाणश्च तान् सर्व्वान्नृपान् यदुवरोऽव्ययः । आत्मनैवात्मना वाक्यमुवाच हृदि रुक्मवित् ।
इमे ते पृथिवीपालाः पार्थिवे वर्त्मनि स्थिताः । ये विनाशं गमिष्यन्ति शास्त्रदृष्टेन कर्म्मणा ।
प्रोक्षितान् सर्व्विमानमन्ये मृत्युना नृपपुङ्गवान् । स्वर्गगामीनि चाप्येषां वपूंषि प्रचकाशिरे ।
स्थाने भारपरिश्रान्ता वसुधेयं दिवङ्गता । एषां नृपतिमुख्यानां बलौघैरभिपीडिता । ४९८५
भूमिर्निरन्तरा चेयं बलराष्ट्राभिसन्तता । स्वल्पेन खलु कालेन विविक्तं पृथिवीतलं ।
भविष्यति नरेन्द्राणां शतशो विनिपातितैः ।
॥ वैशम्पायन उवाच ॥ जरासन्धस्ततः क्रुद्धः प्रभुः सर्व्वमहीक्षितां । नराधिपसहस्रौघैरनुयातो महाद्युतिः ।
व्यायतान्दशतुरगैः सादिभिः सुसमाहितैः । रथैः संग्रामिकैर्युक्तैरसङ्गगतिभिः क्वचित् ।
हेमकक्षैर्महाघण्टैर्व्वारणैर्व्वारिदोपमैः । महामात्रोत्तमारूढैः कल्पितैरणकोविदैः । ४९९०
स्थारूढैः सादिभिर्युक्तैः प्रेङ्खमाणैः प्रवल्गितैः । वाजिभिर्व्योमसङ्काशैः प्लवद्भिरिव पर्व्वतैः ।
खड्गचर्म्मधरोदग्रैः पत्तिभिर्व्वल्गिताम्बरैः । सहस्रसङ्ख्यासंयुक्तैरुत्पतद्भिरिवोरगैः ।
एवं चतुर्व्विधैः सैन्यैः कम्पमानैरिवाम्बुदैः । नृपोऽभियातो बलवान् जरासन्धो धृतव्रतः ।
स रथौघनिर्घोषैर्गजैश्च मदशिञ्जितैः । ह्रेषमाणैश्च तुरगैः क्ष्वेडमानैश्च पत्तिभिः ।
नादयानो दिशः सर्व्वास्तस्याः पुर्य्याः वनानि च । स राजा सागराकारः ससैन्यः प्रत्यदृश्यत । ४९९५

तद्बलं पृथिवीशानां दृप्तयोधजनाकुलं । क्ष्वेडितास्फोटितरवैर्मेघसैन्यमिवाबभौ ।
रथैः पवनसम्पातैर्गजैश्च जलदोपमैः । तुरगैश्च जवोपेतैः पत्तिभिः खगमोपमैः ।
विमिश्रं सर्व्वतो भाति मत्तद्विपरथाकुलं । घर्म्मान्ते सागरगतं यथाभ्रपटलं तथा ।
सबलास्ते महीपाला जरासन्धपुरोगमाः । परिवार्य्य पुरीं सर्व्वे निवेशायोपचक्रमुः ।
बभौ तस्य निविष्टस्य बलश्रीः शिबिरस्य वै । शुक्लपर्य्यन्तपूर्णस्य यथा रूपं महोदधेः । ५०००
वीतरात्रे ततः काले समुत्तस्थुर्म्महोक्षितः । आरोहणार्थं पुर्य्यास्ते सर्व्वे युद्धलालसाः ।
समवायीकृताः सर्व्वे यमुनामनु ते नृपाः । निविष्टा मन्त्रयामासुर्युद्धकाले कुतूहलात् ।
तेषां स तुमुलः शब्दः शुश्रुवे पृथिवीक्षितां । युगान्ते भिद्यमानानां सागराणामिव स्वनः ।
तेषां सकञ्चुकोष्णीषाः स्थविरा वेत्रपाणयः । चेरुर्म्मा शब्द इत्येवं ब्रुवन्तो राजशासनात् ।
तस्य रूपं बलस्यासीन्निःशब्दस्तिमितस्य वै । लीनमीनभुजङ्गस्य निःशब्दस्य यथोदधेः । ५००५
निःशब्दस्तिमिते तस्मिन् योगादिव महार्णवे । जरासन्धो महद्वाक्यं बृहस्पतिरिवाददे ।
शीघ्रं समभिवर्त्तन्तां बलानि पृथिवीक्षितां । सर्व्वतो नगरी चेयं जनौघैः परिवार्य्यतां ।
अश्मयन्त्राणि युज्यन्तां क्षेपणीयाश्च मुद्गराः । कार्य्या भूमिसमा सर्व्वा जनौघैश्च परिप्लुता ।
ऊर्द्धञ्चापि निबध्यन्तां प्रासा वै तोमरास्तथा । दार्य्यताञ्चैव टङ्कौघैः खनित्रैश्च पुरी द्रुतं ।
नृपाश्च युद्धमार्गज्ञा विन्यस्यन्तामदूरतः । अद्यप्रभृति सैन्यैर्मे पुरीरोधः प्रवर्त्यतां । ५०१०
यावदेतौ रणे गोपौ वसुदेवसुतावुभौ । सङ्कर्षणश्च कृष्णश्च घातयामि शितैः शरैः ।
आकाशमपि टङ्कौघैर्निःसम्पातं यथा भवेत् । मयाऽनुशिष्टास्तिष्ठन्तु पुरीभूमिषु भूमिपाः ।
तेषु तेष्ववकाशेषु शीघ्रमारुध्यतां पुरी । मद्रः कलिङ्गाधिपतिश्चेकितानः सबाह्लिकः ।
कश्मीरराजो गोनर्द्दः करूषाधिपतिस्तथा । द्रुमः किम्पुरुषश्चैव पर्व्वतीयो ह्यनामयः ।
नगर्य्याः पश्चिमं द्वारं शीघ्रमारोधयन्त्विति । पौरवो वेणुदारिश्च वैदर्भः सोमकस्तथा । ५०१५
रुक्मी च भोजाधिपतिः सूर्य्याक्षश्च समालवः । विन्दानुविन्दावावन्त्यौ दन्तवक्रश्च वीर्य्यवान् ।
छागलिः पुरुमित्रश्च विराटश्च महीपतिः । कौशाम्ब्यो मालवश्चैव शतधन्वा विदूरथः ।
भूरिश्रवास्त्रिगर्त्तश्च बाणः पञ्चनदस्तथा । उत्तरं नगरद्वारमेते दुर्गसहा नृपाः ।
आरुह्य चाभिमर्द्दन्तां वज्रप्रतिमगौरवाः । उलूकः कैतवेयश्च वीरश्चांशुमतः सुतः ।
एकलव्यो बृहत्क्षत्रः क्षत्रधर्म्मा जयद्रथः । उत्तमौजाश्च शल्यश्च कौरवाः कैकयास्तथा । ५०२०
वैदिशो वामदेवश्च साकेतश्च शिनीपतिः । पूर्व्वं नगरनिर्य्यूहमेतेष्वायत्तमस्तु नः ।
दारयन्तोऽभिधावन्तु वाता इव बलाहकान् । अहञ्च दरदश्चैव चेदिराजश्च वीर्य्यवान् ।
दक्षिणं नगरद्वारं पालयामः सुदंशिताः । एवमेषा पुरी क्षिप्रं समन्ताद्वेष्टिता बलैः ।
वज्रावपातविषमं प्राप्नोतु तुमुलं भयं । गदिनो ये गदाभिस्ते परिघैः परिघायुधाः ।
अपरे विविधैः शस्त्रैर्द्दारयन्तु पुरीमिमां । अद्यैव नगरी ह्येषा विषमोच्चयसङ्कटा । ५०२५

कार्य्या भूमिः समा सर्व्वा भवद्भिर्वसुधाधिपैः । चतुरङ्गं बलं व्यूह्य जरासन्धो व्यवस्थितः ।
अथाभ्ययाद्यदून् क्रुद्धः सह सर्व्वैर्नराधिपैः । प्रतिजग्मुर्दशार्हास्तं व्यूढानीकाः प्रहारिणः ।
तद्युद्धमभवद्घोरं तेषां देवासुरोपमं । अल्पानां बहुभिः सार्द्धं व्यतिषक्तरथद्विपं ।
नगरान्निःसृतौ दृष्ट्वा वसुदेवसुतावुभौ । क्षुभितं नृपरानीकं त्रस्तसंमूढवाहनं ।
रथस्थौ दंशितौ चैव चेरतुस्तत्र यादवौ । मकराविव संरब्धौ समुद्रक्षोभणावुभौ । ५०३०
तयोः प्रयुध्यतोः संख्ये मतिरासीद्धृतात्मनोः । आयुधानां पुराणानामादाने कृतलक्षणा ।
ततः खान्निष्पतन्ति स्म दिव्यान्याहवसंसदे । लेलिहानानि दीप्तानि महान्ति सुदृढानि च ।
क्रव्यादैरनुयातानि मूर्त्तिमन्ति बृहन्ति च । तृषितान्याहवे भोक्तुं नृपमांसानि वै भृशं ।
दिव्यस्रग्दामधारीणि त्रासयन्ति च खेचरान् । प्रभया भासमानानि पतमानानि चाम्बरात् ।
हलं संवर्त्तकं नाम सौनन्दं मुषलं तथा । धनुषां प्रवरं शार्ङ्गं गदा कौमोदकी तथा । ५०३५
चत्वार्य्येतानि तेजांसि विष्णुप्रहरणानि च । ताभ्यां समवकीर्णानि यादवाभ्यां महामृधे ।
जग्राह प्रथमं रामो लालामप्रतिमं हलं । सर्पन्तमिव सर्पेन्द्रं दिव्यमालाकुलं मृधे ।
सौनन्दञ्च ततः श्रीमान्निरानन्दकरं द्विषां । सव्येन सात्वतां श्रेष्ठो जग्राह मुषलोत्तमं ।
दर्शनीयञ्च लोकेषु धनुर्जलदनिस्वनं । नाम्ना शार्ङ्गमिति ख्यातं कृष्णो जग्राह वीर्य्यवान् ।
देवैर्निगदितार्थस्य गदा तस्यापरे करे । निक्षिप्ता कुमुदाक्षस्य नाम्ना कौमोदकीति सा । ५०४०
तौ सप्रहरणौ वीरौ साक्षाद्विष्णोस्तनूपमौ । समरे रामगोविन्दौ रिपूंस्तान् प्रत्ययुध्यतां ।
सायुधप्रग्रहौ वीरौ तावन्योन्यसमावुभौ । पूर्व्वजानुजसंज्ञौ तौ रामगोविन्दलक्षणौ ।
द्विषत्सु प्रतिकुर्व्वाणौ पराक्रान्तौ तयेश्वरौ । विचेरतुर्यथा देवौ वसुदेवसुतावुभौ ।
हलमुद्यम्य रामस्तु सर्पेन्द्रमिव कोपितं । चचार समरे वीरो द्विषतामन्तको यथा ।
विकर्षन्नथवृन्दानि क्षत्रियाणां महात्मनां । चकार रोषं सफलं नागेषु च हयेषु च । ५०४५
कुञ्जरान् लाङ्गलाक्षिप्तान् मुषलाक्षेपताडितान् । रामो विराजन् समरे निर्म्ममन्थ यथाऽचलान् ।
ते बध्यमाना रामेण रणे क्षत्रियपुङ्गवाः । जरासन्धान्तिकं भीताः सत्वरात् प्रतिजग्मिरे ।
तानुवाच जरासन्धः क्षत्रधर्म्मे व्यवस्थितः । धिगेतां क्षत्रवृत्तिं वः समरे कातरात्मनां ।
परावृत्तस्य समरे विरथस्य पलायतः । भ्रूणहत्यामिवासह्यां प्रवदन्ति मनीषिणः ।
भीताः कस्मान्निवर्त्तध्वं धिगेतां क्षत्रवृत्तितां । क्षिप्रं सर्व्वे निवर्त्तध्वं मम वाक्येन चोदिताः । ५०५०
अथवा तिष्ठत रथैः प्रेक्षकाः समवस्थिताः । यावदेतौ रणे गोपौ प्रेषयामि यमक्षयं ।
ततस्ते क्षत्रियाः सर्व्वे जरासन्धेन चोदिताः । सृजन्तः शरजालानि हृष्टा योद्धुं व्यवस्थिताः ।
ते हयैः काञ्चनापीडैरथैश्चाम्बुदनादिभिः । नागैश्चाम्भोदसङ्काशैर्म्महामात्रप्रचोदितैः ।
सतनुत्राः सनिस्त्रिंशाः सपताकायुधध्वजाः । स्वारोपितधनुष्मन्तः सतूणीराः सतोमराः ।
सच्छत्राः सोऽधिपाः सर्व्वे चारुचामरवीजिताः । रणे तेऽधिगता रेजुः स्यन्दनस्था महीक्षितः । ५०५५

ते युद्धरागाद्रथिनो व्यगाहन्त युधाम्बराः । गदाभिश्चैव गुर्व्वीभिः क्षेपणीयैश्च मुद्गरैः ।
एतस्मिन्नन्तरे तत्र देवानां नन्दिवर्द्धनः । सुपर्णध्वजमास्थाय कृष्णस्तु रथमुत्तमं ।
तदाऽभ्ययाज्जरासन्धं शरैर्विव्याध चाष्टभिः । सारथिञ्चास्य विव्याध पञ्चभिर्निशितैः शरैः ।
जघान तुरगांश्चाजौ यतमानस्य वीर्य्यवान् । तं कृच्छ्रगतमाज्ञाय चित्रसेनो महारथः ।
सेनानीः कैशिकश्चैव कृष्णं विविधतुः शरैः । त्रिभिर्विव्याध संसक्तं बलदेवश्च कैशिकं । ५०६०
बलदेवो धनुस्तस्य भल्लेनाजौ द्विधाऽकरोत् । जवेनाभ्यर्द्दयच्चापि तानरीन् शरवृष्टिभिः ।
बहुभिर्बहुधा वीरः समन्तात् स्वर्णभूषणैः । तं चित्रसेनः संरब्धो विव्याध नवभिः शरैः ।
कैशिकः पञ्चभिश्चापि जरासन्धश्च सप्तभिः । त्रिभिस्त्रिभिश्च नाराचैस्तान् बिभेद जनार्द्दनः ।
पञ्चभिः पञ्चभिश्चैव बलदेवः शितैः शरैः । रथेशाश्चैव चिच्छेद चित्रसेनस्य वीर्य्यवान् ।
बलदेवो धनुस्त्वाजौ भल्लेनास्य द्विधाऽकरोत् । स च्छिन्नधन्वा विरथो गदामादाय वीर्य्यवान् । ५०६५
अभ्यद्रवत् सुसंरब्धो जिघांसुर्मुषलायुधं । विसृजतस्तु नाराचांश्चित्रसेनवधैषिणः ।
धनुश्चिच्छेद रामस्य जरासन्धो महाबलः । गदया चाजघानाश्वान् क्रोधात् स मगधेश्वरः ।
रामश्चाभ्यद्रवद्वीरो जरासन्धो महाबलः । आदाय मुषलं रामो जरासन्धमुपाद्रवत् ।
तयोस्तद्युद्धमभवत् परस्परवधैषिणोः । चित्रसेनस्तु संसक्तं दृष्ट्वा रामेण मागधं ।
रथमन्यं समारुह्य जरासन्धमवारयत् । ततो बलेन महता गजानीकेन चाप्यथ । ५०७०
उभयोरन्तरे ताभ्यां सङ्कुलं समपद्यत । ततः सैन्येन महता जरासन्धोऽभिसंवृतः ।
रामकृष्णावयगान् भोजानासमाद महाबलः । ततः प्रक्षुभितस्येव सागरस्य महास्वनः ।
प्रादुर्ब्बभूव तुमुलः सेनयोरुभयोरपि । वेणुभेरीमृदङ्गानां शङ्खानाञ्च सहस्रशः ।
उभयोः सेनयो राजन् प्रादुरासीन्महास्वनः । क्ष्वेडितास्फोटितोत्कृष्टैस्तुमुलः सर्व्वतोऽभवत् ।
उत्पपात रजश्चापि खुरनेमिसमुद्धतं । समुद्यतमहाशस्त्राः प्रगृहीतशरासनाः । ५०७५
अन्योन्यमभिगर्ज्जन्तः शूरास्तत्रावतस्थिरे । रथिनः सादिनश्चैव पत्तयश्च सहस्रशः ।
गजाश्चाचलसङ्काशाः सन्निपेतुः समन्ततः । स सम्प्रहारस्तुमुलस्त्यक्त्वा प्राणानवर्त्तत ।
वृष्णिभिः सह योधानां जरासन्धस्य दारुणः । ततः शिनिरनाधृष्टिर्व्वभ्रुर्व्विपृथुराङ्कः ।
बलदेवं पुरस्कृत्य सैन्यस्यार्द्धेन दंशिताः । दक्षिणं पक्षमासेदुः शत्रुसैन्यस्य भारत ।
पालितं चेदिराजेन जरासन्धेन च प्रभो । उदीच्यैश्च महावीर्य्यैः शल्यशाल्वादिभिर्नृपैः । ५०८०
सृजन्तः शरवर्षाणि समभित्यक्तजीविताः । अगावहः पृथुः कङ्कः शतद्युम्नो विदूरथः ।
हृषीकेशं पुरस्कृत्य सैन्यस्यार्द्धेन दंशिताः । भीष्मकेणाभिगुप्तस्य रुक्मिणा च महात्मना ।
देवकेनापि राजेन्द्र तथा मद्रेश्वरेण च । प्राच्यैश्च दाक्षिणात्यैश्च गुप्तं वीर्य्यबलान्वितैः ।
तेषाञ्च युद्धमभवत् समभित्यक्तजीवितं । शक्त्यृष्टिप्रासबाणौघान् सृजतामशनिस्वनं ।
सात्यकिश्चित्रकः श्यामो युयुधानश्च वीर्य्यवान् । राजाधिदेवो मृदरः श्वफल्कश्च महारथः । ५०८५

सत्राजिच्छित्रसेनश्च बलेन महता वृता: । व्यूहस्य पक्षं ते सव्यं प्रतीयुर्द्विषतां मृधे ।
व्यूहस्यार्द्धं समासेदुर्म्मदरेणाभिरक्षितं । राजभिश्चापि बहुभिर्व्वेणुदारिमुखै: सह ।
प्रतीच्यञ्च बलोदग्रैर्द्वारं नगाह्वैश्च पालितं ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि मथुरारोधे द्विनवतितमोऽध्याय: ॥ ९२ ॥
॥ वैशम्पायन उवाच ॥ ततो युद्धानि वृष्णीनां बभूवु: सुमहान्त्यपि । मागधस्य महामात्रैर्नृपैश्चैवानुयायिभि: ।
रुक्मिणा वासुदेवस्य भीष्मकेणाहुकस्य च । क्राथेन वसुदेवस्य कौशिकस्य च बभ्रुणा । ५०९०
गदेन चेदिराजस्य दन्तवक्रस्य शम्भुना । तथाऽन्यैर्वृष्णिवीराणां नृपाणाञ्च महात्मनां ।
युद्धमासीत् ससैन्यानां नृपैर्भरतसत्तम । अहानि पञ्च चैकञ्च षट् सप्ताष्टौ च दारुणं ।
गजैर्गजा हयैरश्वा: पादाताश्च पदातिभि: । रथैरथा विमिश्राश्च योधा युयुधिरे तत: ।
जरासन्धस्य नृपतेरानीणामीत् समागम: । महेन्द्रस्येव वृत्रेण दारुणो रोमहर्षण: ।
अवेद्य रुक्मिणीं कृष्णो रुक्मिणेन व्यरोपयत् । ज्वलनार्कांशुसङ्काशानाशीविषविषोपमान् । ५०९५
वारयामास कृष्णोऽपि शरांस्तस्य तु शिक्षया । अयैषां सुमहानासीद्धलोघानां परिक्षय: ।
उभयो: सेनयोराजन् मांसशोणितकर्द्दम: । कबन्धानि समुत्तस्थु: सुबहूनि समन्तत: ।
तस्मिन् विमर्द्दे योधानां सङ्घातरक्तिकराणि च । रथो रामो जरासन्धं शरैराशीविषोपमै: ।
अवृणोत्तस्य यादोरस्तस्य राजा स मागध: । अभ्यद्रवत वेगेन स्यन्दनेनाशुगामिना ।
अथान्यं विविधैरस्त्रैर्व्विद्धा विद्धा विनेदतु: । तौ क्षीणशस्त्रौ विरथौ हताश्वौ हतसारथी । ५१००
गदे गृहीत्वा विक्रान्तावन्योन्यमभिधावतां । कम्पयन्तौ भुवं वीरौ तावुभौ तत्र महागदौ ।
ददृशाते महात्मानौ गिरी सशिखराविव । व्युपारमन्त युद्धानि पश्यतां तौ महाभुजौ ।
संरब्धावभिधावन्तौ गदायुद्धेषु विश्रुतौ । उभौ तौ परमाचार्य्यौ लोके ख्यातौ महाबलौ ।
मत्ताविव गजौ युद्धे तावन्योन्यमगुध्यतां । ततो देवा: सगन्धर्व्वा: सिद्धाश्च परमर्षय: ।
समन्ततश्चाप्सरस: समाजग्मु: सहस्रश: । तद्देवयक्षगन्धर्व्वमहर्षिभिरलङ्कृतं । ५१०५
शुशुभेऽभ्यधिकं राजन् दिवं ज्योतिर्गणैरिव । अभिदुद्राव रामं तु जरासन्धो महाबल: ।
सव्यं मण्डलमाश्रित्य बलदेवस्तु दक्षिणं । प्राहरेतां ततोऽन्योन्यं गदायुद्धविशारदौ ।
दन्ताभ्यामिव मातङ्गौ नादयन्तौ दिशो दश । गदानिपातो रामस्य शुश्रुवेऽशनिनिस्वन: ।
जरासन्धस्य च रणे पर्व्वतस्येव दीर्य्यत: । न स्म कम्पयते रामं जरासन्धकरच्युता ।
गदा गदाभृतां श्रेष्ठं विन्ध्यं गिरिमिवानिल: । रामस्य तु गदावेगं वीर्य्यात् स मगधेश्वर: । ५११०
सेहे धैर्य्येण महता शिक्षया च व्यपोहयत् । एवं तौ तत्र संग्रामे विचरन्तौ महाबलौ ।
मण्डलानि विचित्राणि विचेरतुररिन्दमौ । व्यायच्छन्तौ चिरं कालं परिश्रान्तौ च तस्थतु: ।
समाश्वस्य मुहूर्त्तन्तु पुनरन्योन्यमघ्नतां । एवं तौ योधमुख्यौ तु समं युयुधतुश्चिरं ।
न च तौ युद्धवैमुख्यमुभावेव प्रजग्मतु: । अथापश्यद्गदायुद्धे विशेषं तस्य वीर्य्यवान् ।

राम: क्रुद्धो गदां त्यक्त्वा जग्राह मुषलोत्तमं । तमुद्यतं तदा दृष्ट्वा मुषलं घोरदर्शनं । ५११५
अमोघं बलदेवेन क्रुद्धेन तु महारणे । ततोऽन्तरीक्षे वागासीत् सुस्वरा लोकसाक्षिणी ।
उवाच बलदेवं तं समुद्यतहलायुधं । न त्वया राम बध्योऽयमलं खेदेन मागधे ।
विहितोऽस्य मया मृत्युस्तस्मात् साधु व्युपारम । अचिरेणैव कालेन प्राणांस्त्यक्ष्यति मागध: ।
जरासन्धस्तु तच्छ्रुत्वा विमना: समपद्यत । न प्रजह्रे ततस्तस्मिन् पुनरेव हलायुध: ।
तौ व्युपारमतां युद्धे वृष्णयस्ते च पार्थिवा: । प्रशान्तमभवद्युद्धं तेषामेवं सुदारुणं । ५१२०
दीर्घकालं महाराज निघ्नतामितरेतरं । पराजिते त्वपक्रान्ते जरासन्धे महीपतौ ।
अस्तं याते दिनकरे नानुसस्रुस्तदा निशि । समानीय स्वकं सैन्यं लब्धलक्षा महाबला: ।
पुरीं प्रविविशुर्हृष्टा: केशवेनाभिपालिता: । स्वाच्छुतान्यायुधान्येव तान्येवाक्रुद्ध्य स्तदा ।
जरासन्धोऽपि नृपतिर्व्विमना: स्वं पुरं ययौ । राजानश्चानुगा येऽस्य स्वराष्ट्राण्येव ते ययु: ।
जरासन्धन्तु ते जित्वा मेनिरे नैव निर्ज्जितं । वृष्णय: कुरुशार्दूल राजा ह्यतिबल: स वै । ५१२५
दश चाष्टौ च संग्रामान् जरासन्धस्य यादवा: । ददुर्न चैनं समरे हन्तुं शेकुर्म्महारथा: ।
अक्षौहिण्यश्च तस्यासन् विंशतिर्भरतर्षभ । जरासन्धस्य नृपतेस्तदर्थं या: समागता: ।
अल्पत्वादभिभूतास्तु वृष्णयो भरतर्षभ । बार्हद्रथेन राजेन्द्र राजभि: सहितेन वै ।
जित्वा तु मागधं सङ्ख्ये जरासन्धं महीपतिं । विहरन्ति स्म सुखिनो वृष्णिसिंहा महारथा: ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि मथुरारोधे जरासन्धापयाने त्रिनवतितमोऽध्याय: ॥ ९३ ॥
॥ वैशम्पायन उवाच ॥ स कृष्णस्तत्र बलवान् रौहिणेयेन सङ्गत: । मथुरां यादवाकीर्णां पुरीं तां सुखमावसत् । ५१३०
प्राप्तयौवनदेहस्तु युक्तो राजश्रिया प्रभु: । चचार मथुरां प्रीत: सवनाकरभूषणां ।
कस्यचित्त्वथ कालस्य राजा राजगृहेश्वर: । सस्मार निहतं कंसं जरासन्ध: प्रतापवान् ।
युद्धायोद्योजितो भूयो दुहितृभ्यां महीपति: । दश सप्त च संग्रामान् जरासन्धस्य यादवा: ।
ददुर्न चैनं समरे हन्तुं शेकुर्महारथा: । ततो मगधराट् श्रीमांश्चतुरङ्गबलान्वित: ।
भूयोऽष्टादशमं कर्त्तुं संग्रामं समुपारभत् । वैलक्ष्यात् पुनरेवासौ राजा राजगृहेश्वर: । ५१३५
जरासन्धो बली श्रीमान् पाकशासनसन्निभ: । स साधनेन महता पाकशासनविक्रम: ।
कृष्णस्य वधमन्विच्छन् भूयो वै संन्यवर्त्तत । तं श्रुत्वा सहिता: सर्व्वे निवृत्तं मगधेश्वरं ।
यादवा मन्त्रयामासुर्ज्जरासन्धभयार्द्दिता: । तत: प्राह महातेजा विकद्रुर्नयकोविद: ।
कृष्णं कमलपत्राक्षमुग्रसेनस्य शृण्वत: । श्रूयतां तात गोविन्द कुलस्यास्य समुद्भव: ।
श्रूयतामभिधास्यामि प्राप्तकालमहं नृप । युक्तञ्चेन्मन्यसे माधो करिष्यसि वचो मम । ५१४०
यादवस्यास्य वंशस्य समुद्भवमशेषत: । यथा मे कथितं पूर्व्वं व्यासेन विदितात्मना ।
आसीद्राजा मनोर्व्वंशे श्रीमानिक्ष्वाकुसम्भव: । हर्य्यश्व इति विख्यातो महेन्द्रसमविक्रम: ।
तस्यासीद्दयिता भार्य्या मधोर्दैत्यस्य वै सुता । देवी मधुमती नाम यथा देवी शची तथा ।

सा यौवनगुणोपेता रूपेणाप्रतिमा भुवि । मनोरथकरी राज्ञः प्राणेभ्योऽपि गरीयसी ।
वनजाक्षी रतिप्रख्या सुश्रोणी कामरूपिणी । एकपत्नीव्रतधरा खेचरी रोहिणी यथा ।
सा तमिक्ष्वाकुशार्दूलं कामयामास कामिनी । स कदाचिन्नरश्रेष्ठो भ्रात्रा ज्येष्ठेन माधव ।
राज्यान्निरस्तो विश्वस्तः सोऽयोध्यां संपरित्यजत् । स तदाऽल्पपरीवारः प्रियया सहितो वने ।
रेमे स हितकालज्ञः प्रियया कमलेक्षणः । भ्रात्रा विनिकृतं राज्यात् प्रोवाच कमलेक्षणा ।
एह्यागच्छ नृपश्रेष्ठ त्यज राज्यकृतां स्पृहां । गच्छावः सहितौ वीर मधोर्वेश्म पितुर्गृहं ।
रम्यं मधुवनं नाम कामपुष्पफलद्रुमं । सहितौ तत्र रंस्यावो यथा दिवि गतौ तथा ।
पितुर्मे दयितस्त्वं हि मातुश्च मम पार्थिव । मत्प्रियत्वात् प्रियतरो भ्रातुश्च लवणस्य मे ।
रंस्यावस्तत्र सहितौ राज्यस्थाविव कामगौ । तत्र गत्वा नरश्रेष्ठ अप्सराविव नन्दने ।
भद्रन्ते विहरिष्यावो यथा देवपुरे तथा । तं त्यजाव महाराज भ्रातरन्तेऽभिमानिनं ।
आवयोर्द्वेषिणं नित्यं मत्तं राज्यमदेन वै । धिगिमं गर्हितं वासं भृत्यवच्च पराश्रयं ।
गच्छावः सहितौ वीर पितुर्मे भवनान्तिकं । तस्य सम्यक् प्रवृत्तस्य पूर्वजं भ्रातरम्प्रति ।
कामार्त्तस्य नरेन्द्रस्य पत्न्यास्तद्रुरुचे वचः । ततो मधुपुरं राजा हर्य्यश्वः स जगाम ह ।
भार्य्यया सह कामिन्या कामी पुरुषपुङ्गवः । मधुना दानवेन्द्रेण स साम्ना समुदाहृतः ।
स्वागतं वत्स हर्य्यश्व प्रीतोऽस्मि तव दर्शनात् । यदेतन्मम राज्यं वै सर्व्वं मधुवनं विना ।
ददानि तव राजेन्द्र वासश्च प्रतिगृह्यतां । वनेऽस्मिन् लवणश्चैव सहायस्ते भविष्यति ।
अमित्रनिग्रहे चैव कर्णधारत्वमेष्यति । पालयैनं शुभं राष्ट्रं समुद्रानूपभूषितं ।
गोसमृद्धं श्रिया जुष्टमाभीरप्रायमानुषं । तत्र ते वसतस्तात दुर्गं गिरिपुरं महत् ।
भविता पार्थिवावासः सुराष्ट्रविषयो महान् । अनूपविषयश्चैव समुद्रान्ते निरामयः ।
आनर्त्तं नाम ते राष्ट्रं भविष्यत्यायतं महत् । तद्भविष्यमहं मन्ये कालयोगेन पार्थिव ।
अध्यास्यतां यथाकालं पार्थिवं वृत्तमुत्तमं । ययातमपि वंशस्ते समेष्यति च यादवं ।
अनुवंशश्च वंशस्ते सोमस्य भविता किल । एष मे विभवस्तात तवेमं विषयोत्तमं ।
दत्त्वा यास्यामि तपसे सागरं वरुणालयं । लवणेन समायुक्तस्त्वमिमं विषयोत्तमं ।
पालयस्वाखिलं तात स्वस्य वंशस्य वृद्धये । बाढमित्येव हर्य्यश्वः प्रतिजग्राह तत्पुरं ।
स च दैत्यस्तपोवासं जगाम वरुणालयं । हर्य्यश्वश्च महातेजा दिव्ये गिरिवरोत्तमे ।
निवेशयामास पुरं वासार्थममरोपमः । आनर्त्तं नाम तद्राष्ट्रं सुराष्ट्रं गोधनायुतं ।
अचिरेणैव कालेन समृद्धं प्रत्यपद्यत । अनूपविषयश्चैव वेलावनविभूषितं ।
निविष्टं चैव शस्याढ्यं प्राकारग्रामसंकुलं । शशास स नृपः स्फीतं तद्राष्ट्रं राष्ट्रवर्द्धनः ।
राजधर्म्मेण यशसा प्रजानां नन्दिवर्द्धनः । तस्य सम्यक् प्रचारेण हर्य्यश्वस्य महात्मनः ।
व्यवर्द्धत तदत्यर्थं राष्ट्रं राष्ट्रगुणैर्युतं । स हि राजा स्थितो राज्ये राजवृत्तेन शोभितः ।

प्राप्तः कुलोचितां लक्ष्मीं वृत्तेन च नयेन च । तस्यैवं सुप्रवृत्तस्य पुत्त्रकामस्य धीमतः ।
मधुमत्यां सुतो जज्ञे यदुर्नाम महायशाः । सोऽवर्द्धत महातेजा यदुर्दुन्दुभिनिःस्वनः । ५१७५
राजलक्षणसम्पन्नः सपत्नैर्दुरतिक्रमः । ययाऽस्य पूर्व्वको राजा पूरुः स सुमहायशाः ।
स एक एव तस्यासीत् पुत्त्रः परमशोभनः । ऊर्ज्जितः पृथिवीभर्त्ता हर्य्यश्वस्य महात्मनः ।
दशवर्षसहस्राणि स कृत्वा राज्यमव्ययं । जगाम त्रिदिवं राजा धर्म्मेणासमितो भुवि ।
ततो यदुरदीनात्मा प्रजाभिस्त्वभ्यषिच्यत । पितर्य्युपरते श्रीमान् क्रमेणार्क इवोदितः ।
शशास चेमां वसुधां प्रशान्तभयतस्करां । यदुरिन्द्रप्रतीकाशो नृपो येन स्म यादवाः । ५१८०
स कदाचिन्नृपश्चक्रे जलक्रीडां महोदधौ । दारैः सह गुणोदारैः सतार इव चन्द्रमाः ।
स तत्र सहसा चिप्तस्तितीर्षुः सागराम्भसि । धूमवर्णेन नृपतिः सर्पराजेन वीर्य्यवान् ।
सोऽपाकृष्यत वेगेन जले सर्पपुरं महत् । मणिस्तम्भगृहद्वारं मुक्तादामविभूषितं ।
कीर्णं शङ्खकुलैः शुभ्रैरत्नराशिविभूषितं । प्रवालाङ्कुरपत्राढ्यैः पादपैरुपशोभितं ।
कीर्णं पन्नगनार्य्योघैः समुद्रोदरचारिभिः । स्वर्णेन मध्ये भास्वन्तं स्वस्तिकेनेन्दुवर्चसा । ५१८५
स तं ददर्श राजेन्द्रो विमले सागराम्भसि । पन्नगेन्द्रपुरं तोये जगत्यामिव निर्म्मितं ।
स्वस्थश्चैव पुरे तत्र प्राविशयत नृपो यदुः । अगारं तोयदाकारं पूर्णं सर्पवधूगणैः ।
तस्य दत्तं मणिमयं जलजं परमासनं । स्वास्तीर्णं पद्मपत्रैश्च पद्मसूत्रोत्तरच्छदं ।
तमासीनं नृपं तत्र परमे पन्नगासने । द्विजिह्वपतिरव्यग्रो धूमवर्णोऽभ्यभाषत ।
पिता ते स्वर्गतिं प्राप्तः कृत्वा वंशमिमं महत् । भवन्तं तेजसा युक्तमुत्पाद्य वसुधाधिपं । ५१९०
यादवो नाम वंशोऽयं त्वन्नाम्ना वसुधाधिप । पित्रा ते मङ्गलार्थाय स्थापितः पार्थिवाकरः ।
वंशे चास्मिंस्तव विभो देवानां तनयाऽव्ययाः । ऋषीणामुरगाणाञ्च उत्पत्स्यन्ते नृयोनिजाः ।
एता मम सुताः पञ्च कुमार्य्यो वृत्तसम्मताः । उत्पन्ना यौवनाश्वस्य भगिन्यां नृपसत्तम ।
प्रतीच्छेमाः स्वधर्म्मेण प्राजापत्येन कर्म्मणा । वरञ्च ते प्रदास्यामि वरार्हस्त्वं मतो मम ।
भैमाश्च कौकुराश्चैव भोजाश्चान्धकयादवाः । दाशार्हा वृष्णयश्चेति ख्यातिं यास्यन्ति सप्त ते । ५१९५
स तस्मै धूमवर्णो वै कन्याः कन्याव्रते स्थिताः । जलपूर्णेन योगेन ददाविन्द्रसमाय वै ।
वरञ्चास्मै ददौ प्रीतः स वै पन्नगपुङ्गवः । श्रावयन् कन्यकाः सर्व्वा यथाक्रममदीनवत् ।
एतासु ते सुताः पञ्च सुतासु मम मानद । उत्पत्स्यन्ते पितुस्तेजो मातुश्चैव समाश्रिताः ।
अस्मत्समयनद्धाश्च सलिलाभ्यन्तरेचराः । तव वंशे भविष्यन्ति पार्थिवाः कामरूपिणः ।
स वरं कन्यकाश्चैव लब्ध्वा यदुवरस्तदा । उदतिष्ठत वेगेन सलिलाच्चन्द्रमा इव । ५२००
स पञ्चकन्यामध्यस्थो ददृशे तत्र पार्थिवः । पञ्चतारेण संयुक्तो नक्षत्रेणेव चन्द्रमाः ।
स तदन्तःपुरं सर्व्वं ददर्श नृपसत्तमः । वैवाहिकेन वेशेन दिव्यस्रगनुलेपनः ।

समाश्वास्य च ताः सर्व्वाः सपत्नीः पावकोपमाः । जगाम स्वपुरं राजा प्रीत्या परमया युतः ।
स्वपुरन्तु ततो राजा गत्वा वै रमते भृशं ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि विकद्रुवाक्ये चतुर्नवतोऽध्यायः ॥ ९४ ॥
॥ विकद्रुरुवाच ॥ स तासु नागकन्यासु कालेन महता नृपः । जनयामास विक्रान्तान् पञ्च पुत्रान् कुलोद्वहान् । ५२०५
मुचुकुन्दं महाबाहुं पद्मवर्णं तथैव च । माधवं सारसञ्चैव हरितञ्चैव पार्थिवं ।
एतान् पञ्च सुतान् राजा पञ्चभूतोपमान् भुवि । ईक्षमाणो नृपः प्रीतिं जगामातुलविक्रमः ।
ते प्राप्तवयसः सर्व्वे स्थिताः पञ्च यथाऽद्रयः । तेजिता बलदर्पाभ्यामूचुः पितरमग्रतः ।
तात रुक्ताः स्म वयसा बले महति संस्थिताः । क्षिप्रमाज्ञप्तमिच्छामः किं कुर्म्मस्तव शासनात् ।
स तान् नृपतिशार्दूलः शार्दूलानिव वेगितान् । प्रीत्या परमया प्राह सुतान् वीर्य्यकुतूहलान् । ५२१०
विन्ध्यर्क्षवन्तावभितो द्वे पुर्य्यौ पर्व्वताश्रये । निवेशयतु यत्नेन मुचुकुन्दः सुतो मम ।
सह्यस्य चोपरि पुरीं दक्षिणां दिशमाश्रितां । पद्मवर्णोऽपि मे पुत्रो निवेशयतु माचिरं ।
तत्रैव परतः कान्ते देशे चम्पकभूषिते । सारसो मे पुरं रम्यं निवेशयतु पुत्रकः ।
हरितोऽयं महाबाहुः सागरे सलिलोदरे । द्वीपं पन्नगराजस्य सुतो मे पालयिष्यति ।
माधवोऽपि महाबाहुर्ज्येष्ठः श्रेष्ठश्च धर्म्मवित् । यौवराज्येन संयुक्तः स्वपुरं पालयिष्यति । ५२१५
सर्व्वे नृपश्रियं प्राप्ता अभिषिक्ताः सचामराः । पित्राऽनुशिष्टास्त्वत्वारो लोकपालोपमा नृपाः ।
स्वं स्वं निवेशनं सर्व्वे भेजिरे नृपसत्तमाः । पुरस्थानानि रम्याणि मृगयन्तो यथाक्रमं ।
मुचुकुन्दस्तु राजर्षिर्व्विन्ध्यमध्ये व्यरोचत । स्वस्थानं नर्म्मदातीरे दारुणोपलसङ्कटे ।
स तु तं शोभयामास विविक्तञ्च चकार ह । सेतुञ्चैव ससञ्चक्रे परिखाश्चामितोदकाः ।
स्थापयामास भागेषु देवतायतनान्यपि । रथ्यावीथीर्नृणां मार्गांश्चत्वराणि वनानि च । ५२२०
स तां पुरीं धनवतीं पुरुहूतपुरीप्रभां । नातिदीर्घेण कालेन चकार नृपसत्तमः ।
गोभिर्द्धनेन धान्येन सम्पूर्णां ध्वजमालिनीं । नाम चास्याः शुभञ्चक्रे निर्म्मितं स्वेन तेजसा ।
तस्याः पुर्य्या नृपश्रेष्ठो देवश्रेष्ठपराक्रमः । महाश्ममहातवतो यथेयं विन्ध्यसानुगा ।
माहिष्मती नाम पुरी प्रकाशमुपयास्यति । उभयोर्व्विन्ध्ययर्क्षवतोः पादे नगयोस्तां महापुरीं ।
मध्ये निवेशयामास श्रिया परमया युतां । पुरिकां नाम धर्म्मात्मा पुरीं देवपुरीप्रभां । ५२२५
उद्यानशतसम्बाधां समृद्धापणचत्वरां । ऋक्षवतोऽभितश्चैव तीरे तत्र निरामये ।
निर्म्मिता सा पुरी राज्ञा पुरिका नाम नामतः । स ते द्वे विपुले पुर्य्यौ देवपुर्य्युपरे शुभे ।
पालयामास धर्म्मात्मा राजधर्म्मेण वीर्य्यवान् । पद्मवर्णोऽपि राजर्षिः सह्यपृष्ठे पुरोत्तमं ।
चकार नद्या वेणायास्तीरे तरुलताकुले । विषयस्याल्पतां ज्ञात्वा सम्पूर्णं राष्ट्रमेव च ।
निवेशयामास नृपः सवप्रप्रायमुत्तमं । पद्मावतं जनपदं करवीरञ्च तत्पुरं । ५२३०

निर्म्मितं पद्मवर्णेन प्राजापत्येन कर्म्मणा । सारसेनापि विहितं रम्यं क्रौञ्चपुरं महत् ।
चम्पकाशोकबकुलं विपुलं ताम्रमृत्तिकं । वनवासीति विख्यातः स्फीतो जनपदो महान् ।
पुरस्य तस्य तु श्रीमान् द्रुमैः सर्व्वर्त्तुकैर्वृतः । हरितोऽपि समुद्रस्य द्वीपं समभिपालयत् ।
रत्नसञ्चयसम्पूर्णं नारीजनमनोहरं । तस्य दाशा जले मग्ना मद्गुरा नाम विश्रुताः ।
ये चरन्ति सदा शङ्खान् समुद्रोदरचारिणः । तस्यापरे दाशगणाः प्रवालान् जलसम्भवान् । ५२३५
मार्गन्ति सदा युक्ता जातरूपञ्च मौक्तिकं । जलजानि च रत्नानि निषादास्तस्य मानवाः ।
प्रचिन्वन्तोऽर्णवे युक्ता नौभिः संयानगामिनः । मत्स्यमांसेन ते सर्व्वे वर्त्तन्ते स्म सदा नराः ।
गृह्णन्तः सर्व्वरत्नानि रत्नद्वीपनिवासिनः । ते संयानगतैर्द्रव्यैर्व्वणिजो दूरगामिनः ।
हरितं तर्पयन्त्येकं यथैव धनदं तथा । एवमिक्ष्वाकुवंशाद्धि यदुवंशो विनिःसृतः ।
चतुर्द्धा यदुपुत्रैस्तु चतुर्भिर्भिद्यते पुनः । स यदुर्माधवे राज्यं विसृज्य यदुपुङ्गवं । ५२४०
त्रिपिष्टपं गतो राजा देहं त्यक्त्वा महीतले । बभूव माधवसुतः सत्त्वतो नाम वीर्य्यवान् ।
सत्त्ववृत्तगुणोपेतो राजा राजगुणे स्थितः । सत्त्वतस्य सुतो राजा भीमो नाम महानभूत् ।
येन भैमाः सुसंवृत्ताः सत्त्वतात् सात्त्वताः स्मृताः । राज्यस्थे तु नृपे तस्मिन्रामे राज्यं प्रशासति ।
शत्रुघ्नो लवणं हत्वा चिच्छेद स मधोर्व्वनं । तस्मिन्मधुवने स्थाने पुरीञ्च मथुरामिमां ।
निवेशयामास विभुः सुमित्रानन्दिवर्द्धनः । पर्य्याये चैव रामस्य भरतस्य तथैव च । ५२४५
सुमित्रासुतयोश्चैव प्राप्तयोर्वैष्णवं पदं । भीमेनेयं पुरी तेन राज्यसम्बन्धकारणात् ।
स्ववंशे स्थापिता पूर्व्वं स्वयमध्यासिता तथा । ततः कुशे स्थिते राज्ये लवे तु युवराजनि ।
अन्धको नाम भीमस्य सुतो राज्यमकारयत् । अन्धकस्य सुतो जज्ञे रेवतो नाम पार्थिवः ।
ऋक्षोऽपि रेवताज्जज्ञे रम्ये पर्व्वतमूर्द्धनि । ततो रैवत उत्पन्नः पर्व्वतः सागरान्तिके ।
नाम्ना रैवतको नाम भूमौ भूमिधरः स्मृतः । रैवतस्यात्मजो राजा विश्वगर्भो महायशाः । ५२५०
बभूव पृथिवीपालः पृथिव्यां प्रथितः प्रभुः । तस्य तिसृषु भार्य्यासु दिव्यरूपासु केशव ।
चत्वारो जज्ञिरे पुत्रा लोकपालोपमाः शुभाः । वसुर्ब्बभ्रुः सुषेणश्च सभाक्षश्चैव वीर्य्यवान् ।
यदुप्रवीराः प्रख्याता लोकपाला इवापरे । तैरयं यादवो वंशः पार्थिवैर्बहुलीकृतः ।
यस्मिंस्ते कृष्ण लोकेशाः सुप्रजाताः प्रजेश्वराः । वसोस्तु कुन्तिविषये वसुदेवः सुतो विभुः ।
ततः संजनयामास सुप्रभे द्वे च दारिके । कुन्तीञ्च पाण्डोर्महिषीं देवतामिव भूचरां । ५२५५
भार्य्याञ्च दमघोषस्य चेदिराजस्य सुप्रभां । एष ते स्वस्य वंशस्य प्रभवः परिकीर्त्तितः ।
श्रुतो मया पुरा कृष्ण कृष्णद्वैपायनान्तिकात् । त्वं त्विदानीं प्रनष्टेऽस्मिन् वंशे वंशभृताम्वर ।
स्वयम्भूरिव सम्प्राप्तो भवायास्मज्जयाय च । न तु त्वां पौरमात्रेण शक्ता गूहयितुं वयं ।
देवगुह्येष्वपि भवान् सर्व्वज्ञः सर्व्वभावनः । शक्तश्चासि जरासन्धं नृपं नाशयितुं विभो ।
त्वद्बुद्धिवशगाः सर्व्वे वयं योधव्रते स्थिताः । जरासन्धस्तु बलवान्नृपाणां मूर्द्ध्नि तिष्ठति । ५२६०

अप्रमेयबलश्चैव वयञ्च कृशसाधनाः । न चेयमेकाहमपि पुरीरोधं सहिष्यति ।
कृशभक्तेन्धनवासा दुर्गैरपरिनिष्ठिता । असंस्कृताम्बुपरिखा द्वाराट्टयन्त्रवर्ज्जिता ।
वप्रप्राकारमार्गेषु कर्त्तव्या बहुविस्तरा । संस्कर्त्तव्यायुधागारा योक्तव्या चेष्टकाचयैः ।
कंसस्य बलभोग्यत्वान्नाभिगुप्ता पुरा जनैः । सद्यो निपतिते कंसे राज्ये ऽस्माकं नवोदये ।
पुरीप्रत्यवरोधेयञ्च रोधं विषहिष्यति । बलसङ्घट्टभग्नञ्च कृष्यमाणं परेण ह । ५२६५
असंशयमिदं राष्ट्रं जनैः सह विनङ्क्ष्यति । यादवानां विरोधेन ये जिता राज्यकामुकैः ।
ते सर्व्वे द्वैधमिच्छन्ति यत् क्षमं तद्विधीयतां । वचनीया भविष्यामो नृपाणां नृपकारणात् ।
जरासन्धभयार्त्तानां द्रवतां राष्ट्रसंभ्रमे । आर्त्ता वक्ष्यन्ति नः सर्व्वे रुध्यमानाः पुरे जनाः ।
यादवानां विरोधेन विनष्टाः स्मेति केशव । एतन्मम मतं कृष्ण विस्रम्भात् समुदाहृतं ।
त्वन्तु विज्ञापितः सर्व्वं न पुनः संप्रबोधितः । यदत्र नः क्षमं कृष्ण तत् स्वैरं संविधीयतां । ५२७०
त्वमस्य नेता सैन्यस्य वयं त्वच्छासने स्थिताः । त्वन्मूलश्च विरोधोऽयं रक्षास्मानात्मना सह ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि विकद्रुवाक्ये पञ्चनवतोऽध्यायः ॥ ९५ ॥
॥ वैशम्पायन उवाच ॥ विकद्रोस्तद्वचः श्रुत्वा वसुदेवो महायशाः । परितुष्टेन मनसा वचनञ्चेदमब्रवीत् ।
राजषाड्गुण्यवक्ता वै राजमन्त्रार्थतत्त्ववित् । स तत्त्वञ्च हितञ्चैव कृष्णोक्तं किल धीमता ।
भाषिता राजधर्म्माश्च सत्याश्च जगतो हिताः । एतच्छ्रुत्वा पितुर्वाक्यं विकद्रोश्च महात्मनः ।
वाक्यमुत्तरमेकाग्रो बभाषे पुरुषोत्तमः । श्रुवतां वः श्रुतं वाक्यं हेतुतः क्रमतस्तथा । ५२७५
न्यायतः शास्त्रतश्चैव दैवञ्चाप्यमपश्यतां । श्रूयतामुत्तरं वाक्यं श्रुत्वा च प्रतिगृह्यतां ।
नयेन व्यवहर्त्तव्यं पार्थिवेन यथाक्रमं । सन्धिश्च विग्रहश्चैव यानमासनमेव च ।
द्वैधीभावं संश्रयञ्च षाड्गुण्यञ्चिन्तयेत् सदा । बलिनः सन्निकर्षे तु न स्थेयं पण्डितेन वै ।
अपक्रामेद्धि कालज्ञः समर्थो युद्धमाचरेत् । अहं तावत् सहार्य्येण मुहूर्त्तेऽस्मिन् प्रकाशिते ।
जीवितार्थी गमिष्यामि शक्तिमानप्यशक्तवत् । ततः सह्याचलयुतं सहार्य्येणाहमच्युत । ५२८०
आत्मद्वितीयः श्रीमन्तं प्रवेक्ष्ये दक्षिणापथं । करवीरपुरञ्चैव रम्यं क्रौञ्चपुरं तथा ।
द्रक्ष्यावस्तत्र सहितौ गोमन्तञ्च नगोत्तमं । आवयोर्गमनं श्रुत्वा जितकाशी स पार्थिवः ।
अप्रविश्य पुरीं दर्पादनुसारं करिष्यति । ततः सह्यवनेष्वेव जरासन्धोऽनुयास्यति ।
आवयोर्ग्रहणे चैव नृपतिः प्रयतिष्यति । एषा नः श्रेयसी यात्रा भविष्यति कुलस्य वै ।
पौराणामथ पुर्य्याश्च देशस्य च सुखावहा । न च शत्रुपरिभ्रंशे राजानो विजिगीषवः । ५२८५
परराष्ट्रेषु स्थास्यन्ति स्वधे शत्रुक्षयं विना । एवमुक्त्वा तु तौ वीरौ कृष्णसङ्कर्षणावुभौ ।
प्रपेदतुरसंभ्रान्तौ दक्षिणौ दक्षिणापथं । तौ तु राष्ट्राणि शतशश्चरन्तौ कामरूपिणौ ।
दक्षिणां दिशमास्थाय चेरतुर्म्मार्गगौ सुखं । सह्यपृष्ठेषु रम्येषु मोदमानावुभौ तथा ।
दक्षिणापथगौ वीरावध्वानं संप्रपेदतुः । तौ तु स्वल्पेन कालेन सह्याचलविभूषितं ।

करवीरपुरं प्राप्तौ स्ववंशजविभूषितं। तौ तत्र गत्वा वेण्वाया नद्यास्तीरान्तमाश्रितं। ५१९०
आसेदतुः प्ररोहाढ्यं न्यग्रोधं तरुपुङ्गवं। अधस्तात्तस्य वृक्षस्य मुनिं दीप्ततपोधनं।
अंसावसक्तपरशुं जटावल्कलधारिणं। गौरमग्निशिखाकारं तेजसा भास्करोपमं।
क्षत्रान्तकरमक्षोभ्यं वपुष्मन्तमिवार्णवं। न्यस्तसंकुचिताधानं काले हुतहुताशनं।
क्लिन्नं त्रिषवणाम्भोभिरासीनं देवगुरुं यथा। सवत्सां धेनुकां श्वेतां होमधुक्कामदोहनां।
क्षीरारणीं कर्षमाणं महेन्द्रगिरिगोचरं। ददृशतुस्तौ क्षत्रितापपरिश्रान्तमव्ययं। ५१९५
भार्गवं राममासीनं मन्दरस्थं यथा रविं। न्यायतस्तौ तु तं दृष्ट्वा पादमूले कृताञ्जली।
वसुदेवसुतौ वीरौ सन्धिप्ययाविव पावकौ। कृष्णस्तमृषिशार्दूलमुवाच वदताम्वरः।
श्लक्ष्णं मधुरया वाचा लोकवृत्तान्तकोविदः। भगवन् जामदग्न्य त्वामवगच्छामि भार्गवं।
रामं मुनीनामृषभं क्षत्रियाणां कुलान्तकं। त्वया सायकवेगेन क्षिप्तो भार्गव सागरः।
इषुपातेन नगरं कृतं सूर्पारकं त्वया। धनुःपञ्चशतायाममिषुपञ्चशतोच्छ्रितं। ५२००
सह्यस्य च निकुञ्जेषु स्फीतो जनपदो महान्। अतिक्रम्योदधेर्व्वेलामपरान्ते निवेशितः।
त्वया तत् कार्त्तवीर्य्यस्य सहस्रभुजकाननं। छिन्नं परशुनैकेन स्मरता निधनं पितुः।
इयमद्यापि रुधिरैः क्षत्रियाणां हतत्विषां। स्निग्धा त्वत्परशूत्सृष्टैर्जातपङ्का वसुन्धरा।
रैणुकेयं विजाने त्वां क्षितौ क्षत्रियरोषणं। परशुग्रहणे युक्तं यथैवेह रणे तथा।
तदिच्छावस्त्वया विप्र कश्चिदर्थमुपश्रुतं। उत्तरञ्च श्रुतार्थेन प्रत्युक्तमविशङ्कया। ५२०५
आवां तौ माथुरौ ब्रह्मन् यमुनातीरवासिनौ। यादवौ स्वो मुनिश्रेष्ठ यदि ते श्रुतिमागतौ।
वसुदेवो यदुश्रेष्ठः पिता नौ हि धृतव्रतः। जन्मप्रभृति चैवावां व्रजेष्वेव नियोजितौ।
तौ स्वः कंसभयात्तत्र शङ्कितौ परिवर्द्धितौ। वयश्च प्रथमं प्राप्तौ मथुराञ्च प्रवेशितौ।
तावावां व्युत्थितं हत्वा समाजे कंसमोजसा। पितरं तत्र तस्यैव स्थापयित्वा जनेश्वरं।
स्वमेव कर्म्म चारब्धौ गवां व्यापारकारकौ। अथावयोः पुरं रोद्धुं जरासन्धो व्यवस्थितः। ५२१०
संग्रामान् सुबहून् कृत्वा लब्धलक्ष्यावपि स्वयं। ततः स्वपुररक्षार्थं प्रजानाञ्च धृतव्रत।
अकृतास्त्रावनुद्योगौ कर्त्तव्यबलसाधनौ। अरथौ पत्तिकौ युद्धे निस्तनुत्रौ निरायुधौ।
जरासन्धोद्यमभयात् पुराद्द्राविव निःसृतौ। उभावावामनुप्राप्तौ मुनिश्रेष्ठ तवान्तिकं।
आवयोर्मन्त्रमात्रेण कर्त्तुमर्हसि सत्क्रियां। श्रुत्वैतद्भार्गवो रामस्तयोर्वाक्यमनिन्दितं।
रैणुकेयः प्रतिवचो धर्म्मसंहितमब्रवीत्। अपरान्तादहं कृष्ण सम्प्राप्तो ह्यागतः प्रभो। ५२१५
एक एव विना शिष्यैर्युवयोर्मन्त्रकारणात्। विदितो मे व्रजे वासस्तत्र पद्मनिभेक्षण।
दानवानां वधश्चापि कंसस्य च दुरात्मनः। विग्रहश्च जरासन्धे विदित्वा पुरुषोत्तम।
तव सम्भावकस्येह सम्प्राप्तोऽस्मि वरानन। जाने त्वां कृष्ण गोप्तारं जगतः प्रभुमव्ययं।
देवकार्य्यार्थसिद्ध्यर्थमवाप्तं बालतां कृतं। न मया ऽविदितं किञ्चित्त्रिषु लोकेषु विद्यते।

तथापि भक्तिमात्रेण शृणु वक्ष्यामि ते वचः। पूर्व्वजैस्तव गोविन्द पूर्व्वं पुरमिदं कृतं। ५११०
करवीरपुरं नाम राष्ट्रञ्चैव निवेशितं। पुरेऽस्मिन्नृपतिः कृष्ण वासुदेवो महायशाः।
शृगाल इति विख्यातो नित्यं परमकोपनः। नृपेण तेन गोविन्द स्ववंशप्रभवा नृपाः।
दायादा निहताः सर्व्वे वीरद्वेषानुयायिना। अहङ्कारपरो नित्यमजितात्माऽतिमत्सरी।
राज्यैश्वर्य्यमदाविष्टः पुत्त्रेष्वपि च दारुणः। तस्मेह भवतः स्थानं रोचते मे नरोत्तम।
करवीरपुरे घोरे नित्यं पार्थिवदूषिते। श्रूयतां कथयिष्यामि यत्रोभौ शत्रुबाधकौ। ५११५
जरासन्धं बलादयं यत्रोभौ बाधयिष्यतः। तीर्त्वा वेण्वामिमां पुण्यां नदीमद्यैव सङ्गताः।
विषयान्ते निवेशाय गिरिं गच्छाम दुर्गमं। रम्यं यज्ञगिरिं नाम सह्यस्य प्रवहं गिरिं।
निवासं मांसभक्षाणां चौराणां घोरकर्म्मणां। नानाद्रुमलतायुक्तं चित्रं पुष्पितपादपं।
प्रेक्ष्य तत्र निशामेकां खट्वाङ्गीं नाम निम्नगां। भद्रन्ते सन्तरिष्यामो निकषोपलभूषणां।
गङ्गाप्रपातप्रतिमां सन्ताम्रां महतो गिरेः। तस्याः प्रपाते द्रक्ष्यामस्तापसारण्यभूषणं। ५१२०
अमानकामान्मानार्हान् गत्वा तान् धरणीधरान्। द्रक्ष्यामस्तत्र तान् विप्रान् शाम्यतो वै तपोधनान्।
तां तीर्त्वा निम्नगां तत्र तांश्च दृष्ट्वा तपोधनान्। रम्यं क्रौञ्चपुरं नाम गमिष्यामः पुरोत्तमं।
वंशजस्तत्र ते राजा कृष्ण धर्म्मरतः सदा। महाकपिरिति ख्यातो वनस्यास्य जनाधिपः।
तमदृष्ट्वैव राजानं निवासाय गतेऽहनि। तीर्थमानडुहं नाम गमिष्यामः सनातनं।
ततश्च्युता गमिष्यामः सह्यस्य विवरे गिरिं। गोमन्तमिति विख्यातं नैकशृङ्गविभूषितं। ५१२५
खगनैकमहाशृङ्गं दुरारोहं खगैरपि। विश्रामभूतं देवानां ज्योतिर्भिरिव संवृतं।
सोपानभूतं स्वर्गस्य गगणाद्गमिवोत्थितं। तं विमानावतरणं गिरिं मेरुमिवापरं।
तस्योत्तमे महाशृङ्गे भास्वन्तो देवरूपिणौ। उदयास्तमये सूर्य्यं सोमञ्च ज्योतिषां पतिं।
उर्म्मिमन्तं समुद्रञ्च सपारद्वीपभूषणं। प्रेक्षमाणौ सुखं तत्र नगाग्रे विचरिष्यथः।
शृङ्गस्थौ तस्य शैलस्य गोमन्तस्य वनेचरौ। दुर्गयुद्धेन बाधन्तौ जरासन्धं विजेष्यथः। ५१३०
तत्र शैलगतौ दृष्ट्वा भवन्तौ युद्धदुर्मदौ। अशक्तः शैलयुद्धे वै जरासन्धो भविष्यति।
भवद्भ्यामपि युद्धे तु प्रवृत्ते तत्र दारुणे। आयुधैः सह संयोगं पश्यामि न चिरादिव।
संग्रामश्च महान् कृष्ण निर्द्दिष्टस्तत्र दैवतैः। यदूनां पार्थिवानाञ्च मांसशोणितकर्द्दमः।
तत्र चक्रं हलञ्चैव गदां कौमोदकीन्तथा। सौनन्दं मुषलञ्चैव वैष्णवान्यायुधानि च।
दर्शयिष्यन्ति संग्रामे पास्यन्ति च महोक्षितां। रुधिरं कालयुक्तानां वपुर्भिः कालसन्निभैः। ५१३५
स चक्रमुषलो नाम संग्रामः कृष्ण विश्रुतः। दैवतैरिह निर्द्दिष्टः कालस्यादेशसंश्रितः।
तत्र ते कृष्ण संग्रामे सुव्यक्तं वैष्णवं वपुः। द्रक्ष्यन्ति रिपवः सर्व्वे सुराश्च सुरभावन।
तां भजस्व गदां कृष्ण चक्रञ्च चिरविस्मृतं। भजस्व स्वेन रूपेण सुराणां विजयाय वै।
बलश्चायं हलं घोरं मुषलञ्चारिमर्द्दनं। बधाय सुरशत्रूणां भजतां लोकभावनः।

एष ते प्रथमः कृष्ण संग्रामो भुवि पार्थिवैः। पृथिव्यर्थे समाख्यातो भारावतरणे सुरैः। ५५५०
आयुधावाप्तिरत्रैव वपुषो वैष्णवस्य च। लक्ष्म्याश्च तेजसश्चैव व्यूहानाञ्च विदारणं।
ततः प्रभृति संग्रामो धरण्यां शस्त्रमूर्च्छितः। भविष्यति ततः कृष्ण भारतं नाम वैशसं।
तद्गच्छ कृष्ण शैलेन्द्रं गोमन्तन्तु नगोत्तमं। जरासन्धो मृधे चापि विजयेहामुपस्थितः।
जरासन्धं निमित्तानि शंसन्ति समपस्थितं। इदञ्चैवामृतप्रख्यं होमधेन्वाः पयोऽमृतं।
पीत्वा गच्छत भद्रं वो मयादिष्टेन वर्त्मना। ५५५५
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि परशुरामवाक्ये षण्णवतोऽध्यायः॥ ९६ ॥
॥ वैशम्पायन उवाच ॥ तत्तु धेन्वाः पयः पीत्वा बलदर्पसमन्वितौ। ततस्तौ रामसहितौ प्रस्थितौ यदुपुङ्गवौ।
गोमन्तं पर्व्वतं द्रष्टुं मत्तनागेन्द्रगामिनौ। जामदग्न्यप्रदिष्टेन मार्गेण वदताम्वरौ।
जामदग्न्यद्वितीयास्ते त्रयस्त्रय इवाग्नयः। शोभयन्ति स्म पन्थानं त्रिदिवं त्रिदशा इव।
ते चाध्वविधिना सर्व्वे ततो वै दिवसक्रमात्। गोमन्तमचलं प्राप्ता मन्दरं त्रिदशा इव।
लताचारुविचित्रञ्च नानाद्रुमविभूषितं। गन्धागुरुपिनद्धाङ्गं चित्रं चित्रैर्मनोरमैः। ५५६०
द्विरेफगणसङ्कीर्णं शिलासङ्कटपादपं। मत्तवर्हिणनिर्घोषैर्नादितं मेघनादिभिः।
गगणालग्नशिखरं जलदासक्तपादपं। मत्तद्विपविषाणाग्रपरिघृष्टोपलाङ्कितं।
कूजद्भिश्चाण्डजगणैः समन्तात् प्रतिनादितं। दरीप्रपाताम्बुरवैश्छन्नं शाद्वलपल्लवैः।
नीलाभ्रचयसङ्काशैर्व्व्याप्तं यथा नभः। धातुनिस्रावदिग्धाङ्गं सानुप्रस्रवभूषितं।
कीर्णं सुरगणैः कान्तैर्न्नाकमिव कामगं। उच्छ्रितं सुविशालाग्रं समूलाम्बुपरिस्रवं। ५५६५
सकाननदरीप्रस्थं श्वेताभ्रगणभूषितं। पनसाम्रातकाम्रैश्चैर्व्वेत्रस्यन्दनचन्दनैः।
तमालैलावनयुतं मरिचक्षुपसंकुलं। पिप्पलीवल्लीकलिलं चित्रमिङ्गुदपादपैः।
द्रुमैः सर्ज्जरसानाञ्च सर्व्वतः प्रतिशोभितं। प्रांशुसालवनैर्गुप्तं सकुचित्रवनैर्युतं।
सर्ज्जनिम्बार्ज्जुनवनं पाटलीकुलसङ्कुलं। हिन्तालैश्च तमालैश्च पुन्नागैश्चोपशोभितं।
जलेषु जलजैश्छन्नं स्थलेषु स्थलजैरपि। पङ्कजैर्द्रुमषण्डैश्च सर्व्वतः प्रतिभूषितं। ५५७०
जम्बूजम्बूलवृत्ताढ्यं कद्रूकन्दलभूषितं। चम्पकाशोकबकुलं विल्वतिन्दुकशोभितं।
कुटजैर्नागपुष्पैश्च समन्तादुपशोभितं। नागयूथसमाकीर्णं मृगसङ्घातशोभितं।
सिद्धचारणरक्षोभिः सेवितप्रस्तरान्तरं। विद्याधरगणैर्नित्यमनुकीर्णशिलातलं।
सिंहशार्दूलसन्नादैः सततं प्रतिनादितं। सेवितं वारिधाराभिश्चन्द्रपादैश्च शोभितं।
स्तुतं त्रिदशगन्धर्व्वैरप्सरोभिरलङ्कृतं। वनस्पतीनां दिव्यानां पुष्पैरुच्चावचैश्चितं। ५५७५
शक्रवज्रप्रहाराणामनभिज्ञं कदाचन। दावाग्निभयनिर्म्मुक्तं देवतासुखसंश्रयं।
प्रपातप्रभवाभिश्च सरिद्भिरुपशोभितं। जलशैवलघट्टाभिरुन्मिषन्तमिव श्रिया।
काननैराननाकारैर्व्विशेषद्भिरिव श्रियं। स्थलीभिर्मृगवीथीभिः कान्ताभिरुपशोभितं।

पार्श्वैरुपलकल्माषैर्मेघैरिव विभूषितं । पादपच्छन्नभूमीभिः सपुष्पाभिः समन्ततः ।
मण्डितं वनराजीभिः प्रमदाभिः पतिं यथा । दरीभिः सुन्दरीभिश्च कन्दरीभिस्तथैव च । ५१८०
तेषु तेष्ववकाशेषु मदारमिव शोभितं । ओषधीदीप्तशिखरं वानप्रस्थनिषेवितं ।
आतपैर्व्यवनद्धैः कृत्रिमैरिव भूषितं । मूलेन सुविशालेन शिरसाऽभ्युच्छ्रितेन च ।
पृथिवीमन्तरीक्षञ्च गाहयन्तमिव स्थितं । ते समासाद्य गोमन्तं रम्यं भूमिधरोत्तमं ।
रुचिरं रुरुहुः सर्व्वे वामायामरसन्निभाः । रुरुहुस्ते गिरिवरं खमूर्द्धमिव पक्षिणः ।
अभक्रममाना वेगेन वैनतेयपराक्रमाः । ते तु तस्योत्तमं शृङ्गमारूढास्त्रिदशा इव । ५१८५
अगारं रुचिरं चक्रुर्व्वनसा निर्म्मितोपमं । निविष्टौ यादवौ दृष्ट्वा जामदग्न्यो महामुनिः ।
रामोऽभिमतमक्लिष्टमाप्रष्टुमुपचक्रमे । कृष्ण यास्याम्यहं तात पुरं सूर्पारकं विभो ।
युवयोर्नास्ति वैमुख्यं संग्रामे दानवैरपि । प्राप्तवानस्मि यां प्रीतिं मार्गानुगमनादपि ।
मा मे कृष्णानुगृह्णाति शरीरमिदमव्ययं । इदं तत् स्थानमुद्दिष्टं यत्रायुधसमागमः ।
एवमर्थं विहितो देवैः समयः साम्परायिकः । देवानां मुख्य वैकुण्ठ विष्णो देवैरभिष्टुत । ५१९०
कृष्ण सर्व्वस्य लोकस्य शृणु मे नैष्ठिकं वचः । यदिदं प्रस्तुतं कर्म्म त्वया गोविन्द लौकिकं ।
मानुषाणां हितार्थाय साधु मानुषदेहिना । तस्यायं प्रथमः कल्पः कालेन तु नियोजितः ।
जरासन्धेन वै सार्द्धं संग्रामे समुपस्थिते । तत्रायुधबलञ्चैव रूपञ्च रणकर्कशं ।
स्वयमेवात्मना कृष्ण आत्मानं संविधत्स्व ह । चक्रोद्यतकरं दृष्ट्वा त्वां गदापाणिमाहवे ।
चतुर्द्विगुणपीनांसं बिभ्येदपि शतक्रतुः । अद्य प्रभृति ते यात्रा स्वर्गोक्ता समुपस्थिता । ५१९५
पृथिव्याससरार्थे च कीर्त्त्यर्थञ्च सतांवर । वैनतेयस्य चाह्वानं वाहनध्वजकर्म्मणि ।
कुरु शीघ्रं महाबाहो गोविन्द वदतांवर । युद्धकामा नृपतयस्त्रिदिवाभिमुखोद्यताः ।
धार्त्तराष्ट्रस्य वशगास्तिष्ठन्ति रणवृत्तयः । राज्ञां निधनदृष्टार्था वैधव्येनाधिवासिता ।
एकवेणीधरा चेयं वसुधा त्वां प्रतीक्षते । सग्रहं कृष्ण नक्षत्रं संक्षिप्यारिविमर्द्दन ।
त्वयि कार्ष्ण्यमापन्ने युद्धे च समुपस्थिते । त्वरस्व कृष्ण युद्धाय दानवानां बधाय च । ५२००
स्वर्गाय च नरेन्द्राणां देवानां सुखाय च । सत्कृतोऽहं त्वया कृष्ण लोकैस्त्रैव सहामरैः ।
त्वया सत्कृतरूपेण येनाहं सत्कृतः स्वयं । साधयामि महाबाहो भवतः कार्य्यसिद्धये ।
सान्निध्यस्तु तत्राहं यत्र युद्धं भवेत् सदा । इत्युक्त्वा जामदग्न्यस्तु कृष्णमक्लिष्टकारिणं ।
जयाशिषा वर्द्धयित्वा जगामाभीप्सितां दिशं ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि गोमन्तारोहणे सप्तनवतोऽध्यायः ॥ ८७ ॥
॥ वैशम्पायन उवाच ॥ जामदग्न्ये गते रामे तौ यादवकुलोद्वहौ । गोमन्तशिखरे रम्ये चेरतुः कामरूपिणौ । ५२०५
वनमालाकुलोरस्कौ नीलपीताम्बरावृतौ । नीलश्वेतवपुष्मन्तौ गगणस्थाविवाम्बुदौ ।
तौ शैलधातुदिग्धाङ्गौ युवानौ शिखरे स्थितौ । चेरतुस्तत्र कान्तेषु वनेषु रतिलालसौ ।

उदयन्त निरीक्षन्तौ शशिनं ज्योतिषाम्वरं। उदयास्तमने चैव ग्रहाणां भास्वताम्वरं।
अथ सङ्कर्षणः श्रीमान् विना कृष्णेन वीर्य्यवान्। चचार तस्य शिखरे नगस्य नगसन्निभः।
स फुल्लस्य कदम्बस्य प्रच्छाये निषसाद ह। वायुना मदगन्धेन वीज्यमानः सुखेन वै। ५४१०
तस्य तेनानिलौघेन सेव्यमानस्य तत्र वै। मद्यसंस्पर्शजो गन्धः संस्पृशन् घ्राणमागतः।
तृष्णा चैनं विवेशाशु वारुणीप्रभवा तदा। शुशोष च मुखं तस्य मत्तस्येवापरेऽहनि।
स्मारितः स पुरावृत्तममृतप्राशनं विभुः। तृषितो मदिरान्वेषी ततस्तं तरुमैक्षत।
तस्य प्रावृषि फुल्लस्य यदभ्रौ जलदोज्झितं। तत्कोटरस्थं मदिरा संजायत मनोहरा।
तान्तु तृष्णाभिभूतात्मा पिवन्नार्त्त इवासकृत्। मदाच्च चलिताकारः समजायत स प्रभुः। ५४१५
तस्य मत्तस्य वदनं किञ्चिच्चलितलोचनं। घूर्णिताकारमभवच्छरत्कालेन्दुसप्रभं।
कदम्बकोटरे जाता नाम्ना कादम्बरीति सा। वारुणी रूपिणी तत्र देवानाममृतारणी।
कादम्बरीमदकलं विदित्वा कृष्णपूर्व्वजं। तिस्रस्त्रिदशनार्य्यस्तमुपतस्थुः प्रियम्वदाः।
मदिरा रूपिणी भूत्वा कान्तिश्च शशिनः प्रिया। श्रीश्च देवी वरिष्ठा स्त्री स्वयमेवाम्बुजध्वजा।
साञ्जलिप्रग्रहा देवी रौहिणेयमुपस्थिता। वारुण्यात्महितं वाक्यमुवाच मदविक्लवं। ५४२०
बलं जयस्व दैत्यानां बलदेव दिवीश्वर। अहन्ते दयिता कान्ता वारुणी समुपस्थिता।
त्वामेवान्तर्हितं श्रुत्वा शाश्वतं वडवामुखे। क्षीणपुण्येव वसुधां पर्य्येमि विमलानन।
पुष्पचक्रानुलिप्तेषु केशरेषूषितं मया। अतिमुक्तेषु चाचौभ्यपुष्पस्तवकवत्सु च।
साऽहं कदम्बमालीना मेघकाले सुखप्रिया। तृषितं मार्गमाणा त्वां स्वेन रूपेण च्छादिता।
साऽस्मि पूर्व्वेण योगेन यथैवामृतमन्थने। समीपं प्रेषिता पित्रा वरुणेन तवानघ। ५४२५
सा यथैवार्णवगता तथैव वडवामुखे। त्वयोपभोक्तुमिच्छामि सम्मतस्त्वं हि मे गुरुः।
न त्वाऽनन्त परित्यक्ष्ये भर्त्सिताऽपि त्वयाऽनघ। नाहं त्वया विना लोकानुत्सहे देव सेवितुं।
मदिरानन्तरं कान्तिः सङ्कर्षणमुपस्थिता। मदेन गलितश्रोणी किञ्चिदाघूर्णितेक्षणा।
प्रोवाच प्रणता साऽथ बद्धाञ्जलिपुटा सती। जयपूर्व्वेण योगेन सस्मितं योगमिच्छती।
अहञ्चन्द्रादपि गुरुं सहस्रशिरसं प्रभुं। स्वैर्गुणैरनुरक्ता त्वां यथा च मदिरा तथा। ५४३०
श्रीश्च पद्मालया देवी निधेया वैष्णवोरसि। रौहिणेयोरसि शुभा मालेवामलतां गता।
सा मालाममलां दृष्ट्वा बलस्योरसि दर्शिता। पद्मास्य पद्महस्ता वै सङ्कर्षणमथाब्रवीत्।
राम रामाभिरामस्त्वं वारुण्या समलङ्कृतः। कान्त्या मया च देवेश सङ्गतश्चन्द्रमा यथा।
इयञ्च ते मया मौलिरहृता वरुणालयात्। मध्ये शीर्षसहस्रस्य याते भानुरिवाबभौ।
जातरूपमयञ्चैकं कुण्डलं वज्रभूषितं। आदिपद्मञ्च पद्माच्च दिव्यं श्रवणभूषणं। ५४३५
कौशेयानि च नीलानि समुद्रार्हाणि भावन। हारश्च पीनतरलः समुद्राभ्यन्तरोषितः।
देवेमां प्रतिगृह्णीष्व पौरणीं भूषणक्रियां। समयस्ते महाबाहो भूषणानामलङ्क्रिया।

संहृष्टा समलङ्कारं ताश्च तिस्रः सुरस्त्रियः । शुशुभे बलदेवो हि शारदेन्दुसमप्रभः ।
स समागम्य कृष्णेन सगलाऽश्लेषवर्च्चसा । मुदं लेभे प्रतिशुभां चन्द्रमाः शशी यथा ।
ताभ्यामुभाभ्यां संलापे वर्त्तमाने गृहे यथा । वैनतेयो नभोऽध्वानमभिचक्राम वेगितः । ५४४०
संग्राममुक्तसंजस्त्रो दैत्यप्रहरणाङ्कितः । देवतानां जयश्लाघी दिव्यस्रगनुलेपनः ।
सुप्तस्य शयने दिव्ये क्षीरोदे वरुणालये । विष्णोः किरीटं दैत्येन हृतं वैरोचनेन वै ।
तदर्थं तेन संग्रामः कृतो गुर्व्वर्थभोजसा । किरीटार्थे समुद्रस्य मध्ये दैत्यगणैः सह ।
मोचयित्वा किरीटन्तु वैष्णवं पततांवरः । व्यत्यक्रमत वेगेन गगणं देवतालयं ।
स ददर्श गुरुं शैले विष्णुं कार्य्यान्तरागतं । तेन क्रोडावलम्बेन किरीटेन विराजता । ५४४५
स दृष्ट्वा मानुषं विष्णुं शैलराजशिरोगतं । प्रकाशवेशनिर्म्मुक्तं विमौलिमिव मानुषं ।
अभिज्ञस्तस्य भावानां गरुत्मान् पततांवरः । चिक्षेप खगतो मौलिं विष्णोः शिरसि हृष्टवत् ।
उपेन्द्रमूर्द्ध्नि सा मौलिरपिनद्धा इवापतत् । शिरसः स्थाननिर्म्मुक्ता कृष्णस्यैवाग्रतोऽभवत् ।
यथैव मेरुशिखरे भानुर्मध्यन्दिने तथा । वैनतेयप्रयोगेण विहिता मौलिमागता ।
कृष्णः प्रहृष्टवदनो रामं वचनमब्रवीत् । त्वरते खलु कार्य्यार्थो देवतानां न संशयः । ५४५०
यथेयमावयोः शैले संग्रामरचना कृता । वैरोचनेन सुप्तस्य मम मौलिर्महोदधौ ।
शक्रस्य सदृशं रूपं दिव्यमास्थाय सागरात् । याहरूपेण यो नीत आनीतोऽसौ गरुत्मता ।
सुव्यक्तं सन्निकृष्टः स जरासन्धो नराधिपः । लक्ष्यन्ते च ध्वजाग्राणि रथानां वातरंहसां ।
एतानि विजिगीषूणां शशिकल्पानि भूभृतां । छत्राण्याढ्ये विराजन्ते दर्शितानि सितानि च ।
अहो नृपरयोदग्रा विमलाम्बरपङ्क्तयः । अभ्यवर्त्तन्त नः शुभ्रा यथा खे हंसपङ्क्तयः । ५४५५
अहो द्योविमलाभानां शस्त्राणां विमलानन । प्रभाभास्करभासिश्चाश्चरन्तीव दिशो दश ।
एतानि नूनं समरे पार्थिवैरायुधानि च । क्षिप्तानि विनशिष्यन्ति मयि सर्व्वाणि संयुगे ।
काले खलु नृपः प्राप्तो जरासन्धो महीपतिः । आवयोर्युद्धनिकषः प्रथमः समरातिथिः ।
आर्य्य तिष्ठाव सहितौ न खल्वनागते नृपे । युद्धारम्भः प्रयोक्तव्यो बलं तावद्दिदृक्षतां ।
एवमुक्त्वा ततः कृष्णः स्वस्थः संग्रामलालसः । जरासन्धवधप्रेप्सुश्चकार बलदर्शनं । ५४६०
वीक्षमाणश्च तान् सर्व्वान्नृपान् यदुवरोऽव्ययः । आत्मानमात्मनोवाच यत्पूर्व्वं दिवि मन्त्रितं ।
इमे ते पृथिवीपालाः पार्थिवे वर्त्मनि स्थिताः । ये विनाशं गमिष्यन्ति शास्त्रदृष्टेन कर्म्मणा ।
प्रोक्षितान् खल्विमान्मन्ये मृत्युना नृपसत्तमान् । स्वर्गगामीनि चाप्येषां वपूंषि प्रचकाशिरे ।
स्थाने भारपरिश्रान्ता वसुधेयं दिवङ्गता । एषा नृपतिसिंहानां बलौघैरभिपीडिता ।
मही निरन्तरा चेयं बलराशाभिसन्तता । अल्पेन खलु कालेन विविक्तं पृथिवीतलं । ५४६५
भविष्यति नरेन्द्रौघैराकीर्णञ्च नभस्तलं ।

इति श्रीमहामहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि जरासन्धाभिगमने अष्टनवतितमोऽध्यायः ॥ ९८ ॥

॥ वैशम्पायन उवाच ॥ जरासन्धस्ततः प्राप्तो नृपः सर्व्वमहीक्षितां । नराधिपैर्व्वलयुतैरनुयातो महाद्युतिः ।
व्यायतोदग्रतुरगैर्विस्पष्टार्थसमाहितैः । रथैः सांग्रामिकैर्युक्तैरसङ्गगतिभिः क्वचित् ।
हेमकक्ष्यैर्महाघण्टैर्वारणैर्व्वारिदोपमैः । महामात्रोत्तमारूढैः कल्पितैरणवल्गितैः ।
स्वारूढैः सादिभिर्युक्तैः प्रेक्ष्यमाणैः प्रवल्गितैः । वाजिभिर्वायुसङ्काशैः प्लवद्भिरिव पक्षिभिः । ५४७०
खड्गचर्म्मबलोदग्रैः पत्तिभिर्व्विमलाम्बरैः । सहस्रसंख्यैर्निर्मुक्तैरुत्पतद्भिरिवोरगैः ।
एवञ्चतुर्व्विधैः सैन्यैः प्रचलद्भिरिवाम्बुदैः । नृपोऽभियातो बलवान् जरासन्धो धृतव्रतः ।
स रथैर्नेमिनिर्घोषैर्गजैश्च मदशिञ्जितैः । हेषद्भिश्चापि तुरगैः क्ष्वेडितैश्च पत्तिभिः ।
सन्नादयन् दिशः सर्व्वाः सर्व्वांश्चैव गुहाशयान् । स राजा सागराकारः ससैन्यः प्रत्यदृश्यत ।
तद्बलं पृथिवीशानां दृप्तयोधजनाकुलं । क्ष्वेडितास्फोटितरवं मेघसैन्यमिवाबभौ । ५४७५
रथैः पवनसम्पातैर्गजैश्च जलदोपमैः । तुरगैश्च सिताभ्राभैः पत्तिभिश्चापि दंशितैः ।
व्यामिश्रं तद्बलं भाति पत्तिद्विपरथाकुलं । घर्म्मान्ते सागरगतं यथाभ्रपटलं तथा ।
सबलास्ते महीपाला जरासन्धपुरोगमाः । परिवार्य्य गिरिं सर्व्वे निवेशाय प्रचक्रिरे ।
बभौ तस्य निविष्टस्य बलस्य शिविरस्य वै । शुक्ले पर्व्वणि पूर्णस्य यथा रूपं महोदधेः ।
वीतरात्रेऽथ काले तु नृपास्ते कृतकौतुकाः । आरोहणार्थं शैलस्य समेता युद्धलालसाः । ५४८०
समवायीकृताः सर्व्वे गिरिप्रस्थेषु ते नृपाः । निविष्टा मन्त्रयामासुर्युद्धकालकृतत्वराः ।
एषान्तु तुमुलः शब्दः शुश्रुवे पृथिवीक्षितां । युगान्ते भिद्यमानानां सागराणां यथा स्वनः ।
तेषां सकञ्चुकोष्णीषाः स्थविरा वेत्रपाणयः । चेरुर्म्मा शब्द इत्येवं ब्रुवन्तो राजशासनात् ।
तस्य रूपं बलस्यासीन्निःशब्दस्तिमितस्य वै । लीनमीनग्रहस्येव निःशब्दस्य महोदधेः ।
तस्मिन् स्तिमितनिःशब्दे योगादिव महार्णवे । जरासन्धो बृहद्वाक्यं बृहस्पतिरिवाददे । ५४८५
शीघ्रं समभिवर्त्तन्तां बलानीह महीक्षितां । सर्व्वतः पर्व्वतश्चायं बलौघैः परिवार्य्यतां ।
अश्मयन्त्राणि युज्यन्तां क्षेपणीयाश्च मुद्गराः । ऊर्द्ध्वञ्चापि प्रवाह्यन्तां प्रासा वै तोमराणि च ।
ऊर्द्ध्वं प्रक्षेपणार्थाय दृढानि च लघूनि च । शस्त्रपातविघातानि क्रियन्तामाशु शिल्पिभिः ।
शूराणां युध्यमानानां प्रमत्तानां परस्परं । यथा न पतते शाङ्गस्तथा शीघ्रं विधीयतां ।
दार्य्यतामेष टङ्कौघैः खनित्रैश्च नगोत्तमः । नृपाश्च युद्धमार्गज्ञा विन्यस्यन्तामदूरतः । ५४९०
अद्यप्रभृति सैन्यैर्मे गिरिरोधः प्रवर्त्त्यतां । यावदेतौ पातयामो वसुदेवसुतावुभौ ।
अचलोऽयं शिलायोनिः क्रियतां निश्चलाण्डजः । आकाशमपि बाणौघैर्निःसम्पातं विधीयतां ।
मयाऽनुशिष्टास्तिष्ठन्तु गिरेर्भूमिषु भूमिपाः । तेषु तेष्ववकाशेषु शीघ्रमारुह्यतां गिरिः ।
मद्रः कलिङ्गाधिपतिश्चेकितानः सबाह्लिकः । काश्मीरराजो गोनर्द्दः करूषाधिपतिस्तथा ।
द्रुमः किम्पुरुषश्चैव पार्व्वतीयाश्च मालवाः । पर्व्वतस्यापरं पार्श्वं क्षिप्रमारोहयन्त्वमी । ५४९५
पौरवो वेणुदारिश्च वैदर्भः सोमकस्तथा । रुक्मी च भोजाधिपतिः सूर्य्याक्षश्चैव मालवः ।

पञ्चालानामधिपतिर्द्रुपदश्च नराधिपः । विन्दानुविन्दावावन्त्यौ दन्तवक्रश्च वीर्य्यवान् ।
छागलिः पुरुमित्रश्च विराटश्च महीपतिः । कौशाम्ब्यो मालवश्चैव शतधन्वा विदूरथः ।
भूरिश्रवास्त्रिगर्त्तश्च वाणः पञ्चनदस्तथा । उत्तरं पर्व्वतोद्देशमेते दुर्गमहा नृपाः ।
आरोहन्तु विमर्द्दन्तो वज्रप्रतिमगौरवाः । उलूकः कैतवेयश्च वीरश्चांशुमतः सुतः । ५५००
एकलव्यो दृढाश्वश्च क्षत्रधर्म्मा जयद्रथः । उत्तमौजास्तथा शाल्वः कैरलेयश्च कौशिकः ।
वैदिशो वामदेवश्च सुकेतुश्चापि वीर्य्यवान् । पूर्व्वं पर्व्वतनिर्य्यूहमेतेष्वायच्छमस्तु नः ।
दारयन्तोऽभिधावन्तु वाता इव बलाहकान् । अहञ्च दवदश्चैव चेदिराजश्च सङ्गताः ।
दक्षिणं शैलनिचयं दारयिष्याम दंशिताः । एवमेष गिरिः क्षिप्रं समन्तादवघट्टितो बलैः
वज्रप्रपातविषमं प्राप्नोतु कदनं महत् । गदिनो ये गदाभिस्ते परिघैः परिघायुधाः । ५५०५
अपरे विविधैः शस्त्रैर्द्दारयन्तु नगोत्तमं । एष भूमिधरोऽद्यैव विषमोच्चशिलाचितः ।
कार्य्यो भूमिसमः सर्व्वैर्भवद्भिर्व्वसुधाधिपैः । जरासन्धवचः श्रुत्वा पार्थिवेषु च शासनं ।
गोमन्तं वेष्टयामासुः सागराः पृथिवीमिव । उवाच राजा चेदीनां देवानां मघवानिव ।
क्लिन्ना युद्धेन दुर्गेऽस्मिन् गोमन्ते च नगोत्तमे । दुरारोहोच्चशिखरः प्रांशुपादपसङ्कटः ।
काष्ठस्तृणैश्च बहुभिः परिवार्य्य समन्ततः । अद्यैवादीप्यतां क्षिप्रमनलमन्थनकर्म्मणा । ५५१०
क्षत्रियाः कुसुमारा हि रणे सायकयोधिनः । न युक्ताः पर्व्वतारोहे नियोक्तुं पादयोधिनः ।
न नाम प्रतिबन्धेन न चावस्कन्दकर्म्मणा । शक्य एष गिरिस्तात देवैरप्यभिमर्द्दितुं ।
दुर्गयुद्धं क्रमः श्रेयान्योधयुद्धेन पार्थिवाः । अक्लिष्टकन्धनक्षीणाः पात्यन्ते गिरिसंश्रिताः ।
वयं बहव इत्येवं नाप्येष निपुणो नयः । यादवौ नावमन्तव्यौ द्वावप्येतौ रणे स्थितौ ।
अविज्ञातबलावेतौ श्रूयेते देवसम्मितौ । कर्म्मभिस्तत्परौ विद्म बालावतिबलान्वितौ । ५५१५
दुष्कराणीह कर्म्माणि कृतवन्तौ यदूत्तमौ । शुष्ककाष्ठैस्तृणैर्वृक्षैः सर्व्वतः पर्व्वतोत्तमं ।
अग्निना दीपयिष्यामो दह्येतां गतचेतनौ । यदि चेन्निष्क्रमिष्येते दह्यमानावितोऽन्तिकं ।
समेत्य पातयिष्यामस्त्यक्ष्येते जीवितं ततः । वाक्यमेतत्तु रुरुचे सबलानां महीक्षितां ।
यदुक्तश्चेदिराजेन नृपाणां हितशंसिना । ततः काष्ठैस्तृणैर्व्वंशैः शुष्कशाखैश्च पादपैः ।
उपादीप्यत शैलेन्द्रः सूर्य्यपादैरिवाम्बुदः । ददृशुस्ते सर्व्वतस्तूर्णं पावकं तत्र पार्थिवाः । ५५२०
यथोद्देशं यथावातं शैलस्य लघुविक्रमाः । स वायूद्दीपितो वह्निरुत्पपात समन्ततः ।
सधूमज्वालमालाभिर्भाभिः खं दीपयन्निव । सोऽनलः पवनायस्तः काष्ठसञ्चयमूलवान् ।
ददाह शैलं श्रीमन्तं गोमन्तं कान्तपादपं । स दह्यमानः शैलेन्द्रो मुमोच विपुलाः शिलाः ।
शतशः शतधा भूत्वा महोल्काकारदर्शनाः । स चित्रभानुः शैलेन्द्रं भाभिर्भानुरिवाम्बुदं ।
आलिम्पतीव विभ्रिजत् समन्तादर्च्चिरुद्धतः । धातुभिः पच्यमानैश्च ज्वलद्भिश्चैव पादपैः । ५५२५
उद्भ्रान्तश्वापदो रौति तुद्यमान इवाद्रिराट् । प्रतप्तो दह्यमानस्तु स शैलः कृष्णवर्त्मना ।

रीतीर्मिव र्त्तयामास काञ्चनाञ्जनराजती: । वह्निना दीपिताङ्गोऽपि गिरिर्भातिविराजते ।
धूमान्धकाराङ्कतनुर्भज्जमान इवाम्बुदे । विश्लिष्टोपलसङ्घात: कर्कशाङ्गारवर्षण: ।
गिरिर्भात्यनलोद्गारैरुल्कावृष्टिरिवाम्बुद: । प्रपातप्रस्रवोत्क्लिष्टो धूमसम्बर्द्धितोदर: ।
सगिरिर्भस्मतां यातो युगान्ताग्निहतोपम: । विक्रान्तास्तस्य पार्श्वेभ्य: सर्पा दग्धार्द्धदेहिन: । ५५१०
श्वसन्त: पृथुमूर्द्धानो निश्चेरुरग्निवेष्टिता: । उत्पत्योपत्य गगणात् पुन: पेतुरवाङ्मुखा: ।
रेसुरुद्वेजिता: सिंहा: शार्दूलाश्चानलाविला: । मुमुचु: पादपाश्चैव दारुनिर्यासजं जलं ।
वत्रावूर्द्ध्वगतिर्व्वातो भस्माङ्गाराभिविह्वल: । धूमच्छाया च गगणे दर्पिताम्भोददर्शना ।
त्यज्यमानमहासानुर्विहगै: श्वापदैरपि । गिरिर्व्विक्लवमायाति प्रागल्भ्यात् कृष्णवर्त्मन: ।
स मुमोच शिला: शैलस्सलोदग्रशिलोच्चय: । वज्रेण पुरुहूतस्य यथा स्याद्दारितस्तथा । ५५१५
आदीप्य तन्तु शैलेन्द्रं क्षत्रिया व्यूहदंशिता: । अर्द्धक्रोशमपक्रान्ता: पावकेनाभितापिता:
दह्यमाने नगश्रेष्ठे शीर्य्यमाणे महाद्रुमे । धूमभारैरनालक्ष्ये मूले शिथिलताङ्गते ।
सरोषं हि तदा रामो वचनं केशिसूदनं । बभाषे पद्मपत्राक्षं स साक्षान्मधुसूदनं ।
दह्यतेऽयं गिरिस्तात समानुशिखरद्रुम: । आवयो: कृष्ण वैरेण वैरिभिर्वसुधाधिपै: ।
पश्य कृष्णानलोष्माणं सधूमानां समन्तत: । वनानां विरसन्तीव नगाभ्यासे खगोत्तमा: । ५५२०
अयं यथावयोरर्थे गोमन्तस्तात दह्यते । अयशस्यमिदं लोके कौलीनञ्च भविष्यति ।
तदस्यानृण्यहेतोर्हि नगस्य नगसन्निभ । क्षत्रियान्निहनिष्यामि दोर्भ्यामेव नृणाम्बर ।
एते ते क्षत्रिया: सर्व्वे गिरिमादीप्य दंशिता: । रथिनस्तात दृश्यन्ते यथादिशं युयुत्सव: ।
एवमुक्त्वा गिरे: शृङ्गान्मेरुशृङ्गादिवोडुराट् । निपपात बल: श्रीमान् वनमालाधरो युवा ।
कादम्बरीमदक्षीवो नीलवासा: सितप्रभ: । स शारदेन्दुसङ्काशो वनमालाश्रितोदर: । ५५२५
कान्तिककुण्डलधरश्चारुमौलिरवाङ्मुख: । निपपात नरेन्द्राणां मध्ये केशवपूर्व्वज: ।
अवप्लुते ततो रामे कृष्ण: कृष्णाम्बुदोपम: । गोमन्तशिखराक्क्रोमाशाप्लुतोऽमितविक्रम: ।
तत: सम्पीडयामास पद्भ्यां गिरिवरं हरि: । स पीडितो गिरिस्तेन निर्भमज्ज समन्तत: ।
जलाकुलोपलस्तत्र प्रस्नुतो द्विरदो यथा । स तेन वारिणा वह्निस्तत्क्षणात् प्रशमं गत: ।
कल्पान्ते वारिधाराभिर्मेघजालैरिवांशुमान् । सिंहार्षभितनिर्घोष: पीतवासा घनाकृति: । ५५३०
किरीटमूर्द्धा सौम्यास्य: पुण्डरीकनिभेक्षण: । श्रीवत्सवक्षा: सुमुख: सहस्राक्षसमद्युति: ।
रामादनन्तरं कृष्ण: प्लुतो वै वीर्य्यवांस्तत: । ताभ्यामवप्लुताभ्याञ्च चरणै: पीडितो गिरि: ।
मुमोच सलिलोत्पीडं तीव्रपावकशान्तये । सलिलोत्पीडनं दृष्ट्वा पार्थिवा भयमाविशन ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि गोमन्तदाहे नवनवतोऽध्याय: ॥ ९९ ॥
॥ वैशम्पायन उवाच ॥ तौ नगादाप्लुतौ दृष्ट्वा वसुदेवसुतावुभौ । तूर्णं नरवरानीकं सर्व्वं संमूढवाहनं ।
बाहुप्रहरणौ तौ तु चेरतुस्तत्र यादवौ । मकराविव संरब्धौ समुद्रक्षोभणावुभौ । ५५३५

ताभ्यां मृधे प्रविष्टाभ्यां यादवाभ्यां मतिस्त्वभूत् । आयुधानां पुराणानामादाने कृतलक्षणा ।
ततोऽम्बरतलाद्भूयः पतन्ति स्म महात्मनोः । मध्ये राजसहस्रस्य समरप्रतिकाङ्क्षिणोः ।
यानि वै माथुरे युद्धे प्राप्तान्याहवशोभिनोः । तान्यम्बरात् पतन्ति स्म दिव्यान्याहवसंप्लवे ।
लेलिहानानि दीप्तानि दीप्ताग्निसदृशानि वै । निक्षिप्य यानि तत्रैव तानि प्राप्तौ तु यादवौ ।
क्रव्यादैरनुयातानि मूर्त्तिमन्ति वृहन्ति च । तृषितान्याहवे भोक्तुं नृपमांसानि सर्व्वशः । ५५६०
दिव्यस्रग्दामधारीणि त्रासयन्तीव खेचरान् । प्रभया भासमानानि दंशितानि दिशो दश ।
हलं सम्वर्त्तकं नाम सौनन्दं मुषलं तथा । चक्रं सुदर्शनं नाम गदां कौमोदकीन्तथा ।
चत्वार्य्येतानि तेजांसि विष्णुप्रहरणानि वै । ताभ्यां समवतीर्णानि यादवाभ्यां महामृधे ।
जग्राह प्रथमं रामो हलमप्रतिमं रणे । सर्पन्तमिव सर्पेन्द्रं दिव्यमालाकुलं महत् ।
सव्येन सात्वतां श्रेष्ठो जग्राह मुषलोत्तमं । सौनन्दं नाम बलवान्निरानन्दकरं द्विषां । ५५६५
दर्शनीयञ्च लोकेषु चक्रमादित्यवर्च्चसं । नाम्ना सुदर्शनं नाम प्रीतो जग्राह केशवः ।
दैवैर्निगदितार्थस्य गदा तस्यापरे करे । निषक्ता कुमुदाक्षस्य नाम्ना कौमोदकीति सा ।
तौ सप्रहरणौ वीरौ साक्षाद्विष्णुननूपमौ । समरे रामगोविन्दौ रिपूंस्तान् प्रत्ययुध्यतां ।
सायुधप्रग्रहौ वीरौ तावन्योन्यमथावुभौ । पूर्व्वजानुजसंज्ञौ तौ रामगोविन्दलक्षणौ ।
समरेऽप्रतिरूपौ तौ विष्णोरेको द्विधाकृतः । द्विषत्सु प्रतिकुर्व्वाणौ पराक्रान्तौ यथेश्वरौ । ५५७०
हलमुद्यम्य रामस्तु सर्पेन्द्रमिव कोपितं । चचार समरे वीरो द्विषतामन्तकोपमः ।
विकर्षन्रथवृन्दानि क्षत्त्रियाणां महात्मनां । चकार रोषं सफलं नागेषु च हयेषु च ।
कुञ्जरान् लाङ्गलोत्क्षिप्तान्मुषलाक्षेपताडितान् । रामोऽभिरामः समरे निर्म्मथ्य यथाऽचलान् ।
ते वध्यमाना रामेण समरे क्षत्त्रियर्षभाः । जरासन्धान्तिकं भीता विरथाः प्रतिजग्मिरे ।
तानुवाच जरासन्धः क्षत्त्रधर्म्मे व्यवस्थितः । धिगेतां क्षत्त्रवृत्तिं वः समरे कातरात्मनां । ५५७५
पराक्रान्तस्य समरे विरथस्य पलायतः । भ्रूणहत्यामिवामह्यां प्रवदन्ति मनीषिणः ।
पत्तिनो भुवि चैकस्य गोपस्याल्पबलीयसः । भीताः किं विनिवर्त्तध्वं धिगेतां क्षत्त्रवृत्तितां ।
क्षिप्रं समभिवर्त्तध्वं मम वाक्येन चोदिताः । अथवा तिष्ठत रथैः प्रेक्षकाः समवस्थिताः ।
यावदेतौ रणे गोपौ प्रेषयामि यमक्षयं । ततस्ते क्षत्त्रियाः सर्व्वे जरासन्धेन चोदिताः ।
क्षिपन्तः शरजालानि हृष्टा योद्धुमुपस्थिताः । ते हयैः काञ्चनापीडैरथैश्चेन्दुसमप्रभैः । ५५८०
नागैश्चाम्भोदसङ्काशैर्म्महामात्रप्रचोदितैः । सतनुत्राः सनिस्त्रिंशाः सायुधावरणाम्बराः ।
स्वारोपितधनुष्पन्तः सतूणीराः ससायकाः । सच्छत्त्रोत्सेधिनः सर्व्वे चारुचामरवीजिताः ।
रणावनिगता रेजुः स्यन्दनस्था महीक्षितः । तौ युद्धरङ्गापतितौ विगाहन्तौ युधाम्बरौ ।
वसुदेवसुतौ वीरौ युयुत्सू प्रत्यदृश्यतां । तद्युद्धमभवत्तत्र तयोस्तेषाञ्च संप्लवे ।
सायकोत्सर्गबहुलं गदानिर्घातदारुणं । ततः शरसहस्राणि प्रतीच्छन्तौ रणेषिणौ । ५५८५

तस्य तु योधमुख्यौ तावभिद्रुत्य यथाऽबलौ । गदाभिश्चैव गुर्वीभिः क्षेपणीयैश्च मुद्गरैः ।
अर्द्यमानौ महेष्वासौ यादवौ न चकम्पतुः । ततः कृष्णोऽम्बुदाकारः शङ्खचक्रगदाधरः ।
व्यवर्द्धत महातेजा वातयुक्तो यथाऽनलः । स चक्रेणार्कतुल्येन दीप्यमानेन तेजसा ।
चिच्छेद समरे वीरो नृगजाश्वमहारथान् । गदानिपातनिहता लाङ्गलाकृष्टमूर्त्तयः ।
न शेकुस्ते रणे स्थातुं पार्थिवा नष्टचेतसः । चक्रधारानिकृत्तानि विचित्राणि महीक्षितां । ५५९०
रथयूथानि भग्नानि न शेकुश्चलितुं रणे । मुषलाक्षेपभग्नाश्च कुञ्जराः षष्टिहायनाः ।
घना इव घनापाये भग्नदन्ता विचुक्रुशुः । चक्रानलज्वालहताः सादिनः सपदातयः ।
पेतुः परासवस्तत्र यथा वज्रहतास्तथा । चक्रलाङ्गलनिर्द्दग्धं तत्सैन्यं विद्रुतं कृतं ।
युगान्तोपहतप्रख्यं सर्व्वं पतितमाबभौ । आक्रीडभूमिं दिव्यानामायुधानां वपुष्मतां ।
वैष्णवानां नृपास्ते तु द्रष्टुमप्यबलीयसः । केचिद्रथाः संमृदिताः केचिन्निहतपार्थिवाः । ५५९५
भग्नैकचक्रास्त्वपरे विशीर्णा धरणीतले । तस्मिन् विमर्दे घोरे चक्रलाङ्गलसंप्लवे ।
दारुणानि प्रवृत्तानि रक्षांस्यौत्पातिकानि च । आर्त्तानां कूजमानानां पाटितानाञ्च काष्ठवत् ।
अन्तो न शक्यतेऽन्वेष्टुं नृनागरथवाजिनां । आपातितनरेन्द्रा सा रुधिरार्द्रा रणक्षितिः ।
योषेव चन्दनार्द्राङ्गी भैरवा प्रतिभाति वै । नरकेशास्थिमज्जान्त्रैः सादितानाञ्च दन्तिनां ।
रुधिरौघास्रवस्तत्र च्छादयामास मेदिनीं । तस्मिन्महाभीषणके नरवाहनसङ्क्षये । ५६००
शिवानामशिवैः शब्दैर्नादिते घोरदर्शने । आर्त्तस्तनितसन्नादे रुधिराम्बुह्रदाकुले ।
अन्तकाक्रान्तसदृशे नागदेहैः समावृते । अगात्रैर्ब्बहुभिर्य्योधैस्तुरगैश्चावदारितैः ।
कङ्कैश्च बलगृध्रैश्च नादितप्रतिनादिते । निपाते पृथिवीशानां मृत्युसाधारणे रणे ।
कृष्णः शत्रुवधं कर्त्तुं चचारान्तकदर्शनः । युगान्तार्कप्रभञ्चक्रं कालोऽश्चैवायसोद्भवां ।
गृह्य सैन्यावनिगतो बभाषे केशवो नृपान् । किन्न युध्यत वै शूरा हस्त्यश्वरथसंयुताः । ५६०५
किमिदं गम्यते शूराः कृतास्त्रा दृढनिश्चयाः । अयं सपूर्व्वजः सङ्ख्ये पदातिः प्रमुखे स्थितः ।
अदृष्टदोषेण रणे भवन्तो येन पालिताः । स इदानीं जरासन्धः किमर्थं नाभिवर्त्तते ।
एवमुक्ते तु नृपतिर्द्दरदो नाम वीर्य्यवान् । रामं हलायोधभुजं प्रत्ययात् सैन्यमध्यग ।
बभाषे स तु तामाख्यमुवाणनिव सेवनी । एह्येहि राम युध्यस्व मया सार्द्धमरिन्दम ।
तत्र युद्धं तयोरासीद्रामस्य दरदस्य च । मत्ते लोकवरिष्ठाभ्यां कुञ्जराभ्यामिवौजसा । ५६१०
योजयित्वा ततः स्कन्धे राजो दरदमाहवे । बलेन बलिनां श्रेष्ठो मुषलेनावपोथयत् ।
स्वकायगतमूर्द्धा वै मुषलेनावपोथितः । पपात दरदो भूमौ दारिताद्रि इवाचलः ।
रामेण निहते तस्मिन् दरदे राजसत्तमे । जरासन्धस्य राज्ञस्तु रामेणासीत् समागमः ।
महेन्द्रस्येव वृत्रेण दारुणो लोमहर्षणः । गदे गृहीत्वा विक्रान्तावन्योन्यमभ्यधावतां ।
कम्पयन्तौ भुवं वीरौ तावुद्यतमहागदौ । ददृशाते महात्मानौ गिरी सशिखराविव । ५६१५

व्युपारमन्त युद्धानि प्रेक्षन्तः पुरुषर्षभौ । संरम्भाविव धावन्तौ गदायुद्धेषु विश्रुतौ ।
तावुभौ परमाचार्य्यौ लोके ख्यातौ महाबलौ । मत्ताविव महानागावन्योन्यं समधावतां ।
ततो देवाः सगन्धर्व्वाः सिद्धाश्च परमर्षयः । यक्षाश्चाप्सरसश्चैव समाजग्मुः सहस्रशः ।
तद्देवयक्षगन्धर्व्वमहर्षिभिरलङ्कृतं । शुशुभेऽभ्यधिकं राजन्नभो ज्योतिर्गणैरिव ।
अभिदुद्राव रामन्तु जरासन्धो नराधिपः । सव्यं मण्डलमाश्रित्य बलदेवस्तु दक्षिणं । ५५२०
तावन्योन्यं प्रजह्राते गदायुद्धविशारदौ । दन्ताभ्यामिव मातङ्गौ नादयन्तौ दिशो दश ।
गदानिपातो रामस्य शुश्रुवेऽशनिनिस्वनः । जरासन्धस्य च रणे पर्व्वतस्येव दीर्य्यतः ।
न स्म कम्पयते रामं जरासन्धकरच्युता । गदा गदाभृतां श्रेष्ठं विन्ध्यं गिरिमिवानिलः ।
रामस्य तु गदावेगं राजा स मगधेश्वरः । सेहे धैर्य्येण महता शिक्षया च व्यपोहयत् ।
ततोऽन्तरीक्षे वागासीत् सुस्वरा लोकसाक्षिणी । न त्वया राम वध्योऽयमलं खेदेन माधव । ५५२५
विहितोऽस्य मया मृत्युस्तस्मात् साधु व्युपारम । अचिरेणैव कालेन प्राणांस्त्यक्ष्यति मागधः ।
जरासन्धस्तु तच्छ्रुत्वा विमनाः समपद्यत । न प्राहरत्ततस्तस्मै पुनरेव हलायुधः ।
दीर्घकालं महाराज निघ्नतामितरेतरं । पराजिते त्वपक्रान्ते जरासन्धे महीपतौ ।
विविक्तमभवत् सैन्यं परात्तमसहायवत् । ते नृपाश्चोदितैर्नागैः स्यन्दनैस्तुरगैस्तथा ।
दुद्रुवुर्भीतमनसो व्याघ्राघ्राता मृगा इव । तन्नरेन्द्रैः परित्यक्तं भग्नदर्पैर्महारथैः । ५५३०
घोरं क्रव्यादबहुलं घोरमायोधनं बभौ । द्रवत्सु रथमुख्येषु चेदिराजो महाद्युतिः ।
स्थित्वा यादवमभ्यस्य कृष्णमेवान्ववर्त्तत । वृतः कारूषसैन्येन चेदिसैन्येन चानघ ।
सम्बन्धकामो गोविन्दमेवमाह स चेदिराट् । अहं पितृष्वसुर्भर्त्ता तव यादवनन्दन ।
भवन्धाश्चापराद्धस्त्वं हि मे दयितः प्रभो । उक्तश्चैव मया राजा जरासन्धोऽल्पचेतनः ।
कृष्णाद्विरम दुर्ब्बुद्धे विग्रहाद्रणकर्म्मणि । तदेषोऽद्य मया त्यक्तो मम वाक्यस्य दूषकः । ५५३५
भग्नो युधि जरासन्धस्तथा द्रवति सानुगः । निर्वैरश्चैव संयाति स्वपुरं पृथिवीपतिः ।
त्वय्येव भूयोऽप्यपरं दर्शयिष्यति किल्बिषं । तदिमां मन्यशायुं त्वं महीं हतनराकुलां ।
क्रव्यादगणसंकीर्णां सेवितव्याममानुषैः । करवीरपुरं वीर गच्छाम सबलानुगाः ।
शृगालं वासुदेवं वै द्रक्ष्यामस्तच्च पार्थिवं । इमौ रथवरावग्र्यौ युवयोः कारितौ मया ।
योजितौ शीघ्रतुरगौ वज्रचक्राक्षकूवरौ । शीघ्रमारुह्य भद्रन्ते बलदेवसहायवान् । ५५४०
त्वगामः करवीरस्थं द्रष्टुं तं वसुधाधिपं ।
॥ वैशम्पायन उवाच ॥ पितृष्वसृपतेर्वाक्यं श्रुत्वा चेदिपतेस्तदा । वाक्यं हृष्टमनाः कृष्णो जगाद जगतो गुरुः ।
अहो सुयुद्धाभिरतौ देशकालोचितौ त्वया । बान्धवप्रतिरूपेण संसिक्तौ वचनाम्बुना ।
देशकालविशिष्टस्य हितस्य मधुरस्य च । वाक्यस्य दुर्लभा लोके वक्तारश्चेदिसत्तम ।
चेदिराजसनाथौ स्वः संवृत्तौ तव दर्शनात् । नावयोः किञ्चिदप्राप्यं ययोस्त्वं बन्धुरीदृशः । ५५४५

जरासन्धस्य निधनं ये चान्ये तत्समा नृपाः । पर्य्याप्तौ त्वत्सनाथौ स्वः कर्त्तुं चेदिकुलोद्वह ।
यदूनां प्रथमो बन्धुस्त्वं हि सर्व्वमहीक्षितां । अतः प्रभृति संग्रामान् द्रच्यसे चेदिसत्तम ।
चाक्षं भीषणमित्येवं संग्रामं रणकृत्तय: । कथयिष्यन्ति लोकेऽस्मिन् ये धरिष्यन्ति पार्थिवाः ।
राज्ञां पराजयं युद्धे गोमन्तेऽचलसत्तमे । श्रवणाद्धारणाच्चास्य स्वर्गलोकं व्रजन्ति ते ।
तद्गच्छाम महाराज करवीरं पुरोत्तमं । त्वयोद्दिष्टेन मार्गेण चेदिराज शिवाय वै ।
ते स्यन्दनगताः सर्व्वे पवनोत्पातिभिर्हयैः । भेजिरे दीर्घमध्वानं मूर्त्तिमन्त इवाग्नयः ।
ते त्रिरात्रोषिताः प्राप्ताः करवीरं पुरोत्तमं । शिवाय च शिवे देशे निविष्टास्त्रिदशोपमाः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि करवीरपुराभिगमने शततमोऽध्यायः ॥ १०० ॥
॥ वैशम्पायन उवाच ॥ तानागतान् विदित्वाऽथ शृगालो युद्धदुर्म्मदः । पुरस्य धर्षणं मत्वा निर्ज्जगामेन्द्रविक्रमः ।
रथेनादित्यवर्णेन भास्वता रणगामिना । आयुधप्रतिपूर्णेन नेमिनिर्घोषहासिना ।
मन्दराचलकल्पेन चित्राभरणभूषिणा । अक्षय्यसायकैस्तूणैः पूर्णेनार्णवघोषिणा ।
हर्य्यश्वेनाशुगतिनाऽसक्तेन शिखरेष्वपि । हेमकूवरगर्भेण दृढाक्षेणाभिशोभिना ।
सुबन्धुरेण दीप्तेन पतत्त्रिवररंहसा । खगन्तेनेव शक्रस्य हर्य्यश्वेन रथाद्रिणा ।
सावित्रे नियमे पूर्णे यं ददौ सविता स्वयं । आदित्यरश्मिभिरिव रश्मिभिर्यो निगृह्यते ।
तेन स्यन्दनमुख्येन द्विषत्स्यन्दनघातिना । स शृगालोऽभ्ययात् कृष्णं शलभः पावकं यथा ।
चापपाणिः सुतीक्ष्णेषुः कवची हेममालिकः । सितप्रावरणोष्णीषः पावकाकारलोचनः ।
मुहुर्मुहुर्ज्याचपलं विक्षिपन्दुःसहं धनुः । निर्व्वमन् रोषजं वायुं सानलज्वालमण्डलं ।
भाभिर्भूषणपङ्क्तीनां दीप्तो मेरुरिवाचलः । रथस्थ इव शैलेन्द्रः शृगालः प्रत्यदृश्यत ।
तस्यारमितशब्देन रथनेमिस्वनेन च । गुरुत्वेन च नाम्यन्तो चचालोर्व्वी यथा पुरा ।
तमापतन्तं श्रीमन्तं मूर्त्तिमन्तमिवाचलं । शृगालं लोकपालाभं दृष्ट्वा कृष्णो न विव्यथे ।
शृगालस्यापि संरब्धः स्यन्दनेनाशुगामिना । समीपे वासुदेवस्य युयुत्सुः प्रत्यदृश्यत ।
वासुदेवं स्थितं दृष्ट्वा शृगालो युद्धलालसः । अभिदुद्राव वेगेन मेघराशिरिवाचलं ।
वासुदेवः स्मितं कृत्वा प्रतियुद्धाय तस्थिवान् । तद्युद्धमभवत्ताभ्यां समरे घोरदर्शनं ।
उभाभ्यामपि मत्ताभ्यां कुञ्जराभ्यां यथा वने । शृगालस्त्वब्रवीत् कृष्णं समरे समुपस्थितं ।
युद्धरागेण तेजस्वी मोहात्स्खलितगौरवः । गोमन्ते युद्धमार्गे वै यत्त्वया कृष्ण चेष्टितं ।
अनायकानां मूर्खाणां नृपाणां दुर्व्वले बले । स मे सुविदितः कृष्ण क्षत्रियाणां पराजयः ।
कृपणानामसत्त्वानामबुद्धीनां रणोत्सवे । तिष्ठेदानीं यथाकामं स्थितोऽहं पार्थिवे पदे ।
क यास्यसि मया रुद्धो रणेष्वपरिनिष्ठितः । न चाहमेकं सबलो युक्तस्त्वां योद्धुमाहवे ।
अहमेकस्त्वमप्येको द्वौ युध्याव रणे स्थितौ । किं जनेन निरस्तेन त्वं वाऽहं वा रणे स्थितः ।
हते मयि त्वमप्येको वासुदेवो भविष्यसि । धर्म्मयुद्धेन निधनं प्रयास्येकतरो रणे ।

लोकेऽस्मिन् वासुदेवोऽहं भविष्यामि हते त्वयि । शृगालस्य वचः श्रुत्वा वासुदेवः क्षमापरः । ५९७५
इष्टतः प्रहरस्वेति तमुक्त्वा चक्रमाददे । ततः सायकजालानि शृगालः क्रोधमूर्च्छितः ।
चिक्षेप कृष्णे घोराणि युद्धाय लघुविक्रमः । शस्त्राणि यानि चान्यानि मुसलाद्यानि संयुगे ।
पातयामास गोविन्दे स शृगालः प्रतापवान् । शृगालप्रहितैरस्त्रैः पावकज्वालमालिभिः ।
निर्द्दयाभिहतः कृष्णः स्थितो गिरिरिवाचलः । सोऽस्त्रप्रहाराभिहतः किञ्चिद्रोषसमन्वितः ।
चक्रमुद्यम्य गोविन्दः शृगालोरसि चाक्षिपत् । तं रथस्थं प्रमाणस्थं शृगालं युद्धदुर्म्मदं । ५९८०
जघान समरे चक्रं जातदर्पं महाबलं । निहत्य समरे शूरं शृगालं युद्धकामुकं ।
ततः सुदर्शनं चक्रं पुनरायाद्धरेः करं । चक्रेणोरसि निर्भिन्नः स गतासुर्गतोत्सवः ।
पपात क्षतजस्रावी शृगालोऽद्रिरिवाहतः । निशम्य तं निपतितं वज्रपातादिवाचलं ।
तस्य सैन्यान्यपययुर्विमनांसि हते नृपे । केचित् प्रविश्य नगरं कश्मलाभिहता भृशं ।
रुरुदुर्दुःखसन्तप्ता भर्तृशोकाभिपीडिताः । केचित्तत्रैव शोचन्तः स्मरन्तः सुकृतानि च । ५९८५
पतितं भूमिपं भूमौ न त्यजन्ति स्म दुःखिताः । ततो मेघनिनादेन स्वरेणारिविमर्द्दनः ।
कृष्णः कमलपत्राक्षो जनानामभयं ददौ । चक्रोचितेन हस्तेन राजताङ्गुलिपर्व्वणा ।
न भेतव्यं न भेतव्यमिति तानभ्यभाषत । नास्य पापस्य दोषेण निराबाधकरं जनं ।
घातयिष्यामि समरे नेदं शूरव्रतं भृशं । अश्रुपूर्णमुखा दीनाः क्रन्दमाना भृशं तदा ।
पतितोऽयं शृगालस्य भ्रष्टः संलीनमानसः । ते स्म पश्यन्ति पतितं धरण्यां धरणीपतिं । ५९९०
चक्रनिर्द्दारितोरस्कं भिन्नशृङ्गमिवाचलं । विलपन्ति स्म समरे सचिवाः सप्रजा भृशं ।
मात्रुपालिवणा दीनाः शोकस्य वशमागताः । तेषां रुदितशब्देन पौराणां विविधैः स्वरैः ।
महिष्यस्तस्य निष्पेतुः सपुत्रा रुदिताननाः । तास्तं निपातितं दृष्ट्वा श्लाघ्यं भूमिपतिं पतिं ।
स्तनानारुज्य करजैर्भृशार्त्ताः पर्य्यदेवयन् । उरांस्युरसिजांश्चैव शिरोजान्याकुलान्यपि ।
निर्द्दयं ताडयन्त्यस्ता विस्वरं रुरुदुः स्त्रियः । तस्योरसि सुदुःखार्त्ता रुदितक्लिन्नलोचनाः । ५९९५
पेतुरूर्द्ध्वभुजाः सर्व्वा कृत्तमूला लता इव । तासां वाष्पाम्बुपूर्णानि नेत्राणि नृपयोषितां ।
वारिविप्रहतानीव पङ्कजानि चकाशिरे । ताः पतिं पतितं भूमौ रुदन्त्यो हृदि ताडिताः ।
लालप्यमानाः करुणं योषितः पर्य्यदेवयन् । पुत्रञ्चास्य पुरस्कृत्य बालं प्रस्रुतलोचनं ।
शक्रदेवं पितुः पार्श्वे द्विगुणं रुरुदुः स्त्रियः । अयन्ते वीर विक्रान्तो बालः पुत्रो न पण्डितः ।
त्वद्विहीनः कथमयं पदे स्थास्यति पैतृके । कथमेकपदे त्यक्त्वा गतोऽस्यन्तःपुरं परं । ६०००
अनूपास्तत्र भीरूणां किं कुर्म्म विधवा वयं । तस्य पद्मावती नाम महिषी प्रमदोत्तमा ।
पुत्रमाता सुतं गृह्य वासुदेवमुपस्थिता । यस्त्वया पातितो वीर रणश्लाघेन कर्म्मणा ।
तस्य प्रेतगतस्यायं पुत्रस्त्वां शरणं गतः । यदि त्वां प्रणमेतासौ कुर्य्याद्वा शासनं तव ।
नायमेकप्रहारेण जनलप्येत दारुणं । यदि कुर्य्यादयं मूढस्त्वयि बान्धवकं विधिं ।

नैवं परीतः कृपणः स्वेन धरणीतले। अयमस्य विपन्नस्य बान्धवस्य तवानघ। ५१०५
सन्ततीरक्ष्यतां वीर पुत्रः पुत्र इवात्मजः। तस्यास्तद्वचनं श्रुत्वा महिष्या यदुनन्दनः।
मृदुपूर्व्वमिदं वाक्यमुवाच वदताम्वरः। राजपत्नि मतो रोषः सहानेन दुरात्मना।
प्रकृतिस्था वयं जाता देवि सैवास्मि बान्धवः। रोषो मे विगतः साध्वि तव वाक्यैरकिल्बिषैः।
योऽयं पुत्रः शृगालस्य ममाप्येष न संशयः। अभयश्चाभिषेकश्च ददाम्यस्मै सुखाय वै।
आहूयन्तां प्रकृतयः पुरोधा मन्त्रिणस्तथा। पितृपैतामहे राज्ये तव पुत्रोऽभिषिच्यतां। ५११०
ततः प्रकृतयः सर्व्वाः पुरोधा मन्त्रिणस्तथा। अभिषेकार्थमाजग्मुर्यत्र तौ रामकेशवौ।
ततः सिंहासनस्थं तं राजपुत्रं जनार्द्दनः। अभिषेकेण दिव्येन योजयामास वीर्य्यवान्।
अभिषिच्य शृगालस्य करवीरपुरे सुतं। कृष्णस्तदहरेवाशु प्रयाणमभ्यरोचयत्।
रथेन हरियुक्तेन तेन युद्धार्ज्जितेन वै। केशवः प्रस्थितोऽध्वानं वृत्रहा त्रिदिवं यथा।
शक्रदेवोऽपि धर्म्मात्मा सह मात्रा परन्तपः। सबालवृद्धयुवतिर्मुख्याः प्रकृतयस्तथा। ५११५
शिविकायामथारोप्य शृगालं युद्धदुर्म्मदं। चलिता दूरमार्गेण पश्चिमाभिमुखा ययुः।
नैधनेन विधानेन चक्रुस्ते तस्य सत्क्रियां। सत्कारं कारयामासुः पितॄणां पारलौकिकं।
उद्दिश्योद्दिश्य राजानं श्राद्धं कृत्वा सहस्रशः। ततस्ते सलिलं दत्त्वा नामगोत्रादिकीर्त्तनैः।
पितर्य्युपरते घोरशोकसम्विग्नमानसः। कृतोदकं तदा राजा प्रविवेश पुरोत्तमं।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि शृगालवधे एकाधिकशततोऽध्यायः ॥ १०१ ॥
॥ वैशम्पायन उवाच ॥ तौ तु स्वल्पेन कालेन पञ्चरात्रोषितौ पथि। दमघोषेण सत्कृत्य एकरात्रोषितौ ततः। ५१२०
जग्मतुः सहितौ वीरौ मुदा परमया युतौ। नगरीं मथुरां प्राप्तौ वसुदेवसुतावुभौ।
ततः प्रत्युद्गताः सर्व्वे यादवा यदुनन्दनौ। सबला वृष्णयश्च उग्रसेनपुरोगमाः।
श्रेण्यः प्रकृतयश्चैव मन्त्रिणश्च यथोदिताः। सबालवृद्धा सा चैव पुरी समभिवर्त्तत।
नन्दितूर्य्याणिवाद्यन्त स्तूयेतां पुरुषोत्तमौ। रथ्याः पताकामालिन्यो भासन्ति स्म समन्ततः।
हृष्टप्रमुदिता सर्व्वा पुरी परमशोभिता। आसीत्तयोरागमने यथैवेन्द्रमहे तथा। ५१२५
मुदितास्तत्र गायन्ति राजमार्गेषु गायनाः। स्तवाशीर्व्वङ्कृता गाथा यादवानां प्रियङ्कराः।
गोविन्दरामौ संप्राप्तौ भ्रातरौ लोकविश्रुतौ। स्वे पुरे निर्भयाः सर्व्वे क्रीडध्वं यादवाः सुखं।
न तत्र कश्चिद्दीनो वा मलिनो वा विचेतनः। मथुरायामभूत् कश्चिद्रामकृष्णसमागमे।
वयांसि साधुवाक्यानि प्रहृष्टा गोवृषद्विपाः। नरनारीगणाश्चैव भेजिरे मानसं सुखं।
शिवाश्च प्रववुर्व्वाता विरजस्का दिशो दश। दैवतानि च सर्व्वाणि हृष्टान्यायतनेष्वपि। ५१३०
यानि लिङ्गानि लोकस्य हृष्टानीह कृते युगे। तानि सर्व्वाण्यदृश्यन्त तयोरागमने तदा।
ततः काले शिवे पुण्ये स्यन्दनेनारिमर्द्दनौ। हरियुक्तेन तौ वीरौ प्रविष्टौ मथुरां पुरीं।
प्रविशन्तं पुरीं रम्यां गोविन्दं राममेव च। अनुजग्मुर्यदुगणाः शक्रं देवगणा इव।

वसुदेवस्य भवनं पितुस्तौ यदुनन्दनौ । प्रविष्टौ हृष्टवदनौ चन्द्रादित्याविवाचलं ।
ततस्तौ वसुदेवस्य पादौ समभिवाद्य च । उग्रसेनन्तु राजानमन्यांश्च यदुपुङ्गवान् । ५०९५
यथान्यायं पूजयित्वा तौ सर्व्वैश्चाभिनन्दितौ । जग्मतुर्हृष्टमनसौ मातुरेव निवेशनं ।
तत्रायुधानि विन्यस्य गृहे स्वे स्वैरचारिणौ । मुमुदाते यदुवरौ वसुदेवसुतावुभौ ।
एवं तावेकनिर्म्माणौ मथुरायां शुभाननौ । उग्रसेनानुगौ भूत्वा कञ्चित् कालं विचेरतुः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि मथुराप्रत्यागमने द्व्यधिकशततोऽध्यायः ॥ १०२ ॥
॥ वैशम्पायन उवाच । कस्यचित्त्वथ कालस्य स्मृत्वा गोपेषु सौहृदं । जगामैको व्रजं रामः कृष्णस्यानुमते स्थितः ।
स गतस्तत्र रम्याणि ददर्श विपुलानि वै । भुक्तपूर्व्वाण्यरण्यानि सरांसि सुरभीणि च । ५१००
स प्रविष्टस्तु वेगेन तं व्रजं कृष्णपूर्व्वजः । वन्येन रमणीयेन वेशेनालङ्कृतः प्रभुः ।
स तानभाषत प्रीत्या यथापूर्व्वमरिन्दमः । गोपांस्तेनैव विधिना यथान्यायं यथावयः ।
तथैव प्राह तान् सर्व्वांस्तथा च परिहर्षयन् । तथैव सह गोपीभिर्दाजयन्मधुराः कथाः ।
तमूचुः स्थविरा गोपाः प्रियं मधुरभाषिणः । रामं रमयतां श्रेष्ठ प्रवासात् पुनरागतं ।
स्वागतं ते महाबाहो यदूनां कुलनन्दन । अद्य स्म निर्वृतास्तात यत्त्वां पश्यामहे वयं । ५१०५
प्रीताश्चैव वयं वीर यत्त्वं पुनरिहागतः । विख्यातस्त्रिषु लोकेषु रामः शत्रुभयङ्करः ।
वर्द्धनीया वयं नूनं त्वया यादवनन्दन । अथवा प्राणिनस्तात रमन्ते जन्मभूमिषु ।
त्रिदशानां वयं मान्या ध्रुवमद्यामलानन । ये स्म दृष्टास्त्वया तात काङ्क्षमाणास्तवागमं ।
दिष्ट्या ते निहता मल्लाः कंसश्च विनिपातितः । उग्रसेनोऽभिषिक्तश्च माहात्म्येनात्मजेन वै ।
समुद्रे च श्रुतोऽस्माभिस्तिमिना सह विग्रहः । गोमन्ते च श्रुतोऽस्माभिः क्षत्रियैः सह विग्रहः । ५११०
दरदस्य वधश्चैव जरासन्धपराजयः । तत्रायुधावतरणं श्रुतं नः परमाहवे ।
वधश्चैव शृगालस्य करवीरपुरोत्तमे । तत्सुतस्याभिषेकश्च नागराणाञ्च सान्त्वनं ।
मथुरायां प्रवेशस्तु कीर्त्तनीयः सुरोत्तमैः । प्रतिष्ठिता च वसुधा पार्थिवाश्च वशीकृताः ।
तव चागमनं दृष्ट्वा सभाग्याः स्म यथा पुरा । तेन स्म परितुष्टा वै हर्षिताश्च सबान्धवाः ।
प्रत्युवाच ततो रामः सर्व्वांस्तानभितः स्थितान् । यादवेष्वपि सर्व्वेषु भवन्तो मम बान्धवाः । ५११५
इहावयोर्गतं बाल्यमिह चैवावयोरतं । भवद्भिर्व्वर्द्धिताश्चैव यास्यामो विक्रियां कथं ।
गृहेषु भवतां भुक्तं गावश्च परिरक्षिताः । अस्माकं बान्धवाः सर्व्वे भवन्तो बहुसौहृदाः ।
ब्रुवत्येवं यथातत्त्वं गोपमध्ये हलायुधे । संहृष्टवदना भूयो बभूवुर्गोपयोषितः ।
ततो वनान्तरगतो रेमे रामो महाबलः । एतस्मिन्नन्तरे प्राप्ते रामाय विदितात्मने ।
गोपालैर्देशकालज्ञैरुपानीयत वारुणी । सोऽपिवत् पाण्डुराभ्राभस्तत्कालं ज्ञातिभिर्वृतः । ५१२०
वनान्तरगतो रामः पानं मदसमीरणं । उपनिन्युस्ततस्तस्मै वन्यानि विविधानि च ।
प्रत्ययरमणीयानि पुष्पाणि च फलानि च । मत्स्यांश्च विविधान् गन्धान् भक्ष्यांश्च हृदयङ्गमान् ।

सद्यो हृतानि पद्मानि विकचान्युत्पलानि च । शिरसा चारुकेशेन किञ्चिदावृत्तमौलिना ।
श्रवणैकावलम्बेन कुण्डलेन विराजता । चन्दनार्द्रेण पीनेन वनमालावलम्बिना ।
विबभावुरसा रामः कैलासेनेव मन्दरः । नीले वसानो वसने प्रत्यग्रजलदप्रभे ।
रराज वपुषा शुभ्रस्तिमिरौघे यथा शशी । लाङ्गलेनावसक्तेन भुजगाभोगवर्त्तिना ।
तथा भुजाग्रश्लिष्टेन मुषलेन च भास्वता । स मत्तो बलिनां श्रेष्ठो रराजाघूर्णिताननः ।
शैशिरीषु त्रियामासु यथा खेदालसः शशी । रामस्तु यमुनामाह स्नातुमिच्छे महानदि ।
एहि मामभिगच्छ त्वं रूपिणी सागरङ्गमे । सङ्कर्षणस्य मत्तोक्तां भारतीं परिभूय सा ।
नाभ्यवर्त्तत तं देशं स्त्रीस्वभावेन मोहिता । ततश्चुक्रोध बलवान्रामो मदसमीरितः ।
चकार स हलं हस्ते कर्षणाधोमुखं बली । तस्यामुपरि मेदिन्यां पेतुस्तामरसस्रजः ।
मुमुचुः पुष्पकोशैश्च पुष्परेणवरुणं जलं । स हलेनानताग्रेण कूले गृह्य महानदीं ।
चकर्ष यमुनां रामो व्युत्थितां वनितामिव । सा विह्वलजलस्रोता ह्रदप्रस्थितसञ्चया ।
व्यावर्त्तत नदी भीता हलमार्गानुसारिणी । लाङ्गलादिष्टमार्गा सा वेगगा वक्रगामिनी ।
सङ्कर्षणभयत्रस्ता योषेवाकुलताङ्गता । पुलिनश्रोणिबिम्बोष्ठी मृदितैस्तोयताडितैः ।
फेनमेखलसूत्रैश्च छिन्नैस्तीरान्तगामिनी । तरङ्गविषमापीडा चक्रवाकोन्मुखस्तनी ।
वेगगम्भीरवक्राङ्गी त्रस्तमीनविभूषणा । सितहंसेक्षणापाङ्गी काशक्षौमोज्झिताम्बरा ।
तीरजोद्धूतकेशान्ता जलस्खलितगामिनी । लाङ्गलोल्लिखितापाङ्गी क्षुभिता सागरङ्गमा ।
मत्तेव कुटिलापाङ्गी राजमार्गेण गच्छती । कृष्यते सा स्म वेगेन स्रोतःस्खलितगामिनी ।
उन्मार्गानीतमार्गा सा येन वृन्दावनं वनं । वृन्दावनस्य मध्येन सा नीता यमुना नदी ।
रोरूयमाणेव खगैरन्विता तोयवासिभिः । सा यदा समनुक्रान्ता नदी वृन्दावनं वनं ।
तदा स्त्रीरूपिणी भूत्वा यमुना राममब्रवीत् । प्रसीद नाथ भीताऽस्मि प्रतिलोमेन कर्मणा ।
विपरीतमिदं रूपं तोयञ्च मम जायते । असत्यहं नदीमध्ये रौहिणेय त्वया कृता ।
कर्षणेन महाबाहो स्वमार्गव्यभिचारिणी । प्राप्तां मां सागरे नूनं सपत्न्यो वेगगर्व्विताः ।
फेनहासैर्हसिष्यन्ति तोयव्यावृत्तगामिनीं । प्रसादं कुरु मे वीर याचे त्वां कृष्णपूर्व्वज ।
सुप्रसन्नमना नित्यं भवस्व त्वं सुरोत्तम । कर्षणायुधहृष्टाऽस्मि रोषोऽयं विनिवर्त्त्यतां ।
गच्छामि चरणौ मूर्ध्ना तवाहं लाङ्गलायुध । मार्गमादिष्टमिच्छामि क्व गच्छामि महाभुज ।
प्रणामावनतां दृष्ट्वा यमुनां लाङ्गलायुधः । प्रत्युवाचार्णववधूं मदक्लान्तमिदं वचः ।
लाङ्गलादिष्टमार्गा त्वमिमं मे प्रियदर्शने । देशमम्बुप्रदानेन प्लावयस्वाखिलं शुभे ।
एष ते सुभ्रु सन्देशः कथितः सागरङ्गमे । शान्तिं व्रज महाभागे गम्यताञ्च यथासुखं ।
लोका हि यावत् स्थास्यन्ति तावत्तिष्ठतु मे यशः । यमुनाकर्षणं दृष्ट्वा सर्व्वे ते व्रजवासिनः ।
साधु साध्विति रामाय प्रणामञ्चक्रिरे तदा । तां विसृज्य महावेगां तांश्च सर्व्वान् वनौकसः ।

ततः सञ्चिन्त्य मनसा बुद्ध्या निश्चित्य चैव ह । पुनः प्रतिजगामाशु मथुरां रोहिणीसुतः ।
स गत्वा मथुरां रामो भवने मधुसूदनं । परिवर्त्तमानं ददृशे पृथिव्यां सारमव्ययं ।
तथैवाध्वन्यवेशेन सोपस्पृष्टो जनार्द्दनं । प्रत्यग्रवनमालेन वक्षसाऽतिविराजता । ५७९५
स दृष्ट्वा तूर्णमायान्तं रामं लाङ्गलधारिणं । सहसोत्थाय गोविन्दः प्रददावासनोत्तमं ।
उपविष्टं ततो रामं पप्रच्छ कुशलं व्रजे । बान्धवेषु च सर्व्वेषु गोषु चैव जनार्द्दनः ।
प्रत्युवाच ततो रामो भ्रातरं साधुभाषिणं । सर्व्वत्र कुशलं कृष्ण येषां कुशलमिच्छसि ।
ततस्तयो र्विचित्रार्थाः पौराण्यो ह्यभवन् कथाः । वसुदेवाग्रतः पुण्या रामकेशवयोस्तदा ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि यमुनाकर्षणे त्र्यधिकशततोऽध्यायः ॥ १०३ ॥
॥ वैशम्पायन उवाच ॥ एतस्मिन्नन्तरे प्राप्ता लोकप्रावृत्तिका नराः । चक्रायुधगृहं सर्व्वे लोकपालगृहोपमं । ५८००
तेष्वात्ययिकशंसीषु लोकप्रावृत्तिकेष्विह । कृतसंज्ञा यदुश्रेष्ठाः समेताः कृष्णसंसदि ।
समागतेषु सर्व्वेषु यदुमुख्येषु संसदि । प्रावृत्तिका नराः प्राहुः पार्थिवात्ययिकं वचः ।
जनार्द्दन नरेन्द्राणां पार्थिवानां समागमः । शशंसुर्द्दाक्षिणात्यानां सुमहानित्यनेकशः ।
त्वरितास्तत्र गच्छन्ति नानाजनपदेश्वराः । कुण्डिने पुण्डरीकाक्ष भोजपुत्रस्य शासनात् ।
प्रकाशं स्म कथास्तत्र श्रूयन्ते मनुजेरिताः । रुक्मिणी किल नाम्ना स्त्री रुक्मिणः प्रथिता स्वसा । ५८०५
भावी स्वयम्वरस्तत्र तस्याः किल जनार्द्दन । इत्यर्थमेते नृवरा गच्छन्ति सबलानुगाः ।
तस्यास्त्रैलोक्यसुन्दर्य्यास्तृतीयेऽहनि यादव । रत्नभूषणभूषिण्या भविष्यति स्वयम्वरः ।
राज्ञां तत्र समेतानां हस्त्यश्वरथगामिनां । द्रक्ष्यामः शतशस्तत्र वृन्दानि च महात्मनां ।
सिंहशार्दूलदर्पाणां मत्तद्विरदगामिनां । सदा युद्धप्रियाणां हि परस्परमर्षिणां ।
जयाय शीघ्रं त्वरिता बलौघेन समन्विताः । निरुद्धाः पृथिवीपालाः किमेकान्तचरा वयं । ५८१०
निरुत्साहा भविष्यामो गच्छामो यदुसत्तम । श्रुत्वैतत् केशवो वाक्यं हृदि शल्यमिवार्पितं ।
निर्ज्जगाम यदुश्रेष्ठो यदूनां सहितो बलैः । यादवास्ते बलोदग्राः सर्व्वे संग्रामलालसाः ।
निर्ययुः स्यन्दनैर्द्दिव्यैर्गर्व्विता स्त्रिदशा इव । बलाग्रेण नियुक्तेन हरिरीशानसन्निभः ।
चक्रोद्यतकरः कृष्णो गदापाणिर्व्यरोचत । यादवाश्चापरे तत्र वासुदेवानुयायिनः ।
रथैरादित्यसङ्काशैः किङ्किणीप्रतिनादितैः । उग्रसेनस्तु गोविन्दं प्राह निश्चितदर्शनः । ५८१५
तिष्ठ त्वं नृपशार्दूल भ्राता मे सहितोऽनघ । त्वत्प्रिया निकृतिप्रज्ञाः प्रासादाश्छिद्रदर्शिनः ।
पुरीं शून्यामिमां वीर जघन्यैः पीडयन्ति नः । अस्माकं शङ्किताः सर्व्वे जरासन्धवशानुगाः ।
मोदन्ते सुखिनस्तत्र देवलोके यथाऽमराः ।
॥ वैशम्पायन उवाच ॥ तस्य तद्वचनं श्रुत्वा भोजराजो महायशाः । कृष्णं स्नेहेन विकृतं बभाषे वचनामृतं ।
कृष्ण कृष्ण महाबाहो यदूनां नन्दिवर्द्धन । श्रूयतां यदहं त्वद्य वक्ष्यामि रिपुसूदन । ५८२०
त्वया विहीनाः सर्व्वे स्म न शक्ताः सुखमासितुं । पुरेऽस्मिन् विषयान्ते वा पतिहीना इव स्त्रियः ।

त्वन्नाथा वयं तात तदा त्वद्बलमाश्रिताः । बिभीमो न नरेन्द्राणां सेन्द्राणामपि मानद ।
विजयाय यदुश्रेष्ठ यत्र यत्र गमिष्यसि । तत्र त्वं सहितोऽस्माभिर्गच्छेथा यादवर्षभ ।
तस्य राज्ञो वचः श्रुत्वा सस्मितं देवकीसुतः । यथेष्टं भवतामद्य तथा कर्त्ताऽस्म्यसंशयं ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि मन्त्रादाहरणे चतुरधिकशततमोऽध्यायः ॥ १०४ ॥
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा तु कृष्णो हि जगामाशु रथेन वै । भीष्मकस्य गृहे प्राप्तो लोहितायति भास्करे । ५८२५
प्राप्ते राजसमाजे तु शिबिराकीर्णभूतले । रङ्गं सुविपुलं दृष्ट्वा राजसीं तनुमाविशत् ।
वित्रासनार्थं भूपानां प्रकाशार्थं पुरातनं । मनसा चिन्तयामास वैनतेयं महाबलं ।
ततश्चिन्तितमात्रस्तु विदित्वा विनतात्मजः । सुखलक्ष्यं वपुः कृत्वा निलिल्ये केशवान्तिके ।
तस्य पक्षनिपातेन पवनोत्क्रान्तकारिणा । कम्पिता मनुजाः सर्व्वे न्युब्जाश्च पातिता भुवि ।
शिरोभिः पतिताः सर्व्वे प्राविपन्त यथोरगाः । तान् सन्निपतितान्दृष्ट्वा कृष्णो गिरिरिवाचलः । ५८३०
स तदा पक्षवातेन मेने पतगसत्तमं । ददर्श गरुडं प्राप्तं दिव्यस्रगनुलेपनं ।
पक्षवातेन पृथिवीं चालयन्तं मुहुर्मुहुः । पृष्ठासक्तैः प्रहरणैर्लेलिह्यद्भिरिवोरगैः ।
वैष्णवं हस्तसंक्षेपं गम्यमानमवाङ्मुखं । चरणाभ्यां प्रकर्षन्तं पाण्डुरं भोगिनाम्बरं ।
हेमपत्त्रैरुपचितं धातुमन्तमिवाचलं । अमृतारम्भहर्त्तारं द्विजेन्द्रं भुजगाशनं ।
त्रासनं दैत्यसंघानां वाहनं ध्वजलक्षणं । तं दृष्ट्वा सध्वजं प्राप्तं सचिवं साम्परायिकं । ५८३५
द्युतिमन्तं गरुत्मन्तं जगाद मधुसूदनः । दृष्ट्वा परमसंहृष्टः स्थितं देहमिवापरं ।
तुल्यसामर्थ्यया वाचा गरुत्मन्तमुपस्थितं ।
॥ कृष्ण उवाच ॥ स्वागतं खचरश्रेष्ठ सुरसेनारिमर्द्दन । विनताहृदयानन्द स्वागतं केशवप्रिय ।
व्रज पत्त्ररथश्रेष्ठ कैशिकस्य निवेशनं । वयन्तत्रैव गत्वाऽद्य प्रतीक्षामः स्वयम्वरं ।
राज्ञां तत्र समेतानां हस्त्यश्वरथगामिनां । द्रक्ष्यामः शतशस्तत्र समेतानां महात्मनां । ५८४०
एवमुक्त्वा महाबाहुर्वैनतेयं महाबलं । जगामाथ पुरीं कृष्णः कैशिकस्य महात्मनः ।
वैनतेयसखः श्रीमान् यादवैश्च महारथैः । विदर्भनगरीं प्राप्ते कृष्णे देवकिनन्दने ।
हृष्टाः प्रमुदिताः सर्व्वे निवासायोपचक्रमुः । सर्व्वे शस्त्रायुधधरा राजानो बलशालिनः ।
॥ वैशम्पायन उवाच ॥ एतस्मिन्नेव काले तु राजा नयविशारदः । कैशिकस्तत उत्थाय प्रहृष्टेनान्तरात्मना ।
अर्घ्यमाचमनीं दत्त्वा स राजा कैशिकः स्वयं । सत्कृत्य विधिवत्कृष्णं स्वपुरं संन्यवेशयत् । ५८४५
पूर्व्वमेव तु कृष्णाय कारितं दिव्यमन्दिरं । विवेश सबलः श्रीमान् कैलासं शङ्करो यथा ।
स्नानपानादिरत्नौघैरर्च्चितो वासवानुजः । सुखेनैवोषितः कृष्णस्तस्य राज्ञो निवेशने ।
पूजितो बहुमानेन स्नेहपूर्णेन चेतसा ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि रुक्मिणीस्वयंवरे पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥
॥ वैशम्पायन उवाच ॥ ते कृष्णमागतं दृष्ट्वा वैनतेयसहाच्युतं । बभूवुश्चिन्तयाविष्टाः सर्व्वे नृपतिसत्तमाः ।

ते समेत्य गता राजन् राजानो भीमविक्रमाः । मन्त्रयुद्धेषु कुशला नीतिशास्त्रार्थविक्तमाः । ५८५०
भीष्मकस्य सभां गत्वा रम्यां हेमपरिष्कृतां । सिंहासनेषु चित्रेषु विचित्रास्तरणेषु च ।
निषेदुस्ते नृपवरा देवा देवसभामिव । तेषां मध्ये महाबाहुर्जरासन्धो महाबलः ।
बभाषे सुमहातेजा देवान् विश्वेश्वरो यथा ।
॥ जरासन्ध उवाच ॥ श्रूयतां भो नृपश्रेष्ठा भीष्मकस्य महामतिः । कथ्यमानं यथा बुद्ध्या वचनं वदतांवराः ।
योऽसौ कृष्ण इति ख्यातो वसुदेवसुतो बली । वैनतेयसहायेन संप्राप्तः कुण्डिनं त्विह । ५८५५
कन्याहेतोर्महातेजा यादवैरभिसंवृतः । अवश्यं कुरुते यत्नं कन्यावाप्तिर्यथा भवेत् ।
यदत्र कारणं कार्य्यं सुनयोपेतवद्भुतं । कुरुध्वं नृपशार्दूला विनिश्चित्य बलाबलं ।
पदातिनौ महावीर्य्यौ वसुदेवसुतावुभौ । वैनतेयं विना तस्मिन् गोमन्ते पर्व्वतोत्तमे ।
यत् कृतं समरं घोरं भवद्भिर्विदितं महत् । कृष्णस्य यादवैश्चैव भोजान्धकमहारथैः ।
समेत्य युध्यमानस्य कीदृशो विग्रहो भवेत् । कन्यार्थे यतमानेन गरुडस्थेन विष्णुना । ५८६०
कः स्थास्यति रणे तस्मिन्नपि शक्रः सुरैः सह । पुरा एकार्णवे घोरे श्रूयते मेदिनी त्वियं ।
पातालस्य तले मग्ना विष्णुना प्रभविष्णुना । वाराहं रूपमास्थाय उद्धृता जगदादिना ।
हिरण्याक्षस्तु दैत्येन्द्रो वाराहेण निपातितः । हिरण्यकशिपुश्चैव महाबलपराक्रमः ।
अवध्योऽमरदैत्यानामृषिगन्धर्व्वकिन्नरैः । यक्षराक्षसनागानां नाकाशे नावनिस्थले ।
न चाभ्यन्तरवाह्याभ्यां न शुष्केणार्द्रकेण च । अवध्यस्त्रिषु लोकेषु दैत्येन्द्रो ह्यपराजितः । ५८६५
नारसिंहेन रूपेण निहतो विष्णुना पुरा । वामनेन तु रूपेण कश्यपस्यात्मजो बली ।
अदित्या गर्भसंभूतो बलिर्बद्धोऽसुरोत्तमः । सत्यरज्जुमयैः पाशैः कृतः पातालसंश्रयः ।
कार्त्तवीर्य्यो महावीर्य्यः सहस्रभुजविग्रहः । दत्तात्रेयप्रसादेन मत्तो वरमदेन च ।
जामदग्न्यो महातेजा रेणुकागर्भसम्भवः । त्रेताद्वापरयोः सन्धौ रामः शस्त्रभृतांवरः ।
परशुना वज्रकल्पेन सप्तद्वीपेश्वरो नृपः । निहतो विष्णुना भूयस्तद्रूपेण हैहयः । ५८७०
इक्ष्वाकुकुलसंभूतो रामो दाशरथिः पुरा । त्रिलोकजयिनं वीरं रावणं वै न्यपातयत् ।
पुरा कृतयुगे विष्णुः संग्रामे तारकामये । षोडशार्द्धभुजो भूत्वा गरुडस्थो हि वीर्य्यवान् ।
निजघानासुरान् युद्धे वरदानेन दर्पितान् । कालनेमिञ्च दैत्येन्द्रं देवतानां भयप्रदं ।
सहस्रकिरणाभेन चक्रेण न्यहनद्युधि । महायोगबलेनाजौ विश्वरूपेण विष्णुना ।
अनेन प्राप्तकालास्ते निहता बहवोऽसुराः । वने वनचरा दैत्या महाबलपराक्रमाः । ५८७५
निहता बालभावेन प्रलम्बारिष्टधेनुकाः । शकुनिं केशिनञ्चैव यमलार्ज्जुनकावपि ।
नागं कुवलयापीडं चाणूरं मुष्टिकन्तथा । कंसञ्च बलिनां श्रेष्ठं सगणं देवकीसुतः ।
न्यहनद्धि पर्व्वसु क्रीडमानो हि केशवः । एवमादीनि दिव्यानि रूपाणि विष्णुना ।
कृतानि तत्र तत्रैव मायया प्रभविष्णुना । तेनाहं वः प्रवक्ष्यामि भवतां हितकाम्यया ।

तं मन्ये केशवं विष्णुं सुरासुरनमस्कृतं । नारायणं जगद्योनिं पुराणं पुरुषं ध्रुवं । ५८८०
स्रष्टारं सर्व्वभूतानां व्यक्ताव्यक्तं सनातनं । श्रेष्ठं सर्व्वभूतानां सर्व्वलोकनमस्कृतं ।
अनादिमध्यनिधनं क्षरमक्षरमव्ययं । स्वयम्भुवमजं स्थाणुमजेयं सचराचरैः ।
त्रिविक्रमं त्रिलोकेशं त्रिदशेन्द्रारिनाशनं । इति मे निश्चला बुद्धिर्जातोऽयं मथुरामधि ।
कुले महति वै राज्ञां विपुले चक्रवर्त्तिनां । कथमन्यस्य पुंसस्तु गरुत्मान् वाहनो भवेत् ।
विशेषेण तु कन्यार्थे विक्रमस्थे जनार्द्दने । कः स्थास्यति पुमानद्य गरुडस्याग्रतो बली । ५८८५
स्वयंवरकृतेनायं विष्णुः स्वयमिहागतः । विष्णोरागमने चैव महान्दोषः प्रकीर्त्तितः ।
भवद्भिरनुचिन्त्येदं क्रियतां यदनन्तरं ।
॥ वैशम्पायन उवाच ॥ एवं विब्रुवमाणन्तु मगधानां जनेश्वरं । सुनीथोऽथ महाप्राज्ञो वचनञ्चेदमब्रवीत् ।
॥ सुनीथ उवाच ॥ सम्यगाह महाबाहुर्मगधाधिपतिर्नृपः । समक्षं नरदेवानां यथा वृत्तं महाहवे ।
गोमन्ते रामकृष्णाभ्यां कृतं कर्म्म सुदुष्करं । गजाश्वरथसम्बाधा पत्तिध्वजसमाकुला । ५८९०
निर्द्दग्धा महती सेना चक्रलाङ्गलवह्निना । तेनायं मागधः श्रीमाननागतमचिन्तयत् ।
भुवने राजसेनायामनुसृत्य सुदारुणं । यदात्योर्युध्यतोस्तत्र बलकेशवयोर्युधि ।
दुर्निवार्य्यतरैर्घातैरभवद्वाहिनीक्षयः । विदितं वः सुपर्णस्य आगतस्य नृपोत्तमाः ।
पक्षवेगानिलोद्धूता बभ्रमुर्गगणेचराः । समुद्राः क्षुभिताः सर्व्वे चचालाद्रिर्महो मुहुः ।
वयञ्च सर्व्वे सन्त्रस्ताः किमुत्पातेति विक्लवाः । यदा सन्नह्य युध्येत आरूढः केशवः खगे । ५८९५
कथमस्मद्विधैः शक्यं प्रतिष्ठातुं रणाजिरे । राज्ञां स्वयंवरो नाम सुमहान् हर्षवर्द्धनः ।
कृतो नरवरैराद्यैर्यशोधर्म्मस्य वै विधिः । इदन्तु कुण्डिनगरमासाद्य मनुजेश्वरैः ।
पुनर्द्रक्ष्यते नूनं महापुरुषविग्रहः । यदि सा वरयेदन्यं राज्ञां मध्ये नृपात्मजा ।
कृष्णस्य भुजयोर्व्वीर्य्यं कः पुमान् प्रसहिष्यति । विख्यापितस्तु दोषोऽयं स्वयंवरमहोत्सवे ।
तदर्थमागतः कृष्णो वयञ्चैव नराधिपाः । कृष्णस्यागमनञ्चैव नृपाणामपि गर्हितं । ५९००
कन्याहेतोर्नरेन्द्राणां यथा वदति मागधः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि रुक्मिणीस्वयंवरे सुनीथवाक्ये षडधिकशततोऽध्यायः ॥ १०६ ॥
॥ वैशम्पायन उवाच ॥ इत्येवमुक्ते वचने सुनीथेन महात्मना । करूषाधिपतिर्व्वीरो दन्तवक्त्रोऽभ्यभाषत ।
॥ दन्तवक्त्र उवाच ॥ यदुक्तं मागधेन्द्रेण सुनीथेन नराधिपाः । युक्तपूर्व्वमिदं मन्ये यदस्माकं वचो हितं ।
न च विद्वेषणेनाहं न चाहङ्कारवादिना । न चात्मविजिगीषुत्वाद्दूषयामि वचोऽमृतं ।
वाक्यार्णवं महागाधं नीतिशास्त्रार्थदंशितं । क एष निखिलं वक्तुं शक्तो वै राजसंसदि । ५९०५
किन्त्वनुस्मरणार्थं हि यद्ब्रवीमि शृणुध्व मे । आगतो वासुदेवेति किमाश्चर्य्यं नराधिपाः ।
यथागता वयं सर्व्वे तथा कृष्ण इहागतः । किमत्र दोषो गोष्ठ्यां वा कन्याहेतोः समागताः ।
यदस्माभिः समेत्यैव कृतं गोमन्तरोधनं । तत्र युद्धकृतं दोषं कथं वः कर्त्तुमर्हथ ।

वनवासे स्थितौ वीरौ कंसव्यामोहहेतुना । देवर्षिवचनाद्राजन् वृन्दावनतटे स्थितौ ।
तावाहूय वधार्थाय उभौ रामजनार्द्दनौ । नागेनोद्दीपितौ वीरौ हतनागौ विवेषितौ । ५९१०
ततः स्ववीर्य्यमाश्रित्य निहतो रङ्गसागरे । गतासुरिव चासीनो मथुरेशः सहानुगः ।
किमत्र विहितो दोषो यैनास्माभिर्व्वयोधिकैः । उपरोधपरा राज्ञो वयं सर्व्वे समागताः ।
सेनातिबलमालोक्य वित्रस्तौ रामकेशवौ । पुरं स्वं समुत्सृज्य गोमन्तं पर्व्वतं गतौ ।
तत्रापि गतमस्माभिर्हन्तुं समरयोधिभिः । अप्राप्तयौवनाभ्यान्तु पदाताभ्यां रणाजिरे ।
रथाश्वनरनागेन तत्र वै विग्रहः कृतः । कृत्वोपरोधं शैलः स चात्रधर्म्मेण दीपितः । ५९१५
दावाग्निमुखमाविश्य मृतौ यत्र तपस्विनौ । विनीत इति मन्यामः सर्व्वे क्षत्रियपुङ्गवाः ।
प्रतियुद्धं करोत्येवं दूषयाम जनार्द्दनं । यत्र यत्र प्रयास्यामो वयं तत्र भवेत् कलिः ।
प्रीत्यर्थं प्रयतिष्यामः कृष्णेन सह भूमिपाः । इदं कुण्डिपुरं कृष्णो ह्यागतः कलिहेतुना ।
कन्यानिमित्तागमने कस्य युद्धं प्रयच्छति । मर्त्येऽस्मिन् पुरुषेन्द्रोऽसौ न कश्चित् प्राकृतो नरः ।
देवलोके च देवेशः प्रवरः पुरुषोत्तमः । देवानामपि कर्त्ताऽसौ लोकानाञ्च विशेषतः । ५९२०
न देवे बालिशा बुद्धिर्न चेर्ष्या नारि मत्सरः । न सर्व्वो न कृशो नार्त्तः प्रणतार्त्तिहरः सदा ।
एष विष्णुः प्रभुर्द्देवो देवानामपि दैवतं । आगतो गरुडेनेह स्वच्छन्दप्राकाम्यहेतुना ।
न सेनासहितो याति कृष्णः शत्रुविनाशने । इमां यात्रां विजानीध्वं प्रीत्यर्थं ह्यागतो हरिः ।
सहितो यादवेन्द्रैश्च भोजवृष्ण्यन्धकैरिह । अर्घ्यमाचमनीं दत्त्वा आतिथ्यञ्च नराधिपाः ।
करिष्यामो वयं सर्व्वे केशवाय महात्मने । एवं सन्धानतः कृत्वा कृष्णेन सहिता वयं । ५९२५
वसामो विगतोद्वेगा निर्भया विगतज्वराः । तस्य तद्वचनं श्रुत्वा दन्तवक्रस्य धीमतः ।
शाल्वः प्रवदतां श्रेष्ठस्तानुवाच नराधिपान् ।
॥ शाल्व उवाच ॥ किं भयेनास्य नः सर्व्वे न्यस्तशस्त्रा भवामहे । सन्धानकरणे हेतोः कृष्णाच्च भयकम्पिताः ।
परस्तवेन किं कार्य्यं विनिन्द्य बलमात्मनः । नैव धर्म्मो नरेन्द्राणां क्षात्त्रधर्म्मे च तिष्ठतां ।
महत्सु राजवंशेषु संभूताः कुलवर्द्धनाः । तेषां कापुरुषा बुद्धिः कथं भवितुमर्हति । ५९३०
अहं जानामि वै कृष्णमादिदेवं सनातनं । प्रभुं सर्व्वामरेन्द्राणां नारायणपरायणं ।
वैकुण्ठमजयं लोके चराचरगुरुं हरिं । सम्भूतं देवकीगर्भे विष्णुं लोकनमस्कृतं ।
कंसराजवधार्थाय भारावतरणाय च । अस्माकञ्च विनाशाय लोकसंरक्षणाय च ।
अंशावतरणे कृत्स्नं जाने विष्णोर्विचेष्टितं । संग्राममतुलं कृत्वा विष्णुना सह भूमिपाः ।
चक्रानलाग्निनिर्द्दग्धा यास्यामो यमसादनं । तच्च जानामि राजेन्द्राः कालेनायुःक्षयो भवेत् । ५९३५
नाकाले म्रियते कश्चित् प्राप्ते काले न जीवति । एवं विनिश्चयं बुद्ध्वा न कुर्य्यात् कस्यचिद्भयं ।
स एव भगवान् विष्णुरालोक्य तपसः क्षयं । निहन्ता दितिजेन्द्राणां यथाकालेन योगवित् ।
बलिं वैरोचनिञ्चैव बद्धाऽबध्यं महाबलं । कृतवान्देवदेवो वै पातालतलवासिनं ।

एवमादीनि चान्यानि विश्लेषिष्टानि वै नृपाः। तस्मात्‌ युक्तं भवतां विग्रहार्थे विचारणं ।
न च संग्रामहेतोर्हि कृष्णस्यागमनं त्विह। यस्य वा तस्य वा कन्या वरयिष्यति तस्य सा । ५९८०
किमत्र विग्रहो राज्ञां प्रीतिर्भवति वै ध्रुवं ।
॥ वैशम्पायन उवाच ॥ एवं कथयमानानां नृपाणां बुद्धिशालिनां । न किञ्चिदब्रवीद्राजा भीष्मकः पुत्रकारणात्।
महावीर्य्यमदोत्सिक्तं भार्गवास्त्राभिरक्षितं । रणे प्रचण्डातिरथं विचिन्त्य मनसा सुतं ।
कृष्णं न सहते नित्यं पुत्रो वै बलदर्पितः। नित्याभिमानी च रणे न बिभेति च कस्यचित्।
कृष्णस्य भुजवीर्य्येण म्रियते नात्र संशयः। भविष्यति ततो युद्धं महापुरुषविग्रहं । ५९८५
द्वेषी चैवाभिमानी च कुतो जीवति मे सुतः। जीवितं नात्र पश्यामि मम पुत्रस्य केशवात्।
कन्याहेतोः सुतं ज्येष्ठं पितॄणां नन्दिवर्द्धनं । कारयिष्ये कथं युद्धं पुत्रेण सह केशवं।
न च नारायणं देवं वरमिच्छति रुक्मवान्। मूढभावमदोन्मत्तः संग्रामेष्वनिवर्त्तकः।
नियतं भस्मसाद्याति तूलराशिर्यथाऽनले। करवीरेश्वरः शूरः शृगालस्त्रिजयोधिना।
क्षणेन भस्मसान्नीतः केशवेन बलीयसा। वृन्दावने वसन् श्रीमान् केशवो बलिनाम्वरः। ५९९०
उद्धृत्यैकेन हस्तेन सप्ताहं धृतवान् गिरिं। दुष्करं कर्म्म संस्मृत्य मनः सीदति मे भृशं।
इन्द्रस्तु स्वयमागम्य दैवतैः सह वृत्रहा। अभिषिच्याब्रवीत् कृष्णमुपेन्द्रेति शचीपतिः।
यथा च दमितो नागः कालियो यमुनाह्रदे। विषाग्निज्वलितो घोरः कालान्तकसमप्रभः।
केशी चैव महावीर्य्यो दानवो हयविग्रहः। निहतो वासुदेवेन देवैरपि दुरासदः।
सान्दीपनिसुतश्चैव चिरनष्टं हि सागरे। कृष्णः पञ्चजनं हत्वा चानयद्यममन्दिरात्। ५९९५
गोमन्ते सुमहद्युद्धं बहुभिश्चैव तावुभौ। कृत्वा विनाशजननं गजाश्वरथसंकुलं।
गजेन गजवृन्दानि रथेन रथयोधिनः। सादिनस्त्वाश्वयोधेन चरणेन पदातिनः।
जघ्नतुस्तौ महावीर्य्यौ वसुदेवसुतावुभौ। न देवासुरगन्धर्व्वा न यक्षोरगराक्षसाः।
न नागा न च दैत्येन्द्रा न पिशाचा न गुह्यकाः। कृतवन्तस्तथा घोरं गजाश्वरथसंक्षयं।
तमनुस्मृत्य संग्रामं भृशं सीदति मे मनः। न मया श्रुतपूर्व्वो वा दृष्टपूर्व्वः कुतोऽपि वा। ६०००
तादृशो भुवि मर्त्योऽन्यो वासुदेवात् सुरोत्तमात्। सम्यगाह महाबाहुर्दन्तवक्रो महाद्युतिः।
सान्त्वयित्वा महावीर्य्यं संविधास्याम यत् क्षमं।
॥ वैशम्पायन उवाच ॥ इति सञ्चिन्त्य मनसा बलाबलविनिश्चयं। गमनाय मतिश्चक्रे प्रसादयितुमच्युतं।
चिन्त्यमानो नरेन्द्रैश्च बहुभिर्न्नयशालिभिः। सूतमागधवन्दिभ्यो बोधितस्तुतिमङ्गलैः।
प्रभातायां रजन्यान्तु कृतपूर्व्वाह्णिकक्रियाः। उपविष्टा नृपाः सर्व्वे स्वेषु विश्रामवेश्मसु। ६००५
ये विसृष्टास्तु वै राजन् विदर्भायां नराधिपैः। तैरागम्य स्वराजेभ्यो रहो गत्वा निवेदितं।
श्रुत्वा कृष्णाभिषेकन्तु केचिद्धृष्टा नराधिपाः। केचिद्दीनतरा भीता उदासीनास्तथाऽपरे।
त्रिधा प्रभिन्ना सा सेना नरनागाश्वशालिनी। महार्णव इव क्षुब्धा अभिषेकेण चालिता।

नृपाणां भेदमालोक्य भीष्मको राजसत्तमः । व्यतिक्रममचिन्त्यञ्च कृतं नृपतिना स्वयं ।
विचिन्त्य मनसा राजा दूयमानेन चेतसा । जगाम नरदेवानां समाजे प्रतिबोधितुं । ५९७०
एतस्मिन्नन्तरे दूताः सम्प्राप्ताः कैशिकान्तिकात् । लेखमुद्धृत्य शिरसा विविशुश्च नृपार्णवं ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि रुक्मिणीस्वयंवरे सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥
॥ जनमेजय उवाच ॥ हत्वा कंसं महावीर्य्यं देवैरपि दुरासदं । नाभिषिक्तः स्वयं राज्ये नोपविष्टो नृपासने ।
कन्यार्थे चागतः कृष्णस्तत्रापि न कृतातिथिः । असमानमतुलं प्राप्य चाल्पवान् केन हेतुना ।
विनतायाः सुतश्चैव महाबलपराक्रमः । स चापि क्षमया युक्तः कारणं किमपेक्षितः ।
एतदाख्याहि भगवन् परं कौतूहलं हि मे । ५९७५
॥ वैशम्पायन उवाच ॥ विदर्भनगरीं प्राप्ते वैनतेये सहाच्युते । मनसा चिन्तयामास वासुदेवाय कैशिकः ।
दृष्टाश्चर्य्यं हि नः सर्व्वान् ध्रुवं पापक्षयो भवेत् । विशुद्धभावः कृष्णस्य आवयोर्हृष्टतत्त्वतः ।
अतः पात्रतरः कोऽन्यस्त्रिषु लोकेषु विद्यते । कृष्णात् कमलपत्राक्षाद्देवदेवाज्जनार्द्दनात् ।
तस्यावां किं प्रदास्यावश्चातिथ्यकारणेन ह । पात्रमासाद्य वै राजन् यया धर्म्मो न लुप्यते ।
एवमन्योन्यमश्चिन्त्य भ्रातरौ क्रथकैशिकौ । स्वराज्यं दातुकामौ तौ जग्मतुः केशवान्तिकं । ५९८०
देवमासाद्य तौ वीरौ विदर्भनगराधिपौ । ऊचतुस्तौ महात्मानौ प्रणम्य शिरसा हरिं ।
अद्यावां सफलं जन्म अद्यावां प्रथितं यशः । अद्यावां पितरस्तृप्ता देव त्वयि गृहागते ।
चामरं व्यजनं छत्रं ध्वजं सिंहासनं बलं । स्फीतकोषा पुरी चैव आवाभ्यां सहितं तव ।
उपेन्द्रस्त्वं महाबाहो देवेन्द्रेणाभिषिक्तवान् । आवामिह तु राज्ये त्वामभिषिक्षाव वै प्रभो ।
आवयोर्यत् कृतं कार्य्यं बहुभिः पार्थिवैरपि । शक्यते नान्यथा कर्त्तुं जरासन्धेन वा स्वयं । ५९८५
शत्रुस्ते मागधो राजा जरासन्धो महाद्युतिः । कथान्ते ब्रुवते राजन्नृपाणामभयप्रदः ।
सिंहासनमनध्यास्य पुरश्चास्य न विद्यते । कथं राजसमाजेऽस्मिन्नास्यते देवकीसुतः ।
कृष्णोऽपि सुमहावीर्य्यो ह्यभिमानी महाद्युतिः । न चागमिष्यते चास्मिन् कन्यार्थे च स्वयंवरं ।
पार्थिवेषूपविष्टेषु स्वेषु सिंहासनेषु वै । कथमास्यति नीचेषु आसनेषु महाद्युतिः ।
इति सञ्चिन्त्यमानस्तु श्रुत्वाऽसौ भीष्मको नृपः । आवयोः सह संमन्त्र्य विग्रहोपशमार्थिना । ५९९०
तव विश्रामहेतोर्हि कारितेदं गृहोत्तमं । देवानामपि देवोऽसि सर्व्वलोकनमस्कृतः ।
मानुषे मर्त्यलोकेऽस्मिन् राजेन्द्रत्वं समाचर । समाजे मानुषेन्द्राणां माभूदासनसङ्कटं ।
विदर्भनगरे तेषां राजेन्द्रत्वं समाचर । आस्यतामासने शुभ्रे श्वः प्रभाते महाद्युते ।
अधिवास्यात्मनात्मानं विधिदृष्टेन कर्म्मणा । यथा गमिष्यन्ति नृपाः करिष्ये देवशासनात् ।
एवमुक्त्वा सुरश्रेष्ठं प्रणिपत्य कृताञ्जली । प्रेषयामासतुर्वीरौ रङ्गमध्ये नृपैर्वृतौ । ५९९५
देवदूतस्य वचनं यथोक्तं वज्रपाणिना । लिखित्वा सुमहातेजाः कैशिकः प्राह शासनं ।
॥ कैशिक उवाच ॥ विदितं वो नृपाः सर्व्वे वैनतेयसहाच्युतः । आगतोऽतिथिरूपेण विदर्भनगरीं हरिः ।

प्राप्तमालोक्य पौत्रोऽयमिति सञ्चिन्त्य भूपतिः । प्रददौ वासुदेवाय स्वराज्यं धर्म्महेतुना ।
इदमासनमास्स्वेति भ्राता मे चोदिते ततः । वागुवाचाशरीरेण केनापि व्योमचारिणा ।
॥ देवदूत उवाच ॥ न युक्तमासनं दातुं त्वयासीनं नराधिप । इदमस्यासनं दिव्यं सर्व्वरत्नविभूषितं । १०००
जाम्बूनदमयं दिव्यं रचितं विश्वकर्म्मणा । प्रेषितं देवराजेन सिंहलक्षणलक्षितं ।
अत्रोपविष्टं देवेशं चराचरनमस्कृतं । अभिषिञ्चाथ राजेन्द्रं बहुभिः पार्थिवैः सह ।
आगताः कुण्डिनगरे कन्याहेतोर्नराधिपाः । नागमिष्यति यः कश्चित् सोऽस्य वध्यो भविष्यति ।
इमे चैवाष्टकलशा निधीनामंशसंभवाः । अलका राजराजस्य धनेशस्य महात्मनः ।
दिव्याः काञ्चनरत्नाढ्या दिव्याभरणयोनयः । राजेन्द्रस्याभिषेकार्थमागच्छन्ति नृपैर्वृताः । १००५
एष शक्रस्य सन्देशः कथितो मे नराधिपाः । लेखेनाहूय तान् सर्व्वानभिषिञ्चत केशवं ।
॥ कैशिक उवाच ॥ इति सञ्चिन्त्य स्वस्थोऽसौ देवदूतो गतो दिवं । दत्त्वासनञ्च कृष्णाय बालार्कसदृशप्रभं ।
तेनाहञ्चोदयिष्यामि भवन्तो ये समागताः । दुर्निवार्य्यतरं घोरं शक्रेण स्वयमीरितं ।
युष्माभिर्द्दर्शने युक्तमद्भुतं भुवि दुर्लभं । कलशैरभिषिञ्चन्तं स्वयमेव नभस्तलात् ।
दृष्ट्वाश्चर्य्यं हि नः सर्व्वो ध्रुवं पापक्षयो भवेत् । स्नपनेन च कृष्णाय देवदेवाय विष्णवे । १०१०
आगच्छध्वं नृपश्रेष्ठा न भयं कर्त्तुमर्हथ । आवयोः कृतसन्धानो युष्मदर्थे जनार्द्दनः ।
सर्व्वेषां मनुजेन्द्राणां न वैरं कुरुते हरिः । विशुद्धभावः कृष्णस्य आवयोर्दृष्टतत्त्वतः ।
मागधस्य विशेषेण न वैरं हृदि दृश्यते । यदत्र कारणं कार्य्यं तद्भवद्भिर्विचिन्त्यतां ।
॥ वैशम्पायन उवाच ॥ एवं सञ्चिन्त्यमानास्तु नृपाः शापभयार्द्दिताः । भूयः शुश्रुवुराजेन्द्र राजानः सर्व्व एव ते ।
मेघगम्भीरनादेन स्वरेणापूरयन्नभः । वागुवाचाशरीरेण देवराजस्य शासनात् । १०१५
॥ चित्राङ्गद उवाच ॥ त्रैलोक्याधिपतिः शक्रः प्रजापालनहेतुना । आज्ञापयति युष्माकं नृपाणां हितकाम्यया ।
न युक्तं वसतान्योन्यं कृष्णेन सह वैरिणा । वसध्वं प्रीतिमुत्पाद्य स्वराष्ट्रेषु नराधिपाः ।
प्रणतार्त्तिहरः कृष्णः प्रतिसेनान्तकोऽनलः । अनेन सह संप्रीत्या मोदध्वं विगतज्वराः ।
मानुषाणां नृपा देवा नृपाणां देवताः सुराः । सुराणां दैवतं शक्रः शक्रस्यापि जनार्द्दनः ।
एष विष्णुः प्रभुर्द्देवो देवानामपि दैवतं । जातोऽयं मानुषे लोके नररूपेण केशवः । १०२०
अजेयः सर्व्वलोकेषु देवदानवमानवैः । कार्त्तिकेयसहायस्य अपि शूलधरस्य च ।
तस्मै देवातिदेवाय केशवाय महात्मने । अभिषिच्य सुरैः सार्द्धं किमिच्छेयमतः परं ।
न चाधिकारो देवानां राजेन्द्रस्याभिषेचने । तेनाहं नाभिषिञ्चामि सर्व्वलोकनमस्कृतं ।
नृपाणामधिकारोऽयं राजेन्द्रस्याभिषेचने । गत्वा यूयं विदर्भाणां क्रथकैशिकयोः सह ।
सञ्चिन्त्य विधिदृष्टेन कुरुध्वं नृपसत्तमाः । प्रीतिसन्धानकालोऽयमिति सञ्चिन्त्य वासवः । १०२५
बोधनार्थे विसृष्टोऽहं युष्माकं मनुजेश्वराः । विदर्भनगरे कृष्णः आवितोऽस्याधिवासनं ।
राजेन्द्रत्वाभिषेकार्थं राजानौ क्रथकैशिकौ । तयोः सार्द्धं नृपश्रेष्ठाः कृत्वा सुमहदुत्सवं ।

अभिषेकेण सत्कृत्य प्रतिगृह्य सदक्षिणां । आगमिष्यथ संहृष्टाः पुनरेव स्वयंवरं ।
जरासन्धः सुनीथश्च रुक्मवांश्च महारथः । शाल्वः सौभपतिश्चैव चत्वारो राजसत्तमाः ।
रक्षन्त्याशून्यहेतोर्हि तिष्ठन्त्विह च पार्थिवाः ।
॥ वैशम्पायन उवाच ॥ एवमाज्ञां सुरेशस्य श्रुत्वा चित्राङ्गदेरितां । गमनाय मतिञ्चक्रुः सर्व्व एव नृपोत्तमाः ।
अनुज्ञाता नरेन्द्रेण जरासन्धेन धीमता । भीष्मकं पुरतः कृत्वा प्रयाताः स्वबलैर्वृताः ।
भीष्मकश्च महाबाहुः स्वबलेन समन्वितः । जगाम पार्थिवैः सार्द्धं दह्यमानेन चेतसा ।
यत्र कृष्णो महाबाहुः कैशिकस्य निवेशने । दूरादेव प्रकाशन्ती पताका ध्वजमालिनी ।
शुभा देवसभा रम्या स्थानहेतोरिहागता । दिव्यरत्नप्रभाकीर्णा दिव्यध्वजसमाकुला ।
दिव्याम्बरपताकाढ्या दिव्याभरणभूषिता । दिव्यस्रग्दामकलिला दिव्यगन्धाधिवासिता ।
विमानयानैः श्रीमद्भिः समन्तात् परिवारिता । दिव्याप्सरोगणास्तत्र ननृतुश्च समन्ततः ।
गन्धर्व्वा मुनयश्चैव किन्नराश्च समन्ततः । उपगायन्ति देवेशमम्बरान्तरमाश्रिताः ।
स्तुवन्ति मुनयः सर्व्वे सिद्धाश्च परमर्षयः । देवदुन्दुभयश्चैव स्वयमेवानदन्दिवि ।
पुष्पवर्षाणि समुत्थानि गन्धचूर्णान्यनेकशः । समन्तात् पात्यमानानि आकाशस्थैर्दिवौकसैः ।
स्वयमागम्य राजेन्द्र देवैः सह शचीपतिः । विमानवरमारुह्य सप्रकाशं स्थितोऽम्बरे ।
अष्टभिर्लोकपालैस्तु स्वदिग्भागेषु संस्थितैः । उपगायद्भिर्नृत्यद्भिः स्तुवद्भिश्च समन्ततः ।
श्रुत्वा सुतुमुलं नादं सर्व्व एव नराधिपाः । विस्मयोत्फुल्लनयना विविशुस्ते सभां शुभां ।
कैशिकस्य महातेजा उपगम्य नराधिपान् । प्रवेशयामास वशी प्रतिपूज्य यथाविधि ।
निवेदिते सुरश्रेष्ठे पार्थिवानां समागमे । निर्ज्जगाम हरिः श्रीमान् सर्व्वमङ्गलपूजितः ।
ततोऽम्बरस्थास्ते दिव्याः कलशास्तिलकच्छिदः । सहकारसमायुक्ता ववर्षुर्जलदा इव ।
दिव्यकाञ्चनरत्नाद्यैर्दिव्यपुष्पसमन्वितैः । गन्धचूर्णविमिश्रैश्च राजेन्द्रस्याभिषेचने ।
यथोक्तविधिपूर्व्वेण सोऽभिषिच्य जनार्द्दनं । दीपयित्वा नरेन्द्राणां दिव्यैराभरणैः शुभैः ।
दिव्याम्बरविचित्रैश्च दिव्यमाल्यानुलेपनैः । सत्कृत्य विधिवच्छाशामुपविष्टो जनार्द्दनः ।
शुभे देवसभोद्देशे स्थानहेतोरिहागते । उपास्यमानो यदुभिर्विदर्भैश्च नराधिपैः ।
वैनतेयश्च बलवान् कामरूपी नराकृतिः । दक्षिणं पक्षमाश्रित्य आसनस्थो बभूव ह ।
क्रथकैशिकौ तौ वीरौ वामपार्श्वे स्व आसने । उपविष्टौ महात्मानौ देवस्यानुमते नृपौ ।
तथैव वामपार्श्वे तु वृष्ण्यन्धकमहारथाः । सात्यकिप्रमुखा वीरा उपविष्टा महारथाः ।
भास्करप्रतिमे दिव्ये दिव्यास्तरणसंस्तृते । सुखोपविष्टं श्रीमन्तं देवा इव शचीपतिं ।
सचिवैः आवृताः पूर्व्वं प्रविष्टास्ते नराधिपाः । यथार्हेण तु संपूज्य राजानः सर्व्व एव ते ।
सुखोपविष्टास्ते स्वेषु आसनेषु नराधिपाः । कैशिकस्तु महाप्राज्ञः सर्व्वशास्त्रार्थवित्तमः ।
पूजयित्वा यथान्यायमुवाच वदताम्वरः ।

॥ कैशिक उवाच ॥ अविज्ञाता नृपाः सर्व्वे मानुषोऽयमिति प्रभो । भवन्तमुपसन्धाना देव तान् क्षन्तुमर्हसि ।
॥ कृष्ण उवाच ॥ न मे वैरो निवसते एकाहमपि कैशिक । विशेषेण नरेन्द्राणां खास्मे धर्मे व्यवस्थिताः ।
योद्धव्यमिति धर्म्मेण अधर्म्मेति पराङ्मुखे । तेषां किंहेतुना कोपः कर्त्तव्यस्तु वनीश्वराः । ६०६०
यद्वृत्तं तदतिक्रान्तं ये मृतास्ते दिवङ्गताः । एष धर्म्मो नृलोकेऽस्मिन् जायन्ति च म्रियन्ति च ।
तस्मादशोच्यं भवतां मृतानां वै नराधिपाः । क्षन्तव्यं भवताऽस्माकं वीतवैरा भवन्तु वै ।
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा नरेन्द्रांस्तानाश्वास्य मधुसूदनः । कैशिकस्य मुखं वीक्ष्य विरराम महाद्युतिः ।
एतस्मिन्नेव काले तु भीष्मको नयकोविदः । पूजयित्वा यथान्यायमुवाच वदताम्बरः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि रुक्मिणीस्वयंवरे नृपाश्वासने अष्टाधिकशततोऽध्यायः ॥ १०८ ॥
॥ भीष्मक उवाच ॥ पुत्रो मे बालभावेन भगिनीं दातुमिच्छति । स्वयंवरे नरेन्द्राणां न चाहं दातुमुत्सहे । ६०६५
अतीव तस्य बालत्वं दातुं नेच्छेन्मतिर्मम । एका त्वेकं समालोक्य वरयिष्यति मे मतिः ।
अतस्त्वाऽहं प्रसादिष्ये पुत्रदुर्नयहेतुना । प्रसादं कुरु देवेश क्षन्तुमर्हसि मे प्रभो ।
॥ कृष्ण उवाच ॥ बालभावेन पुत्रस्ते चाखितो नृपसत्तमं । यदा वै भवति प्रौढः कीदृशो विनयो भवेत् ।
सूर्य्येन्दुसदृशान् लोकांस्तपसोपार्जितश्रियः । लोकेऽस्मिन्नरदेवानां महाकुलसमुद्भवान् ।
एकस्यापि नृपस्याये मोहाद्यो वितथं वदेत् । न स तिष्ठति लोकेऽस्मिन्निर्द्दहेद्दण्डवह्निना । ६०७०
एष धर्म्मो नरेन्द्राणामिति मे विदितं प्रभो । लोकधर्म्मं पुरस्कृत्य पुरा गीतं स्वयम्भुवा ।
कथं तव सुतस्तेषामग्रतो मनुजेश्वर । वक्तुमर्हति राजेन्द्र वितथं राजसंसदि ।
तादृशं रङ्गमतुलं कारयंस्तनयस्तव । कथं त्वया त्वविज्ञात इति मे संशयो महान् ।
आगतानां नरेन्द्राणामनलार्केन्दुवर्च्चसां । यथार्हेण तु संपूज्य आतिथ्यं कृतवानसि ।
रथाश्वनरनागानां विमर्द्दमतुलं तथा । कथं न ज्ञातवान्राजंस्तव पुत्रस्य चेष्टितं । ६०७५
विषादो नो भवेदत्र चतुरङ्गबलागमात् । कथं न ज्ञायते राजन्निति मे बुद्धिसंशयः ।
ममागमनमेवेह प्रायेण न हितन्तव । अतो न कृतमातिथ्यमपाचाय नराधिप ।
पात्रेभ्यो दीयतां कन्या मामपास्य नराधिप । ममागमनदोषेण कथं कन्यां न दास्यसि ।
कन्याविघ्नं प्रकुर्व्वाणो नरके परिपच्यते । इति मन्वादिभिर्गीतं धर्म्मविद्भिर्नरोत्तमैः ।
अतोऽर्थं न प्रविष्टोऽहं रङ्गमध्ये विशाम्पते । विदित्वा न कृतातिथ्यं नरदेव तवालयं । ६०८०
ह्रियाऽभिभूतो राजेन्द्र प्रार्थितोऽहं नराधिप । विदर्भनगरे राजन् बलविश्रामहेतुना ।
आवाभ्यां कृतमातिथ्यं कैशिकस्य प्रियातिथिः । उषितौ च यथा स्वर्गे पुरा गरुडकेशवौ ।
॥ वैशम्पायन उवाच ॥ एवमाब्रुवमाणं तं कृष्णं वाक्यमथोदितं । श्रुत्वाऽवागच्छमासिच्य शमितोऽग्निरिव ज्वलन् ।
॥ भीष्मक उवाच ॥ प्रसीद देवलोकेश मर्त्यलोकेश पाहि मां । अज्ञानतमसाविष्टं ज्ञानचक्षुःप्रदो भव ।
मनुष्ये मांसचक्षुष्ट्वात् न सम्यग्विदिता वयं । न प्रसिध्यन्ति कार्य्याणि कुर्व्वतामविचारणात् । ६०८५
भवन्तं शरणं प्राप्य देवानामपि दैवतं । सम्यग्भवतु मे दृष्टिः संपतन्त्वस्तु च मे क्रियाः ।

अनिष्पन्नामपि क्रियां नयोपेतां विचक्षणाः । फलदां हि प्रकुर्व्वन्ति महासेनापतिर्यथा ।
भवन्तं शरणं प्राप्य नातिबाधति मे भयं । यन्मया चिन्तितं कार्य्यं तद्भवान् श्रोतुमर्हति ।
न दातुमिच्छे कन्यायाः पार्थिवेभ्यः स्वयंवरं । प्रसादं कुरु देवेश न कोपं कर्त्तुमर्हसि ।
॥ कृष्ण उवाच ॥ वचनेन किमुक्तेन त्वया राजन्महामते । स्वकन्यां दास्यसे नेति कोऽत्र नेता तवानघ ।
मा देहीति न वाच्येयं ददस्वेति न मे वचः । रुक्मिण्या दिव्यमूर्त्तित्वं सम्बन्धे कारणं मम ।
मेरुकूटे पुरा देवैः कृत्वा स्वांशावतारणं । तदा विसृष्टा पूर्व्वं श्रीर्गच्छेति पतिना सह ।
मानुष्ये कुण्डिनगरे भीष्मकस्याङ्गनोदरे । जायेस्वं विपुलश्रोणि प्रत्यवेक्षस्व केशवं ।
तेनाहं वः प्रवक्ष्यामि राजन्नकृतकं वचः । श्रुत्वा स्वयं विनिश्चित्य यदुक्तं तत् करिष्यसि ।
रुक्मिणी नाम तं कन्या न सा प्राकृतमानुषी । श्रीरेषा ब्रह्मवाक्येन जाता केनापि हेतुना ।
न च सा मनुजेन्द्राणां स्वयम्बरविधिक्षमा । एका लोकाय दातव्या इति धर्म्मव्यवस्थितिः ।
न च तां शक्यते राजन्नर्हां दातुं स्वयंवरे । सदृशं वरमालोक्य दातुमर्हसि धर्म्मतः ।
अतोऽर्थं वैनतेयोऽयं विघ्नकारणहेतुना । आगतः कुण्डिनगरे देवराजेन चोदितः ।
अहञ्चैवागतो राज्ञां द्रष्टुकामो महोत्सवं । तान्च कन्यां वरारोहां पद्मेन रहितां श्रियं ।
क्षन्तव्यमिति यत् प्रोक्तं त्वया राजन् ममेष्टतः । युक्तपूर्व्वमहं मन्ये कलुषाय न पार्थिव ।
पूर्व्वमेव मया क्षान्तं येनास्मि विषये तव । आगतः सौम्यरूपेण तेनैव क्षान्तवान् प्रभो ।
क्षान्तेषु गुणबाहुल्यं दोषापहरणं क्षमा । कथमस्मद्विधे राजन् कलुषो वसते हृदि ।
कुलजे सत्त्वसम्पन्ने धर्म्मज्ञे सत्यवादिनि । मादृशे च कथं राजन् कलुषो वसते हृदि ।
क्षान्तोऽयमिति मन्तव्यं यत्सेनया सहागतं । न त्वहं सेनया सार्द्धं यास्यामि रिपुवाहिनीं ।
अक्षान्तश्चारिसेनायां यास्यामि द्विजवाहने । स्थितः सन्नर्कसङ्काशान्यायुधानि करैर्धृतः ।
मान्योऽस्माकञ्च त्वं राजन् वयसा च पितामहः । पालयस्व पुरीं सम्यक् पुत्त्रेषु पितृवद्वशः ।
कलुषो नाम राजेन्द्र वसेत् कापुरुषेषु वै । शूरेषु शुद्धभावेषु कलुषो वसते कथं ।
आसीध्वं मा सतां वृत्तं पुत्त्रेषु पितृवद्वशं । आवयोरपि राजानौ विदर्भनगराधिपौ ।
आतिथ्यकरणेऽस्माकं स्वराज्यं दत्तवानुभौ । तेन दानफलेनास्य दश पूर्व्वे दिवङ्गताः ।
भविष्याश्चैव राजेन्द्र पुत्त्रपौत्त्रा दशावराः । तेऽपि तत्रैव यास्यन्ति देवलोके नराधिपाः ।
अनयोः सुचिरं कालं भुक्त्वा राज्यमकण्टकं । यथाभिलाषं मोक्षस्य सुखं यास्यन्ति निर्वृतिं ।
नरेन्द्राश्च महाभागा येऽभिषेचितुमागताः । कालेन तेऽपि यास्यन्ति देवलोकं त्रिविष्टपं ।
स्वस्ति वोऽस्तु गमिष्यामि वैनतेयसहायवान् । नगरीं मथुरां रम्यां भोजराजेन पालितां ।
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा तु राजानं भीष्मकं यदुपुङ्गवः । राज्ञाश्चैवमुपामन्त्र्य वैदर्भाभ्यां विशेषतः ।
सभान्निष्क्रम्य देवेशो जगाम रथमन्तिकं । ततः स दृष्ट्वा राजर्षिर्भीष्मकः क्लिश्य केशवं ।
ते च सर्व्वे महीपाला विषण्णवदनाभवन् । आद्यं स्वायम्भुवं रूपं सुरासुरनमस्कृतं ।

सहस्रपात्सहस्राक्षं सहस्रभुजविग्रहं । सहस्रशिरसं देवं सहस्रमुकुटोज्ज्वलं ।
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं । दिव्याभरणसंयुक्तं दिव्यानेकोद्यतायुधं ।
कृष्णं रक्तारविन्दाक्षं चन्द्रसूर्य्याग्निलोचनं । दृष्ट्वा स राजा राजेन्द्रं प्रणिपत्य कृताञ्जलिः ।
वाङ्मनःकायसंयुक्तो स्तोतुमारब्धवांस्तदा । ६११०
॥ भीष्मक उवाच ॥ देवदेव नमस्तुभ्यमनादिनिधनाय वै । शाश्वतायादिदेवाय नारायण परायण ।
स्वयम्भुवाय विश्वाय स्थाणवे वेधसाय च । पद्मनाभाय जटिने दण्डिने पिङ्गलाय च ।
हंसप्रभाय हंसाय चक्ररूपाय वै नमः । वैकुण्ठाय नमस्तस्मै अजाय परमात्मने ।
सदसद्भावयुक्ताय पुराणपुरुषाय च । पुरुषोत्तमाय मुक्ताय निर्गुणाय नमोऽस्तु ते ।
वरदो भव मे नित्यं त्वद्भक्ताय सुरोत्तम । लोकनाथ सदा नाथ विष्णुस्त्वं विदितात्मकः । ६११५
॥ वैशम्पायन उवाच ॥ एवं स्तुत्वा महादेवं नृपाणामग्रणी नृपः । महार्हमणिमुक्ताभिर्वज्रवैदूर्य्यहासिनं ।
शातकुम्भस्य निचयं कृष्णाय प्रददौ नृपः । पुनश्चक्रे नमस्कारं वैनतेये महाबले ।
॥ भीष्मक उवाच ॥ नमस्तस्मै खगेन्द्राय मनोमारुतरंहसे । कामरूपाय दिव्याय काश्यपाय च वै नमः ।
॥ वैशम्पायन उवाच ॥ इति संवेशनःस्तुत्वा सत्कृत्य वरभूषणैः । ततो विसर्ज्जयामास कृष्णं लोकनमस्कृतं ।
अनुजग्मुर्नृपाश्चैव प्रस्थितं वासवानुजं । प्रतिगृह्य च सत्कारं नृपानामन्त्र्य वीर्य्यवान् । ६१२०
जगाम मथुरां कृष्णो द्योतयन् वै दिशो दश । वैनतेयं पुरस्कृत्य सौम्यरूपं खगोत्तमं ।
महता रथवृन्देन परिवार्य्य समन्ततः । भेरीपटहनादेन शङ्खशब्दस्वरेण च ।
बृंहितेन च नागानां हयानां हेषितेन च । सिंहनादेन शूराणां रथनेमिस्वनेन च ।
तुमुलः सुमहानासीन्महामेघरवोपमः । गते कृष्णे महावीर्य्ये आदाय परमासनं ।
सभामादाय देवाश्च प्रययुस्त्रिदिवालयं । महता चतुरङ्गेण बलेन परिवारिताः । ६१२५
क्रोशमात्रमनुव्रज्य अनुज्ञाते जनार्द्दने । प्रययुस्ते नृपाः सर्व्वे पुनरेव स्वयंवरं ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि कृष्णाभिषेके नवाधिकशततमोऽध्यायः ॥ १०९ ॥
॥ वैशम्पायन उवाच ॥ ततः प्रयाते वसुदेवपुत्त्रे नराधिपा भूषणभूषिताङ्गाः । सभां समाजग्मुः सुरेन्द्रकल्पाः प्रबोधनार्थं गम नोत्सुकास्ते ।
सभागतान् भीष्मकविप्रकाशान् सुखोपविष्टान् रुचिरासनेषु । समीक्ष्य राजा सुसयार्थवादी जगाद वाक्यं नरराजसिंहः ।
स्वयम्बरकृतो दोषो विदितो वो नराधिपाः । क्षन्तव्यो मम वृद्धस्य दुर्नयस्य फलोदयः ।
॥ वैशम्पायन उवाच ॥ एवमाभाष्य तान् सर्व्वान् सत्कृत्य च यथाविधि । ततो विसर्ज्जयामास नृपांस्तान्सत्यदेशजान् । ६१३०
पूर्व्वपश्चिमजांश्चैव उत्तरापथिकानपि । तेऽपि सर्व्वे महेष्वासाः प्रहृष्टमनसो नृपाः ।
यथार्हेण च संपूज्य जग्मुस्ते नरपुङ्गवाः । जरासन्धः सुनीथश्च दन्तवक्त्रश्च वीर्य्यवान् ।
शाल्वः सौभपतिश्चैव महाकूर्म्मश्च पार्थिवः । क्रथकौ... नृ... नृपाः सवरवंशजाः ।
वेणुदारिश्च राजर्षिः कश्मीराधिपतिस्तथा । एते ... च ... दक्षिणापथिका नृपाः ।

श्रोतुकामा रुक्मिवाक्यं स्थिता वै भीष्मकान्तिके । तान् वै समीक्ष्य राजेन्द्रः स राजा भीष्मको बली । ६१४५
स्नेहपूर्णेन मनसा स्थितांस्तानवनीश्वरान् । त्रिवर्गसहितं श्लक्ष्णं षड्गुणालङ्कृतं शुभं ।
उवाच नयसम्पन्नं स्निग्धगम्भीरया गिरा ।
॥ भीष्मक उवाच ॥ भवतामवनीशानां समालोक्य नयान्वितं । वचनं व्याहृतं श्रुत्वा कृतोऽहं कार्य्यमीदृशं ।
सद्भिर्भवद्भिः क्षन्तव्यं वयं नित्यापराधिनः ।
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा तु राजा स भीष्मको नयकोविदः । उवाच सुतमुद्दिश्य वचनं राजसंसदि । ६१५०
॥ भीष्मक उवाच ॥ पुत्रस्य चेष्टामालोक्य त्रासाकुलितचेतनः । मन्ये बालानिमान् लोकान् स एकः पुरुषः प्रभुः ।
कीर्त्तिः कीर्त्तिमतां श्रेष्ठे यशश्च विपुलं तथा । स्थापितं भुवि मर्त्येऽस्मिन् स्वबाहुबलमूर्जितं ।
धन्या खलु महाभागा देवकी योषितांवरा । पुत्रं त्रिभुवनश्रेष्ठं धृत्वा गर्भेण केशवं ।
कृष्णं कमलपत्राक्षं श्रीपुञ्जममरार्चितं । स्नेहपूर्णाश्रुनेत्राभ्यामीक्षते मुखपङ्कजं ।
॥ वैशम्पायन उवाच ॥ एवं लालप्यमानन्तु राजानं राजसंसदि । उवाच श्लक्ष्णया वाचा शाल्वराजो महाद्युतिः । ६१५५
॥ शाल्व उवाच ॥ अलं खेदेन राजेन्द्र सुतार्थमरिमर्द्दन । क्षत्रियस्य रणे राजन् ध्रुवं जयपराजयौ ।
नियता गतिर्मर्त्यानामेष धर्म्मः सनातनः । बलकेशवयोरन्यस्तृतीयः कः पुमानिह ।
रणे योधयितुं शक्तस्तव पुत्रं महाबलं । रथातिरथवृन्दानामेक एव रणाजिरे ।
रिपून् बाधयितुं शक्तो धनुर्गृह्य महाभुजः । भार्गवास्त्रं महारौद्रं देवैरपि दुरासदं ।
सृजतो बाहुवीर्येण कः पुमान् प्रसहिष्यति । अयन्तु पुरुषः कृष्णो ह्यनादिनिधनोऽव्ययः । ६१६०
तं विजेता न लोकेऽस्मिन्नपि शूलधरः स्वयं । तत्र पुत्रो महाप्राज्ञः सर्व्वशास्त्रार्थतत्त्ववित् ।
विदित्वा देवमीशानं न योधयति केशवं । अस्ति तस्य रणे जेता यवनाधिपतिर्नृपः ।
स कालयवनो नाम अवध्यः केशवस्य ह । तप्त्वा सुदारुणं घोरं तपः परमदुश्चरं ।
रुद्रमाराधयामास द्वादशाब्दान्ययोऽशनः । पुत्रकामेन मुनिना तोष्य रुद्रात् सुतो वृतः ।
माथुराणामवध्योऽसौ भवेदिति च शङ्करात् । एवमस्त्विति रुद्रोऽपि प्रददौ मुनये सुतं । ६१६५
एवं गार्ग्यस्य तनयः श्रीमान् रुद्रवरोद्भवः । माथुराणामवध्योऽसौ मथुरायां विशेषतः ।
कृष्णोऽपि बलवानेष माथुरो जातवानयं । स जेष्यति रणे कृष्णं मथुरायां समागतः ।
मन्यध्वं यदि वो युक्तां नृपा वाचं मयेरितां । विसृजध्वं तत्र दूतं यवनेन्द्रपुरं प्रति ।
॥ वैशम्पायन उवाच ॥ श्रुत्वा सौभपतेर्व्वाक्यं सर्व्वे ते नृपसत्तमाः । कुर्म्म इत्यब्रुवन् हृष्टाः शाल्वराजं महाबलं ।
स तेषां वचनं श्रुत्वा जरासन्धो महीपतिः । बभूव विमना राजन् ब्रह्मणो वचनं स्मरन् । ६१७०
॥ जरासन्ध उवाच ॥ मां समाश्रित्य पूर्व्वेऽस्मिन्नृपा नृपभयार्द्दिताः । प्राप्नुवन्ति परं राज्यं सभृत्यबलवाहनं ।
इदानीं अन्यं भूपैः परसंश्रयहेतुना । कन्येव स्वपतिद्वेषादन्यं रतिपरायणा ।
अहो सुबलवद्दैवमशक्यं विनिवर्त्तितुं । यदहं कृष्णभीतोऽन्यं संश्रयामि बलाधिकं ।
नूनं योगविहीनोऽहं कारयिष्ये पराश्रयं । श्रेयो हि मरणं मह्यं न चान्यं संश्रये नृपाः ।

कृष्णो वा बलदेवो वा यो वाऽन्यो वा नरोऽपरः। यन्तारं प्रतियोतस्यामि यथा ब्रह्मप्रचोदितः । ११७५
एष मे निश्चयो बुद्धेरेष मे पुरुषव्रतः। अतोऽन्यथा न शक्तोऽहं कर्त्तुं परममाश्रयं।
भवतां साधुवृत्तानामावाधं न करोति सः। तेन दूतं प्रदास्यामि नृपाणां रक्षणाय वै।
व्योममार्गेण यातव्यं यथा कृष्णो न बाधते। गच्छन्तमनुचिन्त्यैवं प्रेषयध्वं नृपोत्तमाः।
अयं सौभपतिः श्रीमाननलार्केन्दुसप्रभः। रथेनादित्यवर्णेन प्रयाति स्वपुरं बली।
यवनेन्द्रो यथाऽभ्येति नरेन्द्राणां समागमं। वचनञ्च यथाऽस्माकं दूत्येन कृष्णविग्रहे। ११८०
॥ वैशम्पायन उवाच॥ पुनरेवाब्रवीद्राजा सौभस्य पतिमूर्ज्जितं। गच्छ सर्व्वनरेन्द्राणां साहाय्यं कुरु मानद।
यवनेन्द्रो यथा याति यथा कृष्णं विजेष्यति। यथा वयन्तु युष्मासु तथा नीतिर्विधीयतां।
एवं सन्दिश्य तान् सर्व्वान् भीष्मकं पूज्य धर्म्मतः। प्रययौ स्वपुरं राजा स्वेन सैन्येन संवृतः।
शाल्वोऽपि नृपतिश्रेष्ठस्तांश्च संपूज्य वीर्य्यवान्। जगामाकाशमार्गेण रथेनानिलगामिना।
तेऽपि सर्व्वे महीपाला दक्षिणापथगामिनः। अनुव्रज्य जरासन्धं गताः स्वनगरेषु वै। ११८५
भीष्मकः सहपुत्रेण तावुभौ चिन्त्य दुर्नयं। गृहे विविशतुर्दीनौ कृष्णमेवानुचिन्तयन्।
रुक्मिणी विदिता साध्वी स्वयंवरनिवर्त्तनं। कृष्णस्यागमनं हेतोर्नृपाणां दोषदर्शनं।
गत्वा तु सा सखीनग्रे उवाच मोदितानना। न चान्येषां नरेन्द्राणां पत्नी भवितुमुत्सहे।
कृष्णात् कमलपत्राक्षात् सत्यमेतद्वचो मम।
॥ इतिश्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि रुक्मिणीस्वयंवरे दशाधिकशततोऽध्यायः॥ ११० ॥
॥ वैशम्पायन उवाच ॥ यवनानां बलोदग्रः स कालयवनो नृपः। बभूव राजा धर्म्मेण रक्षिता पुरवासिनां। ११९०
त्रिवर्गविदितप्रज्ञः षड्गुणानुपजीवकः। त्यक्तव्यसनसंमूढो गुणेष्वभिरतः सदा।
श्रुतिमान्धर्म्मशीलश्च सत्यवादी जितेन्द्रियः। सांग्रामिकविधिज्ञश्च दुर्गलाभानुसारिणः।
शूरोऽप्रतिबलश्चैव मन्त्रिप्रवरसेवकः। सुखासीनः सभां रम्यां सचिवैः परिवारितः।
उपास्यमानो यवनैरात्मविद्भिर्विपश्चितैः। विविधाश्च कथा दिव्या कथ्यमानैः परस्परं।
एतस्मिन्नेव काले तु दिव्यगन्धवहोऽनिलः। प्रववौ सदनाबोधसस्य वै सुखशीतलः। ११९५
किंस्विदित्येकमनसः सभायां ये समागताः। उत्फुल्लनयनाः सर्व्वे राजा चैवावलोक्य सः।
अपश्यत रथं दिव्यमायान्तं भास्करोपमं। शातकुम्भमयैर्दिव्यैरथाङ्गैरुपशोभितं।
दिव्यरत्नप्रभाकीर्णं दिव्यध्वजपताकिनं। उह्यन्तं दिव्यतुरगैर्मनोमारुतरंहसैः।
चन्द्रभास्करबिम्बानि कृत्वा जाम्बूनदं शुभं। रचितं विश्वकर्म्मणा वैयाघ्रवरभूषणैः।
रिपूणां त्रासजननं मित्राणां हर्षवर्द्धनं। दाक्षिणात्यादुपायान्तं रथं पररथारुजं। १२००
तत्रोपविष्टं श्रीमन्तं सौभस्य पतिमूर्ज्जितं। दृष्ट्वा परमसंहृष्टश्चार्घ्यपाद्येति चासकृत्।
उवाच यवनेन्द्रस्य मन्त्री प्रवदताम्बरः। तत्रोत्थाय महाबाहुः स्वयमेव नृपासनात्।
प्रत्युद्गम्यार्घ्यमादाय रथावतरणे स्थितः। शाल्वोऽपि सुमहातेजा दृष्ट्वा राजानमागतं।

मुदा परमया युक्तः शक्रप्रतिमतेजसं । अवतीर्य्य सुविश्रब्धस्त्वेक एव रथोत्तमात् ।
विवेश परमप्रीतो मित्रदर्शनलालसः । दृष्ट्वाऽर्घ्यमुद्यतं राजा स शाल्वो राजसत्तमः ।
उवाच श्लक्ष्णया वाचा नार्घ्यार्होऽस्मि महामते । दूतोऽहं मनुजेन्द्राणां सकाशाद्भवतोऽन्तिके ।
प्रेषितो बहुभिः सार्द्धं जरासन्धेन धीमता । तेन मन्ये महाराज नार्घ्यार्होऽस्मीति राजसु ।
॥ कालयवन उवाच ॥ जानाम्यहं महाबाहो दूत्येन त्वामिहागतं । सुहितं नरदेवानां प्रेषितं मागधेन वै ।
तेन त्वामर्चये राजन् विशेषेण महाद्युते । अर्घ्यपाद्यादिसत्कारैरासनेन यथाविधि ।
भवत्यभ्यर्चिते राज्ञां सर्व्वेषामर्चनं भवेत् । मानिते तव राजेन्द्र सर्व्वेषां मानितं भवेत् ।
आस्यतामासने दिव्ये मया सार्द्धं नरेश्वर ।
॥ वैशम्पायन उवाच । हस्तालिङ्गनकं कृत्वा पृष्ट्वा च कुशलामयं । सुखोपविष्टौ सहितौ शुभे सिंहासने नृपौ ।
॥ कालयवन उवाच ॥ तद्बाहुबलमाश्रित्य वयं सर्व्वे नराधिपाः । वसामो विगतोद्विग्ना देवा इव शचीपतिं ।
किमसाध्यं भवेदस्य येनासि प्रेषितो मयि । वद सत्यं वचस्तस्य किमाज्ञापयति प्रभुः ।
करिष्ये वचनं तस्य अपि कर्म्म सुदुष्करं ।
॥ शाल्व उवाच ॥ यथा वदति राजेन्द्र मगधाधिपतिर्नृपः । तथाऽहं संप्रवक्ष्यामि श्रूयतां यवनाधिप ।
॥ जरासन्ध उवाच ॥ जातोऽयं जगदाबाधो कृष्णः परमदुर्ज्जयः । विदित्वा तस्य दुर्वृत्तमहं हन्तुं समुद्यतः ।
पार्थिवैर्बहुभिः सार्द्धं समग्रबलवाहनैः । उपरुध्य महासैन्यैर्गोमन्तमचलोत्तमं ।
चेदिराजस्य वचनं महार्थं श्रुतवानहं । तदा तयोर्विनाशाय कृताशमयोजयं ।
ज्वालाशतसहस्राढ्यं युगान्ताग्निसमप्रभं । दृष्ट्वा रामो गिरेः शृङ्गादाप्लुतो हेमतालध्वक् ।
विनिष्पत्य महासेनां मध्ये सागरसन्निभां । आजघान दुराधर्षो नराश्वरथदन्तिनः ।
सर्पन्तमिव सर्पेन्द्रं विनिष्पात्य लाङ्गलं । नरनागाश्ववृन्दानि मुषलेनाव[illegible]यत् ।
गजेन गजमास्फाल्य रथेन रथयोधिनं । हयेन च हयारोहान् पदातेन पदातिनं ।
समरे स महातेजा नृपाकशतसङ्कुले । विचरन् विविधान्मार्गान् दिनान्ते भास्करो यथा ।
रामादनन्तरं कृष्णः प्रगृह्यार्कसमप्रभं । चक्रं चक्रभृतां श्रेष्ठः सिंहः क्षुद्रमृगं यथा ।
प्रविचाल्य महावीर्य्यः पादवेगेन तं गिरिं । शत्रुसैन्ये पपातोच्चैर्यदुवीरः प्रतापवान् ।
प्रनृत्यन्निव शैलोऽसौ तोयधाराभिषेचितः । घूर्णमानो विवेशोर्व्वीं निर्व्वाप्य च कृताशनं ।
आदीप्यमानाच्छिखरादवप्लुत्य जनार्द्दनः । जघान वाहिनीं राज्ञश्चक्रव्यग्रेण पाणिना ।
विक्षिप्य विपुलं चक्रं गदापातादनन्तरं । नरनागाश्ववृन्दानि मुषलेन व्यचूर्णयत् ।
क्रोधानिलसमुद्भूतचक्रलाङ्गलवह्निना । निर्दग्धा महती सेना नरेन्द्रार्काभिपालिता ।
नरनागाश्वकलिलं पत्तिध्वजसमाकुलं । रथानीकं पदाताभ्यां क्षणेन विरलीकृतं ।
सेनां प्रभग्नामालोक्य चक्रानलभयार्द्दितां । महता रथवृन्देन परिवार्य्य समन्ततः ।
तत्राहं युध्यमानस्तु भ्राताऽस्य बलहा बली । स्थितो ममाग्रतः शूरो गदापाणिर्हलायुधः ।

द्वादशाक्षौहिणीर्हत्वा प्रभिन्न इव केशरी। हलं वीनन्दमुत्सृज्य गदया मामताडयत्।
वज्रपातनिभं वेगं पातयित्वा ममोपरि। भूयः प्रहर्त्तुकामो मां वैशाखेनास्थितो महीं।
वैशाखं स्थानमासाद्य गुहः क्रौञ्चं यथा पुरा। तथा मां दीर्घनेत्राभ्यामीक्षन्निर्द्दहन्निव।
तादृग्रूपं समालोक्य बलदेवं रणाजिरे। जीवितार्थी नृलोकेऽस्मिन् कः पुमान् स्थातुमर्हति।
गृहीत्वा स गदां भीमां कालदण्डमिवोद्यतां। कालाङ्कुशेन निर्द्धूतां स्थित एवाग्रतो मम।
ततो जलदगम्भीरस्वरेणापूरयन्नभः। वागुवाचाशरीरेण स्वयं लोकपितामहः।
प्रहर्त्तव्यो न ते राम न वध्योऽयं तवानघ। कल्पितोऽस्य वधस्तान्याद्विरमस्व हलायुध।
श्रुत्वाऽहं तेन वाक्येन चिन्ताविष्टो निवर्त्तितः। सर्व्वप्राणहरं घोरं ब्रह्मणा स्वयमीरितं।
तेनाहं वः प्रवक्ष्यामि नृपाणां हितकाम्यया। श्रुत्वा त्वञ्चैव राजेन्द्र कर्त्तुमर्हसि मद्वचः।
तपसोग्रेण महता पुत्रार्थी तोष्य शङ्करं। प्राप्नवान् देवदेवात्त्वामवध्यं माथुरैर्जनैः।
महामुनिस्त्वायसचूर्णमश्नयन्नुपास्थितो द्वादशवार्षिकं व्रतं। सुरासुरैः संस्तुतपादमर्चयन् स लब्धवानीप्सितकामसम्पदं।
तपोबलाद्गार्ग्यमुनेर्महात्मनो वरप्रभावाच्छकलेन्दुमौलिनः। भवन्तमासाद्य जनार्द्दनो हिमं विलीयते भास्कररश्मिना यथा।
यतस्त्व राज्ञां वचनप्रचोदितो व्रजस्व यात्रां विजयाय केशवे। प्रमथ्य राष्ट्रं मथुराञ्च सेनया निहत्य कृष्णं प्रथयस्व वै यशः।
माथुरो वासुदेवोऽयं बलदेवस्य बान्धवः। तौ विजेष्यसि संग्रामे गत्वा तां मथुरापुरीं।
॥ शाल्व उवाच ॥ इत्येवं नरपतिभास्करप्रणीतं वाक्यन्ते कथितमिदं हितं नृपाणां। तत्सर्व्वं सह सचिवैर्विमृश्य बुद्ध्या यद्युक्तं
कुरु मनुजेन्द्र यथात्मनेष्टं।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि शाल्ववाक्ये एकादशाधिकशततोऽध्यायः ॥ १११ ॥
॥ वैशम्पायन उवाच ॥ एवं कथयमानं तं शाल्वराजं नृपाज्ञया। उवाच परमप्रीतो यवनाधिपतिर्नृपः।
॥ कालयवन उवाच ॥ धन्योऽस्म्यनुगृहीतोऽस्मि सफलं जीवितञ्च मे। कृष्णविग्रहहेतोर्यन्नियुक्तो बहुभिर्नृपैः।
दुर्ज्जयस्त्रिषु लोकेषु सुरासुरगणैरपि। तस्य निग्रहहेतोर्मामवधार्य्य जयाशिषं।
प्रहृष्टै राजसिंहैस्तैरवधार्य्यो जयो मम। तेषां वागम्बुवर्षेण विजयो मे भविष्यति।
करिष्ये वचनं तेषां नृपाणां मम चोदितं। पराजयोऽपि राजेन्द्र जयेन सदृशो मम।
अद्यैव तिथिनक्षत्रं मुहूर्त्तङ्करणं शुभं। यास्यामि मथुरां राजन् विजेतुं केशवं रणे।
॥ वैशम्पायन उवाच ॥ एवमाभाष्य राजानं सौभस्य पतिमूर्ज्जितं। सत्कृत्य च यथान्यायं महार्हमणिभूषणैः।
ब्राह्मणेभ्यो ददौ वित्तं सिद्धादेशाय वै नृपः। पुरोहिताय राजेन्द्र बहुशः प्रददौ धनं।
कृत्वाऽग्निं विधिवद्राजा कृतकौतुकमङ्गलः। प्रस्थानं कृतवान् सम्यग्जेतुकामो जनार्द्दनं।
शाल्वोऽपि भरतश्रेष्ठ कृतार्थो हृष्टमानसः। यवनेन्द्रं परिष्वज्य जगाम स्वं पुरं नृपः।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि रुक्मिणीस्वयंवरे कालयवनागमने द्वादशाधिकशततोऽध्यायः॥ ११२ ॥
॥ जनमेजय उवाच ॥ विदर्भनगराद्याते शक्रतुल्यपराक्रमे। किमर्थं गरुडो नीतः किञ्च कर्म चकार सः।
न चारुरोह भगवान् वैनतेयं महाबलं। एतन्मे संशयं ब्रह्मन् ब्रूहि तत्त्वं महामुने।

॥ वैशम्पायन उवाच ॥ शृणु राजन् सुपर्णेन कृतं कर्मातिमानुषं । विहङ्गमवराख्याने वैनतेये महाद्युतौ ।
असंप्राप्ते तु नगरीं मथुरां मधुसूदने । मनसा चिन्तयामास वैनतेयो महामतिः ।
यदुक्तं देवदेवेन नृपाणामग्रतः प्रभो । यास्यामि मथुरां रम्यां भोजराजेन पालितां ।
इति तद्वचनस्यान्ते गमिष्येति विचिन्तयन् । कृताञ्जलिपुटः श्रीमान् प्रणिपत्याब्रवीदिदं ।
॥ गरुड उवाच ॥ देव यास्यामि नगरीं रैवतस्य कुशस्थलीं । रैवतञ्च गिरिं रम्यं नन्दनप्रतिमं महत् । ६९६५
रत्नमोदान्वितां रम्यां शैलोदधितटाश्रितां । वृक्षगुल्मलताकीर्णां पुष्परेणुविभूषितां ।
गजेन्द्रभुजगाकीर्णां मृगवानरसेवितां । वराहमहिषाक्रान्तां मृगयूथैरनेकशः ।
तां समन्तात् समालोक्य वासार्थं ते समाचरं । यदि स्यात्तु भवेते रम्या प्रशस्ता नगरावलिः ।
कण्टकोद्धरणं कृत्वा आगमिष्ये तवान्तिकं ।
॥ वैशम्पायन उवाच ॥ एवं विज्ञाप्य देवेशं प्रणिपत्य जनार्द्दनं । जगाम पतगेन्द्रो वै पश्चिमाभिमुखो बली । ६९७०
कृष्णोऽपि यदुभिः सार्द्धं विवेश मथुरां शुभां । स्वैरिण्य उग्रसेनस्य नागराश्चैव सर्व्वशः ।
प्रत्युद्गम्यार्चयन् कृष्णं प्रहृष्टजनसङ्कुलं ।
॥ जनमेजय उवाच ॥ श्रुत्वाऽभिषिक्तं राजेन्द्रं वसुभिर्व्वसुधाधिपैः । किं चकार महाबाहुरुग्रसेनो महीपतिः ।
॥ वैशम्पायन उवाच ॥ श्रुत्वाऽभिषिक्तं राजेन्द्रं वसुभिर्व्वसुधाधिपैः । इन्द्रेण कृतसन्मानं दूतं चित्राङ्गदं कृतं ।
एकैकं नृपतेर्भागं शतसाहस्रसम्मितं । राजेन्द्रैर्व्वसुदं दत्तं मानवेषु च वै दश । ६९७५
ये तत्र समनुप्राप्ता न रिक्तास्ते गृहं गताः । शङ्खं च यादवरूपेण प्रददौ हरिचिन्तितं ।
एवं निधिपतिः श्रीमान्देवतैरनुमोदितः । इति श्रुत्वाऽर्थिकजनालोकप्राप्त्यन्तिकान्तरात् ।
चकार महतीं पूजां देवतायतनेषु वै । वसुदेवस्य भवने तोरणोभयपार्श्वतः ।
नटानां नृत्यगेयानि वाद्यानि च समन्ततः । पताकाध्वजमालाढ्यां कारयामास वै नृपः ।
कंसराजस्य तु सभां विचित्राम्बरसुप्रभां । पताका विविधाकारा दापयामास भोजराट् । ६९८०
तोरणं गोपुरञ्चैव सुधापङ्कविलेपनं । कारयामास राजेन्द्र राजेन्द्रस्यासनालयं ।
पताका वनमालाढ्याः पूर्णकुम्भाः समन्ततः । राजमार्गेषु राजेन्द्र चन्दनोदकसेचिताः ।
वस्त्रास्तरणकं राजा दापयामास भूतले । धूपं पार्श्वोभये चैव चन्दनागुरुगुग्गुलैः ।
गुडं मत्सरसञ्चैव दह्यमानं ततस्ततः । वृद्धस्त्रीजनसंघाश्च गायन्ति स्तुतिमङ्गलं ।
अर्घं कृत्वा प्रतीचन्ते स्वेषु स्थानेषु योषितः । एवं कृत्वा पुरानन्दमुग्रसेनस्तु बुद्धिमान् । ६९८५
वसुदेवगृहं गत्वा प्रियाख्यानं निवेद्य च । रामेण सह संमन्त्र्य निर्गतो रथमन्तिकं ।
तस्मिन्नेवान्तरे राजञ्छङ्खध्वनिरभून्महान् । पाञ्चजन्यस्य निनदं श्रुत्वा मथुरवासिनः ।
स्त्रियो बालाश्च वृद्धाश्च सूतमागधवन्दिनः । विनिर्ययुर्मुदायुक्ता रामं कृत्वाऽग्रतो नृप ।
अर्घ्यं पाद्यं पुरस्कृत्य उग्रसेनोऽथ धीमतः । दृष्ट्वा पद्मानमासाद्य उग्रसेनो महीपतिः ।
अवतीर्य्य रथात्तूर्णमत्पादमार्गेण चाव्रजत् । दृष्ट्वासीनं रथे रम्ये दिव्यरत्नविभूषिते । ६९९०

अङ्गेष्वाभरणञ्चैव दिव्यरत्नसमन्वितं । वनमालोरसं दिव्यं तपन्तमिव भास्करं ।
चामरं व्यजनं छत्रं खगेन्द्रध्वजमुच्छ्रितं । राजलक्षणसम्पन्नमासन्नार्कमिवोज्ज्वलं ।
श्रियाऽभिभूतं देवेशं दुर्न्निरीक्ष्यतरं हरिं । दृष्ट्वा स राजा राजेन्द्र हर्षगद्गदया गिरा ।
बभाषे पुण्डरीकाक्षं रामं बलनिसूदनं । रथेन न मया गन्तुं युक्तपूर्व्वेति चिन्त्य वै ।
अवतीर्णो महाभाग गजस्कन्धेन च । विष्णुना स्वस्वरूपेण गतेयं मथुरा पुरी । ६९९५
अत्र प्रकाशितात्मानं देवेशं वै नृपार्णवे । तमहं स्तोतुमिच्छामि सर्व्वभावेन केशवं ।
प्रत्युवाच महातेजा राजानं कृष्णपूर्व्वजः । न युक्तं नृपते स्तोतुं प्रजन्तं देवसत्तमं ।
विनास्तोत्रेण सन्तुष्टस्तव राजन् जनार्द्दनः । तुष्टस्य स्तुतिना किन्ते दर्शनेन तव स्तुतिः ।
राजेन्द्रत्वमनुप्राप्य आगतस्तव वेश्मनि । न त्वया स्तुतवान् राजन् दिव्यैः स्तोत्रैरमानुषैः ।
एवमाब्रुवमाणौ तौ सम्प्राप्तौ केशवान्तिकं । अधोक्षजभुजं दृष्ट्वा स्थापयित्वा रथोत्तमं । ७०००
उवाच वदतां श्रेष्ठ उग्रसेनं नराधिपं । यन्मया ह्यभिषिक्तस्त्वं मथुरेशो भव त्विति ।
न युक्तमन्यथाकर्त्तुं मथुराधिपते स्वयं । अर्घ्यमाचमनीयञ्च पाद्यञ्चाथ निवेदितं ।
न दातुमर्हसे राजन्नेष मे मनसः प्रियः । तत्राभिप्रायं विज्ञाय ब्रवीमि नृपते वचः ।
त्वमेव माथुरो राजा मान्यथा कर्त्तुमर्हसि । स्थानं भागञ्च नृपते दास्यामि तव दक्षिणां ।
यथा नृपाणां सर्व्वेषां तथा ते स्थापितोऽग्रतः । शतसाहस्रिको भागो वस्त्राभरणवर्ज्जितः । ७००५
आरुहस्व रथं शुभ्रं चामीकरविभूषितं । चामरं व्यजनं छत्रं ध्वजञ्च मथुरेश्वर ।
दिव्याभरणसंयुक्तं मुकुटं भास्करप्रभं । धारयस्व महाभाग पालयस्व पुरीमिमां ।
पुत्रपौत्रैः परिवृतो मथुरां प्रतिपालय । जित्वारिगणसंघांस्त्वं भोजवंशं प्रवर्द्धय ।
देवदेवाद्यनन्ताय सौरिणे वज्रपाणिना । प्रेषितं देवराजेन दिव्याभरणमम्बरं ।
माथुराणाञ्च सर्व्वेषां भागा दौवारिका दश । सूतमागधवन्दीनामेकैकस्य सहस्रिकं । ७०१०
वृद्धस्त्रीजनसंघानां गणिकानां शतं शतं । नृपेण सह तिष्ठन्ति विकद्रुप्रमुखाश्च ये ।
दशसाहस्रिको भागस्तेषां धात्रा प्रकल्पितः ।
॥ वैशम्पायन उवाच ॥ एवं संपूज्य राजेन्द्रं माथुराणां वसूत्तमैः । कृत्वा सुमहदानन्दं मथुरां मधुसूदनः ।
दिव्याभरणमाल्यैश्च दिव्याम्बरविलेपनैः । दीप्यमानः समन्ताच्च देवैरिव त्रिपिष्टपे ।
भेरीपटहनादेन शङ्खदुन्दुभिनिस्वनैः । बृंहितेन च नागानां हयानां हेषितेन च । ७०१५
सिंहनादैश्च शूराणां रथनेमिस्वनेन च । तुमुलः सुमहानासीन्नादो मेघरवोपमः ।
वन्दिभिः स्तूयमानश्च नमस्कृतैरपि प्रजाः । दत्त्वा दानमनन्तञ्च न ययौ विस्मयं हरिः ।
स्वभावोन्नतभावत्वाद् दृष्टपूर्व्वस्ततोऽधिकं । अनहङ्कारभावाच्च विस्मयं न जगाम ह ।
दीप्यमानं स्ववपुषा आयान्तं भास्करप्रभं । दृष्ट्वा मथुरवासिन्यो नमश्चक्रुः पदे पदे ।
एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः । नागपर्य्यङ्कमुत्सृज्याजगाम मथुरां पुरीं । ७०२०

बद्ध्वा बलिं महावीर्य्यं दुर्ज्जयं त्रिदशैरपि । शक्राय प्रददौ राज्यं त्रैलोक्यं वज्रपाणये ।
हत्वा दैत्यगणान् सर्व्वान् कंसञ्च बलिनाम्वरं । भोजराजाय मथुरां दत्त्वा केशिनिसूदनः ।
नाभिषिक्तः स्वयं राज्ये नोपविष्टो नृपासने । राजेन्द्रत्वमभीप्सन् वै मथुरामन्वपालयत् ।
एवमन्योन्यसंजल्पं श्रुत्वा पुरनिवासिनां । सूतमागधवन्दीनामिदमूचुर्गणा गिरः ।
किं वा शक्यामहे वक्तुं गणानान्ते गुणोदधे । मानुषेणैकजिह्वेन प्रभावोत्साहसम्भ्रवान् ।
सहस्रभोगी नागेन्द्रः कदाचिद्देवबुद्धिमान् । द्विसहस्रेण जिह्वेन वासुकिः प्रथयिष्यति ।
किन्त्वद्भुतमिदं लोके मानवेन्द्रेषु भूतले । न भूतं न भविष्यञ्च शक्रादासनमागतं ।
सभावतरणञ्चैव कालसैरागतं स्वयं । न श्रुतं न च दृष्टं वो तेन मन्यामहेऽद्भुतं ।
धन्या देवी महाभागा देवकी योषिताम्वरा । भवन्तं त्रिदशश्रेष्ठं धृत्वा गर्भेण केशवं ।
इति संजल्पमानानां शृण्वन्तौ पृथगीरितं । उग्रसेनं पुरस्कृत्य भ्रातरौ रामकेशवौ ।
प्राकारद्वारि सम्प्राप्तावर्च्चयामास वै तदा । अर्घ्यमाचमनीं दत्त्वा पाद्यं पाद्येति चाब्रवीत् ।
उग्रसेनस्ततो धीमान् केशवस्य रथागतः । प्रणम्य शिरसा कृष्णं रथमारुह्य वीर्य्यवान् ।
घनवत्तोयधारेण ववर्ष कनकाम्बुभिः । धनौघैर्व्वर्षमाणस्तु संप्राप्तः पितृवेश्मनि ।
मथुराधिपतिः श्रीमानुवाच मधुसूदनः । राजेन्द्रत्वमनुप्राप्य युक्तं मे पितृवेश्मनि ।
स्थापितुं देवराजेन दत्तं सिंहासनं प्रभो । नेष्यामि मथुरेशस्य सभां भुजबलार्ज्जितां ।
प्रसादयिष्ये भगवन् न कोपं कर्त्तुमर्हसि । देवकी वसुदेवस्य रोहिणी च विशाम्पते ।
न किञ्चित्कारणे शक्ता हर्षविक्लवमोहिताः । कंसमाता ततो राजन्नर्च्चयामास केशवं ।
नानादिग्देशजानीतं कंसेनोपार्ज्जितं धनं । देशकालं समालोक्य पादपद्मे निवेदितं ।
उग्रसेनं समाहूय उवाच श्लक्ष्णया गिरा ।
॥ कृष्ण उवाच ॥ न चाहं मथुराकाङ्क्षी न मया वित्तकाम्यया । घातितौ तव पुत्रौ तौ कालेन निधनङ्गतौ ।
यजस्व विविधान् यज्ञान् ददस्व विपुलं धनं । जयस्व रिपुसेनाश्च मम बाहुबलाश्रयात् ।
त्यज स्वगतसन्तापं कंसनाशोद्भवं भयं । नयस्व वित्तनिचयं मया दत्तं पुनस्तव ।
इति प्रशास्य राजानं कृष्णोऽथ हलिना सह । प्रविवेश ततः श्रीमान्मातापित्रोर्यदन्तिकं ।
आनन्दपरिपूर्णाभ्यां हृदयाभ्यां महाबलौ । पित्रमात्रोर्हि पादान् वै नमश्चक्रतुराननौ ।
तस्मिन्मुहूर्त्ते नगरी मथुरा न बभूव सा । स्वर्गलोकं परित्यज्यावतीर्णेवामरावती ।
वसुदेवस्य भवनं समीक्ष्य पुरवासिनः । मनसा चिन्तयामासुर्देवलोकं न भूतलं ।
विसृज्य मथुरेशन्तु महिषीसहितं नृपं । भवनं वसुदेवस्य प्रविश्य बलकेशवौ ।
न्यस्तशस्त्रावुभौ वीरौ तस्थतुः स्वैरचारिणौ । ततः कृताह्निकौ भूत्वा सुखासीनौ कथान्तरे ।
एतस्मिन्नेव काले तु महोत्पातो बभूव ह । सभ्रमुश्च घनाकाशे चेलुश्चावनिपर्व्वताः ।
समुद्राः क्षुभिताः सर्व्वे विभ्रान्ता भोगिनाम्वराः । कम्पिता यादवाः सर्व्वे न्युब्जाश्च पतिता भुवि ।

ताम् सन्निपतिताम् दृष्ट्वा रामकृष्णौ तु निश्चलौ । महता पक्षवातेन विश्रान्तौ पतगोत्तमं ।
ददर्श समनुप्राप्तं दिव्यस्रगनुलेपनं । प्रणम्य शिरसा ताभ्यां सौम्यरूपी कृताञ्जलिः ।
तं दृष्ट्वा समनुप्राप्तं सचिवं साम्परायिकं । स्तुतिमन्तं गरुत्मन्तं जगाद मधुसूदनः ।
स्वागतं खचरश्रेष्ठ सुरसेनारिमर्द्दन । विनताहृदयानन्द स्वागतं केशवप्रिय ।
तमुवाच ततः कृष्णः स्मितं देवमिवापरं । तुल्यसामर्थ्यया वाचा आसीनं विनतात्मजं ।
॥ कृष्ण उवाच ॥ यास्यामः पतगश्रेष्ठ भोजस्यान्तःपुरं महत् । तत्र गत्वा सुखासीना मन्त्रयामो मनोगतं ।
॥ वैशम्पायन उवाच ॥ प्रविष्टौ तौ महावीर्य्यौ बलदेवजनार्द्दनौ । वैनतेयद्वितीयेन गुह्यं मन्त्रममन्त्रयन् ।
अवध्योऽसौ कृतोऽस्माकं सुमहच्च रिपोर्ब्बलं । कृतः सैन्येन महता महद्भिश्च नराधिपैः ।
बहुलानि च सैन्यानि हन्तुं वर्षशतैरपि । न शक्ष्यामः वयं सेतुं जरासन्धस्य वाहिनीं ।
अतोऽर्थं वैनतेय त्वां ब्रवीमि मथुरां पुरीं । वसतोरावयोः श्रेयो न भवेदिति मे मतिः ।
॥ गरुड उवाच ॥ देवदेवं नमस्कृत्वा गतोऽहं भवतोऽन्तिकात् । वासार्थमीप्सितुं भूमिं तव देव कुशस्थलीं ।
गत्वाऽहं खे समास्थाय समन्तादवलोक्य तां । दृष्ट्वा वै विबुधश्रेष्ठ पुरलक्षणपूजितां ।
सागरानूपविपुलां प्रागुदक्प्रवणीतलां । सर्व्वतोदधिमध्यस्थामभेद्यामद्रिभैरपि ।
सर्व्वरत्नाकरवतीं सर्व्वकामफलद्रुमां । सर्व्वर्त्तुकुसुमाकीर्णां सर्व्वतः सुमनोहरां ।
सर्व्वाश्रमाधिवासाश्च सर्व्वकामगुणैर्युतां । नरनारीगणाकीर्णां नित्यामोदविवर्द्धिनीं ।
प्राकारपरिक्षेपितां गोपुराट्टालमालिनीं । विचित्रचत्वरपथां विपुलद्वारतोरणां ।
यन्त्रार्गलविचित्राढ्यां हेमप्राकारशोभितां । नरनागाश्वकलिलां रथनेमिस्वनाकुलां ।
नानादिग्देशजाकीर्णां दिव्यपुष्पफलद्रुमां । पताकाध्वजमालाढ्यां महाभवनशालिनीं ।
भीषणीं रिपुसंघानां मित्राणां हर्षवर्द्धनीं । मनुजेन्द्राधिवासेभ्यो विशिष्टां नगरोत्तमां ।
रैवतश्च गिरिश्रेष्ठं कुरु देव सुरालयं । नन्दनप्रतिमं दिव्यं पुरद्वारस्य भूषणं ।
कारयस्वाधिवासन्ते तत्र गत्वा सुरोत्तम । कुमाराणां प्रचारश्च सुरमणो भविष्यति ।
नाम्ना द्वारवती नाम त्रिषु लोकेषु विश्रुता । भविष्यति पुरी रम्या शक्रस्येवामरावती ।
यदि स्यात् संवृता भूमिं प्रदास्यति महोदधिः । यथेष्टं विविधं कृत्वा विश्वकर्म्मा रचिष्यति ।
मणिमुक्ताप्रवालैश्च वज्रवैदूर्य्यसप्रभैः । द्रव्यैरभिप्राययुतैर्द्दिव्यरत्नैस्त्रिलोकजैः ।
दिव्यस्तम्भसमाकीर्णान् स्वर्गे देवसभोपमान् । जाम्बूनदमयान् शुभ्रान् सर्व्वरत्नविभूषितान् ।
दिव्यध्वजपताकाढ्यान् देवकिन्नरपालितान् । चन्द्रसूर्य्यप्रभाकीर्णान् प्रासादान् कारय प्रभो ।
॥ वैशम्पायन उवाच ॥ एवं कृत्वा तु संजल्पं वैनतेयोऽथ केशवं । प्रणम्य शिरसा ताभ्यां निषसाद कृताञ्जलिः ।
कृष्णोऽपि रामसहितो विचिन्त्य हितमीरितं । प्रकाशं कर्त्तुकामश्च विसृज्य विनतात्मजं ।
सत्कृत्य विधिवद्राजन् महार्हवरभूषणैः । मोदेते सुखिनौ तत्र देवलोके यथाऽमरौ ।
तस्य तद्वचनं श्रुत्वा भोजराजो महायशाः । कृष्णं क्रोधेन विस्रब्धं बभाषे वचनाहतं ।

॥ उग्रसेन उवाच ॥ कृष्ण कृष्ण महाबाहो यदूनां नन्दिवर्द्धन । श्रूयतां यदहं त्वाऽद्य वक्ष्यामि रिपुसूदन ।
त्वया विहीनाः सर्व्वे स्म न शक्ताः सुखमासितुं । पुरेऽस्मिन् विषयान्ते वा पतिहीना इव स्त्रियः ।
त्वत्सनाथा वयन्तात त्वद्बाहुबलमाश्रिताः । बिभीमो न नरेन्द्राणां सेन्द्राणामपि मानद ।
विजयाय यदुश्रेष्ठ यत्र यत्र गमिष्यसि । तत्र त्वं सहितोऽस्माभिर्गच्छेथा यादवर्षभ ।
तस्य राज्ञो वचः श्रुत्वा सस्मितं देवकीसुतः । यथेष्टं भवतामद्य तथा कर्त्ताऽस्म्यसंशयं । ६९८५
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि रुक्मिणीस्वयंवरे मन्त्रोदाहरणे त्रयोदशाधिकशतोऽध्यायः ॥ ११३ ॥
॥ वैशम्पायन उवाच ॥ कस्यचित्त्वथ कालस्य सभ्यांस्तान् यदुसंसदि । बभाषे पुण्डरीकाक्षो हेतुमद्वाक्यमुत्तमं ।
यादवानामियं भूमिर्म्मथुरा राष्ट्रवर्द्धिनी । वयञ्चैवेह सम्भूता व्रजे च परिवर्द्धिताः ।
तच्चेदानीं गतं दुःखं शत्रवश्च पराजिताः । नृपेषु जनितं वैरं जरासन्धेन विग्रहः ।
वाहनानि च नः सन्ति पादातञ्चाप्यनन्तकं । रत्नानि च विचित्राणि मित्राणि सुबहूनि च ।
इयञ्च माथुरी भूमिरल्पा गम्या परस्य तु । वृद्धिश्चापि पराऽस्माकं बलतो मित्रतस्तथा । ६९९०
कुमारकोट्यो याश्चेमाः पदातीनां गणाश्च ये । एषामपीह वसतां संमर्द्दमुपलक्षये ।
तन्मह्यं रोचतेऽन्यत्र निवासो यदुपुङ्गवाः । पुरीं निवेशयिष्यामि मम तत्त्वनुमर्हथ ।
एतद्यद्यनुकूलं वो समभिप्रायजं वचः । भवाय भवतां काले मयोक्तं यदुसंसदि ।
तमूचुर्यादवाः सर्व्वे प्रहृष्टमनसस्तदा । साध्यतां यदभिप्रेतं जनस्यास्य भवाय च ।
ततः समन्त्रयामासुर्वृष्णयो मन्त्रमुत्तमं । अवध्योऽसौ नृपोऽस्माकं सुमहच्च रिपोर्ब्बलं । ६९९५
ततः सैन्यक्षयश्चापि महानिह नराधिपैः । बहुलानि च सैन्यानि हन्तुं वर्षशतैरपि ।
न शक्ष्यामो हतस्तेषामपयानेऽभवन्मतिः । एतस्मिन्नन्तरे राजा स कालयवनस्तदा ।
सैन्येन तद्विधेनैव मथुरामभ्युपागमत् । ततो जरासन्धबलं दुर्न्निवार्य्यं महत्तदा ।
ते कालयवनञ्चैव श्रुत्वेदं प्रतिपेदिरे । केशवः पुनरेवाह यादवान् सत्यसङ्गरान् ।
अद्यैव दिवसः पुण्यो निर्यात सबलानुगाः । ततो निश्चक्रमुः सर्व्वे यादवाः कृष्णशासनात् । ७०००
ओघा इव समुद्रस्य बलौघप्रतिनादिताः । संगृह्य ते कलत्राणि वसुदेवपुरोगमाः ।
समन्ततो गजैर्मत्तै रथैरश्वैश्च दंशिताः । आहत्य दुन्दुभीः सर्व्वे सधनज्ञातिबान्धवाः ।
निर्ययुर्यादवाः सर्व्वे मथुरामपहाय वै । स्यन्दनैः काञ्चनापीडैर्मत्तैश्च वरवारणैः ।
धृतसूतैश्च तुरगैः कशापार्ष्णिप्रचोदितैः । स्वानि स्वानि बलाग्राणि शोभयन्तः प्रकर्षिणः ।
प्रत्यङ्मुखा ययुर्हृष्टा वृष्णयो भरतर्षभ । ततो मुखतराः सर्व्वे यादवा रणशोभिनः । ७००५
अनीकाग्राणि कर्षन्तो वासुदेवपुरोगमाः । ते स्म नानालताचित्रं नारिकेलवनैर्युतं ।
कीर्णं नागगणैः कान्तैः केतकीषण्डमण्डितं । पुन्नागतालीबहुलं द्राक्षावनघनं क्वचित् ।
अनूपं सिन्धुराजस्य प्रपेदुर्यदुपुङ्गवाः । ते तत्र रमणीयेषु विषयेषु सुखप्रियाः ।
मुमुदुर्यादवाः सर्व्वे देवाः स्वर्गगता यथा । पुरवास्तु विचिन्वन् स कृष्णस्तु परवीरहा ।

ददर्श विपुलं देशं सागरानूपशोभितं । वाहनानां हितञ्चैव सिकताताम्रमृत्तिकं । ६५१०
पुरलक्षणसम्पन्नं कृतास्पदमिव श्रिया । सागरानिलसंवीतं सागराम्बुनिषेवितं ।
विषयं सिन्धुराजस्य शोभितं पुरलक्षणैः । तत्र रैवतको नाम पर्व्वतो नातिदूरतः ।
मन्दरोदारशिखरः सर्व्वतोऽभिविराजते । तत्रैकलव्यसंवासो द्रोणिनाध्युषितश्चिरं ।
प्रभूतपुरुषोपेतः सर्व्वरत्नसमाकुलः । विहारभूमिस्तत्रैव तस्य राज्ञः सुनिर्म्मिता ।
नाम्ना द्वारवती नाम स्वायताष्टापदोपमा । केशवेन मतिस्तत्र पुर्य्यर्थे विनिवेशिता । ६५१५
निवेशं तत्र सैन्यानां रोचयन्ति स्म यादवाः । ते रक्तसूर्य्ये दिवसे तत्र यादवपुङ्गवाः ।
सेनापालाश्च सञ्चक्रुस्कन्धावारनिवेशनं । ध्रुवाय तत्र न्यवसत् केशवः सह यादवैः ।
देशे पुरनिवेशाय स यदुप्रवरो विभुः । तस्यास्तु विविधं नाम वास्तूनि च गदाग्रजः ।
निर्म्ममे पुरुषश्रेष्ठो मनसा यादवोत्तमः । एवं द्वारवतीञ्चैव पुरीं प्राप्य सबान्धवाः ।
सुखिनो न्यवसन्राजन् स्वर्गे देवगणा इव । कृष्णोऽपि कालयवनं ज्ञात्वा केशिनिसूदनः । ६५२०
जरासन्धभयाच्चैव पुरीं द्वारवतीं ययौ ।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि द्वारवतीप्रयाणे चतुर्द्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

॥ जनमेजय उवाच ॥ भगवन् श्रोतुमिच्छामि विस्तरेण तपोधन । चरितं वासुदेवस्य यदुश्रेष्ठस्य धीमतः ।
किमर्थञ्च परित्यज्य मथुरां मधुसूदनः । मध्यदेशस्य ककुदं धाम लक्ष्म्याश्च केवलं ।
शृङ्गं पृथिव्याः स्वालक्ष्यं प्रभूतधनधान्यवत् । आर्य्याढ्यजनभूयिष्ठमधिष्ठानवरोत्तमं ।
अयुद्धेनैव दाशार्हस्त्यक्तवान् द्विजसत्तम । स कालयवनश्चापि किं कृष्णे प्रत्यपद्यत । ६५२५
द्वारकाञ्च समाश्रित्य वारिदुर्गां जनार्द्दनः । किञ्चकार महाबाहुर्म्महायोगी महामनाः ।
किंवीर्य्यः कालयवनः केन जातश्च वीर्य्यवान् । यमसह्यं समालक्ष्य व्यपयातो जनार्द्दनः ।
॥ वैशम्पायन उवाच ॥ वृष्णीनामन्धकानाञ्च गुरुर्गार्ग्यो महातपाः । ब्रह्मचारी पुरा भूत्वा न स्म दारान् स विन्दति ।
तथा हि वर्त्तमानं तमूर्द्ध्वरेतसमव्ययं । श्यालोऽभिशस्तवान् गार्ग्यमपुमानिति राजनि ।
सोऽभिशप्तस्तदा राजनगरे त्वजितस्तथे । लिप्सुः पुत्रं ततो गत्वा तपस्तेपे सुदारुणं । ६५३०
ततो द्वादशवर्षाणि सोऽयश्चूर्णमभक्षयत् । आराधयन्महादेवमचिन्त्यं शूलपाणिनं ।
रुद्रस्तस्मै वरं प्रादात्समर्थं युधि निग्रहे । वृष्णीनामन्धकानाञ्च सर्व्वतेजोमयं सुतं ।
ततः शुश्राव तं राजा यवनाधिपतिर्व्वरं । पुत्रप्रसवजं देवादपुत्रः पुत्रकामिता ।
स तमानाय्य नृपतिः सान्त्वयित्वा द्विजर्षभं । घोषमध्ये स्त्रियं राजा गोपस्त्रीषु समासृजत् ।
गोपाली त्वप्सरास्तत्र गोपस्त्रीवेशधारिणी । धारयामास गार्ग्यस्य गर्भं दुर्द्धरमच्युत । ६५३५
मानुष्यां गार्ग्यभार्य्यायां नियोगाच्छूलपाणिनः । स कालयवनो नाम जज्ञे शूरो महाबलः ।
अपुत्रस्याथ राज्ञस्तु ववृधेऽन्तःपुरे शिशुः । तस्मिन्नुपरते राजन् स कालयवनो नृपः ।
युद्धाभिकामो नृपतिः पर्य्यपृच्छद्द्विजोत्तमान् । वृष्ण्यन्धककुलं तस्य नारदेन निवेदितं ।

विज्ञाय वरदानन्तु नारदान्मधुसूदनः । उपप्रैक्षत तेजस्वी वर्द्धन्तं यवनेषु तं ।
स विवृद्धो यदा राजा यवनानां महाबलः । तत एनं नृपा म्लेच्छाः संश्रित्यानुययुस्तदा । ६४४०
शकास्तुखारा दरदाः पारदास्तङ्गणाः खशाः । पह्लवाः शतशश्चान्ये म्लेच्छा हैमवतास्तथा ।
स तैः परिवृतो राजा दस्युभिः शलभैरिव । नानावेशायुधैर्भीमैर्मथुरामभ्यवर्त्तत ।
गजवाजिखरोष्ट्राणामयुतैरर्बुदैरपि । पृथिवीं कम्पयामास सैन्येन महता वृतः ।
रेणुना सूर्य्यमार्गन्तु समवच्छाद्य पार्थिवः । मूत्रेण शकृता चैव सैन्येन ससृजे नदीं ।
अश्वोष्ट्रशकृतो राशेर्निःसृता वै यतो नृप । ततोऽश्वशकृदित्येवं नाम तस्या बभूव ह । ६४४५
तत्सैन्यं महदायाद्दै श्रुत्वा वृष्ण्यन्धकाग्रणीः । वसुदेवः समानाय्य ज्ञातीनिदमुवाच ह ।
इदं समुत्थितं घोरं वृष्ण्यन्धकभयं महत् । अवध्यश्चापि नः शत्रुर्वरदानात्पिनाकिनः ।
सामादयोऽभ्युपायाश्च विहितास्तेऽस्य सर्व्वशः । मत्तो मदबलाभ्यान्तु युद्धमेव चिकीर्षति ।
एतावानिह वासश्च कथितो नारदेन मे । जरासन्धश्च नो राजा नित्यमेव न मृष्यते ।
तथाऽन्ये पृथिवीपाला वृष्णिचक्रप्रतापिताः । केचित् कंसवधाच्चापि विरक्तास्तत्कृता नृपाः । ६४५०
समाश्रित्य जरासन्धमस्मान्निच्छन्ति बाधितुं । बहवो ज्ञातयश्चैव यदूनां निहता नृपैः ।
विवर्द्धितुं न शक्ष्यामः पुरेऽस्मिन्निति केशवः । अपयाने मतिं कृत्वा दूतं तस्मै ससर्ज्ज ह ।
ततः कुम्भे महासर्पं भिन्नाञ्जनचयोपमं । घोरमाशीविषं कृष्णं कृष्णः प्राक्षेपयत्तदा ।
ततस्तं मुद्रयित्वा तु स्वदूतेनाभ्यहारयत् । निदर्शनार्थं गोविन्दो भीषयामास तं नृपं ।
स दूतः कालयवने दर्शयामास तं घटं । कालसर्पोपमः कृष्ण इत्युक्त्वा भरतर्षभ । ६४५५
तत्कालयवनो बुद्ध्वा त्रासनं यादवैः कृतं । पिपीलिकानां चण्डानां पूरयामास तं घटं ।
स सर्पो बहुभिस्तीक्ष्णैः सर्व्वतस्तैः पिपीलिकैः । भक्ष्यमाणः किलाङ्गेषु भस्मीभूतोऽभवत्तदा ।
तं मुद्रयित्वा तु घटं तथैव यवनाधिपः । प्रेषयामास कृष्णाय बाहुल्यमुपवर्णयन् ।
वसुदेवस्तु तं दृष्ट्वा निहतं योगमात्मनः । उत्सृज्य मथुरामाशु द्वारकामभिजग्मिवान् ।
वैरस्यान्तं विधित्सुस्तु वासुदेवो महायशाः । निवेश्य द्वारकां राजन् वृष्णीनाश्वास्य चैव ह । ६४६०
पदातिः पुरुषव्याघ्रो बाहुप्रहरणस्तदा । आजगाम महायोगी मथुरां मधुसूदनः ।
तं दृष्ट्वा निर्ययौ हृष्टः स कालयवनो रुषा । प्रेक्षापूर्व्वञ्च कृष्णोऽपि निश्चक्राम महाबलः ।
अथान्वगच्छद्गोविन्दं जिघृक्षुर्यवनेश्वरः । न चैनमशकद्राजा ग्रहीतुं योगधर्म्मिणं ।
मान्धातुस्तु सुतो राजा मुचुकुन्दो महायशाः । पुरा देवासुरे युद्धे कृतकर्म्मा महाबलः ।
वरेण च्छन्दितो देवैर्निद्रामेव स्म होतवान । श्रान्तस्य तस्य वागेवं तदा प्रादुरभूत्किल । ६४६५
प्रसुप्तं बोधयेद्यो मां तं दहेयमहं सुराः । चक्षुषा क्रोधदीप्तेनेत्येवमाह पुनः पुनः ।
एवमस्त्विति तं शक्र उवाच त्रिदशैः सह । स सुरैरभ्यनुज्ञात आद्रिराजमुपागमत् ।
स पर्व्वतगुहां काञ्चित्प्रविश्य श्रमकर्षितः । सुष्वाप कालमेतं वै यावत् कृष्णस्य दर्शनं ।

तत्सर्व्वं वासुदेवस्य नारदेन निवेदितं। वरदानञ्च देवेभ्यस्तेजस्तस्य च भूपतेः।
कृष्णोऽनुगम्यमानश्च तेन म्लेच्छेन शत्रुणा। तां गुहां मुचुकुन्दस्य प्रविवेश विनीतवान्। ६४७०
शिरःस्थाने तु राजर्षेर्मुचुकुन्दस्य केशवः। सन्दर्शनपथं त्यक्त्वा तस्थौ बुद्धिमतांवरः।
अनुप्रविश्य यवनो ददर्श पृथिवीपतिं। स तं सुप्तं कृतान्ताभमाससाद सुदुर्म्मतिः।
वासुदेवन्तु तं मत्वा घट्टयामास पार्थिवं। पादेनात्मविनाशाय शलभः पावकं यथा।
मुचुकुन्दस्तु राजर्षिः पादस्पर्शप्रबोधितः। चुकोप निद्राच्छेदेन पादस्पर्शेन तेन च।
सं संस्मृत्य वरं शक्रादवैक्षत समग्रतः। स दृष्टमात्रः क्रुद्धेन संप्रजज्वाल सर्व्वतः। ६४७५
ददाह पावकस्तन्तु शुष्कं वृक्षमिवाशनिः। क्षणेन कालयवनं नेत्रतेजोविनिर्गतः।
तं वासुदेवः श्रीमन्तं चिरसुप्तं नराधिपं। कृतकार्य्योऽब्रवीद्धीमानिदं वचनमुत्तमं।
राजंश्चिरप्रसुप्तोऽसि कथितो नारदेन मे। कृतं मे सुमहत्कार्य्यं स्वस्ति तेऽस्तु व्रजाम्यहं।
वासुदेवमथालक्ष्य राजा ह्रस्वं प्रमाणतः। परिवृत्तं युगं मेने कालेन महता तदा।
उवाच राजा गोविन्दं को भवान् किमिहागतः। कश्च कालं प्रसुप्तोऽस्मि यदि जानासि कथ्यतां। ६४८०
॥ वासुदेव उवाच ॥ सोमवंशोद्भवो राजा ययातिर्नाम नाहुषः। तस्य पुत्रो यदुर्ज्येष्ठस्तस्मादवरोऽस्य यवीयसः।
यदुवंशे समुत्पन्नं वसुदेवात्मजं विभो। वासुदेवं विजानीहि नृपते मामिहागतं।
त्रेतायुगे प्रसुप्तोऽसि विदितो मेऽसि नारदात्। इदं कलियुगं विद्धि किमन्यत्करवाणि ते।
मम शत्रुस्त्वया दग्धो देवदत्तवरो नृप। अवध्यो यो मया संख्ये भवेद्वर्षशतैरपि।
॥ वैशम्पायन उवाच ॥ इत्युक्तः स तु कृष्णेन निर्ज्जगाम गुहामुखात्। अन्वीयमानः कृष्णेन कृतकार्य्येण धीमता। ६४८५
ततो ददर्श पृथिवीमावृतां ह्रस्वकैर्नरैः। अल्पोत्साहैरल्पबलैरल्पवीर्य्यपराक्रमैः।
परेणाधिष्ठितञ्चैव राज्यं केवलमात्मनः। प्रीत्या विसृज्य गोविन्दं प्रविवेश महावनं।
हिमवन्तमगाद्राजा तपसे धृतमानसः। ततः स तप आस्थाय विनिर्मुच्य कलेवरं।
आरुरोह दिवं राजा कर्म्मभिः स्वैर्ज्जितो शुभैः। वासुदेवोऽपि धर्म्मात्मा उपायेन महामनाः।
घातयित्वात्मनः शत्रुं तत्सैन्यं प्रत्यपद्यत। प्रभूतरथहस्त्यश्ववर्म्मशस्त्रायुधध्वजं। ६४९०
आदायोपययौ धीमांस्तत्सैन्यं निहतेश्वरं।
निवेदयामास नराधिपे तदा तदुग्रसेने प्रतिपूर्णमानसः। जनार्द्दनो द्वारवतीञ्च तां पुरीमशोभयत्तेन धनेन भूरिणा।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि कालयवनवधे पञ्चदशाधिकशततोऽध्यायः ॥ ११५ ॥

॥ वैशम्पायन उवाच ॥ ततः प्रभाते विमले भास्करेऽभ्युदिते तदा। कृतजप्यो हृषीकेशो वनान्ते निषसाद ह।
परिचक्राम तं देशं दुर्गस्थानदिदृक्षया। उपतस्थुः कुलप्राग्र्या यादवा यदुनन्दनं।
रोहिण्यामहनि श्रेष्ठे स्वस्ति वाच्य द्विजोत्तमान्। पुण्याहघोषैर्विपुलैर्दुर्गस्यारभ्यतां क्रिया। ६४९५
ततः पङ्कजपत्राक्षो यादवान् केशिसूदनः। प्रोवाच वदतां श्रेष्ठो देवान् वृत्ररिपुर्यथा।
कल्पितेयं मया भूमिः पश्यध्वं देवसद्मवत्। नाम चास्याः कृतं पुर्य्याः ख्यातिं यदुपयास्यति।

इयं द्वारवती नाम पृथिव्यां निर्म्मिता मया । भविष्यति पुरी रम्या शक्रस्येवामरावती ।
तान्येवास्याः कारयिध्वं चिह्नान्यायतनानि च । चत्वरान् राजमार्गांश्च समानन्तःपुराणि च ।
देवा इवात्र मोदन्तां भवन्तो विकृतज्वराः । बाधमाना रिपून् युद्धानुग्रसेनपुरोगमाः ।
गृह्यन्तां गृहवास्तूनि कार्य्यन्तां त्रिकचत्वराः । मीयन्तां राजमार्गाश्च प्राकारस्य च या गतिः ।
प्रेष्यन्तां शिल्पिमुख्या वै नियुक्ता वेश्मकर्म्मसु । नियुज्यन्ताश्च देशेषु प्रेष्यकर्म्मकरा जनाः ।
एवमुक्तास्तु यदवो गृहसंग्रहतत्पराः । यथानिवेशं संहृष्टाश्चक्रुर्व्वास्तुपरिग्रहं ।
सूत्रहस्तास्ततो मानं चक्रुर्यादवपुङ्गवाः । पुण्येऽहनि महाराज द्विजातीन् प्रतिपूज्य च ।
वास्तुदैवतकर्म्माणि विधिनाऽकारयंस्ततः । स्थपतीनथ गोविन्दस्तत्रोवाच महामतिः ।
अस्मदर्थे सुविहितं क्रियतामत्र मन्दिरं । विभक्तचत्वरपथं मुनिविष्टेष्टदैवतं ।
ते तथेति महाबाहुमुक्ता स्थपतयस्तदा । दुर्गकर्म्मणि सम्भारानुपलभ्य यथाविधि ।
यथान्यायं निर्म्ममिरे द्वाराण्यायतनानि च । स्थानानि विदधुस्तस्यां ब्रह्मादीनां यथाक्रमं ।
अपामग्नेः सुरेशस्य वृषदोलूखलस्य च । चातुर्द्दिशानि चत्वारि द्वाराणि विदधुश्च ते ।
गृद्धञ्चैवमैन्द्रं भल्लाटं पुष्पदन्तं तथैव च । तेषु वेश्मसु युक्तेषु यादवेषु महात्मसु ।
पुर्य्याः क्षिप्रं प्रवेशार्थं चिन्तयामास माधवः । तस्य दैवोत्थिता बुद्धिर्विमला क्षिप्रकारिणी ।
पुर्य्याः सा वै प्रियकरी यदूनामभिवर्द्धिनी । शिल्पिमुख्यस्तु देवानां प्रजापतिसुतः प्रभुः ।
विश्वकर्मा स्वमत्या वै पुरीं संस्थापयिष्यति । मनसा समनुध्याय तस्यागमनकारणात् ।
त्रिदशाभिमुखः कृष्णो विविक्ते समपद्यत । तस्मिन्नेव ततः काले शिल्पाचार्य्यो महामतिः ।
विश्वकर्मा सुरश्रेष्ठः कृष्णस्य प्रमुखे स्थितः ।
॥ विश्वकर्म्मोवाच ॥ शक्रेण प्रेषितः क्षिप्रं तव विष्णो धृतव्रत । किङ्करः समनुप्राप्तः शासनं किं करोमि ते ।
यथा प्रभुः स देवेशस्त्र्यम्बकस्य यथाऽव्ययः । तथा त्वं देव मान्योऽसि विशेषो नास्ति वः प्रभो ।
त्रैलोक्याज्ञापिकां वाचमुत्सृज्यस्व महाभुज । एषोऽस्मि परितुष्टार्थः किं करोमि प्रशाधि मां ।
श्रुत्वा विनीतं तद्वाक्यं केशवो विश्वकर्म्मणः । प्रत्युवाच यदुश्रेष्ठः कंसारिरतुलं वचः ।
श्रुतार्थो देवगुह्यस्य भवान् यत्र वयं स्थिताः । अवश्यं त्विह कर्त्तव्यं सदनं मे सुरोत्तम ।
तदियं पूः प्रकाशार्थं निवेश्या मम सुव्रत । मत्प्रभावानुरूपैश्च गृहैश्चेयं समन्ततः ।
उत्तमा च पृथिव्यां स्यात् यथा स्वर्गेऽमरावती । तथेयं हि त्वया कार्य्या शक्रो ह्यस्मि महामते ।
मम स्थानमिदं कार्य्यं यथैव त्रिदिवे तथा । मर्त्याः पश्यन्तु मे लक्ष्मीं पुर्य्यां यदुकुलस्य च ।
एवमुक्तस्ततः प्राह विश्वकर्म्मा मतीश्वरः । कृष्णमक्लिष्टकर्म्माणं देवामित्रविनाशनं ।
सर्व्वमेतत् करिष्यामि यत्त्वयाऽभिहितं प्रभो । पुरी त्वियं जनस्यास्य न पर्य्याप्ता भविष्यति ।
भविष्यति च विस्तीर्णा वृद्धिरस्याः सुशोभना । चत्वारः सागरा ह्यस्यां विचरिष्यन्ति रूपिणः ।
यदीच्छेत् सागरः किञ्चिदुत्स्रष्टुमिह तोयराट् । ततः स्वायतलक्षणा पुरी स्यात् पुरुषोत्तम ।

एवमुक्तस्ततः कृष्णः प्रागेव कृतनिश्चयः। सागरं सरितां नाथमुवाच वदतांवरः।
समुद्र दश च द्वे च योजनानि जलाशये। प्रतिसंहियतामात्मा यद्यस्ति मयि मान्यता।
अवकाशे त्वया दत्ते पुरीयं मामकं बलं। पर्य्याप्तविषयारामा समग्रं विषहिष्यति। ६४९०
ततः कृष्णस्य वचनं श्रुत्वा नदनदीपतिः। समारुतेन योगेन उत्ससर्ज्ज जलाशयं।
विश्वकर्म्मा ततः प्रीतः पुर्य्यां संदृश्य वास्तु तत्। गोविन्दे चैव सम्मानं सागरः कृतवांस्तदा।
विश्वकर्म्मा ततः कृष्णमुवाच यदुनन्दनं। अद्यप्रभृति गोविन्द सर्व्वे समभिरोहत।
मनसा निर्म्मिता चेयं मया पूः प्रवरा विभो। अचिरेणैव कालेन गृहसंबाधमालिनी।
भविष्यति पुरी रम्या सुद्वारा प्रांशुतोरणा। चयाट्टालककेयूरा पृथिव्यां ककुदोपमा। ६४९५
अन्तःपुरञ्च कृष्णस्य परिचर्य्याक्षमं महत्। चकार तस्यां पुर्य्यां वै देशे त्रिदशपूजिते।
ततः सा निर्म्मिता कान्ता पुरी द्वारवती तदा। मानसेन प्रयत्नेन वैष्णवी विश्वकर्म्मणा।
विधानविहितद्वारा प्राकारवरशोभिता। परिखाचयसंगुप्ता साट्टप्राकारतोरणा।
कान्तनारीनरगणा वणिग्भिरुपशोभिता। नानापण्यसमाकीर्णा गगणादिव गाङ्गता।
प्रपावापीप्रसन्नादिरुद्यानैरुपशोभिता। समन्ततः संवृताङ्गी वनितेवायतेक्षणा। ६५००
समृद्धचत्वरवती वेश्मान्तसघमाचिता। रथ्याकोटिसहस्राढ्या शुभ्रराजपथोत्तरा।
भूषयन्ती समुद्रं सा स्वर्गमिन्द्रपुरी यथा। पृथिव्यां सर्व्वरत्नानामेका निचयशालिनी।
सुराणामपि सर्व्वेषां सामन्तक्षोभकारिणी। अप्रकाशं तदाकाशं प्रासादैरभिकुर्व्वती।
पृथिव्यां पृथुराष्ट्रायां जनौघप्रतिनादिता। ओघैश्च वारिराजस्य शिशिरीकृतमारुता।
अनूपोपवनैः कान्तैः कान्ता जनमनोरमा। सतारका द्यौरिव सा द्वारका प्रत्यराजत। ६५०५
प्राकारेणार्कवर्णेन शातकौम्भेन संवृता। हिरण्यप्रतिपूर्णैश्च गृहैर्गम्भीरनिस्वनैः।
शुभ्रमेघप्रतीकाशैर्द्वारैः सौधैश्च शोभिता। क्वचित् क्वचिदुदग्राग्रैरुपाट्टत्तमहापथा।
तामावसत् पुरीं कृष्णः सर्व्वयादवनन्दनः। अभिप्रेतजनाकीर्णां सोमः खमिव भासयन्।
विश्वकर्म्मकृतां दिव्यां रत्नजालसमाकुलां। विश्वकर्म्मा च तां कृत्वा पुरीं शक्रपुरीमिव।
जगाम त्रिदिवं देवो गोविन्देनाभिपूजितः। भूयस्तु बुद्धिरभवत् कृष्णस्य विदितात्मनः। ६५१०
जनानिमान् धनौघैस्तु तर्पयेयमहं यदि। स वैश्रवणसंश्लिष्टं निधीनामुत्तमं निधिं।
शङ्खमाह्वयतोपेन्द्रो निशि स्वभवने विभुः। स शङ्खः केशवाह्वानं ज्ञात्वा हि निधिराट् स्वयं।
आजगाम समीपं वै तस्य द्वारवतीपतेः। स शङ्खः प्राञ्जलिर्भूत्वा विनयादवनीं गतः।
कृष्णं विज्ञापयामास यथा वैश्रवणं तथा। भगवन् किं मया कार्य्यं सुराणां वित्तरक्षिणा।
नियोजय महाबाहो यन्मया कार्य्यमच्युत। तमुवाच हृषीकेशः शङ्खं गुह्यकमुत्तमं। ६५१५
जना येऽस्मिन् कृशधनास्तान्धनेनाभिपूरय। नेच्छाम्यनशितं द्रष्टुं कृशं मलिनमेव वा।
देहीति चैव याचन्तं नगर्य्यां निर्द्धनं नरं।

॥ वैशम्पायन उवाच ॥ शिरसा शासनं गृह्य निधिराट् केशवस्य तु । निधीनाज्ञापयामास द्वारवत्यां गृहे गृहे ।
धनौघैरभिवर्षध्वं चक्रुः सर्व्वं तथा च ते । नाधनो विद्यते तत्र क्षीणभाग्योऽपि यो नरः ।
द्वारवत्यां पुरि पुरा केशवस्य महात्मनः । चकार वायोराह्वानं भूयश्च पुरुषोत्तम । ६५६०
तत्रस्थ एव भगवान् यादवानां प्रियङ्करः । प्राणयोनिस्तु भूतानामुपतस्थे गदाधरं ।
एकमासीनमेकान्ते देवगुह्यधरं प्रभुं । किं मया देव कर्त्तव्यं सर्व्वगेनाशुगामिना ।
यथैव दूतो देवानां तथैवास्मि तवानघ । तमुवाच ततः कृष्णो रहस्यं पुरुषो हरिः ।
मारुतं जगतः प्राणरूपिणं समुपस्थितं । गच्छ मारुत देवेशमनुमान्य सहामरैः ।
सभां सुधर्म्मामादाय देवेभ्यस्त्वमिहानघ । यादवा धार्म्मिका ह्येते विक्रान्ताश्च सहस्रशः । ६५६५
तस्यां विशेयुरेते हि न तु या कृत्रिमा भवेत् । या त्वक्षया सभा रम्या कामगा कामरूपिणी ।
सा यदून् धारयेत् सर्व्वान् यथैव त्रिदशांस्तथा । संगृह्य वचनं तस्य कृष्णस्याक्लिष्टकर्म्मणः ।
वायुरात्मोपमगतिर्जगाम त्रिदिवालयं । सोऽनुमान्य सुरान् सर्व्वान् कृष्णवाक्यं निवेद्य च ।
सभां सुधर्म्मामादाय पुनरायान्महीतलं । सुधर्म्मणे सुधर्म्मान्तां कृष्णायाक्लिष्टकर्म्मणे ।
देवो देवसभां दत्त्वा वायुरन्तरधीयत । द्वारवत्यास्तु सा मध्ये केशवेन निवेशिता । ६५७०
सुधर्म्मा यदुमुख्यानां देवानां त्रिदिवे यथा । एवं स दिव्यैर्भौमैश्च जलजैश्चाव्ययो हरिः ।
द्रव्यैरलङ्करोति स्म पुरीं स्वां प्रमदामिव । मर्य्यादाश्चैव सञ्चक्रे श्रेणीश्च प्रकृतीस्तथा ।
बलाध्यक्षांश्च युक्तांश्च प्रकृतीशांस्तथैव च । उग्रसेनं नरपतिं काश्यञ्चापि पुरोहितं ।
सेनापतिमनाधृष्टिं विकद्रुं मन्त्रिपुङ्गवं । यादवानां कुलकरान् स्थविरान्दश तत्र वै ।
स्थापयामास मतिमान् सर्व्वकार्य्येष्वनन्तरान् । रथेष्वतिरथो यन्ता दारुकः केशवस्य वै । ६५७५
योधमुख्यश्च योधानां प्रवरः सात्यकिः कृतः । विधानमेवं कृत्वा स कृष्णः पुर्य्यामनिन्दितः ।
मुमुदे यदुभिः सार्द्धं लोकस्रष्टा महीतले । रेवतस्याथ कन्याञ्च रेवतीं शीलसम्मतां ।
प्राप्तवान् बलदेवस्तु कृष्णस्यानुमते तदा ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि द्वारवतीनिर्म्माणे षोडशाधिकशतोऽध्यायः ॥ ११६ ॥
॥ वैशम्पायन उवाच ॥ एतस्मिन्नेव काले तु जरासन्धः प्रतापवान् । नृपानुद्योजयामास चेदिराजप्रियेप्सया
सुतया भीष्मकस्याथ रुक्मिण्यां रुक्मभूषणः । शिशुपालस्य नृपतेर्विवाहो भविता किल । ६५८०
दन्तवक्रस्य तनयं सुवक्त्रममितौजसं । सहस्राक्षसमं युद्धे मायाशतविशारदं ।
पौण्ड्रस्य वासुदेवस्य तथा पुत्रं महाबलं । सुदेवं वीर्य्यसम्पन्नं पृथगक्षौहिणीपतिं ।
एकलव्यस्य पुत्रञ्च वीर्य्यवन्तं बलान्वितं । पुत्रञ्च पाण्ड्यराजस्य कलिङ्गाधिपतिं तथा ।
कृतवैरञ्च कृष्णेन वेणुदारिं नराधिपं । अंशुमन्तं तथा क्राथं श्रुतर्व्वाणञ्च भारत ।
निर्हत्तशत्रुं कालिङ्गं गान्धाराधिपतिं तथा । पटुमञ्च महावीर्य्यं कौशाम्ब्याधिपमेव च । ६५८५
पटुमञ्च महावीर्य्यं काश्याधिपतिमेव च ।

॥ जनमेजय उवाच ॥ कस्मिन् देशे नृपो जज्ञे रुक्मी वेदविदाम्वरः। कस्यान्ववाये द्युतिमान् सम्भूतो द्विजसत्तम।
॥ वैशम्पायन उवाच ॥ राजर्षेर्यादवस्यासीद्विदर्भो नाम वै सुतः। विन्ध्यस्य दक्षिणे पार्श्वे विदर्भां यो न्यवेशयत्।
क्रथकैशिकमुख्यास्तु पुत्रास्तस्य महात्मनः। बभूवुर्वीर्य्यसम्पन्नाः पृथग्वंशकरा नृपाः।
तस्यान्ववाये भीमस्य जज्ञिरे वृष्णयो नृप। क्रथस्य त्वंशुमान् वंशे कैशिकस्य तु भीष्मकः। ६६८०
हिरण्यरोमेत्याख्यं दाक्षिणात्येश्वरं जनाः। अगस्त्यगुप्तामाशां यः कुण्डिनस्थोऽन्वशान्नृपः।
रुक्मी तस्याभवत् पुत्रो रुक्मिणी च विशाम्पते। रुक्मी त्वस्त्राणि दिव्यानि द्रुमात् प्राप महाबलः।
जामदग्न्यात्तथा रामाद्ब्राह्ममस्त्रमवाप्तवान्। प्रास्पर्द्धत स कृष्णेन नित्यमद्भुतकर्म्मणा।
रुक्मिणी त्वभवद्राजन् रूपेणाप्रतिमा भुवि। चकमे वासुदेवस्तां श्रवादेव महामतिः।
स तया चाभिलषितः श्रवादेव जनार्द्दनः। तेजोवीर्य्यबलोपेतः स मे भर्त्ता भवेदिति। ६६८५
तां ददौ न च कृष्णाय रुक्मी द्वेषान्महाबलः। याचमानाय कंसस्य द्वेष्योऽसाविति चिन्तयन्।
चैद्यस्यार्थे सुनीथस्य जरासन्धो महाबलः। वरयामास तां राजा भीष्मकं भीमदर्शनं।
चेदिराजस्य हि वसोरासीत् पुत्रो वृहद्रथः। मगधेषु पुरा येन निर्म्मितः स गिरिव्रजः।
तस्यान्ववाये संजज्ञे जरासन्धो महाबलः। वसोरेव तदा वंशे दमघोषोऽपि चेदिराट्।
दमघोषस्य पुत्रास्तु पञ्च भीमपराक्रमाः। भगिन्यां वसुदेवस्य श्रुतश्रवसि जज्ञिरे। ६६९०
शिशुपालो दशग्रीवो रैभ्योऽथोपदिशो बली। सर्व्वास्त्रकुशला वीरा वीर्य्यवन्तो महाबलाः।
ज्ञातेः समानवंशस्य सुनीथः प्रददौ सुतं। जरासन्धस्तु सुतवद्दर्शैनं जुगोप च।
जरासन्धं पुरस्कृत्य वृष्णिशत्रुं महाबलं। कृतान्यागांसि चैद्येन वृष्णीनां तत्प्रियैषिणा।
जामाता त्वभवत्तस्य कंसस्तस्मिन् हते युधि। कृष्णार्थं वैरमभवत् जरासन्धस्य वृष्णिभिः।
भीष्मकं वरयामास सुनीथार्थे तु रुक्मिणीं। तां ददौ भीष्मकश्चापि शिशुपालाय वीर्य्यवान्। ६६९५
ततस्सैन्यमुपादाय जरासन्धो नराधिपः। ययौ विदर्भां सहितो दन्तवक्रेण यायिना।
अनुयातश्च पौण्ड्रेण वासुदेवेन धीमता। अङ्गवङ्गकलिङ्गानामीश्वरश्च महाबलः।
मानयिष्यंश्च तान् रुक्मी प्रत्युद्गम्य नराधिपान्। परया पूजयोपेतांस्तानिनाय पुरीं प्रति।
पितृष्वसुः प्रियार्थेश्च रामकृष्णावुभावपि। प्रययुर्वृष्णयश्चान्ये रथैस्तत्र बलान्विताः।
क्रथकैशिकभर्त्ता तान् प्रतिगृह्य यथाविधि। पूजयामास पूजार्हान् वहिरेव न्यवेशयत्। ६७००
श्वो भाविनि विवाहे तु रुक्मिणी निर्ययौ वहिः। चतुर्युजा रथेनेन्द्रं देवतायतनं शुभा।
इन्द्राणीमर्च्चयिष्यन्ती कृतकौतुकमङ्गला। दीप्यमानेन वपुषा बलेन महता वृता।
तां ददर्श ततः कृष्णो लक्ष्मीं साक्षादिव स्थितां। रूपेणाग्र्येण सम्पन्नां देवतायतनान्तिके।
वह्नेरिव शिखां दीप्तां मायां भूमिगतामिव। पृथिवीमिव गम्भीरामुत्थितां पृथिवीतलात्।
मरीचिमिव सोमस्य सौम्यां स्त्रीविग्रहां भुवि। श्रीमिवाग्र्यां विनापद्मं भविष्यां श्रीसहायिनीं। ६७०५
कृष्णेन मनसा दृष्टां दुर्निरीक्ष्यां सुरैरपि। श्यामावदातां स्वाक्षीं पृथुचार्व्वायतेक्षणां।

तां चोत्तमदनापाङ्गीं पूर्णचन्द्रनिभाननां । ताम्रतुङ्गनखीं सुभ्रूं नीलकुञ्चितमूर्द्धजां ।
अत्यर्थं रूपतः कान्तां पीनश्रोणिपयोधरां । तीक्ष्णशुक्लैः समैर्दन्तैः प्रभासद्भिरलङ्कृतां ।
अनन्यां प्रमदां लोके रूपेण यशसा श्रिया । रुक्मिणीं रूपिणीं देवीं पाण्डरक्षौमवासिनीं ।
तां दृष्ट्वा ववृधे कामः कृष्णस्य प्रियदर्शनां । हविषेवानलस्यार्च्चिर्मनस्तस्यां समादधत् ।
रामेण सह सम्मन्त्र्य केशवस्तु महाबलः । ततप्रमाथेऽकरोद्बुद्धिं वृष्णिभ्यः प्रणिधाय च ।
कृते तु देवकार्य्ये तां निष्क्रामन्तीं सुरालयात् । उन्माथ्य सहसा कृष्णः स्वं निनाय रथोत्तमं ।
वृक्षमुत्पाट्य रामोऽपि जघानापततः परान् । समनह्यन्त दाशार्हास्तदाज्ञप्तास्तु सर्व्वशः ।
ते रथैर्विविधाकारैः समुच्छ्रितमहाध्वजैः । वाजिभिर्वारणैश्चैव परिवव्रुर्हलायुधं ।
आदाय रुक्मिणीं कृष्णो जगामाशु पुरीं प्रति । रामे भारं समासज्य युयुधाने च वीर्य्यवान् ।
अक्रूरे विपृथौ चापि गदे च कृतवर्म्मणि । चक्रदेवे सुदेवे च सारणे च महाबले ।
निवृत्तशत्रौ विक्रान्ते भङ्गकारे विदूरथे । उग्रसेनात्मजे कङ्के शतद्युम्ने च केशवः ।
राजाधिदेवे मृदरे प्रसेने चित्रके तथा । अरिदान्ते बृहद्दुर्गे श्वफल्के सत्यके पृथौ ।
वृष्ण्यन्धकेषु चान्येषु मुख्येषु मधुसूदनः । गुरुमासज्य तं भारं ययौ द्वारवतीं प्रति ।
दन्तवक्रो जरासन्धः शिशुपालश्च वीर्य्यवान् । सन्नद्धा निर्य्ययुः क्रुद्धा जिघांसन्तो जनार्द्दनं ।
अङ्गवङ्गकलिङ्गैश्च सार्द्धं पौण्ड्रैश्च वीर्य्यवान् । निर्ययौ चेदिराजस्तु भ्रातृभिः स महारथैः ।
तान् प्रत्यगृह्णन् संरब्धा वृष्णिवीरा महारथाः । सङ्कर्षणं पुरस्कृत्य वासवं मरुतो यथा ।
आपतन्तं हि वेगेन जरासन्धं महाबलं । षड्भिर्विव्याध नाराचैर्युयुधानो महाहवे ।
अक्रूरो दन्तवक्रन्तु विव्याध नवभिः शरैः । तं प्रत्यविध्यत् कारूषो बाणैर्दशभिराशुगैः ।
विपृथुः शिशुपालञ्च शरैर्विव्याध सप्तभिः । अष्टभिः प्रत्यविध्यत्तं शिशुपालः प्रतापवान् ।
गवेषणस्तु चैद्यन्तु षड्भिर्विव्याध मार्गणैः । अतिदन्तस्तथाऽष्टाभिर्बृहद्दुर्गं तु पञ्चभिः ।
प्रतिविव्याध तांश्चैद्यः पञ्चभिः पञ्चभिः शरैः । जघानाश्वांश्चतुर्भिस्तु चतुरो विपृथोः शरैः ।
बृहद्दुर्गस्य भल्लेन शिरश्चिच्छेद वीर्य्यवान् । गवेषणस्य सूतञ्च प्राहिणोद्यमसादनं ।
हताश्वन्तु रथं त्यक्त्वा विपृथुः सुमहाबलः । आरुरोह रथं क्षिप्रं बृहद्दुर्गस्य वीर्य्यवान् ।
विपृथोः सारथिश्चैव गवेषणरथं द्रुतं । आरुह्य जवनानश्वान्नियन्तुमुपचक्रमे ।
ते क्रुद्धाः शरवर्षेण सुनीथं समवाकिरन् । नृत्यन्तं रथमार्गेषु चापहस्ताः कलापिनः ।
चक्रदेवो दन्तवक्रं बिभेदोरसि पत्रिणा । पट्टुसं पञ्चभिश्चापि विव्याध युधि मार्गणैः ।
ताभ्यां स विद्धो दशभिर्बाणैर्मर्म्मातिगैः शितैः । ततो बली चक्रदेवं बिभेद दशभिः शरैः ।
पञ्चभिश्चापि विव्याध स विदूराद्विदूरथं । विदूरथोऽपि तं षड्भिर्विव्याधाजौ शितैः शरैः ।
त्रिंशता प्रत्यविध्यत्तं बली बाणैर्महाबलं । कृतवर्म्मा बिभेदाजौ राजपुत्रं त्रिभिः शरैः ।
न्यहनत सारथिञ्चास्य ध्वजञ्चिच्छेद चोच्छ्रितं । प्रतिविव्याध तं क्रुद्धः पौण्ड्रः षड्भिः शिलीमुखैः ।

धनुश्चिच्छेद तत्तस्य भल्लेन क्रथवर्द्धनः । निवृत्तश्चांशुः कालिङ्गं विव्याध नवभिः शरैः ।
तोमरेणांसदेशे तं निर्बिभेद कलिङ्गजः । गजेनागाद्य कलहस्तु गजमङ्गस्य वीर्य्यवान् ।
तोमरेण जघानाङ्गं बिभेदाङ्गश्च तं शरैः । चित्रकश्च श्वफल्कश्च सत्यकश्च महाबलः ।
कलिङ्गस्य तदाऽनीकं नाराचैर्बिभिदुः शितैः । निर्दहन्निव रुक्मेणाजौ वङ्गराजस्य कुञ्जरं । ६६५०
जघान रामः संक्रुद्धो वङ्गराजञ्च संयुगे । तं हत्वा रथमारुह्य धनुरादाय वीर्य्यवान् ।
सङ्कर्षणो जघानाथैर्नाराचैः कैशिकान् बहून् । षड्भिर्निहत्य कारूषान् महेष्वासान् स वीर्य्यवान् ।
शतं जघान संक्रुद्धो मागधानां महाबलः । निहत्य तान्महाबाहुर्जरासन्धं ततोऽभ्ययात् ।
तमापतन्तं विव्याध नाराचैर्मागधस्त्रिभिः । तं बिभेदाष्टभिः क्रुद्धो नाराचैर्मुषलायुधः ।
चिच्छेद चास्य भल्लेन ध्वजं हेमपरिष्कृतं । तद्युद्धमभवद्घोरं तेषां देवासुरोपमं । ६६५५
सृजतां शरवर्षाणि निघ्नतामितरेतरं । गजैर्गजाः सुसंक्रुद्धाः सन्निपेतुः सहस्रशः ।
रथैरथाश्च संरब्धाः सादिभिश्चापि सादिनः । पदातयः पदातीनां शक्तिचर्म्मासिपाणयः ।
छिन्दन्तश्चोत्तमाङ्गानि विचेरुर्युधि ते पृथक् । असीनां पात्यमानानां कवचेषु महास्वनः ।
शराणां पततां शब्दः पक्षिणामिव शुश्रुवे । भेरीशङ्खमृदङ्गानां वेणूनाञ्च मृधे ध्वनिं ।
जुगूह घोषः शस्त्राणां ज्याघोषश्च महात्मनां । ६६६०

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि रुक्मिणीहरणे सप्तदशाधिकशततोऽध्यायः ॥ ११७ ॥

॥ वैशम्पायन उवाच ॥ कृष्णेन ह्रियमाणां वै रुक्मी श्रुत्वा तु रुक्मिणीं । प्रतिज्ञामकरोत् क्रुद्धः समक्षं भीष्मकस्य तु ।
अहत्वा युधि गोविन्दमनानीय च रुक्मिणीं । कुण्डिनं न प्रवेक्ष्यामि सत्यमेतद्ब्रवीमि ते ।
आस्थाय स रथं वीरः समुद्ग्रायुधध्वजं । जवेन प्रययौ क्रुद्धो बलेन महता वृतः ।
तमन्वयुर्नृपाश्चैव दक्षिणापथवासिनः । क्राथोंऽशुमान् श्रुतर्व्वा च वेणुदारिश्च वीर्य्यवान् ।
भीष्मकस्य सुताश्चान्ये स्यन्दनै रथिनाम्वराः । क्रथकैशिकमुख्याश्च सर्व्व एव महारथाः । ६६६५
ते गत्वा दूरमध्वानं सरितं नर्म्मदामनु । गोविन्दं ददृशुः क्रुद्धाः सहैव प्रियया स्थितं ।
अवस्थाप्य च तत्सैन्यं रुक्मी मदबलान्वितः । चिकीर्षन् द्वैरथं युद्धमभ्ययान्मधुसूदनं ।
स विव्याध चतुःषष्ट्या गोविन्दं निशितैः शरैः । तं प्रत्यविध्यत्सप्तत्या बाणैर्युधि जनार्द्दनः ।
यतमानस्य चिच्छेद ध्वजञ्चास्य महाबलः । जहार च शिरः कायात्सारथेस्तस्य वीर्य्यवान् ।
तं कृच्छ्रगतमाज्ञाय परिवव्रुर्जनार्द्दनं । दाक्षिणात्या जिघांसन्तो राजानः सर्व्व एव हि । ६६७०
तंऽशुमान्महाबाहुर्विव्याध नवभिः शरैः । श्रुतर्व्वा पञ्चभिः क्रुद्धो वेणुदारिश्च सप्तभिः ।
ततोंऽशुमन्तं गोविन्दो बिभेदोरसि वीर्य्यवान् । निषसाद रथोपस्थे व्यथितः स नराधिपः ।
श्रुतर्व्वणो जघानाश्वांश्चतुर्भिश्चतुरः शरैः । वेणुदारेर्ध्वजं छित्वा भुजं विव्याध दक्षिणं ।
तथैव च श्रुतर्व्वाणं शरैर्विव्याध सप्तभिः । शिश्रिये च ध्वजं क्रान्तो न्यषीदच्च व्यथान्वितः ।

क्रथकैशिकमुख्यास्ते रथवंशेन सर्व्वशः । सुसृजुः शरवर्षाणि वासुदेवं ततोऽभ्ययुः ।
बाणैर्बाणांस्तु चिच्छेद तेषां युधि जनार्द्दनः । जघान चैषां संरब्धो यतमानांश्च तान् परान् ।
पुनरन्यांश्चतुःषष्ट्या निजघान शितैः शरैः । क्रुद्धानापततो वीरान् द्रवतश्च महाबलः ।
विद्रुतं स्वबलं दृष्ट्वा रुक्मी क्रोधवशङ्गतः । पञ्चभिर्निशितैर्बाणैर्विव्याधोरसि केशवं ।
सारथिञ्चास्य विव्याध सायकैर्निशितैस्त्रिभिः । आजघान ध्वजञ्चास्य शरेणानतपर्व्वणा ।
केशवश्चापि तं षष्ट्या क्रुद्धो विव्याध मार्गणैः । धनुश्चिच्छेद चाप्यस्य यतमानस्य रुक्मिणः ।
अथान्यद्धनुरादाय रुक्मी कृष्णजिघांसया । प्रादुश्चकार स तदा दिव्यान्यस्त्राणि वीर्य्यवान् ।
अस्त्रैरस्त्राणि संवार्य्य तस्य कृष्णो महाबलः । पुनश्चिच्छेद चापञ्च रथेषाञ्च त्रिभिः शरैः ।
स छिन्नधन्वा विरथः खड्गमादाय चर्म्म च । उत्पपात रथाद्वीरो गरुत्मानिव वीर्य्यवान् ।
तस्याभिपततः खड्गं चिच्छेद युधि केशवः । नाराचैस्त्रिभिरात्क्रुद्धो बिभेदैनमथोरसि ।
स पपात महाबाहुर्व्वसुधामनुनादयन् । विसंज्ञो मूर्च्छितो राजा वज्रेणेव हतो गिरिः ।
तांश्च राज्ञः शरैः सर्व्वान् पुनर्विव्याध केशवः । रुक्मिणं व्यथितं दृष्ट्वा व्यद्रवंस्ते नराधिपाः ।
विचेष्टमानं भूमौ तं भ्रातरं वीक्ष्य रुक्मिणी । पादयोर्न्यपतद्विष्णोर्भ्रातुर्जीवितकाङ्क्षिणी ।
तामुत्थाप्य परिष्वज्य सान्त्वयामास केशवः । अभयं रुक्मिणे दत्त्वा प्रययौ स्वां पुरीं ततः ।
वृष्णयोऽपि जरासन्धं जित्वा तांश्चापि पार्थिवान् । प्रययुर्द्वारकां हृष्टाः पुरस्कृत्य हलायुधं ।
प्रयाते पुण्डरीकाक्षे श्रुतर्व्वाऽभ्येत्य संयुगे । रुक्मिणं रथमारोप्य प्रययौ स्वपुरं ततः ।
अनानीय स्वसारन्तु रुक्मी वीर्य्यमदान्वितः । हीनप्रतिज्ञो नैच्छत् स प्रवेष्टुं कुण्डिनं पुरं ।
विदर्भेषु च वासार्थं निर्म्ममेऽन्यत् पुरं महत् । तद्भोजकटमित्येवं बभूव भुवि विश्रुतं ।
तत्रौजसा महातेजा दक्षिणां दिशमन्वगात् । भीष्मकः कुण्डिने चैव राजावास महाभुजः ।
द्वारकाञ्चापि सम्प्राप्ते रामे वृष्णिबलान्विते । रुक्मिण्याः केशवः पाणिं जग्राह विधिवत् प्रभुः ।
ततः सह तया रेमे प्रियया प्रीयमाणया । सीतयेव पुरा रामः पौलोम्येव पुरन्दरः ।
सा हि तस्याभवज्ज्येष्ठा पत्नी कृष्णस्य भाविनी । पतिव्रता गुणोपेता रूपशीलगुणान्विता ।
तस्यामुत्पादयामास पुत्रान्दश महारथान् । चारुदेष्णं सुदेष्णञ्च प्रद्युम्नञ्च महाबलं ।
सुषेणं चारुगुप्तञ्च चारुबाहुञ्च वीर्य्यवान् । चारुविन्दं सुचारुञ्च भद्रचारुन्तथैव च ।
चारुञ्च बलिनां श्रेष्ठं सुतां चारुमतीं तथा । धर्म्मार्थकुशलास्ते तु कृतास्त्रा युद्धदुर्म्मदाः ।
महिषीः सप्त कल्याणीस्ततोऽन्या मधुसूदनः । उपयेमे महाबाहुर्गुणोपेताः कुलोद्गताः ।
कालिन्दीं मित्रविन्दाञ्च सत्यां नाग्नजितीं तथा । सुतां जाम्बवतश्चापि रोहिणीं कामरूपिणीं ।
मद्रराजसुताञ्चापि सुशीलां भद्रलोचनां । सात्राजितीं सत्यभामां लक्ष्मणां चारुहासिनीं ।
शैव्यस्य च सुतां तन्वीं रूपेणाप्सरसां समां । स्त्रीसहस्राणि चान्यानि षोडशातुलविक्रमः ।

उपयेमे हृषीकेशः सर्व्वा भेजे च ताः समं । पराद्ध्यवस्त्राभरणाः कामैः सर्व्वैः समन्विताः ।
जज्ञिरे तस्य पुत्राश्च तासु वीराः सहस्रशः । सर्व्वास्त्रकुशलाः सर्व्वे बलवन्तो महारथाः ।
यज्वानः पुण्यकर्म्माणो महाभागा महाबलाः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि रुक्मिणीहरणे अष्टादशाधिकशततोऽध्यायः ॥ ११८ ॥
॥ वैशम्पायन उवाच ॥ ततः काले व्यतीते तु रुक्मी महति वीर्य्यवान् । दुहितुः कारयामास स्वयंवरमरिन्दमः ।
तत्राहूता हि राजानो राजपुत्राश्च रुक्मिणा । समाजग्मुर्म्महावीर्य्या नानादिग्भ्यः श्रियाऽन्विताः ।
तत्राजगाम प्रद्युम्नः कुमारैरपरैर्वृतः । सा हि तञ्चकमे कन्या स च तां शुभलोचनां ।
शुभाङ्गी नाम वैदर्भी कान्तिद्युतिसमन्विता । पृथिव्यामभवत् ख्याता रुक्मिणस्तनया तदा ।
उपविष्टेषु सर्व्वेषु पार्थिवेषु महात्मसु । वैदर्भी वरयामास प्रद्युम्नमरिसूदनं ।
स हि सर्व्वास्त्रकुशलः सिंहसंहननो युवा । रूपेणाप्रतिमो लोके केशवस्यात्मजोऽभवत् ।
वयोरूपगुणोपेता राजपुत्री च साऽभवत् । नारायणीवेन्द्रसेना जातकामा च तं प्रति ।
वृत्ते स्वयंवरे जग्मू राजानः स्वपुराणि ते । उपादाय तु वैदर्भीं प्रद्युम्नो द्वारकां ययौ ।
स तस्यां जनयामास देवगर्भोपमं सुतं । अनिरुद्धमिति ख्यातं कर्म्मणाऽप्रतिमं भुवि ।
धनुर्व्वेदे च वेदे च नीतिशास्त्रे च पारगं । अभवत्स यदा राजन्ननिरुद्धो वयोऽन्वितः ।
तदाऽस्य रुक्मिणः पौत्रीं रुक्मिणीं रुक्मसन्निभां । पत्न्यर्थं वरयामास नाम्ना रुक्मवतीति सा ।
अनिरुद्धं गुणैर्दान्तं कृतबुद्धिर्नृपस्ततः । प्रीत्या च रौक्मिणेयस्य रुक्मिणश्चाप्युपप्रहात् ।
स्पर्द्धमानोऽपि कृष्णेन वैरं तदपहाय सः । ददामीत्यब्रवीद्राजा प्रीतिमान् जनमेजय ।
केशवः सह रुक्मिण्या पुत्रैः सङ्कर्षणेन च । अन्यैश्च वृष्णिभिः सार्द्धं विदर्भान् सबलो ययौ ।
संयुक्ता ज्ञातयश्चैव रुक्मिणः सुहृदश्च ये । आहूता रुक्मिणा तेऽपि तत्राजग्मुर्नराधिपाः ।
शुभे तिथौ महाराज नक्षत्रे चाभिपूजिते । विवाहः सोऽनिरुद्धस्य बभूव परमोत्सवः ।
पाणौ गृहीते वैदर्भ्यास्त्वनिरुद्धेन भारत । वैदर्भयादवानाञ्च सम्बभूव परमोत्सवः ।
रेमिरे वृष्णयस्तत्र पूज्यमाना यथाऽमराः । अथाश्मकानामधिपो वेणुदारिरुदारधीः ।
आर्च्चः श्रुतर्व्वा चाणूरः क्राथश्चैवांशुमानपि । जयत्सेनः कलिङ्गानामधिपश्च महाबलः ।
पाण्ड्यश्च नृपतिः श्रीमानृषिकाधिपतिस्तथा । एते संमन्त्र्य राजानो दाक्षिणात्या महर्द्धयः ।
अभिगम्याब्रुवन् सर्व्वे रुक्मिणं रहसि प्रभुं । भवानक्षेषु कुशलो वयञ्चापि रिरंसवः ।
प्रियद्यूतश्च रामोऽसावक्षेष्वनिपुणोऽपि च । ते भवन्तं पुरस्कृत्य जेतुमिच्छाम तं वयं ।
इत्युक्तो रोचयामास रुक्मी द्यूतं महारथः । ते शुभां काञ्चनस्तम्भां कुसुमैर्भूषिताजिरां ।
सभां तां विविशुर्हृष्टाः सिक्ताञ्चन्दनवारिणा । तां प्रविश्य ततः सर्व्वे शुभ्रस्रगनुलेपनाः ।
सौवर्णेष्वासनेष्वासाञ्चक्रिरे विजिगीषवः । आहूतो बलभद्रस्तु कितवैरक्षकोविदैः ।
वाढमित्यब्रवीद्धृष्टः सह दीव्याम पश्यतां । निकृत्या तं जिगीषन्तो दाक्षिणात्या नराधिपाः ।

मणिमुक्तासुवर्णानि तत्रानिन्युः सहस्रशः । ततः प्रावर्त्तत द्यूतं तेषां तद्गतिनाशनं ।
कलहायासदं घोरं दुर्मतीनां क्षयावहं । निष्काणान्तु सहस्राणि सुवर्णस्य दशादितः ।
रुक्मिणा सह सम्पाते बलदेवो ग्लहं ददौ । तं जिगाय ततो रुक्मी यतमानं महाबलं । ६६९५
तावदेवापरं भूयो बलदेवं जिगाय सः । असहुज्जीयमानस्तु रुक्मिणा केशवाग्रजः ।
सुवर्णकोटीं जग्राह ग्लहे तस्य महाबलः । जितमित्येव हृष्टोऽथ तमाक्षिकरभाषत ।
श्लाघमानस्य चिक्षेप प्रहसन्मुसलायुधं । अविद्यो दुर्बलः श्रीमान् हिरण्यममितं मया ।
अजेयो बलदेवोऽयमक्षद्यूते पराजितः । कलिङ्गराजस्तच्छ्रुत्वा प्रजहास भृशं तदा ।
दन्तान् प्रदर्शयन् हृष्टस्तत्राकुप्यद्धलायुधः । रुक्मिणस्तद्वचः श्रुत्वा पराजयनिमित्तजं । ६७००
निगृह्यमानस्तीक्ष्णाभिर्वाग्भिर्भीष्मकसूनुना । रोषमहारयामास जितरोषोऽपि धर्म्मवित् ।
संक्रुद्धो धर्षणां प्राप्य रौहिणेयो महाबलः । धैर्य्यात्मनः संनियम्य ततो वचनमब्रवीत् ।
दशकोटिसहस्राणि ग्लह एको ममापरः । एतं संपरिगृह्णीष्व पातयाक्षान्नराधिप ।
कृष्णाक्षान् लोहिताक्षांश्च देशेऽस्मिंस्त्वधिपांशुले । इत्येवमाह्वयामास रुक्मिणं रौहिणीसुतः ।
अनुक्त्वा वचनं किञ्चिद्बाढमित्यब्रवीत् पुनः । अक्षान् रुक्मी तदा हृष्टः पातयामास पार्थिवः । ६७०५
चातुरक्ते तु निर्वृत्ते निर्ज्जितः स नराधिपः । बलदेवेन धर्म्मेण नेत्युवाच ततो बलं ।
धैर्य्यात्मनः संनियम्य न स किञ्चिदुवाच ह । बलदेवं ततो रुक्मी मया जितमिति स्मयन् ।
बलदेवस्तु तच्छ्रुत्वा जिह्मवाक्यं नराधिपात् । भूयः क्रोधसमाविष्टो नोत्तरं व्याजहार ह ।
ततो गम्भीरनिर्घोषा वागुवाचाशरीरिणी । बलदेवस्य तं क्रोधं वर्द्धयन्ती महात्मनः ।
सत्यमाह बलः श्रीमान्धर्म्मेणैष पराजितः । अनुक्त्वाऽपि ततः किञ्चित् प्राप्तो भवति कर्म्मणा । ६७१०
मनसा समनुज्ञातं तत् स्यादित्यवगम्यतां । इति श्रुत्वा वचः सत्यमन्तरीक्षात् सुभाषितं ।
सङ्कर्षणस्तदोत्थाय सौवर्णेनाक्षणा बली । जघानाष्टापदेनैव प्रमथ्य यदुपुङ्गवः ।
रुक्मिण्या भ्रातरं ज्येष्ठं निष्पिपेष महीतले । विवादे कुपितो रामः चेप्तारं क्रूरभाषिणं ।
ततोऽपसृत्य संक्रुद्धः कलिङ्गाधिपतेरपि । दन्तान् बभञ्ज संरम्भात् प्रोन्ननाद च सिंहवत् ।
खड्गमुद्यम्य तांश्चापि त्रासयामास पार्थिवान् । स्तम्भं सभायाः सौवर्णमुत्पाट्य बलिनाम्बरः । ६७१५
गजेन्द्र इव तं स्तम्भं कर्षन् सङ्कर्षणस्ततः । निर्ज्जगाम सभाद्वारात्त्रासयन् क्रथकैशिकान् ।
रुक्मिणं निकृतिप्रज्ञं स हत्वा यादवर्षभः । वित्रास्य द्विषतः सर्व्वान् सिंहः क्षुद्रमृगानिव ।
जगाम शिबिरं रामः स्वमेव स्वजनावृतः । न्यवेदयत कृष्णाय तच्च सर्व्वं यथाऽभवत् ।
नोवाच स तदा किञ्चित् कृष्णो रामं महाद्युतिः । रुक्मिणी च ततः श्रुत्वा निहतं भ्रातरं प्रियं ।
निगृह्य च तदात्मानं क्रोधादश्रूण्यवर्त्तयत् । स हतो वासुदेवेन यः पूर्व्वं परवीरहा । ६७२०
स रामकरमुक्तेन निहतो द्यूतमण्डले । अष्टापदेन बलवान्राजा वज्रधरोपमः ।
तस्मिन् हते महावीर्य्ये नृपतौ भीष्मकात्मजे । द्रुमभार्गवतुल्ये वै द्रुमभार्गवशिक्षिते ।

कृतौ च युद्धकुशले नित्ययाजिनि पातिते। वृष्णयश्चान्धकाश्चैव सर्व्वे विमनसोऽभवन्।
एतत्ते सर्व्वमाख्यातं रुक्मिणो निधनं मया। वैरस्य च समुत्थानं वृष्णिभिर्भरतर्षभ।
वृष्णयोऽपि महाराज धनान्यादाय सर्व्वशः। रामकृष्णौ समाश्रित्य ययुर्द्वारवतीं पुरीं। ६०६५
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि रुक्मिवधे ऊनविंशत्यधिकशततोऽध्यायः ॥ ११९ ॥
॥ जनमेजय उवाच ॥ भूय एव तु विप्रर्षे बलदेवस्य धीमतः। माहात्म्यं श्रोतुमिच्छामि शेषस्य धरणीभृतः।
अतीव बलदेवन्तं तेजोराशिमनिर्ज्जितं। कथयन्ति महात्मानो ये पुराणविदो जनाः।
तस्य कर्म्माण्यहं विप्र श्रोतुमिच्छामि तत्त्वतः। अनन्तं यं विदुर्नागमादिदेवं महौजसं।
॥ वैशम्पायन उवाच ॥ पुराणे नागराजोऽसौ कथ्यते धरणीधरः। शेषस्तेजोनिधिः श्रीमानकम्प्यः पुरुषोत्तमः।
योगाचार्य्यो महावीर्य्यो वेदमन्त्रमुखो बली। जरासन्धं गदायुद्धे जितवान् यो न चावधीत्। ६०७०
बहवश्चैव राजानः पृथिव्यां पृथिवीपते। अन्वयुर्म्मागधं सर्व्वे ते चापि विजिता रणे।
नागायुतबलप्राणो भीमो भीमपराक्रमः। असकृद्बलदेवेन बाहुयुद्धे विनिर्ज्जितः।
दुर्य्योधनस्य कन्यान्तु हरमाणो न्यगृह्यत। शाम्बो जाम्बवतीपुत्रो नगरे नागसाह्वये।
राजभिः सर्व्वतो रुद्धो हरमाणो बलात् किल। तमुपश्रुत्य संरुद्धमाजगाम हलायुधः।
रामस्तस्य तु मोक्षार्थमागतो नालभच्च तं। ततश्चुक्रोध बलवानद्भुतञ्चाकरोन्महत्। ६०७५
अनिवार्य्यमभेद्यञ्च दिव्यमप्रतिमं बली। लाङ्गलास्त्रं समुद्यम्य ब्रह्मदण्डाभिमन्त्रितं।
प्राकारवप्रे विन्यस्य पुरस्य स महाद्युतिः। प्रक्षेप्तुमैच्छद्गङ्गायां नगरं कौरवस्य तत्।
तदा घूर्णितमालक्ष्य पुरं दुर्य्योधनो नृपः। शाम्बं निर्य्यातयामास सभार्य्यं तस्य धीमतः।
ददौ शिष्यं तदात्मानं रामस्य सुमहात्मनः। गदायुद्धे कुरुपतिं शिष्यं जग्राह तञ्च सः।
ततः प्रभृति राजेन्द्र पुरमेतद्विघूर्णितं। आवर्ज्जितमिवाभाति गङ्गामभिमुखं नृप। ६०८०
इदमित्यद्भुतं कर्म्म रामस्य प्रथितं भुवि। भाण्डीरे कथ्यते राजन् यत् कृतं शौरिणा पुरा।
प्रलम्बं मुष्टिनैकेन यज्जघान हलायुधः। धेनुकञ्च महाकायं चिक्षेप नगमूर्द्धनि।
स गतासुः पपातोर्व्व्यां दैत्यो गर्द्दभरूपधृक्।
स्रवणजलगमा महानदी द्रुतजलवेगतरङ्गगामिनी। नगरमभिमुखी यदा कृता हलविधृता यमुना यमस्वसा।
बलदेवस्य माहात्म्यमेतत्ते कथितं मया। अनन्तस्याप्रमेयस्य शेषस्य सुमहात्मनः। ६०८५
इति पुरुषवरस्य सीरिणो बहुविधमुक्तमनन्यदेव च। यदकथितमिहाद्य कर्म्म ते तदुपलभस्व पुराणविस्तरात्।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि बलदेवमाहात्म्यकथने विंशत्यधिकशततोऽध्यायः ॥ १२० ॥
॥ जनमेजय उवाच ॥ प्रत्येत्य द्वारकां विष्णुर्हते रुक्मिणि वीर्य्यवान्। अकरोद्यन्महाबाहुस्तन्मे वद महामुने।
॥ वैशम्पायन उवाच ॥ स तैर्वृतः पुरीं गत्वा सर्व्वैर्यादवनन्दनः। द्वारकां भगवान् कृष्णः प्रत्यवैक्षत वीर्य्यवान्।
प्रत्यपद्यत रत्नानि विविधानि बहूनि च। यथार्हं पुण्डरीकाक्षो नैर्ऋतान् प्रत्यवारयत्।
तत्र विघ्नं चरन्ति स्म दैतेयाः सह दानवैः। तान् जघान महाबाहुर्व्वरदत्तान्महासुरान्। ६०९०

विप्रचित्त्याकरोत्तत्र नरको नाम दानवः । वासनः सुरसंघानां देवराजरिपुर्महान् ।
स भौमो मूर्त्तिलिङ्गस्थः सर्व्वदेवाभिबाधिता । मानुषाणामृषीणाञ्च प्रतीपमकरोत्तदा ।
त्वष्टुर्दुहितरं भौमः कशेरुमगमत्तदा । गजरूपेण जग्राह रुचिराङ्गीं चतुर्द्दशीं ।
प्रमथ्य तां वरारोहां नरको वाक्यमब्रवीत् । नष्टशोकभयो मोहात् प्राग्ज्योतिषपतिस्तदा ।
यानि देवमनुष्येषु रत्नानि विविधानि च । बिभर्त्ति च मही कृत्स्ना सागरेषु च यद्वसु ।
अद्यप्रभृति तानीह सहिताः सर्व्वनैर्ऋताः । ममैवोपाहरिष्यन्ति दैत्याश्च सह दानवैः ।
एवमुक्त्वा तु वस्त्राणि रत्नानि विविधानि च । सञ्जहार तदा भौमस्तच्च नाधिचकार सः ।
गन्धर्व्वाणाञ्च याः कन्या जहार नरको बली । याश्च देवमनुष्याणां सप्त चाप्सरसां गणाः ।
चतुर्द्दशसहस्राणि सैकविंशच्छतानि च । एकवेणीधराः सर्व्वाः सतां मार्गमनुव्रताः ।
तासां पुरवरं भौमोऽकारयन्मणिपर्व्वतं । अलकायामदीनात्मा मुरोः स्वविषयं प्रति ।
ताश्च प्राग्ज्योतिषपतिं मुरोश्चैव दशात्मजाः । नैर्ऋताश्च यथा मुख्याः पालयन्त उपासते ।
स एष तमसः पारे वरदत्तो महासुरः । न चामरगणैः सर्व्वैः सहितैः कर्म्म तत् पुरा ।
कृतपूर्व्वं महाघोरं यदकार्षीन्महासुरः । अदितिं धर्षयामास कुण्डलार्थे महासुरः ।
यं मही सुषुवे देवी यस्य प्राग्ज्योतिषं पुरं । द्वारपालाश्च चत्वारस्तत्रासन् युद्धदुर्म्मदाः ।
हयग्रीवो निसुन्दश्च वीरः पञ्चनदस्तथा । मुरुः पुत्त्रसहस्रैश्च वरदत्तोऽसुरो महान् ।
आदेवयानमावृत्य पन्थानं समुपस्थिताः । वित्रासनाः सुकृतिनां विरूपैराक्षसैः सह ।
तद्वधार्थं महाबाहुः शङ्खचक्रगदासिभृत् । जातो वृष्णिषु देवक्यां वसुदेवाज्जनार्द्दनः ।
तस्याथ पुरुषेन्द्रस्य लोके प्रथिततेजसः । निवासो द्वारकादेवैरुपायादुपपादिता ।
अतीव हि पुरी रम्या द्वारका वासवक्षयात् । महार्णवपरिक्षिप्ता पञ्चपर्व्वतशोभिता ।
तस्यां देवपुराभायां सभा काञ्चनतोरणा । सा दाशार्हीति विख्याता योजनायामविस्तृता ।
तत्र वृष्ण्यन्धकाः सर्व्वे रामकृष्णपुरोगमाः । लोकयात्रामिमां कृत्स्नां परिरक्षन्त आसते ।
तत्रासीनेषु सर्व्वेषु कदाचिद्भरतर्षभ । दिव्यगन्धो ववौ वायुः पुष्पवर्षं पपात च ।
ततः किलकिलाशब्दः प्रभाजालाभिसंवृतः । मुहूर्त्तमन्तरीक्षेऽभूत्ततो भूमौ प्रतिष्ठितः ।
मध्ये तु तेजसस्तस्य पाण्डरं गजमास्थितः । वृतो देवगणैः सर्व्वैर्वासवः प्रत्यदृश्यत ।
रामकृष्णौ च राजा च वृष्ण्यन्धकगणैः सह । प्रत्युद्ययुर्महात्मानं पूजयन्तः सुरेश्वरं ।
सोऽवतीर्य्य गजात्तूर्णं परिष्वज्य जनार्द्दनं । सस्वजे वसुदेवञ्च तञ्च राजानमाहुकं ।
वृष्णीनन्यान् सस्वजे च यथाकालं यथावयः । पूजितो रामकृष्णाभ्यामाविवेश सभां शुभां ।
तत्रासीनोऽभ्यलङ्कृत्य सभान्तां स सुरेश्वरः । अर्घ्यादिसमुदाचारं प्रत्यगृह्णाद्यथाविधि ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि नरकवधे एकविंशत्यधिकशततोऽध्यायः ॥ १२१ ॥
॥ वैशम्पायन उवाच ॥ अथोवाच महातेजा वासवो वासवानुजं । सान्त्वपूर्व्वं करेणास्य संस्पृश्य वदनं शुभं ।

देवकीनन्दन वचः शृणु मे मधुसूदन । येन त्वाऽभिगतोऽद्याहं कार्य्येणामित्रकर्षण ।
नैर्ऋतो नरको नाम ब्रह्मणो वरदर्पितः । अदित्याः कुण्डले मोहाज्जहार दितिनन्दनः ।
देवानां विप्रिये नित्यमृषीणाञ्च स वर्त्तते । तव चैवान्तरप्रेप्सी जहि तं पापपूरुषं ।
अयं त्वां गरुड़स्तत्र प्रापयिष्यति कामगः । कामवीर्य्योऽतितेजस्वी वैनतेयोऽन्तरीक्षगः ।
अवध्यः सर्व्वभूतानां भौमः स नरकोऽसुरः । निसूदयित्वा तं पापं क्षिप्रमागन्तुमर्हसि ।
इत्युक्तः पुण्डरीकाक्षो देवराजेन केशवः । प्रतिजज्ञे महाबाहुर्नरकस्य निवर्हणं ।
ततः सहैव शक्रेण शङ्खचक्रगदासिभृत् । प्रतस्थे गरुड़ेनाथ सत्यभामासहायवान् ।
क्रमेण सप्तस्कन्धान् स मारुतानां स वासवः । पश्यतां सर्व्वसिद्धानामूर्द्ध्वमाचक्रमे बली ।
वारणेन्द्रगतः शक्रो गरुड़स्थो जनार्द्दनः । प्रकाशेते विदूरत्वात् सूर्य्याचन्द्रमसाविव ।
अथान्तरीक्षे गन्धर्व्वैरप्सरोभिश्च केशवः । स्तूयमानोऽथ शक्रश्च क्रमेणान्तरधीयत ।
समाधायेतिकर्त्तव्यं वासवो त्रिदशाधिपः । स्वमेव भवनं प्रायात् कृष्णः प्राग्ज्योतिषं प्रति ।
पक्षानिलहतो वायुः प्रतिलोमं ववौ तदा । ततो भीमरवैर्मेघैर्व्याप्तमुर्गगणेश्वराः ।
क्षणेन समनुप्राप्तो दिवमाकाशगेन वै । दूरादेव च तान्दृष्ट्वा प्रययौ यत्र ते स्थिताः ।
अपश्यत् पर्व्वतद्वारि हस्त्यश्वरथवाहनं । क्षुरान्तान् भैरवान् पाशान् षट्सहस्रान्ददर्श सः ।
॥ वैशम्पायन उवाच ॥ गरुड़स्योपरि श्रीमान् शङ्खचक्रगदासिभृत् । विभ्रन्नीलाम्बुदाकारं पीतवासाश्चतुर्भुजः ।
वनमालाकुलोरस्कः श्रीवत्सेन्दुनिभोरसः । किरीटमूर्द्धा सूर्य्याभः सविद्युदिव चन्द्रमाः ।
ज्याविकूजमहाशब्दः श्रूयतेऽशनिनिस्वनः । ज्ञात्वा च दानवः सर्व्वं स्वयं विष्णुरिहागतः ।
क्रोधाद्रुधिररक्ताक्षो मुरुः कालान्तकप्रभः । अभ्यधावत वेगेन शक्तिं गृह्य महासुरः ।
चिक्षेप स महाशक्तिं वज्रकाञ्चनभूषितां । तामापतन्तीं शक्तिं स महोल्कां ज्वलितामिव ।
समाधत्त शरश्चैकं रुक्मपुङ्खं जनार्द्दनः । द्विधाऽच्छिनत् क्षुरप्रेण वासुदेवः स वीर्य्यवान् ।
शक्तिं चिच्छेद तत्राशौ विद्युत्पुञ्ज इव ज्वलन् । पुनस्तु क्रोधरक्ताक्षो मुरुर्गृह्य महागदां ।
इन्द्राशनिरिवेन्द्रेण विसृष्ट इव निस्वनः । आकर्णपूर्णञ्चिक्षेप अर्द्धचन्द्रं सुरोत्तमः ।
मध्यदेशे तु चिच्छेद गदां तां रुक्मभूषितां । पुनश्चिच्छेद भल्लेन दानवस्य शिरो रणे ।
संच्छिद्य पाशान् सर्व्वांस्तान्मुरुं हत्वा सबान्धवं । सोऽग्र्यान्योगणान् हत्वा नरकस्य महाबलान् ।
शिलासंघानतिक्रम्य भगवान् देवकीसुतः । अपश्यद्दानवं सैन्यं निसुन्दस्य महाबलं ।
हयग्रीवश्च दितिजं तथाऽन्यांश्चिक्षयोधिनः । रोधयामास तन्मार्गं स्वसैन्येन महाबलः ।
निसुन्दो बलिनां श्रेष्ठो रथमारुह्य सत्वरः । जग्राह कार्म्मुकं दिव्यं हेमपृष्ठं दुरासदं ।
विव्याध दशभिर्व्वाणैर्निसुन्दो मधुसूदनं । केशवश्चापि सप्तत्या विव्याध निशितैः शरैः ।
अप्राप्तांश्चान्तरीक्षे तान्शरांश्चिच्छेद माधवः । ते सर्व्वे सैनिकाः कृष्णं समन्तात् पर्य्यवारयन् ।
शरजालेन महता च्छाद्यमानः सुरोत्तमः । दृष्ट्वा तान्दानवान् सर्व्वान् सक्रोधो मधुसूदनः ।

ततो दिव्येन चास्त्रेण पार्ज्जन्येन जनार्द्दनः । महता शरवर्षेण वारयामास तद्बलं । ६८५०
पञ्चपञ्चशरैस्तेषु एकैकेषु च तान् बहून् । पार्ज्जन्यस्य प्रभावेण सर्व्वांस्तानताडयत् ।
दुद्रुवुर्भयवित्रस्ता भग्नास्ते दानवा रणे । स्वसैन्यं विद्रुतं दृष्ट्वा निसुन्दस्तु पुनर्मृधे ।
विसृजञ्छरवर्षाणि च्छादयामास केशवं । न विभाति रणे सूर्य्यो नापि व्योम दिशो दश ।
शरैः सञ्छादयामास निसुन्दो गरुडध्वजं । सावित्रं नाम दिव्यास्त्रं जग्राह पुरुषोत्तमः ।
तेन बाणेन तान् बाणांश्चिच्छेद मधुसूदनः । बाणैर्बाणांस्तु सञ्छिद्य तत्र कृष्णो महाबलः । ६८५५
छत्रमेकेन बाणेन रथेषाञ्च त्रिभिः शरैः । पुनश्चिच्छेद तानश्वांश्चतुर्भिश्चतुरः शरैः ।
सारथिं पञ्चभिर्ब्बाणैर्ध्वजमेकेन चिच्छिदे । शरेणैकेन पुनः कृष्णः सुतीक्ष्णेन शितेन वै ।
शिरश्चिच्छेद भल्लेन निसुन्दस्य सुरोत्तमः । निसुन्दं पतितं दृष्ट्वा हयग्रीवः प्रतापवान् ।
शिलां प्रगृह्य महतीं तोलयामास दानवः । आविध्य सहसा मुक्तः शिलां शैलसमप्रभः ।
गृहीत्वा दिव्यपाञ्चजन्यमस्त्रमस्त्रविदाम्बरः । दिव्यास्त्रेण शिलां विष्णुः सप्तधा कृतवांस्तदा । ६८६०
तद्विदार्य्य महच्चास्त्रं पातयामास भूतले । ततस्तैः शार्ङ्गनिर्म्मुक्तैर्नानावर्णैर्महाशरैः ।
यथा देवासुरं युद्धमभवद्भरतर्षभ । नानाप्रहरणाकीर्णं तथा घोरमवर्त्तत ।
गरुडस्थो महाबाहुर्निजघान महासुरान् । महालाङ्गलनिर्भिन्नाः शरखड्गनिपातिताः ।
विनेशुर्द्दानवाः सर्व्वे समासाद्य जनार्द्दनं । केचिच्चक्राग्निना दग्धा दानवाः पेतुरम्बरात् ।
सन्निकर्षगताः केचिद्गतासुविकृताननाः । असृजन् शरवर्षाणि वृष्टिमन्त इवाम्बुदाः । ६८६५
विक्षताङ्गाऽसुराः सर्व्वे कृष्णबाणप्रपीडिताः । शोणिताक्ताश्च दृश्यन्ते पुष्पिता इव किंशुकाः ।
व्यद्रवन्त सुवित्रस्ता भग्नास्ताश्चित्रयोधिनः । पुनस्तु क्रोधरक्ताक्षो वायुवेगेन दानवः ।
दशव्यामोच्छ्रितं वृक्षं समासाद्य वनस्पतिं । वृक्षमुत्पाट्य वेगेन प्रगृह्य तमधावत ।
चिक्षेप सुमहावृक्षं शिखया तु घनाकृतिः । हुतवेगानिलोद्धूतः शुश्रुवे सुमहास्वनः ।
ततः शरसहस्रेण त्वरमाणो जनार्द्दनः । नैकधा तञ्च चिच्छेद चित्रभक्तिनिभाकृतिं । ६८७०
पुनश्चैकेन बाणेन हयग्रीवस्य चोरसि । विव्याध स्तनयोर्म्मध्ये सायको ज्वलनप्रभः ।
विवेश सोऽतिवेगेन हृदि भित्त्वा विनिर्गतः । यः सहस्रं समासाद्य सर्व्वान्देवानयोधयत् ।
तं जघान महाघोरं हयग्रीवं महाबलं । अपारतेजा दुर्द्धर्षः सर्व्वयादवनन्दनः ।
मध्ये लोहितगङ्गस्य भगवान्देवकीसुतः । औदकायां विरूपाक्षं पाप्मानं पुरुषोत्तमः ।
अष्टौ शतसहस्राणि दानवानां परन्तपः । निहत्य पुरुषव्याघ्रः प्राग्ज्योतिषमुपाद्रवत् । ६८७५
हत्वा पञ्चनदं नाम नरकस्य महासुरं । ततः प्राग्ज्योतिषं नाम दीप्यमानमिव श्रिया ।
पुरमासादयामास तत्र युद्धमभूत्तदा । ततः प्राध्मापयच्छङ्खं पाञ्चजन्यं महाबलः ।
शुश्रुवे स महाशब्दः संवर्त्तनिनदो यथा । श्रूयते त्रिषु लोकेषु भीमगम्भीरनिस्वनः ।
तं श्रुत्वा नरकस्यापि क्रोधसंरक्तलोचनः । सोऽश्वचक्राष्टसंयुक्तं विमानप्रतिमं रथं ।

रत्नकाञ्चनचित्राढ्यं वेदिकाभोगविस्तरं। ध्वजेन महता काञ्चनेन विराजितं। ६८८
हेमदण्डपताकाढ्यं वैदूर्य्यमणिकूवरं। शुक्रमध्यवरूथेन रथं परमदारुणं।
लोहजालैश्च सञ्छन्नं चित्रभक्तिविराजितं। रथमध्यगतो वीरः ससन्ध्य इव भास्करः
नानाप्रहरणाकीर्णं रथं हेमपरिष्कृतं।
वक्त्रं तयोरस्फुरदग्निवर्णव्यादत्तसृक्कान्नतुल्यतेजाः। किरीटमूर्द्धाऽर्कसमानभाः कर्णौ तथा कुण्डलयोर्ज्वलन्तौ।
धूम्रवर्णा महाकाया रक्ताक्षा विकृताननाः। नानाकवचिनः सर्व्वे दैत्यदानवराक्षसाः। ६८८५
खड्गचर्म्मधराः केचित् केचित्तूणीरसंवृताः। शक्तिहस्तास्तथा केचिच्छूलहस्तास्तथाऽपरे।
गजवाजिरथौघैश्च चालयन्तश्च मेदिनीं। निर्ययुर्नगराच्छूराः सुसन्नद्धाः प्रहारिणः।
वृतो दैत्यगणैः सार्द्धं नरकः कालसन्निभः। भेरीशङ्खमृदङ्गानां पणवानां सहस्रशः।
वाद्यमानं स शुश्राव जीमूतनिनदोपमं। यतः कृष्णस्ततो गत्वा सर्व्वे ते विकृताननाः।
परिवार्य्य गरुत्मन्तं सर्व्वेऽयुध्यन्त सङ्गताः। महता च्छादयामासुः शरवर्षेण सैनिकाः। ६८९०
शक्तिशूलगदाप्रासांस्तोमरान् सायकान् बहून्। आकाशं छादयामासुर्विमुञ्चन्तः सहस्रशः।
कृष्णः कृष्णाम्बुदाकारः शार्ङ्गं गृह्य धनुस्ततः। विस्फार्य्य सुमहच्चापं धनुर्ज्जलदनिस्वनं।
व्यसृजच्छरवर्षाणि दानवानां जनार्द्दनः। शरवर्षेण तत् सैन्यं व्यद्रवत्तु महाहवात्।
तद्युद्धमभवद्घोरं घोररूपेण रंहसा। भग्नव्यूहाश्च ते सर्व्वे कृष्णबाणप्रपीडिताः।
केचिच्छिन्नभुजाश्चैव छिन्नग्रीवाशिराननाः। केचिच्चक्रैर्द्विधाभिन्नाः केचिद्बाणार्द्दितोरसः। ६८९५
केचिद्द्विधाकृताः शक्त्या गजाश्वरथवाहनाः। केचित् कौमोदकीभिन्नाः शङ्खशक्तिविदारिताः।
एवं विपोथिता सर्व्वा गजाश्वरथवाहिनी। तत्रासीन्नरकेणास्य युद्धं परमदारुणं।
यत् समासेन वक्ष्यामि तन्मे निगदतः शृणु। नायकः सुरसंघानां नरकः पुरुषोत्तमं।
योधयामास तेजस्वी मधुवन्मधुसूदनं। क्रोधरक्तान्तनयनो नरकः कालसन्निभः।
जग्राह कार्म्मुकं वीरः शक्रचापमिवोच्छ्रितं। ततोऽर्ककिरणप्रख्यं बाणं जग्राह केशवः। ६९००
दिव्येनास्त्रेण समरे पूरयामास तं रथं। उत्तमास्त्रं महापातं मुमोच नरको बली।
वज्रविस्फूर्जिताकारमायान्तं वीक्ष्य केशवः। चिच्छेदास्त्रं महाभाग शक्रेण पुरुषोत्तमः।
व्यहनत् सारथिञ्चास्य शरेकेण जनार्द्दनः। सरथं सध्वजं साश्वं जघान दशभिः शरैः।
तनुत्रञ्चैव चिच्छेद शरेण मधुसूदनः। ततो विमुक्तकवचः सर्पस्येव तनुर्यथा।
हताश्वो विरथो वीरो वितनुत्रश्च दानवः। जग्राह त्रिमलज्वालं लोहभारार्पितं दृढं। ६९०५
आविध्य सहसा मुक्तं शूलमिन्द्राशनिप्रभं। तदापतत्तु संप्रेक्ष्य शूलं हेमपरिष्कृतं।
द्विधा छिन्नं क्षुरप्रेण कृष्णेनाद्भुतकर्म्मणा। तद्युद्धमभवद्घोरं घोररूपेण रंहसा।
उत्तमास्त्रं महापातं नरकेण महात्मनः। मुहूर्त्तं योधयामास नरकं मधुसूदनः।
अथ शतचक्रस्यैकेन प्रदीप्तेनाकरोद्द्विधा। चक्रद्विधाकृतं तस्य शरीरमपतद्भुवि।

विभक्तं क्रकचेनेव गिरेः शृङ्गं द्विधाकृतं । कृष्णमासाद्य देवेशं जगामास्तमिवांशुमान् । ६९१०
चक्रोत्क्षिप्तनिकृत्ताङ्गमुत्तमं पतितं रणे । वज्रेणेव विनिर्भिन्नं यथा गैरिकपर्व्वतं ।
भूमिस्तु पतितं पुत्रं गिरीत्यादाय कुण्डले । उपातिष्ठत गोविन्दं वचनञ्चेदमब्रवीत् ।
दत्तस्त्वयैव गोविन्द त्वयैव विनिपातितः । यथेच्छसि तथा क्रीड बालक्रीडनकैरिव ।
इमे ते कुण्डले देव प्रजास्तस्यानुपालय ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि नरकवधे द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥
॥ वैशम्पायन उवाच ॥ निहत्य नरकं भौमं वासवोपमविक्रमः । वासवावरजो विष्णुर्ददर्श नरकालयं । ६९१५
अथार्थगृहमासाद्य नरकस्य जनार्द्दनः । ददर्श धनमक्षय्यं रत्नानि विविधानि च ।
मणिमुक्ताप्रवालस्य वैदूर्य्यस्य च सञ्चयं । मसारगल्वार्ककूटानां तथा वज्रस्य सञ्चयान् ।
जाम्बूनदमयान्यस्य शातकुम्भमयानि च । प्रदीप्तज्वलनाभानि शीतरश्मिनिभानि च ।
शयनानि महार्हाणि तथा सिंहासनानि च । हिरण्यदण्डं रुचिरं शीतरश्मिसमप्रभं ।
ददर्श सुमहच्छत्रं वर्षमाणमिवाम्बुदं । जातरूपस्य शुभ्रस्य धाराः शतसहस्रशः । ६९२०
वरुणादाहृतं पूर्व्वं नरकेणेति नः श्रुतं । यावदर्थं गृहे दृष्टं नरकस्य धनं बहु ।
न वै राज्ञा कुवेरेण न शक्रेण यमेन वा । रत्नसन्निचयस्तादृक् दृष्टपूर्व्वो न च श्रुतः ।
हते भौमे निसुन्दे च हयग्रीवे च दानवे । उपानिन्युस्ततस्तानि रत्नान्यन्तःपुराणि च ।
दानवा हतशिष्टा ये कोषसञ्चयरक्षिणः । केशवाय महार्हाणि यान्यर्हति जनार्द्दनः ।
॥ दैत्या ऊचुः ॥ इमानि मणिरत्नानि विविधानि वसूनि च । भीमरूपाश्च मातङ्गाः प्रवालविकृताङ्कुशाः । ६९२५
हेमसूत्रमहाकक्ष्यास्तापतोमरशालिनः । रुचिराभिः पताकाभिर्वसाना विविधाः कुथाः ।
ते च विंशतिसाहस्रा द्विस्तावच्च करेणवः । अष्टौ शतसहस्राणि देशजास्तूत्तमा हयाः ।
गोषु चापि कृतो यावान् कामस्तव जनार्द्दन । तावतीः प्रापयिष्यामो वृष्ण्यन्धकनिवेशनं ।
आविकानि च सूक्ष्माणि शयनान्यासनानि च । कामव्याहारिणश्चैव पक्षिणः प्रियदर्शनाः ।
चन्दनागुरुकाष्ठानि तथा कालीयकान्यपि । वसु यच्चैव लोकेषु धर्म्मेणाधिगतन्तव । ६९३०
तत् सर्व्वं प्रापयिष्यामो वृष्ण्यन्धकनिवेशनं । देवगन्धर्व्वरत्नानि पन्नगानाञ्च यद्वसु ।
तानि सर्व्वाणि सन्तीह नरकस्य निवेशने ।
॥ वैशम्पायन उवाच ॥ एतत् सर्व्वं हृषीकेशः परिगृह्य परीक्ष्य च । शीघ्रमारोहयामास दानवैर्द्वारकां पुरीं ।
ततस्तद्वारुणं छत्रं स्वयमुत्क्षिप्य माधवः । हिरण्यवर्षं वर्षन्तमारुरोह विहङ्गमं ।
गरुडं पतगश्रेष्ठं मूर्त्तिमन्तमिवाम्बुदं । ततोऽभ्ययाद्गिरिश्रेष्ठमभितो मणिपर्व्वतं । ६९३५
तत्र पुण्या ववुर्वाता शुभवंस्तामसाः प्रभाः । मणीनां हेमवर्णानामभिभूय दिवाकरं ।
तत्र वैदूर्य्यवर्णानि ददर्श मधुसूदनः । सतोरणपताकानि द्वाराणि शिखराणि च ।
विद्युद्भ्रयितमेघाभः प्रबभौ मणिपर्व्वतः । हेमचित्रवितानैश्च प्रासादैरुपशोभितः ।

तत्र ता हेमवर्णाभा ददर्श मधुसूदनः । गन्धर्व्वासुरमुख्यानां प्रिया दुहितरस्तथा ।
ददर्श विपुलश्रोणीः संरुद्धा गिरिकन्दरे । नरकेण समानीता रक्ष्यमाणाः समन्ततः ।
त्रिपिष्टपसमे देशे तिष्ठन्तीरपराजिताः । निवसन्त्या यथा देव्यः सुखिन्यः कामवर्ज्जिताः ।
परिवव्रुर्महाबाहुमेकवेणीधराः स्त्रियः । सर्व्वाः काषायवासिन्यः सर्व्वाश्च नियतेन्द्रियाः ।
व्रतोपवासतन्वङ्ग्यः काङ्क्षन्त्यः कृष्णदर्शनं । समेत्य यदुसिंहस्य सर्व्वासकुः स्त्रियोऽञ्जलीन् ।
नरकं निहतं मत्वा मुरञ्चैव महासुरं । हयग्रीवं निसुन्दञ्च ताः कृष्णं पर्य्यवारयन् ।
ये चासां रक्षिणो वृद्धा दानवा यदुनन्दनं । कृताञ्जलिपुटाः सर्व्वे प्रणिपेतुर्व्वयोऽधिकाः ।
तासां परमनारीणामृषभाक्षं निरीक्ष्य तं । सर्व्वासामेव संकल्पः पतित्वेनाभवत्तदा ।
तस्य चन्द्रोपमं वक्त्रं समीक्ष्य मुदितेन्द्रियाः । सम्प्रहृष्टा महाबाहुमिदं वचनमब्रुवन् ।
सत्यञ्च तत्पुरा वायुरिहागत्य वाक्यमब्रवीत् । सर्व्वभूतमतश्चैव देवर्षिरपि नारदः ।
विष्णुर्नारायणो देवः शङ्खचक्रगदासिभृत् । स भौमं नरकं हत्वा भर्त्ता च भविताद्य वः ।
सुप्रियं वत पश्यामश्चिरश्रुतमरिन्दमं । दर्शनेन कृतार्था हि वयमद्य महात्मनः ।
ततस्ताः सान्त्वयामास प्रमदा वसवानुजः । सर्व्वाः कमलपत्राक्षोर्हृष्टाः प्रोवाच माधवः ।
सान्त्वयित्वा यथार्हेण मनाभाष्य च केशवः । यानैः किङ्करसंयुक्तैश्चवाह मधुसूदनः ।
किङ्कराणां सहस्राणि रत्नमं वातरंहसां । शिविकां वहतां तत्र निर्घोषः सुमहानभूत् ।
तस्य पर्व्वतमुख्यस्य शृङ्गं यत् परमार्च्चितं । विमलार्केन्दुसंकाशं मणिकाञ्चनतोरणं ।
सपक्षिगणमातङ्गं सव्यालमृगपादपं । शाखामृगगणाकीर्णं सुप्रस्तारशिलातलं ।
न्यङ्कुभिश्च वराहैश्च रुरुभिश्च निषेवितं । सुप्रपातमहासानुं विचित्रशिखरद्रुमं ।
अत्यद्भुतमचिन्त्यञ्च मृगवृन्दविलोडितं । जीवञ्जीवकसंघैश्च बर्हिभिश्च निनादितं ।
तदप्यतिबलो विष्णुर्द्दोर्भ्यामुत्पाट्य भास्वरं । आरोपयामास तदा गरुडे पक्षिणाम्बरे ।
मणिपर्व्वतशृङ्गञ्च सभार्य्यञ्च जनार्द्दनं । उवाह लीलया पक्षी गरुडः पततांवरः ।
सपक्षबलविक्षेपैर्हिमाद्रिशिखरोपमः । दिक्षु सर्व्वासु संह्रादं जनयामास पक्षिराट् ।
आरुजन् पर्व्वताग्राणि पादपांश्च समाक्षिपन् । संजहार महाभ्राणि विजहार च कानिचित् ।
विषयं समतिक्रम्य देवयोश्चन्द्रसूर्य्ययोः । ययौ वातजवः पक्षी जनार्द्दनवशे स्थितः ।
स मेरुं गिरिमासाद्य देवगन्धर्व्वसेवितं । देवसद्मानि सर्व्वाणि ददर्श मधुसूदनः ।
विश्वेषां मरुताञ्चैव साध्यानाञ्च नराधिप । भ्राजमानान्यतिक्रामदश्विनोश्च परन्तप ।
प्राप्य पुण्यतमान् लोकान् देवलोकमरिन्दमः । शक्रसद्म समासाद्य प्रविवेश जनार्द्दनः ।
अवतीर्य्य स ताक्ष्यान्तु ददर्श त्रिदशाधिपं । प्रीतश्चैवाभ्यनन्दत्तं देवराजः शतक्रतुः ।
प्रदाय कुण्डले दिव्ये ववन्दे तमथाच्युतः । सभार्य्यो विबुधश्रेष्ठ नरश्रेष्ठो जनार्द्दनः ।
सोऽर्च्चितो देवराजेन रत्नैश्च प्रतिपूजितः । सत्यभामा च पौलोम्या यथावदभिनन्दिता ।

वासवो वासुदेवश्च सहितौ जग्मतुस्ततः । अदित्या भवनं दिव्यं देवमातुर्यशस्विमत् ।
ततोऽदितिमुपासन्तीमप्सरोभिः समन्ततः । ददृशाते महात्मानौ महाभागां तपोऽन्विताम् । ६९७०
ततस्ते कुण्डले दिव्ये प्रदायादितिनन्दनः । ववन्दे तां शचीभर्त्ता मातरं स्वां पुरन्दरः ।
जनार्द्दनं पुरस्कृत्य कर्म चैव शशंस तत् । अदितिस्तौ सुतौ प्रीत्या परिष्वज्याभिनन्द्य च ।
आशीर्भिरनुकूलाभिरभ्यनन्दयदच्युता तदा । पौलोमी सत्यभामा च प्रीत्या परमया युते ।
अगृह्णीतां वरार्हाया देव्यास्तु चरणौ शुभौ । सा ते चाभ्यवदत् प्रेम्णा देवमाता यशस्विनी ।
यथावदब्रवीच्चैव जनार्द्दनमिदं वचः । अधृष्यः सर्व्वभूतानामवध्यश्च भविष्यसि । ६९७५
यथैव देवराजोऽयमजितो लोकपूजितः । तव चेयं वरारोहा नित्यञ्च प्रियदर्शना ।
सर्व्वलोकेषु विख्याता दिव्यगन्धमनोरमा । सत्यभामोत्तमा स्त्रीणां सुभगा स्थिरयौवना ।
जरां न यास्यति वधूर्यावत्त्वं कृष्ण मानुषः । एवमभ्यर्च्चितः कृष्णो देवमात्रा महाबलः ।
देवराजाभ्यनुज्ञातो रत्नैश्च प्रतिपूजितः । वैनतेयं समारुह्य सहितः सत्यभामया ।
देवाक्रीडं परिक्रामन् पूज्यमानः सुरर्षिभिः । स ददर्श महाबाहुराक्रीडं वासवस्य च । ६९८०
दिव्यमभ्यर्च्चितं देवैः पारिजातं महाद्रुमं । नित्यपुष्पधरं श्रीमं पुण्यगन्धमनुत्तमं ।
यमासाद्य जनः सर्व्वो जातिं स्मरति पौर्व्विकीं । संरक्ष्यमाणं देवैस्तं प्रसह्यामितविक्रमः ।
उत्पाट्यारोपयामास गरुडे तं महाद्रुमं । सोऽपश्यत् सत्यभामा च दिव्यमप्सरसां गणं ।
पृष्ठतः सत्यभामा च दिव्ययोषाभिवीचिता । प्रायात्ततो द्वारवतीं वायुजुष्टेन वै पथा ।
श्रुत्वा तद्देवराजस्तु कर्म कृष्णस्य वै तदा । अनुमेने महाबाहुः कृतकर्म्मेति चाब्रवीत् । ६९८५
संपूज्यमानस्त्रिदशैर्महर्षिगणसंस्तुतः । प्रतस्थे द्वारकां कृष्णो देवलोकादरिन्दमः ।
सोऽभिपत्य महाबाहुर्दीर्घमध्वानमल्पवत् । पूजितो देवराजेन ददृशे यादवीं पुरीं ।
तथा कर्म्म महत् कृत्वा भगवान् वासवानुजः । उपायाद्द्वारकां कृष्णः श्रीमान् गरुडवाहनः ।
इति श्रीमहामहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि नरकवधे त्रयोविंशत्यधिकशततमोऽध्यायः ॥ ॥ १२३ ॥
॥ जनमेजय उवाच ॥ प्रादुर्भावे मुनिश्रेष्ठ माथुरे चरितं शुभं । शृण्वन् वै नाधिगच्छामि तृप्तिं कृष्णस्य धीमतः ।
द्वारकायां निवसतः कृतदारस्य वक्तुं। चरितं ब्रूहि कृष्णस्य सर्व्वं हि विदितं तव । ६९९०
॥ वैशम्पायन उवाच ॥ जनमेजय कृष्णस्य कृतदारस्य भारत । निबोध चरितं चित्रं तस्यैव सदृशं प्रभोः ।
प्राप्तदारो महातेजा वासुदेवः प्रतापवान् । रुक्मिण्या सहितो देव्या ययौ रैवतकं नृपः ।
उपवासावसानं हि रुक्मिण्याः प्रतिपूजयन् । तर्पयिष्यन् स्वयं विप्रान् जगाम मधुसूदनः ।
कुमाराः प्रद्युम्नप्रमुखा भ्रातर एव च । प्रेषिता वासुदेवेन नारदस्याभ्यनुज्ञया ।
षोडशस्त्रीसहस्राणि जग्मुरेव च धीमतः । श्रद्धया परमया राजन् विष्णोरेवानुरूपया । ६९९५
ततस्तत्र द्विजातीनां कामान् प्रादादधोक्षजः । अर्थिनां धर्म्मनित्यानां वन्दिनामिष्टवादिनां ।
कल्याणनामगोत्राणां महतां पुण्यकर्म्मणां । यैर्भिः श्रौतैश्च मौखैश्च शुद्धानां कुरुनन्दन ।

तर्पयित्वा द्विजान् कामैरिष्टैरिष्टः सतां हरिः । ज्ञातीन् सन्तर्पयामास यथार्हं धर्म्मवत्सलः ।
उपवासावसानेऽथ भगवान् सविशेषतः । बहुमेने प्रियां भार्य्यां रुक्मिणीं भीष्मकात्मजाम् ।
वसतस्तस्य कृष्णस्य सदारस्यामितौजसः । सुखासीनस्य रुक्मिण्या नारदोऽभ्यागमत्ततः । ७०००
आगतस्याप्रमेयात्मा मुनिमिन्द्रानुजस्तदा । शास्त्रदृष्टेन विधिना अर्च्चयामास केशवः ।
सोऽर्च्चितो वासुदेवेन मुनिरर्च्यतमः सतां । पारिजाततरोः पुष्पं ददौ कृष्णाय भारत ।
तद्वृक्षराजकुसुमं रुक्मिण्याः प्रददौ हरिः । पार्श्वस्था सा हि कृष्णस्य भैष्मी वरवराऽभवत् ।
प्रतिगृह्य ततः पुष्पं कामारणिरनिन्दिता । शिरस्यमलपत्राक्षी ददौ कृष्णेङ्गितानुगा ।
त्रैलोक्यरूपसर्व्वस्वं नारायणमनोहरा । शुशुभे तेन पुष्पेण द्विगुणं भैष्मकी तदा । ७००५
नारदस्तामुवाचाथ मुनिरीषत्स्मितस्तदा । तवैवौपयिकं पुष्पमिदं देवि पतिव्रते ।
अलङ्कृतं पुष्पमेतत् संसर्गात्तव सर्व्वथा । अर्च्चिता च सता तेन त्वमेतत् पुष्प इष्यते ।
कल्याणगुणसम्पन्ने सततं भर्तृवत्सले । अम्लानमेतत् सततं पुष्पं भवति कामिनि ।
संवत्सरपरं कालं कालज्ञे गुणसम्मते । ईप्सितानपि गन्धांश्च ददाति वदताम्वरे ।
शीतोष्णे चेप्सिते देवि पुष्पमेतत् प्रयच्छति । सृजत्यपि रसान्देवि मनसा काङ्क्षितान् वरान् । ७०१०
सेव्यमानश्च सौभाग्यं ददाति वरवर्णिनि । सृजत्यपि तथा गन्धानीप्सितान् प्रीतिवर्द्धनान् ।
यानि चान्यानि पुष्पाणि त्वं देव्यभिलषिष्यसि । कुसुमं वृक्षराजस्य तानि तानि प्रदास्यति ।
एतदेव भगाधानं धर्म्मिष्ठे धर्म्मदं तथा । मतिं न चाशुभे धत्ते धार्य्यमाणं तथा शुभे ।
यद्यदिच्छसि वर्णञ्च तत् सर्व्वं धारयिष्यति । स्वल्पं वाऽप्यथ वा स्थूलं छन्दतस्ते भविष्यति ।
अनिष्टगन्धहरणमेतत् सद्गन्धवर्द्धनं । प्रदीपकर्म्म रात्रौ च करोति कमलेक्षणे । ७०१५
सन्तानकस्रजो मालां पुष्पवस्त्रादि चाच्युते । पुष्पमण्डपमुख्यानि चिन्तिते ते प्रदास्यति ।
बुभुक्षा वा पिपासा वा ग्लानिर्व्वाऽप्यथ वा जरा । देवत्वं धारयन्त्यास्ते स्वच्छन्देन भविष्यति ।
अनुगीतानि गीतानि गास्यत्यपि च चिन्तिते । सुवादित्रान् सुमधुरांस्तथैव स्तवसम्मितान् ।
पूर्णे संवत्सरे देवि पुष्पमेतत्तवान्तिकात् । निवर्त्स्यति तरुवरं समयेन प्रयास्यति ।
शक्तिरेषा हि भद्रन्ते पारिजातस्य सुव्रते । निसर्गतः सर्गकृता सत्कारार्थेऽसुरद्विषां । ७०२०
उमा देववरस्येष्टा हिमाचलसुता सती । धारयेदीश्वरी नित्यं पुष्पाण्येतानि सुप्रभे ।
अदितिश्च सपौलोमी महेन्द्रसुरतारणी । सावित्री वेदमाता च श्रीश्च सर्व्वगुणोदिते ।
देवपत्न्यस्तथैवान्या देवाश्च वसुदेवताः । संवत्सरपरः कालः सर्व्वेषान्तु न संशयः ।
षोडशस्त्रीसहस्राणां मध्ये स्वल्वद्य वर्त्तसे । अद्येष्टां वासुदेवस्य वेद्मि त्वां भीष्मनन्दिनि ।
सपत्न्यस्ते गुणोपेते सर्व्वाः सर्व्वेश्वरप्रिये । अवमानावसेकेन त्वया सिक्ताऽद्य भाविनि । ७०२५
प्रकाशमद्य सौभाग्यमनिवार्य्यं यशश्च ते । मन्दारकुसुमं दत्तं यस्मै मधुनिघातिना ।
अद्य सात्राजिती देवी ज्ञास्यत्यवरवर्णिनी । सौभाग्याढ्यं सदा वेत्ति यात्मानं सुभगा सती ।

साम्बमाताऽथ गान्धारी भार्य्याश्चान्या महात्मनः । सौभाग्यार्थीयसाकाङ्क्षामद्य मोक्ष्यन्ति निस्पृहाः ।
सौभाग्यैककरथी जैत्रस्तव देव्यद्य निःसृतः । मनोरथरथानां यः सहस्रैरपि दुर्ज्जयः ।
अद्याहमवगच्छामि सर्व्वथा सर्व्वशोभने । आत्मा द्वितीयः कृष्णस्य भार्ज्ज त्वमिति भाविनि । ७०१०
त्रैलोक्यरत्नसर्व्वस्वमदद्यत्तवाच्युतः । जीवितातिशयस्तेन त्वया प्राप्तो हरिप्रिये ।
नारदेनैवमुक्तन्तु तथ्यं वाक्यं नराधिप । तत्रस्थाः शुश्रुवुः स्त्रियाः प्रेषिताः सत्यभामया ।
देवीनाञ्च तयाऽन्यासां सपत्नीनां विशाम्पते । दृष्ट्वा ताः सविशेषञ्च नारदेनाप्युदाहृतं ।
तच्च श्रुत्वा मुनिखिलं प्रेष्याभिः स्त्रीस्वभावतः । प्रकाशीकृतमेतासीद्विष्णोरन्तःपुरे तदा ।
कर्णाकर्णि ततो देव्यः कौलीनमिव संवशः । मन्त्रशास्त्रं किरे दृष्ट्वा रुक्मिण्याऽतिगुणोदयं । ७०१५
अर्हेति पुत्त्रमातेति ज्येष्ठेति च समागताः । प्रायेण प्रवदन्ति स्म दृष्ट्वा दामोदरस्त्रियः ।
सम्हृपे न सपत्न्यास्तु तत् सौभाग्यगुणोदयं । सत्यभामा प्रिया नित्यं विष्णोरतुलतेजसः ।
रूपयौवनसम्पन्ना सौभाग्येन च गर्व्विता । अभिमानवती देवी श्रुत्वेर्ष्यावशमागता ।
समुत्सृजन्ती वसनं सकुङ्कुमं शुचिस्मिता शुक्लतमेकमंशुकं । जग्राह रोषाकुलितेन चेतसा वक्त्रैः शिखा श्रीरिव वर्द्धितानना ।
दन्दह्यमाना ज्वलनेन वर्द्धता सेर्ष्यामसूत्येन गतप्रभेव । क्रोधान्विता क्रोधगृहं विविक्तं विवेश तारेव घनं सतोयं । ७०२०
बद्ध्वा ललाटे हिमचन्द्रशुभ्रं दुकूलपट्टं प्रियरोपचिह्नं । पर्य्यन्तदेशं सरसेन देवी लिलेप सा लोहितचन्दनेन ।
संसृत्य संसृत्य शिरः सरोषं प्रकम्पमाना समुपोपविष्टा । दीर्घ पधाने शयने ऽरनीय विभूषणान्येकनिबद्धवेणी ।
अकारणार्थेन विदह्यमाणा प्रेष्याजनस्याभिजनान्विताऽपि । विचूर्णयामास कृशेशयं सा निःश्वस्य निःश्वस्य नतैकनतभ्रूः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि पारिजातहरणे चतुर्विंशत्यधिकशततोऽध्यायः ॥ १२४ ॥
॥ वैशम्पायन उवाच ॥ उपविष्टं मुनिं ज्ञात्वा रुक्मिण्या सह केशवः । निश्चकामाप्रमेयात्मा व्यपदेशेन सर्व्ववित् ।
जगाम त्वरितश्चैव सत्यभामागृहं महत् । रम्ये रैवतकोद्देशे निर्म्मितं विश्वकर्म्मणा । ७०२५
अभिमानवतीं देवीं प्राणेभ्योऽपि गरीयसीं । जानन् सात्राजितीं विष्णुर्विवेश शनकैरिव ।
रुषितामिव तां देवीं स्नेहात् संकल्पयन्निव । भीतभीतः स शनकैर्विवेश यदुनन्दनः ।
दारुकं द्वारदेशे तु निधेत्युक्त्वा विवेश ह । नारदस्योपचारार्थं प्रद्युम्नं विनियुज्य च ।
स ददर्श प्रियां दूरात् क्रोधागारगतां तदा । प्रेष्यामध्यगतां क्रोधान्निःश्वसन्तीं मुहुर्म्मुहुः ।
करजाग्रावलीढन्तु पङ्कजं मुखपङ्कजे । संश्लेषयित्वा निश्वस्य विहरन्तीं पुनः पुनः । ७०३०
किञ्चिदाकुञ्चिताग्रेण चरणेन वसुन्धरां । कृत्वा पृष्ठेऽथ वदनं विलिखन्तीं पुनः पुनः ।
करपद्मे पुनः सव्ये मुखपद्मं निवेश्य च । विविक्ते चारुसर्व्वाङ्गीं ध्यायन्तीं कमलेक्षणां ।
सरसं चन्दनं गृह्य प्रेष्याहस्तादनिन्दितां । प्रह्लादयित्वा हृदयं क्षिपन्तीं निर्द्दयं पुनः ।
पुनरुत्थाय शयनात् पतन्तीञ्च पुनः पुनः । तासां ज्येष्ठास्तथाऽन्यासु प्रियाया ददृशे हरिः ।
अवगुण्ठ्य यदा वक्त्रमुपधाने न्यवेशयत् । इदमन्तरमित्येवं ततो मत्वा जनार्द्दनः । ७०३५
प्रेष्याजनं संज्ञयाऽथ मास्थेयोऽस्मीति संज्ञपन् । स शङ्कितप्रचारस्तु त्वरितोऽन्तिकमभ्ययात् ।

प्रहाय व्यजनं चैव स्थिता स परिपार्श्वतः। शनैरवासृजद्वातं जहास शनकैरिव।
स पारिजातपुष्पस्य संस्पर्शेनानुवासितः। बभार भगवान् गन्धं दिव्यं मानुषदुर्ल्लभं।
अत्यद्भुततमं गन्धं जिघ्रित्वा विस्मयान्विता। अपावृणोन्मुखं सत्या किमेतदिति चाब्रवीत्।
सोत्थिता पृष्ठतो देवमपश्यन्ती शुचिस्मिता। पर्य्यपृच्छद्वधो प्रेष्या गन्धस्य प्रभवन्तदा।
ताः दृष्ट्वास्वप्रभाषन्त्यो जानुभिर्द्धरणीङ्गताः। अधोमुख्यस्ततस्तस्थुः कृताञ्जलिपुटास्तदा।
तदपूर्व्वमदृष्टेव गन्धं मुञ्चति मेदिनी। कथमेकतरस्तस्या गन्धोऽयमिति तत् खलु।
किं स्विदं स्यादिति च सा व्यवेक्षन्ती समन्ततः। ददृशे केशवं देवी सहसा लोकभावनं।
पुष्यतीति ततो वाचमुक्त्वा सात्त्वाविलेक्षणा। अवसिक्तेव रोषेण बभूव प्रणयान्विता।
सा प्रस्फुरितचार्व्वोष्ठी निःश्वस्याधोमुखी तदा। मुहूर्त्तमसितापाङ्गी तस्थावन्यमुखी शुभा।
निबध्य भ्रुकुटीं वामा सम्यगुत्क्षिप्य लोचने। निवेश्य वदनं हस्ते शोभसोत्यब्रवीद्धरिं।
तस्याः सुस्राव नेत्राभ्यां वारि प्रणयकोपजं। कुशेशयपलाशाभ्यामवश्यायजलं यथा।
समुत्पत्य जलं तत्र पतितं वदनाम्बुजात्। प्रतिजग्राह पद्माक्षः कराभ्यामपि सत्वरः।
अधोरसि पतत्तोयं श्रीवत्साङ्कोऽम्बुजेक्षणः। प्रियाननभवं देवः परिगृह्येदमब्रवीत्।
स्रवत्यसितपद्माक्षि किमिदं तव भाविनि। तोयं सुन्दरि नेत्राभ्यां पुष्कराभ्यामिवोदकं।
प्रभाते पूर्णचन्द्रस्य मध्याह्ने पङ्कजस्य च। बिभर्त्ति तव किं वक्त्रं वपुर्म्मम मनोहरं।
किमर्थं कौङ्कुमं वासो महारजनमेव च। नानुगृह्णासि सुश्रोणि शुक्लं वासोऽनुगृह्यते।
वाससी ते तवाभीष्टे महारजनकौङ्कुमे। देवाभिगमनादूर्द्ध्वं शुक्लं नेष्टं हि ते प्रिये।
किन्त्वनाभरणं गात्रं सुगात्रि तव कथ्यतां। चित्रकल्याणमाक्रान्तं कस्माच्च वरवर्णिनि।
श्वेतेन तव पट्टेन वाससा प्रियदर्शने। ललाटं सेव्यते कस्माच्चन्दनेन सुगन्धिना।
सरसेनायतापाङ्गि कान्तेन हृदयप्रिये। प्रभोपमर्द्दकेनाथ कारणेनाननस्य च।
करोषि मम चात्यर्थं मनो म्लापयसि प्रिये। प्रसृतश्चन्दनरसः कपोलप्रणयी तव।
पत्रलेखासपत्नत्वं प्राप्तो नातिविराजते। रत्नश्याभरणैर्मुक्ता श्रोणिस्ते नातिशोभिता।
ग्रहनक्षत्ररहिता द्यौरिवाव्यक्तशारदी। पूर्णचन्द्रसपत्नेन स्मेरेणाबद्धभाषिणा।
किमु नाभाषसे माऽद्य मुखेनोत्पलगन्धिना। अर्द्धोत्क्षणाऽपि हि तावन्मां किमर्थं न निरीक्षसे।
मुञ्चस्येव सनिश्वासं तोयमञ्जनदूषितं। अलमिन्दीवरश्यामे रुदितेन मनस्विनि।
जलमञ्जनकल्माषं मा मोचीराननद्विषं। त्वदीयोऽहं यथा देवि ख्यातो जगति किङ्करः।
नाज्ञापयसि मां किं त्वं पुरेव वरवर्णिनि। किमकार्षमहं देवि विप्रियं तव भाविनि।
येनातिमात्रमात्मानमायासयसि सुन्दरि। मनसा कर्म्मणा वाचा न त्वामतिचराम्यहं।
सर्व्वथा सर्व्वदा सर्व्वं सत्यमेतद्ब्रवीमि ते। बहुमानो ममान्यासु स्त्रीषु सर्व्वाङ्गशोभने।
स्नेहस्य बहुमानस्य त्वामृते ऽन्यासु नास्ति मे। नैव त्वां मदनो जह्यान्मृतेऽपि मयि मामकः।

इति मे निश्चितं विद्धि चैतः सुरसुतोपमे। क्षमा गन्धश्च मेदिन्यां शब्दश्चाम्बरे गुणाः।
ध्रुवं पङ्कजगर्भाभे त्वयि स्नेहस्तथा मम। रुचिरश्च यथा दिव्या प्रभा चैव दिवाकरे।
कान्तिश्च शाश्वती चन्द्रे स्नेहस्त्वयि तथा मम। एवंवादिनमात्मेशं सत्यभामा जनार्द्दनं।
प्रत्युवाच वेत्राभ्यां प्रमृज्य सुभगा जलं। मदीयस्त्वमिति श्यामोन्मम नित्यं मनः प्रभो। ७०९०
अद्य साधारणस्नेहस्त्वमित्यवगता मया। माश्चासितमहं पूर्व्वमनित्यं कालपर्य्ययं।
अद्य लोकगतिं कृत्स्नामवगच्छामि न भृशं। अस्मृताया द्वितीयेऽयं जन्युर्हि मम सर्व्वथा।
किमत्र बहुनोक्तेन हृदयं वेत्ति तेऽच्युत। वाङ्मात्रमिव पश्यामि माधुर्य्यं संप्रयुज्यते।
मयि स्नेहस्य कृतकस्तवान्यत्र न कृत्रिमः। ऋजुस्वभावां यां भक्तां सर्व्वथा पुरुषोत्तम। ७०९५
अवजानामि जानन्ती कौरवीं वृत्तिमास्थितः। एतावत् खलु पर्य्याप्तं दृष्टं द्रष्टव्यमव्ययं।
श्रुतश्चाप्ययवा श्राव्यं दृष्टः स्नेहफलोदयः। यदि त्वहमनुग्राह्या मामनुज्ञातुमर्हसि।
तपस्येऽहं परं कृत्वा निश्चयं पुरुषोत्तम। भर्त्तुश्छन्देन नारीणां तपो वा व्रतकानि वा।
निष्फलं खलु यद्भर्त्तुरच्छन्देन क्रियेत ह।
इतीदमुक्त्वा पुनरेव शोभना मुमोच तोयं नयनोद्भवं सती। गृहाय पीतं हरिवाससः शुभा पटान्तमाधाय मुखे शुचिस्मिता।
॥ इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि पारिजातहरणे पञ्चविंशत्यधिकशततोऽध्यायः ॥ १२५ ॥
॥ वैशम्पायन उवाच ॥ नारायणः सत्यभामां पुनरेवाथ भारत। प्रोवाच प्रणयात् क्रुद्धामभिमानवतीं सतीं। ७१००
॥ वासुदेव उवाच ॥ दह्यतीव ममाङ्गानि शोकः कमललोचने। किमु तत्कारणं येन त्वमेवमतिविक्लवा।
शापिताऽसि मम प्राणैराचक्ष्वानत्ययो यदि। श्रोतव्यं यदि भक्तेन भर्त्रा सर्व्वाङ्गशोभने।
ततः प्रोवाच भर्त्तारं सत्या सत्यव्रते स्थितं। वाष्पगद्गदया वाचा तथैवाधोमुखी स्थिता।
मयैव ख्यापितं पूर्व्वं सौभाग्यं मम मानद। अगत्यमलपश्चाच तत् ख्यातं केशिनाशन।
गिरो वक्ष्यामि चेष्टत्वात्तवाहं देव गर्व्विता। सर्व्वसीमन्तिनीनाञ्च स्पृहणीयाऽस्मि सर्व्वथा। ७१०५
साऽहमद्यावहास्यामि सपत्नीनां जनस्य च। इति प्रेष्याभिराख्यातं श्रुत्वा तथ्यं ततस्ततः।
यत् पारिजातकुसुमं दत्तवान्नारदस्तव। तत्किलेष्टजने दत्तं त्वयाऽहं परिवञ्चिता।
रत्नातिशयदानेन तस्यामधिकः किल। स्नेहस्य बहुमानस्य प्रकाशं गमितस्त्वया।
तामस्तौषीत् समक्षन्ते प्रियां स किल नारदः। तदश्रौषीश्च हृष्टस्त्वं प्रियायाः संस्तवं किल।
लोतव्या यदि तावत् सा नारदेन तवाग्रतः। दुर्भगेऽयं जनस्तत्र किमर्थमनुशब्दितः। ७११०
प्रणयस्य रसं दत्त्वा पश्चात्तापः प्रभो यदि। अनुज्ञां मे प्रयच्छस्व तपश्चर्त्तुं प्रसीद मे।
स्वप्नेनापि न दृष्टाऽहं अहृष्यां पुष्करेक्षण। यदन्येद्य निर्हृतमशेषं पश्यतस्तव।
कामः काममनु तस्यैतन्मुनेरतुलतेजसः। अत्र मन्युस्तु मे देव सान्निध्यं तत्र तच्च यत्।
मानार्थं जीव्यते लोके सद्भिरित्युक्तवानसि। तदेवं सति नेच्छामि जीवितुं मानवर्जिता।
ममाभवद्यतो रत्ना भयमद्य ततो मम। सर्व्वतो रक्षते यो मां स मां नाद्याभिरक्षति। ७११५

हा गतिं कां गमिष्यामि त्यक्ता देव त्वया विभो । कुमुद्वतीगतां नूनं गतिं यास्यामि वल्लभा ।
किम्कार्यमहं मोहाद्दीश्वराणां प्रियाप्रियं । प्रिया भूत्वाऽप्रिया भूता यदहं तव मानद ।
वसन्तकुसुमैश्चित्रं सदा रैवतकं गिरिं । प्रिया भूत्वाऽप्रियाभूता कथं द्रक्ष्याम्यहं पुनः ।
परपुष्टस्वनोन्मिश्रं पुष्पगन्धवहं शुचिं । कथं नामानिलं द्वेष्या सेवेयं दुर्भगा सती ।
जलक्रीडां गताङ्कस्था देव त्वत्वा महोदधौ । कथं दौर्भाग्यमापन्ना पश्येयमपि सागरं । ७१२०
सात्राजिति प्रिया नान्या त्वत्तो मेऽस्तीति यद्धि मां । त्वमवोचः क तद्यातमथ वा कः स्मरिष्यति ।
यदद्राक्षीर्द्धि मां स्वर्भूषणमानिन नन्दिनी । अवज्ञातां त्वयाऽद्राक्षीन्नूनं दौर्भाग्यकर्षितां ।
किन्तु मूढेन ते प्रेम्णा सुस्निग्धेनापि मानद । यत् समानां जनैर्द्देवो मां न पश्यति नित्यदा ।
नाहं त्वां कितवं धूर्त्तमज्ञासिषमरिन्दम । अद्य ज्ञातोऽसि तत्पक्षपक्षो जनवञ्चकः ।
स्वरवर्णेङ्गिताकारान्निगूढादेव यत्नतः । चौर ज्ञातोऽसि तत्पक्ष वाङ्मात्रानधुरः शठः । ७१२५
एवमीर्ष्यावशं प्राप्तां देवीं सात्राजितीं हरिः । अभिमानवतीं देवः सान्त्वपूर्व्वमथाब्रवीत् ।
मैवं पद्मपलाशाक्षि मर्म्मेश्वरि वद प्रिये । किमत्र बहुनोक्तेन त्वदीयमवगच्छ मां ।
तत् पारिजातकुसुमं तस्या देवि समागतः । नारदो मत्प्रियं कुर्व्वन् मुनिरक्लिष्टकर्म्मकृत् ।
दाक्षिण्यादनुरोधाच्च दत्तवानात्र संशयः । प्रसीदैकापराधं मे मर्षयस्व शुचिस्मिते ।
पारिजातस्य पुष्पाणि यदीच्छस्यतिकोपने । तदा दाताऽस्मि सुश्रोणि सत्यमेतद्ब्रवीमि ते । ७१३०
स्वर्गादिहानयित्वा च पारिजातं द्रुमेश्वरं । गृहे ते स्थापयिष्यामि यावत्कालं त्वमिच्छसि ।
एवमुक्ता तु हरिणा प्रोवाच हरिवल्लभा । यद्येवं स द्रुमः शक्य इहानयितुमच्युत ।
मन्युरेष प्रनष्टो हि भवेद्बहुगुणं मम । सीमन्तिनीनां सर्व्वासामधिका स्यामधोक्षज ।
तथाऽस्तु प्रथमः कल्प इति तां मधुसूदनः । प्रोवाचाप्रतिमो देवो जगतः प्रभवाव्ययः ।
तथेत्युक्ते तु कृष्णेन तुतोष समितिञ्जय । सत्यभामा सतामिष्टा कंसनाशनवल्लभा । ७१३५
ततः स्नातो जगन्नाथः सर्व्वात्मा सर्व्वभावनः । चकारावश्यकं सर्व्वं सर्व्वकामप्रदः सतां ।
दध्यौ च नारदं देवो ध्यातो देवमुनिर्नृप । अभ्याजगाम स स्नात्वा मुनिश्रेष्ठो महोदधौ ।
तमागतं नरपते सतां गतिरधोक्षजः । सत्यया सह धर्म्मात्मा यथाविधिमपूजयत् ।
पादौ प्रक्षालयाञ्चक्रे मुनेः सात्राजिती स्वयं । जलं देवः स्वयं कृष्णो भृङ्गारेण ददौ तदा ।
अथोपकल्पयामास सुखासीनाय केशवः । परमान्नं स मुनये प्रयतात्मा जगद्गुरुः । ७१४०
त्रैलोक्यकर्त्रा सत्कृत्य दत्तं मुनिरुदारधीः । बुभुजे वदतां श्रेष्ठः श्रद्धया परयाऽन्वितः ।
उपस्पृश्य ततस्तुष्टः प्रददावाशिषः प्रभोः । ताश्च प्रीतेन मनसा प्रतिजग्राह केशवः ।
ततः सात्राजितीं देवीं प्रणतां नारदोऽब्रवीत् । प्रसार्य्य दक्षिणं हस्तं सजलं जलजेक्षणां ।
यथेदानीं तथैव त्वं भव देवि पतिव्रता । सविशेषञ्च सुभगा भव मत्तपसो बलात् ।
इत्युक्ता मुनिमुख्येन सत्यभामा हरिप्रिया । उक्तास्या महता युक्ता हर्षेण तु नराधिप । ७१४५

कृष्णोऽप्यनुज्ञां कौरव्य लब्ध्वा मुनिवरात्तदा । बुभुजे विषयं धीमानप्रमेयपराक्रमः ।
ततस्त्वावश्यकं कृत्वा सत्यभामाऽपि भारत । अनुज्ञया तदा भर्त्तुर्विवेशान्तर्गृहं मुदा ।
ततो विनिर्गता देवी कृष्णस्यैवाभ्यनुज्ञया । स्थिता पार्श्वे च कृष्णस्य नमस्कृत्वा महात्मने ।
ततो मुहूर्त्तमासित्वा नारदः कृष्णमब्रवीत् । आपृच्छे त्वां गमिष्यामि शक्रलोकमधोक्षज ।
तत्राद्य देवमीशानं नमस्कृत्य महेश्वरं । गास्यन्ति देवगन्धर्व्वास्तथैवाप्सरसां गणाः । ७१५०
मासि मास्युचितं ह्येतन्महेन्द्रसदने विभो । पूजार्थं देवदेवस्य गान्धर्व्वं नृत्यमेव च ।
अन्तर्हितो देवदेवः सोमः सप्रवरो विभुः । पश्यत्यमरमुख्येण कृतं भक्त्याऽद्रिघातिना ।
निमन्त्रितोऽहं पूर्व्वेद्युः पुष्पं दातुं महाद्युते । पारिजातस्य भद्रं ते तरुराज्ञो महात्मनः ।
यदेतदाहृतं स्वर्गात्त्वदर्थं भो मया विभो । देवोपभोग्यमेतद्धि तरुराजसमुद्भवं ।
दृष्टः स वृक्षः सततं शच्याः पुष्करलोचन । सौभाग्यमावहत्येव पूज्यमानोऽपि नित्यशः । ७१५५
पुण्यं कर्त्तुं तदा सृष्टः पारिजातो महाद्रुमः । अदित्या धर्म्मनित्येन काश्यपेन महात्मना ।
पुराऽदित्या महातेजास्तोषितः किल काश्यपः । वरेण च्छन्दयामास मारीचस्तपसो निधिः ।
सोवाच सुभगा येन भवेयं मुनिसत्तम । स्वलङ्कृता कामतश्च सर्व्वैरेव विभूषणैः ।
दर्षि‍तं गीतनृत्यञ्च भवेन्मम तपोधन । कुमारी नित्यदा चैव भवेयं तपसां निधे ।
विरजाः शोकरहिता भवेयमपि नित्यदा । पतिभक्तिमती चैव धर्म्मशीला तथैव च । ७१६०
पारिजातं ततोऽस्यास्त्वोददित्याः प्रियकाम्यया । सर्व्वकामप्रदैः पुष्पैरावृतं दिव्यगन्धदैः ।
त्रिशाखं सर्व्वदा दृश्यं सर्व्वभूतमनोहरं । सर्व्वपुष्पाणि दृश्यन्ते तस्मिन्नेव महाद्रुमे ।
ददृशान्यस्य पुष्पाणि बिभर्त्त्येकाऽतिरूपिणी । बहुरूपाणि चाप्यन्या पद्मानि च तथाऽपरा ।
मन्दरादपि वृक्षाच्च सारमुद्धृत्य कश्यपः । तस्मादेव तरुश्रेष्ठः सर्व्वेषां ज्येष्ठतां गतः ।
ततस्तत्र निबध्याथ कश्यपं प्रददौ शुभा । अदितिर्व्वाम पुण्यार्थं सौभाग्यार्थं तथैव च । ७१६५
निष्क्रयेण मया मुक्तः कश्यपस्तु तपोधनः । इन्द्रो दत्तस्तथेन्द्राण्या सौभाग्यार्थं ततो मम ।
सोमस्तथाप्यथ रोहिण्या ऋद्ध्या च धनदस्तथा । एवं सौभाग्यदो वृक्षः पारिजातो न संशयः ।
पारे जातो विष्णुपद्याः पारिजातेति शब्दितः । मन्दारपुष्पैर्यद्युक्तो मन्दारस्तेन कथ्यते ।
कोऽप्ययं दारुरित्याङ्करजानन्तो यतो जनाः । कोविदार इति ख्यातस्ततः स महातरुः ।
मन्दारः कोविदारश्च पारिजातश्च नामभिः । स वृक्षो ज्ञायते दिव्यो यस्यैतत कुसुमोत्तमं । ७१७०
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि पारिजातहरणे षड्विंशत्यधिकशततोऽध्यायः ॥ १२६ ॥
॥ वैशम्पायन उवाच ॥ ततो जिगमिषुन्तत्र नारदं मुनिसत्तमं । प्रोवाच भगवान् विष्णुरप्रमेयपराक्रमः ।
सदर्पं धर्म्मतत्त्वज्ञ स्वर्गं गत्वा त्वयाऽनघ । दृष्ट्वा सदस्यान्देवस्य त्रिपुरघ्नस्य धीमतः ।
अनाज्ञया मद्वचनाद्विज्ञाप्यः पाकशासनः । संवर्णयित्वा भ्रातरं पौराणं वेत्सि यन्मुने ।
यमस्याचीर्मुनिश्रेष्ठो भगवान् काश्यपस्तरुं । पारिजातं पुराऽदित्याः प्रियार्थं धर्म्मवित्तमः ।

स पुण्यमतिसौभाग्यं ददाति तरुसत्तमः । तव दत्तं पुरा दानं व्रतेन तरुसत्तमे । ७१७४
देवीभिर्द्धर्म्मनित्याभिर्द्धर्म्मार्थममरोत्तम । दत्तं सुताऽभिकाङ्क्षन्ति दातुं पत्न्यो मम प्रभो ।
पुण्यार्थं दानधर्म्मार्थं मम प्रीत्यर्थमेव च । आनायय द्वारवतीं पारिजातं महाद्रुमं ।
दत्ते दाने पुनः स्वर्गं तत्र तं नाययिष्यसि । प्रवाच्य एवं भगवान् बलभिद्भगवंस्त्वया ।
तथा तथा प्रयत्नश्च कार्य्यो मुनिवर त्वया । यथा तरुवरं दद्यात् पारिजातं सुरेश्वरः ।
तत्र दूतगुणांस्तावत् पश्यामस्ते तपोधन । सम्भाव्या सर्व्वकृत्यानां सम्पद्धि त्वयि मे मता । ७१८०
एवं नारायणेनोक्तो नारदो भगवानृषिः । प्रहस्योवाच केशिघ्नमिदं वाक्यं तपोधनः ।
वाढमेवं प्रवक्ष्यामि यदुमुख्य सुरेश्वरं । न तु दास्यति देवेन्द्रः पारिजातं कथञ्चन ।
मन्दरं पर्व्वतश्रेष्ठं दानवैस्त्रिदशैस्तथा । निक्षिप्य तोयधौ पूर्व्वं पारिजातः समाहृतः ।
मन्दरं पर्व्वतश्रेष्ठं नयितुं प्रेषितः पुरा । पारिजातं हरेणापि लोककर्त्ता जनार्द्दन ।
स्वयं विज्ञापितो गत्वा ततः शक्रेण शङ्करः । आक्रीडद्रुम उद्याने शच्याः स्यादिति याचितः । ७१८५
तथाऽस्त्विति वरो दत्तो महादेवेन चानघ । न च नीतः पारिजातो मन्दरं चित्रकन्दरं ।
क्रीडावृक्षः स शच्येति व्यपदेशेन मोचितः । महेन्द्रेण महाबाहो पारिजाततरुः पुरा ।
प्रियार्थमुमयाऽस्राचीत् पारिजातवनं हरः । गव्यूतिशतविस्तीर्णं मन्दरस्यैव कन्दरे ।
न तत्र सूर्य्यभाः कृष्ण प्रविशन्ति नगोत्तमे । न चन्द्रस्य प्रभाः शीता नैव कृष्ण सदागतिः ।
शीतोष्णे च्छन्दतस्तत्र शैलपुत्र्या भवन्ति हि । स्वयम्प्रभं वनं तद्धि महादेवस्य तेजसा । ७१९०
वर्ज्जयित्वा महादेवं सगणं यदुवर्द्धन । मास्वान्यस्तद्वनं दिव्यं न प्रयाति कथञ्चन ।
स्रवन्ति तत्र वार्ष्णेय पारिजाताः समन्ततः । सर्व्वरत्नानि मुख्यानि मनसा काङ्क्षितानि वै ।
गणास्तान्युपभुञ्जन्ति प्रवराणां महात्मनां । आज्ञया देवदेवस्य लोकनाथस्य केशव ।
पारिजाताद्दशगुणं फलं तेषां तथा वनं । अभिमानं प्रभाश्चैव गुणा भूरिगुणास्तथा ।
मूर्त्तिमन्तश्च ते वृक्षाः सोमं देवं वृषध्वजं । उपतिष्ठन्ति सततं प्रवरैः सह केशव । ७१९५
रौद्रेण तेजसा जुष्टा दुःखैर्हीनाः सुखान्विताः । तरवो मन्दरे ते हि दयिताः शैलकन्यया ।
प्रविवेशान्धको नाम घोरस्तत्र महाबलः । दैतेयो वरदानेन दर्पितः पापनिश्चयः ।
स हतो देवदेवेन हरेणामित्रघातिना । अवध्यः सर्व्वभूतानां वृत्राद्दशगुणं बली ।
एवं दुःखेन ते देव पारिजातं प्रदास्यति । पुष्कराच्च सहस्राक्षः सत्यमेतद्ब्रवीमि ते ।
सततं भक्षितो देव्याः शच्याः स हि वरद्रुमः । सर्व्वकामप्रदः कृष्ण तथेन्द्रस्यामितौजसः । ७२००
॥ वासुदेव उवाच ॥ मुने तेन कृतं साधु महादेवेन धीमता । यच्छचीकारणं कृत्वा न नीतः स तरुः पुरा ।
स ज्येष्ठः सर्व्वभूतानां लोककृत्प्रभवोऽव्ययः । परावर्य्यस्य सदृशं कृतवानिति मे मतिः ।
अहं यवीयान् देवस्य सर्व्वथा बलघातिनः । लालनीयश्च भगवन् जयन्त इव सत्तम ।
सर्व्वथा भगवांस्तावदुपायैर्बहुविस्तरैः । करोतु यत्नं प्रीत्यर्थं शक्तो ह्यसि तपोधन ।

मया मुने प्रतिज्ञातं पुण्यार्थं सत्यभामया । स्वर्गादिहानयिष्यामि पारिजातमिति प्रभो । ७२०५
मया तदनृतं शक्यं कथं कर्त्तुं तपोधन । नानृतं हि वचो विप्र भोक्तपूर्व्वं मयाऽनघ ।
मयि भग्नप्रतिज्ञे हि लोकानां संशयो भवेत् । यन्मया हि मुनिश्रेष्ठ लोका धर्म्मगुणान्विताः ।
परिधार्य्याः स्थिता सर्व्वे स कथं ह्यनृतं वदेत् ।

न देवगन्धर्व्वगणा न राक्षसा न चासुरा नैव च यक्षपन्नगाः । मम प्रतिज्ञामुपहन्तुमुद्यताः सुखाय जीवन्ति चिरं महामुने ।

स पारिजातं यदि न प्रदास्यति प्रयाच्यमानो भवताऽमरेश्वरः । ततः शचीव्यामृदितानुलेपने गदां विमोक्ष्यामि पुरन्दरोरसि । ७२१०

इति प्रवाच्यो यदि मामपूर्व्वकं प्रयाच्यमानो न तरुं प्रयच्छति । मुनिस्त्वयं मद्गमनाय सर्व्वथा त्वयाऽपि कार्य्यः खलु तत्र निश्चयः ।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि पारिजातहरणे सप्तविंशत्यधिकशततोऽध्यायः ॥ १२७ ॥

॥ वैशम्पायन उवाच ॥ नारदोऽथ मुनिर्गत्वा महेन्द्रसदनं नृप । तां रात्रिमवसत्तत्र ददृशे च महोत्सवं ।
तत्रादित्या महात्मानो वसवश्च सुरोत्तमाः । राजर्षयश्च विद्वांसः स्वर्गताः कर्म्मभिः शुभैः ।
नागा यक्षाश्च सिद्धाश्च चारणाश्च तपोधनाः । ब्रह्मर्षयश्च शतशो देवर्षिमनसस्तथा ।
सुपर्णाश्च महात्मानो मरुतश्च महाबलाः । दिवौकसां निकायाश्च शतशोऽन्ये समागताः । ७२१५
उपर्य्युपरि सर्व्वेषां सोमो देवो महेश्वरः । तस्थावमितविक्रान्तः स्वर्गगैः परिवारितः
देवर्षिभिर्म्मुनिश्रेष्ठैः संवृतः सर्व्वभावनः । कल्पान्तरसहस्रेषु स्रयो येषां न विद्यते ।
यानर्च्चयन्ति सततं देवा देवेश्वरोपमाः । आत्मज्ञाः सत्यसन्धाश्च ये च धर्म्मपथे स्थिताः ।
रुद्राश्च काश्यपा देवमभ्युपासन्त भारत । स्कन्दश्च भगवान् रौद्रिर्गङ्गा च सरितांवरा ।
अर्च्चिष्मांस्तुम्बुरुश्चैव भारिश्च वदताम्वरः । नेतारो देवदेवानामेते हि तपसाऽन्विताः । ७२२०
एताननुविधीयन्ते देवान्देवगणा नृप । धर्म्मनित्यास्तपोनित्याः सन्तः सन्मार्गमाश्रिताः ।
ये त्विमे मानुषा देवानर्च्चयन्ति शुभार्थिनः । तानर्च्चयन्ति ह्यमरास्तथा राजञ्छुभार्थिनः ।
पितृकृत्येषु देवानां संन्यासं येऽप्यनुष्ठिताः । स्वाध्यायवन्तः कौरव्य सततं धर्म्मचारिणः ।
गन्धर्व्वाधिपतिः श्रीमांस्तत्र चित्ररथो नृप । सपुत्रो वादयामास देववाद्यानि हृष्टवत् ।
ऊर्णायुश्चित्रसेनश्च हाहाहूहुश्च भारत । उम्बरस्तुम्बुरुश्चैव जगुरन्ये च पन्नगान् । ७२२५
उर्व्वशी पूर्व्वचित्तिश्च हेमा रम्भा च भारत । हेमदन्ता घृताची च सहजन्या तथैव च ।
जुजोष भगवान्देवस्तदुपस्थानमात्मवान् । वृत्तेन तुष्टः शक्रस्य जगाम जगतो गतिः ।
गते भूतपतौ सर्व्वे नृपा जग्मुर्यथागतं । महेन्द्रेणार्च्चिता देवाः स्वानेव निलयान् गताः ।
ततः सर्व्वेषु यातेषु सुखासीनं पुरन्दरं । सदस्यैः स्वैः सहासीनं नारदोऽभिययौ मुनिः ।
तमिन्द्रः पूजयामास समुत्थाय तपोधनं । दिदेश कुशगर्भञ्च पीठमात्मासनोपमं । ७२३०

नारदोऽथ महातेजा महेन्द्रमिदमब्रवीत् । दूतोऽहममरश्रेष्ठ विष्णोरतुलतेजसः ।
किञ्चित् कार्य्यं पुरस्कृत्य प्रेषितोऽहं महात्मना । आनर्त्तादार्त्तिहरणं तस्यैवानन्यतेजसः ।
प्रीतिवाक्यानि हृद्यानि प्रयुज्य मुनये तदा । ततः प्रहृष्टो भगवानब्रवीत् पाकशासनः ।
किमाह पुरुषश्रेष्ठः शीघ्रमाचक्ष्व मे मुने । चिरस्य खलु कृष्णेन संस्मृतोऽस्मि महात्मना ।
प्रियवाक्यानि हृद्यानि ब्रूहि धर्मभृताम्वर ।
॥ नारद उवाच ॥ महेन्द्रेन्द्रानुजं द्रष्टुं गतोऽहं भ्रातरं तव । द्वारकां पुरुषश्रेष्ठ काश्यपानां यशस्करं ।
तन्तु रैवतकेऽद्राक्षं तदासीनमरिन्दमं । रुक्मिण्या सहितं वीरमुमयेव वृषध्वजं ।
पारिजाततरोः पुष्पं तस्य दत्तं मयाऽनघ । विस्मापनार्थं देवेश पत्नीनाममृततेजसः ।
तद्दृष्ट्वा तस्य पत्न्यस्तु विस्मयं परमं ययुः । बहुकामप्रदं पुष्पं वृक्षराजसमुद्भवं ।
गुणास्तामां मयाख्यातास्तस्य पुष्पस्य मानद । सृष्टिश्च पारिजातस्य कश्यपेनातितेजसा ।
अदित्या कश्यपो दत्तः पुण्यार्थञ्च यथा मम । पुष्पदाम्ना वेष्टयित्वा कण्ठे पुण्यार्थमात्मवान् ।
त्वञ्च दत्तो यथा शच्या देवाश्चान्ये सुरेश्वर । निष्क्रयश्च यथा दत्तः कश्यपाद्यैर्महर्षिभिः ।
तच्छ्रुत्वा तस्य पत्न्येका सत्यभामेति विश्रुता । पुण्यकार्यं मनश्चक्रे दयिता ते यवीयसः ।
तया चाभ्यर्थितो भर्त्ता देव्या देवगणेश्वर । प्रतिजज्ञे स धर्मात्मा यवीयांस्तव मानद ।
ततो मामुक्तवान् वीरो विष्णुर्बलवताम्वरः । यथावत् सुरमुख्येन ब्रूहि नः शृणु भावन ।
लालनीयो यवीयांस्तु प्रणिपत्याच्युतोऽब्रवीत् । आनायय सुरश्रेष्ठ पारिजातं वरद्रुमं ।
मनोरथोऽस्तु सफलो वध्वास्तेऽसुरनाशन । धर्मकृत्यं विशेषेण वध्वास्तेऽमरसत्तम ।
अयं दुर्लभकल्याणो लोको लोकगणेश्वर । पश्यन्त्वमरकल्याणं मत्प्रभावाच्च मानुषाः ।
॥ वैशम्पायन उवाच ॥ वासुदेववचः श्रुत्वा महेन्द्रः कुरुनन्दन । नारदं वदतां श्रेष्ठमिदं वाक्यमथाब्रवीत् ।
भजासनं द्विजश्रेष्ठ श्रुतमुक्तं त्वया द्विज । सन्देशं प्रतिदास्यामि विष्णोरतुलतेजसः ।
आसीने नारदे शक्रो लब्धानुज्ञोऽथ नारदात् । स्वमासनवरं भेजे तथैव सदृशं विभो ।
उपविष्टः सुरपतिरथोवाच तपोधनं । निरीक्ष्य स्ववशं वीर्य्यं पार्षदं वृत्रनाशनः ।
॥ इन्द्र उवाच ॥ महर्षे कुशलं पृष्ट्वा वक्तव्यस्ते जनार्द्दनः । वचनान्मम धर्म्मज्ञ सर्व्वभूतसुखावहः ।
मदनन्तरमीशस्त्वं जगतो नात्र संशयः । त्वदीयः पारिजातश्च रत्नान्यन्यानि चाच्युत ।
त्वन्तु भारावतरणं कर्त्तुं देव महीं गतः । मानुष्यं सर्व्वकृत्यानामास्थितः कार्य्यसिद्धये ।
त्वयि तीर्णप्रतिज्ञे हि पुनः प्राप्ते त्रिपिष्टपं । पूरयिष्यामि वध्वास्ते दृष्टान् कामानधोक्षज ।
न स्वर्गीयाणि रत्नानि नयितव्यानि तेऽच्युत । स्वल्पार्थे मानुषं लोकमिति पूर्व्वकृता स्थितिः ।
उत्क्रम्य हि स्थितिं देव प्रवर्त्तामि महाबल । यद्यहं किं प्रवक्ष्यन्ति प्रजापतिगणाः प्रभो ।
ब्रह्मणा सह पुत्रेण तपोबलेन महात्मना । नियमाः सर्व्वकृत्यानां स्थापिता जगतो ध्रुवाः ।
प्रजापतिकृतं मार्गमपास्य व्रजतो मम । श्रुत्वा प्रजापतिर्द्धीमान् क्रोधमभ्युपैत् प्रभुः ।

अस्माभिर्भिद्यमानन्तु मर्य्यादासेतुबन्धनं । भेत्स्यन्त्यशङ्किता दैत्या दैत्यपक्षास्तथाऽपरे ।
स्त्रीनिमित्तमितो नीते पारिजाते द्रुमेश्वरे । स्वर्गौकसो भविष्यन्ति विमनस्काश्च मानद ।
उपभोगा मानुष्याणां विहिता ये स्वयम्भुवा । तैस्तुष्यतु मम भ्राता मन्यध्वम् कालपर्य्ययं ।
इहापि तावत्त्रिदिवे मम यः स्यात् परिग्रहः । त्रिदिवस्थोऽपि तं कृष्णो नोपभोक्तुमिहार्हति ।
ज्येष्ठज्यायिष्ठभोगानां नाभिज्ञः किं जनार्द्दनः । यतो धर्म्मं समुत्सृज्य पापमेवानुवर्त्तते ।
स्त्रीवश्यता ख्याप्यमाना कृष्णस्य हि महात्मनः । जगत्यपयशो योगं जनयेदिति मे मतिः ।
मानुष्यं मानुषे प्राप्ते यदेतन्मधुसूदनः । कुर्य्यान्निर्ब्बन्धनीयं यद्भ्रात्रा ज्येष्ठेन नारद ।
स्वर्गरत्नविलोपेन धर्षणा स्यात् परा मम । ज्ञातितो धर्षणा चैव विशेषेणैव गर्हिता ।
धर्म्ममर्थञ्च कामञ्च क्रमेण मधुसूदनः । सेवत्वेष सतां धर्म्मान् स्थापितान् पद्मयोनिना ।
महीतलं पारिजातं नाययिष्याम्यहं यदि । पौलोमीमादितः कृत्वा को नु मां बहु मंस्यते ।
पारिजातं महीपृष्ठे दृष्ट्वा स्पृष्ट्वा च मानुषाः । स्वर्गार्थं नोद्यमिष्यन्ति दृष्ट्वा स्वर्गफलं क्षितौ ।
पारिजातगुणान्मर्त्त्या जुषन्ति यदि नारद । देवानां मानुषाणाञ्च न विशेषो भविष्यति ।
तत्र यत् क्रियते कर्म्म इह तल्लभ्यते नरैः । स्वर्गार्थं न यतिष्यन्ति पारिजातगुणान्विताः ।
सर्व्वरत्नवरः स्वर्गे पारिजातस्तपोधनः । भुज्यते यदि मर्त्त्यैः स सर्व्वमेकं जगद्भवेत् ।
यज्ञैर्मर्त्त्या न यक्ष्यन्ति लब्धस्वर्गफला भुवि । न पूर्त्तानि प्रदास्यन्ति तुल्यत्वममरैर्गताः ।
यज्ञैर्जप्याह्निकैश्चैव नित्यमाप्याययन्ति नः । मानुषाः स्वर्गमिच्छन्तः श्रद्दधानास्तपोधन ।
तत् सर्व्वं न करिष्यन्ति पारिजातगुणान्विताः । निस्तेजसो भविष्यामस्ते गतास्तद्विहीनताम् ।
इतः सुवृष्ट्या शस्यैस्ते जीवन्ति पुरुषा भुवि । आप्याययन्तस्तेऽप्यस्मान्दानैर्यज्ञैस्तथैव च ।
न बुभुक्षा पिपासा वा बाधते मानुषान् यदि । रोगो जरा वा धर्म्मज्ञ मृत्युर्व्वा रतिरेव वा ।
दौर्गन्ध्यं वाऽथ वा घोरा ईतयः कर्म्मसम्भवाः । किमुद्योगं करिष्यन्ति पारिजातगुणान्विताः ।
सर्व्वथा नयनं तत्र पारिजातस्य न क्षमं । इति वाच्यस्त्वया विप्र विष्णुरक्लिष्टकर्म्मकृत् ।
यथा यथा च मे भ्राता तुष्येत द्विपदाम्बर । तथा तथा त्वया कार्य्यं कार्य्यं मत्प्रीतिमिच्छता ।
हारांश्च मणिरत्नानि चन्दनान्यगुरूणि च । वस्त्राणि च विचित्राणि वधूनां द्वारकां नय ।
योग्यानि मर्त्त्यलोकानां यावदिच्छति केशवः । न स्वर्गपरिभोगन्तु कर्त्तुमर्हति केशवः ।
ददानि रत्नानि यथेप्सितान्यहं बहूनि चित्राणि च भूषणानि । न पारिजातञ्च कथञ्चन द्रुमं मुने प्रदास्यामि दिवौकसां प्रियं ।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि पारिजातहरणे इन्द्रवाक्ये अष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥

॥ वैशम्पायन उवाच ॥ देवराजवचः श्रुत्वा नारदः कुरुनन्दन । प्रोवाच वाक्यं वाक्यज्ञो महात्मा धर्म्मवित्तमः ।
अवश्यमेव वक्तव्यं हितं बलनिसूदन । मया तव महाबाहो बहुमानोऽस्ति मे त्वयि ।
उक्तो मया वासुदेवो जानता भवतो मतं । न दत्तः पारिजातो हि हरस्यापि त्वया पुरा ।

हेतवश्च मया तस्य दर्शिता भोः समागतः। न चावगतवान्देवः सत्यमेतद्ब्रवीमि ते।
उपेन्द्रोऽहं महेन्द्रेण लालनीयः सदेति मां। उवाच पुण्डरीकाक्षस्तदनन्तरमेव च। ७१९०
पुनः पुनर्मया चास्य हेतवो देव दर्शिताः। नैव मुञ्चति व्याहन्ता त्वन्मार्गं तस्य वै।
अपि चाप्युक्तवान्देवो वाक्यमिदं मधुसूदनः। प्रहस्य पुरुषश्रेष्ठः समीपमिव वासव।
न देवगन्धर्व्वगणा न राक्षसा न चासुरा नैव च पन्नगोत्तमाः। मम प्रतिज्ञामपहन्तुमुद्यता मुने समर्थाः खलु भद्रमस्तु ते।
स पारिजातं यदि न प्रदास्यति प्रयाच्यमानो भवताऽमरेश्वरः। ततः शचीभ्यामदितानुलेपने गदां विमोक्ष्यामि पुरन्दरोरसि।
उपेन्द्रस्य महेन्द्रायं भ्रातुस्ते निश्चयः परः। यदत्र मन्यसे न्याय्यं संप्रधार्य्य कुरुष्व तत्। ७१९५
तत्त्वं हितञ्च देवेश श्रूयतां वदतो मम। नयमं पारिजातस्य दारकां मम रोचते।
नारदेनैवमुक्तस्तु प्रत्युवाच दिवस्पतिः। रोषाविष्टो देवराजः सहसा सोऽब्रवीदिदं।
अनागसि मयि ज्येष्ठे सोदरे यदि केशवः। एवं प्रवृत्तः किं शक्यं कर्त्तुमत्र तपोधन।
बहूनि प्रतिलोमानि पुरा स कृतवान्मयि। कृष्णो नारद सोढानि भ्रातेति स मयाऽनघ।
खाण्डवे चार्ज्जुनरथं पुरा वाहयता सता। मदीया वारिता मेघाः शमयन्तोऽग्निमुद्धृतं। ७२००
गोवर्द्धनं धारयता विप्रियश्च कृतं मम। तथा वृत्रवधे प्राप्ते साहाय्यार्थं वृतो मया।
समोऽहमिति सर्व्वेषां भूतानामिति चोक्तवान्। स्वबाहुबलमाश्रित्य वृत्रश्च निहतो मया।
देवासुरेषु प्राप्तेषु संग्रामेषु च नारद। युध्यत्यात्मेच्छया कृष्णो मुने सुविदितं तव।
बहुनाऽत्र किमुक्तेन तस्मादिच्छा प्रवर्त्ततां। ज्ञातिभेदो न नः कार्य्यः साक्षी त्वं मम नारद।
ममोरसि गदां मोक्तुं प्रोद्यतो यदि केशवः। अनुग्रहाय पौलोमीं गुणः क इह दृश्यते। ७२०५
उदवासं गतो धीमान् पिता नः कश्यपः प्रभुः। अदित्या सह मे माता तयोर्व्वाच्यमिदं भवेत्।
अजितात्मा मम भ्राता रजसा तमसा वृतः। कामेन च स्त्रियो वाक्यादेवं मामुक्तवान् गुरुं।
धिक् स्त्रियं सर्व्वथा विप्र धिग्रजो धिक् तमस्तथा। यच्चाधिक्षिप्तवान् विष्णुरेवं मां स्त्रीजितो द्विज।
न दृष्टं कश्यपकुलं व्यपदेश्यं महामुने। नैव दक्षकुलं दृष्टं मातुर्मे यत्र सम्भवः।
न ज्येष्ठता न राजत्वं देवानां प्रतिमानितं। कामरागाभिभूतेन कृष्णेन खलु नारद। ७२१०
पुत्रदारसहस्रैर्हि भ्राता ऽनघ विशिष्यते। सदृत्तो ज्ञानसम्पन्न इति ब्रह्मा पुरा ऽब्रवीत्।
नास्ति भ्रातृसमो बन्धुराहार्य्य इतरो जनः। इति मामब्रवीन्माता पिता चैव प्रजापतिः।
सोदरेषु विशेषन्तु पिता मे कश्यपो ऽब्रवीत्। दृष्ट्वा मया विरुध्यन्ते दानवाः पापनिश्चयाः।
काममेतन्न वक्तव्यं स्वयमात्मस्तवान्वितं। प्राप्तस्त्ववसरो विप्र यदिदं वाच्यते मया।
धनुर्ज्यायां मुनिश्रेष्ठ छिन्नायां हि पुराऽनघ। धन्वाभिरमराणां हि वरदानान्महामते। ७२१५
उत्कृत्तशिरसो विष्णोः पुरा देहो धृतो मया। सन्धितञ्च शिरो यत्नाच्छिन्नं रौद्रेण तेजसा।
अहं विशिष्टो देवानामित्युक्त्वा पुनरच्युतः। धनुरारोप्य दर्पेण स्थितो नारद केशवः।

किं मां पिता वा माता वा वक्ष्यतीति मया मुने। स्नेहेन विष्टतं विष्णोः शरीरं मुनिसत्तम।
ऐन्द्रं वैष्णवमस्येव मुने भागमहं ददौ। यवीयांसमहं प्रेम्णा कृष्णं पश्यामि नारद।
संग्रामेषु प्रहर्त्तव्यं तेन पूर्व्वं तपोधन। राजा किलाहं समरे प्रहराम्यपतो ध्रुवं। ७११०
प्रादुर्भावेषु सर्व्वेषु स्वशरीरमिवानघ। यस्माद्रक्ष्यामि धर्म्मज्ञ केशवं भक्तिमाश्रितं।
इदं भंक्ता मदीयस्य भवनं विष्णुना कृतं। उपर्य्युपरि लोकानामधिकं भुवनं मुने।
अवमानः स च मया पृष्ठतः क्रियते मुने। लालनीयो मया बाल इत्येवं भ्रातृगौरवात्।
बालोऽयं मम पुत्त्रेति यवीयानिति नारद। पित्रा मात्रा च गोविन्दो नातीव परिभाषितः।
दृष्टस्तत्र जनन्यास्तु केशवः स विशेषतः। वयं द्वेष्या न सन्देहस्तत्र स्नेहोऽतिरिच्यते। ७११५
सर्व्वज्ञो बलवान् शूरो मान्यमानयिता तथा। केशवेत्येव च ध्यानं यस्तद्धितयतां गतं।
गच्छ नारद वक्तव्यः केशवो वचनान्मम। आहूतो न निवर्त्तेयं समरं प्रति शत्रुभिः।
यदीच्छसि तदागच्छ सज्जं ते यत्त्वमिच्छसि। प्रहरस्व च पूर्व्वं त्वं भार्य्याजित यथेच्छसि।
रथाङ्गेनाथ शार्ङ्गेण गदया नन्दकेन च। प्रहरारुह्य गरुडं दृढो भूत्वा जनार्द्दन।
प्रहृते प्रहरिष्यामि यथाशक्त्या च केशव। अहो धिग्यदि मां स्नेहो विक्लवं न करिष्यति। ७१२०
यावन्न संग्रामगतो जितोऽहं चक्रपाणिना। पारिजातं न दास्यामि तावद्वो मुनिसत्तम।
मां समाक्रयते ज्येष्ठं यवीयांस्तु तपोधन। अहं तं मर्षयिष्यामि किमर्थं स्तोजितं हरिं।
अद्यैव गच्छ भगवन् द्वारकां कृष्णपालितां। विवादे संस्थितः सोऽद्य इति वाच्यस्त्वयाऽच्युतः।
पत्त्राग्रपत्त्रार्द्धमपि त्वयाऽजितो न पारिजातस्य तव प्रदास्यति। इति प्रवाच्यो मधुसूदनस्त्वया वचो मदीयं स्मरता तपोधन।
पुनः प्रवाच्यो भगवंस्त्वयाऽच्युतो मम प्रियार्थं खलु निर्विशङ्कितं। न मायया हर्त्तुमिहार्हसि द्रुमं सुयुद्धमेवास्तु धिगस्तु जिह्मतां। ७१२५

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि पारिजातहरणे इन्द्रवाक्ये ऊनत्रिंशदधिकशततोऽध्यायः ॥ १२८ ॥

॥ वैशम्पायन उवाच ॥ महेन्द्रवचनं श्रुत्वा नारदो वदताम्वरः। विविक्ते देवराजानमिदं वचनमब्रवीत्।
कामं प्रियाणि राजानो वक्तव्या नात्र संशयः। प्राप्तकालन्तु वक्तव्यं हितमप्रियमच्युत।
अनियुक्तपुरोभागो न स्यादिति वदन्ति हि। स लोकगतितत्त्वज्ञो नयविज्ञानकोविदः।
कार्य्याकार्य्ये समुत्पन्ने परिपृच्छति मां भवान्। यतस्ततः प्रवक्ष्यामि श्रूयतां यदि रोचते।
अयुक्तेनापि सुहृदा वक्तव्यं जानता हितं। न्याय्यस्य प्राप्तकालस्य पराभवमनिच्छता। ७१३०
वक्तव्यं सर्व्वथा सद्भिरप्रियं वाऽपि यद्धितं। आनृशंस्यमेतत् सततस्य सद्भिश्च विदितं पुरा।
अनृते धर्म्मभङ्गे च न शुश्रूषति चाप्रिये। न प्रियं न हितं वाच्यं सद्भिरेते विनिन्दिताः।
सर्व्वथा देव वक्तव्यं श्रूयतां श्रुण्वताम्वर। श्रुत्वा च कुरु सर्व्वज्ञ मम श्रेयस्करं वचः।
अन्योन्यभेदो भ्रातॄणां सुहृदां वा बलान्तक। भवत्यामन्दकृद्देव विपतां नात्र संशयः।

हितानुबन्धसहितं कार्य्यं श्रेयं सुरेश्वर । विपरीतञ्च तद्बुद्ध्वा नित्यं बुद्धिमतां वर । ७१४५
पश्चात्तापकरं यत् स्यादारब्धं कार्य्यमीदृशं । आरम्भेनैव तद्विद्यादेष बुद्धिमतां नयः ।
विपाकमस्य कार्य्यस्य नानुपश्यामि शोभनं । यदत्र कारणं देव निबोध विबुधाधिप ।
य एको विश्वमध्यास्ते प्रधानं जगतो हरिः । प्रकृत्या यं परं सर्व्वे क्षेत्रज्ञं वै विदुर्बुधाः ।
तस्याव्यक्तस्य यो व्यक्तो भागः सर्व्वभवोद्भवः । तस्यात्मा प्रथमो देवो विष्णुः सर्व्वस्य धीमतः ।
प्रकृत्याः प्रथमो भाग उमा देवी यशस्विनी । व्यक्तः सर्व्वमयो विष्णुः स्त्रीसंज्ञो लोकभावनः ७१५०
रुक्मिण्याद्याः स्त्रियस्तस्य व्यक्तत्वे प्रथमो गुणः । अव्यया प्रकृतिर्द्देवी गुणदेवो महेश्वरः ।
न विशेषोऽस्ति रुद्रस्य विष्णोश्चामरसत्तम । गुणिनश्चाव्ययायाश्च स दारप्रथमो गुणः ।
नारायणो महातेजाः सर्व्वलोकभावनः । भोक्ता महेश्वरो देवः कर्त्ता विष्णुरधोक्षजः ।
ब्रह्मा देवगणाश्चान्ये पश्चात् सृष्टा महात्मना । महादेवेन देवेश प्रजापतिगणास्तथा ।
एवं पुराणः पुरुषो विष्णुर्वेदेषु पठ्यते । अचिन्त्यस्याप्रमेयस्य गुणेभ्यश्च परस्तथा । ७१५५
अदित्या तपसा विष्णुर्महात्माराधितः पुरा । वरेण च्छन्दिता तेन परितुष्टेन चादितिः ।
त्वयोक्तस्त्वत्समं पुत्त्रमिच्छामीति सुरोत्तम । प्रणिपत्य च विज्ञाय नारायणमधोक्षजं ।
तेनोक्ता भुवने नास्ति मत्समः पुरुषोऽपरः । अंशेन तु भविष्यामि पुत्त्रः खल्वहमेव ते ।
स जातः सर्व्वतद्देवो भ्राता तव सुरेश्वर । नारायणो महातेजा यमुपेन्द्रं प्रचक्षते ।
इत्यमेष हरिर्द्देवः काश्यपत्वमुपागतः । तैस्तैर्भावैर्विकुरुते भूतभव्यभवाव्ययः । ७१६०
प्रादुर्भावं गतो देवो जगतो हितकाम्यया । माथुरं जगतां नाथः कर्त्ता हर्त्ता च केशवः ।
यथा पललपिण्डः स्याद्व्याप्तः स्नेहेन मानद । तथा जगदिदं व्याप्तं विष्णुना प्रभविष्णुना ।
ब्रह्मण्यदेवः सर्व्वात्मा तैस्तैर्भावैर्विकुर्व्वते । जगत्यतिगुणो देवो वैकुण्ठः सर्व्वभावनः ।
अतः समस्तदेवानां पूज्य एव च केशवः । पद्मनाभश्च भगवान् प्रजासर्गकरो विभुः ।
अनन्तो धारणार्थञ्च विभर्त्ति च महद्यशः । यश इत्यपि मन्त्रिश्च कथ्यते वेदवादिभिः । ७१६५
श्वेतः कृतयुगे देवो रक्तस्त्रेतायुगे तथा । द्वापरे च तथा पीतः कृष्णः कलियुगे विभुः ।
अवधीत् स हिरण्याक्षं दिव्यरूपधरो हरिः । जघ्ने हिरण्यकशिपुं नरसिंहवपुर्हरिः ।
दधारापसु निमज्जन्तीमेष देवो वसुन्धरां । वाराहं वपुराश्रित्य जगतो हितकाम्यया ।
जिगाय जगतीश्चैव विष्णुर्वामनरूपधृक् । बबन्ध च बलिं देवः श्रीमान् पन्नगबन्धनैः ।
देवदानवसम्भूतामकामयदपि श्रियं । त्वय्यनन्तः पुरा विष्णुरुदारामितविक्रमः । ७१७०
नावेक्षेत ततो यस्य तं न हन्ति जनार्द्दनः । अनीकेष्वपि वर्त्तन्तं व्रतमेतन्महात्मनः ।
जघ्ने च दानवान्मुख्या देवानाञ्चैव शत्रवः । तव प्रियार्थं गोविन्दो धर्म्मनित्यः सतां गतिः ।
रामत्वमपि चावाप्य जघ्ने रावणमात्मवान् । भूत्वा कामगुणश्चैव जघान द्विरदं हरिः ।
इताय जगतोऽद्यापि लोके वसति मानुषे । उपेन्द्रो जगतो नाथः सर्व्वभूतोत्तमोत्तमः ।

जटी कृष्णाजिनी दण्डी दृष्टपूर्व्वो मया हरिः । दैतेयेषु चरन्देवस्तृणेष्वग्निरिवोद्धतः । ७३७५
श्रद्रास्तमपि गोविन्दं दानवैकार्णवं जगत् । कुर्व्वाणं दानवैर्हीनं जगतो हितकाम्यया ।
अवश्यं पारिजातन्ते नयिष्यति जनार्द्दनः । द्वारकाममरश्रेष्ठ मानृतं ते ब्रवीम्यहं ।
भ्रातृस्नेहाभिभूतस्त्वं कृष्णो न प्रहरिष्यसि । नापि कृष्णस्त्वयि ज्येष्ठे प्रहरिष्यति वासव ।
नैव चेच्छ्रोष्यसि प्रोक्तं मया देव कथञ्चन । पृच्छ त्वं मघधर्म्मज्ञान् ये हितास्तव मन्त्रिणः ।
नारदेनैवमुक्तस्तु महेन्द्रो जनमेजय । इदमुत्तरमीशोऽथ प्रत्युवाच जगद्गुरुं । ७३८०
एवंविधप्रभावं त्वं कृष्णं वदसि यद्द्विज । एवमेतत् सुबहुशः श्रुतं खलु मया मुने ।
यतश्चैवंविधः कृष्णस्ततोऽहं तस्य तं तरुं । न प्रयच्छाम्यदातव्यं सतां धर्म्ममनुस्मरन् ।
महाप्रभावो नाल्पार्थं ह्यर्थेदिति विचिन्तयन् । व्यवस्थितोऽहं भद्रन्ते मुने सर्व्वगुणोदितः ।
महाप्रभावाः सततं भवन्ति हि सहिष्णवः । श्रोतारश्चैव सततं वृद्धानां ज्ञानचक्षुषां ।
महात्मा कारणेनाल्पे कृष्णो धर्म्मभृताम्वरः । भ्रात्रा ज्येष्ठेन धर्म्मज्ञो विरोधं गन्तुमर्हति । ७३८५
यथैव मम मातुः स वरं प्रादादधोक्षजः । तथैव तस्याः पुत्राणां ज्येष्ठतां सोढुमर्हति ।
यथैवोपेन्द्रतां यातः स्वयमिच्छन् जनार्द्दनः । तथैव भ्रातुरिन्द्रस्य संमानं कर्त्तुमर्हति ।
ज्यैष्ठ्यमेव तु देवेन नारब्धं किं पुरातने । अथेदानीमपीच्छेत् स ज्येष्ठोऽस्तु मधुसूदनः ।
मुनिश्चितं वलरिपुमीक्ष्य नारदो विसर्ज्जितस्त्रिदशवरेण धर्म्मवित् । ययौ पुरीं यदुवृषभाभिरक्षितां कुशस्थलीं धृतमतिमांस्तपोधनः ।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि पारिजातहरणे त्रिंशदधिकशततोऽध्यायः ॥ १३० ॥

॥ वैशम्पायन उवाच ॥ अथैत्य द्वारकां रम्यां नारदो मुनिसत्तमः । ददर्श पुरुषश्रेष्ठं नारायणमरिन्दमं । ७३९०
स्ववेश्मनि सुखासीनं सहितं सत्यभामया । विराजमानं वपुषा सर्व्वतेजोनिगामिना ।
तमेवार्थं महात्मानं चिन्तयन्तं दृढव्रतं । केवलं योजयन्तञ्च वाक्यमात्रेण भामिनीं ।
दृष्ट्वैव नारदं देवः प्रत्युत्तस्थावधोक्षजः । पूजयामास च तदा विधिदृष्टेन कर्म्मणा ।
सुखोपविष्टं विश्रान्तं प्रहस्य मधुसूदनः । वृत्तान्तं परिपप्रच्छ पारिजाततरुं प्रति ।
अथोवाच मुनिः सर्व्वं विस्तरेण महात्मने । इन्द्रानुनायेन्द्रवाक्यं निखिलं जनमेजय । ७३९५
श्रुत्वा कृष्णस्तु तत्सर्व्वं नारदं वाक्यमब्रवीत् । अमरावतीं पुरीं यास्ये श्वोऽहं धर्म्मभृताम्वर ।
इत्युक्त्वा नारदेनैव सहितः सागरं ययौ । सन्दिदेश ततस्तत्र विविक्ते नारदं हरिः ।
महेन्द्रभवनं गत्वा वद वाक्यं तपोधन । अभिवाद्य महात्मानं मद्वाक्यादमरोत्तमं ।
न युद्धे प्रमुखे स्थातुमर्हसि त्वं मम प्रभो । पारिजातस्य नयने निश्चितं त्वमवेहि मां ।
एवमुक्तस्तु कृष्णेन नारदस्त्रिदिवं गतः । आचचक्षे च कृष्णोक्तं देवेन्द्रायामितौजसे । ७४००
ततो वृहस्पतेः शक्रः शशंस बलनाशनः । श्रुत्वा वृहस्पतिश्चेदमुवाच कुरुनन्दन ।
अहो धिग्वह्मसदनं मयि याते शतक्रतो । दुर्नीतमिदमारब्धं मन्त्रभेदो हि दारुणः ।

अनाख्याय कथं नाम भवता भुवनेश्वर । ममैतत् कृत्यमारब्धं देव केनापि हेतुना ।
अथवा भवितव्येन कर्म्मजेन प्रयुज्यते । जगद्गुरुन्न न विधिः शक्यः समतिवर्त्तितुं ।
सहसैव तु कार्य्याणामारम्भो न प्रशस्यते । तदेतत् सहसारब्धं कार्य्यं दास्यति लाघवं । ७४०५
वृहस्पतिं महात्मानं महेन्द्रोऽथाब्रवीद्वचः । एवं गतेऽद्य यत् कार्य्यं तद्भवान् वक्तुमर्हति ।
तमुवाचाथ धर्म्मात्मा गतानागततत्त्ववित् । अधोमुखश्चिन्तयित्वा वृहस्पतिरुदारधीः ।
यतस्व सह पुत्त्रेण योधयस्व जनार्द्दनं । तथा शक्र करिष्यामि यथा न्याय्यं भविष्यति ।
वृहस्पतिस्त्वेवमुक्त्वा क्षीरोदं सागरं गतः । आचष्ट चैव मुनये कश्यपाय महात्मने ।
तच्छ्रुत्वा कश्यपः क्रुद्धो वृहस्पतिमभाषत । अवश्यं भाव्यमेतद्धि सर्व्वथा नात्र संशयः । ७४१०
दृष्टवतः सदृशीं भार्य्यां भर्त्तुर्देवशर्म्मणः । अपध्यानकृतो दोषः पतत्येष शतक्रतोः ।
अस्य दोषस्य शान्त्यर्थमारब्धस्य मुने मया । उदवासः स दोषस्य प्राप्त एव सुदारुणः ।
तद्गमिष्यामि मात्राऽस्य सहादित्या तपोधन । उभौ तौ वारयिष्यामि देवं संवदते यदि ।
वृहस्पतिस्तु धर्म्मात्मा मारीचमिदमब्रवीत् । प्राप्तकालं त्वया तत्र भवितव्यं तपोधन ।
तथेति कश्यपश्चोक्त्वा सम्प्रस्थाप्य वृहस्पतिं । जगामाराधयितुं देवं रुद्रं भूतगणेश्वरं । ७४१५
तत्र सौम्यं महात्मानमानर्च्च वृषभध्वजं । वरार्थी कश्यपो धीमानदित्या सहितः प्रभुः ।
तुष्टाव च तमीशानं मारीचः कश्यपस्तदा । वेदोक्तैः स्वकृतैश्चैव स्तवैः स्तव्यं जगद्गुरुं ।

॥कश्यप उवाच॥ उरुक्रमं विश्वकर्म्माणमीशं जगत्स्रष्टारं धर्म्मदृश्यं वरेण्यं । सशर्व्वं त्वां धृतिमद्धाम दिव्यं विश्वेश्वरं भगवन्तं नमस्ये।
यो देवानामधिपः पापहर्त्ता ततं विश्वं येन जगन्महत्त्वात् । आपो गर्भो यस्य शुभा धरित्र्यो विश्वेश्वरं तं शरणं प्रपद्ये ।
शालावृकान् यो यतिरूपो निजघ्ने दत्तानिन्द्रेण प्रणुदोऽहितानां । विरूपाक्षं सुदर्शनं पुण्ययोनिं विश्वेश्वरं यामि मूर्द्ध्ना
प्रपद्ये । ७४२०
भुङ्क्ते य एको विभुर्जगतो विश्वमग्र्यं धाम्ना धाम सुकृतित्वान्न धृष्यः । पुष्यात् स मां महसा शाश्वतेन सोमपानां मरी
चिपानां वरिष्ठः ।
अथर्व्वाणं सुशिरसं भूतयोनिं कृतिनं धीरं दानवानाञ्च वाधं । यज्ञे हुतं यज्ञियं संस्कृतं वै विश्वेश्वरेशं शरणं यामि देवं ।
जगज्जालं विततं यत्र विश्वं विश्वात्मानं प्रीतिदेवं गतानां । य ऊर्द्ध्वगं रथमास्थाय याति विश्वेश्वरः स सुमना मेऽस्तु
नित्यं ।
अन्तश्चरं रोचनं चारुशाखं महाबलं धर्म्मनेतारमीड्यं । सहस्रनेत्रं शतवर्त्मानमग्र्यं महादेवं विश्वसृजं नमस्ये ।
शुचिं योगं शमनं शान्तपापं शर्व्वं शम्भुं शङ्करं भूतनाथं । धुरन्धरं गोपतिं चन्द्रचिह्नं रिषीकाणामयनं यामि मूर्द्ध्ना । ७४२५
आशुः शिपाणं वृषभं वीरुवाणं कृतं धर्म्मं वितथं चाशु शेषं । वसुन्धरं मन्त्रशीर्कं समं त्वा धृतव्रतं शूलधरं प्रपद्ये ।
अनन्तवीर्य्यं धृतकर्म्माणमाद्यं यज्ञस्येशं यजताञ्चाभियाज्यं । हविर्भुजं भुवनानां सदैव ज्येष्ठं द्विजं धर्म्मभृतं प्रपद्ये ।
परं गुणेभ्यः पृश्निगर्भस्वरूपं यशःशृङ्गं व्यूहनं कान्तरूपं । शुद्धात्मानं पुरुषं सत्यधाम सम्बोहनं दुष्कृतीनां नमस्ये ।
युक्तोद्धारं स्वशिरसं चारुकर्म्म दृढव्रतं दृढधन्वानमाजं । शूरं वेत्तारं धनुषोऽस्त्रातिरेकं पतिं पशूनां शमनं नमस्ये ।

एको गतिश्चैव भूतं भविष्यं सर्व्वातिथिर्यो हि जुषत्यरिघ्नः । अरिन्तुदोऽनुत्तमः संविभागो विभाजको मां भगवान्
पातु देव । ७५३०
य एको याति जगतां नियमीशो य एकोऽदान्मरुतां प्राणमग्र्यं । येनानृशंस्याच्छाश्वतं सामजुष्टं समाजुयात् सुकृती श्रेयसेऽद्य ।
ब्रह्माऽसृजद्यो भुवनोत्तमोत्तमं तृप्तो विद्वान् ब्राह्मणः पन्नगस्य । स्रष्टार सव्याहृतिस्थं समग्रं समां पायादृग्यजुरूपोऽरिहाङ्गैः ।
व्यञ्जनो जनोऽय विद्वान्मनस्यः स्पृशिः शम्भुः प्राणदः कृत्तिवासाः । रमो भुवः पवमानस्य भर्त्ता स सपत्नीशः शङ्करः सारधाता ।
त्र्यम्बकं पुष्टिदं वोब्रुवाणं धर्म्मं विप्राणां वरदं यज्वनाञ्च । वराह्वरं रणजेतारमीशं देवं देवानां शरणं यामि रुद्रं ।
आस्थं देवानामन्तकं दुष्कृतीनां चित्रत्सोमं वृत्रहं कर्म्मसाक्ष्यं । भूतायनं भूतपतिं गुरूणां गुरुं देवं शरणं यामि रुद्रं । ७५३५
अनुद्भुतं यज्ञकर्त्तारमन्तं मध्यञ्चाद्यं यज्जगतां साम्यरूपं । देवव्रतेषु बहुधा गीतमीशमभिचित्रिपिष्टपं शरणं यामि रुद्रं ।
महाजिनं व्रतिनं मेखलालं सुतीयणं क्रोधघ्नं विपापं । भूतं चेत्रज्ञं गुणिनं वा कपर्द्दिनं मतोऽस्मीशं वन्दनं वन्दनानां ।
देवं देवानां पावनं पावनानां कृतिं कृतीनां महतो महान्तं । शतात्मानं संस्तुतं गोपतीनां पतिं देवं शरणं यामि रुद्रं ।
अक्षरं पुरुषं गुह्यमंशं प्रभास्वन्तं प्रणवं विप्रदीपं । हेतुं परं परमस्याक्षरस्य शुभं देवं गुणिनं सन्नतोऽस्मि ।
प्रसूताश्च भयो नेम सृतिश्च सूक्ष्मः पृथक् भूतेभ्यो न पृथक् चैव भूतः । स्वयम्भूतः पातु मां सर्व्वसादः सदः स्वादः समादः पातु
रक्षं । ७५४०
आमन्नः सन्नतरः साधकानां श्रद्धावतां श्राद्धवृत्तिप्रणेता । पतिर्गणानां महतां सत्कृतीनां पायात्मेशः पूरणः पन्नगानां ।
अन्तर्व्वहिर्वृजिनानां निहन्ता स्वयं कर्त्ता भूतभावी विकुर्व्वन् । धृतायुधः सुकृतीनामुत्तमौजाः प्रणुद्यान्मे वृजिनं देव
देवः ।
येनोद्धृतास्त्रैपुरा मायिनो वै दग्धा घोरेण वितथान्ताः शरेण । महत् कुर्व्वन्तो वृजिनं देवतानां ज्यायानीशः पातु विश्वो
दधाता ।
भागीयमां भागमादातुमिच्छन्मखो दाक्षो येन कृत्तोऽन्वधावत् । विद्वान् यज्ञस्यादिरयान्तः स देवः पायादीशो मां दक्षय
ज्ञान्तहेतुः ।
अन्यो धन्यः संस्कृतस्योत्तमस्य जगत् स्रष्टा योऽस्ति सर्व्वातिगुह्यः । स मां मखप्रमुखे पातु नित्यं विचिन्वानः प्रथमः पन्न
गानां । ७५४५
गुणैकाख्यं यस्य देवस्य नित्यं सत्वोद्रिक्तो यस्य भावात् प्रसूतः । गोप्ता गोप्तृणां सन्नदो दुष्कृतीनामाद्यो विश्वस्य बाधमानस्य
क्रुद्धः ।
धाम्ना यस्य हरिरग्र्योऽय विश्वो ब्रह्मा पुत्रैः सहितश्च द्विजाश्च । पराभूता भुवनेशः स सोमो जुषत्वेव श्रेयसे साधुगोप्ता ।
यस्माद्भूतानां भूतिरन्तोऽय मध्य धृतिर्विभूतिः श्रुतिश्च रुद्रः । शर्वाभिभूतस्य पुरुषस्येश्वरस्य महात्मनो मृडवेद्यस्य तस्य ।
यस्मिन्नाद्ये त्र्यम्बकः सर्व्वमीशो भगाद्यं यत्तद्धुमा सर्व्वधात्री । नान्यत्तृतीयं जगतीहास्ति किञ्चिन्महादेवात् सर्व्वसत्वेश्वरोऽसौ ।
इति संस्तूयमानस्तु भगवान् वृषभध्वजः । दर्शयामास धर्म्मात्मा कश्यपं धर्म्मशङ्करं । ७५५०
उवाच चैनं देवेशः प्रसन्नेनान्तरात्मना । जाने संस्तौषि कार्य्येण येन मां त्वं प्रजापते ।
इन्द्रोपेन्द्रौ महात्मानौ देवौ प्रकृतिमेष्यतः । पारिजातन्तु धर्म्मात्मा नयिष्यति जनार्द्दनः ।

उपध्योता महेन्द्रो हि मुनिना देवशर्म्मणा । अस्याकाङ्क्षत् पुरा भार्य्यां तपोदीप्तस्य कश्यप ।
गम्यतां तत्र धर्म्मज्ञ दाक्षायण्या सहानया । अदित्या शक्रसदनं श्रेयस्ते पुत्रगोधृ...ं ।
इति हरवचनं निशम्य विद्दान् कमलभवात्मजसूनुरप्रमेयः । त्रिदशगणगुरुं प्रणम्य रुद्रं मुदितमना: सुमनोकसं जगाम । ७४५५
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि पारिजातहरणे महादेवस्तवने एकत्रिंशदधिकशततमोऽध्याय: ॥ १३१ ॥
॥ वैशम्पायन उवाच ॥ अथ विष्णुर्म्महातेजा मुहूर्त्ताभ्युदिते रवौ । मृगयाव्यपदेशेन ययौ रैवतकं गिरिं ।
आरोप्यैकरथे देव: सात्यकिं शिनिपुङ्गवं । प्रद्युम्नमनुगच्छेति प्रोक्त्वा कुरुकुलोद्वह: ।
रैवतञ्च गिरं देवो गत्वा दारुकमब्रवीत् । मदीयं रथमेतं त्वं गृहायेहैव दारुक ।
प्रतिपालय मां सौम्य दिनार्द्धञ्चारयन् हरीन् । रथेनैव प्रवेष्टाहं द्वारकां सूतसत्तम ।
इति सन्दिश्य भगवानारुरोह जयोद्यत: । तार्क्ष्यं स सात्यकिं धीमानप्रमेयपराक्रम: । ७४६०
पृथग्रथेन कौरव्य प्रद्युम्न: शत्रुसूदन: । आकाशगामिना राजन् पृष्ठत: कृष्णमन्वियात् ।
निमेषान्तरमात्रेण नन्दनं काननं हरि: । देवोद्यानं ययौ धीमान् पारिजातजिहीर्षया ।
ददर्श तत्र भगवान्देवयोधान्दुरासदान् । नानायुधधरान् वीरान्नन्दनस्थानधोक्षज: ।
तेषां सम्पश्यतामेव पारिजातं महाबल: । उत्पाट्यारोपयामास पारिजातं सतां गति: ।
गरुडं पक्षिराजानमयत्नेनैव भारत । उपस्थितो विग्रहवान् पारिजातस्तु केशवं । ७४६५
सान्त्वितो वासुदेवेन पारिजातस्तु भारत । उक्तश्च वृक्ष मा भैस्त्वं केशवेन महात्मना ।
तं प्रस्थितं तरुं दृष्ट्वा पारिजातमधोक्षज: । अमरावतीं पुरीं श्रेष्ठां ततश्चक्रे प्रदक्षिणं ।
ते तु नन्दनगोप्तार: पारिजातो द्रुमोत्तम: । ह्रियतीति महेन्द्राय गत्वा नृप शशंसिरे ।
अथैरावतमारुह्य निर्ययौ पाकशासन: । जयन्तेन रथस्थेन पृष्ठतोऽनुगत: प्रभु: ।
पूर्व्वमभ्यागतं द्वारं केशवं शत्रुनाशनं । दृष्ट्वोवाच प्रवृत्तं भो: किमिदं मधुसूदन । ७४७०
प्रणम्य गरुडस्थोऽथ केशव: शक्रमब्रवीत् । वध्वास्ते पुण्यकार्थाय नीयतेऽयं वरद्रुम: ।
तमुवाच तत: शक्रो मैवं पुष्करलोचन । अयोधयित्वा न तरुर्न्नयितव्यस्त्वयाऽच्युत ।
प्रहरस्व महाबाहो प्रथमं मयि केशव । प्रतिज्ञा सफला तेऽस्तु मुञ्च कौमोदकीं मयि ।
तत: कृष्ण: शरैस्तीक्ष्णैर्द्देवराजगजोत्तमं । बिभेदाशनिसङ्काशै: प्रहसन्निव भारत ।
विव्याध गरुडं वज्री दिव्यै: शरवरैस्तदा । बाणांश्च बाणैश्चिच्छेद केशवस्य तरस्विन: । ७४७५
यान् यान्मुमोच देवेन्द्रस्तांस्तांश्चिच्छेद माधव: । माधवेन प्रमुक्तांश्च चिच्छेद बलवृत्रहा ।
माहेन्द्रस्य च शब्देन धनुष: कुरुनन्दन । शार्ङ्गस्य च निनादेन मुमुहु: स्वर्गवासिन: ।
तयोर्व्वर्त्तति संग्रामे गरुडस्थं महाबल: । पारिजातं जयन्तोऽथ हर्त्तुमभ्यपतद्बली ।
प्रद्युम्नमथ कंसघ्नो वारयेति तमब्रवीत् । ततस्तं वारयामास रौक्मिणेय: प्रतापवान् । ७४८०
जयन्तो जयतां श्रेष्ठो रौक्मिणेयमथेषुभि: । सर्व्वगात्रेषु विव्याधाजघान रथे स्थित: ।
रथस्थ एव रथिनं कामस्तु कमलेक्षण: । ऐन्द्रिमभ्यर्द्दयामास बाणैराशीविषोपमै: ।

स सन्निपातस्तुमुलो बभूव कुरुनन्दन । जयन्तस्य च वीरस्य रौक्मिणेयस्य चोभयोः ।
कृतप्रतिकृतश्चैव चक्रतुस्तौ महाबलौ । महेन्द्रोपेन्द्रतनयौ जगत्यस्त्रभृताम्वरौ ।
देवाश्च मुनयश्चैव ददृशुर्विस्मयान्विताः । तं संग्रामं महाघोरं सिद्धाश्चैव सचारणाः ।
ततस्तु प्रवरो नाम देवदूतो महाबलः । पारिजातं पुनर्हर्त्तुमियेष कुरुनन्दन । ७४८५
सखा स देवराजस्य महास्त्रविदरिन्दमः । अवध्यो वरदानेन ब्रह्मणः कुरुनन्दन ।
ब्राह्मणस्तपसा सिद्धो जम्बुद्वीपाद्दिवं गतः । सखा कृत्या नृपते यातः सखित्वं बलघातिना ।
तमापतन्तं संप्रेक्ष्य कृष्णः सात्यकिमब्रवीत् । तवैष एव प्रवरं शरैर्व्वारय सात्यके ।
न त्वत्र निर्द्दयं बाणा मोक्तव्याः सात्यके त्वया । अस्य ब्राह्मणचापल्यं सोढव्यं खलु सर्व्वथा ।
ततः पक्षा रथेषूणां गरुडस्यं द्विजस्तदा । आजघान महाबाहोः सात्यकिं प्रवरो भृशं । ७४९०
शिनेर्नप्ता धनुस्तस्य चिच्छेद सायकान्नृप । चिच्छेद पुरुषव्याघ्रो वचनञ्चेदमब्रवीत् ।
ब्राह्मणो नाभिहन्तव्यस्तिष्ठ तिष्ठ स्ववर्त्मनि । अवध्या यादवानां हि स्वपराद्धा अपि द्विजाः ।
प्रवरस्तु प्रहस्यैनमुवाच कुरुनन्दन । अलं चान्यां घृणां शूर युध्य सर्व्वात्मना रणे ।
जामदग्न्यस्य रामस्य शिष्योऽहमपि यादव । नामतः प्रवरो नाम सखा शक्रस्य धीमतः ।
न देवा योद्धुमिच्छन्ति मन्यन्तो मधुसूदनं । आनृण्यं योद्धुदस्याहमद्य गन्ताऽस्मि माधव । ७४९५
ततस्तयोस्तदा रौद्रः संग्रामो ववृधे नृप । अस्त्रैर्दिव्यैर्नरव्याघ्र शैनेयद्विजमुख्ययोः ।
चोस्वचाल तदा राजन् द्यावराश्च सहस्रशः । तस्मिन् वर्त्तति संग्रामे नेपामतिमहात्मनां ।
नातिश्लिष्ये रणे कार्ष्णिरैन्द्रिमस्त्रभृताम्वरं । ऐन्द्रिः कार्ष्णिं महात्मानं मायिनं शूरमच्युतं ।
हस्त गदा प्रतीच्छेति तावुभौ योधसत्तमौ । युयुधाते नरश्रेष्ठ परस्परजयैषिणौ ।
अथ शार्ङ्गायुधसुतं शचीपुत्त्रः प्रतापवान् । विभाव्याभ्यहनद्राजन् दिव्येनास्त्रेण सत्वरः । ७५००
सोऽस्त्रं तदभिदीप्यन्तमापतन्तं शितैः शरैः । तस्तम्भ बाणजालेन तदद्भुतमिवाभवत् ।
ततस्तद्दीप्यमानन्तु पपात रणमूर्द्धनि । रौक्मिणेयस्य कौरव्य घोरं दानवमर्द्दनं ।
तेनास्त्रेण रथो दग्धः प्रद्युम्नस्य महात्मनः । नादहत्तत्तु घोरं तं रौक्मिणेयं जनाधिप ।
दहत्यग्निं न खल्वग्निरद्भुतोऽपि विशाम्पते । दग्धाद्रथान्महाबाहू रौक्मिणेयोऽपचक्रमे ।
अथ नारायणसुतो विरथो रथिनाम्वरः । स्थितो धनुष्मानाकाशे जयन्तमिदमब्रवीत् । ७५०५
महेन्द्रपुत्त्र दिव्यं त्वं यदस्त्रं मुक्तवानसि । नाहमीदृक्शरूपाणां शक्यो हन्तुं शतैरपि ।
प्रयत्नं कुरु शिवाणां यत्नं मेऽद्य प्रदर्शय । नास्ति मेऽतिशयं कर्त्ता संग्रामेऽमरनन्दन ।
आमोक्ष्ये सान्त्वसं दृष्ट्वा रथस्थं त्वां धृतायुधं । बिभेमि तव नेदानीं युद्धे दृष्टबलाऽबलः ।
मनसा स्पृश्यतामेष पारिजातस्त्वया तरुः । शक्यं न खलु हस्ताभ्यां प्रष्टव्यो यस्त्वया ह्युभौ ।
रथो मायामयो दग्धस्त्वया यो ह्यस्ततेजसा । दृष्टशासां सहस्त्राणि स्रष्टुं शक्तोऽस्मि मायया । ७५१०
एवमुक्तो जयन्तस्तु मुमोचास्त्रं महाबलः । तपसोत्पादितं तेन स्वयमेवातितेजसा ।

तत्प्रद्युम्नो महावेगं शरजालैरवारयत्। चत्वार्य्यस्त्राणि दिव्यानि मुमोच चापराणि सः।
दिक्षु सर्व्वासु रुरुधुस्तान्यस्त्राण्यथ भारत। रौक्मिणेयं महात्मानमन्तरीक्षे च पञ्चमं।
महोल्कासदृशान् वाणानस्त्राण्यमरसत्तमः। मुमोच यानि घोराणि प्रद्युम्नं प्रति सर्व्वतः।
तानि सर्व्वाणि वाणौघैः कार्ष्णिरस्त्राण्यवारयत्। जयन्तश्चापरैर्व्वाणैर्विव्याध निशितैस्तदा। ७५१५
ततो नादः समुत्सृष्टो द्युचरैः पुण्यकर्म्मभिः। दृष्ट्वा स्थैर्य्यञ्च शौर्य्यञ्च प्रद्युम्नस्य महात्मनः।
प्रवरस्यापि वाणेन शितेन शिनिपुङ्गवः। चिच्छेदेष्वासनं वीरो हस्तावापञ्च भारत।
ततोऽन्यत्स तु जग्राह महत्तद्धनुरुत्तमं। महेन्द्रदत्तं प्रवरो महाशनिसमस्वनं।
स तेन वीरो महता धनुषा विप्रसत्तमः। शरान्मुमोच विशिखानर्करश्मिनिभांस्तदा।
चकर्त्त च धनुश्चित्रं शैनेयस्यामितौजसः। विव्याध सर्व्वगात्रेषु वाणैरपि च सात्यकिं। ७५२०
धनुरादाय शैनेयस्ततोऽन्यत् कुरुनन्दन। दृढं भारसहं धीमान् विव्याध प्रवरं रणे।
उत्चकर्त्ततुरन्योन्यं वर्म्मणी तौ शितैः शरैः। गात्रेभ्यश्चैव मांसानि मर्म्मभिद्भिः शरोत्तमैः।
अथापरेण वाणेन पुनरिष्वासनं द्विधा। चिच्छेद प्रवरो वीरस्त्रिभिश्चैनमताडयत्।
अन्यदिष्वासनं तत्तु ग्रहीतुमनसं द्विजः। गदया ताडयामास चेष्टया लघुहस्तवत्।
सोऽसिं चर्म्म च जग्राह सात्यकिः प्रहसन्निव। न जग्राह धनुर्द्धीमान् गदयाऽभिहतो भृशं। ७५२५
ततः शरशतान्येव मुमोच प्रवरस्तदा। विहस्तमिव विज्ञाय सत्यकं यदुनन्दनं।
प्रद्युम्नोऽस्य ददौ खड्गं निर्म्मलाकाशसन्निभं। तस्य चिच्छेद भल्लेन निस्त्रिंशं प्रवरस्तदा।
त्सरुदेशेऽपातयच्च प्रवरः प्रहसन्निव। व्यधमच्च तथा वर्म्म शितैर्व्वाणैरजिह्मगैः।
आजघान च शक्त्यैनं हृदि विप्रो ननाद च। तं विक्लवमिव ज्ञात्वा पारिजातजिहीर्षया।
तार्क्ष्योऽभ्याशे रथेनैव स तस्थौ प्रवरस्तदा। तं पक्षपुटवेगेन चिक्षेप गरुडस्तदा। ७५३०
गव्यूतिमात्रं स रथः पपात च मुमोह च। तं जयन्तो निपत्याय पतितं ब्राह्मणं नृप।
समाश्वास्य रथं शीघ्रं स्वमारोपितवांस्तदा। शैनेयमपि मुह्यन्तं पतन्तञ्च मुहुर्म्मुहुः।
आश्वासयानः प्रद्युम्नः पितृव्यं परिषस्वजे। तं हि पस्पर्श हस्तेन सव्येन मधुसूदनः।
नीरुजः स्पृष्टमात्रस्तु सात्यकः समपद्यत। प्रद्युम्नो दक्षिणे पार्श्वे वामे तु शिनिपुङ्गवः।
तस्थतुः पारिजातस्य युद्धशौण्डौ तु तावुभौ। जयन्तः प्रवरश्चैव रथेनैकेन भारत। ७५३५
सम्पतन्तौ महेन्द्रेण प्रहस्योक्तौ महात्मना। नामस्त्रमभिगन्तव्यं गरुडस्य कथञ्चन।
बलवानेष पतगो राजा च विनतासुतः। दक्षिणे चैव सव्ये च पार्श्वे मम धृतायुधौ।
उभौ स्थितौ युध्यमानं मामेवेह प्रपश्यतां। एवमुक्तौ स्थितौ वीरौ ततः शक्रस्य पार्श्वयोः।
ददृशाते युध्यमानौ देवराजजनार्द्दनौ। अथेन्द्रो गरुडं वाणैर्म्महाशनिसमस्वनैः।
विव्याध सर्व्वगात्रेषु महास्त्रप्रभवैस्तदा। स तान् वाणांश्च गणयन् वैनतेयः प्रतापवान्। ७५४०
समाराभिमुखो वीरः शक्रनागमरिन्दमः। उभौ तौ सहसा राजन् बलिनौ गजपक्षिणौ।

प्रवृद्धौ वीर्य्यसम्पन्नौ महाप्राणौ दुरासदौ । रदनैः पन्नगरिपुं करेण शिरसा तथा ।
ऐरावणो गजपतिराजघान महांस्तथा । ततो नखाङ्कुशैस्तीक्ष्णैर्वैनतेयो बलोत्कटः ।
तथा पक्षनिपातैश्च शक्रनागमताडयत् । स मुहूर्त्तं महानासीत् संग्रामो गजपक्षिणोः ।
विस्मापनीयो जगतः प्रेक्षितॄणां भयावहः । मूर्द्ध्न्यथैरावणं तार्क्ष्यस्ताडयामास भारत । ७४४५
नखाङ्कुशकरालेन चरणेन महाबलः । संप्रहाराभिसन्तप्तः स पपात त्रिपिष्टपात् ।
पारियात्रे गिरिश्रेष्ठे द्वीपेऽस्मिन् जनमेजय । पतन्तमपि तं शक्रो न मुमोच महाबलः ।
कारुण्यादथ सौहार्द्दात् पूर्व्वाभ्युपगमादपि । कृष्णोऽप्यन्वागमच्चैनं पृष्ठतः प्रभवाव्ययः ।
पारिजातवता वीरो गरुडेन महाबलः । ससाद पर्व्वते तस्मिन् पारियात्रे तु वृत्रहा ।
ऐरावणे समाश्वस्ते संग्रामो ववृधे पुनः । शरैराशीविषप्रख्यैरस्त्रयुक्तैः सुतेजितैः । ७४५०
अन्योन्यं कुरुशार्दूल शक्रकेशवयोर्म्महान् । ततो वज्रायुधो वज्रमशनिञ्च पुनः पुनः ।
मुमोच गरुडे राजन्नैरावणरिपौ नृप । वज्राशनिनिपातांस्तान् सेहे शक्रस्य नागहा ।
अवध्यो बलिनां श्रेष्ठो निसर्गेण तपोबलात् । मुमोच पत्रमेकैकं मानयन्नशनिन्तदा ।
वज्रञ्च देवराजो वै भ्रातुः काश्यपसम्भवः । आक्रम्यमाणस्तार्क्ष्येण व्यमज्जन्नृपते गिरिः ।
विवेश धरणीं राजन् शीर्य्यमाणः समन्ततः । चक्राङ्ग चक्रनामेव कश्यपस्य स तु पर्व्वतः । ७४५५
तमद्राक्षीत्ततः कृष्णः किञ्चिच्छेषमधोक्षजः । तं मुक्त्वा गरुडेनाथ तत्रैव देवो विहायसि ।
प्रद्युम्नञ्च तदोवाच सर्व्वलोकैकभावनः । इतो द्वारवतीं गत्वा रथमानय मा चिरं ।
स दारुकं महाबाहो मत्तेजोबलमाश्रितः । वक्तव्यो बलभद्रश्च राजा च कुकुराधिपः ।
श्वो जित्वेन्द्रमागमिष्ये द्वारकामिति मानद । तथेत्युक्त्वा तु धर्म्मात्मा प्रद्युम्नः पितरं विभुः ।
गत्वा यथोक्तमुक्त्वा च यादवेन्द्रबलावुभौ । नाडिकान्तरमात्रेण पुनस्तं देशमाययौ । ७४६०
दारुकेण समायुक्तं रथमास्थाय भारत ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि पारिजातहरणे द्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥
॥ वैशम्पायन उवाच ॥ तमारुह्य रथं कृष्णः पारियात्रं गिरिं ययौ । यत्रैरावणमास्थाय स्थितः सुरपतिः प्रभुः ।
पारियात्रो गिरिश्रेष्ठो दृष्ट्वायान्तं जनार्द्दनं । शाणपादसमो भूत्वा प्रविवेश वसुन्धरां ।
प्रियार्थं वासुदेवस्य प्रभावज्ञो महात्मनः । तस्य प्रीतो हृषीकेशः पर्व्वतस्य जनाधिप ।
ततः प्रयान्तं युद्धार्थमच्युतं कुरुनन्दन । सपारिजातो गरुडः पृष्ठतोऽनुययौ बली । ७४६५
प्रद्युम्नः सात्यकिश्चापि गरुडस्थौ महाबलौ । गतावुभौ रक्षणार्थं पारिजातमरिन्दमौ ।
ततोऽस्तमगमत् सूर्य्यः प्रवृत्ता रजनी नृप । उपस्थितं पुनर्युद्धं शक्रकेशवयोः प्रभो ।
सुप्रहारहतं दृष्ट्वा विष्णुरैरावणं गजं । नातिकल्यं महातेजा देवराजानमब्रवीत् ।
गरुडाभिहतः पूर्व्वन्नातिकल्यो गजोत्तमः । ऐरावणो महाबाहो रात्रिश्च समुपोस्थिते ।
श्वः प्रभाते पुनः कामं प्रवर्त्तस्व यथेच्छसि । एवमस्त्विति कृष्णाश्च देवराजोऽब्रवीत् प्रभुः । ७४७०

उवास पुष्कराभ्याशे देवराजः पुरन्दरः । अजं गिरिमथं कृत्वा धर्म्मात्मा नृपसत्तम ।
ब्रह्मा तत्राजगामाथ कश्यपश्च महानृषिः । अदितिश्चैव सर्व्वे च देवा मुनय एव च ।
साध्या विश्वे च कौरव्य नासत्यावश्विनौ तथा । आदित्याश्चैव रुद्राश्च वसवश्च जनेश्वर ।
नारायणश्च पुत्त्रेण सत्यकेन च भारत । महोवास गिरौ रम्ये पारिपार्श्वे प्रहृष्टवत् ।
यः स शाणप्रमाणोऽस्य भक्त्या समभवन्नृप । वरं प्रादात्ततस्तस्य पर्व्वतस्य सतां गतिः । ७५२
शाणपाद इति ख्यातो भविष्यसि महागिरे । पुण्यनाम्नैव तुल्यश्च पुण्यो हिमवतः शुभः ।
एवमेव च भूमिष्ठो भव पर्व्वतसत्तम । मेरुणा स्पर्द्धमानो हि वसुचित्रमृगायुतः ।
तथा दत्त्वा वरं तस्य पर्व्वतस्य तु केशवः । दध्यौ गङ्गां सरिच्छ्रेष्ठां नमस्कृत्वा वृषध्वजं ।
अथाययौ विष्णुपदी स्मृता कृष्णेन भारत । संपूज्य तां ततः कृष्णः स्नातस्तस्यामधोक्षजः ।
उदकञ्च गृहीत्वैषो विल्वञ्च हरिरव्ययः । देवमावाहयामास रुद्रं सर्व्वेश्वरेश्वरं । ७५८
ततः प्राप्तो महादेवः सोमः स प्रवरो विभुः । तस्यावुपरि विल्वस्य तथा गङ्गोदकस्य च ।
तं पारिजातकुसुमैरर्च्चयामास केशवः । तुष्टाव वाग्भिरीशं सर्व्वकर्त्तारमीश्वरं ।

॥ श्रीकृष्ण उवाच ॥ रुद्रो देव त्वं रुदनाद्द्रावणाच्च रोरूयमाणो द्रावणाच्चातिदेवः । भक्तं भक्तानां वत्सलं वत्सलानां कोऽर्च्यो युङ्क्ते त्वाऽद्य प्रभवाम्यन्तरेण ।

ग्राम्यारण्यानां त्वं पतिस्त्वं पशूनां ख्यातो देवः पशुपतिः सर्व्वकर्त्ता । मान्यस्त्वत्तः परमो देवदेव जगत्पतिः सुरवीरारिहन्ता । यस्मादीशो महतामीश्वराणां भवानाद्यः प्रीतिदः प्राणदश्च । तस्मात्तु त्वामीश्वरं प्राकृतेशं सन्तो विदुः सर्व्वशास्त्रार्थतत्त्वज्ञाः । ७५९

भूतं यस्माज्जगदत्यन्तघोरं त्वत्तोऽव्यक्तादक्षरादक्षरेश । तस्मात्त्वामाहुर्भव इत्येव भूतं सर्व्वेश्वराणां महतामधीश्वरं । यस्माज्जितैरभिषिक्तोऽसि सर्व्वैर्द्देवासुरैः सर्व्वभूतैश्च देव । महेश्वरं विश्वकर्म्माणमाहुस्त्वां वै सर्व्वे तेन देवातिदेव । पूज्यो देवैः पूज्यसे नित्यदा वै श्रेयस्कामैः काङ्क्षिभिर्वरदामेयवीर्य्यः । तस्मादिख्यातो भगवान्देवदेवः सतां निष्ठः सर्व्वभूतात्मभावी ।

भूमित्रयाणां देव यस्मात् प्रतिष्ठा पुनर्लोकानां भावनोऽमेयकीर्त्तिः । त्र्यम्बकेति प्रथमं तेन नाम तवाप्रमेयस्त्रिदशेशनाथ । शर्व्वः शत्रूणां शासनादप्रमेयस्तथा भूयः शासनाच्चेश्वरेण । सर्व्वव्यापित्वाच्छङ्करत्वाच्च सद्भिः शब्दस्येशान् ओङ्काराकारतेजाः । ७६०

सम्भक्तानां नित्यदा यत् करोषि शर्म्मं ह्याद्व्यान् यद्यनेषोऽसमस्तान् । तस्मादेव शङ्करोऽस्यप्रमेयः सद्भिर्द्देवैः कथ्यसे सर्व्वनाथ । दत्तः प्रहारः कुलिशेन पूर्व्वं तवेशान सुरराजाऽतिवीर्य्य । कण्ठे नैल्यं तेन ते यत् प्रवृत्तं तस्मात्ख्यातस्त्वं नीलकण्ठेति कल्प्यः । यस्मिल्लिङ्गं देव लोके भगाङ्कं सर्व्वं सोमस्त्वं स्थावरं जङ्गमञ्च । प्राहुर्विप्रास्त्वां गुणिनं तत्त्वशास्त्रायाविश्येशामम्बिकां लोकधात्रीं । वेदैर्गीता सा हि तत्त्वं प्रसूता पत्नी दीक्षाणां योगिनां चातिरूपः । नात्यद्भुतं त्वत्समं देव भूतं भूतं भव्यं भवितायं नास्ति । अहं ब्रह्मा कपिलोऽथाप्यनन्तः पुत्त्राः सर्व्वे ब्रह्मणश्चातिवीराः । तत्तः सर्व्वे देवदेव प्रसूता एवं सर्व्वेशः कारणात्मा त्वमीड्यः । ७६१

इति संस्तूयमानस्तु भगवान् गोवृषध्वजः । प्रसार्य्य दक्षिणं हस्तं गोविन्दमिदमब्रवीत् ।
मनोषितानामर्थानां प्राप्तिस्तेऽस्तु सुरोत्तम । पारिजातञ्च हर्त्ताऽसि मा भूत्ते मनसो व्यथा ।
यदा मैनाकमाश्रित्य तपस्त्वमकरोः प्रभो । तदा दत्तं वरं कृष्ण संस्मृत्य स्थैर्य्यमाप्नुहि ।
अवध्यस्त्वमजेयश्च मत्तः शूरतरस्तथा । भविताऽसीत्यवोचं यत्तत्तथा न तदन्यथा ।
यः संस्तवेन मां कश्चित् स्तोष्यत्यमरसत्तम । त्वया कृतेन धर्म्मज्ञ धर्म्मभाक् स भविष्यति ।
समरे च जयं विष्णो प्राप्य पूजां तथोत्तमां । बिल्वोदकेश्वरो नाम भविताऽहमिहानघ ।
देशे त्वया स्थापितो वै देव सिद्धोपयाचनः । इहस्थोपोषितो विद्वान् भक्तिमान्मम केशव ।
त्रिरात्रमीप्सितान् लोकान् गमिष्यति जनार्द्दन । अविन्ध्या नाम देशेऽस्मिन् गङ्गा चैव भविष्यति ।
गङ्गास्नानसमं स्नानं मत्प्रतो भविता तथा । षट्पुरं नाम नगरं दानवानां जनार्द्दन ।
अत्रान्तर्द्धरणीदेशे तत्राक्रम्य महाबलाः । एते हिंस्रा दुरात्मानो जगतो देव कण्टकाः ।
कृत्स्ना वसन्ति गोविन्द मानवस्य महागिरेः । अवध्या देवदेवानां वरेण ब्रह्मणोऽनघ ।
मानुषान्तरितस्तस्मात्त्वमेतान्नहि केशव । एवमुक्त्वा महादेवस्तत्रैवान्तरधीयत ।
परिष्वज्य महात्मानं वासुदेवं जनाधिप । ततो याते महादेवे प्रभातायां नराधिप ।
तस्यां निशायां गोविन्दो भूयः पर्व्वतमब्रवीत् । तवाधः पर्व्वतश्रेष्ठ निवसन्ति महासुराः ।
ते निरुद्धा मया चात्र जगतो हितकाम्यया । निर्गमिष्यन्ति ते नैव मया रुद्धा महाबलाः ।
द्वारे निरुद्धे तत्रैव विनङ्क्ष्यन्ति ममाज्ञया । त्वयि सन्निहितश्चाहं भविष्यामि महागिरे ।
अधिष्ठाय महाघोरान्निवत्स्यामि च पर्व्वत । आरोक्ष्यत्यूर्द्ध्वगाङ्गश्च यस्त्वां पर्व्वतसत्तम ।
गोसहस्रप्रदानस्य फलं प्राप्स्यति शाश्वतं । त्वत्तोऽश्मभिश्च प्रतिमां कारयित्वेह भक्तितः ।
शुश्रूषिष्यन्ति ये नित्यं मम यास्यन्ति ते गतिं । इति तं पर्व्वतं कृष्णो वरदोऽनुगृहीतवान् ।
तदाप्रभृति देवेशस्तत्र सन्निहितोऽच्युतः । पाषाणैः प्रतिमां तत्र कारयित्वा च कौरव ।
शुश्रूषन्ति कृतात्मानो विष्णोर्नाकाभिकाङ्क्षिणः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि पारिजातहरणे त्रयस्त्रिंशदधिकशततोऽध्यायः ॥ १२३ ॥
॥ वैशम्पायन उवाच ॥ ततो रथवरं कृष्णः समारुह्य महामनाः । बिल्वोदकेश्वरं देवं नमस्कृत्य ययौ नृप ।
महेन्द्रमाह्वयामास रथस्थो मधुसूदनः । सत्कृतं पुष्कराभ्यासे सर्व्वदेवगणैः सह ।
ततः शक्रो जयन्तोऽथ हरिभिर्युक्तमुत्तमं । आरुरोह रथं देवः सर्व्वकामप्रदः सतां ।
तयोरथस्थयोर्युद्धमभवत् कुरुनन्दन । देवयोर्द्दैवयोगेन पारिजातकृते तदा ।
ततर्द्द तरसा विष्णुर्बाणैः शत्रुबलार्द्दनः । सैन्यानि देवराजस्य बाणजालैरजिह्मगैः ।
उपेन्द्रं न महेन्द्रोऽथ नैव विष्णुः सुरेश्वरं । ताडयामासतुर्व्वीरौ शस्त्रैः शक्तावपि प्रभो ।
एकैकमस्त्रं दग्भिर्म्महेन्द्रस्य जनार्द्दनः । विव्याध विशिखैस्तीक्ष्णैरस्त्रमुक्तैर्न्नेश्वर ।
सैन्यान्यपि च देवेन्द्रः शरैरमरसत्तमः । छादयामास राजेन्द्र घोरैरस्त्राभिमन्त्रितैः ।

वशी वाणसहस्रैश्च कृष्णो गजमवाकिरत्। गरुडश्च महातेजा बलभिद्दुरिवाहनः। ७१२५
भूमिष्ठाभ्यां रथाभ्यान्तौ तदा प्रचुदारणौ। युयुधाते महात्मानौ नारायणसुराधिपौ।
चकम्पे वसुधा कृत्स्ना नौर्जलस्थेव भारत। दिशां दाहेन दिग्देशाः संवृताश्च समन्ततः।
चेलुर्गिरिवराश्चैव पेतुश्च शतशो द्रुमाः। पेतुश्च धरणीपृष्ठे मर्त्या धर्मगुणान्विताः।
निर्घाताः शतशश्चैव पेतुस्तत्र नराधिप। ऊहुश्च सरितः सर्व्वाः प्रतिस्रोतो विशाम्पते।
विस्वग्वाता ववुश्चैव पेतुरुल्काश्च निष्प्रभाः। मुहुर्मुहुर्भूतगणा रथनादेन मोहिताः। ७१३०
प्रजज्वाल जले चैव वह्निर्जगदीश्वर। ययुधुश्च ग्रहैः सार्द्धं ग्रहा नभसि सर्व्वतः।
ज्योतींषि शतशः पेतुः स्वर्गाच्च धरणीतले। दिशां गजाः संक्षुभिता नागाश्च धरणीतले।
गर्दभारुणसंस्थानैश्छिन्नाभ्रैरावृतं नभः। विनदद्भिर्महारावैस्तत्र शोणितवर्षिभिः।
न भूर्न द्यौर्न गगनं नरेन्द्रस्तपमाभवत्। संख्यागे सुरवीरौ तु दृष्ट्वा यदुसुरगौ तदा।
जेपुर्मुनिगणा मन्त्रान् जगतो हितकाम्यया। ब्राह्मणाश्च महात्मानो व्यतिष्ठंस्तेषु सत्वराः। ७१३५
ततो ब्रह्मा महातेजाः कश्यपं वाक्यमब्रवीत्। गच्छ वध्वा महादित्या पुत्रौ वारय सुव्रत।
स तथेति तदा देवमुक्त्वा पद्मभवं मुनिः। जगाम रथमारुह्य तस्थौ नरवरान्तिके।
स्थितन्तु कश्यपं दृष्ट्वा सहादित्या तदाम्बरा। उभौ रथाभ्यां धरणीमवतीर्णौ महाबलौ।
न्यस्तशस्त्रौ तु तौ वीरौ ववन्दतुररिन्दमौ। पितरौ धर्म्मतत्त्वज्ञौ सर्व्वभूतहिते रतौ।
उभौ गृहाय हस्ताभ्यामदितिस्त्वब्रवीद्वचः। प्रसादः श्रावितेवं किमन्योन्यं हन्तुमिच्छथः। ७१४०
स्वल्पमर्थं पुरस्कृत्य प्रवृत्तमतिदारुणं। सदृशं नेति पश्यामि सर्व्वथा मम पुत्रयोः।
श्रोतव्यं यदि मातुश्च पितुश्चैव प्रजापतेः। न्यस्तशस्त्रौ स्थितौ भूत्वा कुरुतं वचनं मम।
तथेत्युक्त्वा तु तौ देवौ स्नातुकामौ महाबलौ। गङ्गां जग्मतुरेवाथ कथयन्तौ परस्परं।
॥ शक्र उवाच ॥ त्वं प्रभुः कृष्ण लोकस्य राज्येऽहं स्थापितस्त्वया। स्थापयित्वा कथं नाम पुनर्म्मामवमन्यसे।
भ्रातृत्वमुपगम्यैवं ज्येष्ठत्वं प्रतिपूज्य च। कथं कमलपत्राक्ष निर्व्वाणं कर्त्तुमर्हसि। ७१४५
स्नात्वा तु जाह्नवीतोये पुनरभ्यागतौ नृप। यत्रादितिः कश्यपश्च महात्मानौ दृढव्रतौ।
प्रियसङ्गमनं नाम तं देशं मुनयोऽवदन्। यत्र तौ सङ्गतौ चोभौ पितृभ्यां कमलेक्षणौ।
ततः शक्रस्य कौरव्य दत्त्वा वाचाऽभयं तदा। यत्र देवगणाः सर्व्वे समेता धर्म्मचारिणः।
ततो ययुर्विमानैस्तु देवाः सर्व्वे त्रिपिष्टपं। श्रद्धया परमया युक्तास्तेषामेवानुकम्पया।
कश्यपश्चादितिश्चैव तथा शक्रजनार्द्दनौ। विमानमेकमारुह्य गता राजंस्त्रिपिष्टपं। ७१५०
ते शक्रसदनं प्राप्ता रम्यं सर्व्वगुणान्वितं। ऊषुरेकत्र कौरव्य मुदिता धर्म्मचारिणः।
शची तु कश्यपं पत्न्या सहितं धर्म्मवत्सला। उपाचरन्महात्मानं सर्व्वभूतहिते रतं।
ततस्तस्यां प्रभातायां रजन्यामब्रवीद्धरिं। अदितिर्द्धर्म्मतत्त्वज्ञा सर्व्वभूतहितङ्करं।
उपेन्द्र द्वारकां गच्छ पारिजातं नयस्व च। वध्वाः संप्रापयस्वेमं पुण्यकं हृदयेप्सितं।

पुण्यके सत्यया प्राप्ते पुनरेव त्वया ततः । नन्दने पुरुषश्रेष्ठ स्थाप्यः स्थाने यथोचिते ।
एवमस्त्विति कृष्णेन देवमाता यशस्विनी । उक्ता धर्मगुणैर्युक्ता नारदेन महात्मना ।
ततोऽभिवाद्य पितरं मातरञ्च जनार्द्दनः । महेन्द्रं सह शच्या च प्रतस्थे द्वारकां प्रति ।
ददौ कृष्णाय पौलोमी नियोगात् कुरुनन्दन । सर्व्वासामेव कृष्णस्य भार्य्याणां धर्म्मचारिणी ।
दिव्यानां सर्व्वरत्नानां वाससाञ्च मनस्विनी । नानारागविचित्राणां सदैवाजरसामपि ।
भार्य्याणाञ्च सहस्राणि यानि षोडश माधवे । प्रतिगृह्य महातेजाः प्रययौ द्वारकां प्रति ।
संपूज्यमानो ह्यमरैः सुकर्म्मा पुण्यकर्म्मभिः । ससत्यकः सपुत्रश्च प्राप्तो रैवतकं गिरिं ।
स तत्र स्थापयित्वा तु पारिजातं वरद्रुमं । सत्यकं प्रेषयामास द्वारकां द्वारमालिनीं ।
॥ कृष्ण उवाच ॥ पारिजातमिहानीतं महेन्द्रभवनात्तथा । निवेदय महाबाहो भैमानां भैमवर्द्धन ।
अद्य द्वारवतीञ्चैव पारिजातं वरद्रुमं । प्रवेशयिष्ये नगरे शोभा प्रक्रियतां शुभा ।
इत्युक्तः सत्यको गत्वा तथोक्त्वा पुनरागतः । कुमारैरपरैः सार्द्धं शाम्बप्रभृतिभिः प्रभो ।
ततोऽग्रतः पारिजातमारोप्य गरुडे तदा । प्रद्युम्नो द्वारकां रम्यां विवेश रथिनाम्वरः ।
शैव्याद्यहययुक्तेन रथेनानुययौ हरिः । तस्यानु रथमुख्येन सत्यकः शाम्ब एव च ।
ये त्वन्ये नृप वार्ष्णेया यानैर्बहुविधैस्तथा । ययुः प्रहृष्टास्तत् कर्म्म पूजयन्तो महात्मनः ।
सत्यकाद्विस्तरं श्रुत्वा यादवा नागरास्तथा । विस्मयं परमं जग्मुरप्रमेयस्य कर्म्मणा ।
तं दिव्यकुसुमं वृक्षं दृष्ट्वा मर्त्यनिवासिनः । राजन्न तत्पुरीद्दृष्टाः पश्यमाना महोदयं ।
तदद्भुतमचिन्त्यञ्च सदकेलिकिलाण्डजं । वृक्षोत्तमं पश्यतां वै वृक्षाणामगमज्जरा ।
येऽन्धाः सचक्षुषः सर्व्वे सम्बभूवुः क्षणादिव । विरोगा रोगिणश्चासन् घ्रात्वा गन्धं वनस्पतेः ।
लपन्तः कोकिलाः श्वेताः श्रुत्वा मर्त्यनिवासिनः । बभूवुर्हृष्टमनसो ववन्दुश्च जनार्द्दनं ।
नानाविधानि वाद्यानि गेयानि मधुराणि च । शुश्रुवुस्तस्य वृक्षस्य नातिदूरगता नराः ।
योऽयं संकल्पयामास गन्धं हृद्यं नरस्तदा । स तमेव समाजघ्रौ पारिजातसमुद्भवं ।
ततः प्रविश्य रम्यान्तु द्वारकां यदुनन्दनः । वसुदेवं महात्मानं ददृशे देवकीन्तदा ।
कुकुराधिपतिञ्चैव बलं भ्रातरमेव च । वृद्धांश्च यादवानन्यान् मानार्हानमरोपमान् ।
विसृज्य तान् वै भगवाननादिनिधनोऽच्युतः । संपूज्य च यथान्यायं स्वमेव भवनं गतः ।
स सत्यभामया वासं विवेश मधुसूदनः । पारिजातं तरुश्रेष्ठं गृहाय गदपूर्व्वजः ।
सा देवी पूजयामास प्रहृष्टा वासवानुजं । प्रतिजग्राह तञ्चापि पारिजातं महाद्रुमं ।
मनीषितेन स तरुरूपो भवति भारत । महत्त्वाद्वासुदेवस्य तदद्भुतमभून्महत् ।
कदाचिद्द्वारकां सर्व्वां प्रच्छादयति भारत । कदाचिद्धस्तहार्य्यस्तु भवत्यङ्गुष्ठसन्निभः ।
ननन्द सत्या कौरव्य देवी प्राप्तमनोरथा । पुण्यकार्थञ्च सम्भारान् सम्यग्नुपचक्रमे ।
यानि द्रव्याणि कौरव्य जम्बुद्वीपे तु कानिचित् । योग्यानि तानि कृष्णेन संहृतानि महात्मना ।

मुनिं तदा संस्तुतवान् स नारदं जनार्द्दनः सर्व्वगुणोदितं वशी । प्रतिग्रहार्थं शतक्रतोः सत्यया यथोपदिष्टः स पुरन्दरानुजः ।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि पारिजातहरणे चतुस्त्रिंशदधिकशततोऽध्यायः ॥ १२४ ॥

॥ वैशम्पायन उवाच ॥ अथ कृष्णस्य कौरव्य ध्यातमात्रे तपोधनः । आजगाम मुनिश्रेष्ठो नारदो वदताम्वरः ।
तं पूजयित्वा विधिवद्वासुदेवो विशाम्पते । प्रतिग्रहार्थं विधिवच्छ्रीमानभ्यनिमन्त्रयत् ।
ततः काले च संप्राप्ते स्नातं देवो महामुनिं । संपूज्य माल्यैर्गन्धैश्च भोजयामास भारत ।
सार्व्वकामिकमन्नाद्यं सर्व्वभूतकृदव्ययः । सत्यया प्रियया सार्द्धं प्रहृष्टेनान्तरात्मना ।
पुष्पदामावसज्याय कण्ठे कृष्णस्य भाविनी । बबन्ध कृष्णं सुभगा पारिजाते वनस्पतौ ।
अद्भिर्द्ददौ नारदाय ततोऽनुज्ञाप्य केशवं । देवी धेनुसहस्रञ्च काञ्चनस्य च पर्व्वतं ।
हिरण्यरूप्यमिश्रञ्च मणिरत्नयुतस्य च । तिलमिश्रस्य च तथा धान्यैरन्यैर्युतस्य च ।
प्रतिगृह्य तु तत् सर्व्वं नारदो मुनिसत्तमः । प्रहृष्टो वदतां श्रेष्ठो मुक्त्वा केशवमब्रवीत् ।
भोः केशव मदीयस्त्वमद्भिर्द्दत्तोऽसि सत्यया । स त्वं मामनुगच्छस्व कुरुष्व यद्ब्रवीम्यहं ।
प्रयमः कल्प इत्येवमब्रवीन्मधुसूदनः । प्रजन्तमनुवव्राज नारदञ्च जनार्द्दनः ।
परिहासान् बहुविधान् कृत्वा मुनिवरस्ततः । तिष्ठस्व गच्छामीत्युक्त्वा परिहासविचक्षणः ।
अपनीय ततः कण्ठात् पुष्पदामैनमब्रवीत् । कपिलां गां सवत्सां भो निष्क्रयार्थं प्रयच्छ मे ।
तिलकृष्णाजिनं सूर्पं प्रयच्छ त्वञ्च काञ्चनं । एषोऽत्र निष्क्रयः कृष्ण विहितो वृषकेतुना ।
तथेत्युक्त्वा हृषीकेशस्तथा चक्रे जनाधिप । उवाच तं मुनिश्रेष्ठं हसित्वा मधुसूदनः ।
वरं वरय धर्म्मज्ञ यस्ते नारद काङ्क्षितः । तव दाताऽस्मि धर्म्मज्ञ परा प्रीतिर्हि मे त्वयि ।
॥ नारद उवाच ॥ नित्यमेवास्तु मे प्रीतो भवान् विष्णो सनातन । त्वत्प्रभावात्तु सालोक्यं व्रजेयं ते महामते ।
श्रेयोनिजो भवेयञ्च नारायण सताङ्गते । भवेयं ब्राह्मणश्चैव देव जात्यन्तरेष्वहं ।
एवमस्त्विति तं देवो विष्णुः प्रोवाच भारत । तुतोष च ततो धीमान्नारदो मुनिसत्तमः ।
षोडशस्त्रीसहस्राणि विष्णोरतुलतेजसः । निमन्त्रितानि कौरव्य सत्यया हरिकान्तया ।
तासां ददौ सन्नियोगमेकैकं हरिवल्लभा । शय्या यो वासुदेवस्य पुरा दत्तो नराधिप ।
पारिजातो वसंस्तत्र ततः प्रवृत्ते तदा । आज्ञया वासुदेवस्य नारदेन महात्मना ।
निमन्त्रिता गणाः सर्व्वे केशवेन महात्मना । विभूतिं पारिजातस्य ददृशुः कुरुनन्दन ।
पाण्डवांश्चानयामास सहैव पृथया हरिः । द्रौपद्या च महातेजास्तथैव च सुभद्रया
श्रुतश्रवाञ्च ससुतां भीष्मकं ससुतं तथा । अन्यानपि च कौरव्य मित्रसम्बन्धिबान्धवान् ।
रेमे च सह पार्थेन फाल्गुनेन जनार्द्दनः । सान्तःपुरो महातेजाः परमर्द्ध्या वसन्नृप ।
संवत्सरे ततो याते केशिहाऽमरसन्निभः । पारिजातं पुनः स्वर्गमनयत्सर्व्वभावनः ।
तत्रादितिं कश्यपञ्च दृष्ट्वा स्वपितरौ प्रभुः । शक्रेण सहितो धीमानप्रमेयपराक्रमः ।

तमुवाचादितिर्माता प्रणतं मधुसूदनं । सौभ्रात्रमेव वां नित्यं भवत्वमरसत्तम ।
मनोरथं ममैवं त्वं पूरयस्व जनार्द्दन । तथाऽस्त्वित्यब्रवीत्कृष्णस्ततो मातरमात्मवान् ।
आमन्त्रयित्वा पितरौ देवराजानमब्रवीत् । वासुदेवो महातेजाः कालप्राप्तमिदं वचः ।
महादेवेन देवेश सन्दिष्टोऽस्मि महात्मना । अन्तर्भूमितले ऽवध्यानसुरान् प्रति मानद ।
तदितो दशरात्रेण हन्ताऽहमसुरोत्तमान् । तत्रोपरिष्टात् ख्यातश्च प्रवरेण महात्मना ।
जयन्तेन च वीरेण दानवानां जिघांसया । एकोऽत्र मानुषो देवो देवपुत्रस्तथाऽपरः ।
अवध्याः किल देवैस्ते ब्रह्मणो वरदर्पिताः । अस्माभिः किल हन्तव्या मानुषत्वमुपागतैः ।
तथेति कृष्णं स हरिः प्रीतरूपस्तदाऽब्रवीत् । सत्कृतोऽथ तौ देवावन्योन्यं जनमेजय ।
ददौ किरीटं कृष्णाय शक्रोऽमृतसमुद्भवं । प्रीतात्मा कुरुशार्दूल कुण्डलद्वयमेव च ।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि पारिजातहरणे पञ्चविंशदधिकशततोऽध्यायः ॥ १२५ ॥

॥ जनमेजय उवाच ॥ पुण्यकानां समोत्पत्तिं कथयस्व तपोधन । द्वैपायनप्रसादेन सर्व्वं हि विदितं तव ।
॥ वैशम्पायन उवाच ॥ उमया पुण्यकविधिर्नरेन्द्रोत्पादितः पुरा । शृणु येन विधानेन लोके धर्म्मभृताम्वर ।
स्वर्गान्नीते पारिजाते कृष्णेनाक्लिष्टकर्म्मणा । यथा द्वारवतीं धीमान्नारदो मुनिसत्तमः ।
देवासुरे नृपश्रेष्ठ संग्रामे समुपस्थिते । षट्पुरस्य वधे घोरे महादेवाज्ञयाऽनघ ।
कृष्णेन सहितं विप्रं नारदं धर्म्मवित्तमं । आसीनं परिपप्रच्छ रुक्मिणी भैष्मकी नृप ।
ततो जाम्बवती देवी सत्यभामा च भाविनी । गान्धारराजपुत्री च योगयुक्ता नराधिप ।
देव्यस्तु नृप कृष्णस्य वक्तुं शऽन्या वै समागताः । कुलशीलगुणोपेता धर्म्मशीलाः पतिव्रताः ।
॥ रुक्मिण्युवाच ॥ मुने धर्म्मभृतां श्रेष्ठ सर्व्वज्ञ वदताम्वर । उत्पत्तिं पुण्यकानां त्वं वक्तुमर्हसि सुव्रत ।
विधिञ्च फलयोगञ्च दानं कालं तथैव च । कौतूहलं नः परमं तच्छिन्धि द्विपदाम्वर ।
॥ नारद उवाच ॥ शृणु वैदर्भि धर्म्मज्ञे सपत्नीभिः सहानघे । पुण्यकानां विधिः प्रोक्तो यथा देवि पुरा मया ।
चचारोमा व्रतं देवी पुण्यकार्थं शुचिव्रता । व्रतावसानेऽथ तया सख्यो देवि निमन्त्रिताः ।
अदित्याद्याः सुताः सर्व्वा दक्षस्याक्लिष्टकर्म्मणः । पौलोमी च शची देवी ख्याता लोके पतिव्रता ।
रोहिणी च महाभागा सोमस्य दयिता सती । फाल्गुनी च तथा पूर्व्वा रेवती च विशाम्पते ।
तथा शतभिषा चैव मघा च कुरुनन्दन । एताभिश्चि महादेवी पूर्व्वमाराधिता सति ।
गङ्गा सरस्वती चैव वेलगङ्गा च निम्नगा । तथा वैतरणी चैव गण्डकी चैव भारत ।
अन्याश्च सरितो रम्या लोपामुद्रा च भारत । सत्यश्चान्याः जगद्देवि धारयन्ति हि ताः शुभाः ।
शुभाश्च गिरिनन्दिन्यो वह्निकन्याश्च सुव्रताः । स्वाहा चाग्निप्रिया देवी सावित्री च यशस्विनी ।
ऋद्धिः कुवेरकान्ता च जलेशमहिषी तथा । भार्य्या पितृपतेश्चैव वसुपत्न्यस्तथैव च ।
श्रीर्ह्रीर्धृतिस्तथा कीर्त्तिराशा मेधा च सुव्रता । प्रीतिर्म्मतिश्च ख्यातिश्च सन्नतिश्च तपोधनाः ।
देव्यः सत्यस्तथैवान्याः सर्व्वभूतहिते रताः । तासां व्रतावसाने च पूजाश्चक्रेऽम्बिका तथा ।

तिलरत्नमयं दत्त्वा पर्व्वतं सर्व्वधान्यवत् । वासोभिर्व्वहुभिर्मुख्यैर्नानारागैः सुमध्यमे ।
प्रतिगृह्य च तां पूजां दत्तां देव्या तपोधनाः । उपविष्टाः कथाश्चित्राः कुर्व्वत्यो भर्तृदैवते ।
पुण्यकार्थं कथास्तासामासन् देवी प्रशंस याः । विविधा पुण्यकस्याथ सतीनां भर्तृदैवते ।
तासां मनेन साध्वीनां सर्व्वासां शैलनन्दिनी । पर्य्यपृच्छदुमां देवीं पुण्यकानां विधिम्बरं ।
उमा तासां प्रियार्थन्तु पुण्यकान्यब्रवीत्तदा । समस्तं मम वैदर्भि सर्व्वभूतहिते रता ।
ममैव चामया दत्तः स तदा रत्नपर्व्वतः । प्रतिगृह्य मया चैव कृतो ब्राह्मणसात् शुभे ।
उमा त्वरुन्धतीं साध्वीमामन्त्र्येदमभाषत । शृणु कल्याणि वक्ष्यामि सर्व्वाभिः सहिता शुभे ।
पुण्यकानां विधिं कृत्स्नं यथावदनुपूर्व्वशः । यथा देवि मया दृष्टः पुरा ह्येष विधिः शुभे ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि पारिजातहरणे पुण्यकविधौ षट्‌त्रिंशदधिकशततोऽध्यायः ॥ १२६ ॥
॥ उमोवाच ॥ सर्व्वज्ञाहं यदा भर्त्तुः प्रसादेन शुचिस्मिते । तदा पुरा मया दृष्टः पुण्यकानां विधिः शुभः ।
सनातनः पुण्यविधिरिति बुध्याऽवगम्यतां । महादेवप्रसादेन मया दृष्टस्त्वरुन्धति ।
पुण्यकानि च सर्व्वाणि चीर्णवत्यस्म्यनिन्दिते । अनुज्ञया भगवतो भर्त्तुः सर्व्वस्य धीमतः ।
सतीत्वं धर्मचरणं यस्या नित्यमखण्डितं । पुण्यकानां विधिस्तस्याः पुराणे परिकीर्त्तितः ।
दानोपवासपुण्यानि सुकृतान्यप्यरुन्धति । निष्फलान्यसतीनान्तु पुण्यकानि तथा शुभे ।
या वञ्चयन्ति भर्त्तारं योनिदुष्टा ह्यसत्स्त्रियः । न तु तासां पुण्यफलमस्ति ता निरयङ्गमाः ।
साध्व्यो जगद्धारयन्ति सुशीलाः पतिदेवताः । अनन्या धर्मनित्याश्च सतां पन्थानमाश्रिताः ।
अवाग्दुष्टाः शौचयुक्ता धृतिमत्यः शुभव्रताः । सततं साधुवादिन्यो धारयन्ति जगत् खलु ।
व्याधितः पतितो वाऽपि दीनो वाऽपि कथञ्चन । न त्यक्तव्यः स्त्रिया भर्त्ता धर्म्म एष सनातनः ।
अकार्य्यकारिणं वाऽपि पतितं वाऽपि निर्गुणं । स्त्री पतिन्तारयत्येव यथात्मानं शुभानने ।
योनिदुष्टे स्त्रिया नास्ति प्रायश्चित्तं हतैव सा । वाग्दुष्टे विहितं सद्भिः प्रायश्चित्तं पुरातने ।
भर्त्तुश्छन्देन कर्त्तव्यं व्रतकं सर्व्वदा स्त्रिया । उपवासोऽपि वा धन्ये कान्तया सुकृताकृतिं ।
कल्पान्तरसहस्रेषु न स्त्री सा लभते गतिं । तिर्य्यग्योनिसहस्रेषु पच्यते योनिविप्लवात् ।
यदि सा नाम मानुष्यं स्त्री लभेदसती सती । चाण्डालयोनौ दुर्गन्धा जायते कुक्कुराशना ।
भर्त्ता देवः सदा स्त्रीणां सद्भिर्दृष्टस्तपोधने । यस्या हि तुष्यते भर्त्ता सा सती धर्मचारिणी ।
कौतूहलसहस्राणान्तु स्त्रीणां लोको न शोभनः । भर्त्तर्य्येव मनो यासां सद्भावेन व्यवस्थितं ।
कर्म्मणा मनसा वाचा पतिं नातिचरन्ति याः । तासां पुण्यफलं सौम्ये पुण्यकैः समुदाहृतं ।
पुण्यकानां विधिं कृत्स्नमतः प्रभृति शोभने । निबोध सह सर्व्वाभिर्दृष्टो यस्तपसा मया ।
स्नात्वा स्त्री प्रातरुत्थाय पतिं विज्ञापयेत् सती । उपवासार्थमथ वा व्रतकार्यं धृतव्रते ।
श्वशुराभ्यां च चरणौ सततं वन्दनस्य च । प्रहार्यौ कुम्भरं पाचं सकुशं साचतं तथा ।
गोशृङ्गं दक्षिणं सिच्य प्रतिमूर्ध्नि तज्जलं । ततो भर्त्तुः सती दद्यात् स्नातस्य प्रयतस्य च ।

आप्लाव्योऽपि निषेक्तव्यं ततः शिरसि तज्जलं । त्रैलोक्ये सर्व्वतीर्थेषु स्नानमेतदुदाहृतं ।
उपवासेषु कर्त्तव्यमेतद्धि व्रतकेषु च । स्नानमेतद्धि सामान्यं स्त्रीणां पुंसाञ्च भामिनि ।
अरुन्धति मया दृष्टं तपसा हरतेजसा । अशल्यविद्धं शयनमासनञ्च तथाविधं ।
स्वयं प्रक्षालनञ्चापि पादयोरनुशब्दितं । अश्रुप्रपातो रोषश्च कलहश्च कृतः सति ।
उपवासाद्व्रताच्चापि सद्यो भ्रंशयति स्त्रियः । शुक्लमेव सदा वासः प्रशस्तञ्चन्द्रसम्भवे । ७०७५
अन्तरङ्गारकञ्चैव उपवासे व्रते तथा । पादुकार्थं तृणैः कार्य्यं सर्व्वदा व्रतके सति ।
उपवासेऽपि च विधिरेष एव प्रकीर्त्तितः । प्रसादनञ्चाञ्जनञ्च गन्धान् सुमनसस्तथा ।
व्रतके चोपवासे च नित्यमेव विवर्ज्जयेत् । दन्तकाष्ठं शिरःस्नानमुद्वर्त्तनमथापि च ।
विवर्ज्जितं सदा सर्व्वं शौचार्थन्तु विधीयते । विल्वामलकफलैः शुद्धैः स्नानञ्चैव समाचरेत् ।
प्रक्षालनं वै शिरसः सदा मृण्मिश्रितैर्जलैः । शिरसोऽभ्यञ्जनं भामिनि नैव तावत् प्रशस्यते । ७०८०
पादयोर्न च गात्रस्य स्नेहेनेति स्थितिः स्मृता । गोयानमुष्ट्रयानञ्च खरयानञ्च वर्ज्जयेत् ।
नग्नस्नानञ्च सततं न व्रते ह्युपवासके । नदीजलेन स्नानञ्च प्रशस्तं सोमनन्दिनि ।
शुभे तडागवाप्यादौ विस्तीर्णे जलसंयुते । गत्वा स्नानं प्रशस्तन्तु सदैव खलु सर्व्वथा ।
अलाभे त्ववरुद्धा स्त्री घटस्नानं समाचरेत् । नवैश्च कुम्भैः स्नातव्यं विधिरेष सनातनः ।
स्नानन्तु शिरसो दृष्टं मया दृष्टं तपोबलात् । ७०८५

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि पारिजातहरणे पुण्यकविधौ सप्तत्रिंशदधिकशततोऽध्यायः ॥ १३७ ॥

॥ उमोवाच ॥ विधिनैतेन कृत्स्नेन स्त्री सदा भर्तृदेवता । चरेत् संवत्सरं दान्ता षण्मासान्मासमेव वा ।
स्त्रियो ह्यावाहयेत् साध्वीरेकादश समाधिना । स्वयञ्चैव विधिर्दृष्टो व्रतकानां मया शुभः ।
अस्त्रिहद्यात् सतीः सर्व्वा या मूलव्रतिनी भवेत् । तासान्तु निष्क्रयो देयः कालदेशानुरूपतः ।
ततो मासान्तशुक्लस्य तिथौ च नवमी तथा । आराधयित्वा कर्त्तव्य व्रतकस्यापि वर्ज्जनं ।
उपवासमहोरात्रं त्रिरात्रञ्चापि निश्चिता । आदौ चान्ते च कुर्व्वीत व्रतकस्य सुसिद्धये । ७०९०
क्षुरकर्म ततो भर्त्तुरात्मनश्चैव कारयेत् । उत्सादनञ्च वपनं तस्मिन्नहनि संस्मृतं ।
ततो विवाहवत् स्नानं विहितं पुण्यके शुभे । मण्डनञ्चैव विहितं माल्यधारणमेव च ।
कुम्भैश्च स्नाप्यमानेमं साध्वी मन्त्रमुदीरयेत् । भर्त्तृपादौ नमस्कृत्य मनसा वाऽथ वा गिरा ।
आपो देव्य ऋषीणां विश्वधात्र्यो दिव्या मदन्त्यो याः शङ्करा धर्म्मराज्यः । हिरण्यवर्णाः पावकाः शिवतमेन रसेन श्रेयसे
मां जुषन्तु ।
अपामेष स्मृतो मन्त्रः सर्व्वत्रान्यञ्च मे शृणु । मन्त्राः पुराणविहिताः स्त्रीणां सर्व्वाङ्गशोभने । ७०९५
शुभा ऽव्यया गुणिनी युक्तधर्म्मा भर्त्रा साकं कामदा स्यां वरेण्या । मा कर्म्मणा मनसा वाऽपि वाचा भर्त्तुर्भवेयं द्रुहती स्याञ्च
वशगा ।
सपत्नीनामधि नित्यं भवेयं सुपुत्रा स्यां सुभगा चारुरूपा । सम्यग्वृत्ता गुणवादिनी च सर्व्वात्मना स्यामदरिद्रा भवेयं ।

पतिश्च मे स्यात् सुमुखो मत्प्रतीचो नित्यं मद्भक्तः स्यान्मन्मतिर्मद्गतिश्च । प्रीतिश्च नौ स्याच्चक्रवाकानुरूपा मनो विरागो न
भवेत् साधुत्‌ च स्यात् ।

लोकान् साध्वीनामुत्तमानां व्रजेयं याभिः सर्व्वं धार्य्यते विश्वरूपं । उभे कुले याः शुभाः पावयन्ति पितुर्भर्त्तुश्च पतिभक्त्यै
धिताः स्म ।

भूमिर्वायुर्ज्जलमाकाशमग्निरन्तः क्षेत्रज्ञः प्रकृतिर्यो महांश्च । अहङ्कारश्च मम साक्ष्ये नियुक्ताः स्मरेयुर्मे मुनयो निश्चय
व्रतञ्च । ७८००

येरारब्धो देहिनां भौतिकोऽयं विधिः सत्त्वाद्यैर्भूतयुक्तैः सबीजैः । सन्त्वेते मे साक्षिणः सर्व्वसंस्था व्रते चास्मिन्निश्चये चापि
वृत्ते ।

चन्द्रादित्यौ पुण्यसाक्षी यमश्च दिशः सर्व्वा दश चात्मा च मेयं । सन्त्वेते वै साक्षिणः सर्व्व एव व्रते चास्मिन्निश्चये चापि
वृत्ते ।

मन्त्रैरेतैः पुराणोक्तैः सर्व्वद्रव्याभिमन्त्रणं । व्रतचर्य्याप्रभृति वै पुराणे समुदाहृतं ।
स्नात्वाऽथ वाससी दद्यात् भर्त्तुः कर्त्ता स्वयं शुभे । अथात्मकर्त्तितं न स्याच्छुभे शिल्पेन केनचित् ।
वासोऽन्यदेव दद्याच्च श्वेतं मुख्यं नवं शुचि । स्वकर्त्तितं सूत्रतन्तु वाससा तेन मिश्रयेत् । ७८०५
ततो द्विजं शुचिं दान्तं ज्ञानविज्ञानकोविदं । भोजयेच्च यथाशक्त्या सह भर्त्रा सुमध्यमे ।
ब्राह्मणस्यापि दातव्यं वासोयुग्मं महात्मने । शय्या यानं गृहं धान्यं दासी दासस्तथैव च ।
अलङ्कारः शक्तितश्च रत्नपर्व्वत एव च । सर्व्वधान्यैः समुन्मिश्रस्तिलैश्च सविशेषतः ।
वासोभिश्च प्रतिच्छन्नो नानावर्णैरलङ्कृतिः । हस्त्यश्वावचयश्चैव देया गौरेव वा ध्रुवं ।
लवणप्रतिमां दद्यान्नवनीतस्य चापरां । गुडस्य मधुनश्चैव सुवर्णस्य च शोभनां । ७८१०
तथैव सर्व्वगन्धानां रसानां पृथगेव च । तथा सुमनसां दद्याद्‌दृषस्योडुम्बरस्य च ।
फलानाञ्चैव सर्व्वेषां वाससामपि नन्दिनि । चित्रप्रतिकृतिश्चैव काष्ठस्य प्रतिमास्तथा ।
शिलाप्रतिकृतिश्चैव दध्नोऽथ पयसस्तथा । सर्पिषा दूर्व्वया चैव याश्चान्यामप्यरोपति ।
कालदेशानुरूपञ्च देयं विभवतः सति । अल्पं वा बहुलं वाऽपि भर्त्तुश्छन्देन सर्व्वदा ।
तिलपात्रं प्रदातव्यं न देयं स तु शोभने । गौस्त्ववश्यं प्रदातव्या कपिला कांस्यमेव च । ७८१५
कृष्णाजिनञ्च सुभगे सतिलं वाससाऽन्वितं । आदर्शश्चैव कूर्च्चश्च तथाऽजिनमनिन्दिते ।
एतद्दत्त्वा सर्व्वकामानाप्नोति वरवर्णिनि । पुरोधिका पुत्रवती सुभगा रूपभागिनी ।
मृष्टहस्ता धनाढ्या च स्त्री भवत्यमलेक्षणा । इच्छया लभते चैव कन्या रूपगुणान्विताः ।
भवन्ति सुभगाश्चाढ्यास्तथैव च पुरोधिकाः । पुत्रवत्यो धनाढ्याश्च शीलवत्यश्च नित्यशः ।
अरुन्धतिकृतं दान्ते मयैतत् प्रथमं व्रतं । उमाव्रतिकमित्येवं ख्यातं साम्प्रतिकं खलु । ७८२०
एतदेवोत्तमं स्त्रीणां व्रतं तस्मात् समाचरेत् । सर्व्वकामानवाप्नोति स्त्री दत्त्वैतदनिन्दिते ।
एतद्व्रतकराव्ये च देवदेवो वृषध्वजः । पुराऽभिषिषिचे सौम्ये प्रियार्थं मम सर्व्वशः ।

व्रतकस्यावसाने तु देयं भोज्यञ्च नित्यदा। स्त्रीणां प्रदेयाः कामाश्च यदृच्छाः कालदेशयोः।
एकैकस्य प्रदातव्यं व्रतकं वरवर्णिनि। इत्युक्ता ब्राह्मणानान्तु देयमन्नं सदक्षिणं।
पायसं तत्र दातव्यं व्रतके नान्यदिष्यते। नात्र प्राणिवधः कार्य्यः पुराणे नियता श्रुतिः। ७८२५
अथ द्वितीयं वक्ष्यामि व्रतकं सोमसम्भवे। महादेवप्रसादेन दृष्टवत्यस्मि यच्छुभे।
सर्व्वाः पुत्त्रफला नार्य्यः सद्भिरेतदुदाहृतं। तस्माद्दर्भिष्मती दद्यात् सपुत्त्रकरकान् शुभे।
ज्येष्ठाषाढौ शुभौ मासौ पुरोक्तं विधिमाचरेत्। अथवा ज्येष्ठमेवैकमाषाढं वा समाचरेत्।
ततो मासद्वये पूर्णे मासे वा वरवर्णिनि। सपुत्त्रकरकान्दद्यात् फाणितप्रतिपूरितान्।
सर्पिषः पयसश्चैव दध्नोऽथ मधुनोऽनघे। जलस्य च तथा दद्यात् पूरयित्वा सुमध्यमे। ७८३०
एकस्मै ब्राह्मवृद्धाय सुव्रताय जितात्मने। सपुत्त्रकरकान्दद्यात् यावन्तो मनसः प्रियाः।
इच्छेद्दुहितरं चेद्धि स्त्रीणां कामकरं ततः। किञ्चिद्द्रव्यं सुताकामा सुतां प्राप्नोत्यसंशयं।
गौर्व्वाऽथ काञ्चनं वाऽपि दक्षिणार्थं प्रशस्यते। विप्रस्याच्छादनं देयमत्रापत्यञ्च शुचिस्मिते।
यज्ञोपवीतं व्रतके दद्यान्नारी शुचिव्रता। सपुत्त्रकरकाणान्तु विधिनैवं विपश्चिता।
अपत्याख्यानयोगेन ब्राह्मणेभ्यः शुचिव्रता। संवत्सरं सुपूर्णञ्च व्रतधर्म्मानुपालिनी। ७८३५
करकामपि दद्याच्च पूर्णे संवत्सरे शुभे। अनुज्ञया सदा भर्त्तुः सत्यवादिन्यरुन्धति।
सुवर्णसूत्रं विप्राय कौमुद्यां दातुमर्हति। यज्ञोपवीतं विप्रस्य व्रतकं सार्व्वकामिकं।
यज्ञोपवीतं कनकं दक्षिणाञ्चापि शक्तितः। प्रयच्छती सती स्त्री हि सर्व्वान् कामान् समश्नुते।
नवं न भक्षयेत् किञ्चिन्नारी धान्यमयी फलं। पुष्पं वा नोपभुञ्जीत यावदेवं समाचरेत्।
एकभक्तेन धर्म्मज्ञे पुण्यकं कर्त्तुमर्हति। ब्राह्मणाय ततो देयं भर्त्तुश्च तदनन्तरं। ७८४०
एवं संवत्सरं कृत्वा सुभगा रूपशालिनी। भवत्यविधवा चैव स्त्री धनाढ्या तथैव च।
वार्त्ताकानि न खादेद्या स्त्री पूर्णं परिवत्सरं। न सा पुत्त्रविनाशं हि पश्यतीत्यवगम्यतां।
शाशकं मृगमांसञ्च नित्यमेव विवर्ज्जयेत्। नाप्नोति मरणं नारी चाप्नोति पतिदेवतां।
अलावूं वर्ज्जयेन्नारी तथैवोत्पादिकामपि। कलम्बीं काञ्चनं नाद्याद्या भर्त्तुः सुखमिच्छति।
पूर्णे संवत्सरे दद्यादेकैकं शाकमादितः। सुदक्षिणा पुत्त्रवती भवत्यपि पुरोधिका। ७८४५
स्वयं प्रक्षालयाना स्त्री स्वपादावेवमादितः। प्रतिष्ठां लभते नित्यमुद्वेगरहिता सती।
दिवा सूर्य्यस्य मार्गेण वर्त्तयेत् स्त्री पतिव्रता। एवं संवत्सरं पूर्णं रात्रावन्नं विवर्ज्जयेत्।
सा जीवपुत्त्रा सुभगा भवत्यमरवर्णिनी। अधितिष्ठति सर्व्वासु सपत्नीनात्र संशयः।
पूर्णे संवत्सरे दद्यात् सौवर्णं सूर्य्यमुत्तमं। ब्राह्मणायाभिरूपाय दरिद्राय यशस्विने।
फलानि चाथ पुष्पाणि भक्ष्याण्यपि च सुव्रता। दद्यादनस्तमितके चरितव्रतका तथा। ७८५०
अथ वाऽस्तंगते सूर्य्ये भुङ्क्ते स्त्री नियता सती। चन्द्रनक्षत्रपूतानि भोज्यानि वरवर्णिनि।
सा दद्यात् काञ्चनञ्चन्द्रं नक्षत्राणि ग्रहानपि। अभिरूपाय विप्राय वासश्च लवणान्वितं।

चन्द्रशीतलगात्री सा भवत्यमरवर्णिनी। सुभगा दर्शनीया च पुत्त्रवत्यपि भाविनी।
पौर्णमास्यान्तु सततं प्राप्ते सोमोदयेऽङ्गना। अर्घ्यं दद्यात् सुमनसां साक्षतं सकुशं तथा।
यावकञ्च बलिं कुर्य्याद्दधिना चाज्य संयुतं। एवं या कुरुते नित्यं सर्व्वान् कामानवाप्नुयात्। ७८५५
अदृष्ट्वा या तु नाश्नाति सूर्य्यं नारी पतिव्रता। दुर्द्दिने वाऽथ वा व्यभ्रे सेष्टान् कामानवाप्नुते।
काञ्चनं शक्तितो दद्यात् सा विप्राय मनस्विनी। सुभगा दर्शनीया च भवत्यमरवर्णिनी।
इति श्रीमहाभारते खिलेषु हरिवंशे पारिजातहरणे पुण्यकविधौ अष्टाविंशदधिकशततोऽध्यायः॥ १२८ ॥
॥ भगवत्युवाच ॥ निर्व्विष्टव्यं शरीरं यैर्व्रतकैः पुण्यकैरपि। अरुन्धति प्रवक्ष्यामि सहैताभिर्व्वरे शृणु।
कृष्णाष्टमीं या क्षपति स्याद्वा मूलफलाशना। ब्राह्मणायैकमशनं सा दत्त्वा भर्तृदेवता।
शुक्लवस्त्रा शुभाचारा गुरुदैवतपूजिका। एवं संवत्सरं कृत्वा ततो दद्याद्द्विजातये। ७८६०
गोवालरज्जुसंकृतं चामरञ्च ध्वजं तथा। दक्षिणापूर्व्वमिष्टाश्च शक्त्या वाऽपि शुचिस्मिते।
ऊर्म्मिमन्तः खरालायाः श्रोणिदेशावलम्बिनः। तस्या भवन्ति केशास्तु भक्तिमत्या हि भर्त्तरि।
शिरो निर्व्विष्टुकामा तु गोमयेन शिरः सती। प्रक्षालयेन्मलं कृत्वा पयसा श्रीफलेन च।
गोमूत्रञ्च सदा प्राश्य शिरःस्नानञ्च निश्रयेत्। कृष्णां चतुर्द्दशीमेतत् कर्त्तव्यं वरवर्णिनि।
भवत्यविधवा चैव सुभगा विज्वरा तथा। शिरोरोगैश्च नैवास्याः शरीरमभितप्यते। ७८६५
दर्शनीयं ललाटं या स्त्री काङ्क्षति शुचिस्मिते। तिथिं प्रतिपदं नित्यं सा क्षपेदेकभोजना।
पयसा च तथाऽश्नीयाद्यावत् संवत्सरो गतः। ब्राह्मणाय तथा दद्यात् पट्टं रूप्यमयं शुभं।
ललाटं रूपसम्पन्नं तेनाप्नोत्यङ्गना सती। द्वितीयां स्त्री सदा सौम्ये भ्रुवोरिच्छेत् सुरूपतां।
अनन्तरोपवासेन शाकभक्ताशना सती। ततः संवत्सरे पूर्णे ब्राह्मणान् स्वस्ति वाचयेत्।
फलैः परिणतैः सौम्ये माषाणां दक्षिणान्वितैः। लवणेन च भद्रन्ते घृतमात्रेण चानघे। ७८७०
भ्रुवौ विधाय सा दद्यान्मृगनाभिमये शुभे। श्रवणौ रूपसम्पन्नाविच्छन्ती स्त्री सुमध्यमे।
नक्षत्रे श्रवणे प्राप्ते ध्रुवं भुञ्जीत यावकं। ततः संवत्सरे पूर्णे कर्णौ दद्याद्धिरण्मयौ।
घृते प्रक्षिप्य विप्राय पयसा सहिते शुभे। नासामिच्छेल्ललाटाभां मध्यमावधिवर्द्धिनीं।
तिलगुल्मं सदा सिञ्चेद्यावत् पुष्पैर्हि रक्षितः। अनन्तरोपवासेन सेकव्यः सलिलैः सदा।
तस्मादादाय पुष्पाणि घृते प्रक्षिप्य दापयेत्। स्वक्षी भवेयमिति या स्त्री काङ्क्षेदम्बुजेक्षणे। ७८७५
अनन्तरं सा भुञ्जीत पयसा वा घृतेन वा। ततः संवत्सरे पूर्णे पद्मपत्राक्षि पण्डिता।
तथैवोत्पलपत्राणि न्यसेत् चोरे शुचिस्मिते। शक्तमानानि विप्राय ततो दद्यात् सती सति।
कृष्णसारसमानाक्षी स्त्री दत्त्वा भवति स्म वै। इच्छेदोष्ठौ चारुरूपौ या स्त्री धर्मगुणान्विते।
सा म्लप्सयेन च पिबेदुदकं वत्सरं सती। अयाचितेन भुञ्जीत नवम्यां धर्मभागिनी।
ततः संवत्सरे पूर्णे विद्रुमं दातुमर्हति। तेन बिम्बफलाभोष्ठी स्त्री भवत्येव शोभने। ७८८०
सुभगा च वपुःपुत्त्रधनाढ्या गोमती तथा। या चारुरूपानिच्छेत दन्तानमरवर्णिनि।

शुक्लाष्टमीं न सा ऽश्नीयाद्भक्तद्वयमनिन्दिता । ततः संवत्सरे पूर्णे दद्याद्रौप्यमयान् शुभान् ।
दन्तान् प्रलिप्य धर्मज्ञे पयस्यतिगुणोदिते । तेन सा तिलपुष्पाभान् दन्तानाप्नोति या सती ।
सौभाग्यमपि चाप्नोति सपुत्रत्वं तथाऽनघे । सर्वमेव मुखं कान्तमिच्छन्ती रुचिरानने ।
सा पौर्णमास्यामश्नातु प्राप्ते चन्द्रोदये शुभे । यावकं पयसा सिद्धं दत्त्वा विप्राय भाविनी । ७०८५
ततः संवत्सरे पूर्णे चन्द्रं रूप्यमयं शुभं । पद्मे फुल्लेऽभिसंन्यस्य ब्राह्मणं स्वस्ति वाचयेत् ।
पूर्णचन्द्रमुखी तेन दानेन स्त्री शुभे भवेत् । स्तनाविच्छति या नारी तृणराजफलोपमौ ।
अयाचितं दशम्यां सा नित्यमश्नीत वाग्यता । संवत्सरे ततः पूर्णे द्वे बिल्वे काञ्चने शुभे ।
सदक्षिणे ब्राह्मणाय प्रयच्छति धृतात्मने । सौभाग्यं परमाप्नोति बहून् पुत्रांस्तथैव च ।
सदोन्नतस्तनी चैव भवत्यमरवर्णिनि । शातोदरत्वमन्विच्छेत् चपेदेकान्नभोजना । ७०९०
पञ्चम्यां तु न भोक्तव्यमन्नं तोयेन नित्यदा । ततः संवत्सरे पूर्णे दद्याज्जातीलतां शुभे
फलं सदक्षिणं धन्ये ब्राह्मणाय धृतात्मने । हस्ताविच्छति या नारी रूपयुक्तौ सुमध्यमे ।
द्वादशीं सा चरेत्त्र शाकैः सर्वैरनिन्दितैः । संवत्सरे ततः पूर्णे पद्मे रौक्मे ददातु या ।
ब्राह्मणायाभिरूपाय तथा पद्मद्वयं शुभं । श्रोणीं विशालामन्विच्छेत् स्त्री चरत्त्वेव सुव्रते ।
त्रयोदशीमेकभक्तमश्नात्वेवं ह्ययाचितं । ततः संवत्सरे पूर्णे लवणं संप्रयच्छतु । ७०९५
प्रजापतिमुखाकारं कृत्वा तत्र वरानने । काञ्चनं तत्र दातव्यं तदाकारस्य सर्व्वशः ।
अञ्जनेन च धर्मज्ञा शनकैरवचूर्णयेत् । रत्नानि चैव पूर्णानि वासो रक्तञ्च दापयेत् ।
तेन श्रोणीमभिमतां स्त्री सौम्ये प्रतिपद्यते । मधुरां वाचमिच्छन्ती वर्ज्जयेल्लवणं सती ।
संवत्सरं वा मासं वा दापयेल्लवणं ततः । सदक्षिणं ब्राह्मणाय परं माधुर्यमिच्छती ।
श्रुतवाक्याच्छतगुणं भवत्यमरवर्णिनी । गूढगुल्फशिरौ पादाविच्छन्त्या सोमनन्दिनि । ७१००
षष्ठ्यां षष्ठ्यां वरारोहे भोक्तव्यः सलिलोदनः । अग्निर्वा ब्राह्मणो वाऽपि न स्प्रष्टव्यः सदा पदा ।
यदा यदा स्पृशेत्तच्च वन्देत तपसाऽन्विते, पादेन न च वै पादं प्रक्षालयितुमर्हति ।
एतैर्नित्यं व्रतैर्युक्ता धर्मज्ञा पतिदेवता । कूर्म्मौ रुक्ममयौ दद्याद्ब्राह्मणाय पतिव्रता ।
तौ वराय ब्राह्मणाय स्थापयित्वा घृते ऽनघे । पद्मे चाधोमुखे कृत्वा दद्याद्विप्राय नन्दिनि ।
रक्तैर्द्रव्यैर्विमिश्रयित्वा काञ्चनेन स्वलङ्कृते । सर्व्वमेव तु या गात्रमिच्छत्यतिमनोहरं । ७१०५
त्रिरात्रं पुष्पकाले सा करोतु पतिदेवता । कौमुद्यामथ चाषाढ्यां माघ्यामाश्वयुजे तथा ।
मातरं पितरञ्चैव मन्यते ऽतिथिदैवतं । घृतञ्च नित्यं विप्रेभ्यो ददातु लवणं तथा ।
सर्व्वाम्बरं गृहे चैव करोतु पतिदेवता । उपलेपञ्च धर्मज्ञा बलिकर्म्म च मानिनि ।
वाग्दुष्टा चैव सा शुभ्रे भवत्वात्मार्थपण्डिता । पर्य्युषितं च सा किञ्चिदपि शाकं यशस्विनि ।
बलिं स्वजलतथ्यञ्च परित्यजतु भाविनी । ७११०

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि पारिजातहरणे व्रतविधौ ऊनचत्वारिंशदधिकशततोऽध्यायः ॥ १२८ ॥

॥ उमोवाच ॥ बान्धवान् सगुणानिच्छन्त्येकभक्तेन नित्यदा । सप्तमीं सप्तमीं नित्यं चरचेत् स्त्री पतिव्रता ।
ततः संवत्सरे पूर्णे वृत्तं दद्याद्धिरण्मयं । सदक्षिणं ब्राह्मणाय शुभबन्धुमती भवेत् ।
करञ्जे दीपकं दद्यात् सदा या प्रमदावरे । पूर्णे संवत्सरे दद्यात् सौवर्णं दीपकं ततः ।
दृष्ट्वा सा स्त्री भवेद्भर्त्तुरिष्टा पुत्त्रवती तथा । सपत्नीनामपि तथा दीपवज्ज्वलते शुभे ।
या शेषभोजिनो नित्यं नैव च स्यादहङ्कृता । न च स्याद्दुर्मना सौम्ये नित्यञ्च पतिदेवता । ७९१५
शौचान्विता च सततं न च रूक्षाभिभाषिणी । श्वश्रूश्वशुरयोर्नित्यं शुश्रूषानिरता सती ।
किं तस्या व्रतकैः कृत्यं किं वा स्यादुपवासकैः । या भर्त्तृदेवता नित्यं सत्यधर्म्मगुणान्विता ।
विधवा स्त्री तु या हि स्याद्दैवयोगात् सती सति । तस्या वक्ष्यामि यो धर्म्मः पुराणोक्तः सुमध्यमे ।
पतिं संकल्पयित्वा सा चित्तस्थं वाऽथ मृण्मयं । तस्य पूजां सदा कुर्य्यात्तस्या धर्म्ममनुस्मरेत् ।
तत एवाभ्यनुज्ञाञ्च नित्यं याचेत सुव्रता । व्रतके चोपवासे च भोजने च विशेषतः । ७९२०
भर्त्तृलोकान् व्रजत्येवं न चेदतिक्रमेत् पतिं । शाण्डिली सूर्य्यवद्भाति सततं पतिदेवता ।
अद्य प्रभृति सर्व्वेषां देवानाञ्चैव योषितः । द्रक्ष्यन्ति पुण्यकविधिं पौराणं याः सनातनाः ।
मुनिश्च नारदः कृत्स्नं पौराणं ख्यास्यते विधिं । उपवासस्य धर्म्मात्मा व्रतकानां तथैव च ।
अदितिश्चापि सेन्द्राणी लक्ष्मी सोमसुते वरे । प्रवर्त्तने पुण्यकानां व्रतकानाञ्च सर्व्वदा ।
कीर्त्तनीयाः सतीनां हि भविष्यथ गुणान्विताः । उपवासव्रतविधिं यथावदिह कृत्स्नशः । ७९२५
प्रादुर्भावेषु सर्व्वेषु भार्य्या विष्णोर्महात्मनः । ख्यास्यन्ति पुण्यकविधिं नित्यमेव सनातनं ।
विशेषधर्म्मो धर्म्माणां स्त्रीधर्म्मेषु प्रशस्यते । पतिभक्तिरदुष्टत्वमवाग्दुष्टत्वमेव च ।
॥ नारद उवाच ॥ एवमुक्तास्तु ता देव्यो महादेव्या तपोधनाः । जग्मुर्हृष्टा महादेवीं प्रणिपत्य हरप्रियां ।
अदितिर्व्रतकञ्चक्रे शृणु यद्ब्रह्मचारिणी । उमाव्रतविधिः सर्व्वः पूर्व्वोद्दिष्टस्तया कृतः ।
पारिजाते निबध्याथ मम दत्तस्तु कश्यपः । अदितिर्व्रतकं चक्रे शृणु यद्ब्रह्मचारिणी । ७९३०
उमाव्रतविधिः सर्व्वः पूर्व्वोद्दिष्टस्तया कृतः । पारिजाते निबध्याथ मम दत्तस्तु कश्यपः ।
अदितिव्रतकं नाम तद्दत्तं सत्यभामया । तदेव व्रतकं दत्तं सावित्र्या धर्म्मनित्यया ।
तैरेव युक्तः संयुक्तमिदं त्वभ्यधिकं कृतं । सन्ध्याकाले च संप्राप्ते स्थाने स्थाने तथैव च ।
पूजनं वा नमस्कारो जपश्च द्विगुणः स्मृतः । सावित्रीव्रतकं कृत्वा तथादितिव्रतं सती ।
भर्त्तुः कुलं पितृकुलमात्मानञ्चैव तारयेत् । इन्द्राणी व्रतकञ्चक्रे तदेवेमं यथाविधि । ७९३५
रक्तमभ्यधिकं वासो भोजनञ्चैव सामिषं । चतुर्थे दिवसे चापि पुण्यकार्थं विधिः स्मृतः ।
अहोरात्रोपवासस्य देयं कुम्भशतं तदा । गङ्गया व्रतकं दत्तं तदेवेमं यशस्करि ।
स्नानमभ्यधिकं कार्य्यं प्रत्यूषस्यात्मनो जले । अन्यस्मिन् वा जले माघशुक्लपक्षे हरिप्रिये ।
एतद्गङ्गाव्रतं नाम सर्व्वकामप्रदं स्मृतं । सप्त सप्त च सप्ताथ कुलानि हरिवल्लभे ।
स्त्री तारयति धर्म्मज्ञा गङ्गाव्रतकचारिणी । देयं कुम्भसहस्रञ्च गङ्गाया व्रतके शुभे । ७९४०

तारणां पारणश्चैव तद्व्रतं सार्व्वकामिकं । यमभार्य्या चकाराथ व्रतं चामरयं शुभं ।
हेमन्ते तत्तु कर्त्तव्यमाकाशे हरिवल्लभे । इमानि चैव वाक्यानि ब्रूयादाकाशमाश्रिता ।
स्नाता शुचिसमाचारा नमस्कृत्य पतिं शुभे । चराम्यहं चामरयं हिमं पृष्ठेन धारये ।
पतिव्रता जीवपुत्त्रा भवेयञ्च पुरोधिका । सपत्नीश्चाधितिष्ठेयं पत्युरेवञ्च मा यमं ।
सभर्त्तृपुत्त्रा जीवेयं चिरं सुसुखमेव च । पतिलोकञ्च गच्छेयं भवेयं धनिनी तथा ।
सुचेला मृष्टहस्ता च स्वजनेष्टा गुणान्विता । एवं कृत्वा ततो विप्रं मधुना स्वस्ति वाचयेत् ।
तिलैरपि तथा कृष्णैः पायसेन तु भोजयेत् । एवं व्रतानि देवीभिः कृतान्यमरवर्णिनि ।
महादेव्या पुरोक्तानि रुद्रपत्न्या हरिप्रिये । अहं ब्रवीमि तवसा मदीयेन समन्विताः ।
सर्व्वा द्रक्ष्यथ पुण्यानि व्रतकानि तथैव च । पौराणान्युमया देव्या यानि दृष्टानि वै पुरा ।
कल्याणगुणयुक्तानि पावनानि शुभानि च ।
॥ वैशम्पायन उवाच ॥ रुक्मिणी व्रतकञ्चक्रे दृष्ट्वा व्रतकविस्तरं । उमया वरदानेन दृष्ट्वा दिव्येन चक्षुषा ।
उमाव्रतकवत्सर्व्वं वृषदानं तयाऽधिकं । रत्नमालाप्रदानञ्च तथाऽन्यं सार्व्वकामिकं ।
तथा जाम्बवती चक्रे पुरोमाव्रतकं यथा । ददावभ्यधिकं सा तु रत्नवृक्षं मनोहरं ।
सत्या ददौ तथैवाथ पुरोमाव्रतकं यथा । पीतमभ्यधिकं वासस्तया दत्तमुमाव्रते ।
रोहिण्या चाथ फाल्गुन्या मघया च पुरातने । व्रतानि खलु दत्तानि बहूनि कुलनन्दने ।
ददौ शतभिषा चैव व्रतकं पुण्यलक्षणं । येन नक्षत्रमुख्यत्वं जगाम कुरुनन्दन ।
इति श्रीमहाभारते खिलेषु हरिवंशे पारिजातहरणे उमाव्रतके चत्वारिंशदधिकशततोऽध्यायः ॥ १४० ॥
॥ जनमेजय उवाच ॥ वैशम्पायन धर्मज्ञ व्यासशिष्य तपोधन । पारिजातस्य हरणे षट्पुरं परिकीर्त्तितं ।
निवासोऽसुरमुख्यानां दारुणानां तपोधन । तेषां बधं मुनिश्रेष्ठ कीर्त्तयस्वाखिलस्य च ।
॥ वैशम्पायन उवाच ॥ त्रिपुरे निहते वीरे रुद्रेणाक्लिष्टकर्म्मणा । तत्रायुधाना बहवो बभूवुरसुरोत्तमाः ।
शराग्निना न दग्धास्ते रुद्रेण त्रिपुरालयाः । षष्टिं शतसहस्राणि न न्यूनाभ्यधिकानि तु ।
ते ज्ञातिबधसन्तप्ताश्चक्रुर्व्वीराः पुरा तपः । जम्बूमार्गे सतामिष्टे महर्षिगणसेविते ।
आदित्याभिमुखा वीराः सहस्राणां शतं समाः । वायुभक्षा नृपश्रेष्ठ ध्रुवन्तः पद्मसम्भवं ।
तेषामुदुम्बरं राजन् गण एकः समाश्रितः । वृक्षं तत्रावसन् वीरास्ते कुर्व्वन्तो महत्तपः ।
कपित्थवृक्षमाश्रित्य केचित्तत्रोषिताः पुरा । शृङ्गालवाटीस्त्वपरे चेरुरुग्रं तथा तपः ।
वटमूले तथा चेरुस्तपः कौरवनन्दन । अधीयन्तोऽपरे ब्रह्म वरं गत्वाऽसुरात्मजाः ।
तेषां तुष्टः प्रजाकर्त्ता नरदेव पितामहः । वरं दातुं सुरश्रेष्ठः प्राप्तो धर्म्मभृताम्वरः ।
वरं वरयतेत्युक्तास्ते राजन् पद्मयोनिना । ते नेषुर्व्वरदानं तद्बिषमस्त्र्यम्बकं विभुं ।
इच्छन्तोऽपर्षितं गन्तुं ज्ञातीनां कुरुनन्दन । तानुवाच ततो ब्रह्मा सर्व्वज्ञः कुरुनन्दन ।
विश्वस्य जगतः कर्त्तुः संहर्त्तुश्च महात्मनः । कः शक्तोऽपर्षितं गन्तुं माऽस्तु वोऽत्र वृथा श्रमः ।

अनादिमध्यनिधनः सोमो देवो महेश्वरः । तमस्तुय सुखं स्वर्गे वसुमिच्छन्ति येऽसुराः ।
ते नेषुस्तत्र केचित्तु दुरात्मानो महासुराः । अयेषुरपरे राजन्नसुरा भव्यभावनाः ।
नेषुर्थे तु दुरात्मानस्तानुवाच पितामहः । वरयध्वं वरं वीरा रुद्रक्रोधहृते ऽसुराः ।
त ऊचुः सर्व्वदेवानामवध्याः स्यामहे विभो । पुराणि षट् च नो देव भवत्वन्तर्महीतले ।
सर्व्वकामसमृद्धार्थं षट्पुरं चास्तु नः प्रभो । वयञ्च षट्पुरं गत्वा वत्स्याम च सुखं प्रभो ।
रुद्रादुग्रं भयं न स्याद्येन नो ज्ञातयो हताः । निहतं त्रिपुरं दृष्ट्वा भीताः स्म तपसां निधे ।
॥ पितामह उवाच ॥ असुरा भवतावध्या देवानां शङ्करस्य च । न बाधिष्यथ चेद्विप्रान् सत्पथस्थान् सतां प्रियान् ।
विप्रोपघातं मोहाच्चेत् करिष्यथ कथञ्चन । नाशं यास्यथ विप्रा हि जगतः परमा गतिः ।
नारायणाद्वो भेतव्यं कुर्व्वद्भिर्ब्राह्मणाहितं । सर्व्वभूतेषु भगवान् हितं धत्ते जनार्द्दनः ।
ते गता असुरा राजन् ब्रह्मणाऽथ विसर्ज्जिताः । येऽपि भक्ता महादेवमसुरा धर्म्मचारिणः ।
स्वयं हि दर्शनं तेषां ददौ त्रिपुरनाशनः । श्वेतं वृषभमारुह्य सोमः सप्रवरः प्रभुः ।
उवाच चेदं भगवानसुरान् स सताङ्गतिः । वैरमुत्सृज्य दम्भञ्च हिंसाञ्चासुरसत्तमाः ।
मामेव चाश्रितास्तस्माद्वरं साधु ददामि वः । यैर्दीक्षिताः स्थ मुनिभिः सत्क्रियापरमैर्द्विजैः ।
सह तैर्गम्यतां स्वर्गः प्रीतोऽहं वः स्वकर्म्मणा । इह ये चैव वत्स्यन्ति तपसा ब्रह्मवादिनः ।
अपि कापित्थिकाद्यैश्च तेषां लोका यथा मम । इह मासान्तपवासौ यः करिष्यति मानवः ।
वामप्रस्थेन विधिना पूजयन्मां तपोधनः । वर्षाणान्तु सहस्रस्य तपसा प्राप्यते फलं ।
कृत्वा त्रिरात्रं विधिवत्प्राप्स्यते चेप्सितां गतिं । अर्कद्वीपे नियमतो द्विगुणं तद्भविष्यति ।
नीचे देशे च भद्रं वो वरमेतं ददाम्यहं । श्वेतवाहननामानं यश्च मां पूजयिष्यति ।
सर्व्वतो भयचित्तोऽपि गतिं स मम यास्यति । औडुम्बरान् वाटमूलान् द्विजान् कापित्थिकानपि ।
तथा शृगालवाटीयान्धर्म्मात्मानो दृढव्रतान् । मुनींश्च ब्रह्मवाटीयान् सविशेषेण ये नराः ।
पूजयिष्यन्ति सततं ते यास्यन्तीप्सितां गतिं । इत्युक्त्वाऽथ महादेवो भगवान् श्वेतवाहनः ।
तैरेव सहितः सर्व्वरुद्रलोकं जगाम वै । जम्बूमार्गे गमिष्यामि जम्बूमार्गे वसाम्यहं ।
एवं संकल्पयानोऽपि रुद्रलोके महीयते ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि षट्पुरवधे एकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥
॥ वैशम्पायन उवाच ॥ एतस्मिन्नेव काले तु चतुर्वेदः षडङ्गवित् । ब्राह्मणो याज्ञवल्क्यस्य शिष्यो धर्म्मगुणान्वितः ।
ब्रह्मदत्तेति विख्यातो विप्रो वाजसनेयिनां । अश्वमेधः कृतस्तेन वसुदेवस्य धीमतः ।
स सांवत्सरदीक्षायां दीक्षितः षट्पुरालये । आवर्त्तायाः शुभे तीरे सुनद्या मुनिजुष्टया ।
सखा च वसुदेवस्य महाध्यायी द्विजोत्तमः । उपाध्यायश्च कौरव्य वीरहेतोर्महात्मनः ।
वसुदेवस्तत्र यातो देवक्या सहितः प्रभो । यजमानं षट्पुरस्थं यथा शक्रो बृहस्पतिं ।
तत् सत्रं ब्रह्मदत्तस्य बह्वन्नं बहुदक्षिणं । उपासन्त मुनिश्रेष्ठा महात्मानो दृढव्रताः ।

व्यासोऽहं याज्ञवल्क्यश्च सुमन्तुर्जैमिनिस्तथा । धृतिमान् जाजलिश्चैव देवलाद्याश्च भारत ।
अनुज्ञाऽनुकम्पया युक्तं वसुदेवस्य धीमतः । यथेप्सितान् ददौ कामान् देवकी धर्म्मचारिणी । ८०००
वासुदेवप्रभावेण जगत्सम्पूर्णमीहितम् । तस्मिन् सत्रे वर्त्तमाने दैत्याः षट्पुरवासिनः ।
निकुम्भाद्याः समागम्य तमूचुर्वरदर्पिताः । कार्य्यतां यज्ञभागो नः सोमं पास्यामहे वयं ।
कन्याश्च ब्रह्मदत्तो नो यजमानः प्रयच्छतु । श्रुताः सन्त्यस्य कन्याश्च रूपवत्यो महात्मनः ।
आहृत्य ताः प्रदातव्याः सर्व्वथैव हि नः श्रुतं । रत्नानि च ब्रह्मदत्तो विशिष्टानि ददातु नः ।
अन्यथा न तु यष्टव्यं वयमाज्ञापयामहे । एतच्छ्रुत्वा ब्रह्मदत्तस्तानुवाच महासुरान् । ८००५
यज्ञभागो न विहितः पुराणे ऽसुरसत्तमाः । कथं सत्रे सोमपानं शक्यं दातुं मया हि वः ।
पृच्छतेह मुनिश्रेष्ठान् वेदभाष्यार्थकोविदान् । कन्या हि मम या देयास्ताश्च संकल्पिता मया ।
अन्तर्वेद्यां प्रदातव्याः सदृशानामसंशयं । रत्नानि तु प्रयच्छामि मा स्वेनाहं विचिन्त्यतां ।
बलान्नैव प्रदास्यामि देवकीपुत्त्रमाश्रितः । निकुम्भाद्यास्तु रुषिताः पापाः षट्पुरवासिनः ।
यज्ञवाटं विलुलुपुर्जह्रुः कन्याश्च तास्तथा । तं दृष्ट्वा सम्प्रद्रुतस्तु दध्यावानकदुन्दुभिः । ८०१०
वासुदेवं महात्मानं बलभद्रं गदं तथा । विदित्वाऽथ ततः कृष्णः प्रद्युम्नमिदमब्रवीत् ।
गच्छ कन्यापरित्राणं कुरु पुत्त्राशु मायया । यावद्यादवसैन्येन षट्पुरं याम्यहं प्रभो ।
स ययौ षट्पुरं वीरः पितुराज्ञाकरस्तदा । निमेषान्तरमात्रेण गत्वा कार्ष्णिर्महाबलः ।
कन्यास्ता मायया धीमानाजह्रे स महाबलः । मायामयीश्च कृत्वाऽन्या न्यस्तवान् रुक्मिणीसुतः ।
मा भैरिति च धर्म्मात्मा देवकीमुक्तवांस्तदा । मायामयीस्तु ता हृत्वा सुतास्तस्य दुरासदाः । ८०१५
षट्पुरं विविशुर्दैत्याः परितुष्टा नराधिप । कर्म्म चासार्य्यत तत्र विधिदृष्टेन कर्म्मणा ।
यदिष्टं बहुगुणं तदभूच्च नराधिप । एतस्मिन्नन्तरे प्राप्ता राजानस्तत्र भारत ।
सर्वे निमन्त्रिताः पूर्व्वं ब्रह्मदत्तेन धीमता । जरासन्धो दन्तवक्रः शिशुपालस्तथैव च ।
पाण्डवा धार्त्तराष्ट्राश्च मालवास्तत्कृणास्तथा । रुक्मी चैवाहृतिश्चैव नीलो नार्मद एव च ।
विन्दानुविन्दावावन्त्यौ शल्यः शकुनिरेव च । राजानश्चापरे वीरा महात्मानो दृढायुधाः । ८०२०
आवासिता नातिदूरे षट्पुरस्य च भारत । तान्दृष्ट्वा नारदः श्रीमानचिन्तयदनिन्दितः ।
सुतस्य यादवानाञ्च भविष्यति समागमः । अत्र हेतुरयं युद्धे तस्मात्तत्प्रयताम्यहं ।
एवं सञ्चिन्तयित्वा तु निकुम्भभवनं गतः । पूजितः स निकुम्भेन दानवैश्च तथाऽपरैः ।
उपविष्टः स धर्म्मात्मा निकुम्भमिदमब्रवीत् । कथं विरोधं यदुभिः कृत्वा स्वस्थैरिहास्यते ।
यो ब्रह्मदत्तः स कृष्णः स हि तस्य विभुः सखा । शतानि पञ्च भार्य्याणां ब्रह्मदत्तस्य धीमतः । ८०२५
आनीता वसुदेवस्य सुतस्य प्रियकाम्यया । शतद्वयं ब्राह्मणीनां राजन्यानां तथा शतं ।
वैश्यानां शतमेकञ्च शूद्राणां शतमेव च । ताभिः शुश्रूषितो धीमान्दुर्व्वासा धर्म्मवित्तमः ।
तेन तासां वरो दत्तो मुनिना पुण्यकर्म्मणा । एकैकस्तनयो राजन्नेकैका दुहिता तथा ।

रूपेणानुपमाः सर्व्वा वरदानेन धीमतः। कन्या भवन्ति तनयास्तस्यासुर पुनः पुनः।
सङ्गमे सङ्गमे वीर भर्त्तृभिः शयने सह। सर्व्वपुष्पमयं गन्धं स्रवन्ति च वराङ्गनाः।
सर्व्वदा यौवने न्यस्ताः सर्व्वाश्चैव पतिव्रताः। सर्व्वा गुणैरप्सरसां गीतनृत्यगुणोदयं।
जानन्ति सर्व्वा दैतेय वरदानेन धीमतः। पुत्राश्च रूपसम्पन्नाः शास्त्रार्थकुशलास्तथा।
स्वे स्वे स्थिता वर्णधर्म्मे यथावदनुपूर्व्वशः। ताः कन्या भैमसुख्यानां दत्ताः प्रायेण धीमता।
अवशेषं शतन्त्वेकं यदानीतं किल त्वया। तदर्थं यादवा वीर योधयिष्यन्ति सर्व्वथा।
साहाय्यार्थन्तु राजानो व्रियन्तां हेतुपूर्व्वकं। ब्रह्मदत्तसुतार्थञ्च रत्नानि विविधानि च।
दीयन्तां भूमिपालानां साहाय्यार्थं महात्मनां। आतिथ्यं क्रियताञ्चैव ये समेष्यन्ति वै नृपाः।
एवमुक्ते तथा चक्रुरसुरास्तेऽतिहृष्टवत्। लब्ध्वा पञ्चशतं कन्या रत्नानि विविधानि च।
यथार्हेण नरेन्द्रैस्ता विभक्ता भक्तिवत्सलाः। श्रुते पाण्डुसुतान् वीरान् वारिता नारदेन ते।
निमेषान्तरमात्रेण तत्र गत्वा महात्मना। तुष्टैस्तैरसुरा प्रोक्ता राजन् भूमिपसत्तमैः।
सर्व्वाकामसमृद्धार्थैर्भवद्भिः स्वगणैः स्वयं। अर्च्चिताः स्म यथान्यायं वदतं किं वः प्रयच्छतु।
सत्त्वं नार्च्चितपूर्व्वं हि दिव्यैर्भोगैर्भवद्विधैः। निकुम्भोऽयामशेोद्दिष्टः चक्रं सुररिपुस्तदा।
सम्वर्त्तयित्वा चक्रस्य माहात्म्यं सत्यमेव च। युद्धं नो रिपुभिः सार्द्धं भविष्यति नृपोत्तमाः।
साहाय्यं दातुमिच्छामो भवद्भिस्तत्र सर्व्वशः। एवमस्त्विति तानूचुः क्षत्रियाः क्षीणकल्मषाः।
पाण्डवेयान्नृते वीरान् श्रुतार्थान्नारदादिभो। क्षत्रियाः सन्निविष्टास्ते युद्धार्थं कुरुनन्दन।
दैत्यस्तु ब्रह्मदत्तस्य यज्ञवाटं गता अपि। कृष्णोऽपि सेनया सार्द्धमाययौ षट्पुरं विभुः।
महादेवस्य वचनमुद्वहन्मनसा नृप। स्थापयित्वा द्वारवत्यामाहुकं पार्थिवं तथा।
स तया सेनया सार्द्धं पौराणां हितकाम्यया। यज्ञवाटस्याविदूरे देवो निविविशे विभुः।
देशे प्रवरकल्याणे वसुदेवप्रचोदितः। दत्तगुल्मप्रतिसरं कृत्वा तं विधिवत् प्रभुः।
प्रद्युम्नमटने श्रीमान् रक्षार्थं विनियुज्य वै।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि षट्पुरवधे द्वाचत्वारिंशदधिकशततोऽध्यायः॥ १४२॥

॥ वैशम्पायन उवाच॥ मुहूर्त्ताभ्युदिते सूर्य्ये जगच्चक्षुषि निर्म्मले। बलः कृष्णः सात्यकिश्च तार्क्ष्यमारुरुहुर्मुदा।
बद्धगोधाङ्गुलित्राणा दंशिता युद्धकाङ्क्षिणः। विश्वेश्वरं देवं नमस्कृत्य सुरोत्तमं।
आवर्त्तायां जले स्नात्वा रुद्रेण वरदत्तया। गङ्गायाः कुरुशार्दूल रुद्रवाक्येन पुण्यया।
प्रद्युम्नमथ सैन्यस्य विर्यतिं स्थाप्य मानदः। रक्षार्थं यज्ञवाटस्य पाण्डवान् विनियुज्य च।
शेषां सेनां गुहाद्वारि भगवान् विनियुज्य च। जयन्तमथ सङ्ग्राम प्रवरञ्च मताङ्गतिः।
तावापेततुरेवाथ स्वयञ्चापश्यतं तदा। वियत्येव मिथुनौ तौ प्रद्युम्न इव भारत।
ततः कृष्णस्य वचनादाहतो रणदुन्दुभिः। ज्वलता मुरजाश्चैव वाद्यान्यप्यपराणि च।
मकरो रचितो व्यूहः शाम्बेन च गदेन च। शारणश्चोद्धवश्चैव भोजो वैतरणस्तथा।

अनाधृष्टिश्च धर्म्मात्मा विपृथुः पृथुरेव च । कृतवर्म्मा सुदंष्ट्रोऽथ विचक्रुररिमर्द्दनः ।
सनत्कुमारो धर्म्मात्मा चारुदेष्णश्च भारत । अनिरुद्धसहायौ तौ पृष्ठानीकं ररक्षतुः ।
एषा यादवसेना तु व्यूहमध्ये व्यवस्थिता । रथैरश्वैर्नरैर्नागैराकुला कुलवर्द्धन । ८०६०
षट्पुरादपि निष्क्रान्ता दानवा युद्धदुर्म्मदाः । आरुह्य मेघनादांश्च गर्द्दभानपि हस्तिनः ।
मकरांश्चिशुमारांश्च हयानपि च भारत । महिषानथ खड्गांश्च उष्ट्रानपि च कच्छपान् ।
एतैरेव रथैर्युक्ता विविधायुधपाणयः । किरीटपीठमुकुटैरङ्गदैरपि मण्डिताः ।
नानर्द्दमानैर्विविधैस्तूर्य्यैर्नेमिस्वनाकुलैः । प्रध्मायमानैः शङ्खैश्च महाम्बुदसमस्वनैः ।
तासामसुरसेनानां युध्यतीनां जनेश्वर । निकुम्भो निर्ययावग्रे देवानामिव वासवः । ८०६५
भूमिं द्यांश्च ववृधिरे दानवास्ते बलोत्कटाः । नदन्तो विविधान्नादान् क्ष्वेडन्तश्च पुनः पुनः ।
राजसेनाऽपि संयत्ता चेदिराजपुरोगमा । असुराणां सहायार्थं निश्चिता जनमेजय ।
दुर्य्योधनश्चाद्ययतं चेदिराजानुगामिनं । स्थितं रथैर्नरव्याघ्र गन्धर्व्वनगरोपमैः ।
कठिना मादिनो वीर द्रुपदश्चन्दमास्तथा । रुक्मी चैवाकृतिश्चैव तस्थतुर्निश्चितौ रणे ।
तालवृक्षप्रतीकाशे धुन्वानौ धनुषी शुभे । शल्यश्च शकुनिश्चोभौ भगदत्तश्च पार्थिवः । ८०७०
जरासन्धस्त्रिगर्त्तश्च विराटश्च महोत्तरः । युद्धार्थमुद्यता वीरा निकुम्भाद्या जयैषिणः ।
युयुत्समाना यदुभिर्द्देवैरिव महासुराः । ततो निकुम्भः समरे शरैराशीविषोपमैः ।
ततर्द्द समरे सेनां भैमानां भीमदर्शनां । सेनापतिरनाधृष्टिर्ममर्द्द तत्र यादवः ।
ततर्द्द घोरैर्बाणौघैश्चित्रपुङ्खैः शिलाशितैः । न रथो ऽसुरमुख्यस्य ददृशे न च वाजिनः ।
न ध्वजो न निकुम्भश्च सर्व्वं बाणाभिसंवृतं । स परीत्य ततो वीरो निकुम्भो मायिनाम्बरः । ८०७५
अस्तम्भयदनाधृष्टिं मायया भैमसत्तमं । स्तम्भयित्वानयद्वीरं गुहां षट्पुरसंश्रितां ।
रुद्धा चाभ्यगमद्वीरं मायया बलमाश्रितः । पुनरेव निकुम्भस्तु कृतवर्म्माणमाहवे ।
अनयच्चारुदेष्णञ्च भोजं वैतरणं तथा । सनत्कुमारमार्ष्टिञ्च तथैव निशठोल्मुकौ ।
बलश्चैवापरान् भोजान्मायाबलसमाश्रितः । न तस्य ददृशे देहो मायाच्छन्नो जनेश्वर ।
नयतो यादवान् घोरां गुहां षट्पुरसंश्रितां । तद्दृष्ट्वा कदनं घोरं भैमानां भैमवर्द्धनः । ८०८०
चुकोप भगवान् कृष्णो बलः सत्यक एव च । सविशेषं तथा कामः शाम्बश्च परवीरहा ।
अनिरुद्धश्च दुर्द्धर्षो भैमाश्च बहवोऽपरे । ततः शार्ङ्गायुधः शार्ङ्गं कृत्वा सज्यं नरेश्वर ।
दानवेषु प्रवृत्तेषु तृणेष्विव हुताशनः । तं दृष्ट्वा दानवा देवमभिदुद्रुवुरीश्वरं ।
शलभाः कालपाशार्त्ताः प्रदीप्तमिव पावकं । समुच्छ्रिताः शतघ्नीश्च परिघांश्च सहस्रशः ।
शूलानि चाग्नितुल्यानि प्रदीप्तांश्च परश्वधान् । पर्व्वताग्राणि वृक्षांश्च घोराश्च विपुलाः शिलाः । ८०८५
उत्क्षिप्य च गजांस्तावद्रथानपि हयानपि । नारायणाश्रितान् सर्व्वान्ददाह प्रहसन्निव ।
बाणार्चिषा महातेजा जगद्धितकरो हरिः । शारदं वर्षणं यद्वद्देदीर गवां पतिः ।

तद्वद्यदुवृष: सेहे बाणवर्षमरिन्दम: । न सेहिरे ऽसुरा बाणान्नारायणधनुश्च्युतान् ।
वर्षं पर्ज्जन्यविहितं बालुकासेतवो यथा । न शेकु: प्रमुखे स्थातुं कृष्णस्यासुरसत्तमा: ।
व्यादितास्यस्य सिंहस्य वृषभा इव भारत । ते बध्यमाना: कृष्णेन दिवमाचक्रमुस्तदा ।
जीविताशां वहन्तस्तु नारायणभयार्द्दिता: । तानाकाशगतान्शैग्निर्ज्जयन्त: प्रवरस्तदा ।
निजघ्नु: शरैर्घोरैर्ज्वलनार्च्चि:समै: प्रभो । निपेतुरसुराणान्तु शिरांसि धरणीतले ।
तृणराजफलानीव मुक्तानि शिखरान्तरी: । निपेतुर्व्योम्न इव श्लक्ष्णा दैत्यानां वसुधातले ।
कालेनापहृता वीर पञ्चवक्त्रा इवोरगा: । रौक्मिणेयस्तत: दृष्ट्वा घोरां मायामयीं गुहां ।
अदृश्य शक्रमदोर: चक्रं प्रवेष्टुमुद्यत: । गदेन सह धर्म्मात्मा शारणेन शठेन च ।
शाम्बेन चापरैश्चापि पूर्व्वं येन प्रवेशिता: । प्रमथ्य तरसा कर्षं शतघ्नं रणमूर्द्धनि ।
जग्राह बलवान् कार्ष्णि: प्रस्फुरन्तं ततस्तत: । विनश्य च गुहां वीरो घोरां मायामयीं नृप ।
दुर्य्योधनञ्च राजानं विराटद्रुपदावपि । शकुनिञ्चैव शल्यञ्च नीलञ्चापि नदीसुतं ।
विन्दानुविन्दावावन्त्यौ जरासन्धञ्च भारत । त्रिगर्त्तान्मालवांश्चैव ग्राशाल्वांश्च महाबलान् ।
धृष्टद्युम्नादयश्चैव पाञ्चालानस्त्रकोविदान् । तथाकृतिमुशाचे ईं मातुलं रुक्मिणेव च ।
शिशुपालञ्च राजानं भगदत्तञ्च भारत । सन्नन्धञ्च गुरुञ्च मानशामि नराधिपा: ।
गुहामिमां घोररूपां ये न प्रवेपयामि व: । विल्वोदकेश्वरेणाहमाज्ञप्त: शूलपाणिना ।
प्रवेष्टव्या नरेन्द्रास्ते गुहायामिति धीमता । आश्रित्य शाम्बरीं मायां निकुम्भेन महात्मना ।
प्रविष्टान् यादवांश्चैव मोचयिष्यामि सर्व्वथा । इत्युक्तो शिशुपालस्तु राजवेनापतिस्तथा ।
शरैस्तदर्द्दितान् सेमान् प्रद्युम्नं सविशेषत: । विल्वोदकेश्वरं देवं रौक्मिणेयो नमस्य च ।
अरभन्नृपतिं बद्धुं शिशुपालं महाबलं । तत: पाशसहस्राणि ग्रहाय प्रवरोत्तम: ।
शैलादिरब्रवीद्वीरं रौक्मिणेयं महाबलं । विल्वोदकेश्वरो देव: प्राह त्वां यदुनन्दन ।
सर्व्वं कुरु तथा रात्रावुक्तस्त्वं मे यथा मया । कन्यार्थं रक्षसुश्चांस्तु बधानेमान्नराधिपान् ।
पाशैस्त्वमेव मोक्तुञ्च प्रमाणं यदुनन्दन । असुरांस्तु महाबाहो निःशेषान् कर्त्तुमर्हसि ।
एवमेव च वक्तव्यस्त्वया वीर जनार्द्दन: । तत: स भगदत्तञ्च शिशुपालञ्च भूमिपं ।
आकृतिञ्चैव रुक्मिञ्च शेषांश्चान्यान्नराधिपान् । बबन्ध हरदत्तैस्तै: पाशैरुत्तमवीर्य्यधृक् ।
मायामयीं गुहाञ्चैनाननयत् कुरुवर्द्धन । बद्धा च रौक्मिणेयोऽय निश्वसन्त इवोरगान् ।
अनिरुद्धञ्चकाराय रक्षितारं स्वमात्मजं । तेषां निरवशेषेण बबन्ध यदुवर्द्धन: ।
सेनापतीन् क्षत्रियांश्च कोपाध्यक्षांश्च भारत । हस्त्यश्वरथवृन्दांश्च चकार च तथात्मसात् ।
अव्यग्र: स तदा हन्तुमसुरानुद्यत: प्रभो । सन्नद्ध एव चोवाच ब्रह्मदत्तं द्विजोत्तमं ।
विस्रब्धं वर्त्ततां कर्म्म मा भै: पश्य धनञ्जयं । न देवेभ्योनासुरेभ्यो नान्येभ्यो द्विजसत्तम ।

भयं हि विद्यते तस्य गोप्तारो यस्य पाण्डवाः । न चासुरैस्तव सुताः स्पृष्टाः स्वल्पपि तेजसा ।
यज्ञवाटे गिरौ च्यैता मायया निहता मया ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि षट्पुरवधे त्रिचत्वारिंशदधिकशततोऽध्यायः ॥ १४३ ॥
॥ वैशम्पायन उवाच ॥ बद्धेषु भूमिपालेषु सानुगेषु विशाम्पते । आविवेशासुरांश्चैव कश्मलं जनमेजय ।
दिशः प्रसस्रुस्ते वीरा बध्यमाना: समन्ततः । कृष्णानन्तप्रभृतिभिर्यदुभिर्युद्धदुर्म्मदैः । ८११०
निकुम्भस्तानथोवाच रुष्टो दानवसत्तमः । भित्त्वा प्रतिज्ञां किं मोहाद्भयार्त्ता याथ विक्लवाः ।
हीनप्रतिज्ञाः कान् लोकान् प्रयास्यथ पलायिताः । अगत्वापचितिं युद्धे ज्ञातीनां कृतनिश्चयाः ।
फलं जित्वेह भोक्तव्यं रिपून् समरकर्कशान् । हतेन चापि शूरेण वस्तव्यं त्रिदिवे सुखं ।
पलायित्वा गृहं गत्वा कस्य द्रक्ष्यथ हे मुखं । दारान् वक्ष्यथ किञ्चापि धिग्धिक् किं किं न लज्जथ ।
एवमुक्ता निवृत्तास्ते लज्जमाना नृपासुराः । द्विगुणेन च वेगेन युयुधुर्यदुभिः सह । ८११५
उत्सवे युद्धशौण्डानां नानाप्रहरणैर्नृप । ये यान्ति यज्ञवाटन्तु तान्निहन्ति धनञ्जयः ।
यमौ भीमश्च राजा च धर्म्मपुत्रो युधिष्ठिरः । द्वौ प्रयातान् जघानेन्द्रः प्रवरश्च द्विजोत्तमः ।
अथासुरास्रकतोयाढ्या केशशैवलशाद्वला । चक्रकूर्म्मरथावर्त्ता गजशैलानुशोभिनी ।
ध्वजकुन्ततरुच्छन्ना सर्व्विनोत्कृष्टशब्दिनी । गोविन्दशैलप्रभवा भीरुचित्तप्रमाथिनी ।
असृग्बुद्बुदफेनाढ्या असिमत्स्यतरङ्गिणी । सुस्राव शोणितनदी नदीव जलदागमे । ८१२०
तान्दृष्ट्वैव निकुम्भस्तु वर्द्धमानांश्च शाचवान् । हतान् सर्व्वान् सहायांश्च वीर्य्यादेवोत्पपात ह ।
स वारितो जयन्तेन प्रवरेण च भारत । शरैः कुलिशशङ्काशैर्निकुम्भो रणकर्कशः ।
सन्निवृत्य च दष्टौष्ठः परिघेण दुरासदः । प्रवरं ताडयामास स पपात महीतले ।
ऐन्द्रिस्तं पतितं भूमौ बाहुभ्यां परिषस्वजे । विदित्वा चैव सप्राणं हित्वाऽसुरमभिद्रुतः ।
अभिद्रुत्य निकुम्भञ्च निस्त्रिंशेन जघान ह । परिघेणापि दैतेयो जयन्तं समताडयत् । ८१२५
तस्यान्तश्चाचलद्गात्रं निकुम्भश्चेन्द्रिणाहवे । स चिन्तयामास तदा बध्यमानो महासुरः ।
कृष्णेन सह योद्धव्यं वैरिणा ज्ञातिघातिना । आमयामि किमात्मानमाहवे शक्रसूनुना ।
एवं स निश्चयं कृत्वा तत्रैवान्तरधीयत । जगाम चैव युद्धार्थं यत्र कृष्णो महाबलः ।
तं दृष्ट्वैरावणस्कन्धसंस्थितो बलनाशनः । द्रष्टुमभ्यागतो युद्धं अच्युते सह दैवतैः ।
साधु साध्विति पुत्रञ्च परितुष्टश्च सस्वजे । प्रवरञ्चापि धर्म्मात्मा सस्वजे मोहवर्ज्जितं । ८१३०
देवदुन्दुभयश्चापि प्रणेदुर्व्योमवाससा । जयमानं रणे दृष्ट्वा जयन्तं रणदुर्ज्जयं ।
ददर्शाथ निकुम्भस्तु केशवं रणदुर्ज्जयं । अर्ज्जुनेन स्थितं सार्द्धं यज्ञवाटाविदूरतः ।
स नादं सुमहत् कृत्वा पक्षिराजमताडयत् । परिघेण सुघोरेण बलं सत्यकमेव च ।
नारायणञ्चार्ज्जुनञ्च भीमञ्चाथ युधिष्ठिरं । यमौ च वसुदेवञ्च साम्बं कामञ्च वीर्य्यवान् ।

युयुधे मायया दैत्यः शोभकारी च भारत । न चैनं ददृशुः सर्व्वे सर्व्वशस्त्रविशारदाः ।
यदा तु नैवापश्यन्त तदा विल्वोदकेश्वरं । दध्यौ देवं हृषीकेशः प्रमथानां गणेश्वरं ।
ततस्ते ददृशुः सर्व्वे प्रभावादतितेजसः । विल्वोदकेश्वरस्याशु निकुम्भं मायिनाम्वरं ।
कैलासशिखराकारं शमन्तमिव धिष्ठितं । आक्रयन्तं रणे कृष्णं वैरिणं शातिमाशनं ।
सव्यगाण्डीव एवाथ पार्थस्तस्य रथेषुभिः । परिघश्चैव गात्रेषु विव्याधैनमदाखत ।
ते वाणास्तस्य गात्रेषु परिघे च जनाधिप । भग्नाः शिलाशिताः सर्व्वे निपेतुः कुञ्चिताः क्षितौ ।
विफलानस्त्वयुक्तांस्तान्दृष्ट्वा वाणान्धनञ्जयः । पप्रच्छ केशवं वीरः किमेतदिति भारत ।
पर्व्वतानपि भिन्दन्ति मम वज्रोपमाः शराः । किमिदं देवकीपुत्र विस्मयोऽत्र महानमम ।
तमुवाच ततः कृष्णः प्रहसन्निव भारत । मदङ्गं नं निकुम्भोऽयं कौन्तेय शृणु विस्तरं ।
पुरा गत्वोत्तरकुरूंस्तपश्चक्रे महाबलः । शतं वर्षसहस्राणां देवमनुर्दुरासदः ।
अथैनं छन्दयामास वरेण भगवान् हरः । स वव्रे त्रीणि रूपाणि न वध्यानि सुरासुरैः ।
तमुवाच महादेवो भगवान् वृषभध्वजः । मम वा ब्राह्मणानाम्वा विष्णोर्व्वा ऽप्रियमाचरन् ।
भविष्यसि हरेर्वध्यो न त्वन्यस्य महासुर । ब्रह्मण्योऽहञ्च विष्णुश्च विप्रा नः परमा गतिः ।
स एष सर्व्वशस्त्राणामवध्यः पाण्डुनन्दन । त्रिदेहोऽतिप्रमाथी च वरदत्तश्च दानवः ।
भानुमत्याऽपहरणे देहोऽस्यैको हतो मया । अवध्यं षट्पुरं देहमिदमस्य दुरात्मनः ।
दितिं शुश्रूषति त्वेको देहोऽस्य तपसाऽन्वितः । अन्यस्तु देहो घोरोऽस्य येनावसति षट्पुरं ।
एतत्ते सर्व्वमाख्यातं निकुम्भचरितं मया । त्वरयास्य वधे वीर कथा पश्चाद्भविष्यति ।
तयोः कथयतोरेवं कृष्णयोररसुरस्तदा । गुहां षट्पुरसंज्ञां तां विवेश रणदुर्ज्जयः ।
अन्विष्य तस्य भगवान् विवेश मधुसूदनः । तां षट्पुरगुहां घोरां दुर्द्दर्शां कुरुनन्दन ।
चन्द्रसूर्य्यप्रभाहीनां ज्वलन्तीं स्वेन तेजसा । सुखदुःखोष्णशीतानि प्रयच्छन्तीं यथेप्सितं ।
तत्र प्रविश्य भगवानपश्यत्तान् जनाधिपान् । युयुधे सह घोरेण निकुम्भेन जनाधिप ।
कृष्णस्यानुप्रविष्टास्तु बलाद्या यादवास्तथा । प्रविष्टाश्च तथा सर्व्वे पाण्डवाश्च महात्मनः ।
सर्व्वेनास्तु प्रविष्टास्ते कृष्णस्यानुमतेन वै । युयुधे स तु कृष्णेन रौक्मिणेयः प्रचोदितः ।
आनयद्यादवान् सर्व्वान् यानयं बाध्नवान् पुरा । ते मुक्ता रौक्मिणेयेन प्राप्ता यत्र जनार्द्दनः ।
प्रहृष्टमनसः सर्व्वे निकुम्भवधकाङ्क्षिणः । राजानो वीर मुञ्चेति पुनः काममयाव तेन ।
मुमोच चाथ तान् वीरान् रौक्मिणेयः प्रतापवान् । अधोमुखमुखाः सर्व्वे बद्धमौना नराधिपाः ।
लज्जयाऽभिप्लुता वीरास्तस्थुर्नष्टश्रियस्तदा । निकुम्भमपि गोविन्दः प्रयतन्तं जयम्प्रति ।
योधयामास भगवान् घोरमात्मरिपुं हरिः । परिघेणाहतः कृष्णो निकुम्भेन स्वयं विभो ।
गदया चापि कृष्णेन निकुम्भस्ताडितो स्वयं । तावुभौ मोहमापन्नौ सुप्रहारहतौ तदा ।
ततः प्रव्यथितान् दृष्ट्वा पाण्डवांश्चाथ यादवान् । जेपुर्मुनिगणास्तत्र कृष्णस्य हितकाम्यया ।

तुष्टुवुश्च महात्मानं वेदप्रोक्तैः स्तवैस्तथा । ततः प्रत्यागतप्राणो भगवान् केशवस्तदा । ८१७५
दानवश्च पुनर्वीरावुद्यतौ समरं प्रति । वृषभाविव सङ्क्रुद्धौ गजाविव च भारत ।
शार्दूलौ वृकाविव क्रुद्धौ प्रहरन्तौ रणोत्कटौ । अथ कृष्णं तदोवाच नृप वागशरीरिणी ।
चक्रेण शमयस्वैनं देवब्राह्मणकण्टकं । इतिहोवाच भगवान् देवो विश्वोदकेश्वरः ।
धर्म्मं यशश्च विपुलं प्राप्नुहि त्वं महाबल । तथेत्युक्त्वा नमस्कृत्वा लोकनाथं कृताञ्जलिः ।
सुदर्शनं मुमोचाथ चक्रं दैत्यकुलान्तकं । तन्निकुम्भस्य चिच्छेद शिरः प्रवरकुण्डलं । ८१८०
नारायणभुजोत्सृष्टं सूर्य्यमण्डलवर्च्चसं । तत् पपात शिरस्तस्य भूमौ ज्वलितकुण्डलं ।
मेघमुक्तो गिरेः शृङ्गाच्चूर्णं इव भूतले । निकुम्भे निहते तस्मिन्देवो विश्वोदकेश्वरः ।
तुतोष च नरव्याघ्र जगत्त्रासकरे विभो । पपात पुष्पवृष्टिश्च शक्रसृष्टा नभस्तलात् ।
देवदुन्दुभयश्चैव प्रणेदुररिनाशन । ननन्द च जगत् कृत्स्नं कृष्णस्य विशेषतः ।
दैत्यकन्याश्च भगवान् यदुभ्यः प्रतस्थौ ददौ । चक्रियाणाश्च भगवान् सान्त्वयित्वा पुनः पुनः । ८१८५
रत्नानि च विचित्राणि वासांसि प्रवराणि च । रथानां वाजियुक्तानां षट्सहस्राणि केशवः ।
अददत् पाण्डवेयेभ्यः प्रीतात्मा गदपूर्व्वजः । तदेव चाथ प्रवरं षट्पुरं पुरवर्द्धनः ।
द्विजाय ब्रह्मदत्ताय ददौ तार्क्ष्यवरध्वजः । मन्त्रे समाप्ते च तदा शङ्खचक्रगदाधरः ।
विसर्ज्जयित्वा तांस्तत्र पाण्डवांश्च महाबलः । विश्वोदकेश्वरस्याथ समाजमकरोत् प्रभुः ।
मांससूपशताकीर्णं बह्वन्नं व्यञ्जनाकुलं । नियुद्धकुशलान्मल्लान् देवो मल्लप्रियस्तदा । ८१९०
योधयित्वा ददौ भूरि वित्तं वस्त्राणि चात्मवान् । मातापितृभ्यां सहितो यदुभिश्च महाबलः ।
अभिवाद्य ब्रह्मदत्तं ययौ द्वारवतीं पुरीं । स विवेश पुरीं रम्यां हृष्टपुष्टजनाकुलां ।
पुष्पचित्रपथां वीरो वन्द्यमानो नरैः पथि । इमं यः षट्पुरवधं विजयं चक्रपाणिनः ।
शृणुयाद्वा पठेद्वाऽपि स युद्धे जयमाप्नुयात् । अपुत्रो लभते पुत्रमधनो लभते धनं ।
व्याधितो मुच्यते रोगाद्बद्धश्चाप्यथ बन्धनात् । इदं पुंसवनं प्रोक्तं गर्भाधानञ्च भारत । ८१९५
श्राद्धेषु पठितं सम्यगक्षय्यकरणं स्मृतं ।

इदममरवरस्य भारत प्रथितबलस्य जयं महात्मनः । सततमिह हि यः पठेन्नरः सुगतिमितो व्रजते गतज्वरः ।
मणिकनकविचित्रपाणिपादो निरतिशयार्कगुणोऽरिहादिमध्यः । चतुरुदधिशयश्चतुर्विधात्मा जयति जगत्पुरुषः सहस्रनामा ।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि षट्पुरवधे चतुश्चत्वारिंशदधिकशततोऽध्यायः ॥ १४४ ॥

॥ जनमेजय उवाच ॥ श्रुतोऽयं षट्पुरवधो रम्यो मुनिवरोत्तम । पुरोकमन्धकवधं वैशम्पायन कीर्त्तय ।
भानुमत्याश्च हरणं निकुम्भस्य वधन्तथा । प्रब्रूहि वदतां श्रेष्ठ परं कौतूहलं हि मे । ८२००
॥ वैशम्पायन उवाच ॥ तेषु तेषु च दैत्येषु निहतेषु च विष्णुना । तपसा राधयामास मारीचं कश्यपं दितिः ।
तपसा कालयुक्तेन तथा शुश्रूषया मुनेः । आनुकूल्येन च तथा माधुर्य्येण च भारत ।
परितुष्टः कश्यपस्तु तामुवाच तपोधनां । परितुष्टोऽस्मि ते भद्रे वरं वरय सुव्रते ।

॥ दितिरुवाच ॥ हतपुत्त्राऽस्मि भगवन् देवैर्धर्म्मभृताम्वर । अवध्यं पुत्त्रमिच्छामि देवैरमितविक्रमं ।
॥ कश्यप उवाच ॥ अवध्यस्ते सुतो देवि दाक्षायणि भवेद्दिति । देवानां संशयो नात्र कश्चित् कमललोचने । ८२०५
देवदेवमृते रुद्रं तस्य न प्रभवाम्यहं । आत्मा ततस्ते पुत्त्रेण रक्षितव्यो हि सर्व्वथा ।
अभ्यालभत तां देवीं कश्यपः सत्यवागथ । अस्पृश्योदरदेशे तु सा पुत्त्रं सुषुवे ततः ।
सहस्रबाहुं कौरव्य सहस्रशिरसं तथा । द्विसहस्रेक्षणञ्चैव तावच्चरणमेव च ।
स व्रजत्यन्धवद्यस्मादनन्धोऽपि हि भारत । तमन्धकोऽयं नाम्नेति प्रोचुस्तत्र निवासिनः ।
अवध्योऽस्मीति लोकान् स सर्व्वान् बाधति भारत । हरत्यपि च रत्नानि सर्व्वाण्यात्मबलाश्रयात् । ८२१०
वासयत्यात्मवीर्य्येण निग्रहाप्सरसां गणान् । स्वेच्छन्मूर्च्छितोऽत्यर्थं सर्व्वलोकभयङ्करः ।
परदारापहरणं पररत्नविलोपनं । चकार सततं मोहादन्धकः पापनिश्चयः ।
त्रैलोक्यविजयं कर्त्तुमुद्यतः स तु भारत । सहायैरसुरैः सार्द्धं बहुभिः सर्व्वधर्षिभिः ।
तं श्रुत्वा भगवान् शक्रः कश्यपं पितरं ब्रवीत् । अन्धकेनेदमारब्धमीदृशं मुनिसत्तम ।
आज्ञापय विभो कार्य्यमस्माकं समनन्तरं । यवीयसः कथं नाम सोढव्यं स्यान्मुने मया । ८२१५
दृष्टपुत्त्रे प्रहर्त्तव्यं कथं नाम मया विभो । दक्षाच भवती कुर्य्यान्मन्युं मयि हते सुते ।
देवेन्द्रवचनं श्रुत्वा कश्यपोऽथाब्रवीन्मुनिः । वारयिष्यामि देवेन्द्र सर्व्वथा भद्रमस्तु ते ।
अन्धकं वारयामास दित्या सह तु कश्यपः । त्रैलोक्यविजयाद्वीर कृच्छ्रकृच्छ्रेण भारत ।
वारितोऽपि स दुष्टात्मा बाधत्येव दिवौकसः । तैस्तैरुपायैर्दुष्टात्मा प्रमथ्य च तथा परान् ।
बभञ्ज कानने वृक्षानुद्यानानि च दुर्म्मतिः । उच्चैःश्रवःसुतानश्वान् बलादप्यानयद्दिवः । ८२२०
नागान् दिग्गजसुतान् दिव्यानपि च भारत । बलाद्धरति देवानां पश्यतां बलदर्पितः ।
देवानाप्याययन्त्येव ये यज्ञास्तपसा तथा । तेषाञ्चकार विध्वंसं दुष्टात्मा देवकण्टकः ।
मेजुर्यथोक्तास्त्रयो वर्णास्तेपुर्नैव तपांस्यपि । अन्धकस्य भयाद्राजन यज्ञविघ्नानि कुर्व्वतः ।
तस्येच्छया वाति वायुरादित्यश्च तपत्युत । चन्द्रमाः सहनक्षत्रो दृश्यते नैव वा पुनः ।
न व्रजन्ति विमानानि विहायसि प्रभो प्रभो । अन्धकस्यातिघोरस्य बलदृप्तस्य दुर्म्मतेः । ८२२५
निरोङ्कारवषट्कारं जगद्वीर तदाऽभवत् । अन्धकस्यातिघोरस्य भयात् कुरुकुलोद्वह ।
कुरूनथोत्तरान् पापो द्रावयामास भारत । भद्राश्वान् केतुमालांश्च जम्बुद्वीपांस्तथैव च ।
मानयन्ति च तं देवा द[illegible]स्य दुरासदाः । भूतानि च तथाऽन्यानि समर्थान्यपि सर्व्वथा ।
ऋषयो बध्यमानास्तु समेता ब्रह्मवादिनः । अचिन्तयन्नन्धकस्य बधं धर्म्मभृताम्वर ।
तेषां वृहस्पतिर्म्मध्ये धीमानिदमथाब्रवीत् । नास्य रुद्रादृते मृत्युर्विद्यते च कथञ्चन । ८२३०
तथा वरे दीयमाने कश्यपेनाभिशब्दितं । नाहं रुद्रात् परित्रातुं शक्त इत्येव धीमता ।
तमुपायं चिन्तयामः शर्व्वो येन सनातनः । जानीयात् सर्व्वभूतानि पीड्यमानानि शङ्करः ।
विदितार्थो हि भगवानवश्यं जगतःप्रभुः । अस्यप्रमार्ज्जनं देवः करिष्यति सतां गतिः ।

श्रतं हि देवदेवस्य भवस्य अमितो सुरैः । यत्नोऽयमुग्रो रचितव्यो भावुकाचु विशेषतः ।
तेवयं नारदं सर्व्वे प्रयामः शरणं हितं । उपायं वेत्स्यते तत्र वयस्यो हि भवस्य सः ।
वृहस्पतिवचः श्रुत्वा सर्व्वे तेऽथ तपोधनाः । आधार्षं नारदं प्रोचुस्त्वां वयेति स चोक्तवान् ।
अपिष्वय तु यातेषु यत्कार्य्यं नारदो मुनिः । विचार्य्य मनसा विद्वानिति कार्य्यं स दृष्टवान् ।
स देवदेवं भगवान् द्रष्टुं मुनिरयाचयौ । मन्दारवनमध्यस्थो यत्र नित्यं वृषध्वजः ।
स तत्र रजनीमेकामुषित्वा मुनिसत्तमः । मन्दाराणां वने रम्ये दयितः शूलपाणिनः ।
आजगाम पुनः स्वर्गं लब्ध्वाऽनुज्ञां वृषध्वजात् । मन्दारपुष्पैः सुकृतां मालामावध्य भारत ।
ग्रथितां सविशेषान्तां सर्व्वगन्धोत्तमोत्तमां । तान्तामनामहामस्य तैरेव कुसुमैः कृतं ।
तस्य कण्ठे समासज्य महागन्धं नराधिप । आययावन्धको यत्र दुरात्मा बलदर्पितः ।
अन्धकस्त्वथ तं दृष्ट्वा गन्धमाघ्राय चोत्तमं । सन्तानकानां स्वग्मालां महागन्धां महामुने ।
कुतेयं पुष्पजातिर्व्वा कमनीया तपोधन । गन्धान् वर्णांश्च तांस्तान् हि भोः पृच्छति मुहुर्मुहुः ।
स्वर्गे सन्तानकुसुमान्यतिवर्त्तन्ति सर्व्वथा । कः प्रभुस्तस्य देशस्य शक्यं वासयितुं मुने ।
आचक्ष्व यद्यनुग्राह्या वयं ते देवतातिथे । तमुवाच मुनिश्रेष्ठः प्रहसन्निव भारत ।
ग्रहाय दक्षिणे हस्ते महतस्तपसो निधिः । मन्दरः पर्व्वतश्रेष्ठो वीर काननमं वनं ।
तत्र चैवंविधं पुष्पं भोः सृष्टिः शूलपाणिनः । न तु तत्र वने कश्चिदच्छन्देन महात्मनः ।
प्रवेष्टुं लभते तद्धि रक्षन्ति प्रवरोत्तमाः । नानाप्रहरणा घोरा नानावेशा दुरासदाः ।
अवध्याः सर्व्वभूतानां महादेवाभिरक्षिताः । नित्यं प्रक्रीडते तत्र सोमः सप्रवरो हरः ।
मन्दारद्रुमषण्डेषु सर्व्वात्मा सर्व्वभावनः । तपोविशेषैराराध्य हरं त्रिभुवनेश्वरं ।
शक्यं मन्दारपुष्पाणि प्राप्तुं कामप्रवंशज । । स्त्रीरत्नमणिरत्नानि यानि चान्यानि चाप्यथ ।
काङ्क्षितानि फलन्ति स्म ते द्रुमा हरवल्लभाः । न तत्र सूर्य्यः सोमोऽथ तपत्यतुलविक्रम ।
स्वयम्प्रभं तरुवनं तद्धि दुःखविवर्ज्जितं । तत्र गन्धान् स्रवन्त्यन्ये वस्त्राण्यन्ये महाद्रुमाः ।
वासांसि विविधान्यन्ये सुगन्धीनि महाबल । भक्ष्यं भोज्यञ्च पेयञ्च चोष्यं लेह्यं तथैव च ।
तरुभ्यः स्रवते तेभ्यो विविधं मनसेप्सितं । पिपासा वा बुभुक्षा वा ग्लानिस्त्विन्ताऽपि वाऽनघ ।
न मन्दारवने वीर भवतीत्युपधार्य्यतां । न ते वर्णयितुं शक्या गुणा वर्षशतैरपि ।
गुणा ये तत्र वर्त्तन्ते स्वर्गाद्बहुगुणोत्तराः । अतीव त्रिजगल्लोकान् स मदेन्द्रान्न संशयः ।
एकाहमपि यस्तत्र वसेद्धि दितिजोत्तम । स्वर्गस्थापि हि तत् स्वर्गं सुखानामपि तत् सुखं ।
बभूव जगतः सर्व्वमिति मे धीयते मनः ।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि अन्धकवधे पञ्चचत्वारिंशदधिकशततोऽध्यायः ॥ १४५ ॥

॥ वैशम्पायन उवाच ॥ अन्धको नारदवचः श्रुत्वा तत्त्वेन भारत । मन्दरं पर्व्वतं गन्तुं मनो दध्रे महासुरः ।
सोऽसुरान् सुमहातेजाः समानीय महाबलः । जगाम मन्दरं क्रुद्धो महादेवालयं तदा ।

तं महाभ्रप्रतिच्छन्नं महौषधिसमाकुलं। नानाविहगसमाकीर्णं मर्हार्षगणसेवितं।
चन्दनागुरुखण्डाढ्यं सरलद्रुमसङ्कुलं। किन्नरोद्गीतरम्यञ्च बहुनागसमाकुलं।
वातोद्धूतैर्वनैः फुल्लैर्नृत्यन्तमिव च क्वचित्। प्रस्रुतैर्धातुभिश्चित्रैर्विलिप्तमिव च क्वचित्। ८१६५
पक्षिस्वनैः सुमधुरैर्नदन्तमिव च क्वचित्। पुंवैः षट्चरणैः कीर्णं प्रपतद्भिरितस्ततः।
महाबलैश्च महिषैश्चरद्भिर्हस्तिनागणैः। चक्रांशुतुल्यैः श्विरैर्भूषितं हिमसन्निभं।
मृगराजशताकीर्णं मृगवृन्दनिषेवितं। स मन्दरगिरिं प्राह रुषितं बलदर्पितः।
वेत्सि त्वं हि यथाऽवध्यो वरदानादहं पितुः। मम चैव वशे सर्व्वं त्रैलोक्यं सचराचरं।
प्रतियोद्धुं न मां कश्चिदिच्छत्यपि गिरे भयात्। पारिजातवनञ्चास्ति तव सानौ महागिरे। ८१७०
सर्व्वकामप्रदैः पुष्पैर्भूषितं रत्नमुत्तमं। तदाचक्ष्वोपभोगाय ह्यागतं सवनं तव सानुजं।
किं करिष्यसि क्रुद्धस्त्वं मनो हि त्वरते मम। त्रातारं नाथ पश्यामि मया सर्व्वाहितस्य ते।
इत्युक्तो मन्दरस्तेन तत्रैवान्तरधीयत। ततोऽन्धकोऽतिरुषितो वरदानेन दर्पितः।
मुमोच नादं सुमहदिदं वचनमब्रवीत्। याच्यमानो मया नाम यस्मात् त्वं बहुमन्यसे।
अहं चूर्णीकरोमि त्वां बलं पर्व्वत पश्य मे। एवमुक्त्वा गिरेः शृङ्गमुत्पाट्य बहुयोजनं। ८१७५
निष्पिपेष गिरेस्तस्य शृङ्गेऽन्यस्मिन् वीर्य्यवान्। स तैरसुरैः सर्व्वैर्वरदानेन दर्पितः।
तं प्रच्छन्ननदीजालं भज्यमानं महागिरिं। विदित्वा भगवानुग्रस्त्वकारानुग्रहं गिरेः।
सविशेषतरं वीर मत्तद्विपमृगायुतं। महौजाखैर्व्वङ्गमैरावृतं चित्रकाननं।
नभस्युत्तैः पुरा यद्वत्तद्वदेव विराजते। अथ देवप्रभावेण शृङ्गाण्युत्पाटितानि तु।
क्षिप्तानि चासुरानेव घ्नन्ति घोराणि भारत। क्षिप्ता ये प्रपतायन्ते शृङ्गाणि तु महासुराः। ८१८०
शृङ्गैस्तैस्ते स्म बध्यन्ति पर्व्वतस्य जनाधिप। ये त्वन्यास्त्वसुरास्तत्र तिष्ठन्ति गिरिसानुषु।
शृङ्गैस्ते न स्म बध्यन्ते मन्दरस्य महागिरेः। ततोऽन्धकासुरः दृष्ट्वा सेनां तां मृदितां तथा।
रुषितः सुमहानादं नदित्वेदं तदाऽब्रवीत्। आह्वये ते वनं यस्य युद्धार्थमुपतिष्ठतु।
किं त्वयाऽचल युद्धेन हताः स्म च्छद्मना रणे। एवमुक्तेऽन्धकेन वृषभेण महेश्वरः।
संप्राप्तः शूलमुद्यम्य देवोऽन्धकजिघांसया। प्रमथानां गणैश्चैव वृतो वै बहुलोचनः। ८१८५
तथा भूतगणैश्चैव धीमान् भूतगणेश्वरः। प्रचकम्पे ततः कृत्स्नं त्रैलोक्यं रुषिते हरे।
सिन्धवश्च प्रतिस्रोतमूहुः प्रज्वलितोदकाः। जग्मुर्दिशोऽपि दाहांश्च सर्व्वतो घरतेजसा।
युयुधुश्च ग्रहाः सर्व्वे विपरीता जनाधिप। चेलुश्च गिरयस्तत्र काले कुरुकुलोद्वह।
प्रववर्षाथ पर्ज्जन्यः सधूमाङ्गारवृष्टयः। उष्णाभाश्चन्द्रमाश्चासीत् सूर्य्यः शीतप्रभस्तथा।
न ब्रह्मापि विदुस्तत्र मुनयो ब्रह्मवादिनः। वडवाः सुषुवुर्गा वै गावोऽश्वानपि चानघ। ८१९०
पेतुर्वृक्षाश्च मेदिन्यामच्छिन्ना भञ्जवात् क्षताः। वा धर्म्मे वृषभा गाश्च गावश्चारुरूर्द्धपान।
राक्षसा यातुधानाश्च पिशाचाश्चापि सर्व्वशः। विपरीतं जगद्दृष्ट्वा महादेवस्तथागतं।

मुमोच भगवाञ्छूलं प्रदीप्ताग्निसमप्रभं । तत् पपात हरोत्सृष्टमन्धकोरसि दुर्द्धरं ।
भस्मसाच्चाकरोद्रौद्रमन्धकं साधुकण्टकं । ततो देवगणाः सर्व्वे मुनयश्च तपोधनाः ।
शङ्करं तुष्टुवुश्चैव जगच्छत्रौ निवर्हिते । देवदुन्दुभयो नेदुः पुष्पवृष्टिः पपात ह । ८२९५
त्रैलोक्यं निर्वृतञ्चासीन्नरेन्द्र विगतज्वरं । प्रजगुर्द्देवगन्धर्व्वा ननृतुश्चाप्सरोगणाः ।
जेपुश्च ब्राह्मणा वेदानीजुश्च क्रतुभिस्तथा । यज्ञाः प्रकृतिमापेदुः कूलमध्यो यथा पुरा ।
न जज्वाल जले वह्निराशाः सर्व्वाः प्रसेदिरे । मन्दरः पर्व्वतश्रेष्ठः पुरेव विरराज ह ।
श्रिया परमया जुष्टः सर्व्वतेजःसमुच्छ्रयात् । रेमे सोमश्च भगवान् पारिजातवने हरः ।
सुप्रचारान् सुरान् कृत्वा शक्रादीन् धर्म्मतः प्रभुः । ८३००

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि अन्धकवधे षट्चत्वारिंशदधिकशततोऽध्यायः ॥ १४६ ॥

॥ जनमेजय उवाच ॥ मुनेऽन्धकवधः श्राव्यः श्रुतोऽयं खलु भो मया । शान्तिस्त्रयाणां लोकानां कृता देवेन धीमता ।
निकुम्भस्य हतं देहं द्वितीयं चक्रपाणिना । यदर्थञ्च यथा चैव तद्भवान् वक्तुमर्हति ।
॥ वैशम्पायन उवाच ॥ श्रद्दधानस्य राजेन्द्र वक्तव्यं भवतोऽनघ । चरितं लोकनाथस्य हरेरमिततेजसः ।
द्वारवत्यां निवसतो विष्णोरतुलतेजसः । समुद्रयात्रा संप्राप्ता तीर्थे पिण्डारके नृप ।
उग्रसेनो नरपतिर्वसुदेवश्च भारत । निक्षिप्तौ नगराध्यक्षौ शेषाः सर्व्वे विनिर्गताः । ८३०५
पृथग्बलः पृथग्धीमान् लोकनाथो जनार्द्दनः । गोष्ठ्यः पृथक् कुमाराणां नृदेवामरतेजसां ।
गणिकानां सहस्राणि निःसृतानि नराधिप । कुमारैः सह वार्ष्णेयै रूपवद्भिः स्वलङ्कृतैः ।
दैत्याधिवासं निर्ज्जित्य यदुभिर्दृढविक्रमैः । वेश्या निवेशिता वीर द्वारवत्यां सहस्रशः ।
सामान्यास्ताः कुमाराणां क्रीडानार्य्यो महात्मनां । इच्छाभोग्या गुणैरेव राजन्या वेशयोषितः ।
स्थितिरेषा हि भैमानां कृताः कृष्णेन धीमता । स्त्रीनिमित्तं भवेद्वैरं मा यदूनामिति प्रभो । ८३१०
रेवत्या चैकया सार्द्धं बलो रेमे ऽनुकूलया । चक्रवाकानुरागेण यदुश्रेष्ठः प्रतापवान् ।
कादम्बरीपानकलो भूषितो वनमालया । चिक्रीड सागरजले रेवत्या सहितो बलः ।
षोडशस्त्रीसहस्राणि जले जलजलोचनः । रमयामास गोविन्दो वैश्वरूप्येण सर्व्वदृक् ।
अहमिष्टा मया सार्द्धं जले वसति केशवः । इति ता मेनिरे सर्व्वा राजन्नारायणस्त्रियः ।
सर्व्वाः सुरतबद्धाशाः सर्व्वाः सुरततर्पिताः । मानमूहुश्च ताः सर्व्वा गोविन्दबहुमानजं । ८३१५
अहमिष्टाऽहमिष्टेति स्निग्धे परिजने तदा । नारायणस्त्रियः सर्व्वा मुदा शशाघिरे शुभाः ।
करजद्विजचिह्नानि कुचाधरगतानि ताः । दृष्ट्वा दृष्ट्वा जहृषिरे दर्पणेष्वमलेक्षणाः ।
गोत्रमुद्दिश्य कृष्णस्य जगिरे कृष्णयोषितः । पिबन्त्य इव कृष्णस्य नयनैर्वदनाम्बुजं ।
कृष्णार्पितमनोदृष्ट्यः कान्ता नारायणस्त्रियः । मनोहरतरा राजन्नभवन्नेकनिश्चयाः ।
एकार्पितमनोदृष्ट्यो नेर्ष्यां ताश्चक्रिरेऽङ्गनाः । नारायणेन देवेन तर्प्यमाणमनोरथाः । ८३२०
शिरांसि गर्व्वितान्यूहुः सर्व्वा निरवशेषतः । वासभ्यं केशवमयं वहन्त्यश्चारुदर्शनाः ।

ताभिस्तु सह चिक्रीड सर्व्वाभिर्हरिरात्मवान् । वैश्वरूप्येण विधिना समुद्रे विमले जले ।
उवाह सर्व्वगन्धाढ्यं स्वच्छं वारि महोदधिः । तोयञ्चालवणं वीर वासुदेवस्य शासनात् ।
गुल्फदघ्नं जानुदघ्नमूरुदघ्नमथापि वा । नार्य्यस्ताः स्तनदघ्नं वा जलं समभिकाङ्क्षितं ।
सिषिचुः केशवं पत्न्यो धारा इव महोदधिं । सिषेच ताश्च गोविन्दो मेघः फुल्लता इव ।
अवलम्ब्यापराः कण्ठे हरिं हरिणलोचनाः । उपगूहस्व मां वीर पतामीत्यब्रुवन् स्त्रियः ।
काश्चित् काष्ठमयैस्तेरुः प्लवैः सर्व्वाङ्गशोभनाः । क्रौञ्चवर्हिणनागानामाकारसदृशैः स्त्रियः ।
मकराकृतिभिस्त्वान्या मीनाभैरपि चापराः । बहुरूपाकृतिधरैः पुप्लुवुश्चापराः स्त्रियः ।
स्तनकुम्भैस्तथा तेरुः कुम्भैरिव तथाऽपराः । सलिले तु समुद्रस्य हर्षयन्त्यो जनार्द्दनं ।
रराम सह रुक्मिण्या जले तस्मिन्मुदा युतः । येनैव कार्य्ययोगेन रमत्यमरसत्तमः ।
तत्तदेव हिताश्चक्रुर्मुदा नारायणस्त्रियः । तनुवस्त्रावृतास्तन्व्यो लीलायन्त्यस्तथाऽपराः ।
चिक्रीडुर्वासुदेवस्य जले जलजलोचनाः । यस्या यस्यास्तु यो भावस्तां तां तेनैव केशवः ।
अनुप्रविश्य भावज्ञो निनायात्मवशं वशी । हृषीकेशोऽपि भगवान् हृषीकेशः सनातनः ।
बभूव देशकालेन कान्तावशगतः प्रभुः । कुलशीलसमोऽस्माकं योग्योऽयमिति मेनिरे ।
देशरूपेण वर्त्तन्तमङ्गनास्ता जनार्द्दनं । दृष्ट्वा दाक्षिण्ययुक्तन्तु स्मितपूर्व्वाभिभाषिणं ।
कृष्णं भार्य्याश्चकमिरे भक्त्या च बहुमेनिरे । पृथग्गोष्ठ्यः कुमाराणां प्रकाशं स्त्रीगणैः सह ।
अलञ्चक्रुर्जलं वीराः सागरस्य गुणाकराः । गीतनृत्यविधिज्ञानां तासां स्त्रीणां जनेश्वर ।
तेजसा व्याहृतानान्ते दाक्षिण्यात्तस्थिरे वशे । प्रदत्तलक्ष्यानुगीतानि तथा स्वाभिनयान्यपि ।
तूर्य्याण्युत्तमनारीणां मुमुदुर्यदुपुङ्गवाः । पञ्चचूडां ततः कृष्णः कौवेरीश्च वराप्सराः ।
माहेन्द्रीश्चानयामास वैश्वरूप्येण हेतुना । ताः प्रीवाचाप्रमेयात्मा सान्त्वयित्वा जगत्प्रभुः ।
उत्थापयित्वा प्रणताः कृताञ्जलिपुटास्तदा । क्रीडायुवत्यो भैमानां प्रविशध्वमशङ्किताः ।
मत्प्रियार्थं वरारोहा रमयध्वञ्च यादवान् । दर्शयध्वं गुणान् सर्व्वान्नृत्यगीतैरहःसु च ।
तथाऽभिनययोगेषु वाद्येषु विविधेषु च । एवं कृते विधास्यामि श्रेयो वो मनसेप्सितं ।
मच्छरीरसमा ह्येते सर्व्वे निरवशेषतः । शिरसाज्ञां तु ताः सर्व्वाः प्रतिगृह्य हरेस्तदा ।
क्रीडायुवत्यो भैमानां ताः प्रविष्टाऽप्सरोवराः । ताभिः प्रविष्टमात्राभिर्द्योतितः स महार्णवः ।
सौदामिनीभिर्नभसि घनवृन्द इवानघ । ता जले स्थलवत् स्थित्वा जलवाद्यान्यवादयन् ।
चक्रुश्चाभिनयं सम्यक् स्वर्गावास इवाङ्गनाः । गन्धैर्माल्यैश्च ता दिव्यैर्वस्त्रैश्चायतलोचनाः ।
हेलाभिर्हास्यभावैश्च जहुर्भैममनांस्यथ । कटाक्षैरिङ्गितैर्हासैः केलिरावैः प्रसादितैः ।
मनोऽनुकूलैर्भैमानां समाजह्रुर्मनांसि ताः । उत्क्षिप्योत्क्षिप्य चाकाशं वातस्कन्धान् वहन्त्य तान् ।
मदिरावशगान् भैमानानयन्ति वराङ्गनाः । कृष्णोऽपि तेषां प्रीत्यर्थं विजहे वियति प्रभुः ।

सर्व्वैः षोडशभिः सार्द्धं स्त्रीसहस्रैर्मुदाऽन्वितः । प्रभावज्ञास्तु ते वीराः कृष्णस्यामिततेजसः ।
न जग्मुर्विस्मयं भैमा गाम्भीर्य्यं परमास्थिताः । केचिद्रैवतकं गत्वा पुनरायान्ति भारत ।
दृष्ट्वाऽन्ये वनान्यन्ये काङ्क्षितान्यरिमर्द्दन । अपेयः पेयसलिलः सागरश्चाभवत्तदा ।
आज्ञया लोकनाथस्य विष्णोरतुलतेजसः । अधावन् स्थलवच्चापि जले जलजलोचनाः ।
दृष्ट्वा हस्ते तथा नार्य्यो युक्ता मध्यंस्तथापि ते । भक्ष्यभोज्यानि पेयानि चोष्यं लेह्यन्तथैव च । ८१५५
बहुप्रकारं मनसा ध्याते तेषां भवत्युत । अम्लानमाल्यधारिण्यस्ताः स्त्रियस्तानरिन्दिताः ।
रहःसु रमयाञ्चक्रुः स्वर्गे देवरतानुगाः । नौभिर्बहुप्रकाराभिश्चिक्रीडुरपराजिताः ।
स्नाताऽनुलिप्ता मुदिताः सायाक्ताऽन्धकवृष्णयः । आयताश्चतुरस्राश्च वृत्ताश्च स्वस्तिकास्तथा ।
प्रासादा नौषु कौरव्य विहिता विश्वकर्म्मणा । कैलासमन्दरच्छन्दा मेरुच्छन्दास्तथैव च ।
तथा नानावयश्छन्दास्तथैवाम्बरगरूपिणः । वैदूर्य्यतोरणैश्चित्राश्चित्राभिर्मणिभक्तिभिः । ८१६०
मसारगल्वर्कमयैश्चित्रा भक्तिशतैरपि । प्रक्रीडगरुडच्छन्दाश्चित्राः कनकरोतिभिः ।
क्रौञ्चच्छन्दाः शुकच्छन्दा गजच्छन्दास्तथाऽपरे । कर्णधारैर्युताः हीनास्ता नावः कान्तस्वरोज्ज्वलाः ।
सलिलं शोभयामासुः सागरस्य महोर्म्मिमत् । समुच्छ्रितैः सितैः पोतैर्यानपात्रैस्तथैव च ।
नौभिश्च शिबिकाभिश्च शुशुभे वरुणालयः । पुराण्याकाशगामीनि गन्धर्व्वाणामितस्ततः ।
बभ्रमुः सागरजले भैमयानानि भारत । नन्दनच्छन्दयुक्तेषु यानपात्रेषु भारत । ८१६५
नन्दनप्रतिमं सर्व्वं विहितं विश्वकर्म्मणा । उद्यानानि सभा वृक्षा दीर्घिकाः स्यन्दनानि च ।
निवेशितानि शिल्पानि तादृशान्येव सर्व्वथा । स्वर्गच्छन्देषु चान्येषु समासात् स्वर्गसन्निभाः ।
नारायणाज्ञया वीर विहिता विश्वकर्म्मणा । वनेषु रुरुवुर्हृद्यं मधुरश्चैव पक्षिणः ।
मनोहरतरश्चैव भैमानाममितौजसां । देवलोकोद्भवाः श्वेता विलेपुः कोकिलास्तथा ।
मधुराणि विचित्राणि यदूनां काङ्क्षितानि च । चन्द्रांशुसमरूपेषु हर्म्यपृष्ठेषु बर्हिणः । ८१७०
ननृतुर्म्मधुरारावाः शिखण्डिगणसंवृताः । पताकायानपात्राणां सर्व्वपक्षिगणायुताः ।
भ्रमरैरुपगीताश्च स्रग्दामासक्तवासिभिः । नारायणाज्ञया वृक्षाः पुष्पाणि मुमुचुर्भृशं ।
ऋतवश्चानुरूपाणि विहायसि गतास्तदा । ववौ मनोहरो वातो रतिखेदहरः सुखः ।
रजोभिः सर्व्वपुष्पाणां युक्तश्चन्दनशैत्यभृत् । शीतोष्णमिश्रकृतां तत्र बभूव वसुधापते ।
वासुदेवप्रसादेन भैमानां क्रीडतां तदा । न क्षुत्पिपासे न ग्लानिर्न चिन्ता शोक एव च । ८१७५
आविवेश तदा भैमान् प्रभावाच्चक्रपाणिनः । अप्रशान्तमहातूर्य्या गीतनृत्योपशोभिता ।
बभूव सागरक्रीडा भैमानाममितौजसां । बहुयोजनविस्तीर्णं समुद्रं सलिलाशयं ।
रुद्ध्वा चिक्रीडुरिन्द्राभा भैमाः कृष्णाभिरक्षिताः । परिच्छदस्यानुरूपं यानपात्रं महात्मनः ।
नारायणस्य देवस्य विहितं विश्वकर्म्मणा । रत्नानि यानि त्रैलोक्ये विशिष्टानि विशाम्पते ।
कृष्णस्य तानि सर्व्वाणि यानपात्रेऽतितेजसः । पृथक् पृथक् निवासाश्च स्त्रीणां कृष्णस्य भारत । ८१८०

मणिवैदूर्य्यचित्राङ्गाः कार्त्तस्वरविभूषिताः । सर्व्वर्त्तुकुसुमाकीर्णाः सर्व्वगन्धाधिवासिताः ।
षट्पदैः शुभैर्जुष्टाः शकुनैः स्वर्गवासिभिः ।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि भानुमतीहरणे सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥

॥ वैशम्पायन उवाच ॥ रेमे बलश्चन्दनपङ्कदिग्धः कादम्बरीपानकलः प्रहृष्टः । रक्तेक्षणो रेवतिमाश्रयित्वा प्रलम्बबाहुः
स्खलितः प्रयातः ।
नीलाम्बुदाभे वसने वसानश्चन्द्रांशुगौरो मदिराविलाक्षः । रराज रामोऽम्बुदमध्यनेत्रः संपूर्णबिम्बो भगवानिवेन्दुः ।
वामैककर्णामलकुण्डलश्रीः स्मेरं मनोज्ञाब्जकृतावतंसः । तिर्य्यक्कटाक्षं प्रियया मुमोद रामो मुखं चास्यभिवीक्षमाणः । ८१८५
अथाज्ञया कंसनिकुम्भशत्रोरुदाररूपोऽप्सरसां गणः सः । हृष्टः मुदा रेवतिमाजगाम बलालयं स्वर्गसमानमृद्ध्या ।
तां रेवतीश्चाप्यथ वाऽपि रामं सर्व्वा नमस्कृत्य वराङ्गयष्ट्यः । वाद्यानुरूपं ननृतुः सुगात्र्यः समन्ततोऽन्या जगिरे च सम्यक् ।
चक्रुस्तथैवाभिनयेन लब्धं यथावदेषां प्रियमर्थयुक्तं । छन्दानुकूलश्च बलस्य तस्य तथाज्ञया रेवतराजपुत्र्याः ।
चुकुर्दुरन्याश्च तथैव तासां तद्देशभाषाकृतिवेशयुक्ताः । सहस्ततालं ललितं सलीलं वराङ्गनाः सर्व्वरताहृताङ्ग्यः ।
सङ्कर्षणाधोक्षजनन्दनानि सङ्कीर्त्तयन्त्योऽथ च मङ्गलानि । कंसप्रलम्बादिवधञ्च रम्यं चाणूरघातञ्च तथैव रङ्गे । ८१९०
यशोदयाथ प्रथितं यशोऽथ दामोदरत्वञ्च जनार्द्दनस्य । वधं तथाऽरिष्टकधेनुकाभ्यां व्रजे च वासं शकुनीवधञ्च ।
यथा च भग्नौ यमलार्ज्जुनौ च सृष्टिं वृकाणामपि कालयुक्तां । स कालियो नागपतिर्ह्रदे च कृष्णेन दान्तश्च यथा दुरात्मा ।
शङ्खं ह्रदादुद्धरणञ्च वीर पद्मोत्पलानां मधुसूदनेन । गोवर्द्धनोऽर्थे च गवां धृतोऽभूद्यथा च कृष्णेन जनार्द्दनेन ।
कुब्जां यथा गन्धकपेषिकाञ्च कुब्जत्वहीनां कृतवांश्च कृष्णः । अवामनं वामनकञ्च चक्रे कृष्णो यथात्मानमजोऽप्यनिन्द्यः ।
सौभप्रमाथञ्च हलायुधत्वं वधं परस्याप्यथ देवशत्रोः । गान्धारकन्या वहने नृपाणां रथे तथा योजनमूर्ज्जितानां । ८१९५
तथा सुभद्राहरणे जयञ्च युद्धे च बालाहकजम्बुमाले । ऐरावतप्रवेशश्च युधाजितैर्यत् समाह्वनं शक्रसमक्षमासीत् ।
एतानि चान्यानि च चारुरूपा जगुः स्त्रियः प्रीतिकराणि राजन् । सङ्कर्षणाधोक्षजहर्षणानि चित्राणि चानेककथाश्रयाणि ।
कादम्बरीपानमदोत्कटस्तु बलः प्रहृष्टः स चुकुर्द्द रामः । सहस्ततालं मधुरं समञ्च स भार्य्यया रेवतराजपुत्र्या ।
तं कूर्द्दमानं मधुसूदनः स दृष्ट्वा महात्मा हर्षान्वितास्यः । चुकूर्द्द सत्या सहितो महात्मा बलस्य धीमान् हर्षागमार्थं ।
समुद्रयात्रार्थमथागतश्च चुकूर्द्द पार्थो नरलोकवीरः । कृष्णेन सार्द्धं मुदितश्चुकूर्द्द सुभद्रया चैव वराङ्गयष्ट्या । ८२००
गदश्च धीमानथ सारणश्च प्रद्युम्नशाम्बौ नृप सात्यकिश्च । सात्राजितीसूनुरुदारवीर्य्यः स चारुदेष्णश्च महारूपः ।
वीरौ कुमारौ निशठोल्मुकौ च रामात्मजौ वीरतमौ चुकूर्द्दतुः । अक्रूरसेनापतिशङ्कवश्च तथाऽपरे भैमकुलप्रधानाः ।
तद्यानपात्रं ववृधे तदानीं कृष्णप्रभावेण जनेशपुत्र । आपूर्णमापूर्णमुदारकीर्त्ते चुकूर्द्दयद्भिर्नृपभैममुख्यैः ।
तैराप्लवैरतिकूर्द्दमानैर्यदुप्रवीरैरमरप्रकाशैः । हर्षान्वितं वीर जगत्तथाऽभूच्छमुश्च पापानि नरेन्द्रसूनोः ।
देवातिथिस्तत्र च नारदोऽथ विप्रः प्रियार्थं मधुकेशिशत्रोः । चुकूर्द्द मध्ये यदुसत्तमानां जटाकलापागलितैकदेशः । ८२०५
रासप्रणेता धुरि राजपुत्र स एव तत्राभवदप्रमेयः । मध्यञ्च गत्वा स चुकूर्द्द भूयो हेलाविकारैः सविडम्बिताङ्गैः ।
स सत्यभामामथ केशवञ्च पार्थं सुभद्राञ्च बलञ्च देवं । देवीं तथा रेवतराजपुत्रीं सन्दृश्य सन्दृश्य जहास धीमान् ।
ता हासयामास स धैर्य्ययुक्तास्तैस्तैरुपायैः परिहासशीलः । चेष्टानुकारैर्हसितानुकारैर्लीलानुकारैरपरैश्च धीमान् ।

आभाषितं किञ्चिदिवापलेच्छ मादानुनादान् भगवान्मुमोच । हसन् विहारांश्च चकार हर्षादभ्यागमं कृष्णविनोदनार्थं ।
कृष्णाज्ञया सातिशयानि तत्र यथानुरूपाणि ददुर्युवत्यः । रत्नानि वस्त्राणि च रूपवन्ति जगत्प्रधानानि नृदेव
सूनो । ८४१०
माल्यानि च स्वर्गसमुद्भवानि सन्तानदामान्यथ मुक्तकानि । सर्व्वर्त्तुकान्यप्यनघस्तदानीं ददुर्हरेरिङ्गितकालतज्ज्ञाः ।
रामावसाने त्वथ गृह्य हस्ते महामुनिं नारदमप्रमेयं । पपात कृष्णो भगवान् समुद्रे सात्राजितीं चार्ज्जुनमेव चाय ।
उवाच चामेयपराक्रमोऽथ शैनेयमीषत्प्रहसन् पृथुश्रीः । द्विधाकृताः स्मः पततां स भूत्वा क्रीडाजले नोऽस्तु महाङ्गनाभिः ।
सरेवतीकोऽस्तु बलोऽर्द्धनेता पुत्रा मदीयाश्च महार्द्धभैमाः । भैमार्द्धमेवाथ बलात्मजाश्च मत्पक्षिणः सन्तु समुद्रतोये ।
आज्ञापयामास ततः समुद्रं कृष्णः स्थितं प्राञ्जलिनं प्रतीतः । सुगन्धतोयो भव मृष्टतोयस्तथा भव ग्राहविवर्ज्जितश्च । ८४१५
दृश्या च ते रत्नविभूषिता च सा वेलिका भूरथ पत्तुला च । सेनानुकूलस्य जनस्य यत्नात् प्रयच्छ त्रिशास्यसि मत्प्रभा
वात् ।
भवस्व पेयोऽप्यथ वाऽप्यपेयो यो यस्य सर्व्वस्य मनोनुकूलः । वैदूर्य्यमुक्तामणिहेमचित्रा भवन्तु मत्स्यास्त्वयि सौम्यरूपाः ।
विसृज्य रत्नं कमलोत्पलानि सुगन्धिमुस्पर्शरसक्षमाणि । षट्पादजुष्टानि मनोहराणि चारूणि कीलालसमन्वितानि ।
मैरेयमाध्वीकसुरासवानां कुम्भांश्च पूर्णान् स्थापयस्व तोये । जाम्बूनदं पाननिमित्तमेषां पात्रं पर्य्येषु ददस्व भैमाः ।
पुष्पोडुपैर्वासितशीततोयो भवाप्रमत्तः खलु तोयराशे । यथा व्यलीकं न भवेद्यदूनां सल्लोजमानां कुरु तत्प्रयत्नं । ८४२०
इतीदमुक्त्वा भगवान् समुद्रं ततस्तु चिक्रीड महार्ज्जुनेन । सिषेच पूर्व्वं नृप नारदन्तु सात्राजितीकृष्णमुखेङ्गितज्ञा ।
ततो मदावर्ज्जितचारुदेहः पपात रामः सलिले सलीलं । आकारमालम्ब्य करं करेण मनोहरां रेवतराजपुत्रीं ।
कृष्णात्मजा ये त्वथ भैममुख्या रामस्य पक्षाः पतिताः समुद्रे । विरागवस्त्राभरणा प्रहृष्टाः क्रीडाभिरामा मदिराविलाक्षाः ।
शेषास्तु भैमा हरिमभ्युपेताः क्रीडाभिरामा निशठोल्मुकाद्याः । विचित्रवस्त्राभरणाश्च मत्ताः सन्तानमाल्याकृतकण्ठदेशाः ।
शौर्य्योपपन्नाः कृतचारुचिह्ना विलिप्तगात्रा जलयन्त्रहस्ताः । गीतानि तद्देशमनोहराणि स्वरोपपन्नान्यथ गायमानाः । ८४२५
ततः प्रचक्रुर्ज्जलवादितानि नानास्वराणि प्रियवाद्यघोषाः । महाप्सरोभिस्त्रिदिवालयाभिः कृष्णाज्ञया विश्रुतधूप्रतानि ।
आकाशगङ्गाजलवाद्यतज्ज्ञाः सदा युवत्यो मदनैकचित्ताः । आवादयंस्ता जलदर्दुरांश्च वाद्यानुरूपं जगिरे च हृष्टाः ।
कुशेशयाकोशविशालनेत्राः कुशेशयापीडविभूषिताश्च । कुशेशयानां रविबोधितानां जह्रुः श्रियं ताः सुरनारमुख्याः ।
स्त्रीवक्त्रचन्द्रैः शकलेन्दुकल्पैरराज राजन् शतशः समुद्रः । यदृच्छया देवविधानतो वा नभो यथा चन्द्रसहस्रकीर्णं ।
समुद्रमेघः स रराज राजन्कृतहृदारत्नप्रभयाऽभिरामः । सौदामिनीभिन्न इवाम्बुनाथो देदीप्यमानो नभसीव मेघः । ८४३०
नारायणश्चैव स नारदश्च सिषिचपक्षे कृतचारुचिह्नः । बलं सपक्षं कृतचारुचिह्नं स चैव पक्षं मधुसूदनस्य ।
हस्तप्रमुक्तैर्जलयन्त्रकैश्च प्रहृष्टरूपाः सिषिचुस्तदानीं । रागोद्धता वारुणिमण्डमत्ताः संकर्षणाधोक्षजदेवपत्न्यः ।
आरक्तनेत्रा जलमुक्तिसक्ताः स्त्रीणां समक्षं पुरुषायमाणाः । तेनोपरेमुः सुचिरञ्च भैमा मानं वहन्तो मदनं मदञ्च ।
अतिप्रसङ्गन्तु विदित्य कृष्णस्तान् वारयामास रथाङ्गपाणिः । स्वयं प्रवृत्तो जलवाद्यशब्दैः स नारदः पार्थसहायवांश्च ।
कृष्णेङ्गितज्ञा जलयुद्धसङ्गं भैमा निवृत्ता दृढमानिनोऽपि । नित्यं तथामन्दकराः प्रियाणां प्रियाश्च तेषां ननृतुः प्रती
ताः । ८४३५

नृत्यावसाने भगवानुपेन्द्रस्तत्याज धीमानथ तोयसङ्गम्। उत्तीर्य्य तोयादनुकूललेपं जग्राह दत्त्वा मुनिसत्तमाय।
उपेन्द्रमुत्तीर्णमथाशु दृष्ट्वा भैमा हि ते तत्यजुरेव तोयं। विभक्तगात्रास्त्वथ पानभूमिं कृष्णाज्ञया ते ययुरप्रमेयाः।
यथानुपूर्व्व्या च यथावयश्च यथासन्नियोगेश्च तदोपदिष्टाः। अन्नानि ते वै बुभुजुः प्रतीताः पपुश्च पेयानि यथानुकूलं।
मांसानि पक्वानि फलाम्लिकानि चुक्रोत्तरेणाथ च दाडिमेन। निष्टप्तशूल्यान् शकलान् पशूंश्च तत्रोपजह्रुः शुचयोऽथ सूदाः।
सुस्विन्नशूल्यांश्च हि पांश्च बालान् मृष्टान्सुनिष्टप्तघृताविसिक्तान्। वृक्षाम्लसौवर्च्चलचुक्रपूर्णान् पौरोगवोक्तानुपजह्रुरेषां। ८४०
पौरोगवोक्त्या विधिना मृगाणां मांसानि सिद्धानि च पीवराणि। नानाप्रकाराण्युपजह्रुरेषां मृष्टानि पक्वानि च चुक्रचूतैः।
पार्श्वानि चान्ये शकलानि तत्र ददुः पशूनां घृतसंचितानि। सामुद्रचूर्णैवरचूर्णितानि चूर्णेन मृष्टेन च मारिचेन।
समूलकैर्दाडिममातुलुङ्गैः पर्णासहिङ्ग्वार्द्रकभूस्तृणैश्च। तत्रोपदंशैः सुमुखोत्तरैस्ते पानानि हृष्टाः पपुरप्रमेयाः।
कट्वाङ्कशूल्यैरपि पत्त्रिभिश्च घृताम्लसौवर्च्चलतैलसिक्तैः। मैरेयमाध्वीकसुरासवांस्ते पपुः प्रियाभिः परिवार्य्यमाणाः।
श्वेतेन युक्तानपि शोणितेन भक्ष्यान् सुगन्धान् लवणान्वितांश्च आर्द्रान् किलाटान् घृतपूर्णकांश्च नानाप्रकारानपि खण्डका
द्यान्। ८४५
आपानपाश्वोद्भवभोजमिश्राः शाकैश्च सूपैश्च बहुप्रकारैः। पेयैश्च दध्ना पयसा च वीराः स्विन्नानि राजन् बुभुजुः प्रहृष्टाः।
तथा रसालाश्च बहुप्रकाराः पपुः सुगन्धानपि पानवीषु। शृतं पयः शर्करया च युक्तं फलप्रकारांश्च बहूंश्च खादन्।
तृप्ताः प्रवृत्ताः पुनरेव वीरास्ते भैममुख्या वनितासहायाः। गीतानि रम्याणि जगुः प्रहृष्टाः कान्ताभिनीतानि मनोहराणि।
आज्ञापयामास ततः समस्तां निशि प्रहृष्टो भगवानुपेन्द्रः। छालिक्यगान्धर्व्वविधानं यद्देवगन्धर्व्वमुदाहरन्ति।
जग्राह वीणामथ नारदस्तु षड्ग्रामरागादिसमाधियुक्तां। हल्लीषकन्तु स्वयमेव कृष्णः सुवंशघोषं नरदेवपार्थः। ८५०
मृदङ्गवाद्यानपरांश्च वाद्यान् वराप्सरसस्ता जगृहुः प्रतीताः। आसारितान्ते च ततः प्रतीता रम्भोत्थिता स्वाभिनयार्थतज्ज्ञा।
तयाभिनीते वरगात्रयष्ट्या तुतोष रामस्य जनार्द्दनस्य। अथोर्व्वशी चारुविशालनेत्रा हेमा च राजन्नथ मिश्रकेशी।
तिलोत्तमा चाप्यथ मेनका च एतास्तथाऽन्याश्च हरिप्रियार्थं। जगुस्तथैवाभिनयञ्च चक्रुरिष्टैश्च कामैर्मनसोऽनुकूलैः।
ता वासुदेवाप्यनुरक्तचित्तः संनृत्यगीताभिनयैरुदारैः। नरेन्द्रसूनो परितोषितेन ताम्बूलयोगेन वराप्सरोभिः।
तदागताभिर्नृवराङ्गनास्तु कृष्णाप्रसादान्न मनस्यास्तथैव। फलानि गन्धोत्तमवन्ति वीराश्छालिक्यगान्धर्व्वसयाचनञ्च। ८५५
कृष्णेच्छया च त्रिदिवान्नृदेव अनुग्रहार्थं भुवि मानुषाणां। स्थितञ्च रम्यं हरिरिज्यते प्रयोजयामास महीक्षिताथः।
छालिक्यगान्धर्व्वमुदारबुद्धिस्तेनैव ताम्बूलमथ प्रयुक्तं। प्रयोजितं पञ्चभिरिन्द्रतुल्यैश्छालिक्यमिष्टं सततं नराणां।
शुभावहं वृद्धिकरं प्रशस्तं मङ्गल्यमेवाथ तथा यशस्यं। पुण्यञ्च पुष्ट्यभ्युदयावहञ्च नारायणस्येष्टमुदारकीर्त्तेः।
जयावहं धर्म्मधुरावहञ्च दुःस्वप्ननाशं परिकीर्त्यमानं। करोति पापञ्च तथा विहन्ति शृण्वन् सुरावासगतो नरेन्द्रः।
छालिक्यगान्धर्व्वमुदारकीर्त्तिर्म्माने किलैकं दिवसं सहस्रं। चतुर्युगानां नृप रैवतोऽथ ततः प्रवृत्ता सुकुमारजातिः। ८६०
गान्धर्व्वजातिस्त्व तथापराणि दोषाश्रया दोषशतानि राजन्। विवेद कृष्णश्च सनारदश्च प्रद्युम्नमुख्यैर्नृप भैममुख्यैः।
विज्ञातमेतद्धि परे यथावद्देशमात्राणि जनोऽस्तु लोके। जानन्ति छालिक्यगुणोदयानां तोयं नदीनामथ वा समुद्रे।
ज्ञातुं हि शक्यं हिमवान् गिरिर्व्वा पलायतो वा गुणतोऽथ वापि। शक्यं न तच्छालिक्यमृते तपोभिस्तानि विधानान्यथ
मूर्च्छनाश्च।

षड्ग्रामरागेषु च तत्र कार्य्यं तस्यैकदेशावयवेन राजन्। लेशाभिधानं सुकुमारजातिं निष्ठां सुदुःखेन नराः प्रयान्ति।
कालिक्यगान्धर्व्वगुणोदयेषु ये देवगन्धर्व्वमहर्षिसंघाः। निष्ठां प्रयान्तीत्यवगच्छ बुद्ध्या कालिक्यमेवं मधुसूदनेन।
भैमोत्तमानां नरदेवदत्तं लोकस्य चानुग्रहकाम्ययैव। गतं प्रतिष्ठाममरोपगेयं बाला युवानश्च तथैव वृद्धाः।
क्रीडन्ति भैमाः प्रवरोत्सवेषु पूर्व्वन्तु बालाः समुदाहरन्ति। वृद्धाश्च पश्चात् प्रतिनानयन्ति स्वोत्सवेषु नित्यं प्रतिमानयन्ति
मर्त्येषु मर्त्यान् यदवोऽतिवीराः स्ववंशधर्म्मं समनुस्मरन्तः। पुरातनं धर्म्मविधानतज्ज्ञाः प्रीतिः प्रमाणं न वयः प्रमाणं।
प्रीतिप्रमाणानि हि सौहृदानि प्रीतिं पुरस्कृत्य हि ते दशार्हाः। वृष्ण्यन्धका पुत्त्रसखा बभूवुर्विसर्ज्जिताः केशिविनाशनेन।
स्वर्गं गताश्चाप्सरसां समूहाः कृत्वा प्रणामं मधुकंसशत्रोः। प्रहृष्टरूपस्य प्रहृष्टरूपा विनोदिताः केशिनिषूदनेन।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि भानुमतीहरणे अष्टचत्वारिंशदधिकशततोऽध्यायः ॥ १४८ ॥

॥ वैशम्पायन उवाच ॥ तेषां क्रीडाप्रसक्तानां यदूनां पुण्यकर्म्मणां। छिद्रमासाद्य दुर्ब्बुद्धिर्द्दैवशत्रुर्दुरासदः।
कन्यां भानुमतीं नाम भानोर्द्दुहितरं नृप। जहारात्मवधाकाङ्क्षी निकुम्भो नाम दानवः।
अन्तर्हितो मोहयित्वा यदूनां प्रमदाजनं। मायावी मायया राजन् पूर्व्ववैरमनुस्मरन्।
भ्रातुर्हि वज्रनाभस्य तस्य कन्या प्रभावती। प्रद्युम्नेन हृता वीर वज्रनाभस्तथा हतः।
भानोरेव तथारण्ये वसत्यवसरेण हि। अस्वाधीने दुराधर्षे छिद्रज्ञो दानवाधमः।
कन्यापुरे महानादः सहसा समुपस्थितः। तस्यां ह्रियत्यां कन्यायां रुदत्यां समितिञ्जय।
वसुदेवात्मकौ वीरौ दंशितौ निर्गतावुभौ। आर्त्तनादमुपश्रुत्य भानोः कन्यापुरे तदा।
न दृष्टिगोचरे तौ तु ददृशातेऽपकारिणं। तथैव दंशितौ यातौ यत्र कृष्णो महाबलः।
श्रुत्वावमानन्तु महदारुरोह जनार्द्दनः। पार्थेन सहितस्तार्क्ष्यं नागशत्रुमरिन्दमः।
रथे त्वमनुगच्छेति संदिश्य मकरध्वजं। त्वरेति गरुडं वीरः संदिदेश च काश्यपं।
वज्रं नगरमायान्तं निकुम्भं रणदुर्ज्जयं। पार्थकृष्णौ महात्मानावासेदतुररिन्दमौ।
प्रद्युम्नश्च महातेजा मायिनां प्रवरो नृप। प्रद्युम्नस्त्वथ तं दृष्ट्वा त्रिधात्मानमथाकरोत्।
तान् सर्व्वान् योधयामास निकुम्भः प्रहसन्निव। वज्रकण्टकगुर्व्वीभिर्गदाभिरनरोपमः।
सव्येनालम्ब्य हस्तेन कन्यां भानुमतीं नृप। दक्षिणेनाथ हस्तेन गदया प्रहरत्युत।
कन्यायार्थं न कृष्णो वा कामो वा नृपसत्तम। निर्द्दयं प्रहरन्ति स्म निकुम्भे च महासुरे।
समर्थास्ते महात्मानः शत्रुं हन्तुं दुरासदं। निशश्रमुर्नरपतेर्दयाभारावपीडिताः।
श्रेष्ठो धनुष्मतां पार्थः सर्व्वथा कुशलो युधि। नागोक्तविधिना दैत्यं शरपङ्क्त्या जघान ह।
ते तु वैतस्तिकैर्व्वाणैर्विव्यधुर्दानवं युधि। न कन्यां कलया युक्ता शितया च महीपते।
ततः स कन्यया सार्द्धं तत्रैवान्तरधीयत। आसुरीमाश्रितो मायां न तां वेत्ति हि कश्चन।
तं कृष्णौ रौक्मिणेयश्च पृष्ठतोऽनुययुस्तदा। हारीतः शकुनो भूत्वा तस्थावथ महासुरः।
तं वाणैः पुनरेवाथ वीरो भूयो धनञ्जयः। वैतस्तिकैर्म्मर्म्मभिद्भिः कन्यारक्षन्नताडयत्।
स इमां पृथिवीं कृत्स्नां सप्तद्वीपां महासुरः। बभ्रामानुगतश्चैव तैर्वीरैररिमर्द्दन।

गोकर्णस्योपरिष्टात्तु संश्रितः स महासुरः । पतात चेलगङ्गायाः पुलिने सह कन्यया ।
न देवा नासुरा वापि लङ्घयन्ति तपोधनाः । गोकर्णं तेजसा युक्तं महादेवस्य भारत ।
एतदन्तरमासाद्य प्रद्युम्नः शीघ्रविक्रमः । कन्यां भानुमतीं भैमो जहार रणदुर्ज्जयः । ८८४५
असुरः सोऽर्द्दितो राजन् कृष्णाभ्यां निशितैः शरैः । त्यक्त्वा योऽस्मरगोकर्णं निकुम्भो दक्षिणां दिशं ।
जगाम पृष्ठतो यातौ कृष्णौ तार्क्ष्यगतौ तदा । विवेश षट्पुरञ्चैव ज्ञातीनामालयन्तदा ।
तत्र वीरौ गृहद्वारि कृष्णौ रात्रिं तदोषतुः । रौक्मिणेयोऽपि कृष्णेन सन्दिष्टो द्वारकां पुरीं ।
अनयद्भानुतनयां प्रहृष्टेनान्तरात्मना । नयित्वा चाययौ वीरः षट्पुरं दानवाकुलं ।
ददर्श च गुहाद्वारि कृष्णौ भीमपराक्रमौ । ऊषतुर्द्वारमाक्रम्य षट्पुरस्य महाबलौ । ८८५०
कृष्णौ प्रद्युम्नसहितौ निकुम्भवधकाङ्क्षिणौ । ततोऽनन्तरमेतस्माद्बिलाद्दितिबलस्तदा ।
निर्ज्जगाम बली योद्धुं निकुम्भो भीमविक्रमः । तस्य निर्गच्छतस्तस्य बिलात् पार्थो विशाम्पते ।
रुरोध सर्व्वतो मार्गं शरैर्गाण्डीवनिःसृतैः । सोऽभिसृत्य गदां घोरामुद्यम्य वज्रकण्टकां ।
शिरस्यताडयत् पार्थं निकुम्भो बलिनाम्वरः । गदयाभिहते पार्थे रक्तं वमति मुह्यति ।
हर्षित्वा सोऽसुरो दृप्तो रौक्मिणेयमताडयत् । तं प्राद्युम्नमुखं वीरं मायावी मायिनाम्वरं । ८८५५
अदृष्टेनाहतो वीरः शिरस्यथ मुमोह सः । तथा गतौ तु तौ दृष्ट्वा मुह्यमानौ सुताडितौ ।
अभिदुद्राव गोविन्दो निकुम्भं क्रोधमूर्च्छितः । कौमोदकीं समुद्यम्य गदपूर्व्वाग्रजो गदां ।
तावन्योन्यं दुराधर्षौ गर्ज्जन्तावभिपेततुः । ऐरावणगतः शक्रः सर्व्वैर्देवगणैः सह ।
ददर्श तन्महायुद्धं घोरं देवासुरं तदा । दृष्ट्वा देवान् हृषीकेशश्चित्रैर्युद्धैररिन्दमः ।
दर्पेण दानवं हन्तुं देवानां हितकाम्यया । समण्डलानि चित्राणि दर्शयामास केशवः । ८८६०
कौमोदकीं महाबाहुर्लालयन् युद्धकोविदः । तथैवासुरमुख्योऽपि गदां तां वज्रकण्टकां ।
शिक्षया भ्रामयाणोऽथ मण्डलानि चकार ह । वृषभाविव गर्ज्जन्तौ दंष्ट्रिणाविव कुञ्जरौ ।
वाशितान्तरमासाद्य क्रुद्धौ शालावृकाविव । आजघान निकुम्भस्तु गदया गदपूर्व्वजं ।
स्पष्टाष्टघण्टया वीरं नादं मुक्त्वा तु दारुणं । तत्कालमेव कृष्णोऽपि भ्रामयित्वा महागदां ।
निकुम्भमूर्द्धनि तदा पातयामास भारत । अवष्टभ्य मुहूर्त्तन्तु हरिः कौमोदकीं तदा । ८८६५
तस्थौ जगद्गुरुर्द्धीमान्मुमोह पतितः क्षितौ । हाहाभूतं जगत् सर्व्वं तत्कालमभवत्तदा ।
तथागते वासुदेवे नरदेवमहात्मनि । आकाशगङ्गा तोयेन शीतेन सुसुगन्धिना ।
सिषेचामृतनिश्रेण कृष्णं देवेश्वरः स्वयं । नूनमात्मेच्छया कृष्णस्तथा चक्रे सुरोत्तमः ।
को हि शक्तो महात्मानं युद्धे मोहयितुं हरिं । कृष्णः प्रत्यागतप्राणश्चक्रमुद्यम्य भारत ।
प्रतीक्ष्येति दुरात्मानमुवाच रिपुनाशनः । निकुम्भोऽप्यतिमायावी उत्पपात दुरासदः । ८८७०
शरीरं तत् परित्यज्य न तं वेत्ति स केशवः । सुमूर्षति ततो वार्यमिति मत्वा जनार्द्दनः ।
ररक्ष स्मरमाणोऽथ वीरो वीरव्रतं विभो । अथ प्रद्युम्नकौन्तेयावागतौ लब्धचेतसौ ।

स्थितौ नारायणाभ्यासे निकुम्भवधनिश्चितौ । प्रद्युम्नोऽप्यथ मायावी विदितः कृष्णमब्रवीत ।
निकुम्भस्तात नान्यत्र गतः क्वापि सुदुर्म्मतिः । प्रद्युम्नेनैवमुक्ते तु तन्मनाश्च कलेवरं ।
प्रजहासाथ भगवानर्ज्जुनेन सह प्रभुः । तथायुतसहस्राणि निकुम्भानां जनाधिप ।
ददृशुस्ते तदा वीर स्थिता दिवि च सर्व्वतः । सहस्राण्येव कृष्णास्तु तथापार्थमरिन्दम ।
रौक्मिणेयं तथा वीरं तदद्भुतमिवाभवत् । पाण्डवस्य धनुः केचित् केचिदस्य महाशरान् ।
अन्येऽस्य जगृहुर्हस्तावन्ये पादौ महासुराः । एवं गृहाय तं वीरमगमंस्ते विहायसं ।
पार्थामामपि कायस्तु गृहीतानां तदाभवन् । नान्तं ददर्श कृष्णश्च कार्ष्णिश्च रिपुनाशनौ ।
विच्छिद्य तौ शरैर्वीरौ निकुम्भं पार्थवर्ज्जितौ । एकैकस्तु द्विधाच्छिन्नो द्वैधोभवति भारत ।
दिव्यज्ञानस्तदा कृष्णो भगवानत्र दृष्टवान् । निकुम्भं तत्त्वतश्चापि ददर्श मधुसूदनः ।
स्रष्टारं सर्व्वमायानां हर्त्तारं फाल्गुनस्य च । स चक्रेण शिरस्तस्य चकर्त्तासुरसूदनः ।
पश्यतां सर्व्वभूतानां भूतभव्यभवो हरिः । स मुक्ता फाल्गुनं राजंश्छिन्ने शिरसि भारत ।
पपातासुरमुख्योऽथ छिन्नमूल इव द्रुमः । अथाकाशगतं पार्थं पतमानं विहायसः ।
कृष्णवाक्येन जग्राह कार्ष्णिर्वियति मानदः । निकुम्भे पतिते भूमौ समाश्वास्य धनञ्जयं ।
जगाम द्वारकां वीरः पार्थकामसमन्वितः । समियाय दशार्होऽथ द्वारकां मुदितो विभुः ।
नारदश्च महात्मानं ववन्दे यदुनन्दनः । नारदोऽथ महातेजा भानुं यादवमब्रवीत् ।
भानो माकार्षीर्म्मन्युं त्वं श्रूयतां भैमनन्दन । क्रीडन्त्या रैवतोद्याने दुर्व्वासाः कोपितोऽनया ।
स शशाप ततो रोषान्मुनिर्दुहितरं तव । अतिदुर्ल्ललितैः कन्या शत्रुहस्तं गमिष्यति ।
सुतार्थे ते मया सार्द्धं मुनिभिः स प्रसादितः । बालां दुतवतीं कन्यामनागसमिमां मुने ।
शप्तवानसि धर्म्मज्ञ कथं धर्म्मभृताम्वर । अनन्तरं त्रिधत्त्वात्र वयं विज्ञापयामहे ।
अस्माभिरेवमुक्तस्तु दुर्व्वासा भैमनन्दन । उवाचाधोमुखो भूत्वा मुहूर्त्तं कृपयान्वितः ।
यदवोचमहं वाक्यं तत्तथा न तदन्यथा । रिपुहस्तमवश्यं हि गमिष्यति न संशयः ।
अदूषिता तु धर्म्मेण भर्त्तारमुपलप्स्यते । बहुपुत्रा बहुधना सुभगा च भविष्यति ।
सुगन्धिगन्धा च सदा कुमारी च पुनः पुनः । न च शोकमिमं घोरं तन्वङ्गी धारयिष्यति ।
एवं भानुमती वीर सहदेवाय दीयतां । श्रद्धावान् स शूरश्च धर्म्मशीलश्च पाण्डवः ।
ततो भानुमतीं भानुर्द्ददौ माद्रीसुताय वै । सहदेवाय धर्म्मात्मा नारदस्य वचः स्मरन् ।
आनीतः सहदेवश्च प्रेषिते चक्रपाणिना । विवाहे च तदा वृत्ते सभार्य्यः स्वपुरं गतः ।
इमं कृष्णस्य विजयं यः पठेच्छृणुयादथ । विजयं सर्व्वकृत्येषु श्रद्धावांश्च लभेन्नरः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि भानुमतीहरणे ऊनपञ्चाशदधिकशततोऽध्यायः ॥ १४९ ॥
॥ जनमेजय उवाच ॥ भानुमत्यापहरणं विजयं केशवस्य च । कालिक्यानयनञ्चैव देवलोकान्महामुने ।
क्रीडाञ्च सागरे दिव्यां वृष्णीनाममितौजसां । अश्रौषं परमाश्चर्य्यं मुने धर्म्मभृताम्वर ।

वज्रनाभवधं श्रुत्वा निकुम्भवधकीर्त्तने। तत्र कौतूहलं श्रोतुं प्रसादाद्भवतो मुने।
॥ वैशम्पायन उवाच ॥ हन्त ते वर्णयिष्यामि वज्रनाभवधं नृप। विजयञ्चैव कामस्य शाम्बस्यैव च भारत।
मेरोः सानौ नरपते तपस्तेपे महासुरः। वज्रनाभ इति ख्यातो निश्चितः समितिञ्जय।
तस्य तुष्टो महातेजा ब्रह्मा लोकपितामहः। वरेणच्छन्दयामास तपसा परितोषितः।
अवध्यतां स देवेभ्यो वव्रे दानवसत्तमः। पुरं वज्रपुरञ्चैवं सर्व्वरत्नमयं शुभं।
अच्छन्देन प्रवेशश्च न वायोरपि भारत। अचिन्तितेन कामानामुपपत्तिं नराधिप।
शाखानगरमुख्याणां संवाहानां शतानि च। नगरस्याप्रमेयस्य समन्ताज्जनमेजय।
तथा तदभवत्तस्य वरदानेन भारत। उवास वज्रनगरे वज्रनाभो महासुरः।
कोटिशो वरलब्धन्तमसुराः पर्य्युपासते। ऊषुर्वज्रपुरे राजन् सम्वाहेषु तथैव च।
शाखानगरमुख्येषु रम्येषु च नराधिप। हृष्टपुष्टप्रमुदिता नृपदेवस्य शत्रवः।
वज्रनाभोऽथ दुष्टात्मा वरदानेन दर्पितः। पुरस्थ चात्मनश्चैव जगद्बाधितुमुद्यतः।
महेन्द्रमब्रवीद्गत्वा देवलोकं विशाम्पते। अहमीशितुमिच्छामि त्रैलोक्यं पाकशासन।
अथवा मे प्रयच्छस्व युद्धं देवगणेश्वर। सामान्यञ्च जगत्कृत्स्नं काश्यपानां महात्मनां।
स बृहस्पतिना सार्द्धं मन्त्रयित्वा सुरेश्वर। वज्रनाभं सुरश्रेष्ठः प्रोवाच कुरुवंशज।
सत्रे स दीक्षितः सौम्य कश्यपो नः पिता मुनिः। तस्मिन् वृत्ते यथान्यायं तथा स हि करिष्यति।
ततः स पितरं गत्वा कश्यपं दानवोऽब्रवीत्। यथोक्तं देवराजेन तमुवाचाथ कश्यपः।
सत्रे वृत्ते करिष्यामि यथान्याय्यं भविष्यति। त्वन्तु वज्रपुरे पुत्र वस गच्छ समाहितः।
एवमुक्तो वज्रनाभः स्वमेव भवनं गतः। महेन्द्रोऽपि ययौ देवो द्वारकां द्वारमालिनीं।
गत्वा चान्तर्हितो देवो वासुदेवमथाब्रवीत्। वज्रनाभस्य वृत्तान्तं तमुवाच जनार्द्दनः।
शौरिरुपस्थितो देव वाजिमेधो महाक्रतुः। तस्मिन् वृत्ते वज्रनाभं पातयिष्यामि वासव।
तत्रोपायं प्रवेशे तु चिन्तयावः शताक्रते। नानिच्छया प्रवेशोऽस्ति तत्र वायोरपि प्रभो।
ततो गतो देवराजो वासुदेवेन सत्कृतः। वाजिमेधे च संप्राप्ते वसुदेवस्य भारत।
तस्मिन् यज्ञे वर्त्तमाने प्रवेशार्थं सुरोत्तमौ। चिन्तयामासतुर्वीरौ देवराजाच्युतावुभौ।
तत्र यज्ञे वर्त्तमाने सुनाट्येन नटस्तदा। महर्षींस्तोषयामास भद्रनामेति नामतः।
तं वरेण मुनिश्रेष्ठाश्छन्दयामासुरात्मवत्। स वव्रे हि नटो भद्रो वरं देवेश्वरोपमः।
देवेन्द्रकृष्णाच्छन्देन सरस्वत्या प्रचोदितः। प्रणिपत्य मुनिश्रेष्ठानश्वमेधे समागतान्।
॥ नट उवाच ॥ भोज्यो द्विजानां सर्व्वेषां भवेयं मुनिसत्तमाः। सप्तद्वीपाञ्च पृथिवीं विचरेयमिमामहं।
असिद्धाकाशगमनः सत्कुर्व्वंश्च विशेषतः। अवध्यः सर्व्वभूतानां स्थावरा ये च जङ्गमाः।
यस्य यस्य च वेशेन प्रविशेयमहं खलु। मृतस्य जीवतो वापि भावेनोत्पादितस्य च।
स तुल्यस्तादृशः स्यां वै जरारोगविवर्ज्जितः। तुष्येयुर्मुनयो नित्यमन्ये च मम सर्व्वदा।

एवमस्त्विति स प्रोक्तो ब्राह्मणैर्नृपते नटः । सप्तद्वीपां वसुमतीं पर्य्यटत्यमरोपमः ।
पुराणि दानवेन्द्राणामुत्तरांश्च कुरूंस्तथा । भद्राश्वान् केतुमालांश्च कालाम्रद्वीपमेव च ।
पर्व्वणीषु तु सर्व्वासु द्वारकां यदुमण्डितां । आयाति वरदत्तः स लोकवीर महानटः ।
ततो हंसान् धार्त्तराष्ट्रान् देवलोकनिवासिनः । उवाच भगवाञ्छक्रः सान्त्वयित्वा सुरेश्वरः । ८५८५
भवन्तो भ्रातरोऽस्माकं काश्यपा देवपक्षिणः । विमानवाहा देवानां सुकृतीनां तथैव च ।
देवानामस्ति कर्त्तव्यं कार्य्यं शत्रुवधान्वितं । तत् कर्त्तव्यं न मन्त्रश्च भेत्तव्यो वः कथञ्चन ।
न कुर्व्वतां देवताज्ञामुग्रो दण्डः पतेदपि । सर्व्वत्राप्रतिषिद्धं वो गमनं हंससत्तमाः ।
गत्वा प्रवेशमन्येषां वज्रनाभपुरोत्तमं । इतोऽन्तःपुरवापीषु चरमुख्यचितं हि वः ।
तस्यास्ति कन्यारत्नं हि त्रैलोक्यातिशयं शुभं । नाम्ना प्रभावती नाम चन्द्राभेव प्रभावती । ८५९०
वरदानेन सा लब्धा मात्रा किल वरानना । हैमवत्या महादेव्याः सकाशादिति नः श्रुतं ।
स्वयम्वरा च सा कन्या बन्धुभिः स्थापिता सती । आत्मेच्छया पतिं हंसा वरयिष्यति शोभना ।
तद्भवद्भिर्गुणा वाच्याः प्रद्युम्नस्य महात्मनः । सद्भूताः कुलरूपस्य शीलस्य वयसस्तथा ।
यदा सा रक्तभावा तु वज्रनाभसुता सती । तस्याः सकाशात् सन्देशो नयितव्यः समाधिना ।
प्रद्युम्नस्य पुनस्तस्मादानयध्वं तथैव च । स्वबुद्ध्या प्राप्तकालञ्च संविधेयं हितं मम । ८५९५
नेत्रवक्त्रप्रमादश्च कर्त्तव्यस्तत्र सर्व्वथा । तथा तथा गुणा वाच्याः प्रद्युम्नस्य महात्मनः ।
यथा यथा प्रभावत्या मनस्तत्र भवेत् स्थिरं । वृत्तान्तश्चानुदिवसं प्रदेयो मम सर्व्वथा ।
द्वारवत्यान्तु कृष्णस्य भ्रातुर्म्मम यवीयसः । तावद्यत्नश्च कर्त्तव्यः प्रद्युम्नो यावदात्मवित् ।
पर्य्यावर्त्तद्वरारोहां वज्रनाभसुतां विभुः । अवध्यास्ते तु देवानां ब्रह्मणो वरदर्पिताः ।
देवपुत्रैर्हि हन्तव्याः प्रद्युम्नप्रमुखैर्युधि । नटो दत्तवरस्तस्य वेशमास्थाय यादवाः । ८६००
प्रद्युम्नाद्या गमिष्यन्ति वज्रनाभविनाशनाः । एतच्च सर्व्वं कर्त्तव्यमन्यच्च स्वयमेव हि ।
प्राप्तकालं विधातव्यमस्माकं प्रियकाम्यया । प्रवेशस्तत्र देवानां नास्ति हंसाः कथञ्चन ।
वज्रनाभेप्सिते तत्र प्रवेशः खलु सर्व्वथा ।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि प्रद्युम्नोत्तरे पञ्चाशदधिकशततोऽध्यायः ॥ १५० ॥

॥ वैशम्पायन उवाच ॥ ते वासववचः श्रुत्वा हंसा वज्रपुरं ययुः । पूर्व्वोचितं हि गमनं तेषां तत्र नराधिप ।
ते दीर्घिकासु रम्यासु निपेतुर्वीर पक्षिणः । पद्मोत्पलैराच्छनासु काञ्चनैः स्पर्शसत्तमैः । ८६०५
ते वै नन्दन्तो मधुरं संस्कृतापूर्व्वभाषिणः । पूर्व्वमप्यागतास्ते तु विस्मयं जनयन्ति हि ।
अन्तःपुरोपभोग्यासु चेरुर्वापीषु ते नृप । दृष्टास्ते वज्रनाभस्य त्रिपिष्टपनिवासिनः ।
आलपन्तः सुमधुरं धार्त्तराष्ट्रा जनेश्वर । स तानुवाच दैतेयो धार्त्तराष्ट्रानिदं वचः ।
त्रिपिष्टपे नित्यरता भवन्तश्चारुभाषिणः । यदैवेहोत्सवोऽस्माकं भवद्भिरवगम्यते ।
आगन्तव्यं शानपादाः स्वमिदं भवतां गृहं । विस्रब्धञ्च प्रवेष्टव्यं त्रिपिष्टपनिवासिभिः । ८६१०

ते तथोक्ताः शकुनयो वज्रनाभेन भारत । तथेत्युक्त्वा हि त्रिदशइंद्राननेकान्नियमेन ।
चक्रुः परिचयं ते च देवकार्य्यव्यपेक्षया । मानुषालापिनस्ते तु कथाश्चक्रुः पृथग्विधाः ।
वंशे बद्धाः काश्यपानां सुकृतीनां सुभागिनां । स्त्रियो रेमुर्विशेषेण शृण्वन्त्यः सत्कृताः कथाः ।
ततो विचरतीं हंसा ददृशुश्चारुहासिनीं । प्रभावतीं वरारोहां वज्रनाभसुतां तदा ।
हंसाः परिचितां चक्रुस्तां ततश्चारुहासिनीं । सखीं शुचिमुखी चक्रे हंसी राजसुतां तदा ।
सा तां कदाचित् पप्रच्छ वज्रनाभसुतां सखीं । विश्रम्भितां पृथक्सूक्ष्माख्यानकथनैर्वरां ।
त्रैलोक्यसुन्दरीं वेद्मि त्वामहं हि प्रभावति । रूपशीलगुणैर्देवि किञ्चित्त्वां वक्तुमुत्सहे ।
व्यतिक्रामति ते भीरु यौवनं चारुहासिनि । यदतीतं पुनर्नैति गतं स्रोत इवाम्भसः ।
कामोपभोगतुल्या हि रतिर्देवि न विद्यते । स्त्रीणां जागर्त्ति कल्याणि सत्यमेतद्ब्रवीमि ते ।
स्वयम्बरे तु न्यस्ता त्वं पित्रा सर्व्वाङ्गशोभने । न च कांश्चिदरयसे देवासुरकुलोद्भवान् ।
व्रीडिता यान्ति सुश्रोणि प्रत्याख्यातास्त्वया शुभे । रूपशौर्य्यगुणैर्युक्ताः सदृशास्तत्कुलस्य हि ।
आगतान्नेच्छसे देवि सदृशान् कुलरूपयोः । द्रक्ष्यति किमर्थं त्वां प्रद्युम्नो रुक्मिणीसुतः ।
त्रैलोक्ये यस्य रूपेण सदृशोऽस्य कुलेन वा । गुणैर्वा चारुसर्व्वाङ्गि शौर्य्येणाप्यस्ति वा शुभे ।
देवेषु देवः सुश्रोणि दानवेषु च दानवः । मानुषेष्वपि धर्मात्मा मानुषः स महाबलः ।
यं सदा देवि दृष्ट्वा हि स्रवन्ति जघनानि हि । आपीनानीव धेनूनां स्रोतांसि सरितामिव ।
स पूर्णचन्द्रेण मुखं नयने वा कुशेशयैः । उत्सहामोपमातुं हि मृगेन्द्रेणाथ वा गतिं ।
जगतः सारमुद्धृत्य पुत्त्रः स विहितः शुभे । हत्वानङ्गं वरं साङ्गं विष्णुना प्रभविष्णुना ।
हृतेन शम्बरो बाल्ये येन पापो निवर्हितः । मायाश्च सर्व्वाः संप्राप्ता न च शीलं विनाशितं ।
यान् यान् गुणान् पृथुश्रोणि मनसा कल्पयिष्यसि । एष्टव्यास्त्रिषु लोकेषु प्रद्युम्ने सर्व्व एव ते ।
रुच्या वह्निप्रतीकाशः क्षमया पृथिवीसमः । तेजसा सूर्य्यसदृशो गाम्भीर्य्येण ह्रदोपमः ।
प्रभावती शुचिमुखीमितिहोवाच भाविनी ।
|| प्रभावत्युवाच || विष्णुर्मानुषलोकस्थः श्रुतः सुबहुशो मया । पितुः कथयतः सौम्य नारदस्य च धीमतः ।
शत्रुः किल स दैत्यानां वर्ज्जनीयः किलानघे । कुलानि किल दैत्यानां तेन दग्धानि भामिनि ।
प्रदीप्तेन रथाङ्गेन शार्ङ्गेण गदया तथा । शाखानगरदेशेषु वसन्ति किल येऽसुराः ।
इत्येते दानवेन्द्रेण संदिश्यन्ते हितं प्रति । मनोरथो हि सर्व्वासां स्त्रीणामेवं शुचिस्मिते ।
भवेद्धि मे पतिकुलं श्रेष्ठं पितृकुलादिति । यदिनामाभ्युपायः स्यात्तस्येहागमनं प्रति ।
महाननुग्रहो मे स्यात् कुलं स्यात् पावितञ्च मे । समर्थनां मे पृष्ट्वा त्वं प्रयच्छ शुचिलापिनि ।
प्रद्युम्नः श्लाघ्यया भर्त्ता मम वृष्णिकुलोद्भवः । अत्यन्तवैरी दैत्यानामुद्वेजनकरो हरिः ।
असुराणां स्त्रियो वृद्धाः कथयन्त्यो मया श्रुताः । प्रद्युम्नस्य यथा जन्म पुरस्तादपि मे श्रुतं ।
यथा च तेन निहतो बलवान् कालशम्बरः । हृदि मे वर्त्तते नित्यं प्रद्युम्नः खलु सत्तम ।

हेतुः स नास्ति स्यात्तेन यथा मम समागमः। दासी तवाहं सख्यार्थे दूतिं त्वाञ्च विसर्ज्जये।
पण्डितासि वदोपायं मम तस्य च सङ्गमे। ततस्तां सान्त्वयित्वा सा प्रहसन्तीदमब्रवीत्।
॥ शुचिमुख्युवाच ॥ तव दूती गमिष्यामि तवाहं चारुहासिनि। इमां भक्तिं तवोदारां प्रवक्ष्यामि शुचिस्मिते।
तथा चैव करिष्यामि यथैष्यति तवान्तिकं। साक्षात् कामेन सुश्रोणि भविष्यसि सकामिनी।
इति मे भाषितं सत्यं स्मरेथाः शुचिलोचने। कथाकुशलतां पित्रे कथयस्वायतेक्षणे। ८४४५
समस्तं तत्र मे देवि हितं सम्यक् प्रपत्स्यसे। इत्युक्ता सा तथा चक्रे यथा सा तामथाब्रवीत्।
दानवेन्द्रस्तु तां हंसीं पप्रच्छान्तःपुरे तदा। प्रभावत्या समाख्याता कथाकुशलता तव।
तत्त्वं शुचिमुखि ब्रूहि कथायोग्यतया वरे। किं त्वया दृष्टमाश्चर्य्यं जगत्युत्तमपक्षिणि।
अदृष्टपूर्व्वमन्यैर्व्वा योग्यायोग्यमनिन्दिते। सोवाच वज्रनाभन्तु हंसी नरवरोत्तम।
श्रूयतामित्ययामन्त्र्य दानवेन्द्रं महाद्युतिं। दृष्टा मे शाण्डिली नाम साध्वी दानवसत्तम। ८४५०
आश्चर्य्यं कर्म्म कुर्व्वन्ती मेरुपार्श्वे मनस्विनी। सुमनाश्चैव कौशल्या सर्व्वभूतहिते रता।
कथञ्चिदुरशाण्डिल्या शैलपुत्र्याः शुभा सखी। नटश्चैव मया दृष्टो मुनिदत्तवरः शुभः।
कामरूपी च भोज्यश्च त्रैलोक्ये नृत्यसत्तमः। कुरूनथाप्युत्तरान् वीर कालासद्वीपमेव च।
भद्राश्वान् केतुमालांश्च द्वीपानन्यांस्तथानघ। देवगन्धर्व्वगेयानि नृत्यानि विविधानि च।
स वेत्ति देवान्नृत्येन विस्माययति सर्व्वथा। ८४५५
॥ वज्रनाभ उवाच ॥ श्रुतमेतन्मया हंसि न चिरादिव विस्तरं। चारणानां कथयतां सिद्धानाञ्च महात्मनां।
कुतूहलं ममाप्यस्ति सर्व्वथा पक्षिनन्दिनि। नटं दत्तवरे तस्मिन् संस्तवस्तु नविद्यते।
॥ हंस्युवाच ॥ सप्तद्वीपान् विचरति नटः स दितिजोत्तम। गुणवन्तं जनं श्रुत्वा गुणहार्य्यः स सर्व्वथा।
तव चेच्छृणुयाद्वीर सम्भूतं गुणविस्तरं। नटं तदा गतं विद्धि पूरं तव महासुर।
॥ वज्रनाभ उवाच ॥ उपायः सृज्यतां हंसि येनेह स नटः शुभे। आगच्छेन्मम भद्रन्ते विषयं पक्षिनन्दिनि। ८४६०
ते हंसा वज्रनाभेन कार्य्यहेतोर्विसर्जिताः। देवेन्द्रायाथ कृष्णाय शशंसुः सर्व्वमेव तत्।
अथोत्तजेन प्रद्युम्नो नियुक्तस्तत्र कर्म्मणि। प्रभावत्याश्च संसर्गे वज्रनाभवधे तथा।
देवीं मायां समाश्रित्य संविधाय हरिर्नटं। नटवेशेन सैन्यानां प्रेषयामास भारत।
प्रद्युम्नं नायकं कृत्वा शाम्बं कृत्वा विदूषकं। पारिपार्श्वे गदं वीरमन्यान् सैन्यांस्तथैव च।
वारमुख्या नटीः कृत्वा तत्तूर्य्यसदृशं तदा। तथैव भद्रं भद्रस्य सहायांश्च तथाविधान्। ८४६५
प्रद्युम्नविहितं रम्यं विमानं ते महारथाः। जग्मुरारुह्य कार्य्यार्थे देवानाममितौजसां।
एकैकस्य समारूपे पुरुषाः पुरुषस्य ते। स्त्रीणाञ्च सदृशाः सर्व्वे स्वरूपैर्नराधिप।
ते वज्रनगरस्याथ शाखानगरमुत्तमं। जग्मुर्दानवसंकीर्णं स्वपुरं नाम नामतः।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि प्रद्युम्नोत्तरे एकपञ्चाशदधिकशततोऽध्यायः ॥ १५१ ॥
॥ वैशम्पायन उवाच ॥ ततः स्वपुरवासीनामसुराणां नराधिप। पूर्व्वश्रुतो नटः प्राप्तः कौतूहलमजीजनत्।

नटस्याथ ददुर्दैत्याः सत्कारं परया मुदा । सपर्य्यार्थं ददुश्चापि रत्नानि सुबहून्यथ । ८८७०
ततः स ननृते तत्र वरदत्तो नटस्तथा । स्वपुरे पुरवासीनां परं हर्षं समादधत् ।
रामायणं महाकाव्यमुद्दिश्य नाटकीकृतं । जन्म विष्णोरमेयस्य राक्षसेन्द्रवधेप्सया ।
लोमपादो दशरथ ऋष्यशृङ्गं महामुनिं । शान्तामानाययामास गणिकाभिः सहानघ ।
रामलक्ष्मणशत्रुघ्ना भरतश्चैव भारत । ऋष्यशृङ्गस्य शान्ता च तथारूपैर्नटैः कृतैः ।
तत्कालजीविनो वृद्धा दानवा विस्मयं गताः। आचचक्षुश्च तेषां वै रूपतुल्यत्वमच्युत । ८८७५
संस्काराभिनयो तेषां प्रस्तावामाश्च धारणं । दृष्ट्वा सर्व्वे प्रवेशस्य दानवा विस्मयं गताः ।
ते रक्ता विस्मयान्नेदुरसुराः परया मुदा । उत्थायोत्थाय नाट्यस्य विशेषेषु पुनः पुनः ।
ददुर्व्वस्त्राणि तुष्टाश्च वैदूर्यं वलयानि च । हारान्मनोहरांश्चैव हेमवैदूर्य्यभूषितान् ।
पृथगर्थेषु दत्तेषु श्लोकैस्ते तुष्टुवुर्नटाः । असुरांश्च मुनींश्चैव गोत्रैरभिजनैरपि ।
प्रेषितं वज्रनाभस्य शाखानगरवासिभिः । नटस्य दिव्यरूपस्य नरेन्द्रागमनं तदा । ८८८०
पुरा श्रुतार्थो दैत्येशः प्रेषयामास भारत । आनीयतां वज्रपुरं नटोऽसाविति हर्षितः ।
दानवेन्द्रवचः श्रुत्वा शाखानगरवासिभिः । नीता वज्रपुरं रम्यं नटवेशेन यादवाः ।
आवासश्च ततो दत्तः सुकृतो विश्वकर्म्मणा । एष्टव्यं यच्च तत् सर्व्वं दत्तं शतगुणोत्तरं ।
अथाकालोत्सवं चक्रे वज्रनाभो महासुरः । कारयामास रम्यञ्च चमूवाटं प्रशस्तवत् ।
ततस्तान् परिविश्रान्तान् प्रेक्षार्थाय प्रचोदयत् । दत्त्वा रत्नानि भूरीणि वज्रनाभो महासुरः । ८८८५
उपविष्टश्च तान्द्रष्टुं सह ज्ञातिभिरात्मवान् । कृत्वा चान्तःपुरं स्थाप्य चक्षुर्दृश्ये जनाधिप ।
भैमापि बद्धनेपथ्या नटवेशधरास्तथा । कार्य्यार्थं भीमकर्म्माणो नृत्यार्थमुपचक्रमुः ।
ततो घनं सशुषिरं मुरजानकभूषितं । तन्त्रीं स्वरगुणैर्विद्धामातोद्यानन्ववादयन् ।
ततस्तु देवगान्धारं छालिक्यं श्रवणामृतं । भैमस्त्रियः प्रजगिरे मनःश्रोत्रसुखावहं ।
आगान्धारे ग्रामरागे गङ्गावतरणं तदा । विद्धमासारितं रम्यं जगिरे स्वरसम्पदा । ८८९०
लयतालसमं श्रुत्वा गङ्गावतरणं शुभं । असुरान् रामयामासुरुत्थायोत्थाय भारत ।
नान्दीञ्च वादयामास प्रद्युम्नो गद एव च । शाम्बश्च वीर्य्यसम्पन्नः कार्य्यार्थं नटताङ्गतः ।
नान्द्यन्ते च तदा श्लोकं गङ्गावतरणाश्रितं । रौक्मिणेयस्तदोवाच सम्यक् स्वभिनयान्वितं ।
रम्भाभिसारं कौवेरं नाटकं ननृतुस्ततः । शूरो वारणरूपेण रम्भावेशा मनोवती ।
नलकूवरस्तु प्रद्युम्नः शाम्बस्तस्य विदूषकः । कैलासो रूपितश्चापि मायया यदुनन्दनैः । ८८९५
शापश्च दत्तः क्रुद्धेन वारणस्य दुरात्मनः । नलकूवरेणाथ यथा रम्भा वाऽप्यथ मान्विता ।
एतत् प्रकरणं वीरा ननृतुर्यदुनन्दनाः । नारदस्य मुनेः कीर्त्तिं सर्व्वज्ञस्य महात्मनः ।
पादोद्धारेण नृत्येन तथैवाभिनयेन च । तुष्टुवुर्दानवा वीरा भैमानाममितौजसां ।
ते ददुर्व्वस्त्रमुख्यानि रत्नान्याभरणानि च । हारांस्तरलविद्धांश्च वैदूर्य्यमणिभूषितान् ।

विमानानि विचित्राणि रथांश्चाकाशगामिनः । गजानाकाशगांश्चैव दिव्यनागकुलोद्भवान् ।
चन्दनानि च दिव्यानि शीतानि रसवन्ति च । गुरूण्यगुरुमुख्यानि गन्धाढ्यानि च भारत ।
चिन्तामणीनुदारांश्च चिन्तिते सर्व्वकामदान् । प्रेक्षासु तु सुवक्त्रेषु ददतो दानवास्तदा ।
धनरत्नैर्विरहिताः कृताः पुरुषसत्तम । स्त्रियो दानवमुख्यानां तथैव च जनेश्वर ।
ततो हंसी प्रभावत्याः सखी प्राह प्रभावतीं । गताऽस्मि द्वारकां रम्यां भैमगुप्तामनिन्दिते ।
प्रद्युम्नश्च मया दृष्टो विविक्ते चारुलोचनः । भक्तिश्च कथिता तस्य मया तव शुचिस्मिते ।
तेन दृष्टेन कालश्च कृतः कमललोचने । अद्य प्रदोषसमये त्वया सह समागमः ।
तदद्य रुचिरश्रोणि तव प्रियसमागमः । न ह्यात्मवति भाषन्ते मिथ्या भैमकुलोद्भवाः ।
ततः प्रभावती हृष्टा हंसीं तामिदमब्रवीत् । उषिताऽसि ममावासे सम्प्रुमर्हसि सुन्दरि ।
त्वयाऽहं सहितावासे द्रष्टुमिच्छामि केशवं । निःसाध्वसा भविष्यामि त्वया सह विहङ्गमे ।
हंसी तथेति चोवाच सखीं कमललोचनां । आरुरोह च तद्धर्म्यं प्रभावत्या विहङ्गमा ।
विश्वकर्म्मकृते तस्मिन् हर्म्यपृष्ठे प्रभावती । संविधानञ्चकाराशु प्रद्युम्नागमनक्षमं ।
तस्मिन् कृते संविधाने काममानयितुं ययौ । प्रभावतीमनुज्ञाप्य हंसी वायुसमा गतौ ।
सा गत्वाऽभ्यागता हंसी प्रभावतीमथाब्रवीत् । अभ्येति रौक्मिणेयोऽसावाश्वसायतलोचने ।
प्रद्युम्नो नीयमानस्तु ददृशे माल्यमात्मवान् । भ्रमरैरावृतं वीरः सुगन्धमरिमर्द्दनः ।
निलिल्ये तत्र माल्ये च भूत्वा मधुकरस्तदा । प्रभावत्या नीयमाने विदितार्थः प्रतापवान् ।
प्रवेशितश्च तन्माल्यं स्त्रीभिर्म्मधुकरायुतं । उपनीतं प्रभावत्यै स्त्रीभिस्तद्भ्रमरावृतं ।
अविदूरे च विन्यस्तं प्रभावत्या जनाधिप । भ्रमरास्ते ययुः सौम्य सन्ध्याकाले ह्युपस्थिते ।
स भैमप्रवरो वीरस्तैः सहायैर्विशीनितः । कर्णोत्पले प्रभावत्या निलिल्ये भ्रमरैरिव ।
ततः प्रभावती हंसीमुवाच वदताम्वरा । उद्यच्छन्तं पूर्णचन्द्रं सखीक्ष्यातिमनोहरं ।
सखि दहन्ति मेऽङ्गानि मुखञ्च परिशुष्यति । औत्सुक्यं हृदि चातीव कोऽयं व्याधिरनौषधः ।
दधद्द्विगुणसौन्दर्य्यमसौ पूर्णनिशाकरः । नवोदितः शीतरश्मिः संविहारो द्युतिप्रियः ।
न दृष्टपूर्व्वो हि मया श्रुतिमात्रेण काङ्क्षितः । अहो धूमायतेऽङ्गानि स्त्रीस्वभावस्य धिक् खलु ।
कल्पयामि यथा बुद्ध्या यदि नाभ्येति मे प्रियः । कुमुद्वतीगतं मार्गं हा गमिष्याम्यकिञ्चना ।
मदनाशीविषेणास्मि दष्टा हाहा मनस्विनी । शीतवीर्य्याः प्रकृत्यैव जगतो ह्लादनाः सुखाः ।
दहन्ति मम गात्राणि किं नु चन्द्रगभस्तयः । प्रकृत्या शीतलो वायुर्नानापुष्परजोवहः ।
दावाग्निसदृशो मेऽद्य दन्दहीति शुभां तनुं । तदहं संकल्पयत्येतत् शौर्य्यं कार्य्यमिवात्मनः ।
नावतिष्ठति निर्व्वीर्य्यं मनःसङ्कल्पधर्षितं । विमनस्काऽस्मि मुह्यामि वेपथुर्मे महान् हृदि ।
संभ्रमीति च मे दृष्टिर्हा हा यामि ध्रुवं क्षयं ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि प्रद्युम्नोत्तरे वज्रनाभीये द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥

॥ वैशम्पायन उवाच ॥ आविष्टेयं मया बाला सर्व्वथेत्यवगम्य तु। कार्ष्णिर्हृष्टेन मनसा हंसीमिदमुवाच ह।
दैत्येन्द्रतनयां प्राप्तमवगच्छस्व मामिह। षट्पदैः सह षट्पादो भूत्वा माल्ये निलीय तु। ८०३०
विधेयोऽस्मि प्रभावत्या यथेष्टं मयि वर्त्ततां। इत्युक्त्वा दर्शयामास सुरूपो रूपमात्मनः।
तद्धर्म्यपृष्ठं प्रभया द्योतितं तस्य धीमतः। अभिभूता प्रभा चैव राजंश्चन्द्रोद्भवा शुभा।
प्रभावत्यास्तु तं दृष्ट्वा ववृधे कामसागरः। चन्द्रस्येवोदये प्राप्ते पर्व्वण्यां सरितांपतिः।
सलज्जाधोमुखी किञ्चित् किञ्चित्तिर्य्यगवेक्षिणी। प्रभावती तदा तस्थौ निश्चलेवामलेक्षणा।
करेणाधःप्रदेशे तां चारुभूषणभूषिते। स्पृष्ट्वोवाच वरारोहां रोमाञ्चिततनुस्तनुं। ८०३५
मनोरथशतैर्लब्धं किं पूर्णेन्दुसमप्रभं। अधोमुखं मुखं कृत्वा न मां किञ्चित् प्रभाषसे।
प्रभोपमर्दं माकार्षीर्वदनस्य वरानने। साध्वसं त्यज्यतां भीरु दासः साध्वनुरज्यतां।
स कालमिव पश्यामि भीरु भीरुत्वमुत्सृज। याचाम्येषोऽञ्जलिं कृत्वा प्राप्तकालं निबोध मे।
गान्धर्व्वेण विवाहेन कुरुष्वानुग्रहं मम। देशकालानुरूपेण रूपेणानुत्तमा सती।
उपस्पृश्य ततो भैमो मणिस्थं जातवेदसं। जुहाव समये वीरः पुष्पैर्मन्त्रानुदीरयन्। ८०४०
जग्राहाथ करं तस्या वराभरणभूषितं। चक्रे प्रदक्षिणञ्चैव तं मणिस्थं हुताशनं।
प्रजज्वाल स तेजस्वी मानयन्नच्युतात्मजं। भगवान् जगतः साक्षी शुभस्याथाशुभस्य च।
उद्दिश्य दक्षिणां वीरो विप्राणां यदुनन्दनः। उवाच हंसीं द्वारस्था तिष्ठावां रक्ष पक्षिणि।
तस्यां प्रणम्य यातायां कामस्तां चारुलोचनां। गृहीत्वा दक्षिणे हस्ते निनाय शयनोत्तमं।
ऊरावथोपवेश्यैनां सान्त्वयित्वा पुनः पुनः। चुचुम्ब शनकैर्गण्डे वामयन्मुखमारुतैः। ८०४५
ततोऽस्या आपपौ वक्त्रं पद्मं मधुकरो यथा। आलिलिङ्गे च सुश्रोणीं क्रमेण रतिकोविदः।
अरामयद्रहस्येनां न चोद्वेजितवांस्तदा। आप कृत्स्नञ्च रत्यर्थं रतिकार्य्यविशारदः।
उवास स तया सार्द्धं रमन् कृष्णसुतः प्रभुः। अरुणोदयकाले च ययौ यत्र नटालयः।
अकामया प्रभावत्या कथञ्चित् स विसर्ज्जितः। तामेव मनसा कान्तां कान्तरूपां समुद्वहन्।
त ऊषुर्नटवेशेन कार्य्यार्थं भैमवंशजाः। प्रतीक्षन्तस्तदा वाक्यमिन्द्रकेशवयोस्तदा। ८०५०
उद्योगं वज्रनाभस्य त्रैलोक्यविजयं प्रति। प्रतीक्षन्तो महात्मानो गुह्यसंरक्षणे रताः।
कश्यपस्य मुनेः सत्रं यावत्तावन्नराधिप। देवासुराणां सर्व्वेषामविरोधो महात्मनां।
त्रैलोक्यविजयार्थाय जपतां धर्म्मचारिणां। एवं कालप्रतीक्षाणां वसतां तत्र धीमतां।
संप्राप्तः प्रावृषो रम्यः सर्व्वभूतमनोहरः। अर्हन्निशम्य वृत्तान्तं प्रयच्छन्ति मनोजवाः।
शक्रकेशवयोर्हंसाः कुमाराणां महात्मनां। रेमे सह प्रभावत्या प्रद्युम्नः शम्बरूपया। ८०५५
रात्रौ रात्रौ महातेजा धार्त्तराष्ट्रैरभिरक्षितः। तैर्हि वज्रपुरे हंसैर्व्वसद्भिर्वासवाज्ञया।
व्याप्तं नृप नटांस्तांश्च न विदुः कालमोहिताः। दिवाऽपि रौक्मिणेयस्तु प्रभावत्या नृपालये।
तिष्ठत्यन्तर्हितो वीरो हंससंघाभिरक्षितः। माययाऽस्य प्रतिच्छाया दृश्यते हि नटालये।

देशार्द्धेन तु कौरव्य निषेवे स प्रभावतीं । सम्प्रति विनयं शीलं लीलां दाक्ष्यं विलासितां ।
स्पृहयन्त्यसुरा दृष्ट्वा विदग्धाश्च महात्मनां । रूपं विलासं गन्धञ्च स्रजां भाषामथार्थितां । ८७६०
तासां यादवनारीणां स्पृहयन्त्यसुरस्त्रियः । वज्रनाभस्य तु भ्राता सुनाभो नाम विश्रुतः ।
दुहितृद्वयञ्च नृपते तस्य रूपगुणान्वितं । एका चन्द्रवती नाम्ना गुणवत्यथ चापरा ।
प्रभावत्यालयं ते तु व्रजतः खलु नित्यदा । ददृशाते तु ते तत्र रतिसक्तां प्रभावतीं ।
परिपप्रच्छतुश्चैव विस्रम्भोपगतां सतीं । सोवाच मम विद्याऽस्ति याऽधीता काङ्क्षितं पतिं ।
रत्यर्थमानयत्याशु सौभाग्यञ्च प्रयच्छति । देवं वा दानवं वापि विवशं सद्य एव हि । ८७६५
साऽहं रमामि कान्तेन देवपुत्रेण धीमता । दृश्यतां मत्प्रभावेण प्रद्युम्नः सुप्रियो मम ।
ते दृष्ट्वा विस्मयं याते रूपयौवनसम्पदं । पुनरेवाब्रवीत्ते तु भगिन्यौ चारुहासिनी ।
प्रभावती वरारोहा कालप्राप्तमिदं वचः । देवा धर्म्मरता नित्यं दम्भशीला महासुराः ।
देवास्तपसि रक्ता हि सुखे रक्ता महासुराः । देवाः सत्ये रता नित्यमनृते तु महासुराः ।
धर्म्मस्तपश्च सत्यञ्च यत्र तत्र जयो ध्रुवं । देवपुत्रौ वरयतं पती विद्यां ददाम्यहं । ८७७०
उषितौ मत्प्रभावेण सद्य एवोपलप्स्यथः । तां तथेत्यूचतुर्हृष्टे भगिन्यौ चारुलोचनां ।
परिपप्रच्छ भैमञ्च कार्य्यं तत् प्रति मानिनी । स पितृव्यं गदं वीरं शाम्बञ्चाप्यब्रवीत्तदा ।
रूपान्वितौ सुशीलौ च शूरौ च रणकर्म्मणि ।
॥ प्रभावत्युवाच ॥ परितुष्टेन दत्ता मे विद्या दुर्व्वाससा पुरा । परितुष्टेन सौभाग्यं सदा कन्यात्वमेव च ।
देवदानवयक्षाणां यं ध्यास्यसि स ते पतिः । भवितेति मया चैव वीरोऽयमभिकाङ्क्षितः । ८७७५
गृह्णीतं तदिमां विद्यां सद्यो वां प्रियसङ्गमः । ततो जगृहतुर्हृष्टे तां विद्यां भगिनीमुखात् ।
दध्यतुर्गदशाम्बौ च विद्यामभ्यस्य ते शुभे । तौ प्रद्युम्नेन सहितौ प्रविष्टौ भैमनन्दनौ ।
प्रच्छन्नं मायया वीरौ कार्ष्णिना मायिना नृप । गान्धर्व्वेण विवाहेन तावप्यरिबलार्द्दनौ ।
पाणिं जगृहतुर्वीरौ मन्त्रपूर्व्वं सतां प्रियौ । चन्द्रवत्या गदः शाम्बो गुणवत्या तु केशविः ।
रेमिरेऽसुरकन्याभिर्वीरास्ते यदुपुङ्गवाः । मार्गमाणास्त्वनुज्ञां ते शक्रकेशवयोस्तदा । ८७८०

इतिश्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वज्रनाभीये प्रद्युम्नान्तरे त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३ ॥

॥ वैशम्पायन उवाच ॥ नभो नभस्येऽथ निरीक्ष्य मासि कामस्तदा तोयदवृन्दकीर्णं । प्रभावतीञ्चारुविशाललोचनामुवाच पूर्णेन्दुनिकाशवक्त्रां ।
तवाननाभो वरगात्रि चन्द्रो न दृश्यते सुन्दरि चारुबिम्बः । त्वत्केशपाशप्रतिमैर्निरुद्धो बलाहकैश्चारुनिरन्तरैः ।
संदृश्यते सुभ्रु तडिद्घनस्था त्वं हेमसर्व्वाभरणान्वितेव । मुञ्चन्ति धाराश्च घना मदन्तस्त्वद्धारयष्टेः सदृशा वराङ्गि ।
घनप्रदेशेषु बलाकपंक्तयस्त्वद्दन्तपङ्क्तिप्रतिमा विभान्ति । निमग्नपद्मानि सरःसु सुभ्रु न भान्ति तोयानि रयाकुलानि ।
अमी घना वायुवशोपयाता बलाकमालामलचारुदन्ताः । अन्योन्यमभ्याहनितुं प्रवृत्ता वनेषु नागा इव शुक्लदन्ताः । ८७८५

धनुस्त्रिवर्णं वरगात्रि पश्य कृतं तवापाङ्गमिवाननस्थं । विभूषयन्तं गगनं घनांश्च प्रहर्षणं कामिजनस्य कान्ते ।
घनाम्बुदन्त: प्रतिनर्द्दमानान्निरीक्ष्य सुश्रोणि शिखीन् प्रहृष्टान् । समाहतानुत्क्षिप्तपिच्छभारान् प्रियाभिरामानुपनृत्यमा
नान् ।
हर्म्येषु चान्ये शशिपाण्डरेषु राजन्ति सुश्रोणि मयूरसंघा: । मुहूर्त्तशोभामतिचारुरूपां दत्त्वा पतन्तो वलभीपुटेषु ।
प्रक्षिप्तपक्षास्तरुमस्तकेषु मुहूर्त्तचूडामणितां विधाय । प्रयान्ति भूमिं नवशाद्वलानामाशङ्कमाना घृतचारुदेहा: ।
प्रवाति धारान्तरनि:सृतश्च सुखोऽनिलश्चन्दनपङ्कशीत: । कदम्बसर्ज्जार्ज्जुनपुष्पभूतं समावहन् गन्धमनङ्गबन्धुं । ८७९०
रतिश्रमस्वेदविनाशहेतुर्मनोदभारानयने च हेतु: । न मारुत: स्याद्यदि चारुगात्रि न मेघकालो मम वल्लभ: स्यात् ।
एवंविधेषु प्रियसङ्गमेषु रतावसाने यदुपैति वायु: । रतिश्रमस्वेदहर: सुगन्धिस्तत: परं किं सुखमस्ति लोके ।
जलाप्लुतानीक्ष्य महानदीनां सुगात्रि हंसा: पुलिनानि हृष्टा: । गता: श्रमं मानसवाससुब्धा: ससारसा: क्रौञ्चगणानुविद्धा: ।
न भान्ति नद्योऽथ सरांसि चैव हतत्विषश्चायतचारुनेत्रे । गतेषु हंसेष्वथ सारसेषु रथाङ्गतुल्याह्वयनेषु चैव ।
भोगैकदेशेन शुभं शयानं ध्रुवं जगन्नाथमुपेन्द्रमीशं । निद्राऽभ्युपेता वरकालतज्ज्ञा श्रियं प्रणम्योत्तमचारुरूपां । ८७९५
निद्रायमाणे भगवत्युपेन्द्रे मेघाम्बराक्रान्तनिशाकरोऽथ । पद्मामलाभ: कमलायताक्षि कृष्णस्य वक्त्रानुकृतिं करोति ।
कदम्बनीपार्ज्जुनकेतकानां स्रजो ध्रुवं कृष्णमुपानयन्ति । पुष्पाणि चान्यान्यृतव: समस्ता: कृष्णात् प्रसादानभिकाङ्क्षमाणा: ।
नागाश्चरन्तो विषदिग्धवक्त्रा: स्पृशन्ति पुष्पाण्यथ पादपान् यान् । पेपीयमाना भ्रमरैर्ज्जनानां कौतूहलं ते जनयन्त्यतीव ।
तोयातिभाराम्बुदवृन्दनद्धं नभ: पतिष्यन्तमिवाभिवीक्ष्य । निपातगम्भीरमभिप्रविष्टं मनोहरं चारुमुखस्समीर ।
बलाकमालाकुलमाल्यदाम्ना निरीक्ष्य रम्यं घनवृन्दमेतत् । सस्यानि भूम्यामभिवर्धमाणं जगद्धितार्थं विमलाङ्गयष्टे । ८८००
जलावलम्बाम्बुदवृन्दकर्षी घनैर्घनान् योधयतीव वायु: । प्रवृत्तचक्रो नृपतिर्बलस्थान् गजान् गजैः स्वैरिव वीर्य्यदृप्तान् ।
शुभैमम्भो विसृजन्ति मेघा: पूतं पवित्रं पवनै: सुगन्धि । हर्षावहं चातकबर्हिणानां वराङ्गनानां जलदप्रियाणां ।
प्लवङ्गम: षोडशपत्त्रशायी विरौति गोष्ठ: सह कामिनीभि: । यथा द्विजाति: प्रियसत्यधर्म्मा यथा स्वशिष्यै: परिवार्य्य
माण: ।
गुणो महांस्तोयदकालजोऽयं प्रवृद्धमेघस्वनभीषिता यत् । परिष्वजन्त्य: परिवर्द्धयन्ति विनाऽपि शय्यासमयं प्रियाणां ।
दोषोऽयमेक: सलिलागमस्य मां प्रत्युदारान् वयवर्णशीले । न दृश्यते यत्तव वक्त्रतुल्यो घनप्रच्छन्नतनु: शशाङ्क: । ८८०५
प्रदृश्यते भीरु यदा शशाङ्को घनान्तरस्थो जगत: प्रदीप: । तदाऽनुपश्यन्ति जना: प्रहृष्टा बन्धुं प्रवासादिव सन्निवृत्तं ।
विलापसाक्षी प्रियहीनितानां संदृश्यते भीरु यदा शशाङ्क: । नेत्रोत्सव: प्रोषितकामुकानां दृष्ट्वैव कान्तं भवतीत्यवैमि ।
नेत्रोत्सव: कान्तसमागतानां दावाग्नितुल्य: प्रियहीनितानां । तेनैव देहेन वराङ्गनानां चन्द्रोऽपि तावत् प्रियविप्रियश्च ।
विनाऽपि चन्द्रेण पुरे पितुस्ते यत: प्रभा चन्द्रमसस्त्रिगौरी । गुणागुणं चन्द्रमसो न वेत्ति यतस्ततोऽहं प्रसुसंसयिष्ये ।
अवाप यो ब्राह्मणराज्यमीशो दुरापमन्यै: सुकृतैस्तपोभि: । गायन्ति विप्रा:पवमानसंज्ञं यं सामगा: पर्व्वणि चाप्युदारं ८८१०
पिता बुधस्योत्तमवीर्य्यकर्म्मा पुरूरवा यस्य सुतो नृदेव: । प्राणाग्निरीशोऽग्रिमजोजनश्चो नष्टं शमीगर्भभवं भवात्मा ।
तथैव पश्चात्क्रमे महात्मा पुरोर्व्वशीमप्सरसां वरिष्ठां । पीत: पुरा योऽमृतसर्व्वदेहो मुनिप्रवीरैर्वरगात्रि घोरै: ।
नृप: कुशाद्यै: पुनरेव यस्य धीमान् कृतोऽग्निर्दिवि पूज्यते च । आयुश्च वंशे नहुषश्च यस्य यो देवराजत्वमवाप वीर: ।

देवातिदेवो भगवान् प्रसूतो वंशे हरिर्यस्य जगत्प्रणेता । भैमप्रवीरः सुरकार्य्यहेतोर्यः सुभ्रु दक्षस्य हृतः सुताभिः ।
बभूव राजा च वसुश्च यस्य वंशे महात्मा शशिवंशकेतुः । यश्चक्रवर्त्तित्वमवाप वीरः स्वैः कर्म्मभिः शक्रसमप्रभावः । ८८१५
यदुश्च राजा शशिवंशमुख्यो योऽवाप सम्राजमधिराजभावं । भोजाः कुले यस्य नराधिपस्य वीराः प्रसूताः सुरराज तुल्याः ।
न कूटकृद्यस्य नृपोऽस्ति वंशे न नास्तिको नैकृतिकोऽथ वाऽपि । अश्रद्दधानोऽप्यथ वा कदर्य्यः शौर्य्येण वा वारिरुहाक्षिहीनः ।
वंशे वधूस्त्वं कमलायताक्षि श्लाघ्या गुणानामतिपात्रभूता । कुरु प्रणामं शिरसाद्य तस्य लक्ष्मीशस्य सतां प्रियस्य ।
नारायणायात्मभवायनाय लोकायनाय त्रिदशायनाय । खगेन्द्रकेतोः पुरुषोत्तमाय कुरु प्रणामं श्वशुराय देवि ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वज्रनाभीये प्रद्युम्नोत्तरे चतुःपञ्चाशदधिकशततमोऽध्यायः ॥ १५४ ॥
॥ वैशम्पायन उवाच ॥ सत्रावसाने तु मुनेः कश्यपस्यातितेजसः । जग्मुर्देवासुराः स्थानि स्थानान्यमितविक्रमाः । ८८२०
वज्रनाभोऽपि निर्वृत्ते सत्रे कश्यपमभ्यगात् । त्रैलोक्यविजयाकाङ्क्षी तमुवाचाथ कश्यपः ।
वज्रनाभ निबोधस्व श्रोतव्यं यदि चेन्मम । वस वज्रपुरे पुत्र स्वजनेन समावृतः ।
तपसाऽभ्यधिकः शक्रः शक्रश्चैव स्वभावतः । भ्रातृणाञ्च ततश्चास्य ज्येष्ठः श्रेष्ठतमो गुणैः ।
राजा कृत्स्नस्य जगतः पात्रभूतः सतां गतिः । संप्राप्तो लोकराज्यं स सर्व्वभूतहिते रतः ।
नैव शक्यस्त्वया जेतुं वज्रनाभ विहन्यसे । अहिं यदा व्युत्क्रामन् वै नचिराद्विनशिष्यसि । ८८२५
वज्रनाभस्तु तद्वाक्यं नाभिनन्दति भारत । कालपाशपरीताङ्गो मर्त्तुकाम इवौषधं ।
अभिवाद्य सुदुर्ब्बुद्धिः कश्यपं लोकभावनं । त्रैलोक्यविजयारम्भे मतिश्चक्रे दुरासदः ।
ज्ञातियोधान् समानीय मित्राणि सुबहूनि च । प्रतस्थे स्वर्गमेवाशु विजिगीषन् विशाम्पते ।
एतस्मिन्नन्तरे देवौ कृष्णेन्द्रौ च महाबलौ । प्रेषयामासतुर्हंसान् वज्रनाभवधं प्रति ।
समागतास्तु तच्छ्रुत्वा यदुमुख्या महाबलाः । मन्त्रयित्वा महात्मानश्चिन्तामापेदिरे तदा । ८८३०
वज्रनाभोऽद्य हन्तव्यः प्रद्युम्नेनेत्यसंशयं । तयोर्दुहितरो भर्य्या भक्त्या ताः सर्व्वभावनाः ।
सर्व्वाः सगर्भास्ताश्चैव किन्नु कार्य्यमनन्तरं । प्राप्तः प्रसवकालश्च तासां नातिचिरादिव ।
संमन्त्रयित्वैतदर्थं हंसानूचे महाबलः । आख्येयमर्थवत् कृत्स्नं शक्रकेशवयोस्तदा ।
हंसैर्गत्वा तदाख्यातं देवयोस्तद्यथातथं । ताभ्यां हंसास्तु सन्दिष्टा न भेतव्यमिति प्रभो ।
उत्पत्स्यन्ति गुणैः श्लाघ्याः पुत्रा वः कामरूपिणः । गर्भस्थाः सर्व्ववेदांश्च साङ्गान् वेत्स्यन्त्यनिन्दिताः । ८८३५
तथा चागमतं सर्व्वं मन्त्राणि विविधानि च । सद्य एव युवानश्च भविष्यन्ति सुपण्डिताः ।
एवमुक्ता गता हंसाः पुनर्व्वज्रपुरं विभो । शशंसुश्चैव भैमानां शक्रकेशवभाषितं ।
प्रभावती तदा पुत्रं सुषुवे सदृशं पितुः । सद्यो यौवनसंप्राप्तं सर्व्वज्ञत्वञ्च भारत ।
मासमात्रेण सुषुवे देवी चन्द्रवती नृप । चन्द्रप्रभमिति ख्यातं तनयं सदृशं पितुः ।
सद्यश्च यौवनं प्राप्तं सर्व्वज्ञत्वञ्च भारत । गुणवत्यपि पुत्रञ्च गुणवन्तमनिन्दितं । ८८४०
युवानावथ सद्यस्तौ सर्व्वशास्त्रार्थकोविदौ । इन्द्रोपेन्द्रप्रसादेन संवृत्तौ यदुवर्द्धनौ ।

हर्म्यपृष्ठे वर्त्तमाना दृष्टास्ते यदुनन्दनाः। इन्द्रोपेन्द्रेच्छया वीर मान्यथेत्यवधार्य्यतां।
निवेदितास्च संभ्रान्तैर्दूतैराकाशरक्षिभिः। वज्रनाभाय वीराय त्रिपिष्टपजयैषिणे।
विधार्य्य सर्व्वे गृह्यन्तां ममैते गृहधर्षकाः। इत्युवाचासुरपतिर्व्वज्रनाभो दुरासदः।
ततः सैन्यं समाज्ञप्तमसुरेन्द्रेण धीमता। आवारयामास दिशः सर्व्वाः कुरुकुलोद्वह। ८८४५
गृह्यन्तामाशु बध्यन्तामिति वाचस्ततस्ततः। उच्चेरुरसुरेन्द्रस्य शासनादरिशासिनः।
तच्छ्रुत्वा व्यथितास्तेषां मातरः पुत्रवत्सलाः। रुरुदुस्ता रुदन्त्योऽथ प्रद्युम्नः सहसाऽब्रवीत्।
माभैष्ट जीवमानेषु स्थिरेष्वस्मासु सर्व्वथा। किं नो दैत्याः करिष्यन्ति सर्व्वथा भद्रमस्तु वः।
प्रभावतीमथोवाच प्रद्युम्नो विक्लवां स्थितां। पिता तव गदापाणिः पितृव्यास्च स्थितास्तव।
भ्रातरस्चैव ते देवि ज्ञातयस्च तथाऽपरे। एते पूज्यास्च मान्यास्च तवापि खलु सर्व्वथा। ८८५०
भगिन्यो पृच्छ भद्रन्ते कालोऽयं खलु दारुणः। मरणं सहमानानां युध्यतां विजयो ध्रुव।
दानवेन्द्रादयो ह्येते यातस्तन्तेऽस्मद्वधैषिणः। किमत्र कार्य्यमस्माभिः सर्व्वशक्रान्तरस्थितैः।
प्रभावती रुदन्ती तु प्रद्युम्नमिदमब्रवीत्। शिरस्यञ्जलिमाधाय जानुभ्यां पतिता क्षितौ।
गृहाण शस्त्रमात्मानं रक्ष शत्रुनिबर्हण। जीवन् पुत्रांस्च दारांस्च द्रष्टाऽसि यदुनन्दन।
आर्य्यां नृवर वैदर्भीमनिरुद्धस्च मानद। खलैतान्मोचयात्मानं व्यसनादरिमर्द्दन। ८८५५
दुर्व्वाससा वरो दत्तो मुनिना मम धीमता। वैधव्यरहिता त्वया जीवपुत्रा भविष्यसि।
एष मे हृदयाश्वासो भविता न तदन्यथा। सूर्य्याग्नितेजसो वाक्यं मुनेरिन्द्रानुजात्मज।
इत्युक्त्वाऽस्यासिमादाय सूपस्पृष्टा मनस्विनी। प्रददौ रौक्मिणेयाय जयस्वेति वरं वरा।
स तं जग्राह धर्म्मात्मा प्रहृष्टेनान्तरात्मना। प्रणम्य शिरसा दत्तं प्रियया भक्तियुक्तया।
चन्द्रवत्यपि निस्त्रिंशं गदाय प्रददौ मुदा। तदा गुणवती चैव शाम्बायापि महात्मने। ८८६०
हंसकेतुमथोवाच प्रद्युम्नः प्रणतं प्रभुः। इहैव शाम्बसहितो युध्यस्व सह दानवैः।
आकाशे दिक्षु सर्व्वासु योत्स्याम्यहमरिन्दम। इत्युक्त्वाऽथ रथं चक्रे मायया मायिनाम्वरः।
सहस्रशिरसं नागं कृत्वा सारथिमात्मवान्। अनन्तभोगं कौरव्य सर्व्वनागोत्तमोत्तमं।
स तेन रथमुख्येन हर्षयन् वै प्रभावतीं। चचारासुरसैन्येषु तृणेष्विव हुताशनः।
शरैराशीविषप्रख्यैरर्द्धचन्द्रानुकारिभिः। भेदनैर्गाधमश्चैव ततर्द दितिसम्भवान्। ८८६५
असुरास्च रणे मत्ताः कार्ष्णिं शस्त्रैरितस्ततः। जघ्नुः कमलपत्राक्षं परं निश्चयमास्थिताः।
चिच्छेद बाहून् केषाञ्चित् केयूरवलयोज्ज्वलान्। सकुण्डलानि चान्येषां शिरांस्यपि स चिच्छिदे।
उरश्छिन्नैः शिरोभिस्तैः कायैस्च शकलैरपि। असुराणां मही कीर्णा प्रद्युम्नेनातितेजसा।
देवेश्वरो देवगणैः सहितः समितिञ्जयः। ददर्श मुदितो युद्धं सैमानां दितिजैः सह।
ये गदस्चैव शाम्बस्च दैत्याः समभिदुद्रुवुः। ते ययुर्निधनं सर्व्वे यादांसीव महोदधौ। ८८७०
विषमं तत्तदा युद्धं दृष्ट्वा देवपतिर्हरिः। गदाय प्रेषयामास स्वं रथं हरिवाहनः।

दिदेश मातलिसुतं यन्तारञ्च सुवर्चसं । शाम्बायैरावणं नागं प्रेषयामास चेश्वरः ।
जयन्तं रौक्मिणेयस्य सहायमददद्विभुः । ऐरावणमधिष्ठातुं प्रवरं संप्रयुक्तवान् ।
देवपुत्त्रद्विजौ वीरावप्रमेयपराक्रमौ । अनुज्ञाप्य सुराध्यक्षं ब्रह्माणं लोकभावनं ।
तं मातलिसुतञ्चैव गजमैरावतं तदा । देवः प्रेषितवान् शक्रो विधिज्ञो वरकर्म्मसु । ८८०५
क्षीणमस्य तपो बध्यो यदूनामेष दुर्म्मतिः । प्रदिशन्ति तु भूतानि सर्व्वंच तु यथेप्सितं ।
प्रद्युम्नस्य जयन्तस्य प्राप्तौ हर्म्ये महाबलौ । असुरान् शरजालौघैर्व्विक्रामन्तौ प्रणाश्य तु ।
गदं कार्ष्णिस्तदोवाच दुर्व्वार्य्यं रणदुर्ज्जयः । उपेन्द्रानुज शक्रेण रथोऽयं प्रेषितस्तव ।
हरियुङ्मातलिसुतो यन्ता चायं महाबलः । प्रवराधिष्ठितश्चायं शाम्बस्यैरावणो गजः ।
अधोपहारो रुद्रस्य द्वारकायां महाबलः । स एष्यति हृषीकेशस्तस्मिन् हृत्तेऽच्युतानुज । ८८१०
तस्याज्ञया वधिष्यामो वज्रनाभं सबान्धवं । प्रभुत्वान्नकृतं पापं त्रिपिष्टपजयं प्रति ।
करिष्यामो विधानन्तु नेष शक्तुं सुतान्वितं । विजेतव्यप्रमादन्तु कर्त्तव्यमिति मे मतिः ।
कलत्ररक्षणं कार्य्यं सर्व्वोपायैर्नरैर्बुधैः । कलत्रधर्षणं लोके मरणादतिरिच्यते ।
एवं सन्दिश्य भैमः स गदशाम्बौ महाबलः । प्रद्युम्नकोप्यः ससृजे मायया दिव्यरूपया ।
तमस्य नाशयामास दैत्यसृष्टं दुरासदं । अपश्यं देवराजस्य तं दृष्ट्वा रिपुमर्द्दनं । ८८१५
ददृशुः सर्व्वभूतानि कार्ष्णिं सर्व्वेषु शत्रुषु । अन्तरात्मनि वर्त्तन्तं चेतनामिव तं विदुः ।
एवं व्यतीता रजनी रौक्मिणेयस्य युध्यतः । असुराणां त्रिभागस्य निहता नातितेजसा ।
यावद्धि योधयामास कार्ष्णिर्दैत्यान् रणाजिरे । सन्ध्योपास्ता जयन्तेन तावद्विष्णुपदीजले ।
अयोधयज्जयन्तस्य यावद्दैत्यान्महाबलः । तावदाकाशगङ्गायां भैमः सन्ध्यामुपास्तवान् ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वज्रनाभवधे प्रद्युम्नोत्तरे पञ्चपञ्चाशदधिकशततोऽध्यायः ॥ १५५ ॥
॥ वैशम्पायन उवाच ॥ जगतश्चक्षुषि ततस्तिस्मुद्गतेंऽदिते रवौ । प्रादुरासीद्धरिर्देवस्तार्क्ष्येणोरगशत्रुणा । ८८२०
हंसवायुमनोभ्यश्च सुशीघ्रतरगः खगः । तस्थौ वियति शक्रस्य समीपे कुरुनन्दन ।
समेत्य च यथान्यायं कृष्णो वासवसन्निधौ । पाञ्चजन्यं विमुर्द्दध्मौ दैत्यानां भयवर्द्धनं ।
तं श्रुत्वाऽभ्यागतस्तत्र प्रद्युम्नः परवीरहा । वज्रनाभं जहीत्युक्तः केशवेन त्वरेति च ।
तार्क्ष्यमारुह्य गच्छेति पुनरेव प्रचोदितः । चकार स तथा वीरः प्रणिपत्य सुरोत्तमौ ।
स मनोरंहसा वीरस्तार्क्ष्येणाशु ययौ नृप । अभ्यासं वज्रनाभस्य महादन्तस्य भारत । ८८२५
ततस्तार्क्ष्यगतो वीरस्ततद्दं रणमूर्द्धनि । वज्रनाभं शिरो भूत्वा सर्व्वाङ्गविदनिन्दितः ।
तेन तार्क्ष्यगतेनैव गदया कृष्णसूनुना । उरस्यभिहतो वीरो वज्रनाभो महात्मना ।
स तेनाभिहतो वीरो दैत्यो मोहवशङ्गतः । चकार च भृशं रक्तं सभ्राम च गतासुवत् ।
आश्वासयाथ तं कार्ष्णिरुवाच रणदुर्ज्जयः । लब्धसंज्ञः स वीरस्तु प्रद्युम्नमिदमब्रवीत् ।
साधु यादव वीर्य्येण श्लाघ्यो मम रिपुर्भवान् । प्रतिप्रहारकालोऽयं स्थिरो भव महाबल । ८८३०

एवमुक्त्वा महानादं मुक्त्वा मेघशतोपमं । गदां मुमोच वेगेन सघण्टां षट्कण्टकां ।
तया ललाटेऽभिहतः प्रद्युम्नो गदया नृप । उद्वमन् रुधिरं भूरि मुमोह यदुपुङ्गवः ।
तं दृष्ट्वा भगवान् कृष्णः पाञ्चजन्यं जलोद्भवं । दध्मावाश्वासनकरं पुत्रस्य रिपुनाशनः ।
तं पाञ्चजन्यशब्देन प्रत्याश्वस्तं महाबलं । दृष्ट्वा प्रमुदिता लोका विशेषेणेन्द्रकेशवौ ।
तस्य चक्रं करे यातं कृष्णवाक्येन भारत । क्षुरनेमिसहस्रारं दैत्यचक्रकुलान्तकं । ८९०५
तन्मुमोचाच्युतसुतः शत्रुनाशाय भारत । नमस्कृत्वा सुरेन्द्राय नमस्कृत्वा महात्मने ।
वज्रनाभस्य तत्कायादुच्चकर्त्त शिरस्तदा । नारायणसुतोत्सृष्टं दैत्यानामनुपश्यतां ।
गदः सुनाभमवधीद्यतमानं रणाजिरे । हर्म्यपृष्ठे जिघांसन्तं रणदृप्तं भयानकं ।
शाम्बः समरमध्यस्थानसुरानरिमर्द्दनः । निनाय निशितैर्वाणैः प्रेताधिपपरिग्रहं ।
निकुम्भस्तु हते वीरे वज्रनाभे महासुरे । जगाम षट्पुरं वीरो नारायणभयार्द्दितः । ८९१०
निवर्हिते रिपौ तस्मिन् वज्रनाभे दुरासदे । अवतीर्णौ महात्मानौ हरी वज्रपुरं तदा ।
लब्धप्रशमनञ्चैव चक्रतुः सुरसत्तमौ । सान्त्वयामासतुश्चैव बालवृद्धं भयार्द्दितं ।
इन्द्रोपेन्द्रौ महात्मानौ मन्त्रयित्वा महाबलौ । आयत्याञ्च तदात्वे च बृहस्पतिमतानुगा ।
वज्रनाभस्य तद्राज्यं चतुर्द्धा चक्रतुर्नृप । विजयस्य चतुर्भागं जयन्ततनयस्य तु ।
प्रद्युम्नस्य चतुर्भागं रौक्मिणेयसुतस्य च । चन्द्रप्रभस्य ददतुस्तुर्भागं जनेश्वर । ८९१५
कोट्यस्तत्र ग्रामाणामधिकास्ता विशाम्पते । शाखापुरसहस्रञ्च स्फीतं वज्रपुरोपमं ।
चतुर्द्धा चक्रतुस्तत्र संहृष्टौ शक्रकेशवौ । कम्बलाजिनवासांसि रत्नानि विविधानि च ।
चतुर्द्धा चक्रतुर्व्वीर वीर वासवकेशवौ । ततोऽभिषिक्तास्ते वीरा राजानो वासवाज्ञया ।
देवदुन्दुभिवाद्येन नृप विष्णुपदीजलैः । स्वयं शक्रेण देवेन केशवेन च धीमता ।
ऋषिवंशे महात्मानः शक्रमाधवनन्दनाः । त्रिजयस्य प्रसिद्धैव गतिर्वियति धीमतः । ८९२०
मातृजेन गुणेनापि माधवानां महात्मनां । अभिषिच्य जयन्तन्तु वासवो भगवान् ब्रवीत ।
त्वयैते वीर संरक्ष्या राजानः समितिञ्जय । मम वंशकरो ह्येकः केशवस्य चयोऽनघ ।
अवध्याः सर्व्वभूतानां भविष्यन्ति ममाज्ञया । गमनागमनञ्चैव दिवि सिद्धं भविष्यति ।
त्रिपिष्टपं द्वारकाञ्च रम्यां सैमाभिरक्षितां । दिशागजसुतान्नागान् हयांश्चोच्चैःश्रवोऽन्वयान् ।
इच्छयैषां प्रयच्छस्व रथांस्त्वष्टृकृतानपि । गजावैरावणसुतौ शत्रुञ्जयरिपुञ्जयौ । ८९२५
प्रयच्छाकाशगौ वीर शाम्बस्य च गदस्य च । आकाशेन पुरीं यातुं द्वारकां भैमरक्षितां ।
आयातौ च सुतौ द्रष्टुं यथेष्टं भैमनन्दनौ । इति सन्दिश्य भगवान् देवराजः पुरन्दरः ।
जगाम भगवान् स्वर्गं द्वारकामपि केशवः । षण्मासानुषितस्तत्र गदः प्रद्युम्न एव च ।
शाम्बश्च द्वारकां यातास्ते राज्ये महाबलाः । अद्यापि तानि राज्यानि मेरोः पार्श्वे नृपोत्तरे ।
स्थास्यन्ति च जगद्यावत् स्थास्यत्यमरसन्निभ । निवृत्ते मौषले युद्धे स्वर्गं यातेषु वृष्णिषु । ८९३०

गदप्रद्युम्नशाम्बास्ते गता वज्रपुरं विभो । ततः प्राप्य पुनर्यान्ति स्वर्गं देवैः कर्म्मभिः शुभैः ।
प्रसादेन च कृष्णस्य लोककर्त्तुर्जनेश्वर । प्रद्युम्नोत्तरमेतत्ते नृदेव कथितं मया ।
धन्यं यशस्यमायुष्यं शत्रुनाशनमेव च । पुत्त्रपौत्त्रा विवर्द्धन्ते चारोग्यधनसम्पदा ।
यशो विपुलमाप्नोति द्वैपायनवचो यथा ।
इति श्रीमहाभारते खिलेषु हरिवंशे प्रद्युम्नोत्तरे वज्रनाभवधे षट्पञ्चाशदधिकशततमोऽध्यायः ॥ १५६ ॥
॥ वैशम्पायन उवाच ॥ ददर्शाथ पुरीं कृष्णो द्वारकां गरुडे स्थितः । देवसद्मप्रतीकाशां समन्तात् प्रतिनादितां । ८९३५
मणिपर्व्वतयन्त्राणि तथा क्रीडाग्टहाणि च । उद्यानवनमुख्यानि वडभीचत्वराणि च ।
संप्राप्ते च तदा कृष्णे वसुदेवात्मजे पुरीं । विश्वकर्म्माणमाहूय देवराजोऽब्रवीदिदं ।
प्रियमिच्छसि चेत् कर्त्तुं मह्यं शिल्पवताम्वर । कृष्णप्रियार्थं भूयस्त्वं प्रकुरुष्व मनोहरां ।
उद्यानशतसम्बाधां द्वारकां स्वर्गसन्निभां । कुरुष्व विबुधश्रेष्ठ यथा मम पुरी तथा ।
यत्किञ्चित्त्रिषु लोकेषु रत्नभूतं प्रपश्यसि । तेन संयुज्यतां क्षिप्रं पुरी द्वारवती त्वया । ८९४०
कृष्णो हि सुरकार्य्येषु सर्व्वेषु सततोत्थितः । संग्रामान् घोररूपांश्च विगाहति महाबलः ।
तामिन्द्रवचनात् कृत्वा विश्वकर्म्मा पुरीं ततः । अलञ्चक्रे समन्तात्तु यथेन्द्रस्यामरावती ।
तां ददर्श दशार्हाणामीश्वरः पक्षिवाहनः । विश्वकर्म्मकृतैर्दिव्यैरभिप्रायैरलङ्कृतां ।
तां तदा द्वारकां दृष्ट्वा विभुर्नारायणो हरिः । हृष्टः सर्व्वार्थसम्पन्नः प्रवेष्टुमुपचक्रमे ।
सोऽपश्यद्वृक्षषण्डांश्च रम्यान्दृष्टिमनोहरान् । द्वारकां प्रति दाशार्हश्चिन्तितान् विश्वकर्म्मणा । ८९४५
पद्मषण्डाकुलाभिश्च हंससेवितवारिभिः । गङ्गासिन्धुप्रकाशाभिः परिखाभिर्वृतां पुरीं ।
प्राकारेणार्कवर्णेन शातकौम्भेन राजता । वियन्मूर्द्ध्नि निविष्टेन द्यां यथैवाभ्रमालया ।
काननैर्नन्दनप्रख्यैस्तथा चैत्ररथोपमैः । बभौ चारुपरिक्षिप्ता द्वारका द्यौरिवाम्बुदैः ।
बभौ रैवतकः शैलो रम्यसानुगुहाजिरः । पूर्व्वस्यां दिशि लक्ष्मीवान् मणिकाञ्चनतोरणः ।
दक्षिणस्यां लतावेष्टः पञ्चवर्णो विराजते । इन्द्रकेतुप्रतीकाशः पश्चिमस्यां तथा क्षुपः । ८९५०
उत्तरां दिशमत्यर्थं विभूषयति वेणुमान् । मन्दराद्रिप्रतीकाशः पाण्डरः पार्थिवर्षभ ।
चित्रकं पञ्चवर्णञ्च पाञ्चजन्यवनं महत् । सर्व्वर्त्तुकवनञ्चैव भाति रैवतकं प्रति ।
लतावेष्टितपर्य्यन्तं मेरुप्रभवनं महत् । भाति भार्गवनञ्चैव पुष्करञ्च महद्वनं ।
अक्षकैर्वीजकैश्चैव मन्दारैश्चोपशोभितं । शतावर्त्तवनञ्चैव करवीरकरम्भि च ।
भाति चैत्ररथञ्चैव नन्दनञ्च वनं महत् । रमणं भावनञ्चैव वेणुमद्वै समन्ततः । ८९५५
वैदूर्य्यपत्रैर्जलजैस्तथा मन्दाकिनी नदी । भाति पुष्करिणी रम्या पूर्व्वस्यां दिशि भारत ।
सा नदी भूषितास्तत्र केशवस्य प्रियैषिभिः । वज्रिभिर्देवगन्धर्व्वैश्चोदितैर्विश्वकर्म्मणा ।
महानदी द्वारवतीं पञ्चाशद्भिर्महामुखैः । प्रविष्टा पुण्यसलिला भावयन्ती समन्ततः ।
अप्रमेयां महोत्सेधामगाधपरिखायुतां । प्राकारवरसम्पन्नां सुधापाण्डरलेपनां ।

तोरणयन्त्रशतघ्नीभिर्यन्त्रजालैश्च भूषिता । आयसैश्च महाचक्रैर्ददर्श द्वारकां पुरीं ।
अष्टौ रथ सहस्राणि नगरे किङ्किणीकिनां । समुच्छ्रितपताकानि यथा देवपुरे तथा ।
अष्टयोजनविस्तीर्णामचलां द्वादशायतां । द्विगुणोपनिवेशाञ्च ददर्श द्वारकां पुरीं ।
अष्टमार्गमहारथ्यां महाषोडशचत्वरां । एकमार्गपरिक्षिप्तां साक्षादुशनसा कृतां ।
स्त्रियोऽपि यस्यां युध्येरन् किमु वृष्णिमहारथाः । व्यूहानामुत्तमा मार्गाः सप्त चैव महापथाः ।
तत्र वै विहिताः साक्षाद्विविधा विश्वकर्म्मणा । तस्मिन् पुरवरश्रेष्ठे दाशार्हाणां यशस्विनां ।
वेश्मानि जहृषे दृष्ट्वा ततो देवकिनन्दनः । काञ्चनैर्मणिसोपानैरुपेतानि सुदर्पणैः ।
भीमघोषमहाघोषैः प्रासादवरचत्वरैः । समुच्छ्रितपताकानि पारिप्लववनानि च ।
काञ्चनाग्राणि भास्वन्ति प्रासादशिखराणि च । महान्ति रमणीयानि मेरुकूटनिभानि च ।
पाण्डुपाण्डरशृङ्गैश्च शातकुम्भपरिष्कृतैः । रम्यसानुगुहाशृङ्गैर्विचित्रैरिव पर्व्वतैः ।
पञ्चवर्णैः सुवर्णैश्च पुष्पवृष्टिसमप्रभैः । पर्ज्जन्यतुल्यनिर्घोषैर्नानारूपैरिवाद्रिभिः ।
दावाग्निज्वलितप्रख्यैर्निर्म्मितैर्विश्वकर्म्मणा । आलिखद्भिरिवाकाशमतिचन्द्रार्कभास्वरैः ।
तैर्हर्म्यैर्महाभागैर्बभासे तद्वनं द्रुमैः । वासुदेवेन्द्रपर्ज्जन्यैर्गृहमेघैरलङ्कृता ।
ददृशे द्वारका चारु मेघैर्द्यौरिव संवृता । साक्षाद्भगवतो वेश्म विहितं विश्वकर्म्मणा ।
ददृशे वासुदेवस्य चतुर्योजनमायतं । तावदेव च विस्तीर्णमप्रमेयं महाधनं ।
प्रासादवरसम्पन्नैर्युक्तं जगति पर्व्वतैः । यच्चकार महाभागस्त्वष्टा वासवचोदितः ।
प्रासादश्चैव हेमाभं सर्व्वभूतमनोहरं । मेरोरिव गिरेः शृङ्गमुच्छ्रितं काञ्चनं महत ।
रुक्मिण्याः प्रवरं वासं विहितं विश्वकर्म्मणा । सत्यभामा पुनर्वेश्म यदावसत पाण्डरं ।
विचित्रमणिसोपानं तद्विदुर्भोगवानिति । विमलादित्यवर्णाभिः पताकाभिरलङ्कृतं ।
व्यक्तसंजवनोद्देशो यश्चतुर्द्दिक्षु महाध्वजः । स च प्रासादमुख्योऽथ जाम्बवत्या विभूषितः ।
प्रभयाऽभ्यभवत् सर्व्वांस्तानन्यान् भास्करो यथा । उद्यद्भास्करवर्णाभस्तयोरन्तरमाश्रितः ।
विश्वकर्म्मकृतो दिव्यः कैलासशिखरोपमः । जाम्बूनद इवादीप्तः प्रदीप्तज्वलनोपमः ।
सागरप्रतिमो ऽतिष्ठन्मेरुरित्यभिविश्रुतः । तस्मिन् गान्धारराजस्य दुहिता कुलशालिनी ।
गान्धारी भरतश्रेष्ठ केशवेन निवेशिता । पद्मकूटमिति ख्यातं पद्मवर्णं महाप्रभं ।
सुभीमाया महाकूटं वेश्मातिरुचिरप्रभं । सूर्य्यप्रभस्तु प्रासादः सर्व्वकामगुणैर्युतः ।
लक्ष्मणाया नृपश्रेष्ठ निर्द्दिष्टः शार्ङ्गधन्वना । वैदूर्य्यमणिरत्नाभः प्रासादो हरितप्रभः ।
यं विदुः सर्व्वभूतानि परमित्येव भारत । वासः स मित्रविन्दाया देवर्षिगणपूजितः ।
महिष्या वासुदेवस्य भूषणं तेषु वेश्मसु । यस्तु प्रासादमुख्यो वै विहितो विश्वकर्म्मणा ।
अतीव रम्यः सोऽप्यासीद्विहितः पर्व्वतो यथा । सुनन्दाया निवासोऽसौ प्रशस्तः सर्व्वदैवतैः ।
महिष्या वासुदेवस्य केतुमानिति विश्रुतः । तत्र प्रासादमुख्यो वै यं त्वष्टा विदधे स्वयं ।

योजनायतविस्कम्भः सर्व्वरत्नमयः शुभः । स श्रीमान् विरजा नाम व्यराजत्तत्र सुप्रभः । ८९९०
उपस्थानगृहं यत्तु केशवस्य महात्मनः । तस्मिन् सुविहिताः सर्व्वे रुक्मदण्डाः पताकिनः ।
सदने वासुदेवस्य मार्गसंजवनध्वजाः । रत्नजालानि तावन्ति यावन्तस्ते निवेशिताः ।
आहृत्य यदुसिंहेन वैजयन्तो ऽचलो महान् । हंसकूटस्य यच्छृङ्गमिन्द्रद्युम्नसरः प्रति ।
षष्टितालसमुत्सेधमर्द्धयोजनमायतं । सकिन्नरमहानागं तदप्यमिततेजसा ।
पश्यतां सर्व्वनागानामानीतं लोकविश्रुतं । आदित्यपथगं यत्तु मेरोः शिखरमुत्तमं । ८९९५
पुण्डरीकशतैर्जुष्टं विमानैश्च हिरण्मयैः । जाम्बूनदमयं दिव्यं त्रिषु लोकेषु विश्रुतं ।
तदप्युत्पाट्य कृष्णार्थमानीतं विश्वकर्म्मणा । भ्राजमानमतीवाग्र्यं सर्व्वौषधिसमन्वितं ।
तदिन्द्रवचनात्त्वष्टा कार्य्यहेतोः समानयत् । पारिजातश्च तत्रैव केशवेनाहृतः स्वयं ।
नीयमाने हि तत्रासीद्युद्धमद्भुतकर्म्मणः । कृष्णस्य ये ऽभ्यरक्षन्त देवाः पादपमुत्तमं ।
पुण्डरीकशतैर्जुष्टा विमानैश्च हिरण्मयैः । विहिता वासुदेवार्थं रत्नपुष्पफलद्रुमाः । ९
पद्मषण्डजलोपेता रत्नसौगन्धिकोत्पलाः । मणिहेमस्रवाकीर्णाः पुष्करिण्यः सरांसि च ।
तासां परमकूलानि शोभयन्ति महाद्रुमाः । सालास्तालाः कदम्बाश्च शतशाखाश्च रोहिणाः ।
ये च हैमवता वृक्षा ये च मेरुरुहास्तथा । आहृत्य यदुसिंहार्थे विहितं विश्वकर्म्मणा ।
रक्तपीतारुणश्यामाः श्वेतपुष्पाश्च पादपाः । सर्व्वर्त्तुफलसम्पन्नास्तेषु काननसन्धिषु ।
समकूलजलोपेताः शीतशर्करवालुकाः । तस्मिन् पुरवरे नद्यः प्रसन्नसलिला हृदाः । ९००५
पुष्पाकुलजलोपेता नानाद्रुमलताकुलाः । अपराश्चाभवन्नद्यो हेमशर्करवालुकाः ।
मत्तबर्हिणसंघैश्च कोकिलैश्च मदामदैः । बभूवुः परमोपेतास्तस्यां पुर्य्यान्तु पादपाः ।
तत्रैव गजयूथानि पुरे गोमहिषास्तथा । निवासश्च कृतस्तत्र वराहमृगपक्षिणां ।
पूर्य्यां तस्यान्तु रम्यायां प्राकारो वै हिरण्मयः । व्यक्तं किष्कुशतोत्सेधो विहितो विश्वकर्म्मणा ।
ते च ते च महाशैलाः सरितश्च सरांसि च । परिक्षिप्तानि भौमेन वनान्युपवनानि च । ९०१०
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि द्वारवतीविशेषनिर्म्माणे सप्तपञ्चाशदधिकशततमोऽध्यायः ॥ १५७ ॥
॥ वैशम्पायन उवाच ॥ एवमालोकयानः स द्वारकां वृषभेक्षणः । अपश्यत् स्वगृहं कृष्णः प्रासादशतशोभितं ।
मणिस्तम्भसहस्राणामयुतैर्विष्टितं सितैः । तोरणैर्ज्वलनप्रख्यैर्मणिविद्रुमराजतैः ।
तत्र तत्र प्रभासद्भिश्चित्रकाञ्चनवेदिकैः । प्रासादस्तत्र सुमहान् कृष्णोपस्थानिको ऽभवत् ।
स्फाटिकस्तम्भविष्टतो विस्तीर्णः सर्व्वकाञ्चनः । पद्माकुलजलोपेता रत्नसौगन्धिकोत्पलाः ।
मणिहेमनिभाश्चित्रा रत्नसोपानभूषिताः । मत्तबर्हिणजुष्टाश्च कोकिलैश्च मदामदैः । ९०१५
बभूवुः परमोपेता वाप्यश्च त्रिकचोत्पलाः । विश्वकर्म्मकृताः शैलाः प्रकारास्तस्य वेश्मनः ।
व्यक्तं किष्कुशतोत्सेधः परिखापरिवेष्टितः । तद्गृहं वृष्णिसिंहस्य निर्म्मितं विश्वकर्म्मणा ।
महेन्द्रवेश्मप्रतिमं समन्तादर्द्धयोजनं । ततस्तं पाण्डरं शौरिर्म्मूर्द्ध्नि तिष्ठन् गरुत्मतः ।

प्रीतः शङ्खमुपाध्मासीद्दुहितां लोमहर्षणं । तस्य शङ्खस्य शब्देन सागरस्तुक्षुभे भृशं ।
रराम च नभः कृत्स्नं तच्चित्रमभवत्तदा । पाञ्चजन्यस्य निर्घोषं संश्रुत्य कुकुरान्धकाः ।
विशोकाः समपद्यन्त गरुडस्य च दर्शनात् । शङ्खचक्रगदापाणिं गरुडस्योपरि स्थितं ।
दृष्ट्वा जहृषिरे पौरा भास्करोपमतेजसं । ततस्तूर्य्यप्रणादाश्च भेरीणाञ्च महास्वनाः ।
जज्ञिरे सिंहनादाश्च सर्व्वेषां पुरवासिनां । ततस्ते सर्व्वदाशार्हाः सर्व्वे च कुकुरान्धकाः ।
प्रीयमाणाः समाजग्मुरालोक्य मधुसूदनं । वसुदेवं पुरस्कृत्य शङ्खतूर्य्यरवैः सह ।
उग्रसेनो ययौ राजा वासुदेवनिवेशनं । आनन्दिन्यो पर्य्यचरत् स्वेषु वेश्मसु देवकी ।
रोहिणी च यथोद्दिष्टमाहुकस्य च याः स्त्रियः । ततः कृष्णः सुपर्णेन स्वं निवेशनमभ्ययात् ।
चचार च यथोद्दिष्टमीश्वरानुचरो हरिः । अवतीर्य्य गृहद्वारि कृष्णस्तु यदुनन्दनः ।
यथार्हं पूजयामास यादवान् यादवर्षभः । रामाहुकगदाक्रूरप्रद्युम्नादिभिरर्चितः ।
प्रविवेश गृहं शौरिरादाय मणिपर्व्वतं । तत्र स्थाप्य दयितं पारिजातं महाद्रुमं ।
प्रवेशयामास गृहं प्रद्युम्नो रुक्मिणीसुतः । तेऽन्योन्यं ददृशुर्वीरा देहबन्धानमानुषान् ।
पारिजातप्रभावेण ततो मुमुदिरे जनाः । तैः स्तूयमानो गोविन्दः प्रहृष्टैर्यादवर्षभैः ।
प्रविवेश गृहं श्रीमान् विहितं विश्वकर्म्मणा । ततोऽन्तःपुरमध्ये तं सम्प्रहृष्टं मणिपर्व्वतं ।
न्यवेशयदमेयात्मा वृष्णिभिः सहितोऽच्युतः । तत्र दिव्यं द्रुमश्रेष्ठं पारिजातममित्रजित् ।
अर्घ्यमर्चितमव्यग्रमिष्टे देशे न्यवेशयत् । अनुज्ञाप्य ततो ज्ञातीन् केशवः परवीरहा ।
ताः स्त्रियः पूजयामास संहृता नरकेण याः । वस्त्रैराभरणैर्भोगैर्दासीभिर्द्धनसञ्चयैः ।
हारैश्चन्द्रांशुसङ्काशैर्मणिभिश्च महाप्रभैः । पूर्व्वमभ्यर्चितास्त्वेव वसुदेवेन ताः स्त्रियः ।
देवक्या सह रोहिण्या रेवत्या चाहुकेन च । सत्यभामोत्तमा स्त्रीणां सौभाग्येनाभवत्तदा ।
कुटुम्बस्येश्वरी त्वासीद्रुक्मिणी भीष्मकात्मजा । तासां यथार्हं हर्म्याणि प्रासादशिखराणि च ।
आदिदेश गृहान् कृष्णः परिवर्हांश्च पुष्कलान् ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि द्वारकाप्रवेशे अष्टपञ्चाशदधिकशततोऽध्यायः ॥ १५८ ॥
॥ वैशम्पायन उवाच ॥ ततः संपूज्य गरुडं वासुदेवोऽनुमान्य च । सखिवच्चोपसंश्लेषमनुजज्ञे गृहं प्रति ।
सोऽनुज्ञातो हि सत्कृत्य प्रणम्य च जनार्द्दनं । ऊर्द्ध्वमाचक्रमे पक्षी यथेष्टं गगनेचरः ।
स पक्षवातसंक्षुब्धं समुद्रं मकरालयं । कृत्वा वेगेन महता ययौ पूर्व्वं महोदधिं ।
कृत्यकाल उपस्थास्य इत्युक्त्वा गरुडे गते । कृष्णो ददर्श पितरं वृद्धमानकदुन्दुभिं ।
उग्रसेनञ्च राजानं बलदेवं ससात्यकिं । काश्यं सान्दीपनिञ्चैव गर्गं गार्ग्यं तथैव च ।
अन्यांश्च वृद्धान् वृष्णीं तांश्च भोजान्धकांस्तथा । रत्नप्रवेकैर्द्दाशार्हान् वीर्य्यलब्धैस्तथार्चयत् ।
हता ब्रह्मद्विषः सर्व्वे नरकप्रमुखा दैत्याः । रणात् प्रतिनिवृत्तोऽयमच्युतो मधुसूदनः ।
इति चत्वरथ्यासु द्वारवत्यां सुपूजितः । चाक्रिको घोषयामास पुरुषो हृष्टकुण्डलः ।

ततः सान्दीपनिं पूर्व्वमभिवाद्य जनार्द्दनः । ववन्दे वृष्णिनृपतिमाहुकं विनयान्वितः ।
तथाऽश्रुपरिपूर्णाक्षमानन्दागतचेतसं । ववन्दे सह रामेण पितरं वासवानुजः ।
उपगम्य तथा श्रेयान् सत्कृत्य च यथार्हतः । सर्व्वेषां नाम जग्राह दाशार्हाणामधोक्षजः ।
ततः सर्व्वाणि दिव्यानि सर्व्वरत्नमयानि च । आसनाग्र्याणि विविशुरुपेन्द्रप्रमुखास्तथा ।
ततस्तद्धनमक्षय्यं किङ्करैर्यत् समाहृतं । तत्सभामानयामासुः पुरुषाः कृष्णशासनात् ।
ततः संमानयामास दाशार्हान् यदुसत्तमः । सर्व्वान्दुन्दुभिशब्देन पूजयित्वा जनार्द्दनः ।
तामासनवतीं रम्यां मणिविद्रुमतोरणां । सभां सर्व्वदाशार्हास्ते विविशुः कृष्णशासनात् ।
ततः पुरुषसिंहैः सा यदुभिः सर्व्वतो वृता । शुशुभेऽभ्यधिकं शुभ्रा सिंहैर्गिरिगुहा यथा ।
रामेण सह गोविन्दः काञ्चनं महदासनं । उग्रसेनं पुरस्कृत्य भोजवृष्ण्यपुरस्कृतः ।
तत्रोपविष्टस्तान् वीरान् यथाप्रीति यथावयः । समाभाष्य यदुश्रेष्ठानुवाच पुरुषोत्तमः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि सभाप्रवेशे ऊनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥
॥ कृष्ण उवाच ॥ भवतां पुण्यकीर्त्तीनां तपोबलसमाधिभिः । अपध्यानाच्च पापात्मा भौमः स नरको हतः ।
मोचितं बन्धनात् कृत्स्नं कन्यान्तःपुरमुत्तमं । मणिपर्व्वतमुत्पाट्य शिखरं वै तदाहृतं ।
अयं धनौघः सुमहान् किङ्करैराहृतो मम । ईशा भवन्तो द्रव्यस्य तामुक्त्वा विरराम ह ।
तच्छ्रुत्वा वासुदेवस्य भोजवृष्ण्यन्धका वचः । जहृषुर्हृष्टरोमाणः पूजयन्तो जनार्द्दनं ।
ऊचुश्चैनं नृवीरास्ते कृताञ्जलिपुटास्ततः । नैतच्चित्रं महाबाहो त्वयि देवकिनन्दन ।
यत्कृत्वा दुष्करं कर्म देवैरपि सुदुष्करं । ज्ञातयः स्वजनान् भोगैरर्थैश्च स्वयमर्च्चितैः ।
ततः सर्व्वदाशार्हाणामाहुकस्य च याः स्त्रियः । प्रीयमाणाः सभां जग्मुर्वासुदेवदिदृक्षया ।
देवकीप्रमुखा देव्यो रोहिणी च शुभानना । ददृशुः कृष्णमासीनं रामञ्चैव महाभुजं ।
तौ तु पूर्व्वमभिक्रम्य रोहिणीमभिवाद्य च । अभ्यवादयतां देवीं देवकीं रामकेशवौ ।
सा ताभ्यामृषभाभ्यां वै पुत्राभ्यां शुशुभेऽधिकं । अदितिर्देवमातेव मित्रेण वरुणेन च ।
ततः प्राप्तौ नराग्र्यौ तु तस्याः सा दुहिता तदा । एकानंशेति यामाहुर्नरा वै कामरूपिणीं ।
तया क्षणमुक्ताभ्यां यथा शक्रो सुरेश्वरः । यत्कृते सगणं कंसं जघान पुरुषोत्तमः ।
सा कन्या ववृधे तत्र वृष्णिसद्मनि पूजिता । पुत्रवत् पाल्यमाना वै वासुदेवाज्ञया तदा ।
एकानंशेति यामाहुरुत्पन्नां मानवा भुवि । योगकन्यां दुराधर्षां रक्षार्थं केशवस्य ह ।
तां वै सर्व्वे सुमनसः पूजयन्ति स्म यादवाः । देववद्दिव्यवपुषा कृष्णः संरक्षितो यया ।
तांश्च तत्रोपसङ्गम्य प्रियामिव सखीं सखा । दक्षिणेन कराग्रेण परिजग्राह माधवः ।
तथैव रामोऽतिबलः संपरिष्वज्य भामिनीं । मूर्द्ध्न्युपाघ्राय सव्येन प्रतिजग्राह पाणिना ।
ददृशुस्ताः स्त्रियो मध्ये भगिनीं रामकृष्णयोः । रुक्मपद्मव्यग्रकरां श्रियं पद्मालयामिव ।
तथाऽक्षतमहावृष्ट्या पुष्पैश्च विविधैः शुभैः । अवकीर्य्य च लाजैस्ताः स्त्रियो जग्मुर्यथालयं ।

ततस्ते यादवाः सर्व्वे पूजयन्तो जनार्द्दनं। उपोपविविशुः प्रीताः प्रशंसन्तोऽद्भुतं जनं।
पूज्यमानो महाबाहुः पौराणां रतिवर्द्धनः। विजहार महाकीर्त्तिर्देवैरिव स तैः सह।
समासीनेषु सर्व्वेषु यादवेषु जनार्द्दनं। नियोगाज्जिष्णुशक्रस्य नारदोऽभ्यागमत् सभां।
सोऽथ संपूजितः पूज्यः शूरैस्तैर्यदुपुङ्गवैः। करे संस्पृश्य गोविन्दं विवेश परमासने। ९०८०
सुखोपविष्टस्तान् कृष्णोपविष्टानुवाच ह। संप्राप्तं शक्रवचनाज्जानीध्वं मानवर्षभाः।
शृणुध्वं राजशार्द्दूलाः कृष्णस्याद्य पराक्रमं। यानि कर्म्माणि कृतवान् बाल्यात् प्रभृति केशवः।
उग्रसेनसुतः कंसः सर्व्वान्निर्जित्य यादवान्। राज्यं जग्राह दुर्ब्बुद्धिर्न्निर्जित्य पितरमाहुकं।
समाश्रित्य जरासन्धं श्वशुरं कुलपांसनः। भोजवृष्ण्यन्धकान् सर्व्वानवमन्य सुदुर्म्मतिः।
ज्ञातिकार्य्यं चिकीर्षंस्तु वसुदेवः प्रतापवान्। उग्रसेनस्य रक्षार्थं स्वपुत्रं पर्य्यरक्षत। ९०८५
स गोपैः सह धर्म्मात्मा मथुरोपवने वसन्। अत्यद्भुतानि कर्म्माणि कृतवान्मधुसूदनः।
प्रत्यक्षं शूरसेनानां शृणुतां महदद्भुतं। अधोऽनेन शयानेन शकटान्तरचारिणा।
राक्षसी निहता रौद्री शकुनीवेशधारिणी। पूतना नाम घोरा सा महाकाया महाबला।
विषदिग्धं स्तनं क्षुद्रा प्रयच्छन्ती जनार्द्दने। ददृशुस्तां विनिहतां राक्षसीं ते वनौकसः।
शकेः सुतां महाघोरां भीषणां विकृताननां। पुनर्ज्जातोऽयमित्याहुरुक्तस्तस्माद्धोक्षजः। ९०९०
अत्यद्भुतमिदञ्चासीद्यच्छिशुः पुरुषोत्तमः। पादाङ्गुष्ठेन शकटं क्षोभमाणो व्यलोडयत्।
दाम्ना चोलूखले बद्धो विप्रकुर्व्वन् कुमारकान्। बभञ्जार्ज्जुनवृक्षौ द्वौ ख्यातो दामोदरस्ततः।
कालियस्य महानागो दुराधर्षो महाबलः। क्रीडता वासुदेवेन निर्ज्जितो यमुनाह्रदे।
अक्रूरस्य समक्षञ्च यन्नागभवने प्रभुः। पूज्यमानस्तदा नागैर्द्दिव्यं वपुरधारयत्।
शीतवातार्द्दिता गाश्च दृष्ट्वा कृष्णेन धीमता। धृतो गोवर्द्धनः शैलः सप्तरात्रं महात्मना। ९०९५
जिष्णुना वासुदेवेन गवां त्राणार्थमिच्छता। तथा सुदुष्टोऽतिबलो महाकायो नरान्तकः।
गोपतिर्व्वासुदेवेन रिष्टको विनिपातितः। धेनुकः सुमहाकायो दानवः सुमहाबलः।
निहतो वासुदेवेन गवां त्राणाय दुर्म्मतिः। वृन्दावनमभिप्राप्तः सर्व्वसैन्यपुरस्कृतं।
वृकैर्व्विद्रावयामास ग्रहीतुं समुपस्थितं। रौहिणेयेन सकृष्णस्य वने विचरता पुनः।
गोपवेशधरेणैव कंसस्य भयमाहितं। तथा प्रजगतः शौरिर्हेलायुधबलं हयं। ९१००
प्रघर्षं भोजराजस्य जघान पुरुषोत्तमः। प्रलम्बश्च महाकायो रौहिणेयेन धीमता।
दानवो मुष्टिनैकेन कंसामात्यो निपातितः। एतौ हि वसुदेवस्य सुतौ देवसुतोपमौ।
वृष्णिधाते महावीर्य्यौ प्रच्छन्नं येन संस्थितौ। जन्मप्रभृति चाप्येतौ गार्ग्येण परमर्षिणा।
यथा तथ्येन विज्ञाय संस्कारं प्रतिपादितौ। यदा स्थितौ नरश्रेष्ठौ स्थितौ यौवनसंमुखे।
सिंहशावाविवोदीर्णौ मत्तौ हैमवतौ यथा। ततो मनांसि गोपीनां हरमाणौ महाबलौ। ९१०५
आस्तां गोष्ठचरौ वीरौ देवपुत्रोपमद्युतौ। रतौ जवे वा युद्धे वा क्रीडासु विविधासु च।

नन्दगोपस्य गोपाला न शेकुः प्रसमीक्षितुं । व्यूढोरस्कौ महाबाहू बालकस्थाविवोद्धतौ ।
शुश्रुवे व्यथितः कंसो मन्त्रिभिः सहितोऽभवत् । नाशकच्च यदा कंसो ग्रहीतुं वसुदेवजौ ।
निजग्राह ततः कोपाद्वसुदेवं महात्मनं । सहोग्रसेनेन तदा घोरवद्धाङ्गबन्धनं ।
कालं महान्तमवसत् कृच्छ्रमानकदुन्दुभिः । कंसस्तु पितरं बद्धा शूरसेनान् प्रशास्य च ।
जरासन्धं समाश्रित्य तथैवाकृतिभीष्मकौ । कदाचित्समये कालस्य मथुरायां महोत्सवं ।
पिनाकिनं समुद्दिश्य चक्रे कंसो नराधिप । तत्र मल्लाः समाजग्मुर्नानादेश्या विशाम्पते ।
नर्त्तका गायनाश्चैव कुशला नृत्यकर्मसु । ततः कंसो महातेजा रङ्गवाटं महाधनं ।
कुशलैः कारयामास शिल्पिभिः साधुनिष्ठितैः । तत्र मञ्चसहस्राणि पौरजानपदैर्जनैः ।
समाकीर्णान्यदृश्यन्त ज्योतींषि गगने यथा । भोजराजः श्रिया जुष्टं रङ्गवाटं महर्द्धिमत् ।
आरुरोह ततः कंसो विमानं सुकृती यथा । रङ्गद्वारि गजं मत्तं प्रभूतायुधकल्पितं ।
शूरैरधिष्ठितं कंसः स्थापयामास वीर्य्यवान् । यदा हि स महातेजा रामकृष्णौ समागतौ ।
शुश्राव पुरुषव्याघ्रौ सूर्याचन्द्रमसाविव । तदाप्रभृति यत्तोऽभूद्वधं प्रति नराधिप ।
न च शिश्ये सुखं रात्रौ रामकृष्णौ विचिन्तयन् । श्रुत्वा तु रामः कृष्णश्च तं समाजमनुत्तमं ।
उभौ विविशतुर्वीरौ शार्दूलौ गोव्रजं यथा । ततः प्रवेशे संरब्धौ रक्षिभिः पुरुषर्षभौ ।
हत्वा कुवलयापीडं समादिमरिन्दमौ । अवमृद्य दुराधर्षौ रङ्गं विविशतुस्तदा ।
चाणूरान्ध्रौ विनिष्पिष्य केशवेन बलेन च । औग्रसेनिः सुदुष्टात्मा मातुलो विनिपातितः ।
यत् कृतं यदुसिंहेन देवैरपि सुदुष्करं । कर्म्म तत् केशवादन्यः कर्त्तुमर्हति कः पुमान् ।
यच्च नाधिगतं पूर्व्वैः प्रह्लादबलिशम्बरैः । तदिदं प्रापितं वित्तं शौरिणा भवतां कृते ।
एतेन मुरमाक्रम्य दैत्यं पञ्चजनं तथा । निष्क्रम्य शैलसंघातान्निसुन्दः सगणो हतः ।
नरकश्च हतो भौमः कुण्डले चाहृते शुभे । प्राप्तश्च दिवि देवेषु केशवेन महद्यशः ।
वीतशोकभयाबाधाः कृष्णबाहुबलाश्रयाः । यजध्वं विविधैर्यज्ञैर्यादवा वीतमत्सराः ।
देवानां सुमहत् कार्य्यं कृतं कृष्णेन धीमता । प्रियमावेदयाम्येष भवतां भद्रमस्तु वः ।
यदिष्टं वो यदुश्रेष्ठाः कर्त्ताऽस्मि तदतन्द्रितः । भवतामस्मि यूयञ्च मम युष्मास्वहं स्थितः ।
इति संबोधयन् कृष्णमब्रवीत् पाकशासनः । स मां प्रैषीत् सुरश्रेष्ठः प्रीतस्तुष्टा यथा वयं ।
यत्र द्यौः श्रीः स्थिता तत्र यत्र श्रीस्तत्र सन्नतिः । सन्नतिर्ह्रीस्तथा श्रीश्च नित्यं कृष्णे महात्मनि ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि नारदवाक्ये षष्ट्यधिकशततोऽध्यायः ॥ १६० ॥
॥ नारद उवाच ॥ सादिता भैरवाः पाशा निसुन्दनरकौ हतौ । कृतः क्षेम्यः पुनः पन्था पुरं प्राग्ज्योतिषं प्रति ।
शौरिणा पृथिवीपालास्त्रासिताः शार्ङ्गिणा रणे । धनुषश्च निनादेन पाञ्चजन्यस्वनेन च ।
मेघप्रख्यै रथानीकैर्दाक्षिणात्यैः सुरक्षितं । रुक्मिणं युधि निर्ज्जित्य महाबलपराक्रमं ।
रुक्मिणीमाजहाराशु केशवो वृष्णिपुङ्गवः । ततः पर्ज्जन्यघोषेण रथेनादित्यवर्च्चसा ।

उवाह महिषीं भोजां शङ्खचक्रगदासिभृत् । जारूथ्यामाहृतिः क्राथः शिशुपालश्च निर्ज्जितः ।
वक्रश्च सह सैन्येन शतधन्वा च निर्ज्जितः । इन्द्रद्युम्नो हतः कोपाद्यवनश्च कशेरुमान् ।
हतः सौभपतिः श्रीमान् शाल्वश्च दृढधन्वना । पर्व्वतानां सहस्रन्तु चक्रेण पुरुषोत्तमः ।
विकीर्य्य पुण्डरीकाक्षो द्रुमसेनमपोथयत् । महेन्द्रशिखरे चैव निमेषान्तरचारिणौ ।
जघान पुरुषव्याघ्रो रावणस्याभितस्वरौ । इरावत्यां महाभोजावग्निसूर्य्यसमौ युधि । ९१४०
गोपतिस्तालकेतुश्च निहतौ शार्ङ्गधन्वना । अक्षप्रपतने चैव निमिर्हंसश्च दानवौ ।
उभौ तावपि कृष्णेन सानुगौ विनिपातितौ । दग्धा वाराणसी चैव केशवेन महात्मना ।
सराष्ट्रः सानुबन्धश्च काशीनामधिपो हतः । विजित्य च मयं संख्ये शरैः सन्नतपर्व्वभिः ।
अथैन्द्रसेनिरानीतः कृष्णेनाद्भुतकर्म्मणा । सहितः सर्व्वयादोभिः सागरेषु महाबलः ।
प्राप्य लोहितकूटञ्च कृष्णेन वरुणो जितः । महेन्द्रभवने जातो देवैर्गुप्तो महात्मभिः । ९१४५
अविमन्थयित्वा देवेन्द्रं पारिजातद्रुमो हृतः । पाण्ड्यं पौण्ड्रं कलिङ्गञ्च मात्स्यञ्चैव जनार्द्दनः ।
जघान सहितान् सर्व्वान् वङ्गराजं तथैव च । एष चैकशतं हत्वा रणे राज्ञां महात्मनां ।
गान्धारीमावहद्धीमान्महिषीं प्रियदर्शनां । तथा गाण्डीवधन्वानं क्रीडन्तं मधुसूदनः ।
जिगाय भरतश्रेष्ठ कुन्त्याः प्रमुखतो विभुः । द्रोणं द्रौणिं कृपं कर्णं भीमञ्चैव सुयोधनं ।
चक्रानुयाने सहितान् जिगाय पुरुषोत्तमः । बभ्रोश्च प्रियमन्विच्छन् शङ्खचक्रगदासिभृत् । ९१५०
सौवीरराजस्य सुतां प्रसह्य हृतवान् प्रभुः । पर्य्यन्तां पृथिवीं कृत्स्नां साश्वां सरथकुञ्जरां ।
वेणुदारिकृते यस्माज्जिगाय पुरुषोत्तमः । अवाप्य तपसो वीर्य्यं बलमोजश्च माधवः ।
पूर्व्वदेहे जहारायं बलेस्त्रिभुवनं हरिः । वज्राश्मनिगदाखड्गैस्त्रासयद्भिश्च दानवैः ।
यस्य नाधिगतो मृत्युः पुरं प्राग्ज्योतिषं प्रति । अभिभूतश्च कृष्णेन सगणः स महाबलः ।
बलेः पुत्त्रो महावीर्य्यो बाणो द्रविणवत्सरः । पीठं तथा महाबाहुः कंसामात्यं जनार्द्दनः । ९१५५
पैठिकञ्चासिलोमानं निजघान महाबलः । जम्भमैरावतञ्चापि विरूपञ्च महायशाः ।
जघान पुरुषव्याघ्रो दैत्यं मानुषरूपिणं । तथा नागपतिं तोये कालियञ्च महौजसं ।
निर्ज्जित्य पुण्डरीकाक्षः प्रेषयामास सागरं । संजीवयामास मृतं पुत्त्रं सान्दीपनेस्तथा ।
निर्ज्जित्य पुरुषव्याघ्रो यमं वैवस्वतं हरिः । एवमेव महाबाहुः शास्ता सर्व्वदुरात्मनां ।
देवांश्च ब्राह्मणांश्चैव ये द्विषन्ति सदा नृप । निहत्य नरकं भौममाहृत्य मणिकुण्डले । ९१६०
देवमातुरदितेश्चैव प्रीत्यर्थं वज्रपाणिनः । एवं सदैव दैत्यानां सुराणाञ्च महायशाः ।
भयाभयकरः कृष्णः सर्व्वलोकेश्वरो विभुः । संस्थाप्य धर्म्मं मर्त्त्येषु यज्ञैरिष्ट्वाप्तदक्षिणैः ।
कृत्वा देवार्थममितं स्वस्थानं प्रतिपत्स्यते । कृष्णो भोगवतीं रम्यामृषिकान्तां महायशाः ।
द्वारकामात्मसात् कृत्वा समुद्रं गमयिष्यति । बहुरत्नसमाकीर्णां चैत्ययूपशताङ्किता ।
द्वारका वरुणावासं प्रवेक्ष्यति सकानना । तां सूर्य्यसदनप्रख्यां मत्वा शार्ङ्गधन्वनः । ९१६५

निसृष्टां वासुदेवेन सागरः प्लावयिष्यति । सुरासुरमनुष्येषु नात्रीश भविता क्वचित् ।
य इमामावसेत् कश्चिदन्यो वै मधुसूदनात् । एवमेष दशार्हाणां विधाय विधिमुत्तमं ।
विष्णुर्नारायणः सोमः सूर्य्यश्च सविता स्वयं । अचिन्त्योऽप्रमेयश्च यथाकामचरो वशी ।
मोदत्येष सदा भूतैर्बालः क्रीडनकैरिव । न समाधुं महाबाहुः शक्योऽयं मधुसूदनः ।
परं ह्यपरमेतस्माद्विश्वरूपान्न विद्यते । स्तुतोऽयमेवं शतशस्तथा शतसहस्रशः । ९१७०
अन्तो हि कर्म्मणामस्य दृष्टपूर्व्वो न केनचित् । एवमेतानि कर्म्माणि शिशुरेव वयास्तथा ।
कृतवान् पुण्डरीकाक्षः सङ्कर्षणसहायवान् । इत्युवाच पुरा व्यासस्तपोदिव्येन चक्षुषा ।
महायोगी महाबुद्धिः सर्व्वप्रत्यक्षदर्शिवान् ।
॥ वैशम्पायन उवाच ॥ इति संस्तूय गोविन्दं महेन्द्रवचनादृषिः । षड्भिः पूजितः सर्व्वैर्नारदस्त्रिदिवं ययौ ।
ततस्तद्वसु गोविन्दो दिदेशान्धकवृष्णिषु । यथार्हं पुण्डरीकाक्षो विधिवन्मधुसूदनः । ९१७५
यादवाश्च धनं प्राप्य विधिवद्भूरिदक्षिणैः । यज्ञैरिष्ट्वा महात्मानो द्वारकामावसन् पुरीं ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि नारदवाक्ये एकषष्ट्यधिकशततोऽध्यायः ॥ १६१ ॥
॥ जनमेजय उवाच ॥ बहूनां स्त्रीसहस्राणामष्टौ भार्य्याः प्रकीर्त्तिताः । तासामपत्यान्यष्टानां भगवान् प्रब्रवीतु मे ।
॥ वैशम्पायन उवाच ॥ अष्टौ महिष्यः पुत्रिण्य इति प्राधान्यतः स्मृताः । सर्व्वा वीरप्रजाश्चैव तास्वपत्यानि मे शृणु ।
रुक्मिणी सत्यभामा च देवी नग्नजिती तथा । सुदत्ता च तथा शैब्या लक्ष्मणा जालहासिनी ।
मित्रविन्दा च कालिन्दी जाम्बवत्यथ पौरवी । सुभीमा च तथा माद्री रुक्मिणीतनयान् शृणु । ९१८०
प्रद्युम्नः प्रथमं जज्ञे शम्बरान्तकरः सुतः । द्वितीयश्चारुदेष्णश्च वृष्णिसिंहो महारथः ।
चारुभद्रश्चारुगर्भः सुदंष्ट्रो द्रुम एव च । सुषेणश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान् ।
चारुबाहुः कनीयांश्च कन्या चारुमती तथा । जज्ञिरे सत्यभामायां भानुर्भीमरथः क्षुपः ।
रोहितो दीप्तिमांश्चैव ताम्रजाक्षो जलान्तकः । भानुर्भीमरिका चैव ताम्रपक्षा जलन्धमा ।
चतस्रः जज्ञिरे तेषां स्वसारो गरुडध्वजात् । जाम्बवत्याः सुतो जज्ञे साम्बः समितिशोभनः । ९१८५
मित्रवान्मित्रविन्दश्च मित्रवत्यपि चाङ्गना । मित्रबाहुः सुनीथश्च नग्नजित्याः प्रजाः शृणु ।
भद्रकारो भद्रविन्दः कन्या भद्रवती तथा । सुदत्तायास्तु शैब्यायां संग्रामजिदजायत ।
सत्यजित् सेनजिच्चैव तथा शूरः सपत्नजित् । सुभीमायाः सुतो माद्र्या वृकाश्वो वृकनिर्वृतिः ।
कुमारो वृकदीप्तिश्च लक्ष्मणायाः प्रजाः शृणु । गात्रवान् गात्रगुप्तश्च गात्रविन्दश्च वीर्य्यवान् ।
जज्ञिरे गात्रवत्याऽथ भगिन्याऽनुजया सह । अश्रुतश्च सुतो जज्ञे कालिन्द्याः श्रुतसम्मतः । ९१९०
अश्रुतं श्रुतसेनाय प्रददौ मधुसूदनः । तं प्रदाय हृषीकेशस्तां भार्य्यां मुदितोऽब्रवीत् ।
एष तामुभयोरस्तु दायादः शाश्वतीः समाः । बृहत्यां तु गदस्याहुः शैब्यायामङ्गदं सुतं ।
उत्पन्नं कुमुदश्चैव श्वेतं श्वेतां तथाऽङ्गनां । अगावहः सुमित्रश्च शुचिश्चित्ररथस्तथा ।
चित्रसेनः सुदेवायाश्चित्रा चित्रवती तथा । वनस्तम्बश्च जज्ञाते स्तम्बः स्तम्बवनश्च ह ।

निविशमो वनस्तम्बात् कन्या साम्बवती तथा। उपासङ्गस्य तु सुतौ वज्रायुः क्षिप्र एव च। ९८९५
कौशिक्यां सुतसोमायां यौधिष्ठिर्य्यां युधिष्ठिरः। कापाली गरुडश्चैव जज्ञाते चित्रयोधिनौ।
एवमादीनि पुत्राणां सहस्राणि निबोध मे। दशायुतं समाख्याता वासुदेवस्य ते सुताः।
अयुतानि तथा चाष्टौ शूरा रणविशारदाः। जनार्द्दनस्य भवतः कीर्त्तितोऽयं यथा तथा।
प्रद्युम्नस्य सुतो जज्ञे वैदर्भ्यां राजसत्तम। अनिरुद्धो रणे योद्धा जज्ञे स मृगकेतनः।
रेवत्यां बलदेवस्य जज्ञाते निशठोल्मुकौ। भ्रातरौ देवसङ्काशावुभौ पुरुषसत्तमौ। ९९००
सुतनुश्च नराची च शौरेरास्तां परिग्रहः। पौण्ड्रश्च कपिलश्चैव वसुदेवस्य तौ सुतौ।
नराच्यां कपिलो जज्ञे पौण्ड्रश्च सुतनूसुतः। तयोर्नृपोऽभवत् पौण्ड्रः कपिलस्तु वनं ययौ।
तुय्यां समभवद्वीरो वसुदेवान्महाबलः। जरा नाम निषादानां प्रभुः सर्व्वधनुष्मतां।
काश्यां सुपार्श्वं तनयं लेभे स हि तरस्विनं। मानुवओऽनिरुद्धस्य वज्रस्तस्मादजायत।
वज्राज्जज्ञे प्रतिरथः सुचारुस्तस्य चात्मजः। अनमित्राच्छिनिर्जज्ञे कनिष्ठाद्वृष्णिनन्दनात्। ९९०५
शिनेस्तु सत्यवाग्जज्ञे सत्यकस्तु महारथः। सत्यकस्यात्मजः शूरो युयुधानस्त्वजायत।
असङ्गो युयुधानस्य तूणिस्तस्याभवत् सुतः। तूणेर्युगन्धरः पुत्र इति वंशः समाप्यते।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वृष्णिवंशानुकीर्त्तने द्विषष्ट्यधिकशततमोऽध्यायः॥ १६२ ॥
॥ जनमेजय उवाच ॥ य एष भवता पूर्व्वं शम्बरघ्नेत्युदाहृतः। प्रद्युम्नः स कथं जज्ञे शम्बर तद्ब्रवीहि मे।
॥ वैशम्पायन उवाच ॥ रुक्मिण्यां वासुदेवस्य लक्ष्म्यां कामो धृतव्रतः। शम्बरान्तकरो जज्ञे प्रद्युम्नः कामदर्शनः।
तं सप्तरात्रे संपूर्णे निशीथे सूतिकागृहात्। जहार कृष्णस्य सुतं शिशुं वै कालशम्बरः। ९९१०
विदितं तच्च कृष्णस्य देवमायानुवर्त्तिनः। ततो न निगृहीतः स दानवो युद्धदुर्म्मदः।
स मृत्युना परीतायुर्म्मायया प्रजहार तं। दोर्भ्यामुत्क्षिप्य नगरं स्वं निनाय महासुरः।
अनपत्या तु तस्यासीद्भार्य्या रूपगुणान्विता। नाम्ना मायावती नाम मायेव शुभदर्शना।
ददौ तं वासुदेवस्य पुत्रं पुत्रमिवात्मजं। तस्या महिष्या नाथिन्या दानवः कालचोदितः।
मायावती तु तं दृष्ट्वा संप्रहृष्टतनूरुहा। हर्षेण महता युक्ता पुनः पुनरुदैक्षत। ९९१५
अथ तस्या निरीक्षन्त्याः स्मृतिः प्रादुर्ब्बभूव ह। अयं स मम कान्तोऽभूत् सैवं चान्वचिन्तयत्।
अयं स नाथो भर्त्ता मे यस्यार्थे हि दिवानिशं। चिन्ताशोकह्रदे मग्ना न विन्दामि रतिं क्वचित्।
अयं भगवता पूर्व्वं देवदेवेन शूलिना। खेदितेन कृतोऽनङ्गो दृष्टो जात्यान्तरे मया।
कथमस्य स्तनं दास्ये मातृभावेन जानती। भर्त्तुर्भार्य्या त्वहं भूत्वा वक्ष्ये वा पुत्र इत्युत।
एवं सञ्चिन्त्य मनसा धात्र्यास्तं सा समर्पयत्। रसायनप्रयोगैश्च शीघ्रमेवाभ्यवर्द्धयत्। ९९२०
धात्र्याः सकाशात् स च तां शृण्वन् रुक्मिणिनन्दनः। मायावतीमविज्ञानान्मेने स्वामेव मातरं।
सा च तं वर्द्धयामास कार्ष्णिं कमललोचनं। मायास्तस्मै ददौ सर्व्वा दानवीः काममोहिता।
स यदा यौवनस्थस्तु प्रद्युम्नः कामदर्शनः। चिकीर्षितज्ञो नारीणां सर्व्वास्त्रविधिपारगः।

तं सा मायावती कान्तं कामयामास कामिनी । इङ्गितैश्चापि वीक्षन्ती प्रालोभयत सस्मिता ।
प्रसक्तन्तीन्तु तां देवीं बभाषे चारुहासिनीं । ९२२५
॥ प्रद्युम्न उवाच ॥ मातृभावं व्यतिक्रम्य किमेवं वर्त्तसेऽन्यथा । अहो दुष्टस्वभावाऽसि स्त्रीत्वे चपलमानसा ।
या पुत्त्रभावमुत्सृज्य मयि लोभात् प्रवर्त्तसे । ननु तेऽहं सुत: सौम्ये कोऽयं शीलविपर्य्ययः ।
तत्त्वमिच्छाम्यहं देवि कथितं को न्वयं विधिः । विद्युत्सम्पातचपल: स्वभाव: खलु योषितां ।
या नरेषु प्रसज्जन्ते नगाग्रेषु घना इव । यदि तेऽहं सुत: सौम्ये यदि वाऽनात्मज: शुभे ।
कथितं तत्त्वमिच्छामि किमिदं ते चिकीर्षितं । एवमुक्ता तु सा भीरु: कामेन व्यथितेन्द्रिया । ९२३०
प्रियं प्रोवाच वचनं विविक्ते केशवात्मजं । न त्वं मम सुत: कान्त नापि ते शम्बर: पिता ।
रूपवानसि विक्रान्तस्त्वं आढ्या वृष्णिनन्दन: । पुत्त्रस्त्वं वासुदेवस्य रुक्मिण्या नन्दिवर्द्धन: ।
दिवसे सप्तमे बालो जातमात्रो ऽपवाहित: । सूतिकागारमध्यात्त्वं शिशुरुत्तानशायित: ।
मम भर्त्रा हृतोऽसि त्वं बलवीर्य्यप्रवर्त्तिना । पितुस्ते वासुदेवस्य धर्षयित्वा गृहं महत् ।
पाकशासनकल्पस्य हृतस्त्वं शम्बरेण ह । सा च ते करुणं माता त्वां बालमनुशोचती । ९२३५
अत्यर्थं तप्यते वीर विवत्सा सौरभी यथा । स हि शक्रादपि महान् पिता ते गरुडध्वज: ।
इह त्वां नाभिजानाति बालमेवापवाहितं । कान्त वृष्णिकुमारस्त्वं न हि त्वं शम्बरात्मज: ।
वीर नैवंविधान् पुत्त्रान् दानवा जनयन्ति हि । अतोऽहं कामयामि त्वां न हि त्वं जनितो मया ।
रूपन्ते सौम्य पश्यन्ती सीदामि हृदि दुर्ब्बला । यन्मे व्यवसितं कान्त यच्च मे हृदि वर्त्तते ।
तन्मे मनसि वार्ष्णेय प्रतिसन्धातुमर्हसि । एष ते कथित: सर्व्व: सद्भावस्त्वयि यो मम । ९२४०
यथा न मम पुत्त्रस्त्वं न पुत्त्र: शम्बरस्य च । श्रुत्वैवमखिलं सर्व्वं मायावत्या प्रभाषितं ।
चक्रायुधात्मज: क्रुद्ध: शम्बरं स समाह्वयत् । सर्व्वमायास्वभिज्ञो ऽसौ नाम विश्राव्य चात्मन: ।
अहो दानव दुष्टात्मा केशवस्यात्मजं शिशुं । हरते निर्भयस्यैव भयमद्य करोम्यहं ।
कथं वै क्रोधमागच्छेद्युध्यते च कथं मया । प्रथमं किं करिष्यामि येन कुप्यति मन्दधी: ।
अस्ति चास्य ध्वजं चित्रं सिंहकेतुविभूषितं । तोरणं गृहमासाद्य उच्छ्रितं मेरुशृङ्गवत् । ९२४५
एतदुन्मथ्य पातिष्ये भल्लेन निशितेन च । ध्वजच्छेदं विदित्वाऽथ शम्बरो निष्क्रमिष्यति ।
ततो युद्धेन हत्वाऽसौ गन्ताऽस्मि द्वारकां प्रति । इत्युक्त्वा सज्यमाचक्रे सशरश्चापमोजसा ।
चिच्छेद ध्वजरत्नन्तु शम्बरस्य महाभुज: । तच्छ्रुत्वा तु ध्वजच्छेदं प्रद्युम्नेन महात्मना ।
क्रुद्धस्त्वाज्ञापयामास पुत्त्रान् वै कालशम्बर: । जिघांसथ महावीरा रौक्मिणेयं त्वरान्विता: ।
नैतं वै द्रष्टुमिच्छामि मम विप्रियकारकं । श्रुत्वा तु शम्बराद्वाक्यं सुतास्ते शम्बरस्य ह । ९२५०
सन्नद्धा निर्ययुर्हृष्टा: प्रद्युम्नवधकाङ्क्षया । चित्रसेनोऽतिसेनश्च विष्कम्भनजितस्तथा ।
श्रुतसेन: सुषेणश्च सोमसेनो मनस्तथा । सेनाग्नी: सैन्यहन्ता च सेनहा सैनिकस्तथा ।
सेनस्कन्धोऽतिसेनश्च शनको जनकस्तत: । सकलो विकल: शान्त: स शान्तान्तकरो विभु: ।

कुम्भकेतुः सुदंष्ट्रश्च केशिरित्येवमादयः । चक्रतोमरशूलानि पट्टिशासिपरश्वधान् ।
गृहीत्वा निर्ययुर्हृष्टा मृत्युना परिचोदिताः । आक्रयंस्तमभित्रं वै तस्थुः संग्राममूर्द्धनि ।
प्रद्युम्नस्तु महाबाहूरथमारुह्य सत्वरं । निर्ययौ चापमादाय संग्रामाभिमुखस्तदा ।
ततः प्रवृत्तं युद्धन्तु तुमुलं लोमहर्षणं । शम्बरस्य च पुत्राणां केशवस्य तु सूनुना ।
ततो देवाः सगन्धर्व्वाः सयक्षोरगचारणाः । देवराजं पुरस्कृत्य विमानाग्रेषु विष्ठिताः ।
नारदस्तुम्बुरुश्चैव हाहाहूहूश्च गायनाः । अप्सरोभिः परिवृताः सर्व्वे तत्रावतस्थिरे ।
देवराजप्रतीहारो गन्धर्व्वश्चित्रमद्भुतं । शशंस देवराजाय वज्रिणे चित्रमद्भुतं ।
शम्बरस्य शतं पुत्रा एकः कृष्णस्य चात्मजः । बहूनां युध्यतामेष कथं विजयमाप्नुयात् ।
तच्छ्रुत्वा भाषितं तस्य प्रहस्य बलसूदनः । उवाच वचनञ्चेदं शृणु योऽस्य पराक्रमः ।
कामोऽयं पूर्व्वदेहे तु हरक्रोधाग्निनिर्ज्जितः । रत्या प्रसादितो देवः कामपत्न्या त्रिलोचनः ।
परितुष्टेन देवेन वरमस्याः प्रदीयत । विष्णुर्म्मनुष्यदेहस्तु द्वारकायां भविष्यति ।
तस्य पुत्रस्तु ते भर्त्ता भविष्यति न संशयः । अनङ्ग इति विख्यातस्त्रिलोकेषु महायशाः ।
तत्रोत्पन्नो महातेजाः शम्बरं घातयिष्यति । सप्ताहे जातमात्रन्तु रुक्मिण्याः क्रोडसंस्थितं ।
आस्थाय शम्बरो मायां प्रद्युम्नमपनेष्यति । तद्गच्छ शम्बरगृहं भार्य्या मायावती भव ।
मायारूपप्रतिच्छन्ना शम्बरं मोहयिष्यसि । तत्र त्वमात्मनः कान्तं बालरूपं विवर्द्धय ।
प्राप्तयौवनदेहस्तु शम्बरं निहनिष्यति । ततस्त्वया सहानङ्गो द्वारकां वै गमिष्यति ।
रमिष्यते त्वया सार्द्धं शैलपुत्र्या त्वहं यथा । एवमादिश्य देवेशो जगाम पुरुषोत्तमः ।
कैलासं मेरुसङ्काशं सिद्धचारणसेवितं । कामपत्नी प्रणम्याथ देवदेवमुमापतिं ।
जगाम शम्बरगृहं कालस्यान्तं प्रतीक्षती । एवमेष महाबाहुः शम्बरं निहनिष्यति ।
सपुत्रस्य च प्रद्युम्नो हन्ता तस्य दुरात्मनः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि शम्बरवधे त्रिषष्ट्यधिकशततोऽध्यायः ॥ १६३ ॥
॥ वैशम्पायन उवाच ॥ ततः प्रवृत्तं युद्धं तत् तुमुलं लोमहर्षणं । शम्बरस्य तु पुत्राणां रुक्मिण्या नन्दनस्य च ।
ततः क्रुद्धा महादैत्याः शरशक्तिपरश्वधान् । चक्रतोमरकुन्तानि भुशुण्डीर्म्मुषलानि च ।
युगपत्पातयन्ति स्म प्रद्युम्नोपरि वेगिताः । कार्ष्णायनिस्तु संक्रुद्धः सर्व्वांस्तैर्द्धनुषश्च्युतैः ।
एकैकं पञ्चभिः क्रुद्धश्चिच्छेद रणमूर्द्धनि । ततोऽसुराः क्रुद्धतराः सर्व्वे ते कृतनिश्चयाः ।
ववर्षुः शरजालानि प्रद्युम्नवधकाङ्क्षया । ततः प्रकुपितोऽनङ्गो धनुरादाय सत्वरः ।
शम्बरस्य जघानाशु दश पुत्रान्महौजसः । ततोऽपरेण भल्लेन कुपितः केशवात्मजः ।
चिच्छेदाशु शिरस्तस्य चित्रसेनस्य वीर्य्यवान् । ततस्ते हतशेषास्तु समेत्य समयुध्यत ।
शरवर्षं विमुञ्चन्तो अभ्यधावन् जिघांसितुं । ततः सान्धाय बाणांस्ते विमुञ्चन्तो रणोत्सुकाः ।
क्रीडन्निव महातेजास्तेषां शिरांस्यपातयत् । निहत्य समरे सर्व्वान् शतमुत्तमधन्विनां ।

प्रद्युम्नः समराकाङ्क्षी तस्थौ संग्राममूर्द्धनि । हतं पुत्रशतं श्रुत्वा शम्बरः क्रोधमादधे ।
सूतं सञ्चोदयामास रथं मे संप्रयोजय । राज्ञो वाक्यं निशम्याथ प्रणम्य शिरसा भुवि ।
स सैन्यश्चोदयामास रथञ्च सुसमाहितं । युक्तन्तु वरहयेण सर्पयोक्त्रेण योजितं ।
शार्दूलचर्म्मसंवेष्टं किङ्किणीजालमालिनं । ईहामृगगणाकीर्णं पक्षिभक्तिविराजितं ।
ताराचित्रपिनद्धाङ्गं स्वर्णकूवरभूषितं । सुपताकं महोच्छ्रायं मृगराजोग्रकेतनं ।
सुविभक्तवरूथञ्च लोहेशावज्रवन्धुरं । मन्दरोदयशिखरं चारुचामरभूषितं ।
नक्षत्रमालापिहितं हेमदण्डसमाहितं । विराजमानं श्रीमन्तमारोह शम्बरस्तदा ।
काञ्चनं चित्रसन्नाहं धनुर्गृह्य शरांस्तथा । प्रस्थितः समराकाङ्क्षी मृत्युना परिचोदितः ।
चतुर्भिः सचिवैः सार्द्धं सैन्येन महता वृतः । दुर्द्धरः केतुमाली च शत्रुहन्ता प्रमर्द्दनः ।
एतैः परिवृतो ऽमात्यैर्युयुत्सुः प्रस्थितो रणे । दश नागसहस्राणि रथानां द्वे शते तथा ।
हयानाञ्चाष्टसाहस्रैः प्रयुतैश्च पदातिनां । एतैः परिवृतो योधैः शम्बरः प्रययौ तदा ।
प्रयातस्य तु संग्रामे उत्पातान्युत्थितानि वै । गृध्रचक्राकुले व्योम्नि सन्ध्याकाराभ्रनादिताः ।
गर्ज्जन्ति परुषं मेघा निर्घातश्चाम्बरात्पतत् । शिवा विनेदुरशिवं भैरवं संकालरान्महत् ।
ध्वजशीर्षे ऽपतद्गृध्रः काञ्चने वै दानवात्मजे । रथाग्रे पतितश्चास्य कबन्धो भुवि दृश्यते ।
चिचीकूचीति वाशन्ति शम्बरस्य रथोपरि । स्वर्भानुग्रस्त आदित्यः परिघैः परिवेष्टितः ।
स्फुरते नयनञ्चास्य सव्यं भयनिवेदनं । बाहुः प्रकम्पते सव्यः प्रास्खलंस्तत्र वाजिनः ।
ध्वजो मूर्द्ध्नि निपतितः शम्बरस्य सुरारिणः । ववर्ष रुधिरं देवः शर्करांशुाारनिश्रितं ।
उल्कापातसहस्राणि निपेतू रणमूर्द्धनि । प्रतोदो न्यपतद्धस्तात् सारथेर्रथयायिनः ।
एतानचिन्तयित्वा तु उत्पातान् समुपस्थितान् । प्रययौ शम्बरः क्रुद्धः प्रद्युम्नवधकाङ्क्षया ।
भेरीशङ्खमृदङ्गानां पणवानकदुन्दुभेः । युगपत्ताड्यमानानां पृथिवी समकम्पत ।
तेन शब्देन महता सन्त्रस्ता मृगपक्षिणः । समन्तादुद्रवंस्तस्माद्भयविक्लवचेतनाः ।
रणमध्ये स्थितः कार्ष्णिश्चिन्तयन्निधनं रिपोः । सैन्यैः परिवृतो ऽसंख्यै युद्धाय कृतनिश्चयः ।
क्रुद्धः शरसहस्रेण प्रद्युम्नं समताडयत् । असम्प्राप्तांश्चैव तान् बाणांश्चिच्छेद कृतहस्तवत् ।
प्रद्युम्नो धनुरायम्य शरवर्षं मुमोच ह । तत्र सैन्ये न स ह्यासीत् यो न विद्धः शरेण वै ।
प्रद्युम्नशरघातेन तत् सैन्यं विमुखीकृतं । शम्बरस्य रथाभ्यासे स्थितं संत्यज्य भीतवत् ।
स्वबलं विद्रुतं दृष्ट्वा शम्बरः क्रोधमूर्च्छितः । आज्ञापयामास तदा सचिवान्दानवेश्वरः ।
गच्छध्वं मन्नियोगेन प्रहरध्वं रिपोः सुतं । नोपेक्षणीयः शत्रुर्वै वध्यतां क्षिप्रमेव वै ।
उपेक्षित इव व्याधिः शरीरं नाशयेद्ध्रुवं । तदेष दुर्म्मतिः पापो वध्यतां मन्नियोगतः ।
ततस्ते सचिवाः क्रुद्धाः शिरसा गृह्य शासनं । शरवर्षं प्रमुञ्चन्तस्त्वरिताश्चोदयन्हयान् ।
तान्दृष्ट्वा धावतः सङ्ख्ये क्रुद्धो मकरकेतनः । चापमुद्यम्य संभ्रान्तस्तस्थौ प्रमुखतो बली ।

दर्द्दुरं पञ्चविंशत्या शरैः सन्नतपर्व्वभिः । बिभेद सुमहातेजाः केतुमालिं त्रिषष्टिभिः ।
सप्तत्या शत्रुहन्तारं द्वाशीत्या तु प्रमर्द्दनं । बिभेद परमामर्षी रुक्मिण्या नन्दिवर्द्धनः ।
ततस्ते सचिवाः क्रुद्धाः प्रद्युम्नं शरवृष्टिभिः । निजघ्नुः समरे वीरास्तदद्भुतमिवाभवत् ।
एकैकशो बिभिदिरे षष्टिभिः षष्टिभिः शरैः । तानप्राप्तान् शरान् बाणैश्चिच्छेद मकरध्वजः ।
ततोऽर्द्धचन्द्रमादाय दर्द्दुरस्य स सारथिं । जघान पश्यतां राज्ञां सर्व्वेषां सैनिकस्य वै ।
चतुर्भिरथ नाराचैः सुपत्रैः कङ्कवाजितैः । जघान चतुरः सोऽश्वान् दर्द्दुरस्य रथं प्रति ।
एकेन योक्त्रं रुक्मस्य ध्वजमेकेन सत्वरं । षष्ठ्या च युगचक्राक्षं चिच्छेद मकरध्वजः ।
ततोऽर्द्धचन्द्रमादाय कङ्कपत्रं सुतेजितं । मुमोच हृदये तस्य दर्द्दुरस्यात्मजीविनः ।
स गतः सर्व्वतश्छिन्नो गतसत्त्वो गतप्रभः । निपपात रथोपस्थात् क्षीणपुण्य इव ग्रहः ।
दर्द्दुरे निहते शूरे दानवे दानवेश्वरः । केतुमाली शरव्रातैरभिदुद्राव रुक्मिणं ।
प्रद्युम्नमभिसंक्रुद्धो भ्रुकुटीभीषणाननः । रुषा ऽभ्यधावत् सहसा तिष्ठ तिष्ठेति चाब्रवीत् ।
संक्रुद्धः कृष्णसूनुं तु शरवर्षैरवाकिरत् । पर्व्वतं वारिधाराभिः प्रावृषीव यथा घनः ।
स विद्धो दानवामात्यः प्रद्युम्नेन धनुष्मता । चक्रमादाय चिक्षेप प्रद्युम्नवधकाङ्क्षया ।
तमप्राप्तं सहस्रारं कृष्णचक्रसमद्युतिं । निपत्योत्पत्य जग्राह सर्व्वेषामेव पश्यतां ।
तेनैव तस्य चिच्छेद केतुमालेः शिरस्तदा । तद्दृष्ट्वा कर्म्म विपुलं रौक्मिणेयस्य देवराट् ।
विस्मयं परमं प्राप्तः सर्व्वैर्देवगणैः सह । गन्धर्व्वाप्सरसश्चैव पुष्पवर्षैरवाकिरन् ।
केतुमालिं हतं दृष्ट्वा शत्रुहन्ता प्रमर्द्दनः । महाबलसमूहेन प्रद्युम्नमथ दुद्रुवे ।
ते गदां मुषलं चक्रं प्रासतोमरसायकान् । भिन्दिपालान् कुठारांश्च भास्वरान् कूटमुद्गरान् ।
युगपत् संक्षिपन्ति स्म वधार्थं कृष्णनन्दने । सोऽपि तान्यस्त्रजालानि शस्त्रजालैरनेकधा ।
चिच्छेद बहुधा वीरो दर्शयन् पाणिलाघवं । गजान् सोऽभ्यहनत् क्रुद्धो गजारोहान् सहस्रशः ।
रथान् सारथिभिः सार्द्धं हयांश्चैव ममर्द्द ह । पातयंस्तु शरव्रातैर्नाविद्धः कश्चिदोच्यते ।
एवं सर्व्वाणि सैन्यानि समन्य मकरध्वजः । नदीं प्रावर्त्तयद्घोरां शोणिताम्बुतरङ्गिणीं ।
मुक्ताहारोर्म्मिसङ्कुलां मांसमेदोस्थिपङ्किणीं । छत्रद्वीपां शरावर्त्तां रथैः पुलिनमण्डितां ।
केयूरकुण्डलापूर्णां ध्वजमत्स्यविभूषितां । नागग्राहवतीं रौद्रामसिनक्रविभूषितां ।
केशशैवलसञ्छन्नां शोणितस्त्वक्मृणालिकां । वराननसपद्माञ्च हंसचामरवीजितां ।
शिरश्छिन्नसमाकीर्णां शोणितौघप्रवर्त्तिनीं । नदीं दुस्तरणीं भीमामनङ्गेन प्रवर्त्तितां ।
दुष्प्रेक्ष्यां दुर्गमां रौद्रां हीनतेजःसुदुस्तरां । शस्त्रग्राहवतीं घोरां यमराष्ट्रविवर्द्धिनीं ।
तत्र रुक्मिसुतः श्रीमान् विलोडयति धन्विनः । शत्रुहन्तारमाश्रित्य शरानभ्यकिरन् बहून् ।
शत्रुहन्ता पुनः क्रुद्धो मुमोच शरमुत्तमं । प्रद्युम्नस्य समासाद्य हृदये निपपात ह ।
स विद्धस्तेन बाणेन प्रद्युम्नो न व्यकम्पत । शक्तिं जग्राह बलवान् शत्रुहन्तुर्मुमूर्षवे ।

सा क्षिप्ता रौक्मिणेयेन शक्तिर्ज्वालाकुला रणे । पपात हृदयं भित्त्वा वज्राशनिसमस्वना ।
भिन्नहृदयः स्रस्ताङ्गो मुक्तचर्मासिबन्धनः । पपात रुधिरोद्गारी शत्रुहन्ता महाबलः ।
पतितं शत्रुहन्तारं दृष्ट्वा तस्मौ प्रमर्द्दनः । अथाह मुषलं सोऽथ वचनञ्चेदमाददे । ८१४५
तिष्ठ किं प्राकृतैरेभिः करिष्यसि रणप्रिय । मां योधयस्व दुर्ब्बुद्धे ततस्त्वं न भविष्यसि ।
वृष्णिवंशे कुले जातः शत्रुरस्मत्पिता तव । पुत्रं हन्ताऽस्म्यहं तस्य ततोऽसौ निहतो भवेत् ।
मृतेन तेन दुर्ब्बुद्धे सर्व्वदेवक्षयो भवेत् । दैतेया दानवाः सर्व्वे मोदन्तां हतशत्रवः ।
हते त्वयि ममास्त्रेण मत्समुत्थैश्च शोणितैः । शम्बरस्य तु पुत्राणां करोम्युदककर्मत्क्रियां ।
अद्य भीष्मसुता मन्दा करुणं विलपिष्यति । निहतं त्वाञ्च श्रुत्वैव यौवनस्थं गतायुषं । ८१५०
स ते पिता चक्रधरो विफलाशो भविष्यति । हतं त्वां स विदित्वा तु प्राणांस्त्यक्ष्यति मन्दधीः ।
इत्युक्त्वा परिघेणाशु ताडयद्रुक्मिणीसुतं । स ताडितो महातेजा रौक्मिणेयः प्रतापवान् ।
दोर्भ्यामुत्क्षिप्य तस्यैव रथं मह्यां व्यचूर्णयत् । सोऽवप्लुत्य रथात्तस्मात् पदातिरवतस्थिवान् ।
तां गदां गृह्य सहसा रौक्मिणेयमुपाद्रवत् । तयैव गदया कामः प्रमर्द्दनमपोथयत् ।
हतं प्रमर्द्दनं दैत्या दृष्ट्वा सर्व्वे प्रदुद्रुवुः । न शक्ताः प्रमुखे स्थातुं सिंहत्रासाद्गजा इव । ८१५५
सारमेयं यथा दृष्ट्वाऽविगणो विप्रणश्यति । तथा सैन्या निषीदन्ति प्रद्युम्नस्य भयार्द्दिताः ।
क्षतजादिग्धवस्त्रा वै मुक्तकेशा ह्यशोभना । रजस्वलेव युवती सेना समभिगृह्यते ।
मदनशरविभिन्ना सैनिकामभ्युपायाद्युवतिसदृशवेशा साध्वसैः पीड्यमाना । रतिसमरमशक्ता वीक्षितुं सोढुमन्तो ध्वगटङ्गम नकामा नेच्छते स्थातुमत्र ।

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि शम्बरसैन्यभङ्गे चतुःषष्ट्यधिकशततोऽध्यायः ॥ १६४ ॥

॥ वैशम्पायन उवाच ॥ शम्बरस्तु ततः क्रुद्धः सूतमाह विशाम्पते । शत्रुप्रमुखतो वीर रथं मे वाहय द्रुतं ।
यावदेनं शरैर्हन्मि मम विप्रियकारकं । ततो भर्त्तुर्व्वचः श्रुत्वा सूतस्तत्प्रियकारकः । ८१६०
हयान् सञ्चोदयामास चामीकरविभूषितान् । तं दृष्ट्वा रथमायान्तं प्रद्युम्नः फुल्ललोचनः ।
सन्दधे चापमादाय शरं कनकभूषणं । तेनाहनत् सुसंक्रुद्धः कोपयन् शम्बरं रणे ।
हृदये ताडितस्तेन देवशत्रुः सुविक्लवः । रथशक्तिं समाश्रित्य तस्थौ सोऽथ विचेतनः ।
स चेतनां पुनः प्राप्य धनुरादाय शम्बरः । विव्याध कार्ष्णिं कुपितः सप्तभिर्निशितैः शरैः ।
तानप्राप्तान् शरान् सोऽथ सप्तभिः सप्तधाऽच्छिनत् । शम्बरस्य जघानाथ सप्तत्या निशितैः शरैः । ८१६५
पुनः शरसहस्रेण कङ्कबर्हिणवाससा । अहनच्छम्बरं क्रोधाद्धाराभिरिव पर्व्वतं ।
प्रदिशो विदिशश्चैव शरधारासमावृताः । अन्धकारीकृतं व्योम दिनकर्त्ता न दृश्यते ।
ततोऽन्धकारमुत्साद्य वैद्युतास्त्रेण शम्बरः । प्रद्युम्नस्य रथोपस्थे शरवर्षं मुमोच ह ।
तदस्त्रजालं प्रद्युम्नः शरेणानतपर्व्वणा । चिच्छेद बहुधा राजन्दर्शयन् पाणिलाघवं ।
हते तस्मिन्महावर्षे शरेण कार्ष्णिना तदा । द्रुमवर्षं मुमोचाथ मायया कालशम्बरः । ८१७०

द्रुमवर्षोत्थितं दृष्ट्वा प्रद्युम्नः क्रोधमूर्च्छितः । आग्नेयास्त्रं मुमोचाथ तेन वृक्षानशातयत् ।
भस्मीभूते वृक्षवर्षे शिलासंघातमुत्सृजत् । प्रद्युम्नस्तन्तु वायव्यैः प्रोत्सारयत संयुगे ।
ततो मायां परां चक्रे देवशत्रुः प्रतापवान् । सिंहान् व्याघ्रान् वराहांश्च तरक्षूनृक्षवानरान् ।
वारणान् वारिदप्रख्यान् हयानुष्ट्रान् विशाम्पते । मुमोच धनुरायम्य प्रद्युम्नस्य रथोपरि ।
गान्धर्व्वास्त्रेण चिच्छेद सर्व्वांस्तान् खण्डशस्तदा । प्रद्युम्नेन तु तां मायां पातितां वीक्ष्य शम्बरः । ९८७५
अन्यां मायां मुमोचाथ शम्बरः क्रोधमूर्च्छितः । गजेन्द्रान् भिन्नरदनान् षष्टिहायनयौवनान् ।
महामात्रोत्तमारूढान् कल्पितान्मणगर्व्वितान् । तामापतन्तीं मायान्तु कार्ष्णिः कमललोचनः ।
सैंहीं मायां समुत्स्रष्टुं चक्रे बुद्धिं महामनाः । सा सृष्टा सिंहमाया तु रौक्मिणेयेन धीमता ।
माया नागमयी नष्टा आदित्येनेव शर्व्वरी । निहतां हस्तिमायान्तु दृष्ट्वाऽसौ दानवेश्वरः ।
मायां संमोहनीं नाम सोऽसृजद्दानवोत्तमः । तां दृष्ट्वा मोहनीं नाम मायां मयविनिर्म्मितां । ९८८०
संज्ञास्त्रेण तु प्रद्युम्नो नाशयामास वीर्य्यवान् । शम्बरस्तु ततः क्रुद्धो मायया नष्टया तया ।
सैंहीं मायां महातेजाः सोऽसृजद्दानवेश्वरः । सिंहानापततो दृष्ट्वा रौक्मिणेयः प्रतापवान् ।
अस्त्रं गान्धर्व्वमादाय शरभानसृजत्तदा । तेऽष्टापदा बलोदग्रा नखदंष्ट्रायुधा रणे ।
सिंहान् विद्रावयामासुर्वायुर्ज्जलधरानिव । सिंहान् विद्रावितान्दृष्ट्वा मायया ऽष्टापदेन वै ।
शम्बरश्चिन्तयामास कथमेनं निहन्मि वै । अहो मूर्खस्वभावोऽयं यन्मया न हतः शिशुः । ९८८५
प्राप्तयौवनदेहस्तु कृतास्त्रस्यापि दुर्म्मतिः । तत् कथं निहनिष्यामि शत्रुं रणशिरःस्थितं ।
माया मे तिष्ठते तीव्रा पान्नगी नाम भीषणा । दत्ता मे देवदेवेन हरेणासुरघातिना ।
तां सृजामि महामायामाशीविषसमाकुलां । तया दह्येत दुष्टात्मा क्षेप मायामयो बली ।
सा सृष्टा पान्नगी माया विषज्वालासमाकुला । तया पन्नगमय्या तु सरथः सह वाजिभिः ।
ससूतः सहप्रद्युम्नः संयतः शरबन्धनैः । बध्यमानं तदा दृष्ट्वा आत्मानं वृष्णिवंशजः । ९८९०
मायां सञ्चिन्तयामास सौपर्णीं सर्पनाशनीं । सा चिन्तिता महामाया प्रद्युम्नेन महात्मना ।
सुपर्णा विचरन्ति स्म सर्पा नष्टा महाविषाः । भग्नायां सर्पमायायां प्रशंसन्ति सुरासुराः ।
साधु वीर महाबाहो साधु रुक्मिणिनन्दन । यत्त्वया धर्षिता माया तेन स्म परितोषिताः ।
हतायां सर्पमायायां शम्बरश्चिन्तयत् पुनः । अस्ति मे कालदण्डाभो मुद्गरो हेमभूषितः ।
तमप्रतिहतं युद्धे देवदानवमानुषैः । पुरा यो मम पार्व्वत्या दत्तः परमतुष्टया । ९८९५
गृहाण शम्बरेमं त्वं मुद्गरं हेमभूषितं । मया सृष्टं स्वदेहे वै तपसाद्य सुदुस्तरं ।
मायान्तकरणं नाम सर्व्वासुरविनाशनं । अनेन दानवौ रौद्रौ बलिनौ नगचारिणौ ।
शुम्भश्चैव निशुम्भश्च सगणौ सूदितौ मया । प्राणसंशयमापन्ने त्वया मोच्यः स शत्रवे ।
इत्युक्त्वा पार्व्वती देवी तत्रैवान्तरधीयत । तदहं मुद्गरं श्रेष्ठं मोचयिष्यामि शत्रवे ।
तस्य विज्ञाय चित्तन्तु देवराजोऽभ्यभाषत । गच्छ नारद शीघ्रं त्वं प्रद्युम्नस्य रथं प्रति । ९९००

संबोधय महाबाहुं पूर्व्वजातिञ्च स्मारय । वैष्णवास्त्रं प्रयच्छास्मै बधार्थं शम्बरस्य च ।
अभेद्यं कवचञ्चास्मै प्रयच्छासुरसूदने । एवमुक्तो मघवना नारदः प्रययौ त्वरन् ।
आकाशे विष्ठितोवाच मकरध्वजकेतनं । कुमार पश्य मां प्राप्तं देवगन्धर्व्वनारदं ।
प्रेषितं देवराजेन तव सम्बोधनाय वै । स्मर त्वं पूर्व्वकं भावं कामदेवोऽसि मानद ।
हरकोपानलाद्दग्धस्तेनानङ्गस्त्वमुच्यसे । त्वं वृष्णिवंशे जातोऽसि रुक्मिण्या गर्भसम्भवः ।
जातोऽसि केशवेन त्वं प्रद्युम्न इति कीर्त्तिते । आहृत्य शम्बरेण त्वमिहानीतोऽसि मानद ।
सप्तरात्रे त्वसंपूर्णे सूतिकागारमध्यतः । बधार्थं शम्बरस्य त्वं ह्रियमाणो ह्युपेक्षितः ।
केशवेन महाबाहो देवकार्य्यार्थसिद्धये । यैषा मायावती नाम भार्य्या वै शम्बरस्य तु ।
रतिं तां विद्धि कल्याणीं तव भार्य्यां पुरातनीं । तव सा रक्षणार्थाय शम्बरस्य गृहेऽवसत् ।
मायां शरीरजां न्यस्य मोहनार्थं दुरात्मनः । रतेस्त्वत्पादनार्थाय प्रेषयत्यनिशं तदा ।
एवं प्रद्युम्न बुद्ध्वा वै तव भार्य्या प्रतिष्ठिता । हत्वा तं शम्बरं वीर वैष्णवास्त्रेण संयुगे ।
गृहीत्वा मायावतीं भार्य्यां द्वारकां गन्तुमर्हसि । गृहाण वैष्णवञ्चास्त्रं कवचञ्च महाप्रभं ।
शक्रेण तव संगृह्य प्रेषितं शत्रुसूदन । शृणु मे त्वपरां वाचं क्रियतामविशङ्कया ।
अस्य देवरिपोस्तात मुद्गरो नित्यमूर्ज्जितः । पार्व्वत्या तुष्टया दत्तः सर्व्वशत्रुनिवर्हणः ।
अमोघश्चैव संग्रामे देवदानवमानवैः । तदस्त्रप्रतिघातार्थं देवीं संस्मर्त्तुमर्हसि ।
त्वया चैव नमस्या च महादेवी रणोत्सुकैः । तत्र वै क्रियतां यत्नः संग्रामे रिपुणा सह ।
इत्युक्त्वा नारदो वाक्यं प्रययौ यत्र वासवः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि शम्बरबधे नारदवाक्ये पञ्चषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥
॥ वैशम्पायन उवाच ॥ शम्बरस्तु ततः क्रुद्धो मुद्गरं तं समाददे । मुद्गरे गृह्यमाणे तु द्वादशार्काः समुत्थिताः ।
पर्व्वताश्चलिताः सर्व्वे चलितं वसुधातलं । उन्मार्गाः सागरा जाताः संक्षुब्धाश्चापि देवताः ।
ग्रहनक्षत्रकाकुलं व्योम उल्कापातो बभूव ह । ववर्ष रुधिरं देवः परुषं पवनो ववौ ।
एवं दृष्ट्वा महोत्पातान् प्रद्युम्नः स त्वरान्वितः । अवतीर्य्य रथाद्वीरः कृताञ्जलिपुटः स्थितः ।
देवीं सस्मार मनसा पार्व्वतीं शङ्करप्रियां । प्रणम्य शिरसा देवीं स्तोतुं समुपचक्रमे ।
॥ प्रद्युम्न उवाच ॥ ओं नमः कात्यायन्यै गुहस्य जनन्यै नमः । नमस्त्रैलोक्यमायायै कात्यायन्यै नमो नमः ।
नमः शत्रुविनाशिन्यै नमो गौर्य्यै गिरीशायै । नमस्ते शुम्भहननी निशुम्भहृदि दारणी ।
कालरात्रिं नमस्येऽहं कुमारीञ्चापि नित्यशः । कान्तारवासिनीं देवीं नमस्यामि कृताञ्जलिः ।
विन्ध्यवासिनीं दुर्गघ्नां रणदुर्गां रणप्रियां । नमस्यामि महादेवीं जयाञ्च विजयान्तथा ।
अपराजितां नमस्येऽहमजितां शत्रुतापनीं । घण्टाहस्तां नमस्यामि घण्टामालाकुलान्तथा ।
त्रिशूलिनीं नमस्यामि महिषासुरघातिनीं । सिंहवाहां नमस्यामि सिंहप्रवरकेतनां ।
एकानंशां नमस्यामि गायत्रीं यज्ञसत्कृतां । सावित्रीञ्चापि विप्राणां नमस्येऽहं कृताञ्जलिः ।

रक्ष मां देवि सततं संग्रामे विजयं कुरु । इति कामवचः श्रुत्वा दुर्गा सुप्रीतमानसा । ९४१०
उवाच वचनं देवी सुप्रीतेनान्तरात्मना । पश्य पश्य महाबाहो रुक्मिण्या नन्दिवर्द्धन ।
वरं वरय वत्स त्वममोघं दर्शनं मम । देव्यास्तु वचनं श्रुत्वा रोमाञ्चोद्गतमानसः ।
प्रणम्य शिरसा देवीं विज्ञाप्तुमुपचक्रमे । यदि त्वं देवि तुष्टाऽसि दीयतां मे यदीप्सितं ।
वरश्च वरदे याचे सर्व्वामित्रेषु मे जयः । यस्त्वया मुद्गरो दत्तः शम्बरस्यात्मसम्भवः ।
एष मे गात्रमासाद्य माला पद्ममयी भवेत् । तथाऽस्त्विति च साऽप्युक्ता तत्रैवान्तरधीयत । ९४१५
प्रद्युम्नस्तु महातेजाः प्रहृष्टो रथमारुहत् । मुद्गरं तु गृहीत्वाऽथ शम्बरः क्रोधमूर्च्छितः ।
भ्रामयित्वा स चिक्षेप प्रद्युम्नोरसि वीर्य्यवान् । स गत्वा मदनाभ्यासं माला भूत्वाऽथ पौष्करी ।
प्रद्युम्नस्य तु कण्ठे सा समासक्ता व्यराजत । नक्षत्राणान्तु मालायां यथा परिवृतोडुराट् ।
ततो देवाः सगन्धर्व्वाः सिद्धाश्च परमर्षयः । साधु साध्विति वाचोचुः पूजयन् केशवात्मजं ।
मुद्गरं पुष्पभूतं तु दृष्ट्वा प्रद्युम्नसन्निधौ । वैष्णवं परमास्त्रं तु नारदेन यदाहृतं । ९४२०
सन्दधे चापमानम्य इदं वचनमब्रवीत् । यद्यहं रुक्मिणीपुत्रः केशवस्यात्मजो ह्यहं ।
तेन सत्येन बाणेमं जहि त्वं शम्बरं रणे । इत्युक्त्वा चापमाकृष्य सन्धाय च महामनाः ।
चिक्षेप शम्बरस्याथ दहन् लोकत्रयं यथा । स क्षिप्तो वृष्णिसिंहेन बाणः क्रव्यादमोदनः ।
हृदयं शम्बरस्याथ भित्त्वा धरणिमागमत् । नैवास्य मांसं न स्नायुर्नास्थि न त्वङ्न शोणितं ।
सर्व्वं तद्भस्मसाद्भूतं वैष्णवास्त्रस्य तेजसा । हते दैत्ये महाकाये दानवे शम्बराधमे । ९४२५
जहृषुर्देवगन्धर्व्वा ननृतुश्चाप्सरोगणाः । उर्व्वशी मेनका रम्भा विप्रचित्तिस्तिलोत्तमा ।
ननृतुर्हृष्टमनसो जगत् स्थावरजङ्गमं । देवराजस्तु सुप्रीतः सर्व्वदेवगणैः सह ।
प्रद्युम्नं पुष्पवर्षेण समभ्यर्चत प्रहृष्टवत् ।
अथ समरहते तु दैत्यराजे मधुमथनसुतेन वैष्णवास्त्रैः । विगतरिपुभयाः सुराश्च जग्मुर्मकरविभूषणकेतनं स्तुवन्तः ।
स च समरपरिश्रमं वहन् वै नगरमुखं प्रविवेश रौक्मिणेयः । प्रियतम इव कान्तया प्रहृष्टस्त्वरितपदं रतिदर्शनञ्चकार । ९४३०

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि शम्बरवधे प्रद्युम्नकृतदुर्गास्तवे षट्षष्ट्यधिकशततोऽध्यायः ॥ १६६ ॥

॥ वैशम्पायन उवाच ॥ समाप्तमायो मायाज्ञो विक्रान्तः समरेऽव्ययः । अष्टम्यां निहतो युद्धे मायावी कालशम्बरः ।
तन्मृत्ववन्ते नगरे निहत्यामरसत्तमं । गृह्य मायावतीं देवीमागच्छन्नगरं पितुः ।
सोऽन्तरीक्षगतो भूत्वा मायया शीघ्रविक्रमः । आजगाम पुरीं रम्यां रक्षितां तेजसा पितुः ।
सोऽन्तरीक्षात् प्रपतितः केशवान्तःपुरे शिशुः । मायावत्या सह तया रूपवानिव मन्मथः ।
तस्मिंस्त्वावपतिते सस्त्रियः केशवस्य याः । विस्मिताश्चैव हृष्टाश्च भीताश्चैवाभवंस्ततः । ९४३५
ततस्तं कामसङ्काशं कान्तया सह सङ्गतं । प्रेक्षन्त्यो हृष्टवदनाः पिबन्त्यो नयनासवं ।
तं विनीतमुखं दृष्ट्वा सज्जमानं पदे पदे । अभवन् स्निग्धसंकल्पाः सर्व्वास्ताः कृष्णयोषितः ।
रुक्मिणी चैव तं दृष्ट्वा शोकार्त्ता पुत्रगर्द्धिनी । सपत्नीशतसंकीर्णा सवाष्पा वाक्यमब्रवीत् ।

यादृक् स्वप्नो मया दृष्टो निशाया यौवने गते । कंसारिणा समानीय दत्तं साहारपल्लवं ।
शशिरश्मिप्रतीकाशं मुक्तादाम च शोभनं । केशवेनाङ्कमारोप्य मम कण्ठे न्यबध्यत । ९५६०
श्यामा सुचारुकेशा स्त्री शुक्लाम्बरविभूषिता । पद्महस्ता शिरोधान्ती प्रविष्टा मम वेश्मनि ।
तया पुनरहं शुद्धा स्नापिता रुचिराम्बुना । कुशेशयमयीं मालां स्त्री संगृह्याथ पाणिना ।
मम मूर्द्धन्युपाघ्राय दत्त्वा चक्रे तथा मम । एवं स्वप्नं कीर्त्तयन्ती रुक्मिणी हृष्टमानसा ।
सखीजनवृता देवी कुमारं प्रेक्ष्य तं मुहुः । धन्यायाः खल्वयं पुत्रो दीर्घायुः प्रियदर्शनः ।
ईदृशः कामसङ्काशो यौवने प्रथमे स्थितः । जीवपुत्त्रा तथा पुत्त्र का सा भाग्यसमन्विता । ९५६५
किमर्थं चाभ्युदश्याम: सभार्य्यस्त्वमिहागतः । अस्मिन् वयसि सुव्यक्तं प्रद्युम्नो मम पुत्त्रकः ।
भवेद्यदि न नीतः स्यात् कृतान्तेन बलीयसा । व्यक्तं वृष्णिकुमारोऽयं न मिथ्या मम तर्कितं ।
विज्ञातोऽसि मया चिह्नैर्विना चक्रं जनार्द्दनः । मुखं नारायणस्येव केशाः केशान्त एव च ।
ऊरू वक्षो भुजौ तुल्यौ हलिनः श्वशुरस्य मे । कस्त्वं वृष्णिकुलं सर्व्वं द्योतयन् वपुषा स्थितः ।
अहो नारायणस्यापि द्वितीया समपरा तनुः । एतस्मिन्नन्तरे कृष्णः सहसा प्रविवेश ह । ९५७०
नारदस्य वचः श्रुत्वा शम्बरस्य वधं प्रति । सोऽपश्यत्तं सुतं श्रेष्ठं सिद्धं मन्मथलक्षणैः ।
स्नुषां मायावतीं चैव हृष्टचेता जनार्द्दनः । सोऽब्रवीत् सहसा देवीं रुक्मिणीं देवतामिव ।
अयं स देवि संप्राप्तः पुत्त्रस्तापधरस्तव । अनेन शम्बरं हत्वा मायायुद्धविशारदं ।
हता मायास्तु ताः सर्व्वा याभिर्द्देवानबाधत । सती चेयं शुभा साध्वी भार्य्याऽपि तनयस्य ते ।
मयावतीति विख्याता शम्बरस्य गृहोषिता । मा च ते शम्बरस्येयं पत्नीति भवतु व्यथा । ९५७५
मन्मथे तु गते नाशं गते चानङ्गतां पुरा । कामपत्नी न कान्तैषा शम्बरस्य रतिः प्रिया ।
मायारूपेण तं दैत्यं मोहयत्यसकृच्छुभा । न चैषा तस्य कौमारे वशे तिष्ठति शोभना ।
आत्ममायामयं कृत्वा रूपं शम्बरमाविशत् । पत्न्येषा मम पुत्त्रस्य स्नुषा तव वराङ्गना ।
लोककान्तस्य साहाय्यं करिष्यति मनोमयं । प्रवेशयैनां भवनं पूज्या ज्येष्ठा स्नुषा मम ।
चिरात् प्रनष्टं स्वसुतं भजस्व पुनरागतं । ९५८०
॥ वैशम्पायन उवाच ॥ श्रुत्वा तु वचनं देवी कृष्णेनोदाहृतं तदा । प्रहर्षमतुलं लब्ध्वा रुक्मिणी वाक्यमब्रवीत् ।
अहो धन्यतराऽस्मीति वीरपुत्त्रसमागमात् । अद्य मे सफलः कामः पूर्णस्तस्य मनोरथः ।
चिरप्रनष्टपुत्त्रस्य दर्शनात् प्रियया सह । आगच्छ भवनं पुत्त्र प्रविश प्रियया सह ।
ततोऽभिवाद्य चरणौ गोविन्दं मातरञ्च सः । प्रद्युम्नः पूजयामास हलिनञ्च महाबलं ।
उत्थाप्य तं परिष्वज्य मूर्द्ध्न्युपाघ्राय वीर्य्यवान् । प्रद्युम्नं बलिनां श्रेष्ठं केशवः परवीरहा । ९५८४
स्नुषाञ्चोत्थाप्य तां देवी रुक्मिणी रुक्मभूषणां । परिष्वज्योपसंगृह्य स्नेहाद्गद्गदभाषिणी ।
समेतं भवनं पत्न्या शच्येन्द्रमदितिर्यथा । प्रवेशयामास तदा रुक्मिणी सुतमागतं ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि प्रद्युम्नागमने सप्तषष्ट्यधिकशततोऽध्यायः ॥ १६७ ॥

॥ वैशम्पायन उवाच ॥ अथाश्चर्य्याद्भुतं मन्त्रमाह्निकं जयतांवर। यं जप्त्वा तु नृपश्रेष्ठ सायम्प्रातर्मनो भजेत्।
कीर्त्तितं बलदेवेन कृष्णेनैवानुकीर्त्तितं। धर्म्मकामैश्च मुनिभिर्ऋषिभिश्चापि कीर्त्तितं।
सुरासुरगुरुर्ब्रह्मा पातु मां जगतीपतिः। तथोङ्कारवषट्कारौ सावित्री त्रिपथस्त्रयः। ९४९०
ऋचो यजूंषि सामानि छन्दांस्याथर्व्वणानि च। चत्वारः सखिला वेदाः सरहस्याः सविस्तराः।
पुराणमितिहासश्च खिलान्युपखिलानि च। अङ्गान्युपाङ्गानि तथा व्याख्यानानि च पान्तु मां।
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमं। इन्द्रियाणि मनो बुद्धिस्तथा सत्त्वं रजस्तमः।
व्यानोदानः समानश्च प्राणोऽपानश्च पञ्चमः। वायवः सप्त चैवान्ये यैर्व्याप्तमिदं जगत्।
मरीचिरङ्गिराऽत्रिश्च पुलस्त्यः पुलहः क्रतुः। भृगुर्व्वशिष्ठो भगवान् पान्तु ते मां महर्षयः। ९४९५
कश्यपाद्याश्च मुनयश्चतुर्द्दश दिशो दश। नरनारायणौ देवौ सगणौ पान्तु मां सदा।
रुद्राश्चैकादश प्रोक्ता आदित्या द्वादशैव तु। अष्टौ च वसवो देवा अश्विनौ द्वौ प्रकीर्त्तितौ।
ह्रीः श्रीर्लक्ष्मीः स्वधा मेधा तुष्टिः पुष्टिः स्मृतिर्धृतिः। अदितिर्द्दितिर्द्दनुश्चैव सिंहिका दैत्यमातरः।
हिमवान् हेमकूटश्च निषधः श्वेतपर्व्वतः। ऋषभः पारियात्रश्च विन्ध्यो वैदूर्य्यपर्व्वतः।
सह्यादयश्च मलयो मेरुमन्दरदर्द्दुराः। क्रौञ्चकैलासमैनाकाः पान्तु मां धरणीधराः। ९५००
शेषश्च वासुकिश्चैव विशालाक्षश्च तक्षकः। एलापत्रः शुक्तिकर्णः कम्बलाश्वतरावुभौ।
हस्तिभद्रः पिठरकः कर्कोटकधनञ्जयौ। तथा पूरणकश्चैव नागश्च करवीरकः।
सुमनाख्यो दधिमुखस्तथा शृङ्गारपिण्डकः। मणिनागश्च भगवांस्त्रिषु लोकेषु विश्रुतः।
नागराडधिकर्णश्च तथा हारिद्रकोऽपरः। एते चान्ये च बहवो ये चान्ये नानुकीर्त्तिताः।
भूधराः सत्यधर्म्माणः पान्तु मां भुजगेश्वराः। समुद्राः पान्तु चत्वारो गङ्गा च सरितांवरा। ९५०५
सरस्वती चन्द्रभागा शतद्रुर्द्देविका शिवा। इरावती विपाशा च शरयूर्यमुना तथा।
कल्माषी च रथोष्मा च बाहुदा च हिरण्यदा। प्लक्षा चेक्षुमती चैव स्रवन्ती च वृहद्रथा।
ख्याता चर्म्मण्वती चैव पुण्या चैव वधूसरा। एताश्चान्याश्च सरितो याश्चान्या नानुकीर्त्तिताः।
उत्तरापथगामिन्यः सलिलैः स्नपयन्तु मां। सिप्रा चर्म्मण्वती पुण्या मही श्वभ्रवती शुभा।
वेण्वा गोदावरी सीता कावेरी कोङ्कणावती। कृष्णवेणा शुक्तिमती तमसा पुष्पवाहिनी। ९५१०
ताम्रपर्णी ज्योतिरथा उत्पलोदुम्बरावती। नदी वैतरणी पुण्या विदर्भा नर्म्मदा शुभा।
वितस्ता वै भीमरथी एला चैव महानदी। कालिन्दी गोमती पुण्या नदः शोणश्च विश्रुतः।
एताश्चान्याश्च वै नद्यो याश्चान्या नानुकीर्त्तिताः। दक्षिणापथवाहिन्यः सलिलैः स्नपयन्तु मां।
सिन्धुर्वेत्रवती चैव भोजान्ता वनमालिका। पूर्व्वभद्राऽपराभद्रा निम्नगा च वरद्रुमा।
ख्याता वेत्रवती चैव पापदासीति विश्रुता। प्रख्यावती लुण्ठनदी पुण्या रम्या सरस्वती। ९५१५
मित्रघ्ना चेन्दुमाला च तथा मधुमती नदी। उमा गुरुनदी चैव तापी च विमलोदका।
विमला विमलोदा च मत्तगङ्गा पयस्विनी। एताश्चान्याश्च वै नद्यो याश्चान्या नानुकीर्त्तिताः।

ता मां समभिषिञ्चन्तु पश्चिमामाश्रिता दिशं । भागीरथी पुण्यजला प्राच्यां दिशि समाश्रिता।
सा तु दहतु मे पापं कीर्त्तिता शम्भुना धृता । प्रभासञ्च प्रयागञ्च नैमिषं पुष्कराणि च ।
गङ्गातीर्थं कुरुक्षेत्रं श्रीशैलं गौतमाश्रमं । रामह्रदं विनशनं रामतीर्थन्तथैव च । ९५२०
गङ्गाद्वारं कनखलं सोमो वै यत्र चोत्थितः । कपालमोचनं तीर्थं जम्बूमार्गञ्च विश्रुतं ।
सुवर्णविन्दु विख्यातं तथा कनकपिङ्गलं । दशाश्वमेधिकञ्चैव पुण्याश्रमविभूषितं ।
वदरी चैव विख्याता नरनारायणाश्रमः । विख्यातं फल्गुतीर्थञ्च तीर्थं भद्रवटं तथा ।
कोकामुखं पुण्यतमं गङ्गासागरमेव च । मगधेषु तपोदश्च गङ्गाह्रदश्च विश्रुतः ।
तीर्थान्येतानि पुण्यानि सेवितानि महर्षिभिः । मां स्नापयन्तु सलिलैः कीर्त्तिताकीर्त्तितानि वै । ९५२५
धर्म्मार्थकामविषयो यशःप्राप्तिः शमो दमः । वरुणोऽग्नोऽथ पर्ज्जन्यो यमो नियम एव च ।
कान्तिर्नयः सन्नतिश्च क्रोधो मोहः क्षमा धृतिः । विद्युतोऽभ्राण्योषधयः प्रमादोन्मादविभ्रमाः ।
यक्षाः पिशाचा गन्धर्व्वाः किन्नराः सिद्धचारणाः । नक्तञ्चराः खेचरिणो दंष्ट्रिणः प्रियविग्रहाः ।
लम्बोदराश्च बलिनः पिङ्गाक्षा विश्वरूपिणः । मरुतः सहपर्ज्जन्या कला चुटिलवक्षणाः ।
नक्षत्राणि ग्रहाश्चैव ऋतवः शिशिरादयः । मासाहोरात्रयश्चैव सूर्य्याचन्द्रमसौ तथा । ९५३०
आमोदश्च प्रमोदश्च प्रहर्षः शोक एव च । मन्युस्तमस्तपः सत्यं श्रुतिः सिद्धिः स्मृतिस्तथा ।
रुद्राणी भद्रकाली च भद्रषष्ठी च वारुणी । भासी च कालिका चैव शाण्डिली चैव विश्रुता ।
आर्य्या कुहूः सिनीवाली भीमा चैत्रवती रतिः । एकानंशा च कुष्माण्डी देवी कात्यायनी तथा ।
लोहित्यायनमाता च देवकन्याश्च या स्मृताः । गोनन्दा देवपत्नी च मां रक्षन्तु सबान्धवं ।
नानाभरणवेशाश्च नानारूपाङ्कितानना । नानादेशविचारिण्यो नानाशस्त्रोपशोभिताः । ९५३५
मेदोमज्जाप्रियाश्चैव मद्यमांसवशाप्रियाः । मार्ज्जाररूपिवक्त्राश्च गजसिंहनिभाननाः ।
कङ्कवायसगृध्राणां क्रौञ्चतुल्याननास्तथा । व्यालयज्ञोपवीताश्च चर्म्मप्रावरणास्तथा ।
क्षतजोक्षितरक्ताश्च खरभेरीसमस्वनाः । मत्सराः क्रोधनाश्चैव प्रासादकृतिरालयाः ।
मत्तोन्मत्तप्रमत्ताश्च प्रहसन्त्यश्च विस्मिताः । पिङ्गाक्ष्यः पिङ्गकेश्यश्च तथा व्याकुलमूर्द्धजाः ।
ऊर्द्धकेश्यः कृष्णकेश्यः श्वेतकेश्यस्तथैव च । नागायुतबलाश्चैव वायुवेगबलास्तथा । ९५४०
एकहस्ता एकपादा एकाक्ष्यः कम्पिताननाः । बहुपुत्राल्पपुत्राश्च द्विपुत्राः प्रियमण्डिकाः ।
मुखमण्डी विडाली च पूतना गन्धपूतना । शीतवातोष्णवेताली रेवती षष्ठसंज्ञिता ।
प्रियहास्याः प्रियक्रोधाः प्रियघोषाः प्रियम्बदाः । सुखप्रसादाः सुखदाः सदा द्विजजनप्रियाः ।
नक्तञ्चराः सुखोदर्काः सदा पर्व्वणि दारुणाः । मातरो मातृवत् पुत्र रक्षन्तु मम नित्यशः ।
पितामहमुखोद्भूता रौद्रा रुद्राङ्गसम्भवाः । कुमारस्कन्दजाश्चैव अपरा वै वैष्णवादयः । ९५४५
महावीर्य्या महाभीमा दर्पोद्धूता महाबलाः । क्रोधजाः क्रोधनाः क्रूराः सुरविग्रहकारिणः ।
नक्तञ्चराः खेचरिणो दंष्ट्रिणः प्रियविग्रहाः । लम्बोदरा अबलिनः पिङ्गाक्षा विश्वरूपिणः ।

शतघ्नीशूलपरिघप्रासचर्म्मासिपाणय: । पिनाकवज्रमुषलशक्तिदण्डायुधप्रिया: ।
दण्डिन: कुण्डिन: शूरा: जटामुकुटधारिण: । वेदवेदाङ्गकुशला नित्यं यज्ञोपवीतिन: ।
व्यालापीडा: कुण्डलिनो वीरा: केयूरधारिण: । नानावसनसंवीतास्त्रिवस्त्रगनुलेपना: ।
गजाश्वोष्ट्रसमार्ज्जारसिंहव्याघ्रनिभानना: । वराहोलूकगोमायुमृगाखुमहिषानना: । ९५५०
वामना विकटा: कुब्जा: कराला लूनमूर्द्धजा: । सहस्रशतशस्त्वन्ये सहस्रजटधारिण: ।
श्वेतकैलाससङ्काशा: केचिद्धिमकरप्रभा: । केचिज्जलदवर्णाभा नीलाञ्जनचयोपमा: ।
एकपादा द्विपादाश्च तथा द्विशिरसोऽपरे । निर्म्मांसास्तालजङ्घाश्च व्यादितास्या भयङ्करा: ।
वापीतडागकूपेषु समुद्रेषु सर:सु च । श्मशानशैलवृक्षेषु शून्यागारनिवासिन: ।
एते ग्रहाश्च सततं रक्षन्तु मम सर्व्वत: । महा गणपतिर्नन्दी महाकालो महाबल: । ९५५५
माहेश्वरो वैष्णवश्च ज्वरौ लोकभयावहौ । ग्रामणीश्चैव गोपालो भृङ्गरीटिर्गणेश्वर: ।
देवश्च वामदेवश्च घण्टाकर्ण: करन्धम: । श्वेतमोद: कपाली च जम्भक: शत्रुतापन: ।
मज्जनोन्मज्जनौ चोभौ सन्तापनविलापनौ । निजघासो घसश्चैव स्थूणाकर्ण: प्रशोषण: ।
उल्कामाली धमधमो ज्वालाजिह्व: प्रमर्द्दन: । संघट्टन: संकुचन: काष्ठभूत: शिवङ्कर: ।
कुष्माण्ड: कुम्भमूर्द्धा च रोचनो वैकृतो ग्रह: । अनिकेत: सुरारिघ्न: शिवश्चाशिव एव च । ९५६०
क्षेमक: पिशिताशी च सुरारिर्लोहिताक्षण: । भीमको ग्राहकश्चैव तथैवोग्रमयो ग्रह: ।
उपग्रहोऽर्थकश्चैव तथा स्कन्दग्रहोऽपर: । चपलो लोमवेतालस्तामस: सुमहाकपि: ।
हृदयोद्वर्त्तनश्चण्ड: कुणप्राशी कङ्कणप्रिय: । हरिश्मश्रुर्गरुत्मान्तो मनोमारुतरंहस: ।
पार्व्वत्या रोषसंभूता: सहस्राणि शतानि च । शक्तिमन्तो द्युतिमन्तो ब्रह्मण्या: सत्यसङ्गरा: ।
सर्व्वकामोपहर्त्तारो हन्तारो द्विषतां मृधे । रात्र्यावहनि दुर्गेषु कीर्त्तिताकीर्त्तिता गणै: । ९५६५
तेषां गणानां पतय: सगणा: पान्तु नित्यश: । नारद: पर्व्वतश्चैव गन्धर्व्वाप्सरसाङ्गणा: ।
पितर: कारणं कार्य्यमाधयो व्याधयस्तथा । अगस्त्यो गालवो गार्ग्य: शक्तिर्धौम्य: पराशर: ।
कृष्णात्रेयश्च भगवानसितो देवलोऽनल: । बृहस्पतिरुतथ्यश्च मार्कण्डेय: श्रुतश्रवा: ।
द्वैपायनो विदर्भश्च जैमिनिर्माठर: कठ: । विश्वामित्रो वशिष्ठश्च लोमशश्च महानृषि: ।
उतङ्कश्चैव रैभ्यश्च पौलोमश्च द्वितस्त्रित: । ऋषिर्व्वै कालवृक्षीयो मुनिर्मेधातिथिस्तथा । ९५७०
सारस्वतो यवक्रीत: कुशिको गौतमस्तथा । सम्वर्त्त ऋष्यशृङ्गश्च स्वस्त्यात्रेयो विभाण्डक: ।
ऋचीको जमदग्निश्च तथौर्व्वस्तपसां निधि: । भरद्वाज: स्थूलशिरा: काश्यप: पुलह: क्रतु: ।
बृहदग्निर्हरिश्मश्रुर्व्विजय: कण्व एव च । वैतण्डी च दीर्घतपा वेदस्त्वाथांशुमान् शिव: ।
शुन:शेफ: शुन:पुच्छ: शुनोलाङ्गूल एव च । अष्टावक्रो दधीचिश्च श्वेतकेतुस्तथैव च ।
उद्दालक: सारपाणि: शृङ्गी गौरमुखस्तथा । अग्निवेश्य: शमीकश्च प्रमुचुर्म्मुमुचुस्तथा । ९५७५
एते चान्ये च बहव ऋषय: संशितव्रता: । मुनय: संशितात्मानो ये चान्ये नानुकीर्त्तिता: ।

ऋजवः स्वाधिनः शान्ताः शान्तिं कुर्व्वन्तु मे सदा । त्रयोऽग्नयस्त्रयो वेदास्त्रैविद्यं कौस्तुभो मणिः ।
उच्चैःश्रवा हयः श्रीमान्वैद्यो धन्वन्तरिर्हरिः । अमृतं गौः सुवर्णञ्च दधिगौराश्च सर्षपाः ।
शुक्लाः सुमनसः कन्याः श्वेतच्छत्रं यवाक्षताः । दूर्व्वा हिरण्यं गन्धाश्च बालव्यजनमेव च ।
तथाऽप्रतिहतं चक्रं महोक्षश्चन्दनं विषं । श्वेतो वृषः करी मत्तः सिंहो व्याघ्रो हयो गिरिः ।
पृथिवी चोद्धृता लाजा ब्राह्मणा मधु पायसं । स्वस्तिको वर्द्धमानश्च नन्द्यावर्त्तः प्रियङ्गवः ।
श्रीफलं गोमयं मत्स्या दुन्दुभी पटहस्वनः । ऋषिपत्न्यश्च कन्याश्च श्रीमद्भद्रासनं धनुः ।
रोचना रुचकश्चैव नदीनां सङ्गमोदकं । सुपर्णाः शतपत्राश्च चकोरा जीवजीवकाः ।
नन्दीमुखो मयूरश्च वज्रमुक्ता मणिध्वजाः । आयुष्याणि प्रशस्तानि कार्य्यसिद्धिकराणि च ।
पुण्यं वै विगतक्लेशं श्रीमद्वै मङ्गलान्वितं । रामेणोदाहृतं पूर्व्वमायुःश्रीजयकाङ्क्षिणा ।
यश्चेदं श्रावयेद्विद्वान् यश्चेदं शृणुयान्नरः । मङ्गलाष्टशतं स्नातो जपेत् पर्व्वणि पर्व्वणि ।
वधबन्धपरिक्लेशं व्याधिशोकपराभवं । न च प्राप्नोति वैकल्यं परत्रेह च नन्दति ।
धन्यं यशस्यमायुष्यं पवित्रं वेदसम्मितं । श्रीमत् स्वर्ग्यं सदा पुण्यमपत्यजननं शुभं ।
शिवं क्षेमङ्करं नृणां मेधाजननमुत्तमं । सर्व्वरोगप्रशमनं सुकीर्त्तिकुलवर्द्धनं ।
श्रद्दधानो दयाभूतः प्रपठेदात्मवान्नरः । सर्व्वपापविशुद्धात्मा गतिञ्च लभते शुभां ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि बलदेवाह्निके अष्टषष्ट्यधिकशततोऽध्यायः ॥ १६८ ॥
॥ वैशम्पायन उवाच ॥ हतो यदैव प्रद्युम्नः शम्बरेणात्मघातिना । मासेऽस्मिन्नेव शाम्बस्तु जाम्बवत्यामजायत ।
बाल्यात् प्रभृति रामेण सोऽस्त्रेषु विनियोजितः । रामादनन्तरश्चैव मानितः सर्व्ववृष्णिभिः ।
जातमात्रे ततः कृष्णः शुभां तामावसत् पुरीं । निहतामित्रसामन्तः शक्रोद्यानं यथाऽमराः ।
यादवीञ्च श्रियं दृष्ट्वा स्वां श्रियं द्वेष्टि वासवः । जनार्द्दनभयाच्चैव न शान्तिं लेभिरे नृपाः ।
कस्यचित्त्वथ कालस्य पुरे वारणसाह्वये । दुर्य्योधनस्य यज्ञे वै समीयुः सर्व्वपार्थिवाः ।
तां श्रुत्वा माधवीं लक्ष्मीं सपुत्त्रञ्च जनार्द्दनं । पुरीं द्वारवतीञ्चैव निविष्टां सागरान्तरे ।
दूतैस्ते कृतसन्धानाः पृथिव्यां सर्व्वपार्थिवाः । प्रियं द्रष्टुं हृषीकेशमाजग्मुः कृष्णमन्दिरं ।
दुर्य्योधनमुखाः सर्व्वे धृतराष्ट्रवशानुगाः । पाण्डवप्रमुखाश्चैव धृष्टद्युम्नादयो नृपाः ।
पाण्ड्याश्चोलकलिङ्गेशा वाह्लीका द्रविडाः खशाः । अक्षौहिणीः प्रकर्षन्तो दश चाष्टौ च भूमिपाः ।
आजग्मुर्यादवपुरीं गोविन्दभुजपालितां । ते पर्व्वतं रैवतकं परिवार्य्यावनीश्वराः ।
विविशुर्य्योजनाख्यासु स्वासु स्वासु च भूमिषु । ततः श्रीमान् हृषीकेशः सह यादवपुङ्गवैः ।
समीपं मानवेन्द्राणां निर्य्ययौ कमलेक्षणः । स तेषां नरदेवानां मध्यस्थो मधुसूदनः ।
व्यराजत यदुश्रेष्ठः शरदीव दिवाकरः । स तत्र समुदाचारं यथास्थानं यथावयः ।
कृत्वा सिंहासने कृष्णः काञ्चने निषसाद ह । राजानोऽपि यथास्थानं निषेदुर्विविधेष्वथ ।
सिंहासनेषु चित्रेषु पीठेषु च नराधिपाः । सयादवनरेन्द्राणां समाजः शुशुभे तदा ।

सुराणामसुराणाञ्च सदसि ब्रह्मणो यथा। तेषाञ्चित्राः कथास्तत्र प्रवृत्ताः समसमागमे।
यदूनां पार्थिवानाञ्च केशवस्योपशृण्वतः। एतस्मिन्नन्तरे वायुर्व्ववौ मेघरवोद्धुतः।
तुमुलं दुर्द्दिनं चासीत्सविद्युत्स्तनयित्नुमत्। तद्दुर्द्दिनतलं भित्त्वा नारदः प्रत्यदृश्यत।
संवेष्टितजटाभारो वीणासक्तेन बाहुना। स पपात नरेन्द्राणां मध्ये पावकसन्निभः।
नारदोऽग्निशिखाकारः श्रीमाञ्छक्रसखो मुनिः। तस्मिन्निपतिते भूमौ नारदे मुनिपुङ्गवे।
तदद्भुतमहामेघं व्यपाकृष्यत दुर्द्दिनं। सोऽवगाह्य नरेन्द्राणां मध्यं सागरसन्निभं।
आसनस्थं यदुश्रेष्ठमुवाच मुनिरव्ययं। आश्चर्य्यः खलु देवानामेकस्त्वं पुरुषोत्तम।
धन्यश्चासि महाबाहो लोके नान्योऽस्ति कश्चन। एवमुक्तः स्मितं कृत्वा प्रत्युवाच मुनिं प्रभुः।
आश्चर्य्यश्चैव धन्यश्च दक्षिणाभिः सहेत्यहं। एवमुक्तो मुनिश्रेष्ठः प्राह मध्ये महीक्षितां।
कृष्ण पर्य्याप्तवाक्योऽस्मि गमिष्यामि यथागतं। तं प्रस्थितमभिप्रेक्ष्य पार्थिवाः प्राकृतेश्वरं।
गुह्यं मन्त्रमजानन्तो वचनं नारदेरितं। आश्चर्य्य इत्यभिहिते धन्योऽसीति च माधव।
दक्षिणाभिः सहेत्येवं प्रत्युक्तोऽपि च नारदे। किमेतन्नाभिजानीमो दिव्यं मन्त्रपदं महत्।
यदि श्राव्यमिदं कृष्ण श्रोतुमिच्छामि तत्त्वतः। तानुवाच ततः कृष्णः सर्व्वान् पार्थिवपुङ्गवान्।
श्रोतव्यं नारदस्त्वेष द्विजो वः कथयिष्यति। ब्रूहि नारद तत्त्वार्थं श्राव्यन्तां पृथिवीक्षितः।
यत्त्वयाऽभिहितं वाक्यं मया च प्रतिभाषितं। स पीठे काञ्चने शुभ्रे सूपविष्टः स्वलङ्कृते।
प्रभवन्तस्य वाक्यस्य प्रवक्तुमुपचक्रमे।
॥ नारद उवाच ॥ श्रूयतां भो नृपश्रेष्ठा यावन्तः स्थ समागताः। अस्य प्रश्नस्य महतो यथा पारमहङ्गतः।
अहं कदाचिद्गङ्गायास्तीरे त्रिषवणास्थितः। चराम्येकः क्षपापाये दृश्यमाने दिवाकरे।
अपश्यं गिरिकूटाभं कपालद्वयदेहिनं। क्रोशमण्डलविस्तारं ताव द्विगुणमायतं।
चतुश्चरणसंश्लिष्टं क्लिन्नं शैवलशङ्कुलं। मम वीणाकृतिं कूर्म्मं गजचर्म्मचयोपमं।
सोऽहं तं पाणिना स्पृष्ट्वा प्रोक्तवान् जलचारिणं। त्वमाश्चर्य्यशरीरोऽसि कूर्म्म धन्योऽसि मे मतः।
दस्त्वनेवमभेद्याभ्यां कपालाभ्यां समावृतः। तोये चरसि निःशङ्कः कश्चिदन्यन्नचिन्तयन्।
स मामुवाचाम्बुचरः कूर्म्मो मानुषवत् स्वयं। किमाश्चर्य्यं मयि विभो धन्यश्चाहं कथं मुने।
गङ्गेयं निम्नगा धन्या किमाश्चर्य्यमतः परं। यत्राहमिव सत्त्वानि चरन्त्यायुतशो द्विज।
सोऽहं कुतूहलाविष्टो नदीं गङ्गामुपस्थितः। धन्याऽसि त्वं सरिच्छ्रेष्ठे नित्यमाश्चर्य्यभूषिता।
या त्वमेवं महादेहैः श्वापदैरुपशोभिता। ह्रादिनी सागरं यासि रक्षन्ती तापसाश्रयान्।
एवमुक्ता ततो गङ्गा रूपिणी प्रत्यभाषत। नारदं देवगन्धर्व्वं प्रकाश्य दयितं द्विजं।
मा मैवं देवगन्धर्व्व संग्रामकलहप्रिय। नाहं धन्या द्विजश्रेष्ठ नाप्याश्चर्य्योपशोभिता।
तव सत्यं निविष्टस्य वाक्यं साम्प्रति बाधते। लोकाश्चर्य्यकरो लोके धन्यश्चैवार्णवो द्विज।
यत्राहमिव विख्याताः शतशो यान्ति निम्नगाः। सोऽहं त्रिपथगा वाक्यं श्रुत्वाऽर्णवमुपस्थितः।

आश्चर्य्यः खलु लोकानां धन्यश्चासि महार्णव । येन त्वमसि योनिस्तासामपां सलिलेश्वर ।
स्थाने त्वां वारिवाहिन्यः सरितो लोकपावनाः । इमाः समभिगच्छन्ति नद्यो लोकनमस्कृताः ।
समुद्रस्त्वेवमुक्तस्तु ततो मामब्रवीद्वचः । त्वं जलौघतलं भित्त्वा व्युत्थितः पवनेरितः ।
मा मैवं देवगन्धर्व्व नाहमाश्चर्य्यो द्विजर्षभ । वसुधेयं मुने धन्या यत्राहमुपरि स्थितः । ९४०
अतो तु पृथिवीं लोके किमाश्चर्य्यमतः परं । सोऽहं सागरवाक्येन क्षितिं क्षितितले स्थितः ।
कौतूहलसमाविष्टो स्वभुवं जगतो गतिं । धरित्रि देहिनां योनिर्धन्यासि शोभने ।
आश्चर्य्यञ्चापि भूतेषु महत्या क्षमया युते । तेन त्वमसि भूतानां धरणी मनुजारणिः ।
क्षमा त्वत्तः प्रसूता च कर्म्म चाम्बरगामिनां । ततो भूः स्तुतिवाक्येन सा मयोक्तेन तेजिता ।
विहाय सहजं धैर्य्यमथ मामभ्यभाषत । देवगन्धर्व्व मा मैवं संग्रामकलहप्रिय । ९४५
नास्मि धन्या न चाश्चर्य्या पारक्येयं धृतिर्मम । एते धन्या द्विजश्रेष्ठ पर्व्वता धारयन्ति मां ।
एष्वाश्चर्य्याणि दृश्यन्ते एते लोकस्य सेतवः । सोऽहं पर्य्यायवाक्येन पर्व्वतान् समुपस्थितः ।
धन्या भवन्तो दृश्यन्ते बह्वाश्चर्य्याश्च भूधराः । काञ्चनस्याकरस्य धातूनाञ्च विशेषतः ।
तेन रत्नाकराः सर्व्वे भवन्तो भुवि शाश्वताः । ते ममैतद्वचः श्रुत्वा पर्व्वतास्तस्थुषां वराः ।
ऊचुर्मां सान्त्वयुक्तानि वचांसि वनशोभिनः । ब्रह्मर्षे न वयं धन्या नाप्याश्चर्य्याणि सन्ति नः । ९५०
ब्रह्मा प्रजापतिर्धन्यः स चाश्चर्य्यः सुरेष्वपि । सोऽहं पितामहं गत्वा सर्व्वप्रभवमव्ययं ।
तस्य वाक्यस्य पर्य्यायं पर्य्याप्तमिव लक्षये । सोऽहं स्वयम्भुवं देवं लोकयोनिमथास्तुवं ।
पारम्पर्य्यादुपायातः प्रणामावनताननः । सोऽहं वाक्यसमाप्त्यर्थं श्रावये पद्मयोनये ।
आश्चर्य्यं भगवानेको धन्यश्च जगतो गुरुः । न किञ्चिदन्यत् पश्यामि भूतं यत्त्वया समं ।
त्वत्तः सर्व्वमिदं जातं जगत् स्थावरजङ्गमं । सदेवदानवा मर्त्या लोके भूतेन्द्रियात्मकाः । ९५५
भवन्ति सर्व्वदेवेश दृश्यादृश्यमिदं जगत् । तेन त्वमसि देवानां देवदेवः सनातनः ।
तेषामेवासि यत् स्रष्टा लोकानामपि भावनः । ततो मां प्राह भगवान् ब्रह्मा लोकपितामहः ।
धन्याश्चर्य्याभिनिर्वाक्यैः किं मां नारद भाषसे । आश्चर्य्यं परमं वेदा धन्या वेदाश्च नारद ।
ये लोकान्धारयन्ति स्म वेदास्तत्त्वार्थदर्शिनः । ऋक्सामयजुषां सत्यमथर्व्वणि च यन्मतं ।
तन्मयं विद्धि मां विप्र धृतोऽहं तैर्यथा च ते । पारमेष्ठ्येन वाक्येन चोदितोऽहं स्वयम्भुवा । ९६०
वेदोपस्थानिकास्तस्मै मतिसंख्यानविस्तरं । सोऽहं स्वयम्भुवस्तस्माद्वेदान्वै समुपस्थितः ।
उवाच वेदांश्चतुरो मन्त्रप्रवचनार्च्चितान् । धन्या भवन्तः पुण्याश्च नित्यमाश्चर्य्यभूषिताः ।
आधाराश्चैव विप्राणामेवमाह प्रजापतिः । स्वयम्भुवोऽपीह परं भवत्सु प्रश्नमागतः ।
युष्मत्परतरं नास्ति श्रुत्या वा तपसाऽपि वा । प्रत्यूचुस्ते तदा वाक्यं वेदा मामभितः स्थिताः ।
आश्चर्य्याश्चैव धन्याश्च यज्ञाश्चास्मत्परायणाः । यज्ञार्थे च वयं सृष्टा धात्रा येन स्म नारद । ९६५
तदस्माकं परा यज्ञा न वयं स्ववशे स्थिताः । स्वयम्भुवः परं वेदा वेदानाञ्च परं क्रतुः ।

ततोऽहमब्रुवं यज्वान् ग्टहस्थाग्निपुरस्कृतान् । भो यज्ञाः परमं तेजो युष्मासु खलु लक्ष्यते ।
ब्रह्मणाऽभिहितं वाक्यं यच्च वेदैरुदीरितं । आश्चर्य्यमन्यल्लोकेऽस्मिन् भवद्भ्यो नाधिगम्यते ।
धन्याः खलु भवन्तो ये द्विजातीनां स्वयंभुवः । तेन स्वल्पप्रयत्नात्रिं युष्माभिर्यान्ति तर्पिताः ।
भागैश्च त्रिदशाः सर्व्वे मन्त्रैश्चैव महर्षयः । अग्निष्टोमादयो यज्ञा मम वाक्यादनन्तरं । ९९७०
प्रत्यूचुर्मां ततो वाक्यं सर्व्वे यूपध्वजाः स्थिताः । आश्चर्य्यशब्दो नास्मासु धन्यशब्दोऽपि वा मुने ।
आश्चर्य्यं परमं विष्णुः स ह्यस्माकं परा गतिः । यदाज्यं वयमश्नीमो हुतमग्निषु पावन ।
तत् सर्व्वं पुण्डरीकाक्षो लोकमूर्त्तिः प्रयच्छति । सोऽहं विष्णुगतिं प्रेक्षुरिह संपतितो भुवि ।
दृष्टश्चायं मया कृष्णो भवद्भिरिह संवृतः । यन्मयाऽभिहिता ह्येव त्वमाश्चर्य्यजनार्द्दन ।
धन्यश्चासीति भवतां मध्यस्थो यच्च पार्थिवाः । प्रत्युक्तोऽहमनेनाद्य वाक्यस्यास्य यदुत्तरं । ९९७५
दक्षिणाभिः सहेत्येवं पर्य्याप्तं वचनं मम । यज्ञानाञ्च गतिर्विष्णुः सर्व्वेषाञ्च सदक्षिणः ।
दक्षिणाभिः सहेत्येवं प्रश्नो मम समाप्तवान् । कृष्णेनाभिहितं पूर्व्वं पारम्पर्य्यादिहागतं ।
सदक्षिणेऽस्मिन् पुरुषे तद्वाक्यं प्रतिपादितं । यन्मां भवन्तः पृच्छन्ति वाक्यस्यास्य निविर्णयं ।
तदेतत् सर्व्वमाख्यातं साधु यामि यथागतं । नारदे तु गते स्वर्गं सर्व्वे ते पृथिवीक्षितः ।
विस्मिता स्वानि राष्ट्राणि जग्मुः सबलवाहनाः । जनार्द्दनोऽपि सहितो यदुभिः पावकोपमैः । ९९८०
स्वमेव भवनं वीरो विवेश यदुपुङ्गवः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि आश्चर्य्यधन्योपाख्याने ऊनसप्तत्यधिकशततमोऽध्यायः ॥ १६९ ॥
॥ जनमेजय उवाच ॥ भूय एव महाबाहो कृष्णस्य जगतीपतेः । माहात्म्यं श्रोतुमिच्छामि परमं द्विजसत्तम ।
न हि मे तृप्तिरस्तीह शृण्वतस्तस्य धीमतः । कर्म्मणामनुमन्तारं पुराणस्य महात्मनः ।
॥ वैशम्पायन उवाच ॥ नान्तः शक्यः प्रभावस्य वक्तुं वर्षशतैरपि । गोविन्दस्य महाराज श्रूयतामिदमद्भुतं ।
शरतल्पे शयानेन भीष्मेण परिचोदितः । गाण्डीवधन्वा बीभत्सुर्माहात्म्यं केशवस्य यत् । ९९८५
राज्ञां मध्ये महाराज ज्येष्ठं भ्रातरमब्रवीत् । युधिष्ठिरं जितामित्रमिति तच्छृणु कौरव ।
॥ अर्ज्जुन उवाच ॥ पुराऽहं द्वारकां यातः सम्बन्धीनवलोककः । न्यवसं पूजितस्तत्र भोजवृष्ण्यन्धकोत्तमैः ।
ततः कदाचिद्धर्म्मात्मा दीक्षितो मधुसूदनः । एकाहेन महाबाहुः शास्त्रदृष्टेन कर्म्मणा ।
ततो दीक्षितमासीनमभिगम्य द्विजोत्तमः । कृष्णं विज्ञापयामास परित्राहीति चाब्रवीत् ।
॥ ब्राह्मण उवाच ॥ रक्षाधिकारो भवतः परिरक्षस्व मां विभो । चतुर्थांशं हि धर्म्मस्य रक्षिता लभते फलं । ९९९०
॥ वासुदेव उवाच ॥ न भेतव्यं द्विजश्रेष्ठ रक्षामि त्वां कुतो भयं । ब्रूहि तत्त्वेन भद्रं ते यद्यपि स्यात् सुदुष्करं ।
॥ ब्राह्मण उवाच ॥ जातो जातो महाबाहो पुत्त्रो मे ह्रियते ऽनघ । त्रयो हृतास्तुर्थं त्वं कृष्ण रक्षितुमर्हसि ।
ब्राह्मण्याः सूतिकागेहेऽद्य तत्र रक्षा विधीयतां । यथा ध्रियेदपत्यं मे तथा कुरु जनार्द्दन ।
॥ अर्ज्जुन उवाच ॥ ततो मामाह गोविन्दो दीक्षितोऽहं क्रताविह । रक्षा च ब्राह्मणे कार्य्या सर्व्वावस्थागतैरपि ।
श्रुत्वाऽहमेवं कृष्णस्य ततो वचनमब्रुवं । मां नियोजय गोविन्द रक्षिष्यामि द्विजं भयात् । ९९९५

इत्युक्तः स स्मितं कृत्वा मामुवाच जनार्दनः । प्रद्युम्नोत्थितमुक्तस्तु व्रीडितोऽस्मि नराधिप ।
ततो मां व्रीडितं ज्ञात्वा पुनराह जनार्दनः । गम्यतां कौरवश्रेष्ठ शक्तो यदि रक्षितुं ।
त्वत्पुरोगाश्च गच्छन्तु वृष्ण्यन्धकमहारथाः । ऋते रामं महाबाहुं प्रद्युम्नञ्च महाबलं ।
ततोऽहं वृष्णिसैन्येन महता परिवारितः । तमपत्नीं द्विजं कृत्वा प्रयातः सह सैनिकैः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वासुदेवमाहात्म्ये सप्तत्यधिकशततोऽध्यायः ॥ १७० ॥
॥ अर्ज्जुन उवाच ॥ मुहूर्त्तेन वयं ग्रामं तं प्राप्य भरतर्षभ । विश्रान्तवाहनाः सर्व्वे निवासायोपसंस्थिताः । ९७००
ततो ग्रामस्य मध्ये ऽहं निविष्टः कुरुनन्दन । समन्ताद्वृष्णिसैन्येन महता परिवारितः ।
ततः शकुनयो दीप्ता मृगाश्च क्रूरभाषिणः । दीप्तायां दिशि वाशन्तो भयमाविदयन्ति मे ।
सन्ध्यारागो जवावर्णो भानुमांश्चैव निष्प्रभः । पपात नहतो चोल्का पृथिवी चाप्यकम्पत ।
तान् समीक्ष्य महोत्पातान्दारुणांल्लोमहर्षणान् । योगमाज्ञापयं तत्र जनस्यो नस्तुक्रचेतसः ।
युयुधानपुरोगास्तु वृष्ण्यन्धकमहारथाः । सर्व्वे युक्तरथाः सज्जाः स्वयञ्चाहन्तयाऽभवं । ९७०५
गतेऽर्द्धरात्रसमये ब्राह्मणो भयविक्लवः । उपगम्य भयादस्मानिदं वचनमब्रवीत् ।
कालोऽयं समनुप्राप्तो ब्राह्मण्याः प्रसवस्य मे । तथा भवन्तस्तिष्ठन्तु न भवेद्वञ्चना यथा ।
मुहूर्त्तादिव चाश्रौषं कृपणं रुदितस्वनं । तस्य विप्रस्य भवने ह्रियते ह्रियतेति च ।
अथाकाशे पुनर्व्वाचमश्रौषं बालकस्य वै । ॐ हेति ह्रियमाणस्य न च पश्यामि राक्षसं ।
ततोऽस्माभिस्तदा तात शरवर्षैः समन्ततः । विष्टम्भिता दिशः सर्व्वा हृत एव स बालकः । ९७१०
ब्राह्मणोर्त्तस्वरं कृत्वा हृते तस्मिन् कुमारके । वाचः स परुषास्तीव्राः श्रावयामास मां तदा ।
वृष्णयो हतसंकल्पास्तथा ऽहं नष्टचेतनः । मामेव हि विशेषेण ब्राह्मणः प्रत्यभाषत ।
रक्षिष्यामीति चोक्तं ते न च रक्षितवानसि । शृणु वाक्यमिदं शेषं यत्त्वमर्हसि दुर्म्मते ।
वृथा त्वं स्पर्द्धसे नित्यं कृष्णेनामितबुद्धिना । यदि स्यादिह गोविन्दो नैतदस्याहितं भवेत् ।
यथा चतुर्थं धर्म्मस्य रक्षिता लभते फलं । पापस्यापि तथा मूढ भागं प्राप्नोत्यरक्षिता । ९७१५
रक्षिष्यामीति चोक्तं ते न च रक्षितवानसि । मोघं गाण्डीवमेतत्ते मोघं वीर्य्यं यशश्च ते ।
न किञ्चिदुक्त्वा तं विप्रं ततोऽहं प्रस्थितस्तदा । सह वृष्ण्यन्धकैः सर्व्वैर्यत्र कृष्णो महाद्युतिः ।
ततो द्वारवतीं गत्वा दृष्ट्वा मधुनिघातिनं । व्रीडितः शोकसन्तप्तो गोविन्देनोपलक्षितः ।
स तु मां व्रीडितं दृष्ट्वा समाश्वास्य च माधवः । सान्त्वयित्वा च तं विप्रमिदम्वचनमब्रवीत् ।
सुग्रीवञ्चैव शैव्यञ्च मेघपुष्पबलाहकौ । योजयाश्वानिति तदा दारुकं प्रत्यभाषत । ९७२०
आरोप्य ब्राह्मणं कृष्णो ह्यवरोप्य च दारुकं । मामुवाच ततः शौरिः सारथ्यं क्रियतामिति ।
ततः समास्थाय रथं कृष्णोऽहं ब्राह्मणः स च । प्रयाताः स्म दिशं सौम्यामुदीचीं कौरवर्षभ ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वासुदेवमाहात्म्ये एकसप्तत्यधिकशततोऽध्यायः ॥ १७१ ॥
॥ अर्ज्जुन उवाच ॥ ततः पर्व्वतजालानि सरितश्च वनानि च । अपश्यं समतिक्रम्य सागरं मकरालयं ।

ततोऽर्घमुदधिः साक्षादुपनिन्ये जनार्द्दने। प्राञ्जलिः समुपास्थाय किं करोमीति चाब्रवीत्।
प्रतिगृह्य स तां पूजां तमुवाच जनार्द्दनः। रथपन्थानमिच्छामि त्वया दत्तं नदीपते।
अथाब्रवीत् समुद्रस्तु प्राञ्जलिर्गरुडध्वजं। प्रसीद भगवन्नेवमन्योऽप्येवं गमिष्यति।
त्वयैव स्थापितः पूर्व्वमगाधोऽस्मि जनार्द्दन। त्वया प्रवर्त्तिते मार्गे यास्यामि गमनीयतां।
अन्येऽप्येवं गमिष्यन्ति राजानो दर्पमोहिताः। एवं सञ्चिन्त्य गोविन्द यत्क्षमं तत् समाचर।
॥ वासुदेव उवाच ॥ ब्राह्मणार्थेऽस्मदर्थे च कुरु सागर मद्वचः। मदृते न पुमान् कश्चिदन्यस्त्वां धर्षयिष्यति।
अथाब्रवीत् समुद्रस्तु पुनरेव जनार्द्दनं। अभिशापभयाद्भीतो बाढमेवं भवत्विति।
शोषयाम्येष मार्गं ते येन त्वं कृष्ण यास्यसि। रथेन सह सूतेन सध्वजेन च केशव।
॥ वासुदेव उवाच ॥ मया दत्तो वरः पूर्व्वं न शोषं यास्यसीति च। मानुषास्ते न जानीयुर्व्विविधान्रत्नसञ्चयान्।
जलं स्तम्भय साधो त्वं ततो यास्याम्यहं रथी। न हि कश्चित् प्रमाणन्ते रत्नानां वेत्स्यते नरः।
सागरेण तथेत्युक्ते प्रस्थिताः स्म जलेन वै। स्तम्भितेन यथा भूमौ मणिवर्णेन भास्वता।
ततोऽर्णवं समुत्तीर्य्य कुरूनप्युत्तरान् वयं। क्षणेन समतिक्रान्ता गन्धमादनमेव च।
ततस्तु पर्व्वताः सप्त केशवं समुपस्थिताः। जयन्तो वैजयन्तश्च नीलो रजतपर्व्वतः।
महामेरुः सकैलास इन्द्रकूटश्च नामतः। बिभ्राणा वर्णरूपाणि विविधान्यद्भुतानि च।
उपस्थाय च गोविन्दं किं कुर्म्मेत्यब्रुवंस्तदा। तांश्चैव प्रतिजग्राह विधिवन्मधुसूदनः।
तानुवाच हृषीकेशः प्रणामावनतान् स्थितान्। विवरं गच्छतो मेऽद्य रथमार्गः प्रदीयतां।
ते कृष्णस्य वचः श्रुत्वा प्रतिगृह्य च पर्व्वताः। प्रददुः कामतो मार्गं गच्छतो भरतर्षभ।
तत्रैवान्तर्हितास्ते च तदाश्चर्य्यतरं मम। अश्रमश्च रथो याति मेघजालेष्विवांशुमान्।
ततः कदाचिद्दुःखेन रथमूहुस्तुरङ्गमाः। पङ्कभूतं हि तिमिरं स्पर्शादिज्ञायतेऽनघ।
अथ पर्व्वतभूतं तत्तिमिरं समपद्यत। तदासाद्य महाराज निष्प्रयत्ना हयाः स्थिताः।
ततश्चक्रेण गोविन्दः पाटयित्वा तमस्तदा। आकाशं दर्शयामास रथपन्थानमुत्तमं।
निष्क्रम्य तमसस्तस्मादाकाशे दर्शिते तदा। भविष्यामीति संज्ञा मे भयञ्च विगतं मम।
ततस्तेजः प्रज्वलितमपश्यं तत्तदाऽम्बरे। सर्व्वलोकं समाविश्य स्थितं पुरुषविग्रहं।
तं प्रविष्टो हृषीकेशो दीप्तं तेजोनिधिं तदा। रथ एव स्थितस्त्वाहं स च ब्राह्मणसत्तमः।
स मुहूर्त्तात्ततः कृष्णो निश्चक्राम तदा प्रभुः। चतुरो बालकान् गृह्य ब्राह्मणस्यात्मजांस्तदा।
प्रददौ ब्राह्मणायाय पुत्रान् सर्व्वान् जनार्द्दनः। त्रयः पूर्व्वं हृता ये च सद्यो जातश्च बालकः।
प्रहृष्टो ब्राह्मणस्तत्र पुत्रान्दृष्ट्वा पुनः प्रभो। अहञ्च परमप्रीतो विस्मितश्चाभवं नृप।
ततो वयं पुनः सर्व्वे ब्राह्मणस्य च ते सुताः। यथागता निवृत्ताः स्म तथैव भरतर्षभ।
ततः स्म द्वारकां प्राप्ताः क्षणेन भरतर्षभ। असम्प्राप्तेऽर्द्धदिवसे विस्मितोऽहं ततः पुनः।

सपुत्त्रं भोजयित्वा तं द्विजं कृष्णो महायशाः । धनेन तर्पयित्वा च गृहं प्रास्थापयत्तदा ।

॥ इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वासुदेवमाहात्म्ये द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥

॥ अर्ज्जुन उवाच ॥ ततः कृष्णो भोजयित्वा शतानि सुबहूनि च । विप्राणामृषिकन्यानां कृतकृत्योऽभवत्तदा ।
ततः सह मया भुक्त्वा वृष्णिभोजैश्च सर्व्वशः । विचित्राश्च कथा दिव्याः कथयामास भारत ।
ततः कथान्ते तत्राहमभिगम्य जनार्द्दनं । अपृच्छन्तद्यथावृत्तं कृत्स्नं यद्दृष्टवानहं ।
कथं समुद्रस्तम्भोदः कृतस्ते कमलेक्षण । पर्व्वतानाञ्च विवरं कृतं ते कथमच्युत ।
तमस्तथ कथं घोरं घनं चक्रेण पाटितं । तच्च यत् परमं तेजः प्रविष्टोऽसि कथञ्च तत् ।
किमर्थं तेन ते बालास्तदा चापहृताः प्रभो । यच्च ते दीर्घमध्वानं संक्षिप्तं तत्कथं पुनः ।
कथञ्चाल्पेन कालेन कृतं सत्त्वद्गतागतं । एतत् सर्व्वं यथावृत्तमाचक्ष्व मम केशव ।
॥ वासुदेव उवाच ॥ मद्दर्शनार्थं ते बाला हृतास्तेन महात्मना । विप्रार्थमेष्यते कृष्णो नान्यथेति ह ।
ब्रह्मतेजोमयं दिव्यं महद्यद्दृष्टवानसि । अहं स भरतश्रेष्ठ मत्तेजस्तत् सनातनं ।
प्रकृतिः सा मम परा व्यक्ताव्यक्ता सनातनी । तां प्रविश्य भवन्तीह मुक्ता योगविदुत्तमाः ।
सा सांख्यानां गतिः पार्थ योगिनाञ्च तपस्विनां । तत्पदं परमं ब्रह्म सर्वं विभजते जगत् ।
मामेव तत्परन्तेजो ज्ञातुमर्हसि भारत । समुद्रस्तम्भितोयोऽहमहं स्तम्भयिता जलं ।
अहं ते पर्व्वताः सप्त ये दृष्टा विविधास्त्वया । पङ्कभूतं हि तिमिरं दृष्टवानसि यद्धि तत् ।
अहं तमो घनीभूतमहमेव च पाटकः । अहञ्च कालो भूतानां धर्म्मश्चाहं प्रकीर्त्तितः ।
चन्द्रादित्यौ मही शैलाः सरितश्च सरांसि च । चतस्रश्च दिशः सर्व्वा ममैवात्मा चतुर्व्विधः ।
चतुर्व्वर्ण्यं मत्प्रसूतं चातुराश्रम्यमेव च । चातुर्व्विद्यस्य कर्त्ताऽहमिति बुध्यस्व भारत ।
॥ अर्ज्जुन उवाच ॥ भगवन् सर्व्वभूतेश वेत्तुमिच्छामि ते प्रभो । पृच्छामि त्वां प्रपन्नोऽहं नमस्ते पुरुषोत्तम ।
॥ भगवानुवाच ॥ ब्रह्म च ब्राह्मणाश्चैव तपः सत्यञ्च भारत । उग्रं वृहद्दणश्चैव मत्तस्तद्विद्धि पाण्डव ।
प्रियस्तेऽहं महाबाहो प्रियो मेऽसि धनञ्जय । तेन ते कथयिष्यामि नान्यथा वक्तुमुत्सहे ।
अहं यजूंषि सामानि ऋचश्चाथर्व्वणानि च । ऋषयो देवता यज्ञा मत्तेजो भरतर्षभ ।
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमं । चन्द्रादित्यावहोरात्राः पक्षा मासास्तथर्त्तवः ।
मुहूर्त्ताश्च कलाश्चैव क्षणाः सम्वत्सरास्तथा । मन्त्राश्च विविधाः पार्थ यानि शास्त्राणि कानिचित् ।
विद्याश्च वेदितव्यञ्च मत्तः प्रादुर्भवन्ति वै । मन्मयं विद्धि कौन्तेय सर्वं सृष्टिं च भारत ।
सदासच्च ममैवात्मा सदसच्चैव तत् परं ।
॥ अर्ज्जुन उवाच ॥ एवमुक्तोऽस्मि कृष्णेन प्रीयता भरतर्षभ । तथैव च मनो नित्यमभवन्मे जनार्द्दने ।
एतच्छ्रुतञ्च दृष्टञ्च माहात्म्यं केशवस्य मे । यन्मां पृच्छसि राजेन्द्र भूयश्चातो जनार्द्दने ।
॥ वैशम्पायन उवाच ॥ एतच्छ्रुत्वा कुरुश्रेष्ठो धर्म्मराजो युधिष्ठिरः । पूजयामास मनसा गोविन्दं पुरुषोत्तमं ।

विस्मितश्चाभवद्राजा सह सर्व्वैः सहोदरैः । राजभिश्च महाशौण्डैर्ये तत्रासन् समागताः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वासुदेवमाहात्म्ये त्रिसप्तत्यधिकशततमोऽध्यायः ॥ १७३ ॥
॥ जनमेजय उवाच ॥ भूय एव द्विजश्रेष्ठ यदुसिंहस्य धीमतः । कर्म्माण्यपरिमेयाणि श्रोतुमिच्छामि तत्त्वतः ।
श्रूयन्ते विविधानि स्म अद्भुतानि महाद्युतेः । असङ्ख्येयानि गुह्यानि प्राकृतान्यपि सर्व्वशः ।
यान्यहं विविधान्यस्य श्रुत्वा प्रीये महामते । प्रभूयाः सर्व्वशस्तात तानि मे शृण्वतोऽनघ ।
॥ वैशम्पायन उवाच ॥ बहून्यास्यर्थभूतानि केशवस्य महात्मनः । कर्म्माण्युक्तानि वै राजन् भूयश्चैव श्रुतानि ते । ९०८५
कथितानि मया साधो नान्तं शक्यं हि कर्म्मणां । गन्तुं भरतशार्दूल विस्तराणां महात्मनः ।
अवश्यञ्च मया वाच्यं लेशमात्रेण भारत । विष्णोरतुलवीर्य्यस्य प्रथितोदारकर्म्मणः ।
आनुपूर्व्व्या प्रवक्ष्यामि शृणुष्वैकमना नृप । द्वारवत्यां निवसता यदुसिंहेन धीमता ।
राष्ट्राणि नृपमुख्यानां चालितानि महात्मनां । यदूनामन्तरप्रेप्सुर्विचक्रो दानवो हतः ।
पुरं प्राग्ज्योतिषं गत्वा पुनस्तेन महात्मना । समुद्रमध्ये दुष्टात्मा नरको दानवो हतः । ९०९०
वासवञ्च रणे जित्वा पारिजातो हृतो बलात् । निर्ज्जितश्चैव भगवान् वरुणो लोहिते ह्रदे ।
दन्तवक्रश्च कारूषो निहतो दक्षिणापथे । शिशुपालश्च संपूर्णे किल्बिषैकशते हतः ।
गत्वा च शोणितपुरं शङ्करेणाभिरक्षितः । बलेः सुतो महावीर्य्यो वाणो बाहुसहस्रवान् ।
महामृधे महाराज जित्वा जीवन्विसर्ज्जितः । निर्ज्जिताः पावकाश्चैव गिरिमध्ये महात्मना ।
शाल्वश्च विजितः सङ्ख्ये सौभश्च विनिपातितः । विक्षोभ्य सागरञ्चैव पाञ्चजन्यो वशीकृतः । ९०९५
हयग्रीवश्च निहतो नृपाश्चान्ये महाबलाः । जरासन्धस्य निधने मोक्षिताश्च नृपास्तदा ।
रथेन जित्वा नृपतीन् गान्धारतनया हृता । भ्रष्टराज्याश्च शोकार्त्ताः पाण्डवाः परिरक्षिताः ।
दाहितं तु वनं घोरं पुरुहूतस्य खाण्डवं । गाण्डीवञ्चाग्निना दत्तमर्ज्जुनायोपपादितं ।
दौत्यञ्च तत्र कृतं घोरे विग्रहे जनमेजय । अनेन यदुमुख्येन यदुवंशश्च वर्द्धितः ।
कुन्त्याश्च प्रमुखे प्रोक्ता प्रतिज्ञा पाण्डवान् प्रति । निवृत्ते भारते युद्धे प्रतिदास्यामि ते सुतान् । ९१००
मोक्षितश्च महातेजा नृपः शापात् सुदारुणात् । यवनश्च हतः सङ्ख्ये काल इत्यभिविश्रुतः ।
वानरौ द्वौ महावीर्य्यौ मैन्दो द्विविद एव च । विजितौ युद्धदुर्द्धर्षौ जाम्बवांश्च पराजितः ।
सान्दीपनेस्तथा पुत्त्रस्तव चैव पिता नृप । गतौ वैवस्वतवशं जीवितौ तस्य तेजसा ।
संग्रामा बहवः प्राप्ता घोरा नरवरक्षयाः । निहताश्च नृपाः सर्व्वे कृत्वा तद्रूपमद्भुतं ।
जनमेजय युद्धेषु तथा ते वर्णितं मया । ९१०५
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वासुदेवमाहात्म्ये चतुःसप्तत्यधिकशततमोऽध्यायः ॥ १७४ ॥
॥ जनमेजय उवाच ॥ भूय एव महाबाहो यदुसिंहस्य धीमतः । कर्म्माण्यपरिमेयाणि श्रुतानि द्विजसत्तम ।
त्वत्तः श्रुतवतां श्रेष्ठ वासुदेवस्य धीमतः । यदेतत् कथितं पूर्व्वं वाणं प्रति महासुरं ।
तदहं श्रोतुमिच्छामि विस्तरेण तपोधन । कथञ्च देवदेवस्य पुत्त्रत्वमसुरो गतः ।

योऽभिगुप्तः स्वयं ब्रह्मन् शङ्करेण महात्मना । सहवासं गतेनेह सगणेन गुहेन च ।
बलेर्ब्बलवतः पुत्त्रो ज्येष्ठो भ्रातृशतस्य यः । वृतो बाहुसहस्रेण दिव्यास्त्रशतधारिणा । ९८१२
असंख्येश्च महाकायैर्मायाशतसहैर्ब्बलैः । वासुदेवेन स कथं सङ्ख्ये बाणः पराजितः ।
संरम्भो द्वन्द्वयुद्धार्थी जीवन्मुक्तः कथञ्च सः ।
॥ वैशम्पायन उवाच ॥ शृणुष्वावहितो राजन् कृष्णस्यामिततेजसः । मनुष्यलोके बाणेन यथा ऽभूद्विग्रहो महान् ।
वासुदेवेन यथाऽसौ रुद्रस्कन्दसहायवान् । बलिपुत्त्रो रणश्लाघी जित्वा जीवन् विसर्ज्जितः ।
यथा चास्य वरो दत्तः शङ्करेण महात्मना । नित्यं सान्निध्यता चैव गाणपत्यं यथाऽव्ययं । ९८१५
यथा बाणस्य तद्युद्धं जीवन्मुक्तो यथा च सः । यथा च देवदेवस्य पुत्त्रत्वं सोऽसुरो गतः ।
यदर्थञ्च महद्युद्धं तत् सर्व्वमखिलं शृणु । दृष्ट्वा वपुः कुमारस्य क्रीडतस्य महात्मनः ।
बलिपुत्त्रो महावीर्य्यो विस्मयं परमं गतः । तस्य बुद्धिस्तदोत्पन्ना तपस्तप्तुं सुदारुणं ।
रुद्रस्याराधनार्थाय यथास्य स्यामहं सुतः । ततोऽतपयदात्मानं तपसा सोऽसुरोत्तमः ।
देवस्तस्य परं तोषं जगाम च महायशाः । श्रीकण्ठस्य परां प्रीतिं गत्वा ऽसुरमथाब्रवीत् । ९८२०
वरं वृणीष्व भद्रं ते यत्ते मनसि वर्त्तते । अथ बाणोऽब्रवीद्वाक्यं देवदेवं सनातनं ।
देव्याः पुत्त्रत्वमिच्छामि त्वया दत्तं त्रिलोचन । शङ्करस्तु तथेत्युक्त्वा रुद्राणीमिदमब्रवीत् ।
कनीयान् कार्त्तिकेयस्य पुत्त्रोऽयं प्रतिगृह्यतां । यत्रोत्थितो महासेनः सोऽग्निजो रुधिरे पुरे ।
तत्रोद्देशे पुरश्चास्य भविष्यति न संशयः । नाम्ना तच्छोणितपुरं भविष्यति पुरोत्तमं ।
मयाऽभिगुप्तं श्रीमन्तं न कश्चित् प्रसहिष्यति । ततः स निवसन् बाणः पुरे शोणितसाह्वये । ९८२५
राज्यं प्रशासते दिव्यं क्षोभयन् सर्व्वदेवताः । अथ वीर्य्यमदोत्सिक्तो बाणो बाहुसहस्रवान् ।
अचिन्तयन् देवगणान् युद्धमाकाङ्क्षते सदा । ध्वजञ्चास्य ददौ प्रीतः कुमारो ह्यमिततेजसं ।
वाहनञ्चैव बाणस्य मयूरं दीप्ततेजसं । न देवा न च गन्धर्व्वा न यक्षा न च पन्नगाः ।
तस्य युद्धे व्यतिष्ठन्त देवदेवस्य तेजसा । त्र्यम्बकेनाभिगुप्तश्च दर्पोत्सिक्तो महासुरः ।
भूयो मृगयते युद्धं त्रिलोचनमथागमत् । स रुद्रमभिगम्याथ प्रणिपत्याभिवाद्य च । ९८३०
बलिसूनुरिदं वाक्यं पप्रच्छ वृषभध्वजं । असकृन्निर्ज्जिता देवाः ससाध्याः समरुद्गणाः ।
मया बलमदोत्सिकात् ससैन्येन तवाश्रयात् । । इमं देशं समागम्य वसन्ति स्म पुरे सुखं ।
ते पराजयसंत्रस्ता निराशा मत्पराजये । नाकपृष्ठमुपागम्य निवसन्ति यथासुखं ।
सोऽहं निराशो युद्धस्य जीवितं नाद्य कामये । अयुध्यतो वृथा ह्येषां बाहूनां धारणं मम ।
तद्ब्रूहि मम युद्धस्य कच्चिदागमनं भवेत् । न मे युद्धं विना देव रतिरस्ति प्रसीद मे । ९८३५
ततः प्रहस्य भगवानब्रवीद्वृषभध्वजः । भविता बाण युद्धं ते यथा तच्छृणु दानव ।
ध्वजस्यास्य यदा भङ्गस्तव तात भविष्यति । स्वे स्थाने स्थापितस्याथ तदा युद्धं भविष्यति ।
इत्येवमुक्तः प्रहसन् बाणः सुबहुशो मुदा । प्रसन्नवदनो भूत्वा पादयोः पतितोऽब्रवीत् ।

दिष्ट्या बाहुसहस्रस्य मे तृप्याधारणं मम । दिष्ट्या सहस्रात्समहं विजेता पुनराहवे ।
आनन्दजाश्रुपूर्णाभ्यां नेत्राभ्यामरिमर्द्दनः । पञ्चाङ्गलिप्रतैर्द्देवं पूजयन् पतितो भुवि । ९८४०
॥ महेश्वर उवाच ॥ उत्तिष्ठोत्तिष्ठ बाहूनामात्मनस्य कुलस्य च । सदृशं प्राप्स्यसे वीर युद्धमप्रतिमं महत् ।
॥ वैशम्पायन उवाच ॥ एवमुक्तस्ततो वाणस्त्र्यम्बकेण महात्मना । हर्षेणाभ्युत्थितः शीघ्रं पूजयन् वृषभध्वजं ।
शितिकण्ठविसृष्टस्तु वाणः परपुरञ्जयः । ययौ स्वमेव भवनं यत्र ध्वजवरं महत् ।
ततोपविष्टः प्रहसन् कुम्भाण्डमिदमब्रवीत् । प्रियमावेदयिष्यामि भवता यन्मनोनुगं ।
इत्येवमुक्तः प्रहसन् वाणमप्रतिमं रणे । प्रोवाच राजन् किन्त्वेतत् वक्तुकामोऽसि मे प्रियं । ९८४५
विस्मयोत्फुल्लनयनः प्रहर्षाद्दैत्यसत्तम । त्वत्तस्तच्छ्रोतुमिच्छामि वरं किं लब्धवानसि ।
देवदेवप्रसादात्तु स्कन्दस्य च महात्मनः । ईप्सितं किं त्वया प्राप्तं तन्मे ब्रूहि महासुर ।
शितिकण्ठप्रसादेन स्कन्दगोपायनेन च । कच्चित् त्रैलोक्यराज्यं ते व्यादिष्टं शूलपाणिना ।
कच्चिदिन्द्रस्तव भयात् पातालमुपयास्यति । कच्चिद्विष्णुभवं वासं विनोत्स्यन्ति दितेः सुताः ।
यस्य चक्रभयत्रस्ता वसन्ति सलिलाशये । कच्चिच्छार्ङ्गगदापाणेः स्थितस्य परमाहवे । ९८५०
न विष्णोर्भयसंत्रस्ताः प्रयास्यन्ति दितेः सुताः । पातालवासमुत्सृज्य कच्चित्तव बलाश्रयात् ।
विबुधावासनिरता भविष्यन्ति महासुराः । बलिर्व्विष्णुबलाक्रान्तो बद्धस्तव पिता नृप ।
सलिलौघाद्विनिःसृत्य कच्चिद्राज्यमवाप्स्यति । दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं ।
कच्चिद्वैरोचनिं तात द्रक्ष्यामः पितरं तव । कच्चित्त्रिभिः क्रमैः पूर्व्वं हृतालोकानिमान् प्रभो ।
पुनः प्रत्यानयिष्यामो जित्वा सर्व्वान् दिवौकसः । स्निग्धगम्भीरनिर्घोषं शङ्खस्वनपुरोजवं । ९८५५
कच्चिन्नारायणं देवं जेष्यामः समितिञ्जयं । कच्चिद्वृषध्वजस्तात प्रसादसुमुखस्तव ।
यथा ते हृदयोत्कम्पः साश्रुबिन्दुः प्रवर्त्तते । कच्चिदीश्वरतोषेण कार्त्तिकेयमतेन च ।
प्राप्तवानसि सर्व्वेषामस्माकं पार्थिवं पदं । इति कुम्भाण्डवचनैश्चोदितः सोऽसुरोत्तमः ।
वाणो वाणीमसंसक्तां प्रोवाच वदतां वरः ।
॥ वाण उवाच ॥ चिरात् प्रभृति कुम्भाण्ड न युद्धं प्राप्यते यदा । ततो मया मुदा पृष्टः शितिकण्ठः प्रतापवान् । ९८६०
युद्धाभिलाषः सुमहान् देव संजायते मम । अपि प्राप्स्याम्यहं युद्धं मनस्तुष्टिविवर्द्धनं ।
ततोऽहं देवदेवेन हरेणामित्रघातिना । प्रहस्य सुचिरं कालमुक्तोऽस्मि वचनं प्रियं ।
प्राप्स्यसे सुमहद्युद्धं वाण त्वं नचिरादिव । मयूरध्वजभङ्गस्ते भविष्यति यदाऽसुर ।
तदा त्वं प्राप्स्यसे युद्धं सुमहद्दितिनन्दन । ततोऽहं परमप्रीतो भगवन्तं वृषध्वजं ।
प्रणम्य शिरसा देवं तवान्तिकमुपागतः । इत्येवमुक्तः कुम्भाण्डः प्रोवाच नृपतिस्तदा । ९८६५
अहो न शोभनं राजन् यदेवं भाषसे वचः । एवं कथयतोरेव तयोरन्योन्यमुच्छ्रितः ।
ध्वजः पपात वेगेन शक्राशनिसमाहतः । तं तथा पतितं दृष्ट्वा सोऽसुरो ध्वजमुत्तमं ।

प्रहर्षमतुलं लेभे मेने चाहवमागतं । ततस्तु कम्पे वसुधा शक्राशनिसमाहता ।
ननादान्तर्हितो भूमौ वृषदंशो जगर्ज च । देवानामपि यो देवः सोऽप्यवर्षत वासवः ।
शोणितं शोणितपुरे सर्व्वतः पुरमन्तिकात् । सूर्य्यं भित्त्वा महोल्का च पपात धरणीतले । ९८७०
स्वपक्षे चोदितः सूर्य्यो भरणीं समपीडयत् । चैत्यवृक्षेषु सहसा धाराः शतसहस्रशः ।
शोणितस्यास्रवन् घोरा निपेतुस्तारका भृशं । राहुरग्रसदादित्यमपर्व्वणि विशाम्पते ।
लोकक्षयकरे काले निर्घातश्चापतन्महान् । दक्षिणां दिशमास्थाय धूमकेतुस्ततोऽभवत् ।
अनिशञ्चाप्यविच्छिन्ना ववुर्व्वाताः सुदारुणाः । श्वेतलोहितपर्य्यन्तः कृष्णग्रीवस्तडिद्द्युतिः ।
त्रिवर्णपरिघो भानुः सन्ध्यारागमयावृणोत् । वक्रमङ्गारकश्चक्रे कृत्तिकासु भयङ्करः । ९८७५
वाणस्य जन्मनक्षत्रं भर्त्सयन्निव सर्व्वशः । अनेकशाखश्चैत्यश्च निपपात महीतले ।
अर्च्चितः सर्व्वकन्याभिर्द्दानवानां महात्मनां । एवं विविधरूपाणि निमित्तानि निशामयन् ।
वाणो मदबलोन्मत्तो निश्चयं नाध्यगच्छत । विचेतास्त्वभवत् प्राज्ञः कुम्भाण्डस्तत्त्वदर्शिवान् ।
वाणस्य सचिवस्तत्र चिन्तयन् बहुकिल्विषं । उत्पाता ह्यत्र दृश्यन्ते कथयन्तो न शोभनं ।
तव राज्यविनाशाय भविष्यन्ति न संशयः । वयञ्चान्ये च सचिवा भृत्या ये च तवानुगाः । ९८८०
क्षयं यास्यन्ति न चिरात् सर्व्वे पार्थिवदुर्णयात् । यथा शक्रध्वजस्तेऽरेः स्वयं पातः पतनं भवेत् ।
रणमाकाङ्क्षते मोहात् तथा वाणस्य सङ्गतः । देवदेवप्रसादेन त्रैलोक्यविजयं गतं ।
उत्सेकाद्दृश्यते नाशो युद्धाकाङ्क्षी ननर्द्द ह । वाणः प्रीतमनाश्चैव पपौ पानमनुत्तमं ।
दैत्यदानवनारीभिः सार्द्धमुत्तमविक्रमः । कुम्भाण्डश्चिन्तयाविष्टो राजवेश्माभ्ययात्तदा ।
अचिन्तयच्च तत्त्वार्थं तैरुत्पातनिदर्शनैः । राजा प्रमादी दुर्ब्बुद्धिर्ज्जितकाशी मदोत्कटः । ९८८५
युद्धमेवाभिलषते न दोषान्मन्यते मदात् । महोत्पातभयञ्चैव न तन्मिथ्या भविष्यति ।
अपीदानीं भवेन्मिथ्या सर्व्वमुत्पातदर्शनं । इह त्वास्ते त्रिनयनः कार्त्तिकेयश्च वीर्य्यवान् ।
तेनोत्पन्नोऽपि दोषो नः कच्चिद्गच्छेत् पराभवं । उतपन्नदोषप्रभवः क्षयोऽयं भविता महान् ।
दोषाणां स भवेन्नाश इति मे धीयते मतिः । नियतं दोष एवायं भविष्यति न संशयः ।
दौरात्म्यान्नृपतेरस्य दोषभूता हि दानवाः । देवदानवसंघानां यः कर्त्ता भुवनप्रभुः । ९८९०
स भवः कार्त्तिकेयश्च कृतवासो हि नः पुरे । प्राणैः प्रियतरो नित्यं भवस्य तु गुहः सदा ।
तद्विशिष्टश्च वाणोऽपि भवस्य सततं प्रियः । दर्पोत्सेकात्तु साशाय वरं याचितवान् भवं ।
युद्धहेतोः स लब्धस्तु सर्व्वथा न भविष्यति । यदि विष्णुपुरोगाणामिन्द्रादीनां दिवौकसां ।
भविता ह्यभयप्राप्तिर्भवहस्तात् कृतं भवेत् । एतयोश्च हि को युद्धं कुमारभवयोरिह ।
शक्तो दातुं समागम्य वाणसाहाय्यकारिणोः । न च देववचो मिथ्या भविष्यति कथञ्चन । ९८९५
भविष्यति महद्युद्धं सर्व्वदैत्यविनाशनं । एवं स चिन्तयाविष्टः कुम्भाण्डस्तत्त्वदर्शिवान् ।

स्वस्तिप्रणिहितां बुद्धिं चकार सुमहासुरः । ये हि देवैर्व्विरुध्यन्ते पुण्यकर्म्मभिराहवे ।
यथा बलिर्नियमितस्तथा ते यान्ति सङ्क्षयं ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वाणयुद्धे कुम्भाण्डवाक्ये पञ्चसप्तत्यधिकशततोऽध्यायः ॥ १७५ ॥
॥ वैशम्पायन उवाच ॥ क्रीडाविहारोपगतः कदाचिदभवद्भवः । देव्या सह नदीतीरे रम्ये श्रीमति स प्रभुः ।
शतानि तत्राप्सरसां क्रीडन्ति स्म समन्ततः । सर्व्वर्त्तुकवने रम्ये गन्धर्व्वपतयस्तदा । ९९००
कुसुमैः पारिजातस्य पुष्पैः सन्तानकस्य च । गन्धोद्दाममिवाकाशं नदीतीरञ्च सर्व्वशः ।
वेणुवीणामृदङ्गैश्च पणवैश्च सहस्रशः । वाद्यमानैः स शुश्राव गीतमप्सरसान्तथा ।
सूतमागधकल्पैश्चाप्यस्तुवन्नप्सरोगणाः । देवदेवं सुवपुषं स्रग्विणं रक्तवाससं ।
हरं महेशं वरदं रमयन्ति मनोरमाः । ततस्तु देव्या रूपेण चित्रलेखा वराऽप्सराः ।
भवं प्रमादयामास देवी च प्राहसत्तदा । प्रमादयन्तीमीशानं प्रहसन्त्यप्सरागणाः । ९९०५
भवस्य पार्षदा दिव्या नानारूपा महौजसः । देव्या अनुज्ञया सर्व्वे क्रीडन्ते तत्र तत्र वै ।
अथ ते पार्षदास्तत्र रहस्येषु विपश्चितः । महादेवस्य रूपेण तच्चित्रं रूपमास्थिताः ।
ततो देव्यास्तु रूपेण लीलया वदनेन च । देवी प्रहासं मुमुचे तास्चैवाप्सरसस्तदा ।
ततः किलकिलाशब्दः प्रादुर्भूतः समन्ततः । प्रहर्षमतुलञ्चापि लेभे प्रीतमना भवः ।
वाणस्य दुहिता कन्या तत्रोषा नाम भाविनी । देवं प्रक्रीडितं दृष्ट्वा देव्या सह नदीगतं । ९९१०
दीप्यमानं महात्मानं द्वादशादित्यवर्च्चसं । नानारूपं वपुः कृत्वा देव्याः प्रियचिकीर्षया ।
ऊषा मनोरथञ्चक्रे पार्व्वत्याः सन्निधौ तदा । धन्या हि भर्तृसहिता रमन्त्येवं समागताः ।
मनसा त्वय संकल्पमुषया भाषितं यथा । विज्ञाय तमभिप्रायमुषायाः पर्व्वतात्मजा ।
प्राह देवी ततो वाक्यमूषां हर्षयती शनैः । ऊषे शीघ्रं त्वमप्येवं भर्त्रा सह रमिष्यसि ।
यथा देवो मया सार्द्धं शङ्करः शत्रुतापनः । एवमुक्ते तदा देव्या वाक्ये चिन्ताविलक्षणा । ९९१५
ऊषा भावं तदा चक्रे भर्त्रा रंस्ये कदा सह । तदा हैमवती वाक्यं सम्प्रहस्येदमब्रवीत् ।
ऊषे शृणुष्व वाक्यं मे यदा संयोगमेष्यसि । वैशाखे मासि हर्म्म्यस्थां द्वादश्यां त्वां दिनक्षये ।
रमयिष्यति यः स्वप्ने स ते भर्त्ता भविष्यति । एवमुक्ता दैत्यसुता कन्यागणसमावृता ।
अपाक्रामत हर्षेण रममाणा यथासुखं । ततः सखीभिर्हास्यन्ती हर्षेणोत्फुल्ललोचना ।
तालिकासन्निपातैश्च अन्योन्यं जग्मुरूर्ज्जिताः । किन्नर्य्यो यक्षकन्याश्च नागदैत्येशकन्यकाः । ९९२०
अप्सरोगणकन्याश्च ऊषायाः सखितां गताः । उक्ता च तत्र ताभिः सा भर्त्ता तव वरानने ।
भविष्यत्यचिरेणैव देव्या वचनकल्पितः । न हि देव्या वचो मिथ्या भविष्यति कदाचन ।
रूपाभिजनसम्पन्नः पतिस्ते कल्पितस्तया । ऊषा सखीनां तद्वाक्यं प्रतिपूज्य यथाविधि ।
इत्थं मनोरथं देव्या भावयन्ती व्यतिष्ठत । ततः क्रीडाविहारन्तमनुभूय महोमया ।
गतेऽहनि ततः सर्व्वास्ता नार्य्यः परमाद्भुताः । ययुः स्वानालयान् सर्व्वा देवी चादर्शनं गता । ९९२५

काश्चिदश्वैस्तथा यानैर्गजैरन्यास्तथा रथैः । पुरं प्रविविशुर्हृष्टाः काश्चिदाकाशमास्थिताः ।
ततो हर्म्ये शयानां तु वैशाखे मासि भाविनीं । द्वादश्यां शुक्लपक्षस्य सखीगणवृतां तदा ।
यथोक्तः पुरुषः स्वप्ने रमयामास तां तदा । विचेष्टमानां रुदतीं देव्या वचनचोदितः ।
सा स्वप्ने धर्षिता तेन स्त्रीभावश्चापि लम्भिता । शोणिताक्ता प्ररुदती सहसैवोत्थिता निशि ।
तां तथा रुदतीं दृष्ट्वा सखीभयसमन्वितां । चित्रलेखा वचः स्निग्धमुवाच परमाद्भुतं । ९९३०
ऊषे मा भैः किमेवं त्वं रुदती परितप्यसे । बलेः सुतसुता हि त्वं प्रख्याता किं भयान्विता ।
न भयं विद्यते लोके तव सुभ्रु विशेषतः । अभयस्तव वामोरु पिता देवान्तको रणे ।
उत्तिष्ठोत्तिष्ठ भद्रं ते विषादं मा कृथाः शुभे । नैवंविधेषु वासेषु भयमस्ति वरानने ।
असकृद्देवसहितः शचीभर्त्ता सुरेश्वरः । अप्राप्त एव नगरं पित्रा ते मर्दितो रणे ।
अयं देवसमूहेषु भयदस्ते पिता सखि । महासुरवरः श्रीमान् बलेः पुत्रो महाबलः । ९९३५
एवं साऽतिहिता सख्या बाणपुत्री यशस्विनी । स्वप्नरूपं यथा दृष्टं तथा सर्व्वं न्यवेदयत् ।
॥ ऊषोवाच ॥ एवं संधर्षिता साध्वी कथं जीवितुमुत्सहे । पितरं किन्नु वक्ष्यामि देवशत्रुमरिन्दमं ।
एवं संदूषणकरी वंशस्यास्य महौजसः । श्रेयो हि मरणं मह्यं न मे श्रेयोऽद्य जीवितं ।
दूषिता वा यथा कश्चित् पुरुषोऽधिगतो हि मे । निशायां जाग्रती वाहं नीता केन दशामिमां ।
कथमेवं कृता नाम कन्या जीवितुमुत्सहे । कुलोपक्रोशनकरी कुलाङ्गारी निराश्रया । ९९४०
जीवितं स्पृहयेत्नारी साध्वीनामपथः स्थिता । इत्येवं बाष्पपूर्णाक्षी सखीगणवृता तदा ।
विललाप चिरं कालमुषा कमललोचना । अनाथवत्तां रुदतीं सख्यः सर्व्वा विचेतसः ।
ऊचुरश्रुपरीताक्ष्य ऊषां सर्व्वाः समागताः । दुष्टेन मनसा देवि शुभं वा यदि वाऽशुभं ।
क्रियते न च ते सुभ्रु कश्चिद्दुष्टं मनः शुभं । प्रसभं देवि संयोगाद्यदि भुक्ताऽसि भाविनि ।
स्वप्नयोगेन कल्याणि व्रतलोपो न विद्यते । व्यभिचारेण ते देवि नास्ति कश्चिद्व्यतिक्रमः । ९९४५
न च स्वप्नकृतो दोषो मर्त्यलोकेऽस्ति सुन्दरि । एवं विप्रर्षभा देवि धर्म्मज्ञाः कथयन्ति वै ।
मनसा चैव वाचा च कर्म्मणा च विशेषतः । दुष्टा या त्रिभिरेतैस्तु पापा सा प्रोच्यते बुधैः ।
न च ते दृश्यते भीरु मनः प्रचलितं सदा । कथं त्वं दोषदुष्टा वै नियता ब्रह्मचारिणी ।
यदि सुप्ता सती साध्वी शुद्धभावा मनस्विनी । इमामवस्थां नीता त्वं नैव धर्म्मो विलुप्यते ।
यस्या दुष्टं मनः पूर्व्वं कर्म्मणा चोपपादितं । तामाहुरसतीं नाम सती त्वमसि भाविनि । ९९५०
कुलजा रूपसम्पन्ना सर्व्वैः समुदिता गुणैः । इमामवस्थां नीताऽसि कालो हि दुरतिक्रमः ।
इत्येवमुक्त्वा रुदतीं बाष्पेणाकुलितेक्षणां । कुम्भाण्डदुहिता वाक्यं परमन्विदमब्रवीत् ।
त्यज शोकं विशालाक्षि अपापा त्वं वरानने । स्मृतं मे यदिदं वाक्यं याथातथ्येन तच्छृणु ।
ऊषे यदुक्ता देव्याऽसि भर्त्तारं ध्यायती तदा । समीपे देवदेवस्य स्मर भाविनि तद्वचः ।
द्वादश्यां शुक्लपक्षस्य वैशाखे मासि यो निशि । हर्म्ये शयानां रुदतीं स्त्रीभावमुपनेष्यति । ९९५५

भविता स हि ते भर्त्ता शूरः शत्रुनिवर्हणः । इत्युवाच वचो हृष्टा देवी तव मनोगतं ।
न हि तद्वचनं मिथ्या पार्व्वत्या यदुदाहृतं । तत्त्वं किमिदमत्यर्थं रोदिषीन्दुनिभानने ।
एवमुक्ता तु वचनं स्मृत्वा देवीवचस्तु तत् । अभवन्नष्टशोका सा वाणपुत्री शुभेक्षणा ।
॥ ऊषोवाच ॥ स्मरामि भाविनि वचो देव्याक्रीडगते भवे । यथोक्तं सर्व्वमखिलं प्राप्तं हर्म्यतले मया ।
भर्त्ता तु मम यश्चैव लोकनाथस्य भार्य्यया । व्यादिष्टः स कथं ज्ञेयस्तत्र कार्य्यं विधीयतां । ९९६०
इत्येवमुक्ते वचने कुम्भाण्डदुहिता पुनः । व्याजहार यथान्यायमर्थतत्त्वविशारदा ।
न हि तस्य कुलं देवि न कीर्त्तिं नापि पौरुषं । कश्चिज्जानाति तत्त्वेन किमिदं त्वं विहन्यसे ।
अदृष्टश्चाश्रुतश्चैव दृष्टः स्वप्ने त्वया शुभे । कथं ज्ञेयो भवेद्भीरु सोऽस्माभीरतितस्करः ।
येन त्वमसितापाङ्गि मत्तकाशिनि विक्रमात् । रुदती प्रसभं भुक्ता प्रविश्यान्तःपुरं सखि ।
न ह्यसौ प्राकृतः कश्चिद्यः प्रविष्टः प्रसह्य नः । नगरं लोकविख्यातमेकः शत्रुनिवर्हणः । ९९६५
आदित्या वसवो रुद्रा अश्विनौ च महौजसौ । न शक्ताः शोणितपुरं प्रवेष्टुं भीमविक्रमाः ।
सोऽयमेतैः शतगुणैर्व्विशिष्टश्चारिसूदनः । प्रविष्टः शोणितपुरं वाणमाक्रम्य मूर्द्धनि ।
यस्या नैवंविधो भर्त्ता भवेद्युद्धविशारदः । कस्तस्या जीवितेनार्थो भोगैर्व्वा स्याच्छुभेक्षणे ।
धन्याऽस्यनुगृहीताऽसि यस्यास्ते पतिरीदृशः । प्राप्तो देव्याः प्रसादेन कन्दर्पसमविग्रहः ।
इदं तु यत् कार्य्यतमं शृणु त्वं यन्मयेरितं । विज्ञेयो यस्य पुत्त्रोऽसौ यन्नामा यत्कुलस्य सः । ९९७०
इत्येवमुक्ते वचने तत्रोषा काममोहिता । उवाच कुम्भाण्डसुतां कथं ज्ञास्याम्यहं सखि ।
त्वमेव चिन्तय सखि नोत्तरं प्रतिभाति मे । स्वकार्य्ये मुह्यते सर्व्वो यथा जीवं लभाम्यहं ।
ऊषाया वचनं श्रुत्वा रामा वाक्यमिदं पुनः । उवाच रुदतीश्चैव कुम्भाण्डतनया सखीं ।
कुशला ते विशालाक्षि सर्व्वथा सन्धिविग्रहे । अप्सरा चित्रलेखा वै क्षिप्रं विज्ञाप्यतां सखि ।
अस्याः सर्व्वमशेषं वै त्रैलोक्यं विदितं सदा । एवमुक्ता तदैवोषा हर्षेणागतविस्मया । ९९७५
तामप्सरसमानाय्य चित्रलेखां सखीं प्रियां । कृताञ्जलिपुटा दीना ऊषा वचनमब्रवीत् ।
चित्रलेखामप्सरसं प्रणयात्तां सखीमिदं । परमं शृणु मे वाक्यं यत्त्वा वक्ष्यामि भाविनि ।
भर्त्तारं यदि मेऽद्य त्वं नानयिष्यसि मत्प्रियं । कान्तं पद्मपलाशाक्षं मत्तमातङ्गविक्रमं ।
त्यक्ष्याम्यहं प्रियान् प्राणांस्ततः कमललोचने । चित्रलेखाऽब्रवीद्वाक्यमूषां हर्षयती शनैः ।
नैवोऽयं शक्यतेऽस्माभिर्वेत्तुं भाविनि सुव्रते । न कुलेन न वर्णेन न शीलेन न रूपतः । ९९८०
न देशतस्तु विज्ञातः स हि चौरो मया सखि । किन्तु शक्यं यथा कर्त्तुं बुद्धिपूर्व्वं मया सखि ।
प्राप्तस्य शृणु मे वाक्यं यथा काममवाप्स्यसि । देवदानवयक्षाणां गन्धर्व्वोरगरक्षसां ।
ये विशिष्टाः प्रभावेण रूपेणाभिजनेन च । यथाप्रधानतः सर्व्वानालिखिष्याम्यहं सखि ।
मनुष्यलोके ये चापि प्रवरा लोकविश्रुताः । सप्तरात्रेण ते भीरु दर्शयिष्यामि तानहं ।
ततो विज्ञाय पट्टस्थं भर्त्तारं प्रतिलप्स्यसे । सा चित्रलेखया प्रोक्ता ऊषा चित्तचिकीर्षया । ९९८५

क्रियतामेवमित्याह चित्रलेखां सखीं प्रियां । ततः कुशलहस्तत्वाद्ययालेख्यं समन्ततः ।
इत्युक्त्वा सप्तरात्रेण कृत्वा लेख्यगतांस्तु तान् । चित्रपट्टगतान्सुभ्रूरानयामास शोभना ।
ततः प्रस्तीर्य्य पट्टं सा चित्रलेखा स्वयं कृतं । ऊषायै दर्शयामास सखीनाञ्च विशेषतः ।
एते देवेषु ये मुख्यास्तथा दानववंशजाः । किन्नरोरगयक्षाणां राक्षसानां समन्ततः ।
गन्धर्व्वासुरदैत्यानां ये चान्ये भोगिनः स्मृताः । मनुष्याणाञ्च सर्व्वेषां ये विशिष्टतमा नराः । ९९९०
तदेतान् पश्य सर्व्वांस्तु यथाऽभिलिखितान् मया । यस्ते भर्त्ता यथारूपो मयाऽभिलिखितः सखि,
तं त्वं प्रत्यभिजानीहि स्वप्ने यं दृष्टवत्यसि । ततः क्रमेण सर्व्वांस्तान् दृष्ट्वा सा मत्तकाशिनी ।
देवदानवगन्धर्व्वान् विद्याधरगणानथ । अतीत्य च यदून् सर्व्वान्ददर्श यदुनन्दनं ।
तत्रानिरुद्धं दृष्ट्वा सा विस्मयोत्फुल्ललोचना । उवाच चित्रलेखां तामयं चोरः स ते सखि ।
येनाहं दूषिता पूर्व्वं स्वप्ने हर्म्म्यगता सती । सोऽयं विज्ञातरूपो मे कुतोऽयं रतितस्करः । ९९९५
चित्रलेखे वदस्वैनं तत्त्वतो मम शोभने । गुणशीलाभिजनतो नाम किञ्चास्य भाविनि ।
ततः पश्चाद्विधास्यामि कार्य्यस्यास्य विनिश्चयं ।
॥ चित्रलेखोवाच ॥ अयं त्रैलोक्यनाथस्य नप्ता कृष्णस्य धीमतः । भर्त्ता तव विशालाक्षि प्राद्युम्निर्भीमविक्रमः ।
न ह्यस्य त्रिषु लोकेषु सदृशोऽस्ति पराक्रमे । उत्पाट्य पर्व्वतानेष पर्व्वतैरेव शातयेत् ।
धन्याऽस्यनुगृहीताऽसि यस्यास्ते यदुपुङ्गवः । त्वत्सपत्न्या समादिष्टः सदृशः सज्जनः पतिः । १००००
॥ ऊषोवाच ॥ त्वमेवात्र विशालाक्षि योग्या मम वरानने । अशक्या हि गतिस्त्वान्या अगत्या मे गतिर्भव ।
अन्तरीक्षचरी च त्वं योगिनी कामरूपिणी । उपायशिल्पकुशला क्षिप्रमानय मे प्रियं ।
उपायश्चिन्त्यतां भीरु अप्रतर्क्यं प्रियं सुखं । सिद्धार्थां सखि वर्त्तस्व येनोपायेन सुन्दरि ।
भवेदापत्सु यस्मिंश्च तस्मिंश्च शस्यते बुधैः । कामार्त्ता चास्मि सुश्रोणि भव मे प्राणधारिणी ।
यद्येनं मे विशालाक्षि भर्त्तारममरोपमं । अद्य नानयसि क्षिप्रं प्राणांस्त्यक्ष्यामि शुद्धे । १०००५
ऊषाया वचनं श्रुत्वा चित्रलेखाऽब्रवीद्वचः । श्रोतुमर्हसि कल्याणि वचनं मे शुचिस्मिते ।
॥ चित्रलेखोवाच ॥ यथा वाणस्य नगरं रक्ष्यते देवि सर्व्वतः । द्वारकाऽपि तथा भीरु दुराधर्षा विशेषतः ।
अयस्मयप्रतिच्छन्ना गुप्तद्वारा च सा पुरी । गुप्ता वृष्णिकुमारैश्च तथा द्वारकवासिभिः ।
प्रान्ते सलिलसंयुक्ता विहिता विश्वकर्म्मणा । रक्ष्यते पुरुषव्याघ्रैः पद्मनाभस्य शासनात् ।
शैलप्राकारपरिखा दुर्गमार्गप्रवेशिनी । सप्तप्राकाररचिता पर्व्वतैर्द्धातुमण्डितैः । १००१०
न च शक्यमविज्ञातैः प्रवेष्टुं द्वारकां पुरीं । आत्मानं माञ्च रक्षस्व पितरञ्च विशेषतः ।
॥ ऊषोवाच ॥ तव योगप्रभावेण शक्यं तत्र प्रवेशनं । बहुना किं प्रलापेन प्रतिज्ञा श्रूयतां मम ।
अनिरुद्धस्य वदनं पूर्णचन्द्रसमप्रभं । यद्यहं तन्न पश्यामि यास्यामि यमसादनं ।
दूतमासाद्य कार्य्याणां सिद्धिर्भवति भाविनि । तस्माद्दौत्येन मे गच्छ जीवन्तीं मां यदीच्छसि ।
यदि त्वं मे विजानासि सख्यं प्रेम्णा च भाषितं । क्षिप्रमानय मे कान्तं तवास्मि शरणं गता । १००१५

जीवितस्य हि सन्देहं त्वयं वै स्वजनस्य च। कामार्त्ता हि न पश्यन्ति दूषणं वै कुलस्य च।
प्रयत्नो युज्यते कार्य्येष्विति शास्त्रनिदर्शनं । तस्य शक्ता विशालाक्षी द्वारकायाः प्रवेशने ।
संस्तुताऽसि मया भीरु कुरु मे प्रियदर्शनं ।
॥ चित्रलेखोवाच ॥ सर्व्वतः संस्तुता तेऽहं वाक्यैरमृतकल्पितैः । कारिता च समुद्योगं प्रियैः कान्तैश्च भाषितैः ।
एषा गच्छाम्यहं भीरु क्षिप्रं तां द्वारकापुरीं । भर्त्तारमानयाम्यद्य तव वृष्णिकुलोद्वहं । १००२०
अनिरुद्धं महाबाहुं प्रविश्य द्वारकां पुरीं । सा वचस्तथ्यमशिवं दानवानां भयावहं ।
इत्युक्त्वाऽन्तर्हिता क्षिप्रं चित्रलेखा मनोजवा । सखीभिः सहिता त्वुषा चिन्तयन्ती स्थिता तु सा ।
तृतीये तु मुहूर्त्ते सा नष्टा वाणपुरात्तदा । सखी प्रियं चिकीर्षन्ती पूजयन्ती तपोधनान् ।
क्षणेन समनुप्राप्ता द्वारकां कृष्णपालितां । कैलासशिखराकारैः प्रसादैरुपशोभितां ।
ददर्श द्वारकाञ्चैव दिवि तारामिव स्थितां । १००२५

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वाणयुद्धे दूतीसंप्रेषणे षट्सप्तत्यधिकशततोऽध्यायः ॥ १७६ ॥

॥ वैशम्पायन उवाच ॥ अथ द्वारवतीम्प्राप्य स्थिता सा भवनान्तिके। प्रवृत्तिहरणार्थाय चित्रलेखा व्यचिन्तयत् ।
अथ चिन्तयती सा तु बुद्धिं बुद्ध्यर्थनिश्चितां । अपश्यन्नारदं तत्र ध्यायन्तमुदके मुनिं ।
तं दृष्ट्वा चित्रलेखा तु हर्षेणोत्फुल्ललोचना । उपसृत्याभिवाद्येनमधोमुखमवस्थिता ।
नारदस्त्वाशिषं दत्त्वा चित्रलेखामथाब्रवीत् । किमर्थमिह संप्राप्ता श्रोतुमिच्छामि तत्त्वतः ।
देवर्षिमथ तं दिव्यं नारदं लोकपूजितं । कृताञ्जलिपुटा भूत्वा चित्रलेखाऽब्रवीद्वचः । १००३०
भगवन् श्रूयतां वाक्यं दौत्येनाहमिहागता । अनिरुद्धं मुने नेतुं यदर्थञ्च शृणुष्व मे ।
नगरे शोणितपुरे वाणो नाम महासुरः । तस्य कन्या वरारोहा नाम्नोषेति च विश्रुता ।
भगवन् साऽनुरक्ता च प्राद्युम्निं पुरुषोत्तमं । देव्या वरनिसर्गेण तस्या भर्त्ता विनिर्म्मितः ।
तस्य नेतुमिहायाता तत्र सिद्धिं विधत्स्व मे । मया नीतेऽनिरुद्धे तु नगरं शोणिताह्वयं ।
प्रवृत्तिः पुण्डरीकाक्षे त्वयाख्येया महामुने । अवश्यं भविता चैव कृष्णेन सह विग्रहः । १००३५
वाणस्य सुमहान् संख्ये दिव्यो हि स महासुरः । न च शक्तोऽनिरुद्धस्तं युद्धे जेतुं महासुरं ।
सहस्रबाहुमायान्तं जयेत् कृष्णो महाभुजः । भगवन् सन्निकर्षन्ते यदर्थमहमागता ।
कथं हि पुण्डरीकाक्षो ज्ञापितस्तदिदं भवेत् । त्वत्प्रसादाच्च भगवन्न मे कृष्णाद्भयं भवेत् ।
स हि तत्त्वार्थवृत्तिस्तु अनिरुद्धः कथं ह्रियेत् । क्रुद्धो हि स महाबाहुस्त्रैलोक्यमपि निर्द्दहेत् ।
पौत्रशोकाभिसन्तप्तः शापेन स दहेत मां । तत्रोपायञ्च भगवन् चिन्तितुं वै त्वमर्हसि । १००४०
यथा त्वुषा लभेत् कान्तं मम चैवाभयं भवेत् । इत्येवमुक्तो भगवांश्चित्रलेखां स नारदः ।
तामुवाच शुभं वाक्यं मा भैस्त्वं समयं शृणु । त्वया नीतेऽनिरुद्धे तु कन्या वेश्म प्रवेशिते ।
यदि युद्धं भवेत्तत्र स्मर्त्तव्योऽहं तदा त्वया । एष मे परमः कामो युद्धं द्रष्टुमिहानघे ।
यद्दृष्ट्वा च भवेत् प्रीतिः प्रवृत्तिश्च दृढा भवेत् । गृह्यतां तामसी विद्या सर्व्वलोकप्रमोहनी ।

कृतकृत्यस्य ते देवि एष विद्यां ददाम्यहं । एवमुक्ते तु वचने नारदेन महर्षिणा । १००४५
तथेति वचनं प्राह चित्रलेखा मनोजवा । अभिवाद्य महात्मानमृषीणां नारदं वरं ।
निरं(?)ताऽनिरुद्धस्य गृहश्चैवान्तरिक्षगा । ततो द्वारवतीमध्ये कामस्य भवनं शुभं ।
तत्समीपेऽनिरुद्धस्य भवनं सा स्म पश्यति । सौवर्णवेदिकाकुम्भं रुक्मवैदूर्य्यतोरणं ।
माल्यदामावसक्तञ्च पूर्णकुम्भोपशोभितं । वर्द्धिकण्ठनिभग्रीवं प्रासादैरेकसञ्चयैः ।
मणिप्रवालसंस्तीर्णं दिव्यगन्धर्व्वनादितं । ततो द्वारवतीमध्ये प्रसादैरुपशोभितं । १००५०
ददर्श भवनं यत्र प्राद्युम्निरवसत् सुखं । ततः प्रविश्य सहसा भवनन्तस्य तन्महत् ।
तत्रानिरुद्धं साऽपश्यच्चित्रलेखा वराप्सराः । मध्ये परमनारीणां तारापतिमिवोदितं ।
क्रीडाविहारे नारीभिः सेव्यमानमितस्ततः । पिबन्तं मधुमाध्वीकं श्रिया परमया युतं ।
वरासनगतं तत्र यथैवेलविलस्तथा । वाद्यते समतालञ्च गीयते मधुरं तथा ।
न च तस्य मनस्तत्र तमेवार्थमचिन्तयत् । स्त्रियः सर्व्वगुणोपेता नृत्यन्ते तत्र तत्र वै । १००५५
न चास्य मनसस्तुष्टिं चित्रलेखा प्रपश्यति । न चाभिरमते भोगैर्न चापि मधु सेवते ।
व्यक्तमस्य हि स स्वप्नो हृदि संपरिवर्त्तते । इति तत्रैव बुद्धा च निश्चिता गतसाध्वसा ।
सा दृष्ट्वा परमस्त्रीणां मध्ये शक्रध्वजोपमं । चिन्तयाविष्टहृदया चित्रलेखा मनस्विनी ।
कथं कार्य्यमिदं कार्य्यं कथं स्वस्ति भवेदिति । साऽन्तर्हिता चिन्तयित्वा चित्रलेखा यशस्विनी ।
तामस्याच्छादयामास विद्यया शुभलोचना । हर्म्ये स्त्रीगणमध्यस्थं दृष्ट्वा चान्तर्हिता तदा । १००६०
तेनाऽन्तरिक्षादेवाशु प्रासादोपरि विष्ठिता । प्राद्युम्निं वचनं प्राह श्लक्ष्णं मधुरया गिरा ।
चक्षुर्दत्त्वा च सा तस्मै कृत्वा चात्मनि दर्शनं । तामाश्वैवाश्रये देशे सा वाक्यमिदमब्रवीत् ।
अपि ते कुशलं वीर सर्व्वत्र यदुनन्दन । अहस्तावत् प्रदोषे वा कच्चिद्गच्छति ते सुखं ।
शृणुष्व त्वं महाबाहो विज्ञाप्यं मे रतीसुत । ऊषाया मम सख्यास्तु वाक्यं वक्ष्यामि तत्त्वतः ।
स्वप्ने तु या त्वया दृष्टा स्त्रीभावश्चापि लम्भिता । बिभर्त्ति हृदये या त्वां तया संप्रेषिता ह्यहं । १००६५
रुदती जृम्भती चैव निश्वसन्ती मुहुर्मुहुः । त्वद्दर्शनपरा सौम्य कामिनी परितप्यते ।
यदि त्वं यास्यसे वीर धारयिष्यति जीवितं । अदर्शनेन मरणं तस्या नास्त्यत्र संशयः ।
यदि नारीसहस्रं ते गृहस्थं यदुनन्दन । स्त्रियाः कामयमानायाः कर्त्तव्या हस्तधारणा ।
त्वञ्च तस्या वरोत्सर्गे देव्या दत्तो मनोरथः । चित्रपट्टं मया दत्तं त्वच्चिह्नं वीक्ष्य जीवति ।
तदङ्गसङ्गं समाराध्य जीवते दर्शनेप्सया । सानुक्रोशो यदुश्रेष्ठ भव तस्या मनोरथे । १००७०
ऊषा ते पतते मूर्ध्ना वयस्य यदुनन्दन । श्रूयताञ्चोद्भवस्तस्याः कुलं शीलञ्च यादृशं ।
संस्थानं प्रकृतिश्चास्याः पितरञ्च ब्रवीमि ते । वैरोचनिसुतो वीरो बाणो नाम महासुरः ।
स राजा शोणितपुरे तस्य त्वामिच्छते सुता । त्वद्भावगतचित्ता सा त्वामृते न हि जीवति ।
मनोरथकृतो भर्त्ता देव्या दत्तोऽप्यसंशयं । त्वत्सङ्गमाशा सुश्रोणी प्राणान्धारयते शुभा ।

चित्रलेखावचः श्रुत्वा सोऽनिरुद्धोऽब्रवीदिदं । दृष्टा स्वप्ने मया सा हि तत्त्वतः शृणु शोभने ।
रूपं कान्तिं गतिञ्चैव संयोगं रुदितं तथा । एवं सर्व्वमहोरात्रं मुहुर्म्मुहुः परिचिन्तयन् ।
यद्यहं समनुग्राह्यो यदि सख्यं त्वमिच्छसि । नयस्व चित्रलेखे मां द्रष्टुमिच्छाम्यहं प्रियां ।
ईप्सितं तस्य विज्ञाय साऽनिरुद्धस्य भाविनी । चित्रलेखा ततस्तुष्टा तथेति च तमब्रवीत् ।
हर्म्म्ये स्त्रीगणमध्यस्थं कृत्वा चान्तर्हितं तदा । उत्पपात गृहीत्वा सा प्राद्युम्निं यदुदुर्म्मदं ।
सा तमध्वानमागम्य सिद्धचारणसेवितं । सहसा शोणितपुरं प्रविवेश मनोजवा ।
अदर्शनं तमानीय मायया कामरूपिणी । अनिरुद्धसमेता सा यत्रोषा तत्र गच्छती ।
ऊषायादर्शयच्चैनं चित्राभरणभूषितं । चित्रायुधधरं वीरं कन्दर्पसमरूपिणं ।
तत्रोषा विस्मिता दृष्ट्वा हर्म्म्यस्था सखिसन्निधौ । प्रवेशयामास च तं सा तदा स्वगृहं ततः ।
प्रहर्षोत्फुल्लनयना प्रियं दृष्ट्वाऽर्थकोविदा । सा हर्म्म्यस्था तमर्घ्येण यादवं समपूजयत् ।
चित्रलेखां परिष्वज्य प्रियाख्यानैर्नियुज्य च । त्वरितं कामिनी प्राह चित्रलेखां भयातुरा ।
सखीदं वै कथं गुह्यं कार्य्यं कार्य्यविशारदे । गुह्ये कृते भवेत् स्वस्ति प्रकाशे जीवितक्षयः ।
चित्रलेखाऽब्रवीद्वाक्यं शृणु त्वं निश्चयं सखि । कृतं पुरुषकारं हि दैवं नाशयते क्षणात् ।
यदि देव्याः प्रसादस्ते अनुकूलो भविष्यति । अप्रमादात् कृतं गुह्यं न कश्चित् ज्ञास्यते नरः ।
सख्या तथैवमुक्ता सा पर्य्यवस्थितचेतसा । एवमेतदिति प्राह साऽनिरुद्धमिदं वचः ।
दिष्ट्या स्वप्नगतश्चौरो दृश्यते सुभगो जनः । यत्कृते तु वयं खिन्ना दुर्लभप्रियकाम्यया ।
कच्चित्तव महाबाहो कुशलं सर्व्वतो गतं । इदयं हि मृदु स्त्रीणामेवं पृच्छाम्यहं तव ।
तस्यास्तद्वचनं श्रुत्वा ऊषायाः श्लक्ष्णमर्थवत् । सोऽप्याह यदुशार्दूलः शुभाक्षरतरं वचः ।
हर्षविप्लुतनेत्रायाः पाणिनाऽश्रु प्रमृज्य च । प्रहस्य सस्मितं प्राह हृदयग्राहकं वचः ।
कुशलं मे वरारोहे सर्व्वत्र मितभाषिणि । त्वत्प्रसादान्न सन्देहः प्रियमावेदयामि ते ।
अदृष्टपूर्व्वश्च मया देशोऽयं शुभदर्शने । निशि स्वप्ने मया दृष्टं सकृत् कन्यापुरं महत् ।
एवमेव ह्यहं भीरु त्वत्प्रसादादिहागतः । न च तद्रुद्रपत्न्या वै मिथ्या वाक्यं भविष्यति ।
देव्याश्च प्रीतिमाज्ञाय त्वत्प्रियार्थञ्च भाविनि । अनुप्राप्तोऽस्मि चाप्येव प्रमोद शरणङ्गतः ।
इत्युक्ता त्वरमाणा सा गुह्ये देशे स्वलङ्कृता । कान्तेन सह संयुक्ता स्थिता वै भीतभीतवत् ।
ततश्चोद्वाहधर्म्मेण गान्धर्व्वेण समेत्य च । अन्योन्यं रेमतुस्तौ तु चक्रवाकौ यथा दिवा ।
कान्तेन सह संयुक्ता दिव्यस्रगनुलेपना । रममाणाऽनिरुद्धेन अविज्ञाता तु सा तदा ।
तस्मिन्नेव क्षणे प्राप्तो यदूनामृषभो हि सः । दिव्यमाल्याम्बरधरो दिव्यस्रगनुलेपनः ।
ऊषया सह संयुक्तो विज्ञातो वाणरक्षिभिः । ततस्तैर्द्वारपुरुषैर्व्वाणस्यावेदितं द्रुतं ।
यथादृष्टमशेषेण कन्यायास्तद्व्यतिक्रमं । ततः किङ्करसैन्यं तत् व्यादिष्टं भीमकर्म्मणा ।
बलिपुत्त्रेण वाणेन वीराणामित्रघातिना । गच्छध्वं सहिताः सर्व्वे हन्यतामेष दुर्म्मतिः ।

येन नः कुलचारित्र्यं दूषितं दूषितात्मना । उषायां धर्षितायां हि कुलं नो धर्षितं महत् । ११००५
असम्प्रदत्तां योऽस्माभिः स्वयंग्राहमधर्षयत् । अहो वीर्य्यमहो धैर्य्यमहो धाष्टर्य्यञ्च दुर्मतेः ।
यः पुरं भवनञ्चेदं प्रविष्टो नः सुबालिशः । एवमुक्त्वा पुनस्तान् स किङ्करानभ्यचोदयत ।
ते तस्याज्ञामथो दृष्ट्वा सुसन्नद्धा विनिर्ययुः । यत्रानिरुद्धो ह्यभवत् तत्रागच्छन्महाबलाः ।
नानाशस्त्रोद्यतकरा नानारूपा भयङ्कराः । दानवाः समभिक्रुद्धाः प्राद्युम्निवधकाङ्क्षिणः ।
तस्य सैन्यस्य निनदं श्रुत्वाऽभ्यागच्छतस्ततः । सहसैवोत्थितः शूरः प्राद्युम्निः किमिति ब्रुवन् । ११०१०
अथापश्यत तत् सैन्यं नानाप्रहरणोद्यतं । स्थितं समन्ततस्तच्च परिवार्य्य गृहं महत् ।
रुदती तद्बलं दृष्ट्वा बाष्पेणावृतलोचना । प्राद्युम्निवधभीता सा बाणपुत्री यशस्विनी ।
ततस्तु रुदतीं दृष्ट्वा तामूषां मृगलोचनां । हा हा कान्तेति वेपन्तीमनिरुद्धोऽभ्यभाषत ।
अभयं तेऽस्तु सुश्रोणि मा भैस्त्वं हि मयि स्थिते । सम्प्राप्तो हर्षकालस्ते न तेऽस्ति भयकारणं ।
कृत्स्नोऽयं यदि बाणस्य भृत्यवर्गो यशस्विनि । आगच्छति न मे चिन्ता भीरु पश्याद्य विक्रमं । ११०१५
ततोऽभ्यगच्छत्त्वरितो यत्र तद्विष्ठितं बलं । क्रुद्धः स्वबलमास्थाय सन्दष्टदशनच्छदं ।
ततो युद्धं बलौघानां बाणेयानां निशम्य तु । सा चित्रलेखाऽस्मरत नारदं देवदर्शनं ।
ततो निमेषमात्रेण सम्प्राप्तो मुनिपुङ्गवः । स ततोऽथ चित्रलेखायाः पुरं शोणितसाह्वयं ।
अन्तरीक्षे स्थितस्तत्र सोऽनिरुद्धमथाब्रवीत् । मा भयं स्वस्ति ते वीर प्राप्तोऽस्म्यभिमतस्तव ।
ततस्तु नारदं दृष्ट्वा सोऽभिवाद्य महाबलः । प्रहृष्टः सुमना भूत्वा युद्धार्थमभ्यवर्त्तत । ११०२०
ततस्तेषां स्वनं श्रुत्वा सर्व्वेषामेव गर्ज्जतां । सहसैवोत्थितः शूरस्तोत्रार्द्दित इव द्विपः ।
तमापतन्तं दृष्ट्वैव सन्दष्टौष्ठं महाभुजं । प्रासादाच्चावरोहन्तं भयात्ते विप्रदुद्रुवुः ।
सोऽन्तःपुरद्वारगतं परिघं दृष्ट्वा चातुलं । बभाज तेषाञ्चिक्षेप नानायुद्धविशारदः ।
ते सर्व्वे बाणवर्षैश्च गदाभिर्मुषलैस्तथा । असिभिः पट्टिशैः शूलैर्निजघ्नुरणगोचराः ।
स हन्यमानो नाराचैः परिघैश्च समन्ततः । दानवैः समभिक्रुद्धैः प्राद्युम्निः शस्त्रकोविदैः । ११०२५
नाक्षुभ्यत् सर्व्वभूतात्मा नदम्भोध इवोष्णगे । आविध्य परिघं घोरं तेषां मध्ये व्यवस्थितः ।
सूर्य्यो दिवि चरन्मध्ये मेघानामिव सर्व्वतः । दण्डकाष्ठासिनधरो नारदो हृष्टमानसः ।
साधु साध्विति वै तत्र सोऽनिरुद्धमभाषत । ते हन्यमाना रौद्रेण परिघेणामितौजसा ।
प्राद्रवन्त भयात् सर्व्वे मेघा वातेरिता इव । विद्राव्य दानवान् वीरः परिघेणाद्भुतविक्रमः ।
अनिरुद्धो रणे हृष्टः सिंहनादं मुमोच ह । घर्म्मान्ते तोयदो व्योम्नि नदन्निव महास्वनं । ११०३०
तिष्ठध्वमिति चुक्रोश दानवान् युद्धदुर्म्मदान् । प्राद्युम्निर्न्न्यहनच्चापि सर्व्वान् शत्रुनिबर्हणः ।
तेन ते समरे सर्व्वे हन्यमाना महात्मना । यतो बाणस्ततो भीता ययुर्युद्धपराङ्मुखाः ।
ततो बाणसमीपस्थाः श्वसन्तो रुधिरोक्षिताः । न शर्म्म लेभिरे दैत्या भयविक्लवलोचनाः ।
मा भैष्ट मा भैष्ट इति राज्ञा तेनाभिभाषिताः । आश्वमुत्सृज्य चैकस्था युध्यध्वं दानवर्षभाः ।

तानुवाच पुनर्व्वाणो भयविक्लवलोचनान्। किमिदं लोकविख्यातं यत्र युष्मत्सृजुश्च दूरगाः। ११०३५
भवन्तो यान्ति वैक्लव्यं क्लीवा इव विचेतसः। कोऽयं यस्य भयत्रस्ता भवन्तो यान्त्यनेकशः।
कुलापदेशिनः सर्व्वे नानायुद्धविशारदाः। भवद्भिर्न हि मे कार्य्यं युद्धे साहाय्यमद्य वै।
अब्रवीद्भ्रंसतेत्येवं मत्समीपाच्च गच्छत। अथ तान् वाग्भिरुग्राभिस्ताडयन् बहुधा बली।
व्यादिदेश रणे शूरानन्यानयुतशः पुनः। प्रमाथगणभूयिष्ठं व्यादिष्टं तस्य निग्रहे।
अनीकं सुमहद्रौद्रं नानाप्रहरणायुधं। अथान्तरीक्षे बहुधा सविद्युद्भिरिवाम्बुदैः। ११०४०
वाणानीकैः समभवद्व्याप्तं संदीप्तलोचनैः। केचित् क्षितिस्थाः प्राक्रोशन् गजा इव समन्ततः।
अन्येऽन्तरीक्षेऽभ्यनदन् घर्म्मान्त इव तोयदाः। ततस्तत् सुमहत् सैन्यं समेतमभवत् पुनः।
तिष्ठ तिष्ठेति च तदा वाचोऽश्रूयन्त सर्व्वशः। अनिरुद्धो रणे वीरः स च तानभ्यवर्त्तत।
तदाश्चर्य्यं समभवद्यदेकस्तैः समागतः। अयुध्यत महावीर्य्यैर्दानवैः सह संयुगे।
तेषामेव च जग्राह परिघांस्तोमरानपि। तैरेव च तदा युद्धे तान् जघान महाबलः। ११०४५
पुनः परिघमुत्सृष्टं प्रगृह्य रणमूर्द्धनि। स दैत्यसंघान् समरे निजघान महाबलान्।
निस्त्रिंशं चर्म्म चोत्सृष्टं प्रगृह्य रणमूर्द्धनि। स तेन विचरन्मार्गानेकः शत्रुनिवर्हणः।
भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं विद्रुतं सृतं। इति प्रकारान् द्वात्रिंशद्विचरन्नभ्यदृश्यत।
एकं सहस्रशस्तत्र ददृशूरणमूर्द्धनि। क्रीडन्तं बहुधा युद्धे व्यादितास्यमिवान्तकं।
ततस्तेनाभिसन्तप्ता रुधिरौघपरिप्लुताः। पुनर्भग्नाः प्राद्रवन्त यत्र वाणो व्यवस्थितः ११०५०
गजवाजिरथौघैस्ते उह्यमानाः समन्ततः। कृत्वा चार्त्तस्वरं घोरं दिशो जग्मुर्महौजसः।
एवं भयमभूत्तेषां दानवानां महारणे। एकैकस्योपरि तदा तेऽन्योन्यं भयपीडिताः।
वमन्तः शोणितं जग्मुर्व्विषादविमुखा रणे। न बभूव पुरा दैवैर्युद्धतां तादृशं भयं।
यादृशं युध्यमानानामनिरुद्धेन संयुगे। केचिद्वमन्तो रुधिरं न्यपतन् वसुधातले।
दानवा गिरिशृङ्गाभा गदाशूलासिपाणयः। ते वाणमुत्सृज्य रणे जग्मुर्भयसमाकुलाः। ११०५५
विशालमाकाशतलं दानवा निर्व्विता रणे। निःशेषभग्नां महतीं दृष्ट्वा तां वाहिनीन्तदा।
वाणः क्रोधात् प्रजज्वाल समिद्धोऽग्निरिवाध्वरे। अन्तरीक्षचरो भूत्वा साधुवादी समन्ततः।
नारदोऽनृत्यत प्रीत्या ह्यनिरुद्धस्य संयुगे। एतस्मिन्नन्तरे चैव वाणः परमकोपनः।
कुम्भाण्डसंगृहीतं तु रथमास्थाय वीर्य्यवान्। ययौ यत्रानिरुद्धो वै उद्यतासी रणे स्थितः।
पट्टिशासिगदाशूलानुद्यम्य सपरश्वधान्। बभौ बाहुसहस्रेण शक्रो ध्वजशतैरिव। ११०६०
बद्धगोधाङ्गुलित्रैस्तु बाहुभिः स महाभुजः। नानाप्रहरणोपेतैः शुशुभे दानवोत्तमः।
सिंहनादं नदन् क्रुद्धो विस्फारितमहाधनुः। अब्रवीत्तिष्ठ तिष्ठेति क्रोधसंरक्तलोचनः।
वाचन्तान्तस्य संश्रुत्य प्राद्युम्निरपराजितः। वाणस्य वदतः संख्ये तदैवात्र ततोऽहसत्।
किङ्किणीजालनिर्घोषं रक्तध्वजपताकिनं। ऋक्षचर्म्मावनद्धाङ्गं दृशमश्वं महारथं।

तस्य वाजिसहस्रन्तु रथे युक्तं महात्मनः । पुरा देवासुरे युद्धे हिरण्यकशिपोरिव । ११०६५
तमापतन्तं ददृशे दानवं यदुनन्दनः । संप्रहृष्टस्ततो युद्धे तेजसा चाप्यपूर्य्यत ।
असिचर्म्मधरो वीरः स्वस्थः संग्रामलालसः । नरसिंहो यथा पूर्व्वनादिदैत्यवधोद्यतः ।
आपतन्तं ददर्शाथ खड्गचर्म्मधरं तदा । खड्गचर्म्मधरं तन्तु दृष्ट्वा वाणः पदातिनं ।
प्रहर्षमतुलं लेभे प्राद्युम्निवधकाङ्क्षया । तमुवेष विहीनश्च खड्गपाणिश्च मानुषः ।
आजेयमिति तं मत्वा युद्धायाभिमुखे स्थितः । अनिरुद्धं रणे वाणो जितकाशी महाबलः । ११०७०
वाचं प्रोवाच संक्रुद्धो गृह्यतां हन्यतामिति । वाचश्च ब्रुवतस्तस्य श्रुत्वा प्राद्युम्निराहवे ।
वाणस्य वदनं क्रोधाद्धमधमानोऽभ्युदैक्षत । ऊषा भयपरित्रस्ता रुदते तत्र भाविनी ।
अनिरुद्धः प्रहस्याथ समाश्वास्य च तां स्थितः । अथ वाणः शरौघाणि क्षुद्रकाणां समन्ततः ।
चिक्षेप समरे क्रुद्धो ह्यनिरुद्धवधेप्सया । अनिरुद्धस्तु चिच्छेद काङ्क्षंस्तस्य पराजयं ।
ववर्ष शरवर्षाणि क्षुद्रकाणां समन्ततः । वाणोऽनिरुद्धशिरसि काङ्क्षंस्तस्य रणे वधं । ११०७५
तानि वाणसहस्राणि चर्म्मणा व्यवधूय सः । बभौ प्रमुखतस्तस्य स्थितः सूर्य्य इवोदये ।
सोऽभिभूय रणे वाणमास्थितो यदुनन्दनः । सिंहः प्रमुखतो दृष्ट्वा गजमेकं यथा वने ।
ततो वाणसहस्रौघैर्म्मर्म्मभेदिभिराशुगैः । विव्याध निशितैस्तीक्ष्णैः प्राद्युम्निमपराजितं ।
समाहतस्ततो वाणैः खड्गचर्म्मधरोऽपतत् । तमापतन्तं निशितैरभ्यघ्नन् सायकैस्तदा ।
सोऽतिविद्धो महाबाहुर्व्वाणैः सन्नतपर्व्वभिः । क्रोधेनाति प्रजज्वाल चिकीर्षुः कर्म्म दुष्करं । ११०८०
रुधिरौघप्लुतैर्गात्रैर्व्वाणवेगैः समाहतः । अभिभूतः सुसंक्रुद्धो ययौ वाणरथम्प्रति ।
असिभिर्म्मुषलैः शूलैः पट्टिशैस्तोमरैस्तथा । सोऽतिविद्धः शरौघैस्तु प्राद्युम्निर्नाभ्यकम्पत ।
आप्लुत्य सहसा क्रुद्धो रथेषां तस्य सोऽच्छिनत् । जघानाश्वान् स खड्गेन वाणस्य रणमूर्द्धनि ।
तं पुनः शरवर्षेण तोमरैः पट्टिशैस्तथा । चकाराच्छादितं वाणो युद्धमार्गविशारदः ।
हतोऽयमिति विज्ञाय प्राणदन्दानवा रणे । ततोऽवप्लुत्य सहसा रथपार्श्वे व्यवस्थितः । ११०८५
शक्तिं वाणस्ततः क्रुद्धो घोररूपां भयावहां । जग्राह ज्वलितां दीप्तां घण्टामालाकुलां रणे ।
ज्वलनादित्यसङ्काशां यमदण्डोग्रदर्शनां । प्राहिणोत्तामसङ्गेन महोल्कां ज्वलितामिव ।
तामापतन्तीं सम्प्रेक्ष्य जीवितान्तकरीन्तदा । सोऽभिप्लुत्य तदा शक्तिं जग्राह पुरुषोत्तमः ।
निर्ब्बिभेद तदा वाणं तया शक्त्या महाबलः । सा भित्त्वा तस्य देहं तु जगाम वसुधातलं ।
स गाढविद्धो व्यथितो ध्वजयष्टिं समाश्रितः । ततो मूर्च्छाभिभूतं तं कुम्भाण्डो वाक्यमब्रवीत् । ११०९०
उपेक्षसे दानवेन्द्र किमेवं शत्रुमुद्यतं । लब्धलक्षो ह्ययं वीरो निर्व्विकारोऽद्य दृश्यते ।
मायामाश्रित्य युध्यस्व नायं वध्योऽन्यथा भवेत् । आत्मानं माश्च रक्षस्व प्रमादात् किमुपेक्षसे ।
वध्यतामयमद्यैव न नः सर्व्वान्विनाशयेत् । कुम्भाण्डवचनैरेवं दानवेन्द्रः प्रचोदितः ।
वाचं रुषामभिक्रुद्धः प्रोवाच वदताम्वरः । एषोऽहमस्य विदधे मृत्युं प्राणहरं रणे ।

आदास्याम्यहमेतं हि गरुत्मानिव पन्नगान् । इत्येवमुक्त्वा स रथः साश्वः सध्वजसारथिः । १०१९५
गन्धर्व्वनगराकारस्तत्रैवान्तरधीयत । विज्ञायान्तर्हितं वाणं प्राद्युम्निरपराजितः ।
पौरुषेण समायुक्तः संप्रैक्षत दिशो दश । आस्थाय तामसीं विद्यां ततः क्रुद्धो बलेः सुतः ।
मुमोच निशितान् वाणांस्तस्मै मायाधरो बली । प्राद्युम्निर्विशिखैर्व्विद्धः सर्पभूतैः समन्ततः ।
वेष्टितो बहुधा तस्य देहः पन्नगराशिभिः । स तु वेष्टितसर्व्वाङ्गो बद्धः प्राद्युम्निराहवे ।
निष्प्रयत्नःकृतस्तस्थौ मैनाक इव पर्व्वतः । ज्वालावलीढवदनैः सर्पभोगैर्विचेष्टितः । १०२००
अभीतः पर्व्वताकारः प्राद्युम्निरभवद्रणे । निष्प्रयत्नगतिश्चापि सर्पवक्त्रमयैः शरैः ।
न विव्यथे स भूतात्मा सर्व्वतः परिवेष्टितः । ततस्तं वाग्भिरुग्राभिः संरब्धः समतर्ज्जयत् ।
वाणो ध्वजं समाश्रित्य प्रोवाचामर्षितो वचः । कुम्भाण्ड बध्यतां शीघ्रमयं वै कुलपांसनः ।
चारित्रं येन नो लोके दूषितं दूषितात्मना । इत्येवमुक्ते वचने कुम्भाण्डो वाक्यमब्रवीत् ।
राजन् वक्ष्याम्यहं किञ्चित् तन्मे शृणु यदीच्छसि । अयं विज्ञायतां कस्य कुतो वाऽयमिहागतः । १०२०५
केन वायमिहानीतः शक्रतुल्यपराक्रमः । मयाऽयं बहुशो युध्यन् दृष्टो राजन्महारणे ।
क्रीडन्निव च युद्धेषु दृश्यते देवसूनुवत् । बलवान् सत्त्वसम्पन्नः सर्व्वशस्त्रविशारदः ।
नायं बधकृतं दोषमर्हते दैत्यसत्तम । गान्धर्व्वेण विवाहेन कन्येयं तव सङ्गता ।
अदेया ह्यप्रतिग्राह्या अतश्चिन्त्य बधं कुरु । विज्ञाय तु बधं वाऽस्य पूजां वाऽस्य करिष्यसि ।
बधे ह्यस्य महान्दोषो रक्षणे सुमहान् गुणः । अयं हि पुरुषोत्कर्षः सर्व्वथा मानमर्हति । १०२१०
सर्व्वतो वेष्टिततनुर्न व्यथत्येष भोगिभिः । कुलशौटीर्य्यवीर्य्यैश्च सत्त्वेन च समन्वितः ।
पश्य राजन् यशोवीर्य्यैरन्वितं पुरुषोत्तमं । न नो गणयते सर्व्वान् बधं प्राप्तोऽप्ययं बली ।
यदि मायाप्रभावेण नाद्य बद्धो भवेदयं । सर्व्वासुरगणान् सङ्ख्ये योधयेन्नात्र संशयः ।
सर्व्वयुद्धेषु मार्गज्ञो भवेद्वीर्य्याधिकस्तव । शोणितौघस्नुतैर्गात्रैर्नागभोगैश्च वेष्टितः ।
त्रिशिखां भृकुटीं कृत्वा न चिन्तयति नः स्थितान् । इमामवस्थां नीतोऽपि स्वबाहुबलमाश्रितः । १०२१५
न चिन्तयति राजंस्त्वां वीर्य्यवान् कोऽप्ययं युवा । सहस्रबाहो समरे द्विबाहुः प्रमुखे स्थितः ।
न चिन्तयति ते वीर श्रेयो वीर्य्यबलान्वितः । रुचितं यदि ते राजन् श्रेयो वीर्य्यबलान्वितः ।
कन्या चेयं न चान्यस्य निर्यात्यानेन सङ्गता । यदि चेष्टतमः कश्चिदयं वंशे महात्मनां ।
ततः पूजामयं लब्ध्वा प्राप्स्यत्येवासुरोत्तम । रक्ष्यतामिति चोक्ता वै तथाऽस्त्विति च तस्थिवान् ।
एवमुक्ते तु वचने कुम्भाण्डेन महात्मना । तथेत्याह तु कुम्भाण्डं वाणः शक्रनिवर्हणः । १०२२०
संरक्षिणस्ततो दत्त्वा ह्यनिरुद्धस्य धीमतः । ययौ स्वमेव भवनं बलेः पुत्रो महाबलः ।
संयतं मायया दृष्ट्वा अनिरुद्धं महाबलं । ऋषीणां नारदः श्रेष्ठोऽव्रजद्द्वारवतीं प्रति ।
ततो ह्याकाशमार्गेण मुनिर्द्वारवतीङ्गतः । बद्धं निवेदयामीति प्राद्युम्निं गरुडध्वजे ।
गते ऋषीणां प्रवरे सोऽनिरुद्धो व्यचिन्तयत् । नष्टोऽयं दानवः क्रूरो युद्धं प्राप्य न संशयः ।

स गत्वा नारदस्तत्र शङ्खचक्रगदाधरं । श्रावयिष्यति तत्त्वेन इममर्थं यथैव तत् । १०२२५
नागैर्व्विवेष्टितं दृष्ट्वा ऊषा प्राद्युम्निमातुरा । रुरोद वाष्परक्ताक्षी तामाह रुदतीं पुनः ।
किमिदं रुद्यते भीरु मा भैस्त्वं शुभलोचने । पश्य सुश्रोणि सम्प्राप्तं मत्कृते मधुसूदनं ।
यस्य शङ्खध्वनिं श्रुत्वा बाणशब्दं बलस्य च । दानवा नाशमेष्यन्ति गर्भाश्चासुरयोषितां ।
॥ वैशम्पायन उवाच ॥ एवमुक्ताऽनिरुद्धेन ऊषा विस्रम्भमागता । नृशंसं पितरञ्चैव शोचते सा सुमध्यमा ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि बाणयुद्धे अनिरुद्धबन्धने सप्तसप्तत्यधिकशततोऽध्यायः ॥ १७७ ॥
॥ वैशम्पायन उवाच ॥ यदा बाणपुरे वीरः सोऽनिरुद्धः सहोषया । सन्निरुद्धोऽसुरेन्द्रेण बाणेन बलिसूनुना । १०२३०
तदा देवी स कौमारीं रक्षार्थं शरणं गतः । यद्गीतमनिरुद्धेन देव्याः स्तोत्रमिदं शृणु ।
अनन्तमक्षयं दिव्यमादिदेवं सनातनं । नारायणं नमस्कृत्य प्रवरं प्रथमं विभुं ।
चण्डीं कात्यायनीं देवीमार्य्यां लोकनमस्कृतां । वरदां कीर्त्तयिष्यामि नामभिर्हरिसंस्तुतैः ।
ऋषिभिर्द्दैवतैश्चैव वाक्पुष्पैरर्च्चितां शुभां । तां देवीं सर्व्वदेहस्थां सर्व्वलोकनमस्कृतां ।
॥ अनिरुद्ध उवाच ॥ महेन्द्रविष्णुभगिनीं नमाम्यात्महिताय वै । मनसा भावशुद्धेन शुचिः स्तौमि कृताञ्जलिः । १०२३५
गौतमीं कंसभयदां यशोदानन्दिवर्द्धिनीं । मेध्यां गोकुलसम्भूतां नन्दगोपस्य नन्दिनीं ।
प्राज्ञां दक्षां शिवां पुण्यां दनुपुत्त्रप्रमर्द्दिनीं । तां देवीं सर्व्वदेहस्थां सर्व्वभूतनमस्कृतां ।
दर्शनीं पूर्णां मायां शशिवक्त्रां शशिप्रभां । शान्तिं भुशाञ्च जननीं मोहनीं तापनीं तथा ।
स्तव्यां देवैः सर्षिगणैः सर्व्वभूतनमस्कृतां । कालीं कात्यायनीं देवीं भयदां भयनाशिनीं ।
कात्यायनीं कामगमां त्रिनेत्रां ब्रह्मचारिणीं । सौदामिनीं मेघरवां वेतालीं विपुलाननां । १०२४०
यूथस्थाम्बां महाभागां शकुनीं रेवतीं तथा । तिथीनां पञ्चमीं षष्ठीं पौर्णमासीं चतुर्द्दशीं ।
सप्तविंशति नक्षत्राणि नद्यः सर्व्वा दिशो दश । नगरोपवनोद्यानचत्वरोद्यानवासिनीं ।
ह्रीं श्रीं गार्गीञ्च गान्धर्व्वीं योगिनीं योगदां सदा । कीर्त्तिमाशां दिशं स्पर्शां नमस्यामि सरस्वतीं ।
वेदानां मातरञ्चैव सावित्रीं भक्तवत्सलां । तपस्विनीं शान्तिकरीमेकानंशां सनातनीं ।
कौटोर्य्यां मदिरां चण्डामिलां मलयवासिनीं । भूतधात्रीं भयकरीं कुष्माण्डीं कुसुमप्रियां । १०२४५
दारुणीं मन्दरावासां विन्ध्यकैलासवासिनीं । वराङ्गनां सिंहरथां बलरूपां वृषध्वजां ।
दुर्लभां दुर्ज्जयां दुर्गां निशुम्भभयदर्शिनीं । सुराप्रियां सुरां देवीं वज्रशाणतनुं शिवां ।
किरातीं चीरवसनां घोरसेनानमस्कृतां । आज्यपां सोमपां सौम्यां सर्व्वपर्व्वतवासिनीं ।
निशुम्भशुम्भमथनीं गजकुम्भोपमस्तनीं । जननीं सिद्धसेनस्य सिद्धचारणसेवितां ।
बरां कुमारप्रभवां पार्व्वतीं पर्व्वतात्मजां । पञ्चाशद्देवकन्यानां पत्न्यो देवगणस्य च । १०२५०
रुद्रपुत्त्रसहस्रस्य पुत्त्रपौत्त्रवरस्त्रियः । माता पिता जगन्मान्या दिवि देवाप्सरोगणैः ।
ऋषिपत्नीगणानाञ्च यक्षगन्धर्व्वसेविता । विद्याधराणां नारीषु साध्वीसु मनुजासु च ।
एवंसतासु नारीषु सर्व्वभूताश्रया ह्यसि । नमस्कृताऽसि त्रैलोक्ये किन्नरोद्गीतसेविते ।

अचिन्त्या ह्यप्रमेयाऽसि याऽसि साऽसि नमोऽस्तु ते । एभिर्नामभिरन्यैश्च कीर्त्तिता ह्यसि गौतमि ।
त्वत्प्रसादादविघ्नेन क्षिप्रं मुच्येय बन्धनात् । अवेक्षस्व विशालाक्षि पादौ ते शरणं व्रजे । १०१५५
सर्व्वेषामेव बद्धानां मोक्षणं कर्त्तुमर्हसि । ब्रह्मा विष्णुश्च रुद्रश्च चन्द्रसूर्य्याग्निमारुताः ।
अश्विनौ वसवश्चैव विश्वे साध्यास्तथैव च । मरुतः सह पर्ज्जन्या धाता भूमिर्द्दिशो दश ।
गावो नक्षत्रवंशाश्च ग्रहा नद्यो ह्रदास्तथा । सरितः सागराश्चैव नानाविद्याधराः खगाः ।
तथा नागाः सुपर्णाश्च गन्धर्व्वाप्सरसां गणाः । कृत्स्नं जगदिदं प्रोक्तं देव्या नामानुकीर्त्तनात् ।
देव्यास्तवमिदं पुण्यं यः पठेत्सुसमाहितः । सा तस्मै सप्तमे मासि वरमग्र्यं प्रयच्छति । १०१६०
अष्टादशभुजा देवी दिव्याभरणभूषिता । हारभूषितसर्व्वाङ्गी मुकुटोज्ज्वलभूषणा ।
कात्यायनि स्तूयसे त्वं वरदे वामलोचने । नमोऽस्तु ते महादेवि सुप्रीता वै भजस्व मां ।
प्रयच्छस्व वरं ह्यायुः पुष्टिश्चैव चलां धृतिं ।
॥ वैशम्पायन उवाच ॥ एवं स्तुता महादेवी दुर्गा दुर्गपराक्रमा । सान्निध्यं कल्पयामास अनिरुद्धस्य बन्धने ।
अनिरुद्धहितार्थाय देवी शरणवत्सला । बद्धं वाणपुरे वीरमनिरुद्धं ह्यमोक्षयत् । १०१६५
सान्त्वयामास तं वीरमनिरुद्धममर्षणं । प्रसादं दर्शयामास अनिरुद्धस्य बन्धने ।
पूजयामास तां वीरः सोऽनिरुद्धः प्रतापवान् । नागपाशेन बद्धस्य तस्योपाहृतचेतसः ।
स्फोटयित्वा कराग्रेण पञ्जरं वज्रसन्निभं । बद्धं वाणपुरे वीरं साऽनिरुद्धमभाषत ।
सान्त्वयन्ती वचो देवी प्रसादाभिमुखी तदा ।
॥ देव्युवाच ॥ चक्रायुधो मोक्षयिताऽनिरुद्ध त्वां बन्धनादाशु सहस्व कालं । छित्त्वा तु वाणस्य स बाहुचक्रं पुरीं निजां नेष्यति दैत्यसूदनः । १०१७०
॥ वैशम्पायन उवाच ॥ यदाऽनिरुद्धं सह वाणपुत्र्या नेतुं खगेन्द्रेण हरिः प्रवृत्तः । महासुरे वाण उदीर्णचक्रे न्यक्कारमासन्नतरं निशम्य ।
ततोऽनिरुद्धः पुनरेव देवीं तुष्टाव हृष्टः शशिकान्तवक्त्रः ।
॥ अनिरुद्ध उवाच ॥ नमोऽस्तु ते देवि वरप्रदे शिवे नमोऽस्तु ते देवि सुरारिनाशिनि । नमोऽस्तु ते कामचरे सदा शिवे नमोऽस्तु ते सर्व्वहितैषिणि प्रिये ।
नमोऽस्तु ते महिषमहासुरार्द्दिनि नमोऽस्तु ते भयकरि त्रिदिशां सदा ।
ब्रह्माणीन्द्राणि रुद्राणि भूतभव्ये यशस्विनि । त्राहि मां सर्व्वदुःखेभ्यो नारायणि नमोऽस्तु ते । १०१७५
नमोऽस्तु ते जगन्नाथे प्रिये दान्ते महाव्रते । प्रियभक्ते जगन्मातः शैलपुत्रि वसुन्धरे ।
त्रायस्व मां विशालाक्षि नारायणि नमोऽस्तु ते । नमामि शिरसा देवीं बन्धनेभ्यो विमोचितः ।
रक्ष मां सर्व्वभूतेभ्यो नारायणि नमोऽस्तु ते । त्रायस्व सर्व्वदुःखेभ्यो दानवानां भयङ्करि ।
रुद्रप्रिये महाभागे भक्तानामार्त्तिनाशिनि । सर्व्वदुःखभयत्रासात्त्राहि मां परमेश्वरि ।

॥ वैशम्पायन उवाच ॥ आर्य्यास्तवमिदं पुण्यं यः पठेत् सुसमाहितः । सर्व्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति । १०२८०

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वाणयुद्धे अनिरुद्धकृतार्य्यास्तवे अष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥

॥ वैशम्पायन उवाच ॥ ततोऽनिरुद्धस्य गृहे रुरुदुः सर्व्वयोषितः । प्रियं नाथमपश्यन्त्यः कुरर्य्य इव संघशः ।

अहो धिक् किमिदं नाथ नाथे कृष्णे व्यवस्थिते । अनाथा इव संत्रस्ता रुदिमो भयपीडिताः ।

यस्येन्द्रप्रमुखा देवाः आदित्याः समरुद्गणाः । बाहुच्छायां समाश्रित्य वसन्ति दिवि निर्वृताः ।

तस्योत्पन्नमिदं लोके भयदस्य महद्भयं । यस्यानिरुद्धः पौत्त्रः स वीरः केनापि नो हृतः ।

अहो नास्ति भयं नूनं तस्य लोके सुदुर्म्मतेः । वासुदेवस्य यः क्रोधं प्रज्वालयति दुःसहं । १०२८५

व्यादितास्यस्य यो मृत्योर्द्दंशयो परिवर्त्तते । स वासुदेवं समरे मोहन् प्रत्युदियाद्रिपुः ।

इदमेवंविधं कृत्वा विप्रियं यदुपुङ्गवे । कथं जीवन् विमुच्येत साक्षादपि शचीपतिः ।

हृतनाथाः स्म शोच्याः स्म वयमद्य विनाकृताः । विप्रयोगेण नाथस्य कृतान्तवशगाः कृताः ।

इत्येवं ता रुदन्त्यश्च वदन्त्यश्च पुनः पुनः । नेत्रजं वारि मुमुचुरशिवं परमाङ्गनाः ।

तासां वाष्पाम्बुपूर्णानि नयनानि चकाशिरे । सलिलेनाप्लुतानीव पङ्कजानि जलागमे । १०२९०

तासामरालपक्ष्माणि राजिमन्ति शुभानि च । रुधिरेणाप्लुतानीव नयनानि चकाशिरे ।

तासां हर्म्यतलस्थानां तूर्णमासीन्महास्वनः । कुररीणामिवाकाशे रुदतीनां सहस्रशः ।

तं श्रुत्वा निनदं घोरमपूर्व्वं भयमागतं । उत्पेतुः सहसा स्वेभ्यो गृहेभ्यः पुरुषर्षभाः ।

कस्मादेषोऽनिरुद्धस्य श्रूयते रुदितस्वनः । गृहे कृष्णाभिगुप्तानां कुतो नो भयमागतं ।

इत्येवमूचुस्तेऽन्योन्यं स्नेहविक्लवगद्गदाः । आधर्षिता यथा सिंहा गुहास्थ इव निर्गताः । १०२९५

सन्नाहभेरी कृष्णस्य सभायामाहता तदा । तस्याः शब्देन ते सर्व्वे सभामागम्य धिष्ठिताः ।

किमेतदिति तेऽन्योन्यं समपृच्छन्त यादवाः । अन्योन्यस्य हि ते सर्व्वे यथान्यायमवेदयन् ।

ततस्ते वाष्पपूर्णाक्षाः क्रोधसंरक्तलोचनाः । निश्वसन्तो व्यतिष्ठन्त यादवा युद्धदुर्म्मदाः ।

तूष्णीम्भूतेषु सर्व्वेषु विपृथुर्व्वाक्यमब्रवीत् । कृष्णं प्रहरतां श्रेष्ठं निश्वसन्तं मुहुर्म्मुहुः ।

किमेवं चिन्तयाविष्टः पुरुषेन्द्र भवानिह । तव बाहुबलप्राणमाश्रिताः सर्व्वयादवाः । १०३००

भवन्तमाश्रिताः कृष्ण संविभक्ताश्च सर्व्वशः । तथैव भगवान् शक्रस्त्वय्यावेश्य जयाजयौ ।

सुखं स्वपिति निश्चिन्तः कथं त्वं चिन्तयान्वितः । शोकसागरमक्षोभ्यं सर्व्वे ते ज्ञातयो गताः ।

तान्समुत्तारयैकस्त्वं समुद्धर महाभुज । किमेवं चिन्तयाविष्टो न किञ्चिदभिभाषसे ।

चिन्तां कर्त्तुं वृथा देव न त्वमर्हसि माधव । इत्येवमुक्तः कृष्णस्तु निःश्वस्य सुचिरं बहु ।

प्राह वाक्यं स वाक्यज्ञो बृहस्पतिरिव स्वयं । १०३०५

॥ कृष्ण उवाच ॥ विपृथो चिन्तयाविष्ट एतत् कार्य्यमचिन्तयं । विचिन्तयंस्त्वहञ्चास्य कार्य्यस्य न लभे गतिं ।

तथाऽहं भवताऽप्युक्तो नोत्तरं विदधे क्वचित् । दाशार्हगणमध्येऽहं वदाम्यर्थवतीं गिरं ।

शृणुध्वं यादवाः सर्व्वे यथा चिन्तान्वितो ह्यहं । अनिरुद्धे हृते शूरे पृथिव्यां सर्व्वपार्थिवाः ।
अशक्ता इव मंस्यन्ते सर्व्वानस्मान् सबान्धवान् । आहुकश्चैव नो राजा हृतः शाल्वेन वै पुरा ।
प्रत्यानीतः स चास्माभिर्युद्धं कृत्वा सुदारुणं । प्रद्युम्नश्चापि नो बाल्ये शम्बरेण हृतो ह्यभूत् । १०३१०
स तं निहत्य समरे प्राप्तो रुक्मिणिनन्दनः । इदन्तु सुमहत् कष्टं प्राशुभिः क्व प्रवासितः ।
नैवंविधमहं दोषं स्मरामि सत्तमर्षभाः । भस्मना गुण्ठितः पादो येन मे मूर्द्ध्नि पातितः ।
तस्याहं सानुबन्धस्य हरिष्ये जीवितं रणे । इत्येवमुक्ते कृष्णेन सात्यकिर्व्वाक्यमब्रवीत् ।
चराः कृष्ण प्रयुज्यन्तामनिरुद्धस्य मार्गणे । सपर्व्वतवनोद्देशां मार्गन्तु वसुधामिमां ।
आहुकं प्राह कृष्णस्तु स्मितं कृत्वा वचस्तदा । अन्वेषणेऽनिरुद्धस्य चरानादिश मा चिरं । १०३१५
आभ्यन्तरांश्च वाह्यांश्च व्यादिश्यन्तां चरा नृप ।
॥ वैशम्पायन उवाच ॥ केशवस्य वचः श्रुत्वा आहुकस्त्वरितोऽभवत् । अन्वेषणेऽनिरुद्धस्य चरान् व्यादिष्टवांस्तदा ।
ततश्चरांश्च व्यादिष्टाः पार्थिवेन यशस्विना । हया रथाश्च व्यादिष्टाः पार्थिवेन महात्मना ।
अभ्यन्तरञ्च मार्गध्वं वाह्यतश्च समन्ततः । वेणुमन्तं लतावेष्टं तथा रैवतकं गिरिं ।
ऋक्षवन्तं गिरिञ्चैव मार्गध्वं त्वरिता हयैः । एकैकं तत्र चोद्यानं मार्गितव्यं समन्ततः । १०३२०
यातव्यञ्चापि निःशङ्कमुद्यानेषु समन्ततः । हयानाञ्च सहस्राणि रथानाञ्चाप्यनेकशः ।
आरुह्य त्वरिताः सर्व्वे मार्गध्वं यदुनन्दनं । सेनापतिरनाधृष्टिरिदं वचनमब्रवीत् ।
कृष्णमक्लिष्टकर्म्माणमच्युतं भीतभीतवत् । शृणु कृष्ण वचो मह्यं यदि ते रोचते प्रभो ।
चिरात् प्रभृति मे वक्तुं भवन्तं जायते मतिः । अविलोमा पुलोमा च निसुन्दनरकौ हतौ ।
भौमः शाम्बश्च निहतो मैन्दो द्विविद एव च । हयग्रीवश्च सुमहान् सानुबन्धस्त्वया हतः । १०३२५
तादृशे विग्रहे वृत्ते देवहेतोः सुदारुणे । सर्व्वाण्येतानि कर्म्माणि निःशेषाणि रणे रणे ।
कृतवानसि गोविन्द पार्ष्णिग्राहश्च नास्ति ते । इदं कर्म्म त्वया कृष्ण सानुबन्धं कृतं रणे ।
पारिजातस्य हरणे यत् कृतं कर्म्म दुष्करं । तत्र शक्रस्त्वया कृष्ण ऐरावतशिरोगतः ।
निर्ज्जितो बाहुवीर्य्येण स्वयं युद्धविशारदः । तेन वैरं त्वया सार्द्धं कर्त्तव्यं नात्र संशयः ।
वैरानुबन्धश्च महांस्तेन कार्य्यस्त्वया सह । तत्रानिरुद्धहरणं कृतं मघवता स्वयं । १०३३०
न ह्यन्यस्य भवच्छक्तिर्वैरनिर्यातनम्प्रति । इत्येवमुक्ते वचने कृष्णो नाग इव श्वसन् ।
उवाच वचनं धीमाननाधृष्टिं महाबलं । सेनानीस्तात मा मैवं न देवाः क्षुद्रकर्म्मिणः ।
नाकृतज्ञा न च क्लीवा नावलिप्ता न बालिशाः । देवतार्थञ्च मे यत्नो महान्दानवसंक्षये ।
तेषां प्रियार्थञ्च रणे हन्मि दृप्तान्महासुरान् । तत्परस्तन्मनाश्चास्मि तद्भक्तस्तत्परायणः ।
कथं पापं करिष्यन्ति विज्ञायैवंविधं हि मां । अक्षुद्राः सत्यवन्तश्च नित्यं भक्तानुकम्पिनः । १०३३५
न तेभ्यो विद्यते पापं बालिशत्वात् प्रभाषसे । कदाचिदिह पौंश्चल्यादनिरुद्धो गतो भवेत् ।
देवेषु समहेन्द्रेषु नैतत् कर्म्म विधीयते ।

॥ वैशम्पायन उवाच ॥ एवं चिन्तयमानस्य कृष्णस्याद्भुतकर्म्मणः । कृष्णस्य वचनं श्रुत्वा तदाऽक्रूरोऽब्रवीद्वचः ।
मधुरं श्लक्ष्णया वाचा सोऽथ वाक्यविशारदः । यच्चकस्य प्रभो कार्य्यं तदस्माकं विनिश्चितं ।
अस्माकञ्चापि यत्कार्य्यं तद्धि कार्य्यं शचीपतेः । संरक्ष्याश्च वयं देवैरस्माभिरपि देवताः । १०२४०
देवतार्थे भवांश्चापि मानुषत्वमुपागतः । विष्णुर्मधुनिहा वीरो देवदेवः सनातनः ।
एवमक्रूरवचनैश्चोदितो मधुसूदनः । स्निग्धगम्भीरया वाचा पुनः कृष्णोऽभ्यभाषत ।
नायं देवैर्न गन्धर्व्वैर्न यक्षैर्नापि राक्षसैः । प्रद्युम्नपुत्रोऽपहृतः पुंश्चल्या तु हृतः स्त्रिया ।
मायाविदग्धाः पुंश्चल्यो दैत्यदानवयोषितः । ताभिर्हृतो न सन्देहो नान्यतो विद्यते भयं ।
॥ वैशम्पायन उवाच ॥ इत्येवमुक्ते वचने कृष्णेन तु महात्मना । अथावगम्य तत्त्वेन यद्वृत्तं यदुमण्डले । १०२४५
उदतिष्ठन्महानादस्तदा कृष्णं प्रशंसयन् । चिन्तयन् स तु सर्व्वेषां सूतमागधवन्दिनां ।
मधुरः शुश्रुवे शब्दो माधवस्य निवेशने । ते चराः सर्व्वतः सर्व्वे सभाद्वारमुपागताः ।
शनैर्गद्गदया वाचा इदं वचनमब्रुवन् । उद्यानानि सभाः शैला गुहा नद्यः सरांसि च ।
एकैकं शतशो राजन् मार्गितं न च दृश्यते । अथ कृष्णचरा राजन्नुपागम्य तदाऽब्रुवन् ।
सर्व्वे संविदिता देशाः प्राद्युम्निर्न च दृश्यते । यदन्यत् संविधातव्यं विधानं यदुनन्दन । १०
तदाज्ञापय नः क्षिप्रमनिरुद्धस्य मार्गणे । ततस्ते दीनमनसः सर्व्वे बाष्पाकुलेक्षणाः ।
अन्योन्यमभ्यभाषन्त किमतः कार्य्यमुत्तरं । मन्दष्टौष्ठपुटाः केचित् केचिद्बाष्पाकुलेक्षणाः ।
केचिद्भ्रुकुटिमास्थाय चिन्तयन्त्यर्थसिद्धये । एवं चिन्तयतां तेषां बह्वर्थमभिभाषतां ।
अनिरुद्धः कुतश्चेति सम्भ्रमः सुमहानभूत । अन्योन्यमभिवीक्षन्ते यादवा जातमन्यवः ।
तां निशां विमनस्कास्ते गमयेयुः कथञ्चन । अनिरुद्धो हृतश्चेति पुनः पुनररिन्दम । १०२५५
एवञ्च ब्रुवतां तेषां प्रभाता रजनी तदा । ततस्तूर्य्यनिनादैश्च शङ्खानाञ्च महास्वनैः ।
प्रबोधनं महाबाहोः कृष्णस्याक्रियतालये । ततः प्रभाते विमले प्रादुर्भूते दिवाकरे ।
प्रविवेश सभामेको नारदः प्रहसन्निव । दृष्ट्वा तु यादवान् सर्व्वान् कृष्णेन सह सङ्गतान् ।
ततः स जयशब्देन माधवं प्रत्यपूजयत् । उग्रसेनादयस्ते च तर्ष्वाँव प्रत्यपूजयन् ।
अथाभ्युत्थाय विमनाः कृष्णः समितिदुर्ज्जयः । मधुपर्कञ्च गाञ्चैव नारदाय ददौ प्रभुः । १०२६०
सोपविश्यासने शुभ्रे स्पर्द्ध्यास्तरणसंवृते । सुखासीनो यथान्यायमुवाचेदं वचोऽर्थवत् ।
॥ नारद उवाच ॥ किमेवं चिन्तयाविष्टा निःसङ्गा गतमानसाः । उत्साहहीनाः सर्व्वे वै क्लीवा इव समासते ।
एवमुक्ते तु वचने नारदेन महात्मना । वासुदेवोऽब्रवीद्वाक्यं श्रूयतां भगवन्निदं ।
अनिरुद्धो हृतो ब्रह्मन् केनापि निशि सुव्रत । तस्यार्थे सर्व्व एव स्म चिन्ताविष्टचेतसः ।
एष ते यदि वृत्तान्तः श्रुतो दृष्टोऽपि वा मुने । भगवन् कथ्यतां साधु प्रियमेतन्ममानघ । १०२६५
इत्येवमुक्ते वचने केशवेन महात्मना । प्रहस्य नारदः प्राह श्रूयतां मधुसूदन ।
निर्वृत्तं सुमहद्युद्धं देवासुरसमं महत् । अनिरुद्धस्य चैकस्य वाणस्य च महामृधे ।

ऊषा नाम सुता तस्य बाणस्याप्रतिमौजसः। तदर्थं चित्रलेखा वै जहाराशु तमप्सराः।
उभयोरपि तत्रासीन्महद्युद्धं सुदारुणं। प्राद्युम्निबाणयोः सङ्ख्ये बलिवासवयोरिव।
अस्माभिश्चापि तद्युद्धं दृष्टं सुमहदद्भुतं। अनिरुद्धो भयात्तेन संयुगेष्वनिवर्त्तिना। १०२७०
बाणेन मायामास्थाय बद्धो नागैर्महाबलः। व्यादिष्टश्च बधस्तस्य बाणेन गरुडध्वज।
तन्निवारितवान्मन्त्री कुम्भाण्डो नाम तस्य ह। कुमारस्यानिरुद्धस्य तेनाशक्तेन संयुगे।
बाणेन मायामास्थाय सर्पैर्नियमनं कृतं। उत्तिष्ठतु भवान् शीघ्रं यशसे विजयाय च।
नायं संरक्षितुं कालः प्राणांस्तात जयैषिणां। प्राणैः किञ्चिद्धि तैर्वीरो धैर्य्यमालम्ब्य तिष्ठति।
॥ वैशम्पायन उवाच ॥ इत्येवमुक्ते वचने वासुदेवः प्रतापवान्। प्रायात्रिकान् वै संभारानाज्ञापयत वीर्य्यवान्। १०२७५
ततश्चन्दनचूर्णैश्च लाजैश्चापि समन्ततः। विनिर्ययौ महाबाहुः कीर्य्यमाणो जनार्द्दनः।
॥ नारद उवाच ॥ स्मरणं वैनतेयस्य कृष्ण त्वं कर्त्तुमर्हसि। न ह्यन्येन तदध्वा वै शक्यो गन्तुं महाभुज।
श्रूयताञ्च तदध्वानं गन्तव्यमतिदुर्ज्जयं। एकादशसहस्राणि योजनानां जनार्द्दन।
तदितः शोणितपुरं प्राद्युम्निर्यत्र साम्प्रतं। मनोजवो महावीर्य्यो वैनतेयः प्रतापवान्।
एकेन स मुहूर्त्तेन बाणं संदर्शयिष्यति। तमाह्वयस्व गोविन्द स हि त्वां तत्र नेष्यति। १०२८०
॥ वैशम्पायन उवाच ॥ तस्य तद्वचनं श्रुत्वा प्राध्यायत् गरुडं हरिः। स कृष्णपार्श्वमागम्य प्राञ्जलिर्गरुडः स्थितः।
प्रणम्याथ वचः प्राह वैनतेयो महाबलः। वासुदेवं महात्मानं श्लक्ष्णं मधुरया गिरा।
॥ गरुड उवाच ॥ पद्मनाभ महाबाहो किमर्थं चिन्तितो ह्यहं। कृत्यं ते यदि तत्रास्ति श्रोतुमिच्छामि तत्त्वतः।
कस्य पक्षपरिक्षेपैर्नाशयामि पुरं विभो। प्रभावात्तव गोविन्द को न विद्यात् बलं मम।
गदावेगश्च ते वीर चक्राग्निश्च महाभुज। नावबुध्यति मूढात्मा को दर्पान्नाशमेष्यति। १०२८५
हलं सिंहमुखं कस्य वनमाली नियोक्ष्यति। कस्य देहं तु निर्भिन्नं मेदिनीं यास्यति प्रभो।
कस्य शार्ङ्गशरैः प्राणान्मोहयिष्यसि माधव। कोऽयं सपरिवारोऽद्य यास्यते यमसादनं।
एवमुक्ते तु वचने वैनतेयेन धीमता। वासुदेवो वचः प्राह शृणुष्व पततां वर।
बलेः पुत्त्रेण बाणेन प्राद्युम्निरपराजितः। ऊषायाः कारणे बद्धो नगरे शोणिताह्वये।
अनिरुद्धस्तु कामार्त्तो बद्धो नागैर्महाविषैः। तस्य मोक्षार्थमाहूतो मया त्वं पतगेश्वर। १०२९०
तव वेगे समो नास्ति पक्षिणाम्प्रवरो भवान्। अशक्यश्च तदध्वानं गन्तुमन्येन वै प्रभो।
तत्र प्रापय शीघ्रं मां यत्र प्राद्युम्निरावसत्। वैदर्भी ते स्नुषा वीर रुदते पुत्त्रगृद्धिनी।
त्वत्प्रसादाद्भवत्येषा पुत्त्रेण सह सङ्गता। अमृतं हि हृतं पूर्व्वं त्वया पन्नगनाशन।
मया सह समागम्य तस्मिन् काले महाभुज। आत्मा मे त्वं ध्वजश्चैव सहायश्च महाबल।
सखित्वं मानयस्वाद्य भक्तिञ्च पतगेश्वर। तव वेगसमो नास्ति पक्षिणाञ्च न ते समः। १०२९५
सुपर्ण सुकृतेन त्वां शपे पन्नगनाशन। दासीभावात्त्वया माता मोक्षिता काकिना पुरा।
पक्षविक्षेपमात्रेण जिता देवास्त्वया रणे। भवान् सुरगणान् सर्व्वान् पृष्ठमारोप्य विक्रमात्।

गच्छ मे स्वागमान् देशान् विजयस्व तवाश्रयात् । गुरुत्वान्मेरुतुल्यस्त्वं लघुत्वात् पवनोपमः ।
भूते भव्ये भविष्ये च न ते तुल्योऽस्ति विक्रमे । सत्यसन्ध महाभाग वैनतेय महाद्युते ।
क्षणमस्यानुरुद्धार्थं साहाय्यमुपकल्पतां । १०४००
॥ गरुड उवाच ॥ अत्यद्भुतमिदं वाक्यं तव कृष्ण महाभुज । त्वत्प्रसादात्तु विजयः सर्व्वत्र मम केशव ।
धन्योऽस्म्यनुगृहीतोऽस्मि संस्तवान्मधुसूदन । श्रीमन्यस्त्वं मया कृष्ण स्तौषि मां त्वं महाभुज ।
वेदाध्यक्षः सुराध्यक्षः सर्व्वकामप्रदो भवान् । अमोघदर्शनस्त्वं हि वरार्थिषु वरप्रदः ।
चतुर्भुजश्चतुर्मूर्त्तिश्चातुर्होत्रप्रवर्त्तकः । चातुराश्रम्यवेत्ता च चतुर्होता महाकविः ।
धनुर्धरश्चक्रधरो भवान् शङ्खधरो महान् । भवान् पूर्व्वेषु देहेषु ख्यातो भूमिधरः प्रभो । १०४०५
लाङ्गली मुषली चक्री देवकीतनयो भवान् । गोवर्द्धनधरश्चैव गोप्रियः कंसहा भवान् ।
चाणूरमथनश्चैव मल्लादिर्मल्लभावनः । मल्लप्रियो महामल्लो महापुरुष इत्यपि ।
विप्रप्रियो विप्रहितो विप्रज्ञो विप्रभावनः । ब्रह्मण्यश्च वरेण्यश्च महान्दामोदरः स्मृतः ।
प्रलम्बमथनश्चैव केशिहा दानवान्तकः । अरिष्टोष्ट्रस्य हन्ता वै तथा रावणनाशनः ।
विभीषणस्य भगवान्राज्यदो बालिनाशनः । सुग्रीवराज्यदाता च बलिराज्यापहारकः । १०४१०
रत्नहर्त्ता महारत्नः समुद्रोदरसम्भवः । वरुणश्च भवान् ख्यातो भवांश्च सरिदुद्भवः ।
भवान् खड्गधरो धन्वी धनुर्द्धरवरो महान् । दाशार्ह इति विख्यातो महाधन्वा धनुःप्रियः ।
गोविन्द इति विख्यातो जलधिस्त्वञ्च सुव्रत । आकाशञ्च तमश्चैव समुद्रमथनो महान् ।
भवान् स्वर्गो बहुफलो भवान् स्वर्गधरो मही । त्वमेव च महामेघो बीजनिष्पत्तिरेव च ।
त्रैलोक्यमथनश्चैव क्रोधलोभमनोरयः । भवान् कामप्रदश्चैव कामः सर्व्वधनुर्द्धरः । १०४१५
संवर्त्तो वर्त्तनश्चैव प्रलयो निलयो महान् । हिरण्यगर्भो भूगर्भो रूपवान् पुरुषोत्तमः ।
ईशस्त्वं च महादेवस्त्वमसङ्ख्यगुणान्वितः । स्तोतुमिच्छसि मां देवस्तोतव्यस्त्वं सनातनः ।
चक्षुषा ये त्वया घोराः प्राणिनश्च निरीक्षिताः । हतास्ते यमदण्डेन तिर्य्यङ्निरयगामिनः
ये त्वया परमप्रीत्या प्राणिनो वै निरीक्षिताः । इह च प्रेत्य ते सर्व्वे सर्व्वथा स्वर्गगामिनः ।
एष तेऽहं महाबाहो वशगः शासने स्थितः । जयशब्दं ततः कृत्वा गरुडः प्राह केशवं । १०४२०
अयमस्मि स्थितो वीर आरुहस्व महाबल । स कृष्णपार्श्वमागम्य हर्षादेव स्थितोऽभवत् ।
प्राह कण्ठे परिष्वज्य माधवो गरुडं ततः । सखे शत्रुविनाशाय अर्घोऽयं प्रतिगृह्यतां ।
दत्वार्घ्यं परया प्रीत्या शङ्खचक्रगदासिभृत् । आरुरोह महाबाहुः सुपर्णं पुरुषोत्तमः ।
कृष्णाकेशश्च बलवान् जिष्णुः कृष्णाश्च सप्रभः । चतुर्द्दंष्ट्रश्चतुर्ब्बाहुश्चतुर्व्वेदः षडङ्गवित् ।
श्रीवत्साङ्कोऽरविन्दाक्ष ऊर्द्धरोमा मृदुत्वचः । समाङ्गुलिः समनखो रक्ताङ्गुलिनखान्तरः । १०४२५
स्निग्धगम्भीरनिर्घोषो वृत्तबाहुर्महाभुजः । आजानुबाहुस्ताम्रास्यः सिंहविस्पष्टविक्रमः ।
सहस्रमिव सूर्य्याणां दीप्यमानः प्रकाशते । यः प्रभुर्भाति भूतात्मा भूतानां भावनः प्रभुः ।

यस्याष्टगुणमैश्वर्य्यं ददौ प्रीतः प्रजापतिः। प्रजापतीनां साध्यानां विद्यानाञ्च शाश्वतः।
स्तूयमानः स्तवैः शुभ्रैः सूतमागधवन्दिभिः। ऋषिभिश्च महाभागैर्व्वेदवेदाङ्गपारगैः।
संविधानमथाज्ञाप्य द्वारकायां महाभुजः। गमनाय मतिञ्चक्रे वासुदेवः प्रतापवान्। १०४३०
आस्थितो गरुडं देवस्तस्य चानु हलायुधः। पृष्ठतोऽपि बलस्याथ प्रद्युम्नः शत्रुकर्षणः।
जय बाणं महाबाहो ये चास्यानुचरा रणे। न हि ते प्रमुखे स्थातुं कश्चिच्छक्तो महामृधे।
प्रसादात्ते भुवा लक्ष्मीर्व्विजयश्च पराक्रमे। विजेष्यसे रणे शत्रून् दैत्येन्द्रं सहसैनिकं।
सिद्धचारणसंघानां महर्षीणाञ्च सर्व्वशः। शृण्वन् वाचोऽम्बरीचश्चाः प्रययौ केशवो रणे।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि ऊनाशीत्यधिकशततोऽध्यायः॥ १७९ ॥
॥ वैशम्पायन उवाच ॥ ततस्तूर्य्यनिनादैश्च शङ्खानाञ्च महास्वनैः। वन्दिमागधसूतानां स्तवैश्चापि सहस्रशः। १०४३५
शत्रून्मुखैर्जयाशीर्भिः स्तूयमानोऽथ मानवैः। बभार रूपं सोमार्कशक्राणां सदृशं तदा।
अतीव शुशुभे रूपं व्योम तस्योत्पतिष्यतः। वैनतेयस्य भद्रं ते बृंहितं हरितेजसा।
अथाष्टबाहुः कृष्णस्तु पर्व्वताकारसन्निभः। विबभौ पुण्डरीकाक्षो त्रिकाङ्कन् बाणसंचयं।
असिचक्रगदाबाणा दक्षिणं पार्श्वमास्थिताः। चर्म्म शार्ङ्गं तथा वज्रं शङ्खश्चैवास्य वामतः।
शीर्षाणान्तु सहस्रञ्च विहितं शार्ङ्गधन्वना। सहस्रञ्चापि कायानां वहन् सङ्कर्षणस्तदा। १०४४०
श्वेतप्रहरणोऽधृष्यः कैलास इव शृङ्गवान्। आस्थितो गरुडं राम उद्यन्निव निशाकरः।
सनत्कुमारस्य वपुः प्रादुरासीन्महात्मनः। प्रद्युम्नस्य महाबाहोः संग्रामे विक्रमिष्यतः।
स पक्षबलविक्षेपैर्व्विधुन्वन् पर्व्वतान् बहून्। जगाम मार्गं बलवान् वातस्य प्रतिषेधयन्।
अथ वायोरतिगतिमास्थाय गरुडस्तदा। सिद्धचारणसंघानां सुखं मार्गमवातरत्।
अथ रामोऽब्रवीद्वाक्यं कृष्णमप्रतिमं रणे। स्वाभिः प्रभाभिर्हीनाः स्म कृष्ण कस्मादपूर्व्ववत्। १०४४५
सर्व्वे कनकवर्णाभाः संवृत्ताः स्म न संशयः। किमिदं ब्रूहि सत्त्वं किं मेरोः पार्श्वगा वयं।
॥ भगवानुवाच ॥ मन्ये बाणस्य नगरमभ्याशस्थमरिन्दम। रक्षार्थं तस्य निर्यातो वह्निरेष स्थितो ज्वलन्।
अग्नेराहवनीयस्य प्रभया स्मः समाहताः। तेन नो वर्णवैरूप्यमिदं जातं हलायुध।
॥ राम उवाच ॥ यदि स्मः सन्निकर्षस्था यदि निष्प्रभतां गताः। तद्विधत्स्व स्वयं बुद्ध्या यदत्रानन्तरं हितं।
॥ कृष्ण उवाच ॥ कुरुष्व वैनतेय त्वं यदत्र कार्य्यमनन्तरं। त्वया विधाने विहिते करिष्याम्यहमुत्तरं। १०४५०
॥ वैशम्पायन उवाच ॥ एतत् श्रुत्वा तु गरुडो वासुदेवस्य भाषितं। चक्रे मुखसहस्रं हि कामरूपी महाबलः।
गङ्गामुपागमत्तूर्णं वैनतेयस्ततो बली। आप्लुत्याकाशगङ्गायामापीय सलिलं बहु।
प्रववर्षोपरि गतो वैनतेयः प्रतापवान्। तेनाग्निं शमयामास बुद्धिमान् विनतात्मजः।
अग्निराहवनीयस्तु ततः शान्तिमुपागमत्। तं दृष्ट्वाहवनीयन्तु शान्तमाकाशगङ्गया।
परमं विस्मयं गत्वा सुपर्णो वाक्यमब्रवीत्। अहो वीर्य्यमथाग्नेस्तु योऽदहद्युगसंचये। १०४५५
तदेव वर्णवैरूप्यं चक्रे कृष्णस्य धीमतः। त्रयस्त्रयाणां लोकानां पर्य्याप्ता इति मे मतिः।

कृष्णः सङ्कर्षणश्चैव प्रद्युम्नश्च महाबलः। ततः प्रशान्ते दहने संप्रतस्थे स पक्षिराट्।
स पक्षबलविक्षेपैः कुर्वन् घोरं महास्वनं। तान्दृष्ट्वा चिन्तयंस्तत्र रुद्रस्यानुचराग्नयः।
आस्थिता गरुडं ह्येते नानारूपा भयावहाः। किमर्थमिह सम्प्राप्ताः के वापीमे नराग्नयः।
निश्चयं नाध्यगच्छन्त ते गिरिव्रजवह्नयः। प्रावर्त्तयंश्च संग्रामं तैस्त्रिभिः सह यादवैः। १०४६०
तेषां युद्धे प्रसक्तानां सन्नादः सुमहानभूत्। तच्च श्रुत्वा महानादं सिंहानामिव गर्ज्जतां।
अथाङ्गिराः स्वपुरुषं प्रेषयामास बुद्धिमान्। यत्र तद्वर्त्तते युद्धं तत्र गच्छस्व माचिरं।
अथाश्वसस्तु वाणेन पुरुषोऽतिमनोजवः। दृष्ट्वा तत् सर्व्वमागच्छ इत्युक्तः प्रास्थितस्त्वरन्।
तथेत्युक्त्वा स तद्युद्धं वर्त्तमानमुदैक्षत। अग्नीनां वासुदेवेन संसक्तानां महामृधे।
ते जातवेदसः सर्व्वे कल्माषः कुसुमस्तथा। दहनः शोषणश्चैव तपनश्च महाबलः। १०४६५
स्वाहाकारस्य विषये प्रख्याताः पञ्च वह्नयः। अथापरे महाभागाः स्वैरनीकैर्व्यवस्थिताः।
पिठरः पतगः स्वर्णस्तथागाधो भ्राज एव च। स्वधाकाराश्रयाः पञ्च प्रायुद्ध्यंस्तेऽपि चाग्नयः।
ज्योतिष्टोमविभागौ च वषट्काराश्रयौ पुनः। तावग्नी संप्रयुध्येते महात्मानौ महाद्युती।
आग्नेयं रथमास्थाय शूलमुद्यम्य भास्वरं। तयोर्मध्येऽङ्गिराश्चैव महर्षिर्व्विबभौ रणे।
स्थितमङ्गिरसं दृष्ट्वा विमुञ्चन्तं शिताञ्छरान्। कृष्णः प्रोवाच संक्रुद्धः स्मयन्निव पुनः पुनः। १०४७०
तिष्ठध्वमग्नयः सर्व्वे एष वो विदधे भयं। ममास्त्रतेजसा दग्धा दिशो यास्यथ विद्रुताः।
अथाङ्गिरास्त्रिशूलेन दीप्तेन समधावत। आददान इव क्रोधात् कृष्णप्राणान्महामृधे।
त्रिशूलं तस्य तद्दीप्तं चिच्छेद परमेषुभिः। अर्द्धचन्द्रेण तथा तीक्ष्णैर्धर्मात्मा दहनप्रभैः।
स्थूणाकर्णेन वाणेन दीप्तेन स महायशाः। विव्याधान्तकतुल्येन वक्षस्यङ्गिरसन्ततः।
रुधिरौघप्लुताङ्गो वैरङ्गिरा विक्लवन्निव। विह्वलगात्रः सहसा पपात धरणीतले। १०४७५
शेषाग्नयस्ततः सर्व्वे चत्वारो ब्रह्मणः सुताः। अवाद्रवंस्ततः शीघ्रं वाणस्य पुरमन्तिकात्।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि अग्निजये अशीत्यधिकशततोऽध्यायः॥ १८० ॥
॥ वैशम्पायन उवाच ॥ अथ वाणपुरं दृष्ट्वा कृष्णं प्रोवाच नारदः। एतत्तच्छोणितपुरं कृष्ण पश्य महाभुज।
अत्र रुद्रो महातेजा रुद्राण्या सहितोऽवसत्। गुहश्च वाणगुप्त्यर्थं सततं क्षेमकारणात्।
नारदस्य वचः श्रुत्वा कृष्णस्त्विदमथाब्रवीत्। क्षेमं न विन्द्यतामत्र श्रूयताञ्च महामुने।
यदि चावतरेद्रुद्रो वाणसंरक्षणम्प्रति। शङ्कितो वयमप्यत्र सह यातव्यामि तेन वै। १०४८०
एवं विवदतोस्तत्र कृष्णनारदयोस्तदा। प्राप्ता निमेषमात्रेण शीघ्रलाद्गरुडस्य ते।
ततः शङ्खं समाधाय वदने पुष्करेक्षणः। वातवेगेन तं दध्मौ मेघवृन्दमिवोद्गिरन्।
ततः प्रध्माप्य तं शङ्खं भयमुत्पाद्य वीर्य्यवान्। प्रविवेश पुरं कृष्णो वाणस्याद्भुतकर्म्मणः।
ततः शङ्खप्रणादैश्च भेरीणाञ्च महास्वनैः। वाणानीकानि सहसा समनह्यन्त सर्व्वशः।
ततः किङ्करसैन्यं तद्व्यादिष्टं समरेऽभ्ययात्। कोटिशश्चापि बहुशो दीप्तप्रहरणोद्यतं। १०४८५

तदसङ्ख्येयमेकस्थं महाभ्रघनसन्निभं। नीलाञ्जनचयप्रख्यमप्रमेयमथाक्षयं।
ते प्रदीप्तप्रहरणा दैत्यदानवराक्षसाः। प्रमाथगणमुख्याश्च प्रायुध्यन् कृष्णमव्ययं।
सर्व्वतस्तैः प्रदीप्तास्त्रै रोचिष्मद्भिरिवाग्निभिः। अभ्युपेत्य तदा तूर्णं यक्षराक्षसदानवैः।
पीयते रुधिरं तेषां चतुर्णामपि संयुगे। तद्बलन्तु समासाद्य बलभद्रो महाबलः।
प्रोवाच वचनं तत्र परस्य बलनाशनः। कृष्ण कृष्ण महाबाहो विधत्स्वैषां महाभयं। १०८९०
इति सञ्चोदितः कृष्णो बलभद्रेण धीमता। तेषां बधार्थमाग्नेयं जग्राह पुरुषोत्तमः।
अस्त्रमस्त्रविदां श्रेष्ठो यमान्तकसमप्रभः। प्रविधूयासुरगणान् क्रव्यादास्त्रेण तेजसा।
प्रयतो त्वरया युक्तो यत्रादृश्यत तद्बलं। शूलपट्टिशशक्त्यृष्टिपिनाकपरिघायुधं।
प्रमाथगणभूयिष्ठं बलन्तदभवत् क्षितौ। शैलमेघप्रतीकाशैर्नानारूपैर्भयावहैः।
वाहनैः संघशः सर्व्वे योधास्तत्रावतस्थिरे। वातोद्धूतैरिव घनैर्व्विप्रकीर्णैरिवाचलैः। १०८९५
शुशुभे तत्र बहुलैरनीकैर्व्वज्रधन्विभिः। कुलिशैः पट्टिशैः शूलैर्गदाभिर्मुषलैस्तथा।
आधावत्तदसङ्ख्येयं शुशुभे सर्व्वतो बलं। वैनतेयगतो रामस्तान्दृष्ट्वा कृष्णमब्रवीत्।
कृष्ण कृष्ण महाबाहो यदेतद्दृश्यते बलं। एतैः सह रणे योद्धुमिच्छामि पुरुषोत्तम।
|| कृष्ण उवाच || ममाप्येषैव संजाता बुद्धिरित्यब्रवीत् स तं। एभिः सह रणे योद्धुमिच्छेयं योधसत्तमैः।
युध्यतः प्राङ्मुखस्यास्तु सुपर्णो वै ममाग्रतः। सव्ये पार्श्वे च प्रद्युम्नस्तथा मे दक्षिणे भवान्। १०९००
रक्षितव्यमथान्योन्यमस्मिन् घोरे महामृधे।
|| वैशम्पायन उवाच || एवं ब्रुवन्तस्ते न्योऽन्यमधिरूढाः खगोत्तमं। गिरिशृङ्गनिभैर्युद्धे गदामुषललाङ्गलैः।
युध्यतो रौहिणेयस्य रौद्रं रूपमभूत्तदा। युगान्ते सर्व्वभूतानि कालस्येव दिधक्षतः।
आकृष्य लाङ्गलाग्रेण मुषलेनावपोथयत्। चरत्यतिबलो रामो युद्धमार्गविशारदः।
प्रद्युम्नः शरजालैस्तान् समन्तात् पर्य्यवारयत्। दानवान् पुरुषव्याघ्रो युध्यमानान्महाबलः। १०९०५
स्निग्धाञ्जनचयप्रख्यः शङ्खचक्रगदाधरः। प्रध्माप्य बहुशः शङ्खमयुध्यत जनार्द्दनः।
पक्षप्रहाराभिहतान् तुण्डाग्रनखविक्षताः। नीता वैवस्वतमुखं वैनतेयेन धीमता।
तैर्हन्यमानं दैत्यानामनीकं भीमविक्रमं। अभज्यत तदा सङ्ख्ये बाणवर्षसमाहतं।
भज्यमानेष्वनीकेषु चातुकामः समभ्ययात्। ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः।
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः। नदन्मेघसहस्रस्य तुल्यो निर्घातनिस्वनः। १०९१०
निश्वसन् जृम्भमाणश्च निद्रान्विततनुर्भृशं। नेत्राभ्यामाकुलं वक्त्रं मुहुः कुर्व्वन् भ्रमन्मुहुः।
संहृष्टरोमा ग्लानाक्षः छिन्नचित्त इव श्वसन्। हलायुधमभिक्रुद्धः साक्षेपमिदमब्रवीत्।
किमेवं बलमत्तोऽसि न मां पश्यसि संयुगे। तिष्ठ तिष्ठ न मे जीवन् मोक्ष्यसे रणमूर्द्धनि।
इत्येवमुक्त्वा प्रहसन् हलायुधमुपाद्रवत्। युगान्ताग्निनिभैर्घोरैर्मुष्टिभिर्जनयन् भयं।
चरतस्तत्र संग्रामे मण्डलानि सहस्रशः। रौहिणेयस्य शैघ्र्येण न च स्थानमदृश्यत। १०९१५

तस्य भस्म तदाक्षिप्तं ज्वरेणाप्रतिमौजसा । शैक्ष्यात् ब्रह्मोनिपतितं शरीरे पर्व्वतोपमे ।
तद्भस्म वचमस्तस्य मेरोः शिखरमागमत् । प्रदीप्तं पतितं तत्र गिरिशृङ्गं व्यदारयत् ।
शेषेण चापि जज्वाल भस्मना कृष्णपूर्व्वजः । निश्वसन् जृम्भमाणश्च निद्राश्वितनुर्भृशं ।
नेत्रयोराकुलत्वञ्च मुहुः कुर्व्वन् भ्रमंस्तथा । संहृष्टरोमा स्वानाचः चिन्नचित्त इव श्वसन् ।
ततो हलायुधो मग्नः कृष्णमाह विचेतनः । कृष्ण कृष्ण महाबाहो प्रदीप्तोऽस्म्यभयङ्कर । १०५२०
दह्यामि सर्व्वशस्तात कथं शान्तिर्भवेन्मम । इत्येवमुक्ते वचने बलेनामिततेजसा ।
प्रहस्य वचनं प्राह कृष्णः प्रहरताम्वरः । न भेतव्यमितीत्युक्त्वा परिष्वक्तो हलायुधः ।
कृष्णेन परमस्नेहात्ततो दाहाद्व्यमुच्यत । मोचयित्वा बलं तत्र दाहात्तु मधुसूदनः ।
प्रोवाच परमक्रुद्धो वासुदेवो ज्वरं ततः ।
॥ भगवानुवाच ॥ एह्येहि ज्वर युध्यस्व या ते शक्तिर्महाम्मृधे । यच्च ते पौरुषं सर्व्वं तद्दर्शय यतस्व च । १०५२५
सव्येतराभ्यां पाणिभ्यामेवमुक्त्वा ज्वरस्तदा । चिक्षेपैवं भस्मद्भस्म ज्वालागर्भं महाबलः ।
ततः प्रदीप्तगात्रस्तु मुहूर्त्तमभवत् प्रभुः । कृष्णः प्रहरतां श्रेष्ठः शमञ्चाग्निर्गतस्तदा ।
ततस्तैर्भुजगाद्धारैर्बाहुभिः प्रोच्छ्रितैस्तदा । जघान कृष्णं ग्रीवायां मुष्टिनैकेन चोरसि ।
स संप्रहारस्तुमुलस्तयोः पुरुषसिंहयोः । ज्वरस्यतु महायुद्धे कृष्णस्य च महौजसः ।
पर्व्वतेषु पतन्तीनामशनीनामिव स्वनः । कृष्णज्वरभुजाघातैर्युद्धे तस्मिन् सुदारुणे । १०५३०
नैवमेवं प्रहर्त्तव्यमिति तत्र महात्मनः । मुहूर्त्तमभवद्युद्धमन्योऽन्यं सुमहात्मनोः ।
ततो ज्वरं कनकविचित्रभूषणं न्यपीडयद्भुजयुगलेन संयुगे । जगत्त्रयं क्षमुपनयन् जगत्पतिः शरीरदृग्गगनचरो महाम्मृधे ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि विष्णुज्वरयुद्धे एकाशीत्यधिकशततोऽध्यायः ॥ १८१ ॥
॥ वैशम्पायन उवाच ॥ मृत इत्यभिविज्ञाय ज्वरं शत्रुनिसूदनः । कृष्णो भुजबलात्तन्तु चिक्षेपाथ महीतले ।
भुक्तमात्रस्तु बाहुभ्यां कृष्णदेहं विवेश सः । अमुक्ता विग्रहस्तस्य कृष्णस्याप्रतिमौजसः ।
सत्या विष्टस्तदा तेन ज्वरेणाप्रतिमौजसा । कृष्णः स्खलन्निव मुहुः क्षितौ गाढं व्यवर्त्तत । १०५३५
जृम्भते श्वसते चैव स्खलते च पुनः पुनः । रोमाञ्चोत्थितगात्रस्तु निद्रया चाभिभूयते ।
ततः स्थैर्य्यं समालम्ब्य कृष्णः परपुरञ्जयः । विकुर्व्वते महायोगी जृम्भमाणः पुनः पुनः ।
ज्वराभिभूतमात्मानं विज्ञाय पुरुषोत्तमः । सोऽसृजज्ज्वरमन्यं तु पूर्व्वज्वरविनाशनं ।
घोरं वैष्णवमत्युग्रं सर्व्वप्राणिभयङ्करं । स सृष्टवांस्तु तेजस्वी बलवान् भीमविक्रमः ।
कृष्णज्वरो ज्वरं पूर्व्वं गृहीत्वा स्वेन तेजसा । कृष्णाय हृष्टः प्रायच्छत्तं जग्राह ततो हरिः । १०५४०
ततस्तं परमक्रुद्धो वासुदेवो महाबलः । स्वगात्रात् स्वज्वरेणैव निष्क्रामयत वीर्य्यवान् ।
आविध्य भूतले चैनं शतधा कर्त्तुमुद्यतः । व्याघोषयज्ज्वरस्तत्र भोः परित्रातुमर्हसि ।
आविध्यमाने तस्मिंस्तु कृष्णेनामिततेजसा । अशरीरा ततो वाणी तमुवाचान्तरीक्षगा ।
कृष्ण कृष्ण महाबाहो यदूनां नन्दिवर्द्धन । मावधीर्ज्वरमेतं तु रक्षणीयस्त्वयाऽनघ ।

इत्येवमुक्ते वचने तं मुमोच हरिः स्वयं । भूतभव्यभविष्यस्य जगतः परमो गुरुः । १०५४५
कृष्णस्य पादयोर्मूर्द्ध्ना शरणं स गतो ज्वरः । प्रणम्य च हृषीकेशं ज्वरो वाक्यमथाब्रवीत् ।
शृणुष्व मम गोविन्द विज्ञाप्यं यदुनन्दन । यो मे मनोरथो देव तं त्वं कुरु महाभुज ।
अहमेको ज्वरस्तात नान्यो लोके ज्वरो भवेत् । त्वत्प्रसादाद्धि देवेश वरमेतं वृणोम्यहं ।
॥ देव उवाच ॥ एवम्भवतु भद्रं ते यथा त्वं ज्वर काङ्क्षसे । वरार्थिनां वरो देयो भवांश्च शरणागतः ।
एक एव ज्वरो लोके भवानस्तु यथा पुरा । योऽयं मया ज्वरः सृष्टो मय्येवैव प्रलीयतां । १०५५०
॥ वैशम्पायन उवाच ॥ एवमुक्ते तु वचने ज्वरं प्रति महायशाः । कृष्णः प्रहरतां श्रेष्ठः पुनर्व्वाक्यमुवाच ह ।
॥ कृष्ण उवाच ॥ शृणुष्व ज्वर सन्देशं यथा लोके चरिष्यसि । सर्व्वजातिषु विन्यस्तस्तथा स्थावरजङ्गमे ।
त्रिधा विभज्य चात्मानं मत्प्रियं यदि काङ्क्षसे । चतुष्पदान् भजैकेन द्वितीयेन च स्थावरान् ।
तृतीयो यस्तु ते भागो मानुषेषूपपत्स्यते । त्रिधा भूतं वपुः कृत्वा पक्षिषु त्वं भव ज्वर ।
चतुर्थो यस्तृतीयस्य भविष्यति च ते ध्रुवं । एकान्ततश्चतुर्भागः खोरकश्च चतुर्थकः । १०५५५
मानुषेष्वेकपादेन वस त्वं प्रविभज्य वै । जातिष्वथावशेषासु निवस त्वं शृणुष्व मे ।
वृक्षेषु कीटरूपेण तथा सङ्कोचपत्रकः । पाण्डुपत्रश्च विख्यातः फलेष्वातुर्य्यमेव च ।
पद्मिनीषु हिमो भूत्वा पृथिव्यामपि चोषरः । अपान्तु नीलिकां विद्यात् शिखोद्भेदश्च बर्हिणां ।
गैरिकः पर्व्वतेष्वेव मत्प्रसादाद्भविष्यसि । गोष्वपस्मारको भूत्वा खोरकश्च भविष्यसि ।
एवं विविधरूपेण भविष्यसि महीतले । दर्शनात् स्पर्शनाच्चैव प्राणिनां वधमेष्यसि । १०५६०
ऋते देवमनुष्यांस्तु नान्यस्त्वां विषहिष्यति ।
॥ वैशम्पायन उवाच ॥ कृष्णस्य वचनं श्रुत्वा ज्वरो हृष्टमना ह्यभूत् । प्रोवाच किञ्चिद्वचनं प्रणतात्मा कृताञ्जलिः ।
॥ ज्वर उवाच ॥ सर्व्वजातिप्रभुत्वेन कृतो धन्योऽस्मि माधव । भूयश्च ते वचः कर्त्तुमिच्छामि पुरुषर्षभ ।
तदाज्ञापय गोविन्द किं करोमि महाभुज ।
अहमसुरकुलप्रमाथिना त्रिपुरहरेण हरेण निर्म्मितः । रणशिरसि विनिर्ज्जितस्त्वया प्रभुरसि मेऽद्य तवास्मि किङ्करः । १०५६५
॥ वैशम्पायन उवाच ॥ ज्वरस्य वचनं श्रुत्वा वासुदेवोऽब्रवीद्वचः । अभिमर्षिं शृणुष्वाद्य यत्त्वां वक्ष्यामि निश्चयात् ।
॥ ज्वर उवाच ॥ धन्योऽस्म्यनुगृहीतोऽस्मि यत्त्वया मत्प्रियं कृतं । आज्ञापय प्रियं किन्ते चक्रायुध करोम्यहं ।
॥ कृष्ण उवाच ॥ महामृधे तव मम च द्वयोरिमं पराक्रमं भुजबलकेवलास्त्रयोः । प्रणम्य मामेकमनाः पठेत्तु यः स वै भवेज्ज्वर विगतज्वरो नरः ।
॥ वैशम्पायन उवाच ॥ एवमुक्तस्तु कृष्णेन ज्वरः माहात्म्यमहाबलः । प्रोवाच यदुशार्दूलमेवमेतद्भविष्यति । १०५७०
वरं लब्ध्वा ज्वरो हृष्टः कृष्णाच्च समयं पुनः । प्रणम्य शिरसा कृष्णमपक्रान्तस्ततो रणात् ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वाणयुद्धे ज्वरापक्रमे द्व्यशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥
॥ वैशम्पायन उवाच ॥ ततस्ते त्वरिताः सर्व्वे त्रयस्त्रय इवाग्नयः । वैनतेयमथारुह्य युध्यन्ते रणमूर्द्धनि ।
ततः सर्व्वाण्यनीकानि वाणवर्षैरवाकिरन् । अर्द्दयन्तो गरुत्मन्त्या मदन्तोऽतिबला रणे ।

चक्रलाङ्गलपातैश्च बाणवर्षैश्च पीडितं । सञ्चुकोप महानीकं दानवानां महात्मनां ।
कक्षेऽग्निरिव संदृप्तः शुष्केन्धनसमीरितः । कृष्णबाणाग्निरहुतो विवृद्धिं परमां गतः । १०५७५
दानवानां सहस्राणि तस्मिन् समरमूर्द्धनि । युगान्ताग्निरिवार्च्चिष्मान्दहमानो व्यराजत ।
तां दीप्यमानां महतीं नानाप्रहरणान्वितां । सेनां बाणः समासाद्य वारयन् वाक्यमब्रवीत् ।
लाघवं समुपागम्य किमेवं भयविक्लवाः । दैत्यवंशे समुत्पन्नाः पलायध्वं महाहवात् ।
कवचासिगदाप्रासखड्गचर्म्मपरश्वधान् । उत्सृज्योत्सृज्य गच्छन्ति भवन्तोऽन्तरीक्षगाः ।
स्वजातिञ्चैव भावञ्च हरसंसर्गमेव च । मानयद्भिर्न गन्तव्यमेषोऽहमवस्थितः । १०५८०
एवमुच्चारितां वाचं शृण्वन्तस्तामचिन्तयन् । आपक्रामन्त ते सर्व्वे दानवा भयमोहिताः ।
प्रमथगणशेषं तु तदनीकमतिष्ठत । भग्नावशेषं युद्धाय पुनश्चक्रे मनस्तदा ।
कुम्भाण्डो नाम बाणस्य सखाऽमात्यश्च वीर्य्यवान् । भग्नं बलं समालोक्य वचश्चेदमथाब्रवीत् ।
एष बाणः स्थितो युद्धे शङ्करोऽयं गुहस्तथा । किमर्थं बलमुत्सृज्य भवन्तो यान्ति मोहिताः ।
प्राणांस्त्यक्त्वा च युध्यध्वं सर्व्वे दानवपुङ्गवाः । एवं कुम्भाण्डवाक्यं ते शृण्वन्तो भयमोहिताः । १०५८५
चक्राग्निभयसंविग्नाः सर्व्वे यान्ति दिशो दश । भग्नं बलं ततो दृष्ट्वा कृष्णेनामिततेजसा ।
संरक्तनयनः स्थाणुर्युद्धाय पर्य्यवर्त्तत । बाणसंरक्षणे कर्त्तुं रथमास्थाय सुप्रभं ।
देवः कुमारश्च तथा रथेनाग्निनिभेन वै । नन्दीश्वरसमायुक्तं रथमास्थाय वीर्य्यवान् ।
सन्दष्टोष्ठपुटो रुद्रः प्राधावत यतो हरिः । पिबन्निव तदाकाशं सिंहयुक्तो महास्वनः ।
रथो भाति घनोन्मुक्तः पौर्णमास्यां यथा शशी । ततो गणसहस्रैस्तु नानारूपैर्भयावहैः । १०५९०
नदद्भिर्व्विविधान्नादांस्तथो देवस्य सोऽभ्ययात् । केचित् सिंहमुखास्तत्र तथा व्याघ्रमुखाश्च ह ।
नागाश्वोष्ट्रमुखास्तत्र प्रावेपन्नभिपीडिताः । व्यालयज्ञोपवीताश्च केचित्तत्र महाबलाः ।
खरोष्ट्रगजवक्त्राश्च अश्वग्रीवाश्च संस्थिताः । छागगोमायुमार्ज्जारमेषवक्त्रास्तथापरे ।
चीरिणः शिखिनश्चान्ये जटालोर्द्धशिरोरुहाः । नग्नाः परिपतन्ति स्म शङ्खदुन्दुभिनिस्वनैः ।
केचित् सौम्यमुखास्तत्र दिव्यैरत्नैरलङ्कृताः । नानापुष्पकृतापीडा नानाप्रहरणायुधाः । १०५९५
वामना विकटाश्चैव सिंहव्याघ्रपरिच्छदाः । रुधिरार्द्रमहादंष्ट्रा महामांसबलिप्रियाः ।
देवं संपरिवार्य्याथ महाशत्रुप्रमर्द्दनं । लीलायमानास्तिष्ठन्ति संग्रामाभिमुखोन्मुखाः ।
ततो दिव्यरथं दृष्ट्वा रुद्रस्याक्लिष्टकर्म्मणः । कृष्णो गरुडमास्थाय ययौ रुद्राय संयुगे ।
वैनतेयस्य मस्यन्तमायान्तं चाग्रणीर्हरः । हरिं विव्याध कुपितो नाराचानां शतेन च ।
स शरैर्हृदि तस्तेन हरेणामित्रकर्षिणा । हरिर्जग्राह कुपितो शङ्खं पाञ्चजन्यमुत्तमं । १०६००
प्रचचाल ततो भूमिर्व्विष्णुरुद्रप्रपीडिता । नागाश्चोर्द्धमुखास्तत्र विचेलुरभिपीडिताः ।
पर्व्वताः प्रस्नुतास्तत्र जलधाराभिराप्लुताः । केचिन्मुमुचिरे तत्र शिखराणि समन्ततः ।
दिशश्च विदिशश्चैव भूमिराकाशमेव च । प्रदीप्तानीव दृश्यन्ते स्थाणुकृष्णसमागमे ।

समन्ततश्च निर्घाताः पतन्ति धरणीतले । शिवाश्चैवाशिवान्नादान्नदन्ते भीमदर्शनाः ।
वासवश्चानदद्घोरं रुधिरञ्चाभ्यवर्षत । उल्का च वाणसैन्यस्य मुखान्याहत्य तिष्ठति । १०५०५
न ववौ मारुतश्चापि ज्योतींष्याकुलतामियुः । प्रभाहीनास्तथौषध्यो न चरन्त्यन्तरीक्षगाः ।
एतस्मिन्नन्तरे ब्रह्मा सर्व्वैर्देवगणैर्वृतः । त्रिपुरान्तकयुद्धन्तं ज्ञात्वा रुद्रमथागमत् ।
गन्धर्व्वाप्सरसश्चैव यक्षविद्याधरास्तथा । सिद्धचारणसंघाश्च पश्यन्तोऽथ दिवि स्थिताः ।
ततः पार्ज्जन्यमस्त्रं तु क्षिप्तं रुद्राय विष्णुना । ययौ ज्वलद्य तदा यत्र रुद्रो रथे स्थितः ।
ततः शतसहस्राणि शराणां नतपर्व्वणां । निपेतुः सर्व्वतो दिग्भ्यो यतो हररथः स्थितः । १०५१०
अथाग्नेयं महारौद्रमस्त्रमस्त्रविदाम्वरः । मुमोच रुषितो रुद्रस्तदद्भुतमिवाभवत् ।
ततो विस्तीर्णदेहास्ते चत्वारोऽपि समन्ततः । नादृश्यन्त शरैरुद्धा दह्यमानाः शराग्निना ।
सिंहनादं ततश्चक्रुः सर्व्व एवासुरोत्तमाः । हतोऽयमिति विज्ञाय ह्याग्नेयास्त्रेण तं तदा ।
ततस्तत्तु विपद्यात्मावस्त्रमस्त्रविदाम्वरः । जग्राह वारुणं सोऽस्त्रं वासुदेवः प्रतापवान् ।
मुक्ते तु वासुदेवेन वारुणास्त्रे महात्मना । आग्नेयं प्रशमं यातं वारुणास्त्रस्य तेजसा । १०५१५
तस्मिन् प्रतिहते ह्यस्त्रे वासुदेवेन संयुगे । पैशाचं राक्षसं रौद्रं तथैवाङ्गिरसं भवः ।
मुमोचास्त्राणि चत्वारि युगान्ताग्निनिभानि वै । वायव्यमथ सावित्रं वासवं मोहनन्तथा ।
अस्त्राणां वारणार्थाय वासुदेवो मुमोच ह । अस्त्रैश्चतुर्भिश्चत्वारि वारयित्वा महाबलः ।
जग्राह वैष्णवं सोऽस्त्रं व्यादितास्यान्तकोपमं । वैष्णवास्त्रे प्रमुक्ते तु सर्व्व एवासुरोत्तमाः ।
भूतयक्षगणाः सर्व्वे वाणानीकश्च सर्व्वशः । दिशः प्रदुद्रुवुः सर्व्वे भयमोहितलोचनाः । १०५२०
प्रमाथगणभूयिष्ठे सैन्ये दीर्णे महासुरः । निर्जगाम ततो वाणो युद्धायाभिमुखस्त्वरन् ।
भीमप्रहरणैर्घोरैर्दैत्येन्द्रैः सुमहाबलैः । वृतो महारथैर्वीरैर्वज्रीव सुरसत्तमैः ।
॥ वैशम्पायन उवाच ॥ जप्यैश्च मन्त्रैश्च महौषधीभिर्महात्मनः स्वस्त्ययनं प्रचक्रुः । स तत्र वस्त्राणि शुभाश्च गा वै फलानि
पुष्पाणि तथैव निष्कान् ।
दैत्याधिपो ब्राह्मणसत्तमेभ्यो ददौ धनान्याशु यथा धनेशः । सहस्रसूर्य्यो बहुकिङ्किणीकः पराद्ध्यजाम्बूनदहेमचित्रः ।
सहस्रचन्द्रोऽयुततारकश्च रथो महानग्निरिव प्रभाति । समास्थितो दानवसंघजुष्टं महाभुजः कार्मुकधृक् स वाणः । १०५२५
उदर्त्तयिष्यन्यदुपुङ्गवानामतीव रौद्रं स बिभर्त्ति रूपं । स वेगवान् वीररथौघसङ्कुलो विनिर्ययौ तान् प्रति दैत्यसागरः ।
वातप्रविध्वस्ततरङ्गसङ्कुलो यथाऽर्णवो लोकविनाशनाय । भीमानि संत्रासकरैर्व्वपुर्भिस्तान्यग्रतो भान्ति बलानि तस्य ।
महारथान्युच्छ्रितकार्मुकाणि सपर्व्वतानीव वनानि राजन् ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वाणयुद्धे त्र्यशीत्यधिकशततोऽध्यायः ॥ १८३ ॥
॥ वैशम्पायन उवाच ॥ अन्धकारीकृते लोके प्रदीप्तत्र्यम्बके तदा । स नन्दी नापि च रथो न रुद्रः प्रत्यदृश्यत ।
द्विगुणं दीप्तदेहस्तु तेजसा च बलेन च । त्रिपुरान्तकरं वाणं जग्राह स चतुर्मुखं । १०५३०
संदधे कार्मुके चैव सेतुकामस्त्रिलोचनः । विज्ञातो वासुदेवेन चित्तज्ञेन महात्मना ।

जृम्भणं नाम सोऽप्यस्त्रं जग्राह पुरुषोत्तमः । हरं स जृम्भयामास क्षिप्रकारी महाबलः ।
सशरः सधनुश्चैव हरस्तेनास्त्रजृम्भितः । संज्ञां न लेभे भगवान् विजेतासुररक्षसां ।
बलोन्मत्तोऽथ बाणोऽसौ शर्व्वश्चोद्यतोऽभवत् । सृष्टिमन्यां सृजस्वेति तदा दर्पविवृद्धये ।
शक्तिमन्यां सृजन्नेव तदा दर्पविवृद्धये । सशरं सधनुष्कञ्च दृष्ट्वात्मानं विजृम्भितं । १०६३५
ततो नदन् स भूतात्मा सिंहगम्भीरनिस्वनः । प्रध्मापयामास तदा कृष्णः शङ्खं महाबलः ।
पाञ्चजन्यस्य घोषेण शार्ङ्गविस्फूर्ज्जितेन च । देवं विजृम्भितं दृष्ट्वा सर्व्वभूतानि तत्रसुः ।
एतस्मिन्नन्तरे तत्र रुद्रपारिषदा रणे । मायायुद्धं समाश्रित्य प्रद्युम्नं पर्य्यवारयन् ।
सर्व्वांस्तु निद्रावशगान् कृत्वा मकरकेतुमान् । दानवान्नाशयंस्तत्र शरजालेन वीर्य्यवान् ।
प्रमाथगणभूयिष्ठं तत्र तत्र महाबलः । ततस्तु जृम्भमाणस्य देवस्याक्लिष्टकर्म्मणः । १०६४०
ज्वाला प्रादुरभूद्वक्त्राद्दहन्तीव दिशो दश । ततस्तु धरणी देवी पीड्यमाना महात्मभिः ।
ब्रह्माणं परमोदारं वेपमानाभ्युपागमत् ।
॥ पृथिव्युवाच ॥ देवदेव महाबाहो पीड्येम परमौजसा कृष्णरुद्रभराक्रान्ता भविष्येकार्णवा पुनः ।
अविषह्यमिमं भारं चिन्तयस्व पितामह । लघ्वीभूता यथा देव धारयेयं चराचरं ।
ततस्तु काश्यपीं देवीं प्रत्युवाच पितामहः । मुहूर्त्तं धारयात्मानमाशु लघ्वी भविष्यसि । १०६४५
॥ वैशम्पायन उवाच ॥ दृष्ट्वा तु भगवान् ब्रह्मा रुद्रं वचनमब्रवीत् । सृष्टो महासुरवधः किं भूयः परिरक्ष्यते ।
न च युद्धं महाबाहो तव कृष्णेन युज्यते । न च युध्यसि कृष्णं त्वमात्मानं हि द्विधाकृतं ।
ततः शरीरयोगाद्धि भगवानव्ययः प्रभुः । प्रविश्य पश्यते कृत्स्नांस्त्रीँल्लोकान् सचराचरान् ।
सशरं सधनुष्कञ्च दृष्ट्वात्मानं विजृम्भितं । प्रविश्य योगं योगात्मा वरांस्ताननुचिन्तयन् ।
द्वारवत्यां यदुक्तं तु तदनुस्मृत्य सर्व्वगः । अगाद नान्तरं किञ्चिन्निवृत्तो ह्यभवत्तदा । १०६५०
आत्मानं कृष्णदेहस्थं पश्यति स्मैकयोनिजं । ततो निःसृत्य कृष्णस्य न्यस्तवादोऽभवन्मृधे ।
ब्रह्माणञ्चाब्रवीद्रुद्रो न योत्स्ये भगवन्निति । कृष्णेन सह संग्रामे लघ्वी भवतु मेदिनी ।
ततः कृष्णोऽथ रुद्रश्च परिष्वज्य परस्परं । परां प्रीतिमुपागम्य संग्रामादपजग्मतुः ।
न च तौ पश्यते कश्चिद्योगिनौ योगमागतौ । एको ब्रह्मा तथा कृत्वा पश्यल्लोकपितामहः ।
दृष्ट्वा तदद्भुतं ब्रह्मा मार्कण्डेयं महामुनिं । पार्श्वस्थं परिपप्रच्छ ज्ञात्वा वै दीर्घदर्शिनं । १०६५५
॥ पितामह उवाच ॥ मन्दरस्य गिरेः पार्श्वे नलिन्यां भवकेशवौ । रात्रौ स्वप्नान्तरे ब्रह्मन् मया दृष्टौ हराच्युतौ ।
हरिश्च हररूपेण हरश्च हरिरूपिणं । शङ्खचक्रगदापाणिं पीताम्बरधरं हरं ।
त्रिशूलपट्टिशधरं व्याघ्रचर्म्मधरं हरिं । गरुडध्वजश्च हरं हरिश्च वृषभध्वजं ।
विस्मयो मे महान् ब्रह्मन् दृष्ट्वा तत् परमाद्भुतं । एतदाचक्ष्व भगवन् यथातत्त्वेन सुव्रत ।
॥ मार्कण्डेय उवाच ॥ शिवाय विष्णुरूपाय विष्णवे शिवरूपिणे । यथान्तरं न पश्यामि तेन ते दिशतः शिवं । १०६६०
अनादिमध्यनिधनमेतदक्षरमव्ययं । तदेव ते प्रवक्ष्यामि रूपं हरिहरात्मकं ।

यो वै विष्णुः स वै रुद्रो यो रुद्रः स पितामहः । एका मूर्त्तिस्त्रयो देवा रुद्रविष्णुपितामहाः ।
वरदा लोककर्त्तारो लोकनाथाः स्वयम्भुवः । अर्द्धनारीश्वरास्ते तु व्रतं तीव्रं समाश्रिताः ।
यथा जले जलं चिप्तं जलमेव तु तद्भवेत् । रुद्रं विष्णुः प्रविष्टस्तु तथा रुद्रमयो भवेत् ।
अग्निमग्निः प्रविष्टस्तु अग्निरेव यथा भवेत् । तथा विष्णुं प्रविष्टस्तु रुद्रो विष्णुमयो भवेत् । १०६६५
रुद्रमग्निमयं विद्याद्विष्णुः सोमात्मकः स्मृतः । अग्नीषोमात्मकञ्चैव जगत् स्थावरजङ्गमं ।
कर्त्तारौ चापहर्त्तारौ स्थावरस्य चरस्य च । जगतः शुभकर्त्तारौ प्रभू विष्णुमहेश्वरौ ।
कर्त्तृकारणकर्त्तारौ कर्त्तृकारणकारकौ । भूतभव्यभवौ देवौ नारायणमहेश्वरौ ।
एतौ तौ च प्रवक्तारावेतौ तौ च प्रभामथौ । जगतः पालकावेतावेतौ सृष्टिकरौ स्मृतौ ।
एते चैव प्रवर्षन्ति भान्ति वान्ति सृजन्ति च । एतत् परतरं गुह्यं कथितं ते पितामह । १०६७०
यश्चैनं पठते नित्यं यश्चैनं शृणुयान्नरः । प्राप्नोति परमं स्थानं रुद्रविष्णुप्रसादजं ।
देवौ हरिहरौ स्तोष्ये ब्रह्मणा सह सङ्गतौ । एतौ च परमौ देवौ जगतः प्रभवाव्ययौ ।
रुद्रस्य परमो विष्णुर्विष्णोश्च परमः शिवः । एक एव द्विधाभूतो लोके चरति नित्यशः ।
न विना शङ्करं विष्णुर्न विना केशवं शिवः । तस्मादेकत्वमायातौ रुद्रोपेन्द्रौ तु तौ पुरा ।
ओं नमो रुद्राय कृष्णाय नमः संहतचारिणे । नमः षडर्द्धनेत्राय द्विनेत्राय वै नमः । १०६७५
नमः पिङ्गलनेत्राय पद्मनेत्राय वै नमः । नमः कुमारगुरवे प्रद्युम्नगुरवे नमः ।
नमो धरणीधराय गङ्गाधराय वै नमः । नमो मयूरपिच्छाय नमः केयूरधारिणे ।
नमः कपालमालाय वनमालाय वै नमः । नमस्त्रिशूलहस्ताय चक्रहस्ताय वै नमः ।
नमः कनकदण्डाय नमस्ते व्रतदण्डिने । नमश्चर्म्मनिवासाय नमस्ते पीतवाससे ।
नमोऽस्तु लक्ष्मीपतये उमायाः पतये नमः । नमः खट्वाङ्गधाराय नमो मुषलधारिणे । १०६८०
नमो भस्माङ्गरागाय नमः कृष्णाङ्गधारिणे । नमः श्मशानवासाय नमोऽस्त्वाश्रमवासिने ।
नमो वृषभवाहाय नमो गरुडवाहिने । नमोऽस्त्वनेकरूपाय बहुरूपाय वै नमः ।
नमः प्रलयकर्त्रे च नमः सागरशायिने । नमोऽस्तु बहुरूपाय नमो भैरवरूपिणे ।
विरूपाक्षाय देवाय नमः सौम्येक्षणाय च । दक्षयज्ञविनाशाय बलेर्नियमनाय च ।
नमः पर्व्वतवासाय नमः सागरशायिने । नमः सुररिपुघ्नाय त्रिपुरघ्नाय वै नमः । १०६८५
नमोऽस्तु नरकघ्नाय नमः कामाङ्गनाशिने । नमोऽस्त्वन्धकनाशाय नमः कैटभघातिने ।
नमः सहस्रहस्ताय नमोऽसंख्येयबाहवे । नमः सहस्रशीर्षाय बहुशीर्षाय वै नमः ।
दामोदराय देवाय मुञ्जमेखलिने नमः । नमस्ते भगवन् विष्णो नमस्ते भगवन् शिव ।
नमस्ते भगवन्देव नमस्ते देवपूजित । नमस्ते सामभिर्गीत नमस्ते यजुभिः सह ।
नमस्ते सुरशत्रुघ्न नमस्ते सुरपूजित । नमस्ते कर्म्मिणां कर्म्म नमोऽमितपराक्रम । १०६९०
हृषीकेश नमस्तेऽस्तु स्वर्णकेश नमोऽस्तु ते । य इमं स्तवं रुद्रस्य विष्णोश्चैव महात्मनः ।

समेत्य ऋषिभिः सर्व्वैः स्तुतौ स्तौति महात्मभिः। व्यासेन वेदविदुषा नारदेन च धीमता।
भारद्वाजेन गर्गेन वशिष्ठेन महात्मना। विश्वामित्रेण वाल्मीकेन तथा चैव सुमन्तुना।
अगस्त्येन पुलस्त्येन धौम्येन च महात्मना। यश्चेदं पठते नित्यं स्तोत्रं हरिहरात्मकं।
अरोगी बलवांश्चैव जायते नात्र संशयः। श्रियञ्च लभते नित्यं न च स्वर्गान्निवर्त्तते। १०६९५
अपुत्रो लभते पुत्रं कन्या विन्दति सत्पतिं। गुर्व्विणी शृणुते या तु वरं पुत्रं प्रसूयते।
राक्षसाश्च पिशाचाश्च भूतानि च विनायकाः। भयं तत्र न कुर्व्वन्ति यत्रायं पठ्यते स्तवः।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वाणयुद्धे हरिहरात्मकस्तवे चतुरशीत्यधिकशततोऽध्यायः॥१८४॥
॥ वैशम्पायन उवाच ॥ अपयाते ततो देवे कृष्णे चैव महात्मनि। पुनस्तावर्त्तत मृधं परेषां लोमहर्षणं।
कुम्भाण्डसंग्रहीताश्वे रथे तिष्ठन् गुहस्तदा। अभिदुद्राव कृष्णञ्च बलं प्रद्युम्नमेव च।
ततः शरशतैरुग्रैस्तान् विव्याध रणे गुहः। अमर्षरोषसंक्रुद्धः कुमारः प्रवरो नदन्। १०७००
शरसंवृतगात्रास्ते त्रयस्त्रय इवाग्नयः। शोणितौघप्लुतैर्गात्रैः प्रायुध्यन्त गुहन्ततः।
ततस्ते युद्धमार्गज्ञास्त्रयस्त्रिभिरनुत्तमैः। वायव्याग्नेयपार्ज्जन्यैर्व्विभिदुर्दीप्ततेजसः।
तानस्त्रान् त्रिभिरेवास्त्रैर्व्विनिवार्य्य स पावकिः। शैलवारुणसावित्रैस्तान् स विव्याध सायकैः।
तस्य दीप्तशरौघस्य दीप्तचापधरस्य वै। शरौघानस्त्रमायाभिर्ग्रसन्ति स्म महात्मनः।
यदा तदा गुहः क्रुद्धः प्रज्वलन्निव तेजसा। अस्त्रं ब्रह्मशिरो नाम कालकल्पं दुरासदं। १०७०५
संदष्टौष्ठपुटः संख्ये जग्राह पावकिः प्रभुः। प्रमुक्ते ब्रह्मशिरसि सहस्रांशुसमप्रभे।
उग्रे परमदुर्द्धर्षे लोकक्षयकरे तथा। हाहाभूतेषु सर्व्वेषु प्रधावत्सु समन्ततः।
अस्त्रतेजःप्रमूढे तु विषण्णे जगति प्रभुः। केशवः केशिमथनश्चक्रं जग्राह वीर्य्यवान्।
सर्व्वेषामस्त्रवीर्य्याणां वारणं घातनं तथा। चक्रमप्रतिचक्रस्य लोके ख्यातं महात्मनः।
अस्त्रं ब्रह्मशिरस्तेन निष्प्रभं कृतमोजसा। घनौघेनातपापाये सवितुर्म्मण्डलं यथा। १०७१०
ततो निष्प्रभतां याते नष्टवीर्य्ये हतौजसि। तस्मिन् ब्रह्मशिरस्यस्त्रे क्रोधसंरक्तलोचनः।
गुहः प्रजज्वाल रणे हविषेवाग्निरुल्वणः। जग्राह काञ्चनीं शक्तिं शत्रुघ्नीं ज्वलितां तथा।
अमोघां दयितां घोरां सर्व्वलोकभयावहां। महोल्कामिव तां दीप्तां युगान्ताग्निसमप्रभां।
[illegible] दिव्यां चिक्षेप रुषितो गुहः। ननाद बलवच्चापि नादान् शत्रुभयङ्करान्।
सा तु क्षिप्ता तदा शक्तिर्मेघ्नाण्येन महात्मना। जृम्भमाणेव गगने सम्प्रदीप्तमुखी तदा। १०७१५
अधावत महाशक्तिः कृष्णस्य वधकाङ्क्षिणी। भृशं विषण्णः शक्रोऽपि सर्व्वामरगणैर्वृतः।
शक्तिं प्रज्वलितां दृष्ट्वा दग्धः कृष्णोऽप्यथाब्रवीत्। अभ्यासमागतां ताञ्च महाशक्तिं महाबलः।
हुङ्कारेणैव निर्भर्त्स्य पातयामास भूतले। पातितायां महाशक्त्यां साधु साध्विति सर्व्वशः।
सिंहनादं ततश्चक्रुः सर्व्वे देवाः सवासवाः। ततो देवेषु नर्द्दत्सु वासुदेवः प्रतापवान्।
पुनश्चक्रं स जग्राह दैत्यान्तकरणं रणे। व्याविध्यमाने चक्रे तु कृष्णेनामिततेजसा। १०७२०

कुमाररक्षणार्थाय बिभ्रती सुतनुं तदा । दिग्वासा देववचनात् प्रातिष्ठदथ कोट्टवी ।
लम्बा नाम महाभागा भागो देव्यास्तथाष्टमः । चित्रा कनकशक्तिस्तु सा च लम्बा स्थितान्तरे ।
अथान्तरा कुमारस्य देवीं दृष्ट्वा महाभुजः । पराङ्मुखास्ततो वाक्यमुवाच मधुसूदनः ।
॥ भगवानुवाच ॥ अपगच्छापगच्छ त्वं धिक्त्वामिति च सोऽब्रवीत् । किमेवं कुरुषे विघ्नं निश्चितस्य बधम्प्रति ।
॥ वैशम्पायन उवाच ॥ श्रुत्वैव वचनं तस्य कोट्टवी तु तदा विभोः । नैव वासः समाधत्ते कुमारपरिरक्षणात् । १०७२५
॥ भगवानुवाच ॥ अयोवाह गुहं शीघ्रमपयाहि रणाजिरात् । स्वस्ति स्थिरं भवेदद्य योत्स्येन योत्स्यता मया ।
तान्तु दृष्ट्वा स्थितो देवो हरिः संग्राममूर्द्धनि । संजहार ततश्चक्रं भगवान् वासवानुजः ।
एवमुक्ते तु वचने देवदेवेन धीमता । अपवाह्य गुहं देवी हरमान्तिकमागता ।
एतस्मिन्नन्तरे चैव वर्त्तमाने महाहवे । कुमारे रक्षिते देव्या वाणस्तं देशमाययौ ।
अपयातं गुहं दृष्ट्वा मुक्तं कृष्णेन संयुगात् । वाणश्चिन्तयते तत्र स्वयं योत्स्यामि माधवं । १०७३०
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वाणयुद्धे गुहापयाने पञ्चाशीत्यधिकशततोऽध्यायः ॥ १८५ ॥
॥ वैशम्पायन उवाच ॥ ततस्तूर्य्यनिनादैश्च भेरीणाञ्च महास्वनैः । सिंहनादैश्च शूराणां वाणः कृष्णमथाद्रवत् ।
दृष्ट्वा वाणन्तु निर्य्यान्तं युद्धायैव व्यवस्थितं । आरुह्य गरुडं कृष्णो वाणायाभिमुखो ययौ ।
आयान्तमथ दृष्ट्वैव यदूनां ऋषभं रणे । वैनतेयं समारूढं कृष्णमप्रतिमौजसं ।
अथ वाणस्तु तं दृष्ट्वा प्रमुखे प्रत्युपस्थितं । उवाच वचनं क्रुद्धो वासुदेवं तरस्विनं ।
॥ वाण उवाच ॥ तिष्ठ तिष्ठ न मेऽद्य त्वं जीवन् प्रतिगमिष्यसि । द्वारकां द्वारकास्थांश्च सुहृदो द्रक्ष्यसे न च । १०७३५
सुवर्णवर्णान् वृतायानद्य द्रक्ष्यसि माधव । मयाभिभूतः समरे मुमूर्षुः कालचोदितः ।
त्वमद्याष्टभुजः मन्ये कथं बाहुसहस्रिणा । मया सह समागम्य योत्स्यसे गरुडध्वज ।
अद्य त्वं वै मया युद्धे निर्ज्जितः सह बान्धवैः । द्वारकां शोणितपुरे निहतः संस्मरिष्यसि ।
नानाप्रहरणोपेतं नानाङ्गदविभूषितं । अद्य बाहुसहस्रं मे कोटिभूतं निशामय ।
गर्ज्जतस्तस्य वाग्घोषाः समुद्रादिव सिन्धवः । निश्चरन्ति महाघोरा वातोद्धूता इवोर्म्मयः । १०७४०
रोषपर्य्याकुले चैव नेत्रे तस्य बभूवतुः । जगद्दिधक्षतस्तस्य वह्निसूर्य्याविवोदितौ ।
तच्छ्रुत्वा नारदस्तस्य वाणस्यात्यूर्ज्जितं वचः । जहास सुमहद्धासं भिन्दन्निव नभःस्थलं ।
योगवर्त्मनुपाश्रित्य तस्थौ युद्धदिदृक्षया । कौतूहलोत्फुल्लदृशः कुर्व्वन् पर्य्यटते मुनिः ।
॥ वासुदेव उवाच ॥ वाण किं गर्ज्जसे मोहात् शूराणां नास्ति गर्ज्जितं । एह्येहि युध्यस्व रणे त्वया किं गर्ज्जितेन ते ।
यदि युद्धानि वचनैः सिद्ध्येयुर्दितिनन्दन । भवानेव जयेन्नित्यं बहुबद्धं प्रजल्पसि । १०७४५
एह्येहि जय मां वाण जितो वा वसुधातले । चिरायावाप्नुवा दोनः पतितः शेष्यतेऽसुर ।
इत्येवमुक्त्वा वाणन्तु मर्म्मभेदिभिराशुगैः । निर्ब्बिभेद तदा कृष्णस्तममोघैर्महाशरैः ।
विनिर्भिन्नस्तु कृष्णेन मार्गणैर्म्मर्म्मभेदिभिः । स्वयं वाणस्ततः कृष्णं शरवर्षैरवाकिरत् ।
ज्वलद्भिरिव संयुक्तास्तस्मिन् युद्धे सुदारुणे । ततः परिघनिस्त्रिंशैर्गदातोमरशक्तिभिः ।

मुषलैः पट्टिशैश्चैव छादयामास केशवं । स तु बाहुसहस्रेण गर्व्वितो बहुधा रणे । १०७५०
योधयामास समरे द्विबाहुमथ लीलया । सहस्रबाहुना सार्द्धमष्टबाहुरयुध्यत ।
बाणेन सह संग्रामे शङ्खचक्रगदाधरः । लाघवं वीक्ष्य कृष्णस्य दानवेन्द्रो रुषान्वितः ।
यदस्त्रमभवत् पूर्व्वं हिरण्यकशिपोः परं । तदस्त्रं परमं दिव्यं तपसा निर्म्मितं महत् ।
यथाप्रतिहतं युद्धे सर्व्वामित्रविनाशनं । ब्रह्मणा विहितं पूर्व्वं तन्मुमोच बलेः सुतः ।
तस्मिन्मुक्ते दिशः सर्व्वास्तमःपिहितमण्डलाः । प्रादुरासन् सहस्राणि सुघोराणि च सर्व्वशः । १०७५५
तमसा संवृते लोके न प्राज्ञायत किञ्चन । साधु साध्विति बाणन्तु पूजयन्ति स्म दानवाः ।
हाहाधिगिति देवानां चरते वागुदीरिता । ततोऽस्त्रबलवेगेन स्वर्चिष्मत्यः सुदारुणाः ।
घोररूपा महावेगा निष्पेतुर्बाणवृष्टयः । नैव वाताः प्रवायन्ते न मेघाः सञ्चरन्ति च ।
अस्त्रे विसृष्टे बाणेन दह्यमाने च केशवे । ततोऽस्त्रं सुमहावेगं जग्राह मधुसूदनः ।
पार्ज्जन्यं नाम भगवान् यमान्तकनिभं रणे । ततो वितिमिरे लोके स चाग्निः प्रशमङ्गतः । १०७६०
दानवा मोघसङ्कल्पाः सर्व्वेऽभूवंस्तदा भृशं । दानवास्त्रं प्रशान्तं तत् पार्ज्जन्यास्त्रेऽभिमन्त्रिते ।
ततो देवगणाः सर्व्वे प्रणेदुर्जहसुस्तदा । हते त्वस्त्रे महाराज दैतेयः क्रोधमूर्च्छितः ।
भूयः सञ्छादयामास केशवं गरुडे स्थितं । मुषलैः पट्टिशैश्चैव छादयामास केशवं ।
तस्य तां तरसा सर्व्वां बाणवृष्टिं समुद्यतां । प्रहसन् वारयामास केशवः शत्रुसूदनः ।
केशवस्य तु बाणेन वर्त्तमाने महारणे । तस्य शार्ङ्गविनिर्मुक्तैः शरैरग्निसमप्रभैः । १०७६५
तिलशस्तद्रथं चक्रे साश्वध्वजपताकिनं । चिच्छेद कवचं कायान्मुकुटञ्च महाप्रभं ।
कार्मुकञ्च महातेजा हस्तावापञ्च केशवः । विव्याध चैनमुरसि नाराचेन स्मयन्निव ।
स मर्म्माभिहतः संख्ये प्रमुमोहाल्पचेतनः । तं दृष्ट्वा मूर्च्छितं बाणं प्रहारपरिपीड़ितं ।
प्रासादवरशृङ्गस्थो नारदो मुनिपुङ्गवः । उत्थाय पश्यत तदा कक्षास्फोटनतत्परः ।
वादयानो नखांश्चैव दिष्ट्या दिष्ट्येति चाब्रवीत् । अहो मे सफलं जन्म जीवितञ्च सुजीवितं । १०७७०
दृष्टं मे यदिदञ्चित्रं दामोदरपराक्रमं । जय बाणं महाबाहो दैतेयं देवपूजित ।
यदर्थमवतीर्णोऽसि तत् कर्म्म सफलं कुरु । एवं स्तुत्वा तदा देवं बाणैः संद्योतयन् शितैः ।
इतस्ततः संपतद्भिर्नारदो व्यचरद्रणे । केशवस्य तु बाणेन वर्त्तमाने महाभये ।
प्रायुध्येतां ध्वजौ तत्र तावन्योऽन्यमभिद्रुतौ । युद्धं त्वभूद्वाहनयोरुभयोर्द्देवदैत्ययोः ।
गरुडस्य च संग्रामे मयूरस्य च युध्यतः । पक्षतुण्डप्रहारैस्तौ चरणाग्रनखैस्तथा । १०७७५
अन्योऽन्यं जघ्नतुः क्रुद्धौ मयूरगरुडावुभौ । वैनतेयस्ततः क्रुद्धो मयूरं दीप्ततेजसं ।
जग्राह शिरसि क्षिप्रं तुण्डेनाभिपतंस्तदा । दक्षिणेन च पक्षेण निजघान महाबलः ।
पद्भ्यां पार्श्वाभिघातांश्च कृत्वाघातामनेकशः । आकृष्य चैनं तरसा विकृष्य च महाबलः ।
विसंज्ञं पातयामास गगनादिव भास्करं । मयूरे पतिते तस्मिन् पपातातिबलो भुवि ।

वाणः परमसंविग्नश्चिन्तयन् कार्य्यमात्मनः। मयाऽतिबलमत्तेन न कृतं सुहृदां वचः। १०५८०
पश्यतां देवदैत्यानां प्राप्तोऽस्म्यापदमुत्तमां। तं दीनमनसं ज्ञात्वा रणे वाणं सुविक्लवं।
चिन्तयन् भगवान् रुद्रो वाणरक्षणमातुरः। ततः स नन्दिनं देवः प्राह गम्भीरया गिरा।
नन्दिकेश्वर संयाहि यतो वाणो रथे स्थितः। रथेनानेन दिव्येन सिंहयुक्तेन भास्वता।
वाणं संयोजयाशु त्वमलं युद्धाय चानघ। प्रमाथगणमध्येऽहं स्थास्यामि न हि मे मनः।
योद्धुं प्रभवते ह्यद्य वाणं संरक्ष गम्यतां। तथेत्युक्त्वा गतो नन्दी रथेन रथिनाम्वरः। १०५८५
यतो वाणस्ततो गत्वा वाणमाह शनैरिदं। दैत्येश रथमातिष्ठ शीघ्रमेहि महाबल।
मया सारथिना वीर एहि युध्यस्व माचिरं। आरुरोह रथं वाणो महादेवस्य धीमतः।
आरूढः स तु वाणश्च तं रथं ब्रह्मनिर्म्मितं। तं स्यन्दनमधिष्ठाय भवस्यामिततेजसः।
प्रादुश्चक्रे तदा रौद्रमस्त्रं सर्व्वास्त्रघातनं। दीप्तं ब्रह्मशिरो नाम वाणः क्रुद्धोऽतिवीर्य्यवान्।
प्रदीप्ते ब्रह्मशिरसि लोकाः क्षोभमुपागमन्। लोकसंरक्षणार्थं हि तत्सृष्टं पद्मयोनिना। १०५९०
तच्चक्रेण निहत्यास्त्रं प्राह कृष्णस्ततस्त्विमं। लोके प्रख्यातयशसं वाणमप्रतिमं रणे।
कत्थितानि क्व ते तानि वाण किं न विकत्थसे। अयमस्मि स्थितो युद्धे युध्यस्व पुरुषो भव।
कार्त्तवीर्य्यार्ज्जुनो नाम पूर्व्वमासीन्महाबलः। सहस्रबाहुरामेण द्विबाहुः समरे कृतः।
तथा तवापि दर्पोऽयं बाहूनां वीर्य्यसम्भवः। एष ते दर्पशमनं करोमि रणमूर्द्धनि।
यावत्ते दर्पजननान् शातयाम्यद्य वै भुजान्। तिष्ठ तिष्ठ न मेऽद्य त्वं मोक्ष्यसे रणमूर्द्धनि। १०५९५
अथ तद्दुर्लभं दृष्ट्वा युद्धं परमदारुणं। ततो देवासुरसमं हर्षान्नृत्यति नारदः।
निर्ज्जिताश्च गणाः सर्व्वे प्रद्युम्नेन महात्मना। निक्षिप्तवादा युद्धस्य देवदेवं गताः पुनः।
ततश्चक्रं सहस्रारं नदन्मेघ इवोष्णगे। जग्राह पुरुषव्याघ्रो वाणबाहुप्रशान्तये।
तेजो यज्ज्योतिषाञ्चैव तेजो वज्राशनेस्तथा। सुरेशस्य च यत्तेजस्तच्चक्रे पर्य्यवस्थितं।
वेताग्नेश्चैव यत्तेजो यच्चाग्नेश्चाम्बुवारिणः। ऋषीणाञ्च तपोज्ञानं तच्चक्रे पर्य्यवस्थितं। १०६००
पतिव्रतानां यत्तेजः प्राणश्च मृगपक्षिणां। यच्च चक्रधरस्यास्ति तच्चक्रे पर्य्यवस्थितं।
नागराक्षसयक्षाणां गन्धर्व्वाप्सरसामपि। त्रैलोक्यस्य च यत् प्राणं सर्व्वञ्चक्रे प्रतिष्ठितं।
तेजसा तेन संयुक्तं भास्वता प्रज्वलच्छुभं। वपुषा तेज आदत्ते वाणस्य प्रमुखे स्थितं।
चक्रोद्यतकरं दृष्ट्वा भगवन्तं रणाजिरे। ज्ञात्वाऽतितेजसं चक्रं कृष्णेनाभ्युद्यतं रणे।
अप्रमेयमवार्य्यञ्च रुद्राणीमब्रवीच्छिवः। अजेयमेतत्त्रैलोक्ये चक्रं कृष्णेन धार्य्यते। १०६०५
वाणं त्रायस्व देवि त्वं यावच्चक्रं न मुञ्चति। ततस्त्वच्चवचः श्रुत्वा देवी लम्बामथाब्रवीत्।
त्वं गच्छ लम्बे शीघ्रं वै वाणसंरक्षणम्प्रति। ततो योगं समाधाय अदृश्या हिमवत्सुता।
कृष्णमभिक्रम्य तद्रूपं दर्शयन् पार्श्वमागता। अन्तर्द्धानमुपागम्य त्यक्त्वा सा वाससी पुनः।
परित्राणाय वाणस्य विजयाधिष्ठिता ततः। प्रमुखे वासुदेवस्य विवासा कोट्टवी स्थिता।

तां दृष्ट्वाऽथ पुनः प्राप्तां देवीं रुद्रस्य सम्मतां । लम्बां द्वितीयां तिष्ठन्तीं कृष्णो वचनमब्रवीत् । १०८१०
भूयस्त्वमसितापाङ्गि विवस्त्राऽवस्थिता रणे । वाणसंरक्षणपरा हन्मि वाणं न संशयः ।
एवमुक्ता तु कृष्णेन वाणसंरक्षणार्थिनी । गिरा मधुरया देवी वाक्यञ्चेदमुवाच ह ।
जाने त्वां सर्व्वलोकानां स्रष्टारं पुरुषोत्तमं । महाभागं महादेवमनन्तं नीलमव्ययं ।
पद्मनाभं हृषीकेशं लोकानामादिसम्भवं । नार्हसे देव हन्तुं वै वाणमप्रतिमं रणे ।
प्रयच्छस्वाभयं वाणे जीवपुत्त्रीत्वमेव च । मया दत्तवरो ह्येष भूयश्च परिरक्ष्यते । १०८१५
न मे मिथ्या समुद्योगं कर्त्तुमर्हसि माधव । एवमुक्ते तु वचने देव्या परपुरञ्जयः ।
क्रुद्धः प्रभाषते वाक्यं शृणु सत्यं तु भाविनि । वाणो बाहुसहस्रेण नर्द्दते दर्पमास्थितः ।
एतेषां छेदनं मद्य कर्त्तव्यं नात्र संशयः । द्विबाहुना च वाणेन जीवपुत्त्री भविष्यसि ।
आसुरं दर्पमाश्रित्य न च मां संश्रयिष्यति । एवमुक्ते तु वचने कृष्णेनाक्लिष्टकर्म्मणा ।
प्रोवाच देवी वाणोऽयं देवदेव भवेदिति । अथ तां कार्त्तिकेयस्य मातरं सोऽभिभाष्य वै । १०८२०
ततः क्रुद्धो महाबाहुः कृष्णः प्रहरतांवरः । प्रोवाच वाणं समरे वदतां प्रवरः प्रभुः ।
युध्यतां युध्यतां संख्ये भवतां कोद्दवी स्थिता । अशक्तानामिव रणे धिग्वाण तव पौरुषं ।
एवमुक्त्वा ततः कृष्णस्तच्चक्रं परमात्मवान् । निमीलिताक्षो व्यसृजद्वाणं प्रति रणे स्थितः ।
क्षेपणाद्यस्य मुह्यन्ति लोकाः सस्थाणुजङ्गमाः । क्रव्यादानि च भूतानि तृप्तिं यान्ति महामृधे ।
तमप्रतिमकर्म्माणं समानं सूर्य्यवर्च्चसा । चक्रमुद्यम्य समरे कोपदीप्तो गदाधरः । १०८२५
स मुष्णन्दानवं तेजः समरे स्वेन तेजसा । चिच्छेद बाहूंश्चक्रेण श्रीधरः परमौजसा ।
अलातचक्रवत्तूर्णं भ्रममाणं रणाजिरे । वाणस्य रथमार्गे च द्वितीय इव भास्करः ।
विष्णुचक्रं भ्रमत्याशु शैघ्र्याद्रूपं न दृश्यते । तस्य बाहुसहस्रस्य पर्य्यायेण पुनः पुनः ।
वाणस्य च्छेदनं चक्रे तच्चक्रं रणमूर्द्धनि । कृत्वा द्विबाहुं तं वाणं छिन्नशाखमिव द्रुमं ।
पुनः कराग्रे कृष्णस्य प्राप्तञ्चक्रं सुदर्शनं । १०८३०
॥ वैशम्पायन उवाच ॥ कृतकृत्ये तु संप्राप्ते चक्रे दैत्यनिपातने । शरीरेण प्रस्रवता रुधिरौघपरिप्लुतः ।
सोऽभवत्पर्व्वताकारश्छिन्नबाहुर्महाबलः । अस्यस्यतस्य विविधान्नादान्मुञ्चन् यथा घनः ।
तस्य नादेन महता केशवो रिपुसूदनः । चक्रं भूयः क्षेप्तुकामो वाणनाशार्थमच्युतः ।
तमुपेत्य महादेवः कुमारसहितोऽब्रवीत् ।
॥ महेश्वर उवाच ॥ कृष्ण कृष्ण महाबाहो जाने त्वां पुरुषोत्तम । मधुकैटभहन्तारं देवदेवं सनातनं । १०८३५
लोकानां त्वं गतिर्देव त्वत्तः सृतमिदं जगत् । अजेयस्त्वं त्रिभिर्लोकैः सदेवासुरमानुषैः ।
तस्मात् संहर दिव्यं त्वमिदं चक्रं समुद्यतं । अनिवार्य्यमसंहार्य्यं रणे शत्रुभयङ्करं ।
वाणस्यास्याभयं दत्तं मया केशिनिसूदन । तन्मे न स्यान्मृषावाक्यमतस्त्वां क्षमयाम्यहं ।
॥ कृष्ण उवाच ॥ जीवतां देव वाणोऽयमेतच्चक्रं निवर्त्तितं । मान्यस्त्वं देवदेवानामसुराणाञ्च सर्व्वशः ।

नमस्तेऽस्तु गमिष्येऽहं यत् कार्य्यं तन्महेश्वर। न तावत् क्रियते तस्मान्मामनुज्ञातुमर्हसि। १०८४०
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वाणयुद्धे वाणभुजच्छेदे षडशीत्यधिकशततोऽध्याय: ॥ ॥ १८६ ॥
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा महादेवं कृष्णस्तूर्णं गरुत्मता । जगाम तत्र यत्रास्ते प्राद्युम्नि: संयत: शरै: ।
गते कृष्णे ततो नन्दी वाणमाह शुभं वच: । गच्छ वाण त्वमेनैव देवदेवस्य चाग्रत: ।
तच्छ्रुत्वा नन्दिवाक्यन्तु वाणोऽगच्छत शीघ्रग: । छिन्नबाहुं ततो वाणं दृष्ट्वा नन्दी प्रतापवान्।
अपवाह्य रथेनैव यतो देवस्ततो ययौ । ततो नन्दी पुनर्व्वाणं प्रोक्तवानुत्तरं वच: ।
वाण वाण प्रनृत्यस्व श्रेयस्तव भविष्यति । एष देवो महादेव: प्रसादसुमुखस्तव । १०८४५
शोणितौघप्लुतैर्गात्रैर्नन्दिवाक्यप्रचोदित: । जीवितार्थी ततो वाण: प्रमुखे शङ्करस्य वै ।
प्रानृत्यद्भयसंविग्नो दानव: स विचेतन: । अवस्थां कृपणां प्राप्तो भयविक्लवलोचन: ।
तं दृष्ट्वा च प्रनृत्यन्तं भयोद्विग्नं पुन: पुन: । नन्दिवाक्यप्रजवितं भक्तानुग्रहकृद्भव: ।
करुणावशमापन्नो महादेवोऽब्रवीद्वच: । वरं वृणीष्व वाण त्वं यस्ते मनसि वर्त्तते ।
प्रसादसुमुखोऽहन्ते प्रश्न: कालोऽयमागत: । १०८५०
॥ वाण उवाच ॥ अजरश्चामरश्चैव भवेयं सततं विभो । एष मे प्रथमो देव वरस्तु यदि मन्यसे ।
॥ हर उवाच ॥ तुल्योऽसि देवतैर्वाण न मृत्युस्तव विद्यते । अन्यं वरं वृणीष्व त्वमनुग्राह्योऽसि मे सदा ।
॥ वाण उवाच ॥ यथाऽहं शोणितादिग्धो भृशार्त्तो व्रणपीडित: । भक्तानां नृत्यतामेवं पुत्त्रजन्म भवेद्भव।
॥ हर उवाच ॥ निराहारा: क्षमायुक्ता: सत्यार्ज्जवपरायणा: । मद्भक्ता येऽपि नृत्यन्ति तेषामेवं भविष्यति ।
॥ भव उवाच ॥ तृतीयं त्वमयो वाण वरं वरय यद्गतं । तद्विधास्यामि ते पुत्त्र सफलोऽस्तु भवानिह । १०८५५
॥ वाण उवाच ॥ चक्रपाटनजा घोरा रुजस्तीव्रा हि या मम । वरेण तास्तृतीयेन शान्तिं गच्छन्तु मे भव ।
॥ हर उवाच ॥ चक्रपाटनजा घोरा रुजस्तेऽसुरसत्तम । न भविष्यन्ति गात्रेषु बलवांश्च भविष्यसि ।
॥ देव उवाच ॥ चतुर्थं ते वरं दद्मि वृणीष्वासुर काङ्क्षितं । न तेऽहं विमुखस्तात प्रसादसुमुखो ह्यहं ।
॥ वाण उवाच ॥ प्रमथगणवंशस्य प्रथम: स्यामहं विभो । महाकाल इति ख्यातिं गच्छेयं शाश्वती: समा: ।
॥ वैशम्पायन उवाच ॥ एवं भविष्यतीत्याह देवो वाणं महाद्युति: । दिव्यरूपोऽव्रतैर्गात्रैर्नीरुजश्च समाश्रयात् । १०८६०
ममातिसर्गाद्वाण त्वं भव चैवाकुतोभय: । भूयोऽपि ते वरं दद्मि प्रख्यातबलपौरुष ।
तत्त्वं शृणुष्व भद्रं ते मत्तो यदभिकाङ्क्षितं।
॥ वाण उवाच ॥ वैरूप्यमङ्गजं किञ्चिन्माभून्मे देवसत्तम । दिवाकृत्वेऽपि मे देहो न विरूपो भवेद्भव।
॥ हर उवाच ॥ भविता सर्व्वमेतत्ते यथेच्छसि महासुर । भक्तस्त्वं मे न चादेयं भक्तानां विद्यतेऽनघ ।
॥ वैशम्पायन उवाच ॥ ततोऽब्रवीन्महादेवो वाणं स्थितमथान्तिके । एवं ते भविता वाण यत्त्वया समुदाहृतं । १०८६५
एतावद्भगवानुक्त्वा त्रिनेत्रो गणसंवृत: । पश्यतां सर्व्वभूतानां तत्रैवान्तरधीयत ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि वाणवरलाभे सप्ताशीत्यधिकशततोऽध्याय: ॥ १८७ ॥
॥ वैशम्पायन उवाच ॥ एवं वरान् बहून् लब्ध्वा वाण: प्रीतमनाभवत् । जगाम सह रुद्रेण महाकालत्वमागत: ।

वासुदेवोऽपि बहुधा नारदं पर्य्यपृच्छत । क्वानिरुद्धस्तु भगवन् संयतो नागबन्धनैः ।
श्रोतुमिच्छामि तत्त्वेन स्नेहक्लिन्नं हि मे मनः । अनिरुद्धे हृते वीरे क्षुभिता द्वारका पुरी ।
शीघ्रं तं मोचयिष्यामि यदर्थं वयमागताः । अद्य तं नष्टशत्रुं वै द्रष्टुमिच्छामहे वयं ।
स तु देशो हि भगवन् विदितस्तव सुव्रत । एवमुक्तस्तु कृष्णेन नारदः प्रत्यभाषत ।
कन्यापुरे कुमारोऽसौ बद्धो नागैस्तु माधव । एतस्मिन्नन्तरे शीघ्रं चित्रलेखा ह्युपस्थिता ।
बाणस्यान्तःपुरस्थस्य दैत्येन्द्रस्य महात्मनः । इदमन्तःपुरं देव प्रविश त्वं यथासुखं ।
ततः प्रविष्टास्ते सर्व्वे अनिरुद्धस्य मोक्षणे । बलः सुपर्णः कृष्णश्च प्रद्युम्नो नारदस्तथा ।
ततो दृष्ट्वैव गरुडं येऽनिरुद्धशरोरगाः । शररूपा महासर्पा वेष्टयित्वा तनुं स्थिताः ।
सर्व्वे ते सहसा देहात्तस्य निःसृत्य भोगिनः । क्षितिं समवगाहन्त प्रकृत्यावस्थिताः शराः ।
दृष्टः स्पृष्टश्च कृष्णेन सोऽनिरुद्धो महात्मना । स्थितः प्रीतमना भूत्वा प्राञ्जलिर्व्वाक्यमब्रवीत् ।
॥ अनिरुद्ध उवाच ॥ देवदेव सदा युद्धे जेता त्वमसि कस्तव । शक्नो वै प्रमुखे स्थातुं साक्षादपि शचीपतिः ।
॥ भगवानुवाच ॥ आरोह गरुडं तूर्णं गच्छाम द्वारकां पुरीं । एवमुक्तोऽनिरुद्धस्तु ऊषया सह कन्यया ।
स्थितः प्रीतमना भूत्वा ज्ञात्वा बाणं जितं रणे । ततो महाबलं देवं बलभद्रं यशस्विनं ।
अभिवादयते हृष्टः सोऽनिरुद्धः प्रतापवान् । माधवञ्च महात्मानमभिवाद्य कृताञ्जलिः ।
खगोत्तमं महावीर्य्यं सुपर्णञ्चाभ्यवादयत् । ततो मकरकेतुञ्च चित्रबाणधरं प्रभुं ।
पितरं सोऽभ्युपागम्य प्रद्युम्नमभ्यवादयत् । सखीगणवृता चैव सा स्नुषा कुलनन्दिनी ।
बलञ्चातिबलञ्चैव वासुदेवं चतुर्भुजं । असंख्यातगतिञ्चैव सुपर्णमभिवाद्य च ।
पुष्पबाणधरञ्चैव लज्जमाना भ्यवादयत् । ततः शक्रस्य वचनान्नारदः परमद्युतिः ।
वासुदेवसमीपस्थः प्रहसन् पुनरागतः । वर्द्धापयति तं देवं गोविन्दं शत्रुसूदनं ।
दिष्ट्या वर्द्धसि गोविन्द अनिरुद्धसमागमात् । ततोऽनिरुद्धसहिता नारदं प्रणतास्तदा ।
आशीर्भिर्व्वर्द्धयित्वा च देवर्षिः कृष्णमब्रवीत् । अनिरुद्धस्य वीर्य्याख्यो विवाहः क्रियतां विभो ।
जम्बूलमालिकां द्रष्टुं श्रद्धा हि मम जायते । ततः प्रहसिताः सर्व्वे नारदस्य वचःश्रवात् ।
कृष्णः प्रोवाच भगवन् क्रियतामाशु माचिरं । एतस्मिन्नन्तरे तत्र कुम्भाण्डः समुपस्थितः ।
वैवाहिकांस्तु संभारान् गृह्य कृष्णं नमस्य च ।
॥ कुम्भाण्ड उवाच ॥ कृष्ण कृष्ण महाबाहो भव त्वमभयप्रदः । शरणागतोऽस्मि ते देव प्रसीदेषोऽञ्जलिस्तव ।
नारदस्य वचः श्रुत्वा प्रागेव मधुसूदनः । अभयं यच्छते तस्मै कुम्भाण्डाय महात्मने ।
कुम्भाण्ड मन्त्रिणां श्रेष्ठ प्रीतोऽस्मि तव सुव्रत । सुकृतं ते विजानामि राष्ट्रिकोऽस्तु भवानिह ।
सम्प्राप्तिपदः सुसुखो निर्वृतोऽस्तु भवानिह । राज्यञ्च ते मया दत्तं चिरं जीव समाश्रयात् ।
एतद्दत्त्वाऽभयं तस्मै कुम्भाण्डाय महात्मने । विवाहमकरोत्तत्र सोऽनिरुद्धस्य वीर्य्यवान् ।
ततस्तु भगवान् वह्निः स्वयं तत्र उपस्थितः । विवाहे चानिरुद्धस्य नक्षत्रञ्च शुभं भवेत् ।

ततोऽप्सरोगणास्तत्र कौतुकं कर्त्तुमागताः। स्नातः स्वलङ्कृतः सोऽप्यनिरुद्धो भार्य्यया सह।
ततः स्निग्धैः शुभैर्व्वाक्यैर्गन्धर्व्वाश्च जगुस्तदा। विद्याधरगणैश्चैव विवाहमुपशोभयन्।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि अनिरुद्धविवाहे अष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥
॥ वैशम्पायन उवाच ॥ ततो निर्व्वर्त्तयित्वा तु विवाहं शत्रुसूदन। अनिरुद्धस्य सुप्रज्ञः सर्व्वैर्देवगणैर्वृतः। १०९००
आमन्त्र्य वरदं रुद्रं देवीञ्चैव गुहञ्च तं। चकार गमने बुद्धिं कृष्णः परपुरञ्जयः।
द्वारकाभिमुखं कृष्णं ज्ञात्वा शत्रुनिवर्हणं। प्रीत्यर्थं वासुदेवस्य कुम्भाण्डो वाक्यमब्रवीत्।
शृणु मे पुण्डरीकाक्ष विज्ञाप्यं मधुसूदन। वाणस्य गावस्तिष्ठन्ति हस्ते तु वरुणस्य वै।
यासाममृतकल्पं हि क्षीरं क्षरति माधव। यत् पीत्वा निर्बलश्चैव नरो भवति दुर्ज्जयः।
कुम्भाण्डेनैवमाख्याते हरिः प्रीतमनास्तदा। गमनाय मतिञ्चक्रे गन्तव्यमिति निश्चितं। १०९०५
ततस्तु भगवान् ब्रह्मा सङ्गाय स तु केशवं। जगाम ब्रह्मलोकं स वृतः स्वभवमालयैः।
इन्द्रो मरुद्गणैश्चैव द्वारकाभिमुखो ययौ। यतः कृष्णस्ततः सर्व्वे गच्छन्ति प्रियकाङ्क्षिणः।
वाहनेन मयूरेण सखीभिः परिवारिता। द्वारकाभिमुखी ह्यूषा देव्या प्रस्थापिता ययौ।
ततो बलश्च कृष्णश्च प्रद्युम्नश्च महाबलः। आरूढवन्तो गरुडमनिरुद्धश्च वीर्य्यवान्।
प्रस्थितश्च स तेजस्वी गरुडः पक्षिणां वरः। उन्मूलयंस्तरुगणान् कम्पयंश्चापि मेदिनीं। १०९१०
आकुलाश्च दिशः सर्व्वा रेणुध्वस्तमिवाम्बरं। गरुडे संप्रयाते तु मन्दरश्मिश्च भास्करः।
ततस्ते दीर्घमध्वानं प्रययुः पुरुषर्षभाः। आरुह्य गरुडं सर्व्वे जित्वा वाणं मनोजवं।
ततोऽम्बरतलस्थास्ते वारुणीं दिशमास्थिताः। अपश्यन्त महात्मानो गास्तु दिव्यपयःप्रदाः।
वेलावनविचारिण्यो वाणगाव उपस्थिताः। स विज्ञाय ततो रूपं कुम्भाण्डवचनश्रवात्।
कृष्णः प्रहरतां श्रेष्ठस्तत्त्वतोऽर्थविशारदः। निशम्य वाणगावस्तास्तासु चक्रे मनस्तदा। १०९१५
आस्थितो गरुडं प्राह सर्व्वलोकादिरव्ययः।
॥ भगवानुवाच ॥ गरुड त्वं याहि तत्र यत्र वाणस्य गोधनं। आह मां सत्यभामा च वाणगा वै समानय।
यासां पीत्वा किल क्षीरं न जीर्य्यन्ति महासुराः। विज्वरा ज्वरया त्यक्ता भवन्ति किल जन्तवः।
तास्त्वमानय भद्रं ते यदि कार्य्यं न लुप्यते। अथवा कार्य्यलोपो वै नैव तासु मनः कृथाः।
इति मामवदत् सत्या तास्चैव विदिता मम। १०९२०
॥ गरुड उवाच ॥ दृश्यन्ते गावस्तास्ता दृष्ट्वा मां वरुणालये। विशन्ति सहसा देव कार्य्यमत्र विधीयतां।
तथेत्युक्त्वा तु गरुडः पक्षवातेन सागरं। सहसा क्षोभयित्वा च विवेश वरुणालयं।
दृष्ट्वा जवेन गरुडं प्राप्तं वै वरुणालयं। वारुणाश्च गणाः सर्व्वे संभ्रान्ताः प्राचलंस्तथ।
ततस्तु वारुणं सैन्यमभियातं सुदुर्ज्जयं। प्रमुखे वासुदेवस्य नानाप्रहरणोद्यतं।
ततस्तु तस्य प्रमुखे वासुदेवस्य धीमतः। तद्युद्धमभवद्घोरं वारुणैः पन्नगारिणा। १०९२५
तेषामापततां संख्ये वारुणानां सहस्रशः। भग्नं बलमनाधृष्यं केशवेन महात्मना।

ततस्ते प्रहता यान्ति तमेव वरुणालयं । षष्टीरथसहस्राणि षष्टीरथशतानि च ।
वारुणानि प्रयुक्तानि दीप्तशस्त्राणि संयुगे । तद्बलं कृष्णबाणौघैर्हन्यमानं समन्ततः ।
भग्नं तद्वारुणं सैन्यं नैव त्राणमविन्दत । ततस्तु बलिभिः शूरैर्बलदेवजनार्द्दनैः ।
सप्रद्युम्नानिरुद्धैश्च गरुडेन च सर्व्वशः । शरौघैर्विविधैस्तीक्ष्णैर्बध्यमानं सहस्रशः । १०९३०
ततो भग्नं बलं दृष्ट्वा कृष्णेनाक्लिष्टकर्म्मणा । वरुणस्त्वथ संभ्रान्तो निर्ययौ यत्र केशवः ।
ऋषिभिर्द्देवगन्धर्व्वैस्तथैवाप्सरसां गणैः । संस्तूयमानो बहुधा वरुणः प्रत्यदृश्यत ।
छत्रेण ध्रियमाणेन पाण्डुरेण वपुष्मता । सलिलस्राविणा श्रेष्ठं चापमुद्यम्य विष्ठितः ।
अपाम्पतिरतिक्रुद्धः पुत्रपौत्रबलान्वितः । आह्वयामास युद्धाय विस्फारितमहाधनुः ।
स तु प्रध्मापयन् शङ्खं वरुणः समधावत । हरिं हर इव क्रोधाद्बाणजालैः समावृणोत् । १०९३५
ततः प्रध्माप्य जलजं पाञ्चजन्यं जनार्द्दनः । बाणवर्षाकुलाः सर्व्वा दिशश्चक्रे जनार्द्दनः ।
ततः शरौघैर्व्विमलैर्व्वरुणः पीडितो रणे । स्मयन्निव तदा कृष्णं वरुणः प्रत्ययोधयत् ।
ततोऽस्त्रं वैष्णवं घोरमभिसन्धायाहवे स्थितः । वासुदेवोऽब्रवीद्वाक्यं प्रमुखे तस्य धीमतः ।
इदमस्त्रं महारौद्रं वैष्णवं शत्रुमर्द्दनं । मयोद्यतं वधार्थन्ते तिष्ठेदानीं स्थिरो भव ।
ततस्तं वरुणो देवो वैष्णवं शस्त्रमुत्तमं । वारुणास्त्रेण संयोज्य विननाद महाबलः । १०९४०
तस्यास्त्रविततास्त्वापो वरुणस्य विनिःसृताः । वैष्णवास्त्रस्य शमने वर्त्तन्ते समितिञ्जय ।
आपस्तु वारुणास्त्रेण क्षिप्ता ज्वलत वैष्णवं । दह्यन्ते वारुणास्त्रेण ततोऽस्त्रे ज्वलिते पुनः ।
वैष्णवे तु महावीर्य्ये दिशो भीताः प्रदुद्रुवुः । अस्त्रं प्रज्वलितं दृष्ट्वा वरुणः कृष्णमब्रवीत् ।
स्मर तां प्रकृतिं पूर्व्वामव्यक्तां व्यक्तलक्षणां । तमो जहि महाभाग तमसा युज्यसे कथं ।
सत्त्वस्थो नित्यमाशीस्त्वं योगेश्वर महामते । पञ्चभूताश्रयान्दोषानहङ्कारञ्च संत्यज । १०९४५
येयं ते वैष्णवी मूर्त्तिस्तस्या ज्येष्ठोऽस्म्यहं विभो । ज्येष्ठभावेन मान्यस्ते किं मां दग्धुमिहेच्छसि ।
नाग्निर्विक्रमते ह्यग्नौ त्यज कोपं युधाम्वर । त्वयि न प्रभविष्यन्ति जगतः प्रभवो ह्यसि ।
पूर्व्वं हि या त्वया सृष्टा प्रकृतिर्विकृतात्मिका । धर्म्मिणी बीजभावेन पूर्व्वधर्म्मेषु संश्रिता ।
आग्नेयश्चैव सौम्यश्च प्रकृत्यैवेदमादितः । त्वया सृष्टं जगत् सर्व्वं स कथं युध्यसे मयि ।
अजेयः शाश्वतो देवः स्वयम्भूर्भूतभावनः । अक्षयश्चाव्ययश्चैव भावाभावौ महाद्युते । १०९५०
रक्ष मां रक्षणीयोऽहं त्वयाऽनघ नमोऽस्तु ते । आदिकर्त्तासि लोकानां त्वयैतद्बहुलीकृतं ।
किं क्रीडसि महादेव बालःक्रीडनकैरिव । न ह्यहं प्रकृतिद्वेषी नाहं प्रकृतिदूषकः ।
प्रकृतिर्या विकारेषु वर्त्तते पुरुषर्षभ । तस्या विकारशमने वर्त्तसे त्वं यथाविधि ।
विकारो वा विकाराणां विकाराय न तेऽनघ । तानधर्म्मविदो मन्दान् भवान् विकुरुते सदा ।
इयं हि प्रकृतिर्द्दोषैस्तमसा युज्यते यदा । रजसा चापि संसृष्टा तदा मोहः प्रवर्त्तते । १०९५५
परावरज्ञः सर्व्वज्ञ ऐश्वर्य्यविधिमाश्रितः । किं मोहयसि नः सर्व्वान् प्रजापतिरिव स्वयं ।

वरुणेनैवमुक्तस्तु कृष्णो लोकपरायणः । भावज्ञः सर्व्वविद्धीरस्ततः प्रीतमना अभूत् ।
इत्येवमुक्तः प्रहसन् कृष्णो वचनमब्रवीत् । गास्त्वं प्रयच्छ मे देव बाणार्थे भीमविक्रम ।
इत्येवमुक्तः कृष्णेन वाक्यं वाक्यविशारदः । वरुणो ह्यब्रवीद्भूयः शृणु मे मधुसूदन ।
॥ वरुण उवाच ॥ बाणेन सार्द्धं समयो मया देव पुरा कृतः । कथञ्च समयं कृत्वा कुर्य्यां वितथमन्यथा ।
त्वमेव वेद सर्व्वस्य यथासमयभेदतः । चारित्र्यं दुष्यते तात न च सद्भिः प्रशस्यते ।
धर्म्मभागैर्नरो नित्यं वर्ज्यते मधुसूदन । न च लोकानवाप्नोति पापः समयभेदतः ।
प्रसीद धर्म्मलोपश्च माभून्मे मधुसूदन । न मां समयभेदेन योक्तुमर्हसि माधव ।
जीवन्नाहं प्रदास्यामि गा एता वृषभेक्षण । हत्वा नयस्व मां गास्तु एष मे समयः पुरा ।
एष मे तव चाख्यातः समयो मधुसूदन । सत्यमेव महाबाहो न मिथ्या च सुरेश्वर ।
यदि तेऽहमनुग्राह्यो रक्ष मां मधुसूदन । अथ वा गोषु निर्ब्बन्धो हत्वा नय महाभुज ।
॥ वैशम्पायन उवाच ॥ वरुणेनैवमुक्तस्तु यदूनां वंशवर्द्धनः । अभेद्यं समयं मत्वा न्यस्तवादो गवां प्रति ।
स प्रहस्य ततो वाक्यं व्याजहारार्थकोविदः । तस्मान्मुक्तोऽसि यद्येवं बाणेन समयः कृतः ।
प्रसृतैर्म्मधुरैर्व्वाक्यैस्तत्त्वार्थमनुभाषितैः । कथं पापं करिष्यामि वरुण त्वय्यहं विभो ।
गच्छ मुक्तोऽसि वरुण सत्यसन्धस्तु नो भवान् । त्वत्प्रियार्थं मया मुक्ता बाणगावो न संशयः ।
ततस्तूर्य्यनिनादैश्च भेरीणाञ्च महास्वनैः । अर्घमादाय वरुणः केशवं प्रत्यपूजयत् ।
केशवोऽर्घं तदा गृह्य वरुणाद्यदुनन्दनः । बलं पूजयते देवः कुशलो च समाहितः ।
वरुणायाभयं दत्त्वा वासुदेवः प्रतापवान् । द्वारकां प्रस्थितः शौरिः शचीपतिसहायवान् ।
तत्र देवाः समरुतःससाध्याः सिद्धचारणाः । गन्धर्व्वाप्सरसश्चैव किन्नरास्तान्तरिक्षगाः ।
अनुगच्छन्ति भूतेशं सर्व्वभूतादिमव्ययं । आदित्या वसवो रुद्रा अश्विनौ यक्षराक्षसाः ।
विद्याधरगणाश्चैव ये चान्ये सिद्धचारणाः । गच्छन्तमनुगच्छन्ति यशसा विजयेन च ।
नारदश्च महाभागः प्रस्थितो द्वारकां प्रति । तुष्टो बाणजयं दृष्ट्वा वरुणञ्च कृतप्रियं ।
कैलासशिखरप्रख्यैः प्रासादैः कन्दरैश्च तैः । दूरादेव च तां दृष्ट्वा द्वारकां द्वारमालिनीं ।
पाञ्चजन्यस्य निर्घोषं चक्रे चक्रगदाधरः । मंशां प्रयच्छते देवो द्वारकापुरवासिनां ।
देवानुयात्रानिर्घोषं पाञ्चजन्यस्य निस्वनं । श्रुत्वा द्वारवती सर्व्वा प्रहर्षमतुलं गता ।
पर्णकुम्भैश्च लाजैश्च पुष्पैश्च बहुविस्तरैः । द्वारोपशोभितां सर्व्वां कृत्वा द्वारवतीं पुरीं ।
संहृष्टरथ्यां सुश्रीकां बहुरत्नोपशोभितां । विप्राश्चार्घं समादाय तथैव कुलनैगमाः ।
जयशब्दैश्च विविधैः पूजयन्ति स्म माधवं । वैनतेयसमारूढं नीलाञ्जनचयोपमं ।
ववन्दिरे तदा कृष्णं श्रिया परमया युतं । यथानुपूर्व्व्या वर्णाश्च पूजयन्ति महाबलं ।
अर्चन्ति केशिहन्तारं श्रेष्ठिपूर्व्वास्तु श्रेणयः । ऋषिभिर्द्देवगन्धर्व्वैश्चारणैश्च समन्ततः ।
स्तूयते पुण्डरीकाक्षो द्वारकोपवने स्थितः । तदाश्चर्य्यमपश्यन्त दाशार्हगणसत्तमाः ।

प्रहर्षमतुलं प्राप्ता दृष्ट्वा कृष्णं महाबलं । बाणं जित्वा महादेवमायान्तं पुरुषोत्तमं ।
द्वारकावासिनो वाचश्चरन्ति बहुधा तदा । प्राप्ते कृष्णे महाभागे सात्वतानां महारथे ।
गत्वा च दूरमध्वानं सुपर्णेनागते द्रुतं । धन्याः स्मोऽनुगृहीताः स्मो येषां नो जगतीपतिः ।
रक्षिता चैव गोप्ता च दीर्घबाहुर्महाबलः । वैनतेयं समारुह्य जित्वा बाणं सुदुर्ज्जयं । १०९९०
प्राप्तोऽयं पुण्डरीकाक्षो मनांस्याह्लादयन्निव । एवं कथयतामेव द्वारकावासिनां तदा ।
वासुदेवगृहं देवा विविशुस्ते महारथाः । अवतीर्य्य सुपर्णात्तु वासुदेवो बलस्तथा ।
प्रद्युम्नश्चानिरुद्धश्च गृहान् प्रविविशुस्तदा । ततो देवविमानानि दिवि सञ्चरतां तदा ।
स्थितान्येव व्यदृश्यन्त नानारूपाणि सर्व्वशः । हंसर्षभमृगैर्नागैर्वाजिसारसबर्हिणैः ।
भास्वन्ति तान्यदृश्यन्त विमानानि सहस्रशः । अथ कृष्णोऽब्रवीद्वाक्यं कुमारांस्तान् प्रहस्रशः । १०९९५
प्रद्युम्नादीन् समस्तांश्च सत्वरं मधुरया गिरा । एते रुद्रास्तथा दित्या वसवोऽथाश्विनावपि ।
साध्या देवास्तथाचान्ये वन्दध्वञ्च यथाक्रमं । महस्राक्षं महाभागं दानवानां भयङ्करं ।
वन्दध्वं सहिताः शक्रं सगणं नागवाहनं । सप्तर्षयो महाभागा भृगवङ्गिरसमाश्रिताः ।
ऋषयश्च महात्मानो वन्दध्वञ्च यथाक्रमं । एते चक्रधराश्चैव एतान् वन्दत सर्व्वशः ।
सागराश्च ह्रदाश्चैव मत्प्रियार्थमिहागताः । दिशश्च विदिशश्चैव वन्दध्वञ्च यथाक्रमं । ११०००
वासुकिप्रमुखाश्चैव नागा वै सुमहाबलाः । गावश्च मत्प्रियार्थं वै वन्दध्वञ्च यथाक्रमं ।
ज्योतींषि सह गन्धर्व्वैर्नराक्षसकिन्नरैः । आगता मत्प्रियार्थं वै बन्दध्वञ्च यथाक्रमं ।
वासुदेववचः श्रुत्वा कुमाराः प्रणताः स्थिताः । यथाक्रमेण सर्व्वेषां दैवतानां महात्मनां ।
सर्व्वान्दिवौकसो दृष्ट्वा पौरा विस्मयमागताः । पूजार्थमथ सम्भारान् प्रगृह्य द्रुतमागताः ।
अहो सुमहदाश्चर्य्यं वासुदेवस्य संश्रयात् । प्राप्यते यदिहास्माभिरिति वाचश्चरन्त्युत । ११००५
ततश्चन्दनचूर्णैश्च पुष्पगन्धैश्च सर्व्वशः । किरन्ति पौराः सर्व्वांस्तान् पूजयन्तो दिवौकसः ।
लाजैः प्रणामैर्धूपैश्च वाग्बुद्धिनियमैस्तथा । द्वारकावासिनः सर्व्वे पूजयन्ति दिवौकसः ।
आहुकं वसुदेवञ्च साम्बञ्च यदुनन्दनं । सात्यकिं चोल्मुकं चैव विपृथुञ्च महाबलं ।
अक्रूरञ्च महाभागं तथा निषठमेव च । एतान्परिष्वज्य तदा मूर्द्ध्नि चाघ्राय वीर्य्यवान् ।
अकश्च सभामध्ये तदोवाच शुभं वचः । वासवः सात्वतान् सर्व्वानेष वो यदुनन्दनः । ११०१०
योऽजयित्वा क्षणेनैव यशसा पौरुषेण च । महादेवस्य मिषतो गुहस्य च महात्मनः ।
एष बाणं रणे जित्वा द्वारकां पुनरागतः । सहस्रबाहोर्व्बाहूनां कृत्वा व्ययमनुत्तमं ।
स्थापयित्वा द्विबाहुत्वे प्राप्तोऽयं स्वपुरीं हरिः । यदर्थं जन्म कृष्णस्य मानुषेषु महात्मनः ।
तदप्यवसितं कृत्स्नं नष्टशोका वयं कृताः । पिबन्तो मधु माध्वीकं रमध्वं प्रीतिपूर्व्वकं ।
कालोयास्यत्यविरतं विषयेष्वेव सज्जतां । बाहूनां संश्रयात्सर्व्वे वयमस्य महात्मनः । ११०१५
प्रणष्टशोका रंस्यामः सर्व्व एवामरासुखं । एवं स्तुत्वा सहस्राक्षः केशवं दानवान्तकं ।

आपृच्छ्य तं महाभागं सर्व्वैर्देवगणैर्वृतः । ततः पुनः परिष्वज्य कृष्णं लोकनमस्कृतं ।
पुरन्दरो दिवं यातः सहदेवैर्मरुद्गणैः । ऋषयश्च महात्मानो जयाशीर्भिर्महौजसः ।
यथागतं पुनर्याता यक्षराक्षसकिन्नराः । पुरन्दरे दिवं याते पद्मनाभो महाबलः ।
अपृच्छत महाभागः सर्व्वान् कुशलमव्ययं । ततः किलकिलाशब्दैर्निर्धावन्तः सहस्रशः । ११०२०
गच्छन्तीं कौमुदीं द्रष्टुं सोऽनघः प्रीयते सदा । द्वारकां प्राप्य कृष्णस्तु रेमे यदुगणैः सह ।
विविधैः सर्व्वकामार्थैः श्रिया परमया युतः ।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि ऊननवत्यधिकशततोऽध्यायः ॥ १८९ ॥
॥ वैशम्पायन उवाच ॥ अथाहुको महाबाहुः कृष्णं प्राह महाद्युतिं । हर्षादुत्फुल्लनयनः श्रूयतां यदुनन्दन ।
एवं गतेऽनिरुद्धस्य क्रियतां महदुत्सवः । येनात्मत्यागतं दृष्ट्वा सेव्यमानं सहागतैः ।
ऊषाऽपि च महाभागा सखीभिः परिवारिता । रमते परया प्रीत्या अनिरुद्धेन सङ्गता । ११०२५
कुम्भाण्डदुहिता रामा ऊषायाः सखिमण्डले । प्रवेश्यतां महाभागा वैदर्भी वर्द्धयत्विन ।
साम्बाय दीयतां रामा कुम्भाण्डदुहिता शुभा । शेषाश्च कन्या न्यस्यन्तां कुमाराणां यथाक्रमं ।
वर्त्ततां सोत्सवस्तत्र अनिरुद्धस्य वेश्मनि । गृहे श्रीधन्वनश्चैव शुभस्तत्र प्रवर्त्तते ।
वादयन्ति पुरे तत्र नार्य्यो मदवशङ्गताः । नृत्यन्त्यप्सरसस्तत्र गायन्ति च तथाऽपराः ।
काश्चित्प्रमुदितास्तत्र काश्चिदन्योन्यमब्रुवन् । नानामाल्याम्बरधराः क्रीडमानास्ततस्ततः । ११०३०
अभियान्ति ततोऽन्योन्यं काश्चिन्मदवशात्स्वयं । क्रीडन्ति काश्चिदत्रैस्तु हर्षादुत्फुल्ललोचनाः ।
मायूरं रथमारुह्य सखीभिः परिवारिता । ऊषा संप्रेषिता देव्या रुद्राण्या प्रतिगृह्यतां ।
इयं चैव कुलश्लाघ्या नार्य्येषा लोकसुन्दरी । बाणपुत्री तव वधूः प्रतिगृह्णीष्व भामिनि ।
ततः प्रतिगृहीता सा स्त्रीभिराचारमङ्गलैः । प्रवेशिता च सा वेश्म अनिरुद्धस्य शोभना ।
देवकी रेवती चैव रुक्मिण्यथ विदर्भजा । दृष्ट्वाऽनिरुद्धं रोदन्त्यः स्नेहहर्षसमन्विताः । ११०३५
तत्सर्व्वप्रणादैस्ता वरनार्य्यः शुभाननाः । क्रियामारेभिरे कर्त्तुमूषा च गृहसंस्थिता ।
ततो हर्म्यतलस्था सा वृष्णिपुङ्गवसंश्रिता । रमते तत्र सदृशैरुपभोगैर्व्वराङ्गना ।
चित्रलेखा च सुश्रोणी अप्सरा रूपधारिणी । आपृष्ट्वा च सखीवर्गमूषाञ्च त्रिदिवं गता ।
गतासु तासु सर्व्वासु सखीष्वसुरसुन्दरी । मायावत्या गृहं नीता प्रथमं सा निमन्त्रिता ।
सा तु प्रद्युम्नगृहिणी स्नुषां दृष्ट्वा सुमध्यमा । वासोभीरन्नपानैश्च पूजयामास सुन्दरीं । ११०४०
ततः क्रमेण सर्व्वास्ता वधूमूषां यदुस्त्रियः । आचारमनुरक्षन्त्यः स्वधर्ममुपचक्रिरे ।
॥ वैशम्पायन उवाच ॥ एतत्ते सर्व्वमाख्यातं मया कुरुकुलोद्वह । यथा बाणो जितः संख्ये श्रीवत्साङ्कस्य विष्णुना ।
द्वारकायां ततः कृष्णो रेमे यदुगणैर्वृतः । प्रशशास महीं कृत्स्नां श्रिया परमया युतः ।
एवमेषोऽवतीर्णो वै पृथिवीं पृथिवीपते । विष्णुर्यदुकुलश्रेष्ठो वासुदेवेति विश्रुतः ।
एतैश्च कारणैः श्रीमान् वसुदेवकुले प्रभुः । जातो वृष्णिषु देवक्यां यन्मां त्वं परिपृच्छसि । ११०४५

निवृत्ते नारदप्रश्ने यन्मयोक्तं समासतः। श्रुतास्ते विस्तराः सर्व्वे ये पूर्व्वं जनमेजय।
विष्णोस्तु माथुरे कल्पे यत्र ते संशयो महान्। वासुदेवगतिश्चैव सा मया समुदाहृता।
आश्चर्य्यश्चैव नान्योऽस्ति आश्चर्य्यं विद्धि केशवं। सर्व्वेष्वाश्चर्य्यकल्पेषु नास्त्याश्चर्य्यमवैष्णव।
स एष धन्यो धन्यानां धन्यकृद्धन्यभावनः। देवेष्वपि सदैत्येषु नास्ति धन्यतरोऽच्युतात्।
आदित्या वसवो रुद्रा अश्विनौ मरुतस्तथा। गगनं भूर्द्दिशश्चैव सलिलं ज्योतिरेव च। ११०५०
एष धाता विधाता च संहर्त्ता काल एव च। सत्यं धर्म्मस्तपश्चैव ब्रह्मा चैव सनातनः।
अनन्तश्चैव नागानां रुद्राणां शङ्करः स्मृतः। जङ्गमाजङ्गमश्चैव जगन्नारायणोद्भवं।
एतस्माच्च जगत् सर्व्वं प्रसूयेत जनार्द्दनात्। जगच्च सर्व्वं देवेशस्तं नमस्कुरु भारत।
पूज्यस्स सततं सर्व्वदेवैरेव सनातनः। इत्युक्तं बाणयुद्धं ते माहात्म्यं केशवस्य च
वंशप्रतिष्ठामतुलां श्रवणादेव लप्स्यसे। ये चेदं धारयिष्यन्ति बाणयुद्धमनुत्तमं। ११०५५
केशवस्य च माहात्म्यं नाधर्म्मस्तान् भजिष्यति। एषा ते वैष्णवी चर्य्या मया कार्त्स्न्येन कीर्त्तिता।
पृच्छतस्तात यज्ञे ऽस्मिन्निवृत्ते जनमेजय। आश्चर्य्यपर्व्वमखिलं यो हीदं धारयेन्नरः।
सर्व्वपापविनिर्मुक्तो विष्णुलोकस्स गच्छति। कल्यमुत्थाय यो नित्यं कीर्त्तयेत्सुसमाहितः।
न तस्य दुरितं किञ्चिदिह लोके परत्र च। ब्राह्मणः सर्व्ववेदी स्यात् क्षत्त्रियो विजयी भवेत्।
वैश्यो धनसमृद्धः स्याच्छूद्रो गच्छेच्च सद्गतिं। नाशुभं प्राप्नुयात्किञ्चिद्दीर्घमायुरवाप्नुयात्। ११०६०
॥ सौतिरुवाच ॥ इति पारिक्षितो राजा वैशम्पायनभाषितं। श्रुत्वा प्रीतमना जातो हरिवंशं द्विजर्षभः।
एवं शौनक संक्षेपाद्विस्तरेण तथैव च। प्रोक्ता वै सर्व्ववंशास्ते किम्भूयः श्रोतुमिच्छसि।
इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व्वणि नवत्यधिकशतोऽध्यायः॥ १९० ॥ समाप्तञ्चेदं विष्णुपर्व्व॥

॥ अथ भविष्यपर्व्व ॥

॥ शौनक उवाच ॥ जनमेजयस्य के पुत्त्राः पठ्यन्ते लौमहर्षणे। कस्मिन् प्रतिष्ठितो वंशः पाण्डवानां महात्मनां।
एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे। तत्त्वः श्रुतवतां श्रेष्ठ सर्व्वविद्यासि मे मतः।
॥ सौतिरुवाच ॥ पारिक्षितस्य काश्यायां द्वौ पुत्त्रौ सम्बभूवतुः। चन्द्रापीडश्च नृपतिः सूर्य्यापीडश्च मोक्षवित्। ११०६५
चन्द्रापीडस्य पुत्त्राणां शतमुत्तमधन्विनां। जानमेजय इत्येवं क्षात्त्रं भुवि परिश्रुतं।
तेषां ज्येष्ठस्तु राजासीत् पुरे वारणसाह्वये। सत्यकर्णो महाबाहुर्यज्वा विपुलदक्षिणः।
सत्यकर्णस्य दायादः श्वेतकर्णः प्रतापवान्। अपुत्त्रः स तु धर्म्मात्मा प्रविवेश तपोवनं।
तस्माद्वनगताद्गर्भं यादवी प्रत्यपद्यत। सुचारोर्दुहिता सुभ्रूर्म्मालिनी श्मालमालिनी।
स तु जन्मनि गर्भस्य श्वेतकर्णः प्रजेश्वरः। अन्वगच्छद्गतं पूर्व्वैर्म्महाप्रस्थानमच्युत। ११०७०
सा दृष्ट्वा संप्रयातं तं मालिनी पृष्ठतोऽन्वगात्। पथि सा सुषुवे सुभ्रूर्व्वने राजीवलोचनं।
कुमारं तं परित्यज्य भर्त्तारं सान्वगच्छत। पतिव्रता महाभागा द्रौपदीव पुरा सती।

सुकुमारः कुमारोऽसौ गिरिकुञ्जे रुरोद ह । पुष्यार्थं तस्य मेघास्तु प्रादुरासन्महात्मनः ।
श्रविष्ठायाश्च पुत्रौ द्वौ पैप्पलादिश्च कौशिकः । दृष्ट्वा कृपान्वितौ गृह्य तौ प्रक्षालयतां जले ।
निघृष्टौ तस्य तौ पार्श्वौ शिलायां रुधिरस्रुतौ । अजश्यामौ तु पार्श्वौ तावुभावपि समाहितौ । ११०७५
तथैव च समारूढावजपार्श्वस्ततोऽभवत् । ततोऽजपार्श्व इति तौ चक्राते नाम तस्य ह ।
स तु वेमकशालायां द्विजाभ्यां परिवर्द्धितः । वेमकस्य तु भार्य्या तमुद्वहत् पुत्रकारणात् ।
वेमक्याः स तु पुत्रोऽभूद्ब्राह्मणौ सचिवौ तु तौ । तेषां पुत्राश्च पौत्राश्च युगपत्तुल्यजीविनः ।
स एष पौरवो वंशः पाण्डवानां प्रतिष्ठितः । श्लोकोऽपि चात्र गीतोऽयं नाहुषेण ययातिना ।
जरासंक्रमणे पूर्व्वं भृशं प्रीतेन धीमता । आचन्द्रार्कग्रहा भूमिर्भवेदपि न संशयः । ११०८०
अपौरवा न तु मही भविष्यति कदाचन ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि एकनवत्यधिकशततोऽध्यायः ॥ १९१ ॥

॥ शौनक उवाच ॥ उक्तोऽयं हरिवंशस्ते पर्व्वाणि निखिलानि च । यथा पुरोक्तानि तथा व्यासशिष्येण धीमता ।
तत् कथ्यमानममितमितिहाससमन्वितं । प्रीणात्यस्मानमृतवत्सर्व्वपापप्रणाशनं ।
सुखश्रव्यतया वीर मनो ह्लादयतीव नः । जनमेजयस्तु नृपतिः श्रुत्वा चाख्यानमुत्तमं ।
सौते किमकरोत् पश्चात्सर्पसत्रादनन्तरं । ११०८५
॥ सौतिरुवाच ॥ जनमेजयस्तु स नृपः श्रुत्वाख्यानमनुत्तमं । यदारभत्तदाख्यास्ये सर्पसत्रादनन्तरं ।
तस्मिन् सत्रे समाप्ते तु राजा पारिक्षितस्तदा । संयष्टुं वाजिमेधेन सम्भारानुपचक्रमे ।
ऋत्विक्पुरोहिताचार्य्यानाहूयेदमुवाच ह । यक्ष्येऽहं वाजिमेधेन हय उत्सृज्यतामिति ।
ततोऽस्य विज्ञाय चिकीर्षितं तदा कृष्णो महात्मा सहसा जगाम । पारिक्षितं द्रष्टुमदीनसत्त्वो द्वैपायनः सर्व्वपरावरज्ञः ।
पारिक्षितस्तु नृपतिर्दृष्ट्वा तमृषिमागतं । अर्घ्यपाद्यासनं दत्त्वा पूजयामास शास्त्रतः । ११०९०
तौ चोपविष्टावभितः सदस्यास्तस्य शौनक । कथा बहुविधाश्चित्राश्चक्रुर्वेदार्थसंहिताः ।
ततः कथान्ते नृपतिश्चोदयामास तं मुनिं । पितामहं पाण्डवानामात्मनः प्रपितामहं ।
महाभारतमाख्यानं बह्वर्थं श्रुतिविस्तरं । निमेषमात्रमपि मे सुखश्रव्यतयागतं ।
विभूतिविस्तरकरं सर्व्वेषां वै यशस्करं । त्वया सुविहितं ब्रह्मन् शङ्खे चोरमिवाहितं ।
अमृतेन न तृप्तिः स्याद्यथा स्वर्गसुखेन वा । तथा तृप्तिं न गच्छामि श्रुत्वेमां भारतीं कथां । ११०९५
अनुमान्य तु सर्व्वज्ञं पृच्छामि भगवन्नहं । हेतुः कुरूणां नाशस्य राजसूयो मतो मम ।
दुःसहानां यथा ध्वंसो राजन्यानामुपप्लवः । राजसूयं तथा मन्ये युद्धार्थमुपकल्पितं ।
राजसूयस्तु सोमेन श्रूयते पूर्व्वमाहृतः । तस्यान्ते सुमहद्युद्धमभवत्तारकामयं ।
आहृतो वरुणेनाथ तस्यान्ते सुमहाक्रतौ । देवासुरमहायुद्धं सर्व्वभूतक्षयावहं ।
हरिश्चन्द्रस्य राजर्षेः क्रतुमेतमुपाहरत् । तत्राप्याडीवकं युद्धमभूत् क्षत्रियनाशनं । १११००
ततोऽनन्तरमार्य्येण पाण्डवेनातिदुस्तरः । महाभारतसम्भारः संभृतोऽग्निरिव क्रतुः ।

तदस्य मूलं युद्धस्य लोकक्षयकरस्य च । राजसूयो महायज्ञः किमर्थं न निवारितः।
राजसूये ह्यसंहार्य्ये यज्ञाङ्गैश्च दुरन्वयैः । मिथ्याप्रणीते यज्ञाङ्गे प्रजानां संक्षयो ध्रुवः ।
भवानपि च सर्व्वेषां पूर्व्वेषां नः पितामहः । अतीतानागतज्ञश्च नाथश्चादिकरश्च नः ।
ते कथं भवता नेत्रा बुद्धिमन्तश्च्युता नयात् । अनाथा ह्यपराध्यन्ति कुनेतारश्च पार्थिवाः । ११०५
॥ व्यास उवाच ॥ कालेन विपरीतास्ते तव पूर्व्वपितामहाः । न मां भविष्यं पृच्छन्ति न चापृष्टो ब्रवीम्यहं ।
सामर्थ्यञ्च न पश्यामि भविष्यस्य निवर्त्तने । परिहर्त्तुं न शक्या हि कालेन विहिता गतिः ।
त्वया त्विदमहं पृष्टो वक्ष्याम्यागन्तुभावि यत् । अतश्च बलवान् कालः श्रुत्वाऽपि न करिष्यसि ।
न संरम्भान्नचारम्भान्न वै स्थास्यति पौरुषे । लेखा हि कालविहिता सर्व्वथा दुरतिक्रमा ।
अश्वमेधः क्रतुश्रेष्ठः क्षत्रियाणां परिश्रुतः । तेन भाविन ते यज्ञं वासवो धर्षयिष्यति । ११११०
यदि तच्छक्यते राजन् परिहर्त्तुं कथञ्चन । दैवं पुरुषकारेण मा यजेथास्तं क्रतुं ।
नचापराधः शक्रस्य नोपाध्यायगणस्य ते । न च वा यजमानस्य कालो हि दुरतिक्रमः ।
तस्य संस्थानमिदं कालस्य परमेष्ठिनः । यथा सृष्टं प्रजासर्गं गमिष्यति युगक्षये ।
तथा यज्ञफलानाञ्च विक्रेतारो द्विजातयः । तत्प्रमेयं निबोध त्वं त्रैलोक्यं सचराचरं ।
॥ जनमेजय उवाच ॥ निवृत्तावश्वमेधस्य किं निमित्तं भविष्यति । श्रुत्वा परिहरिष्यामि भगवन् यदि मन्यसे । १११११५
॥ व्यास उवाच ॥ निमित्तं भविता तत्र ब्रह्मकोपकृतं प्रभो । यत्नतः परिहर्त्तुं त्वमित्येतद्भद्रमस्तु ते ।
त्वया वृत्ते क्रतुश्चैव वाजिमेधं परन्तप । क्षत्रिया नाहरिष्यन्ति यावद्भूमिर्द्धरिष्यति ।
॥ जनमेजय उवाच ॥ निवृत्तावश्वमेधस्य ब्रह्मशापाग्नितेजसा । अहं निमित्तमिति मे भयं व्रीडा च जायते ।
कथं ह्यकीर्त्या संयुक्तः सुकृती मद्विधो जनः । लोकाननुसरते गन्तुं खं सपाश इव द्विजः ।
यथा ह्यनागतमिदं दृष्टमत्र मयाद्य ते । यद्यस्ति पुनरावृत्तिर्यज्ञस्याश्वासयस्व मां । ११११२०
॥ व्यास उवाच ॥ उपात्तयज्ञो देवेषु ब्राह्मणेषूपपत्स्यते । तेजसाऽभ्याहृतं तेजस्तेजःस्वेवावतिष्ठते ।
औद्भिज्जो भविता कश्चित् सेनानीः काश्यपो द्विजः । सोऽश्वमेधं कलियुगे पुनः प्रत्याहरिष्यति ।
तदन्ते तत्कुलीनश्च राजसूयमपि क्रतुं । आहरिष्यति राजेन्द्र श्वेतं ग्रहमिवान्तकः ।
यथा बलं मनुष्याणां कर्त्तॄणां दास्यते फलं । युगान्तद्वारमृषिभिः संवृतं विचरिष्यति ।
तदाप्रभृति हास्यन्ति मृषा माणाः पुराकृतीः । न निवर्त्तिष्यते लोका वृत्तान्तावर्त्तनेष्विह । १११२५
तदा सूक्ष्मो महोदर्को दुस्तरो दानमूलवान् । चातुराश्रम्यशिथिलो धर्म्मः प्रविचलिष्यति ।
तदा ह्यल्पेन तपसा सिद्धिं यास्यन्ति मानवाः । धन्या धर्म्मं चरिष्यन्ति युगान्ते जनमेजय ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि द्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥
॥ जनमेजय उवाच ॥ आसन्नं विप्रकृष्टं वा यदि कालं न विद्महे । तदा द्वापरपर्य्यन्तं युगान्तं स्पृहयाम्यहं ।
प्राप्ता वयं तु तत्कालमनया धर्म्मतृष्णया । आदास्यामः परं धर्म्मं सुखमल्पेन कर्म्मणा ।
॥ शौनक उवाच ॥ प्रजासमुद्वेगकरं युगान्तं समुपस्थितं । प्रनष्टधर्म्मं धर्म्मज्ञ निमित्तैर्वक्तुमर्हसि । १११३०

॥ सौतिरुवाच ॥ पृष्ट एवं भविष्यस्य गतिं तत्त्वेन चिन्तयन् । युगान्ते सर्व्वभूतानां भगवानब्रवीत्तदा ।
॥ व्यास उवाच ॥ अरक्षितारो हर्त्तारो बलिभागस्य पार्थिवाः । युगान्ते प्रभविष्यन्ति स्वरक्षणपरायणाः ।
क्षत्रियाश्च राजानो विप्राः शूद्रोपजीविनः । शूद्राश्च ब्राह्मणाचारा भविष्यन्ति युगक्षये ।
काण्डस्पृष्टाः श्रोत्रियाश्च निष्क्रियाणि हवींष्यथ । एकपंक्त्यामशिष्यन्ति युगान्ते जनमेजय ।
शिल्पवन्तोऽनृतपरा नरा मद्यामिषप्रियाः । मित्रभार्य्याभजिष्यन्ति युगान्ते जनमेजय । १११३५
राजवृत्ते स्थिताश्चौरा राजानश्चौरशीलिनः । भृत्या अनिर्द्दिष्टभुजो भविष्यन्ति युगक्षये ।
धनानि श्लाघनीयानि सतां वृत्तमपूजितं । अकुत्सना च पतिते भविष्यति युगक्षये ।
प्रनष्टचेष्टाः पुरुषा मुक्तकेशा विचूलिनः । ऊनषोडशवर्षाश्च प्रजास्यन्ति तदा नराः ।
अट्टशूला जनपदाः शिवशूलाश्चतुष्पथाः । प्रमदाः केशशूलाश्च भविष्यन्ति युगक्षये ।
सर्व्वे ब्रह्म वदिष्यन्ति सर्व्वे वाजसनेयिनः । शूद्रा भोवादिनश्चैव भविष्यन्ति युगक्षये । १११४०
तपोयज्ञफलानाञ्च विक्रेतारो द्विजातयः । ऋतवश्च भविष्यन्ति विपरीता युगक्षये ।
शुक्लदन्ताऽञ्जिताक्षाश्च मुण्डाः काषायवाससः । शूद्रा धर्म्मं चरिष्यन्ति शाक्यबुद्धोपजीविनः ।
श्वापदप्रचुरत्वञ्च गवाञ्चैव परिक्षयः । स्वादूनां विनिवृत्तिश्च ज्ञातव्या तु गते युगे ।
अन्त्या मध्ये निवत्स्यन्ति मध्याश्चान्तनिवासिनः । यथानिम्नं प्रजाः सर्व्वा गमिष्यन्ति युगक्षये ।
तथा द्विहायना दम्यास्तथा पल्वलकर्षकाः । चित्रवर्षी च पर्ज्जन्यो युगे क्षीणे भविष्यति । १११४५
सर्व्वे चौरकुले जातास्चोरयन्तः परस्परं । स्वल्पेनाढ्या भविष्यन्ति यत्किञ्चित् प्राप्य दुर्गताः ।
न च धर्म्मञ्चरिष्यन्ति मानवा निर्गते युगे । ऊषार्कबहुला भूमिः पन्थानस्तस्कराहृताः ।
सर्व्वे वाणिजकाश्चैव भविष्यन्ति कलौ युगे । पितृदत्तानि देयानि विभजन्ते सुतास्तदा ।
हरणाय प्रपत्स्यन्ते लोभादनृतवादिनः । सौकुमार्य्ये तथा रूपे रत्ने चोपक्षयङ्गते ।
भविष्यन्ति युगान्ते च नार्य्यः केशैरलङ्कृताः । निर्व्विहारस्य भीतस्य गृहस्थस्य भविष्यति । १११५०
युगान्ते समनुप्राप्ते नान्या भार्य्यासमा गतिः । कुशीलानार्य्यभूयिष्ठं वृथारूपसमावृतं ।
पुरुषाल्पं बहुस्त्रीकं तद्युगान्तस्य लक्षणं । बहुयाचनको लोको न दास्यन्ति परस्परं ।
अविचार्य्य ग्रहीष्यन्ति दानं वर्णान्तरात्तथा । राजचौराग्निदण्डार्त्तो जनः क्षयमुपैष्यति ।
शस्यनिष्पत्तिरफला तरुणा वृद्धशीलिनः । ईहया सुखिनो लोका भविष्यन्ति युगक्षये ।
वर्षासु वाताः परुषा नीचैः शर्करवर्षिणः । सन्दिग्धः परलोकश्च भविष्यति युगक्षये । १११५५
वैश्या इव च राजन्या धनधान्योपजीविनः । युगापक्रमणे पूर्व्वं भविष्यन्ति द्विजातयः ।
अप्रवृत्ताः प्रपत्स्यन्ते समयाः शपथास्तथा । ऋणं सविनयभ्रंशं युगे क्षीणे भविष्यति ।
भविष्यत्यफलो हर्षः क्रोधश्च सफलो नृणां । अजाश्चैवोपरोत्स्यन्ते पयसोऽर्थे युगक्षये ।
अशास्त्रविदुषां पुंसामेवमेव स्वभावतः । शास्त्रोक्तस्य प्रवक्तारो भविष्यन्ति युगक्षये ।
सर्व्वः सर्व्वं विजानाति वृद्धाननुपसेव्य वै । न कश्चिदकविर्नाम युगान्ते समुपस्थिते । १११६०

न व्रतानि चरिष्यन्ति विकर्मस्था द्विजातयः । चौरप्रायाश्च राजानो युगान्ते समुपस्थिते ।
कुण्डीवृषा नैकृतिकाः सुरापा ब्रह्मवादिनः । अश्वमेधेन यक्ष्यन्ति युगान्ते जनमेजय ।
याजयिष्यन्त्ययाज्यांश्च तथा चाभक्ष्यभक्षिणः । ब्राह्मणा धनतृष्णार्त्ता युगान्ते समुपस्थिते ।
भोःशब्दमभिधास्यन्ति न च कश्चित् पठिष्यति । एकशङ्खास्तथा नार्य्यो गवेधुकपिनद्धिकाः ।
नक्षत्राणि विवर्णानि विपरीता दिशस्तथा । सन्ध्यारागोऽथ दिग्दाहो भविष्यत्यधरे युगे । ११६५
पितॄन् पुत्रा नियोक्ष्यन्ति वध्वः श्वश्रूश्च कर्मसु । वाक्शरैस्तर्ज्जयिष्यन्ति गुरून् शिष्यास्तथैव च ।
वियोनिषु च वत्स्यन्ति प्रमदासु नरास्तथा । मुखेषु च प्रयोक्ष्यन्ति प्रमत्ताश्च नरास्तदा ।
अकृताग्राणि भोक्ष्यन्ति नराश्चैवाग्निहोत्रिणः । भिक्षां बलिमदत्त्वा च भोक्ष्यन्ति पुरुषाः स्वयं ।
पतीन् सुप्तान् वञ्चयित्वा गमिष्यन्ति स्त्रियोऽन्यतः । पुरुषाश्च प्रसुप्तासु भार्य्यासु च परस्त्रियं ।
नाव्याधितो नाप्यरुजः सर्व्व एवाभ्यसूयकः । न कृते प्रतिकर्त्ता च युगे क्षीणे भविष्यति । ११७०
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि त्रिनवत्यधिकशतोऽध्यायः ॥ १८३ ॥
॥ जनमेजय उवाच ॥ एवं विलुलिते लोके मनुष्याः केन पालिताः । निवत्स्यन्ति किमाचाराः किमाहारविहारिणः ।
किङ्कर्म्माणः किमीहन्तः किंप्रमाणाः किमायुषः । कांश्च काष्ठां समासाद्य प्रपत्स्यन्ते कृतं युगं ।
॥ व्यास उवाच ॥ अत ऊर्द्ध्वं च्युते धर्म्मे गुणहीनाः प्रजास्ततः । शीलव्यसनमासाद्य प्राप्स्यन्ते ह्रासमायुषः ।
आयुर्हान्या बलग्लानिर्ब्बलग्लान्या विवर्णता । वैवर्ण्याद्व्याधिसंपीडा निर्व्वेदो व्याधिपीडनात् ।
निर्व्वेदादात्मसम्बोधः सम्बोधाद्धर्म्मशीलता । एवं गत्वा परां काष्ठां प्रपत्स्यन्ते कृतं युगं । ११७५
उद्देशतो धर्म्मशीलाः केचिन्मध्यस्थतां गताः । विमर्षशीलाः केचित्तु हेतुवादकुतूहलाः ।
प्रत्यक्षमनुमानञ्च प्रमाणमिति निश्चिताः । प्रमाणैक्यं करिष्यन्ति नेति पण्डितमानिनः ।
अप्रमाणं करिष्यन्ति वेदोक्तमपरे जनाः । तदा सुखभगाश्चैव भविष्यन्ति स्त्रियोऽपराः ।
नास्तिक्यपरमाश्चापि केचिद्धर्म्मविलोपकाः । भविष्यन्ति नरा मन्दा मूढाः पण्डितमानिनः ।
तदात्वमात्रश्रद्धेयाः शास्त्रज्ञानबहिष्कृताः । दाम्भिकास्ते भविष्यन्ति वादशीलकुतूहलाः । ११८०
तथा विलुलिते धर्म्मे जनाः श्रेयपुरस्कृताः । शुभान्येवाचरिष्यन्ति दानसत्यसमन्विताः ।
सर्व्वभक्षः स्वयंगुप्तो निर्घृणो निरपत्रपः । भविष्यति तदा लोकस्तत् कषायस्य लक्षणं ।
विप्राणां शाश्वतीं वृत्तिं यदा वर्णावरो जनः । अभिपत्स्यति वृत्त्यर्थं तत्कषायस्य लक्षणं ।
कषायोपप्लवे काले ज्ञानविद्याप्रणाशने । सिद्धिमल्पेन कालेन यास्यन्ति निरुपस्कृताः ।
महायुद्धं महावातं महावर्षं महाभयं । भविष्यति युगे क्षीणे तत्कषायस्य लक्षणं । ११८५
विप्ररूपाणि रक्षांसि राजानः कर्ण्णवेदिनः । पृथिवीमुपभोक्ष्यन्ति युगान्ते समुपस्थिते ।
निःस्वाध्यायवषट्कारा अनेयाश्चाभिमानिनः । क्रव्यादा ब्रह्मरूपेण सर्व्वभक्षा वृथाव्रताः ।
मूर्खाः स्वार्थपरा लुब्धाः क्षुद्राः क्षुद्रपरिच्छदाः । व्यवहारापवृत्ताश्च च्युता धर्म्माच्च शाश्वतात् ।
हर्त्तारः पररत्नानां परदारप्रधर्षकाः । कामात्मानो दुरात्मानः सोपधाः प्रियसाहसाः ।

तेषु प्रभवमाणेषु तुल्यशीलेषु सर्व्वशः । अभाविनो भविष्यन्ति मुनयो बहुरूपिणः । ११९९०
उत्पन्ना ये कृतयुगे प्रधानपुरुषाश्रयाः । कथायोगेन तान् सर्व्वान् पूजयिष्यन्ति मानवाः ।
शस्यचोरा भविष्यन्ति तथा चैलापहारिणः । भक्ष्यभोज्यहराश्चैव करण्डानाञ्च हारिणः ।
चौराश्चौरस्य हर्त्तारो हर्त्ता हर्त्तुर्भविष्यति । चौरैश्चौरक्षये चापि कृते क्षेमं भविष्यति ।
निःसारे क्षुभिते लोके निष्क्रिये व्यन्तरे स्थिते । नराः श्रयिष्यन्ति वनं करभारप्रपीडिताः ।
पितॄनाज्ञापयिष्यन्ति पुत्त्राः कर्म्मणि सर्व्वशः । स्नुषाः श्वश्रूस्तथा चैव युगान्ते पर्य्युपस्थिते । ११९९५
वाक्शरैस्तर्ज्जयिष्यन्ति गुरून् शिष्याः समन्ततः । यज्ञकर्म्मण्युपरते रक्षांसि श्वापदानि च ।
कीटमूषिकसर्पाश्च धर्षयिष्यन्ति मानवान् । क्षेमं सुभिक्षमारोग्यं सामग्र्यञ्चापि बन्धुषु ।
उद्देशतो नरश्रेष्ठ भविष्यति युगक्षये । स्वयं पालाः स्वयं चौरा युगसम्भारसम्भृताः ।
मण्डलैः प्रचरिष्यन्ति देशे देशे पृथक् पृथक् । स्वदेशेभ्यः परिभ्रष्टा निःसाराः सह बन्धुभिः ।
नराः सर्व्वे भविष्यन्ति तदा कालपरिक्षयात् । ततः स्कन्धैः समादाय कुमारान् विद्रुता भयात् । १२०००
कौशिकीं प्रतरिष्यन्ति नराः क्षुद्भयपीडिताः । अङ्गान् वङ्गान् कलिङ्गांश्च काश्मीरानथ मेकलान् ।
ऋषिकान्तगिरिद्रोणीः संश्रयिष्यन्ति मानवाः । कृत्स्नञ्च हिमवत्पार्श्वं कूलञ्च लवणाम्भसः ।
अरण्येषु निवत्स्यन्ति नराः म्लेच्छगणैः सह । नैव शून्या न चाशून्या भविष्यति वसुन्धरा ।
गोप्तारश्चाप्यगोप्तारः प्रभविष्यन्ति शस्त्रिणः । मृगैर्म्मत्स्यैर्व्विहङ्गैश्च श्वापदैः सर्पकीटकैः ।
मधुशाकफलैर्मूलैर्व्वर्त्तयिष्यन्ति मानवाः । चीरं पर्णञ्च विविधं वल्कलान्यजिनानि च । १२००५
स्वयंकृतानि वत्स्यन्ति यथा मुनिजनास्तथा । वीजानामाकृतं निम्नेष्वीहन्तः काष्ठशङ्कुभिः ।
अजैडकं खरोष्ट्रञ्च पालयिष्यन्ति यत्नतः । नदीस्रोतांसि रोत्स्यन्ति तोयार्थं कूलमाश्रिताः ।
पक्वान्नव्यवहारेण विपणन्तः परस्परं । तनूरुहैर्यथा जातैः समूलान्तरसम्भृतैः ।
बह्वपत्याः प्रजाहीनाः कुललक्षणवर्ज्जिताः । एवं भविष्यन्ति तदा मनुष्याः कालकारिताः ।
हीनाद्धीनं तथा धर्म्मं प्रजा समनुपत्स्यति । आयुस्तत्र च मर्त्त्यानां परं त्रिंशद्भविष्यति । १२०१०
दुर्ब्बला विषयग्लाना जरसा समभिप्लुताः । भविष्यन्ति तदा तेषां रोगैरिन्द्रियसंक्षयः ।
आयुःप्रत्ययसंरोधाद्धिंसा च न भविष्यति । शुश्रूषवो भविष्यन्ति साधूनां दर्शने रताः ।
सत्यञ्च प्रतिपत्स्यन्ति व्यवहारोपसंक्षयात् । भविष्यन्ति हि कामानामलाभाद्धर्म्मशीलिनः ।
करिष्यन्ति च सङ्कोचं स्वपक्षक्षयपीडिताः । एवं शुश्रूषवो दाने सत्ये प्राणाभिरक्षणे ।
चतुष्पादः प्रवृत्तस्य धर्म्मः श्रेयोऽभिपत्स्यते । तेषां लब्धानुमानानां गुणेषु परिवर्त्ततां । १२०१५
स्वादु किन्निति विज्ञाय धर्म्म एव वदिष्यति । यथा हानिः क्रमप्राप्ता तथा वृद्धिः क्रमागता ।
प्रगृहीते ततो धर्म्मे प्रपत्स्यति कृतं युगं । साधुवृत्तिः कृतयुगे कषाये हानिरुच्यते ।
एक एव तु कालः स हीनवर्णो यथा शशी । छन्नो हि तमसा सोमो यथा कलियुगे तथा ।
पूर्णश्च तमसा हीनो यथा कृतयुगे तथा । अर्थवादः परं ब्रह्म वेदार्थ इति तं विदुः ।

अनिर्णिक्तमविज्ञातं दाया द्यमिव धार्य्यते । इष्टवादस्तपो नाम तपो हि स्थावरं कृतं ।
गुणैः कर्म्माभिनिर्वृत्तैर्निर्गुणस्तथ्येन कर्म्मणा । आशीस्तु पुरुषं दृष्ट्वा देशकालानुवर्त्तिनी ।
युगे युगे यथाकालमृषिभिः समुदाहृता । इह धर्म्मार्थकामानां वेदानाञ्च प्रतिक्रिया ।
आशिषश्च शुभाः पुण्यास्तथा चायुर्युगे युगे ।
तथा युगानां परिवर्त्तनानि चिरप्रवृत्तानि विधिस्वभावात् । क्षणं न संतिष्ठति जीवलोकः क्षयोदयाभ्यां परिवर्त्तमानः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि चतुर्नवत्यधिकशततोऽध्यायः ॥ १९४ ॥
॥ सौतिरुवाच ॥ इत्येवमाश्वासयतो राजानं जनमेजयं । अतीतानागतं वाक्यमृषेः परिषदा श्रुतं ।
अमृतस्येव संवादः प्रभा चन्द्रमसो यथा । अतर्पयत तच्छ्रोत्रं महर्षेर्व्वाङ्मयो रसः ।
धर्म्मकामार्थसंयुक्तं करुणं वीरहर्षणं । रमणीयं तदाख्यानं कृत्स्नं परिषदा श्रुतं ।
केचिदश्रूणि मुमुचुः श्रुत्वा दध्युस्तथा परे । इतिहासं तमृषिणा पाराशर्य्येण दर्शितं ।
सदस्यान् सोऽभ्यनुज्ञाय कृत्वा चापि प्रदक्षिणं । पुनर्द्रक्ष्याम इत्युक्त्वा जगाम भगवानृषिः ।
अनुजग्मुस्ततः सर्व्वे व्रजन्तमृषिसत्तमं । लोके प्रवदतां श्रेष्ठं ये विशिष्टास्तपोधनाः ।
याते भगवति व्यासे विप्राः सह महर्षिभिः । ऋत्विजः पार्थिवाश्चैव प्रतिजग्मुर्यथागतं ।
पन्नगानां सुघोराणां कृत्वा तां वैरयातनां । जगाम रोषमुत्सृज्य राजा विषमिवोरगः ।
होत्राग्निदीप्तशिरसं परित्राय च तक्षकं । आस्तीकोऽप्याश्रमपदं जगाम सहसा मुनिः ।
राजाऽपि हास्तिनपुरं विवेश स्वजनावृतः । अन्वशासच्च मुदितस्तदा प्रमुदिताः प्रजाः ।
कस्यचित्त्वथ कालस्य स राजा जनमेजयः । दीक्षितो वाजिमेधाय विधिवद्भूरिदक्षिणः ।
संज्ञप्तमश्वं तस्याथ देवी काश्या वपुष्टमा । संविवेशोपसंगम्य विधिदृष्टेन कर्म्मणा ।
तां तु सर्व्वानवद्याङ्गीं चकमे वासवस्तदा । संज्ञप्तमश्वमाविश्य तया मिश्रीबभूव सः ।
तस्मिन् विकारे जनिते विदित्वा तत्त्वतश्च तत् । असंज्ञप्तोऽयमश्वस्ते ध्वंसेत्यध्वर्य्युमब्रवीत् ।
अध्वर्य्युर्ज्ञानसम्पन्नस्तदिन्द्रस्य विचेष्टितं । कथयामास राजर्षेः शशाप स पुरन्दरं ।
॥ जनमेजय उवाच ॥ यद्यस्ति मे यज्ञफलं तपो वा रक्षतः प्रजाः । फलेन तेन सर्व्वेण ब्रवीमि श्रूयतामिदं ।
अद्यप्रभृति देवेन्द्रमजितेन्द्रियमस्थिरं । क्षत्रिया वाजिमेधेन न यक्ष्यन्तीति शौनक ।
ऋत्विजश्चाब्रवीत् क्रुद्धः स राजा जनमेजयः । दौर्ब्बल्यं भवतामेतद्यदयं धर्षितः क्रतुः ।
विषये मे न वस्तव्यं गच्छत त्वं सह बान्धवैः । इत्युक्तास्तत्यजुर्व्विप्रास्तं नृपं जातमन्यवः ।
अमर्षादन्वशासच्च पत्नीशालागताः स्त्रियः । राजा परमधर्म्मज्ञस्तामसौ जनमेजयः ।
असतीं वपुष्टमाञ्चैव निर्यातयत मे गृहात् । यया मे चरणौ मूर्द्ध्नि पातितौ रेणुगुण्ठितौ ।
शौटीर्य्यं मे यया भग्नं यशो मानश्च दूषितः । नैतां द्रष्टुमपीच्छामि परिक्लिष्टामिव स्रजं ।
न स्वादु सोऽश्नाति नरः सुखं स्वपिति वा रहः । अन्वास्ते यः प्रियां भार्य्यां परेण मृदितामिह ।
एवमुक्तैः प्रभाषन्तं क्रुद्धं पारिक्षितं नृपं । गन्धर्व्वराजः प्रोवाच विश्वावसुरिदं वचः ।

त्रियज्ञशतयज्वानं वासवस्त्वां न मृष्यति । अप्सरा तेन पत्नी ते विहितेयं वपुष्टमा ।
रम्भा नामाप्सरा देवी काशिराजसुता मता । सैषा योषिद्वरा राजंस्त्वमनाऽनुभूयताम् ११२५०
यश्च विवरमासाद्य विघ्नमिन्द्रेण ते कृतं । यज्वा ह्यसि कुरुश्रेष्ठ सम्राट्या वासवोपमः ।
बिभेत्यभिभवात्तुभ्यं स तव क्रतुफलैर्नृप । तस्मादावर्त्तितश्चैव क्रतुरिन्द्रेण ते प्रभो ।
मायैषा वासवेनेह प्रयुक्ता विघ्नमिच्छता । यश्च विवरमासाद्य संभ्रमं विभ्राजितं ।
कृतमिन्द्रेण रम्भायां मन्यसे यां वपुष्टमां । अथ ते गुरवः शप्तास्त्रियज्ञशतयाजिनः ।
भ्रंशितस्त्वञ्च विप्राश्च फलादिन्द्रसमादिह । त्वत्तो यथैव दुर्द्धर्षास्त्रियज्ञशतयाजिनः । ११२५५
बिभेत्यभिभवात्तद्वद्ब्राह्मणेभ्योऽपि वासवः । एकेन तच्चदुभयं तीर्णं शक्रेण मायया ।
स एष सुमहातेजा विजिगीषुः पुरन्दरः । कथमन्यैरनाचीर्णं नप्तृदारानतिक्रमेत् ।
यथैव हि परा बुद्धिः परो धर्मः परो दमः । यथैव परमैश्वर्यं कीर्त्तिश्च हरिवाहने ।
तथैव त्वयि दुर्द्धर्षे त्रियज्ञशतयाजिनि । मा वासवं मा च गुरुं मात्मानं मा वपुष्टमां ।
गच्छ दोषेण राजेन्द्र कालो हि दुरतिक्रमः । ऐश्वर्येणानया त्वं हि देवेन्द्रेणासि रोषितः । ११२६०
आनुकूल्येन दैवस्य वर्त्तितव्यं सुखार्थिना । दुस्तरं प्रतिकूलं हि प्रतिस्रोत इवाम्भसः ।
स्त्रीरत्नमुपभुंक्ष्वेमामपापां विगतज्वरः । अपापास्त्यज्यमाना वै शपेयुरपि योषितः ।
अदुष्टास्तु स्त्रियो राजन्दिव्यास्तु सविशेषतः । भानोः प्रभा शिखा वह्नेर्वेदी देवि तथाहुतिः ।
परामृष्टाऽप्यसंरक्ता नोपदुष्यन्ति योषितः । याश्च लालयितव्याश्च पूज्याश्च सततं बुधैः ।
शीलवत्यो नमस्कार्याः पूज्याः श्रिय इव स्त्रियः । ११२६५

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि विश्वावसुवाक्ये पञ्चनवत्यधिकशततोऽध्यायः ॥ १९५ ॥

॥ सौतिरुवाच ॥ एवं हि विश्वावसुनाऽनुनीतः प्रसादमागम्य वपुष्टमायाः । चकार मिथ्याव्यतिशङ्कितायाः शान्तिं परां मानवधर्मजुष्टां ।

असमभिविनिवर्त्त्य मानसं सः समभिलषन् जनमेजयो यशः स्वं । विषयमनुशशास धर्मबुद्धिर्मुदितमना रमयन् वपुष्टमान्तां ।
न स विरमति विप्रपूजनाच्च च विनिवर्त्तति शीलयज्ञकामात् । न विषयपरिरक्षणाच्च्युतोऽसौ न च परिगर्हति तां वपुष्टमाञ्च ।
विधिविहितमशक्यमन्यथा हि कर्त्तुं यदृषिरचिन्त्यतपाः पुराऽब्रवीत् सः । इति नरपतिरात्मवांस्तदाऽसौ तदनुचिन्त्य बभूव वीतमन्युः ।
इदं महाकाव्यमृषेर्महात्मनः पठन्नृणां पूज्यतमो भवेन्नरः । प्रकृष्टमायुः समवाप्य दुर्लभं लभेत सर्व्वज्ञफलञ्च केवलं । ११२७०
शतक्रतोः कल्मषविप्रमोक्षणं पठन्निदं मुच्यति किल्बिषान्नरः । तथैव कामान् विविधान् समश्नुते समाप्तकामश्च चिराय नन्दति ।
यथा हि पुष्पप्रभवं फलं द्रुमात्ततः प्रजायन्ति पुनश्च पादपाः । तथा महर्षिप्रभवा इमा गिरः प्रवर्द्धयन्ते नृष्वपि प्रवर्त्तिताः ।
पुत्रानपुत्रो लभते सुवर्चसश्च्युतः पुनर्विन्दति चात्मनः स्थितिं । व्याधिं न चाप्नोति चिरञ्च बन्धनं स्त्रियाश्च पुण्या लभते गुणान्विताः ।

पतिमपि लभते च सत्तु कन्या श्रवणमुपेत्य शुभा मुनेस्तु वाचः । जनयति च सुतं गुणैरुपेतं स्वजनहितं द्विषतां प्रमर्द्दनञ्च ।
विजयति वसुधाञ्च राजवृत्तिर्द्धनमतुलं लभते द्विषज्जयञ्च । विपुलमपि धनं लभेत वैश्यः सुगतिमियात् श्रवणाच्च शूद्र
जातिः । ११२७५

पुराणमेतच्चरितं महात्मनामधीत्य बुद्धिं लभते च नैष्ठिकीं । विहाय दुःखानि विमुक्तसंशयः संवीतरागो विचरेद्वसु
न्धरां ।

इत्येतदाख्यानमुदाहृतं मया प्रतिस्मरन्तो द्विजमण्डलेषु । स्थैर्य्येण धैर्य्येण पुनः स्मरन्तः सुखं भवन्तो विचरन्तु लोके ।
इति चरितमिदं महात्मनामृषिकृतमद्भुतवीर्य्यकर्म्मणां । कथितमिदं हि समासविस्तरैः किमपरमिच्छसि किं ब्रवामि ते ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि षण्णवत्यधिकशततमोऽध्यायः ॥ १९६ ॥

॥ जनमेजय उवाच ॥ प्रभावं पद्मनाभस्य स्वपतः सागराम्भसि । पुष्करे वै यथोद्भूताः देवाः सर्षिगणाः पुरा ।
एतदाख्याहि निखिलं योगं योगविदाम्पते । शृण्वतस्तस्य मे कीर्त्तिं न तृप्तिरुपजायते । ११२८०
कियता चैव कालेन शेते स पुरुषोत्तमः । कियन्तञ्चैव शयिते कालं कालस्य सम्भवः ।
कियता चैव कालेन सोत्तिष्ठति सुरारिहा । कथञ्चोत्थाय भगवानसृजन्निखिलं जगत् ।
के प्रजापतयस्तत्र पूर्व्वमासन्महामुने । कथं निर्म्मितवांश्चैव चित्रं लोकं सनातनः ।
कथमेकार्णवे घोरे नष्टे स्थावरजङ्गमे । नष्टे देवासुरगणे प्रनष्टोरगराक्षसे ।
नष्टानलानिले लोके नष्टाकाशमहीतले । केवलं गह्वरीभूते महाभूतविपर्य्यये । ११२८५
प्रभुर्म्महाभूतपतिर्म्महातेजा महाकृतिः । आस्ते सुरगुरुश्रेष्ठो विधिमादाय कं मुने ।
तन्मे त्वमुपपन्नाय ब्रह्मन्नेतदसंशयं । वक्तुमर्हसि धर्म्मिष्ठ यशो नारायणात्मकं ।
प्रादुर्भावं पुरस्कृत्य भूतं भव्यं महात्मनः । श्रद्धानामुपविष्टानां भगवन् वक्तुमर्हसि ।

॥ वैशम्पायन उवाच ॥ नारायणयशोज्ञाने या भवेद्भवतः स्पृहा । तद्वंशानघभूतस्य कार्य्यं कुरुकुलर्षभ ।
शृणुष्वादिपुराणेभ्यो दैवतेभ्यो यथा श्रुतः । ब्राह्मणानाञ्च वदतां श्रुतोऽस्माभिर्म्महात्मनां । ११२९०
यथा च तपसा दृष्टा वृहस्पतिसमद्युतिः । पराशरसुतः श्रीमान् कृष्णद्वैपायनोऽब्रवीत् ।
तत्तेऽहं सम्प्रवक्ष्यामि यथाशक्ति यथाश्रुति । न विज्ञातुं मया शक्यमृषिमात्रेण भारत ।
कः समुत्सहते ज्ञातुं परं नारायणात्मकं । विस्मापनोऽयं ब्रह्माऽपि न वेदयति तत्वतः ।
श्रुतं मे विश्वदेवानां यद्रहस्यं महर्षिणा । यदिज्यं सर्व्वयज्ञानां तत्वानस्तत्त्ववेदिनां ।
यदध्यात्मविदां चिन्त्यं कारणञ्चापि कर्म्मिणां । अधिदैवञ्च यद्दैवं तद्दैवमिति संज्ञितं । ११२९५
यद्भूतमधिभूतञ्च यत्परञ्च महर्षिणां । यत् सत्यं वेददृष्टञ्च यत्तत्त्वं यतयो विदुः ।
यः कर्त्ता कारको बुद्धिर्म्मनः क्षेत्रज्ञ एव च । प्रधानं पुरुषः शास्ता यः कश्चिदभिशब्द्यते ।
कालः कालं क्षपयति द्रष्टा स्वाधीन एव च । प्राणः पञ्चविधश्चैव ध्रुवमक्षरमेव च ।
उच्यते विविधैर्भावैस्तस्यानघ तत्परैः । स एष भगवान् सर्व्वं करोति विकरोति च ।
योऽस्मान् कारयते कर्म्म तेन स्म व्याकुलीकृताः । यजामहे तमेवेशं तमेवेच्छाम निर्वृतिं । ११३००

यो वक्ता यश्च वक्तव्यो यश्चाहं प्रब्रवीमि वः । इदं शृणुत यच्छ्रेयो यच्चान्यत् परिजल्पथ ।
याः कथाश्चैव वर्त्तन्ते श्रुतयो वाऽथ शङ्करे । विश्वं विश्वपतिं देवाः सर्व्वं नारायणात्मकं ।
यत् सत्यं यदमृतमादिमक्षरं वै यद्भूतं भवदमितञ्च यच्च विश्वं । यत्किञ्चिच्चरमचराद्यं त्रिलोके तत् सर्व्वं पुरुषवरः प्रभुर्व्वरिष्ठः ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करप्रादुर्भावे सप्तनवत्यधिकशतोऽध्यायः ॥ १९७ ॥

॥ वैशम्पायन उवाच ॥ चत्वार्य्याहुः सहस्राणि वर्षाणां तत् कृतं युगं । तस्य तावच्छती सन्ध्या द्विगुणा जनमेजय ।
११२०५ तत्र धर्म्मश्चतुष्पादो ह्यधर्म्मः पादविग्रहः । स्वधर्म्मनिरताः सन्तो यजन्ते चैव मानवाः ।
विप्राः स्थिता धर्म्मपरा राजवृत्ते स्थिता नृपाः । कृष्यामभिरता वैश्याः शूद्राः शुश्रूषणे रताः ।
सदा सत्यं तपश्चैव धर्म्मश्चैव विवर्द्धते । सद्भिराचरितं कर्म्म क्रियते ख्यायते च वै ।
एतत् कृतयुगे वृत्तं सर्व्वेषामेव भारत । प्राणिनां धर्म्मशुद्धीनामपि चेन्नीचयोनिनां ।
त्रीणि वर्षसहस्राणि त्रेतायुगमिहोच्यते । तस्य तावच्छती सन्ध्या द्विगुणा परिकीर्त्तिता ।
११२१० द्वाभ्यामधर्म्मः पादाभ्यां त्रिभिर्द्धर्म्मो व्यवस्थितः । तत्र सत्यञ्च सत्त्वञ्च कृते सर्व्वं विधीयते ।
त्रेतायां विकृतिं यान्ति धर्म्मलोभेन संयुताः । चातुर्व्वर्ण्यस्य वैकल्याद्यान्ति दौर्ब्बल्यमाश्रिताः ।
एष त्रेतायुगविधिर्विहितो देवनिर्म्मितः । द्वापरस्यापि या चेष्टा तामपि श्रोतुमर्हसि ।
द्वापरं द्वे सहस्रे तु वर्षाणां कुरुसत्तम । तस्य तावच्छती सन्ध्या द्विगुणा परिकीर्त्तिता ।
तत्र ह्यर्थपरा विप्रा मानिनो रजसावृताः । शठा नैकृतिकाः क्षुद्रा जायन्ते कुरुपुङ्गव ।
११२१५ द्वाभ्यां धर्म्मः स्थितः पद्भ्यामधर्म्मस्त्रिभिरुच्छ्रितः । विपर्य्ययं यान्ति शनैः कृते ये धर्म्महेतवः ।
ब्राह्मण्यभावा नश्यन्ति तथास्तिक्यं विशीर्य्यते । व्रतोपवासास्त्यज्यन्ते द्वापरे युगपर्य्यये ।
तथा वर्षसहस्रञ्च वर्षाणां द्वे शते तथा । सन्ध्यया सह संख्यातं क्रूरं कलियुगं स्मृतं ।
तत्राधर्म्मश्चतुष्पादः स्याद्धर्म्मः पादविग्रहः । कामिनस्तमसाच्छन्ना जायन्ते तत्र मानवाः ।
नैवोपवासकृत् कश्चिन्न साधुर्न च सत्यवाक् । नास्तिको ब्रह्मवक्ता वा नरो भवति वै तदा ।
११२२० अहङ्कारगृहीताश्च प्रक्षीणस्नेहबन्धनाः । विप्राः शूद्रसमाचाराः शूद्राश्चाचारलक्षणाः ।
दूषकाश्चाश्रमाणाञ्च वर्णानाञ्चैव शङ्कराः । अगम्येष्वभिरंस्यन्ति वर्त्स्यन्त्येवं कलौ युगे ।
त्रय्यान्तथैव सन्देहो युगान्ते जनमेजय । दिव्यं द्वादशसाहस्रं यदेतद्युगमुच्यते ।
तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते । एतच्चतुर्द्दशगुणमहर्ब्राह्ममिहोच्यते ।
ततोऽहनि गते तस्मिन् सर्व्वेषामेव देहिनां । शरीरनिर्वृतिश्चक्रे रुद्रः संहारबुद्धिमान् ।
११२२५ देवतानाञ्च सर्व्वेषां ब्राह्मणानां महीपते । दैत्यानां दानवानाञ्च यक्षकिन्नररक्षसां ।
देवर्षीणां ब्रह्मर्षीणां तथा राजर्षिणामपि । गन्धर्व्वाणामप्सरसां भुजगानां तथैव च ।
पर्व्वतानां नदीनाञ्च पशूनाञ्चैव भारत । तिर्य्यग्योनिगतानाञ्च सत्त्वानां क्रिमिणां तथा
महाभूतपतिर्द्देवः पञ्चभूतानि भूतकृत् । जगत्संहरणार्थाय कुरुते वैशसं महत् ।

भूत्वा सूर्य्यश्चक्षुषी चाददानो भूत्वा वायुः संहरन् प्राणिजालं । भूत्वा वह्निर्निर्द्दहन् सर्व्वलोकान् मेघो भूत्वा भूय एवाभ्यवर्षत ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करप्रादुर्भावे अष्टनवत्यधिकशततोऽध्यायः ॥ १९८ ॥

॥ वैशम्पायन उवाच ॥ भूत्वा नारायणो योगी सप्तमूर्त्तिर्विभावसुः । गभस्तिभिः प्रदीप्ताभिः संशोषयति सागरान् । ११६३०

पीत्वाऽर्णवांश्च सर्व्वान् स नदीः कूपांश्च सर्व्वशः । पर्व्वतानाञ्च सलिलं सर्व्वमादाय रश्मिभिः ।

भित्त्वा सहस्रशश्चैव महीं गत्वा रसातलं । रसातलगतं कृत्स्नं पिबते रसमुत्तमं ।

अपसु सृजन् क्लेदमन्यद्ददाति प्राणिनां ध्रुवं । तत् सर्व्वमरविन्दाक्ष आदत्ते पुरुषोत्तमः ।

वायुश्च बलवान् भूत्वा स विधूयाखिलं जगत् । प्राणोदयं सुराणाञ्च वायुना कुरुते हरिः ।

ततो देवगणानाञ्च सर्व्वेषामेव देहिनां । ये चेन्द्रियगणाः सर्व्वे ये चान्ये च यतोद्भवाः । ११६३५

एवं घ्राणं शरीरञ्च पृथिवीमाश्रिता गुणाः । जिह्वा रसश्च स्नेहश्च संश्रिताः सलिलं गुणाः ।

रूपं चक्षुर्विपाकश्च ज्योतिरेवाश्रिता गुणाः । स्पर्शः प्राणश्च चेष्टा च पवनं संश्रिता गुणाः ।

परमेष्ठिनमेते वै हृषीकेशं समाश्रिताः । ततो भगवता तत्र रश्मिभिः परिवारिताः ।

वायुना क्षिप्यमाणाश्च रूपान्योन्यसमाश्रयात् । तेषां संघर्षजोद्भूतः पावकः शतधा ज्वलन् ।

अदहन्निखिलान् लोकांस्तुयः संवर्त्तकोऽनलः । स पर्व्वतान् द्रुमान् गुल्मान् लतावल्लीस्तृणानि च ।

विमानानि च दिव्यानि पुराणि विविधानि च । आश्रमांश्च तथा पुण्यान् दिव्यान्यायतनानि च ।

यानि चाश्रयणीयानि तानि सर्व्वाणि चादहत् । भस्मीभूतांस्ततः सर्व्वान् लोकान् लोकगुरुर्हरिः ।

भूयो निर्व्वापयामास जलयुक्तेन कर्म्मणा । सहस्रदृक् सहस्रतेजा भूत्वा कृष्णो महाघनः ।

दिव्यतोयेन हविषा तर्पयामास मेदिनीं । ततः क्षीरनिकाशेन स्वादुना परमाम्भसा ।

शिवेन पुण्येन मही निर्व्वाणमगमत् परं । तेन सा जलसञ्छन्ना पयसा सर्व्वतो धरा । ११६४५

एकार्णवजला भूत्वा सर्व्वसत्त्वविवर्ज्जिता । महाभूतान्यपि च तं प्रविष्टान्यमितौजसं ।

नष्टार्कपवनाकाशे सूक्ष्मे जनविवर्ज्जिते । संशोषयित्वा पीत्वा च कल्पयित्वा च देहिनं ।

दग्ध्वा सन्तापयित्वा च वसत्येकः सनातनः । पौराणं रूपमास्थाय किमप्यमितबुद्धिमान् ।

एकार्णवजलावासो योगी योगमुपासते । अयुतानां सहस्राणि शतान्येकार्णवाम्भसि ।

न चैनं कश्चिदव्यक्तं व्यक्तं वेदितुमर्हति । ११६५०

॥ जनमेजय उवाच ॥ एकार्णवविधिः कोऽयं य एष परिकीर्त्तितः । क एष पुरुषो नाम किं योगः कश्च योगवान् ।

॥ वैशम्पायन उवाच ॥ एतावन्तमसौ कालमेकार्णवविधिं प्रति । करिष्यतीमं भगवानिति कश्चिन्न बुध्यते ।

न द्रष्टा नैव गमिता न ज्ञाता नैव पार्श्वगः । न स्म विज्ञायते किञ्चिद्दृते तं देवमुत्तमं ।

नभः क्षितिं पवनमपः प्रकाशयन् प्रजापतिं भुवनपतिं सुरेश्वरं । पितामहं श्रुतिनिलयं महामुनिं महोदधौ शयनमरोचयत्
प्रभुः ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करप्रादुर्भावे नवनवत्यधिकशततोऽध्यायः । १९९ ॥

॥ वैशम्पायन उवाच ॥ एवमेकार्णवे भूते शेते लोके महाद्युतिः । प्रच्छाद्य सलिलं सर्व्वं हरिर्नारायणः प्रभुः । ११६५५

महतो रजसो मध्ये महार्णवसमस्य वै। विरजस्को महाबाहुरक्षरं ब्राह्मणा विदुः ।
आत्मरूपप्रकाशेन तपसा संवृतः प्रभुः । त्रिकमाच्छाद्य कालन्तु ततः सुष्वाप सत्तदा ।
पुरुषो यज्ञ इत्येवं यत् परं परिकीर्त्तितं। यच्चान्यत् पुरुषाख्यन्तु तत् सर्व्वं पुरुषोत्तमः ।
ये च यज्ञपरा विप्रा ऋत्विजा इति संज्ञिताः । आत्मदेहात् पुरा भूता यज्ञेभ्यः श्रूयतां तदा।
ब्रह्माणं परमं वक्त्रादुद्गातारञ्च सामगं। होतारमथ चाध्वर्युं बाहुभ्यामसृजत् प्रभुः । ११६०
ब्रह्मणो ब्राह्मणत्वाच्च सप्रस्तारञ्च सर्व्वशः। तन्मित्रावरुणं सृष्ट्वा प्रतिष्ठातारमेव च।
उदरात् प्रतिहर्त्तारं होतारञ्चैव भारत। अध्यापकमथोरुभ्यां नेष्टारञ्चैव भारत।
पाणिभ्यामथ चाग्नीध्रं ब्रह्मण्यञ्चैव यज्ञियं । ग्रावाणमथ बाहुभ्यां सुनेतारञ्च याज्ञिकं।
एवमेवैष भगवान् षोडशैतान् जगत्पतिः । प्रवक्तॄन् सर्व्वयज्ञानामृत्विजोऽसृजदुत्तमान् ।
तदेष वै यज्ञमयः पुरुषो वेदसंज्ञितः । वेदाश्च तन्मयाः सर्व्वे साङ्गोपनिषदक्रियाः । ११६५
स्वपत्येकार्णवे चैव यदाश्चर्य्यमभूत् पुरा । श्रूयते तद्यथावृत्तं मार्कण्डेयोऽनुभूतवान्।
जीर्णो भगवतस्तस्य कुक्षावेव महामुनिः । बहुवर्षसहस्रायुस्तस्यैव वरतेजसा ।
इति तीर्थप्रसङ्गेन पृथिवीतीर्थगोचरः । आश्रमानपि सर्व्वांश्च तीर्थान्यायतनानि च ।
देशान्राष्ट्राणि चित्राणि पुराणि विविधानि च । जपहोमरतः शान्तस्तपो घोरमुपाश्रितः ।
मार्कण्डेयस्ततस्तस्य शनैर्व्वक्त्राद्विनिःसृतः । निष्क्रामन्तं न चात्मानं जानीते देवमायया । ११७०
निष्क्रान्तस्तस्य वक्त्रादेकार्णवमथो गतः । सर्व्वतस्तमसा च्छन्नं मार्कण्डेयो निरीक्षते ।
तस्योत्पन्नं भयं तीव्रं संशयश्चात्मजीविते । देवदर्शनसंहृष्टो विस्मयश्चागमत् परं ।
स चिन्तयति मध्यस्थो मार्कण्डेयोऽभिशङ्कितः । किंस्विन्मेऽदिय चिन्ता मोहः स्वप्नोऽनुभूयते ।
व्यक्तमन्यतमो भाव एतेषां भविता मम। न ह्यीदृशमसंक्लिष्टमयुक्तं सत्यमर्हति ।
नष्टचन्द्रार्कपवनच्छन्नपर्व्वतभूतलः । कतमः स्यादयं लोक इति चिन्ताव्यवस्थितः । ११७५
अपश्यच्चापि पुरुषं शयानं पर्व्वतोपमं। तोयार्द्रमिव जीमूतं मध्ये मग्नं महार्णवे।
तपन्तमिव तेजोभिर्भास्वन्तमिव वर्चसा । जाग्रन्तमिव गाम्भीर्य्याच्छ्वसन्तमिव पन्नगं ।
स देवं द्रष्टुमायाति को भवानिति विस्मयात् । तथैव च शनैर्भूयो मुनिः कुक्षिं प्रवेशितः।
स प्रविष्टः पुनः कुक्षौ मार्कण्डेयः सुनिश्चितः । तथैव चरते भूयोऽविजानन् स्वप्नदर्शनं।
स तथैव यथा पूर्व्वं पृथिवीमटते पुनः । तीर्थस्थानानि पुण्यानि वीक्षन्नायतनानि च । ११८०
क्रतुभिर्यजमानांश्च समाप्तवरदक्षिणैः । पश्यते देवकुक्षिस्थान् याजकान् द्विजोत्तमान्।
सद्वृत्तमाश्रिताः सर्व्वे वर्णा ब्राह्मणपूर्व्वकाः । चत्वारश्चाश्रमाः सम्यग्यथोद्दिष्टपदानुगाः ।
वर्षाणां शतमप्यस्य मार्कण्डेयो महामुनिः विचरन् पृथिवीं कृत्स्नां न च कुक्ष्यन्तमैक्षत ।
ततः कदाचिदथ वै पुनर्वक्त्राद्विनिःसृतः । सुप्तं न्यग्रोधशाखायां बालमेकं निरीक्षते।
यथैवैकार्णवजले नीहारेणावृतान्तरे । अव्यक्तभीषणे लोके सर्व्वभूतविवर्ज्जिते । ११८५

स भूयो विस्मयाविष्टः कौतूहलसमन्वितः । बालमादित्यसङ्काशं न शक्नोत्युपसर्पितुं ।
सोऽचिन्तयदथैकान्ते स्थित्वा सलिलसन्निधौ । पूर्व्वदृष्टमिदं नेति शङ्कितो देवमायया ।
अगाधे सलिले तस्मिन् मार्कण्डेयः प्लवन्मुनिः । न शान्तिं लभते तत्र श्रमात् सन्त्रस्तविक्लवः ।
तथैव भगवान् हंसो गतो योगेन बालतां । बभाषे मेघतुल्येन स्वरेण पुरुषोत्तमः ।
॥ भगवानुवाच ॥ माभैर्व्वत्स न भेतव्यं सम्प्रत्येहि समान्तिकं । मार्कण्डेय मुने वीर बालस्त्वं श्रमपीडितः । ११३९०
॥ मार्कण्डेय उवाच ॥ को मां नाम्ना कीर्त्तयति तपः परिभवन्मम । बहुवर्षसहस्राख्यं धर्षयन्निव मे वयः ।
न ह्येष समुदाचारो देवेष्वपि समाहितः । मां ब्रह्माऽपि स विश्वेशो दीर्घायुरिति भाषते ।
कस्तपोघोरशिरसं मामद्य त्यक्तजीवितः । मार्कण्डेयेति मां प्रोक्ता मृत्युमीक्षितुमिच्छति ।
॥ वैशम्पायन उवाच ॥ एवमाभाषते मोहान्मार्कण्डेयो महामुनिः । अथैनं भगवान् भूयो बभाषे तत्परायणं ।
॥ भगवानुवाच ॥ अहं ते जनको वत्स हृषीकेशः पिता गुरुः । आयुःप्रदाता पौराणः किमर्थं नोपसर्पसि । ११३९५
मां पुत्त्रकामः प्रथमं पिता ते ह्यङ्गिरा मुनिः । पूर्व्वमाराधयामास तपस्तीव्रमुपाश्रितः ।
ततस्त्वां घोरतपसं दहनोपमतेजसं । दत्तवानहमात्मेष्टं महर्षिममितायुषं ।
तत्र नोत्सहते चान्यो येन भूयो समात्मकं । द्रष्टुमेकार्णवगतं क्रीडन्तं योगधर्म्मिणं ।
॥ वैशम्पायन उवाच ॥ ततः प्रहृष्टवदनो विस्मयोत्फुल्ललोचनः । मूर्द्ध्नि बद्धाञ्जलिपुटो मार्कण्डेयो महातपाः
गोत्रनामादिकं श्रुत्वा दीर्घायुर्लोकपूजितः । अथाकरोन्नमस्कारं प्रणतः शिरसा प्रभुं । ११४००
॥ मार्कण्डेय उवाच ॥ इच्छेऽहं तत्त्वतो मायामिमां ज्ञातुं तवानघ । यदेकार्णवमध्यस्थः शेषे त्वं बालरूपवान् ।
किंसंज्ञः कश्च भगवन् लोके विज्ञायसे प्रभो । तर्कये त्वां महद्भूतं न भूतमिह तिष्ठति ।
॥ भगवानुवाच ॥ अहं नारायणो ब्रह्मा सम्भवः सर्व्वदेहिनां । सर्व्वभूतोद्भवकरः सर्व्वभूतविनाशनः ।
अहमैन्द्रे पदे शक्र ऋतूनामपि वत्सरः । अहं युगं युगाख्यश्च युगस्यावर्त्त एव च ।
अहं सर्व्वाणि सत्त्वानि दैवतान्यखिलानि च । भुजगानामहं शेषस्तार्क्ष्योऽहं सर्व्वपक्षिणां । ११४०५
अहं सहस्रशीर्षाख्यैर्यः पादैरभिसंस्तुतः । आदित्यो यज्ञपुरुषो देवयज्ञमयो मखः ।
अहमग्निर्हव्यवाहो यादसां पतिरव्ययः । यत् पृथिव्यां द्विजेन्द्राणां तपसा भावितात्मनां ।
बहुजन्मनिरुद्धानां ब्रह्मणोऽप्यतिरिच्यते । ज्ञानवान् दृष्टविश्वात्मा योगिनां योगवित्तमः ।
कृतान्तः सर्व्वभूतानां विश्वेषां कालसंज्ञितः । अहं कर्म्मक्रिया जीवः सर्व्वेषां धर्म्मसाधनं ।
निष्क्रियः सर्व्वभूतानामात्मजातिः सनातनः । प्रधानं पुरुषो देवस्त्वनाद्यस्त्वक्षयोऽव्ययः । ११४१०
अहं धर्म्मस्तपश्चाहं सर्व्वाश्रमनिवासिनां । अहं हयशिरा देवः क्षीरोदधिमहार्णवे ।
ऋतं सत्यञ्च परममहमेकः प्रजापतिः । अहं सांख्यमहं योगः अहं तत्परमं तथा ।
अहमिज्या भवश्चाहमहं विद्याधिपः स्मृतः । अहं ज्योतिरहं वायुरहं भूमिरहं नभः ।
अहमापः समुद्राश्च नक्षत्राणि दिशो दश । अहं वर्षमहं सोमः पर्ज्जन्योऽहमहं रविः ।
क्षीरोदः सागरश्चाहं समुद्रो वडवामुखः । वह्निः संवर्त्तको भूत्वा पिवंस्तोयमयं हविः । ११४१५

अहं पुराणं परमं तथैवाहं परायणं । अहं भूतस्य भव्यस्य वर्त्तमानस्य सम्भवः ।
यत्किञ्चित् पश्यसे चैव यच्छृणोषि च किञ्चन । यच्चानुभवसे लोके तत् सर्व्वं मामकं स्मर ।
विश्वं सृष्टं मया पूर्व्वं स्रक्ष्ये चाद्यापि पश्य मां । युगे युगे च स्रक्ष्यामि मार्कण्डेयाखिलं जगत् ।
तदेतदखिलं सर्व्वं मार्कण्डेयावधारय । शुश्रूषुर्मम धर्म्मेषु कुक्षौ चर सुखी भव ।
मम ब्रह्मा शरीरस्थो देवाश्च ऋषिभिः सह । व्यक्तमव्यक्तयोगं मामवगच्छापराजितं ।
अहमेकाक्षरो मन्त्रस्त्र्यक्षरश्चैव सर्व्वशः । त्रिपदश्चैव परमस्त्रिवर्गार्थनिदर्शनः ।
॥ वैशम्पायन उवाच ॥ एवमेतत् पुराणेषु वेदान्तेषु महामुनिः । वक्तुमाचचक्षे (?) मार्कण्डेयं महामुनिं ।
प्रवेशयामास ततो जठरं विश्वरूपधृक् । ततो भगवतः कुक्षिं प्रविष्टो मुनिसत्तमः ।
रराम सुखमासाद्य शुश्रूषन् हंसमव्ययं ।
तदक्षरं विविधमपाश्रितो वपुर्महार्णवे व्यपगतचन्द्रभास्करे । शनैश्चरन् प्रभुरथ हंससंज्ञितः सृजन् जगद्विचरति काल पर्य्यये ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे मार्कण्डेयदर्शने द्विशततमोऽध्यायः ॥ २०० ॥

॥ वैशम्पायन उवाच ॥ आपवः स विभुर्भूत्वा कारयामास वै तपः । छादयित्वात्मनो देहमात्मना कुम्भसम्भवः ।
ततो महात्माऽतिबलो मतिं लोकस्य सर्ज्जने । महतां पञ्चभूतानां विश्वभूतो व्यचिन्तयत् ।
तस्य चिन्तयतस्तत्र तपसा भावितात्मनः । निराकाशे तोयमये सूक्ष्मे जगति गह्वरे ।
ईषत् संक्षोभयामास सोऽर्णवं सलिले स्थितः । अनन्तरोर्म्मिणा सूक्ष्ममथ च्छिद्रमभूत्तदा ।
तत्र शब्दमयोऽभूत् स मारुतश्छिद्रसम्भवः । स लब्ध्वाऽन्तरमक्षोभ्यो व्यवर्द्धत समीरणः ।
विवर्द्धता बलवता तेन संक्षोभितोऽर्णवः । अन्योन्यवेगाभिहता ममन्थुश्चोर्म्मयः कृशं ।
महार्णवस्य क्षुब्धस्य तस्मिन्नम्भसि मथ्यति । कृष्णवर्त्मा समभवत् प्रभुर्वैश्वानरोऽर्च्चिमान् ।
ततः संशोषयामास पावकः सलिलं बहु । क्षयाज्जलनिधेश्छिद्रमसृजद्विश्वजित्तदा ।
आत्मतेजोभवाः पुण्या आपोऽमृतरसोपमाः । आकाशं छिद्रसंभूतं वायुराकाशसम्भवः ।
आज्यं संघर्षणोद्भूतं पावकञ्चाज्यसम्भवं । दृष्ट्वा प्रीतमना देवो महात्मा भूतसम्भवः ।
दृष्ट्वा भूतानि भगवान् लोकसृष्ट्यर्थमव्ययः । ब्रह्मणो जन्मसहितं बहुरूपो विचिन्तति ।
चतुर्युगादिसंख्याते सहस्रयुगपर्य्यये । यत् पृथिव्यां द्विजेन्द्राणां तपसा भावितात्मनां ।
बहुजन्मनिरुद्धात्मा ब्राह्मणो यतिसत्तमः । ज्ञानवान्दृष्टविश्वात्मा योगिनां योगवित्तमः ।
तमात्मतत्त्वं विज्ञेयं संपूर्णैश्वर्य्यविक्रमं । देवो ब्रह्माणि विश्वेशो नियोजयति योगवित् ।
ततस्तस्मिन्महातोये हविषो हरिरच्युतः । स्वपन् क्रीडंश्च विविधं मोदते वै स पावकिः ।
पद्मं नाभ्युद्भवं चैकं समुत्पादितवांस्ततः । सहस्रपर्णं विरजो भास्कराभं हिरण्मयं ।
हुताशनज्वलितशिखोज्ज्वलप्रभं सुगन्धिनं शरदमलार्कतेजसं । विराजते कमलमुदारवर्च्चसं महात्मनस्तनुरुहचारुदर्शनं ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे महापद्मोत्पत्तौ एकाधिकद्विशतोऽध्यायः ॥ २०१ ॥

॥ वैशम्पायन उवाच ॥ अथ योगविदां श्रेष्ठं सर्व्वभूतमनोमयं । स्रष्टारं सर्व्वभूतानां ब्रह्माणं सर्व्वतोमुखं ।
तस्मिन् हिरण्मये पद्मे बहुयोजनविस्तृते । सर्व्वतेजोगुणमये पार्थिवैर्लक्षणैर्युते ।
तच्च पद्मं पुराणज्ञाः पृथिवीरूपमुत्तमं । नारायणात् समुत्पन्नं प्रवदन्ति महर्षयः । ११४४५
या तु पद्मासना देवी तां पृथ्वीं परिचक्षते । ये तु गर्भाङ्कुरास्तस्मात् दिव्यान् पर्व्वतान् विदुः ।
हिमवन्तञ्च मेरुञ्च नीलं निषधमेव च । कैलासं कौञ्जवन्तञ्च तथाऽद्रिं गन्धमादनं ।
पुण्यं त्रिशिखरं चैव कान्तं मन्दरमेव च । उदयञ्च गिरिश्रेष्ठं विन्ध्यमस्तञ्च पर्व्वतं ।
एते देवगणानाञ्च सिद्धानाञ्च महात्मनां । आश्रयाः सर्व्वभूतानां पुण्याः कामयुजोऽद्रयः ।
एतेषामन्तरो देशो जम्बूद्वीप इति स्मृतः । जम्बूद्वीपस्य संस्थानं याज्ञिका यत्र कुर्व्वते । ११४५०
गर्भाद्यत् स्रवते तोयं देवामृतरसोपमं । दिव्यतीर्थशतापाङ्क्तास्ता दिव्याः सरितः स्मृताः ।
यान्येतानि तु पद्मस्य केशराणि समन्ततः । असंख्याताः पृथिव्यान्तु सर्व्वे ते धातुपर्व्वताः ।
यानि पद्मस्य पत्राणि भूरीण्यूर्द्धं नराधिप । ते दुर्गमाः शैलचिता म्लेच्छदेशा विकल्पिताः ।
यान्यधः पद्मपत्राणि निवासार्थं विभागशः । दैत्यानामुरगाणाञ्च पातालं तन्महात्मनां ।
तेषामधोगतं यत्तदुदकेत्यभिसंज्ञितं । महापातककर्म्माणो मज्जन्ति यत्र मानवाः । ११४५५
पद्मस्यान्तो कुरुं यत्तदेकार्णवजलं महत् । प्रोक्तास्ते दिक्षु संघातास्चत्वारो जलसागराः ।
एष नारायणस्यार्थे महापुष्करसम्भवः । प्रादुर्भावोऽव्ययस्तस्मान्नाम्ना पुष्करसंज्ञितः ।
एतस्मात् कारणात्तज्ज्ञैः पुराणैः परमर्षिभिः । याज्ञिकैर्वेददृष्टार्थैर्यज्ञे पद्मविधिः स्मृतः ।
एवं भगवता पद्मविधया परया विधिः । पर्व्वतानां नदीनाञ्च देशानाञ्च विनिर्म्मितः ।
विभुस्तथा चाप्रतिमप्रभावः प्रभाकरो योगिवरोऽमितद्युतिः । स्वयं स्वयम्भूः शयनेऽसृजत्तदा जगन्मयं पद्मनिधिं महार्णवे । ११४६०
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे सर्व्वभूतोत्पत्तौ द्व्यधिकद्विशततोऽध्यायः ॥ २०२ ॥
॥ वैशम्पायन उवाच ॥ चतुर्युगादिसम्भूतौ महस्रयुगपर्य्यये । विप्रस्तमसि संभूतो मधुर्नाम महासुरः ।
तस्यैव तु महायोऽन्यो भूतो रजसि कैटभः । तौ रजस्तमसाविष्टौ सम्भूतौ कामरूपिणौ ।
एकार्णवजलं सर्व्वं क्षोभयन्तौ महाबलौ । कृष्णरक्ताम्बरधरौ श्वेतदीप्तोग्रदंष्ट्रिणौ ।
किरीटमुकुटोदग्रौ केयूरवलयोज्ज्वलौ । महावृषभताम्राक्षौ पीनोरस्कौ महाभुजौ ।
महद्भिरःसंहननौ जङ्गमाविव पर्व्वतौ । नीलमेघाभ्रसङ्काशावादित्यप्रतिमाननौ । ११४६५
विद्युदभोद्यतासाभ्यां कराभ्यामतिभीषणौ । पादसञ्चारवेगाभ्यामुत्क्षिपन्ताविवार्णवं ।
कम्पयन्ताविव हरिं शयानमरिसूदनं । तौ तत्र विचरन्तौ स्म पुष्करं विश्वतोमुखं ।
पश्यतां दीप्तवपुषं योगिनां श्रेष्ठमव्ययं । नारायणसमाज्ञप्तं सृजन्तमखिलाः प्रजाः ।
दैवतानि च विश्वानि मानसांश्च सुतानृषीन् । ततस्तावूचतुस्तत्र ब्रह्माणमसुरोत्तमौ ।
दृष्टौ युयुत्सया क्रूरौ क्रोधसंरक्तलोचनौ । कस्त्वं पुष्करमध्यस्थः सितोष्णीषश्चतुर्मुखः । ११४७०
आवां न गणयेन्मोहादास्से त्वं विगतज्वरः । एह्यावयोर्व्वाङ्क्युद्धं प्रयच्छ कमलोद्भव ।

आवाभ्यां परमेशाभ्यां न शक्यं स्थातुमाहवे । कथं कथोद्भवश्चत्वं केन चासीश्च चोदितः ।
कः स्रष्टा कश्च ते गोप्ता केन नाम्नाऽभिधीयसे ।
॥ ब्रह्मोवाच ॥ यः क इत्युच्यते लोके ह्यविज्ञातः महत्तमः । तत्सम्भवं योगवन्तं तं किं मां नाधिगच्छथः ।
॥ मधुकैटभावूचतुः ॥ नावयोः परमं लोके किञ्चिदस्ति महामते । आवाभ्यां छाद्यते विश्वं रजसा तमसा तथा । ११५७५
रजस्तमोमयावावां यतीनां दुःखलक्षणौ । छलकौ धर्म्मशीलानां दुस्तरौ सर्व्वदेहिनां ।
आवाभ्यां मुह्यते लोको व्युत्थिताभ्यां युगे युगे । आवामर्थश्च कामश्च यज्ञाः स्वर्गपरिग्रहाः ।
सुखं यत्र मुदो यत्र यत्र श्रीः सन्नतिर्नयः । एषां यत् काङ्क्षितं किञ्चित्तदुभयस्य विचिन्तयन् ।
॥ ब्रह्मोवाच ॥ यत्तद्योगवतां श्रेष्ठं यच्च पूर्व्वमयाचितं । तत् समाधाय गुणवान् सत्त्वे चास्मि प्रतिष्ठितः ।
यत् परं योगयुक्तानां योऽक्षरं सत्त्वमेव च । रजसस्तमसश्चापि यः स्रष्टा जीवसम्भवः । ११५८०
यतो भूतानि जायन्ते सात्त्विकानीतराणि च । स एव युवां समरे वधी वां शमयिष्यति ।
॥ वैशम्पायन उवाच ॥ ततः शयानं श्रीमन्तं बहुयोजनविस्तृतं । पद्मनाभं हृषीकेशं प्रणम्यावोचतामुभौ ।
जानीवस्त्वां विश्वयोनिमेकं पुरुषसत्तमं । तवोपासनहेत्वर्थमिति नौ विद्धि कारणं ।
अमोघदर्शनं सत्यं यतस्त्वां विद्व ईश्वरं । ततस्त्वामभितो देव काङ्क्षावः प्रतिवीक्षितुं ।
तदिच्छावो वरं दत्तं त्वया ह्यावामरिन्दम । अमोघदर्शनायैव नमस्तेऽस्त्वजितञ्जय । ११५८५
॥ भगवानुवाच ॥ कामिच्छतो ब्रूतं ब्रूतं वरानसुरसत्तमौ । दत्तायुषौ मया भूयस्तो जीवितुमिच्छथः ।
तस्माद्ददेष वां यत्तस्तत् प्राप्नुतं महाबलौ । वध्यौ भवन्तौ तु स्यातां तावित्येवाब्रवीद्धरिः ।
उभावपि महात्मानावूर्ज्जितौ सत्यतत्परौ ।
॥ मधुकैटभावूचतुः ॥ यस्मिन् कश्चिन्मृतवान् देशे तस्मिन् प्रभो वधं । इच्छावः पुत्रताञ्चैव तव यातुं सुरारिहन् ।
॥ भगवानुवाच ॥ वाढं सुतौ मे प्रवरौ भविष्ये कल्पसंभवे । भविष्यथो न सन्देहः सत्यमेतद्ब्रवीमि वां । ११५९०
॥ वैशम्पायन उवाच ॥ वरं प्रदायाय महासुराभ्यां सनातनो विश्वहरो महाद्युतिः । रजस्तमोभ्यां भवभावनोपमौ ममन्थ तावूरुतले सुरारिहा ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे मधुकैटभवधे त्र्यधिकद्विशततोऽध्यायः ॥ २०३ ॥
॥ वैशम्पायन उवाच ॥ स्थित्वा तस्मिंस्तु कमले ब्रह्मा ब्रह्मविदाम्वरः । ऊर्द्ध्वबाहुर्महाबाहुस्तपो घोरं समाश्रितः ।
ज्वलन्निव स तेजस्वी भाभिः स्वाभिस्तमोनुदः । बभासे सर्व्वधर्म्मज्ञः सहस्रांशुरिवांशुमान् ।
अथान्यद्रूपमास्थाय शम्भुर्नारायणोऽव्ययः । द्विधाकृत्वात्मनात्मानमचिन्त्यात्मा सनातनः ।
आजगाम महातेजा योगाचार्य्यो महातपाः । सांख्याचार्य्यश्च मतिमान् कपिलो ब्राह्मणाम्बरः । ११५९५
देवर्षिभिः स्तुतावेतौ युक्तौ ब्रह्मविदाम्बरौ । उभावपि महात्मानावूर्ज्जितौ सत्यतत्परौ ।
तौ प्राप्तावूचतुस्तत्र ब्रह्माणममितौजसं । परावरविशेषज्ञौ पूजितौ परमर्षिभिः ।
बहुत्वाद्दृढपादस्य विश्वात्मा जगतः स्थितिः । ग्रामणीः सर्व्वभूतानां ब्रह्मा लोकगुरुर्म्महेश्वरः ।
तयोः तद्वचनं श्रुत्वा स तिष्ठो ह्याहृतीर्ण्ययन् । योनिमान् हतवान् लोकान् यथाह ब्राह्मणी श्रुतिः ।

पुत्रं भूःसंज्ञकञ्चैव समुत्पादितवान्नृप । ततो गतायास्तस्य ब्रह्मा मानसमव्ययं । ११५००
सोत्पन्नस्त्वथ ब्रह्माणमुवाच मानसः सुतः । करोमि किन्ते साहाय्यं ब्रवीतु भगवानिति ।
|| ब्रह्मोवाच || य एष कपिलो नाम ब्रह्मा नारायणस्तथा । वदते त्वां यद्वत्स तत् कुरुष्व महामते ।
|| वैशम्पायन उवाच || ब्रह्मणोक्तस्तदा सोऽथ भूयस्तावुपस्थितः । शुश्रूषुरस्मि युवयोः किं कुर्व्वीति कृताञ्जलिः ।
|| परमेश्वरावूचतुः || यत् सत्यमक्षरं ब्रह्म अष्टादशविधं स्मृतं । यत्सत्यमनृतञ्चैव परन्तत् समनुस्मर ।
|| वैशम्पायन उवाच || एतद्वचो निशम्याथ स ययौ दिशमुत्तरां । गत्वा च तत्र ब्रह्मत्वमगमज्ज्ञानचक्षुषा । ११५०५
ततो ब्रह्मा भुवर्नाम द्वितीयमसृजत् प्रभुः । सङ्कल्पयित्वा च पुनर्मानसैव महायशाः ।
ततः सोऽप्यब्रवीद्वाक्यं किं कुर्व्वीति पितामहं । पितामहस्याज्ञया सो ब्रह्माणं समुपस्थितः ।
ब्रह्मभ्यां सहितः सोऽपि भूयो भगवतीं गतः । प्राप्तश्च परमं स्थानं स तयोः पार्श्वमागतः ।
तस्मिन्नपि गते पुत्रे तृतीयमसृजत् प्रभुः । सोऽपि पर्य्यङ्कुशलं भूर्भुवं नाम तं विदुः ।
आसाद्य सोऽपि तं धर्म्मं तयोरेवागमद्गतिं । एवं पुत्रास्त्रयोऽप्येते प्रोक्ताः प्रभोर्महात्मनः । ११५१०
तान् गृहीत्वा सुतांस्तस्य प्रयातौ स्वार्ज्जितां गतिं । नारायणश्च भगवान् कपिलश्च यतीश्वरः ।
यं कालं तौ गतौ मुक्तिं ब्रह्मा तं कालमेव तु । तपो घोरतरं भूयः स तेपे संशितव्रतः ।
न रराम ततो ब्रह्मा प्रभुरेकाकिचरन् । शरीरार्द्धात्ततो भार्य्यां समुत्पादितवान् शुभां ।
तपसा तेजसा चैव वर्चसा नियमेन च । सदृशीमात्मनो देवीं समर्थां लोकसर्ज्जने ।
स तया सहितस्तत्र रेमे ब्रह्मा महातपाः । सृजन् प्रजापतीन् सर्व्वान् जगन्नानिकलक्षणं । ११५१५
ततोऽसृजद्वै त्रिपदां गायत्रीं वेदमातरं । अकरोच्चैव चतुरो वेदान् गायत्रिसम्भवान् ।
आत्मार्थे चासृजत् पुत्रान् लोककर्तॄन् पितामहः । विश्वे प्रजानां पतयो येभ्यो लोका विनिःसृताः ।
विश्वेश्वं प्रथमं नाम महातपसमात्मजं । सर्व्वाश्रमपदं पुण्यं नाम्ना धर्म्मं स सृष्टवान् ।
दक्षं मरीचिमत्रिञ्च पुलस्त्यं पुलहं क्रतुं । वशिष्ठं गौतमञ्चैव भृगुमङ्गिरसं मनुं ।
अथर्व्वभूता इत्येते ख्याताश्चैव महर्षयः । त्रयोदश सुता येषां वंशा वै संप्रतिष्ठिताः । ११५२०
अदितिर्द्दितिर्द्दनुः काला अनायुः सिंहिका खसा । प्राधा क्रोधा च सुरसा विनता कद्रुरेव च ।
दक्षस्यैता दुहितरः कन्या द्वादश भारत । नक्षत्राणि च भद्रं ते सप्तविंशतिरूर्ज्जिताः ।
मरीचेः कश्यपः पुत्रस्तपसा निर्म्मितः किल । तस्मै कन्या द्वादशैता दक्षस्ता समनन्यत ।
नक्षत्राख्यास्तु सोमाय ददौ दक्षवानृषिः । रोहिण्यादीनि पुण्यानि सर्व्वाणि जनमेजय ।
लक्ष्मीः कीर्त्तिस्तथा साध्या विश्वा कामानुगा शुभा । देवी मरुत्वती चैव ब्रह्मणा निर्म्मिता पुरा । ११५२५
एताः पञ्च वरिष्ठा वै सुरश्रेष्ठाय भारत । दत्ता धर्म्माय भद्रन्ते ब्रह्मणा दृष्टधर्म्मणा ।
या रूपार्द्धमयी पत्नी ब्रह्मणः कामरूपिणी । सुरभिः सा तु गौर्भूत्वा ब्रह्माणं समुपस्थिता ।
ततस्तामगमद्ब्रह्मा मैथुने लोकपूजितः । लोकसर्ज्जनहेतुज्ञो गवामर्थाय भारत ।
जज्ञे चैकादश सुतान् विपुलान् धर्म्मसंहितान् । रसमन्ध्याभ्रसदृशान् दक्षतल्लोभ्रतेजसा ।

ते रुदन्तो द्रवन्तश्च भगवन्तं पितामहं । रोदनाद्द्रवणाच्चैव ततो रुद्रा इति स्मृताः ।
निर्ऋतिश्चैव सर्पश्च तृतीयो ह्यज एकपात् । मृगव्याधः पिनाकी च दहनोऽथेश्वरश्च वै ।
अहिर्बुध्न्यश्च भगवान् कपाली चापराजितः । सेनानीश्च महातेजा रुद्रा एकादश स्मृताः ।
तस्यामेव सुराभ्यां तु जज्ञे गोकुलमग्रजा । अजश्चाश्च तथा मायाः सिकताः शृङ्गिणोऽचलाः ।
अजाश्चैवैकवंशाश्च तथैवामृतमुत्तमं । ओषध्यः प्रवरा याश्च सुरभ्यां ताः समुत्थिताः ।
धर्मात्तु जज्ञिरे कामः साध्या साध्यान् व्यजायत । प्रभवं च्यवनञ्चैव देवानां सुरभिं तथा ।
अरण्यं मरुतश्चैव विश्वावसुवलाभुवौ । मविषश्च तनूजश्च विधानमनघं तथा ।
वत्सरञ्च विभूतिञ्च सर्व्वासुरनिषूदनं । सुपर्व्वाणं तथा नागं साध्या लोकनमस्कृता ।
वासवानुमता देवी जनयामास वै सुतान् । धरञ्च प्रथमं देवं द्वितीयं ध्रुवमव्ययं ।
विवस्वन्तं तृतीयञ्च चतुर्थं सोममव्ययं । पञ्चमं पर्व्वतञ्चैव योगेन्द्रं तदनन्तरं ।
सप्तमञ्च ततो वायुमष्टमं निर्ऋतिं वसुं । धर्मस्यापत्यमित्येवं साध्यायां वै व्यजायत ।
विश्वेदेवाश्च विश्वायां धर्माज्जाता इति श्रुतिः । सुधर्म्मा च महाबाहुः शङ्खपाच्च महाबलः ।
उरुकृच्चैव महाबाहुर्व्व्यपुषांश्च तथैव च । आयुषश्च मनोरेते तथाऽनन्तमहोरगौ ।
विश्वावसुसुपर्व्वाणौ विष्णुश्च महायशाः । हरश्च चक्षिपुत्रो वै भास्करप्रतिमद्युतिः ।
विश्वेदेवान् देवमाता विश्वेशान् जनयत् सुतान् । मरुत्वती मरुत्वन्तो देवानजनयत् सुतान् ।
अग्निश्चक्षुर्विज्योतिः सावित्रं मित्रमेव च । अमरं शरवृष्टिञ्च सङ्कर्षञ्च महाभुजं ।
विराजञ्चैव शुक्रञ्च विश्वावसुविभावसू । अश्मन्तञ्चित्ररश्मिञ्च तथा निष्कुषितं नृपं ।
नहुषञ्चाहुतिञ्चैव चारित्रं ब्रह्मपक्षजं । बृहन्तञ्च बृहद्रूपं तथैव प्ररतापनं ।
मरुत्वती तथा यज्ञे एतं वै मरुतां गणं । अदित्यां जज्ञिरे राजन्नादित्याः कश्यपाद्य ।
इन्द्रो विष्णुर्भगस्त्वष्टा वरुणोंऽशो ऽर्यमा रविः । पूषा मित्रश्च वरदो मनुः पर्ज्जन्य एव च ।
इत्येते द्वादशादित्या वरिष्ठास्त्रिदिवौकसः । आदित्यस्य सरस्वत्यां जज्ञे पुत्रद्वयं शुभं ।
रूपश्रेष्ठं बलश्रेष्ठं त्रिदिवे रूपिणां वरं । अदित्यां जज्ञिरे देवा दितिर्दैत्यानजायत ।
दानवास्तु दनोः पुत्राः सुरसायां सरीसृपाः । काला तु कालकेयांश्च खसा वै राक्षसांस्तथा ।
सिंहिका ग्रहमाता सा गन्धर्व्वजननी मुनिः । अनायुषायास्तनया व्याधयस्तेन यक्षाया ।
प्राधा चाप्सरसां माता अप्सरास्वप्यजीजनत् । क्रोधायाः सर्व्वभूतानि पिशाचाश्चैव भारत ।
तथा पक्षिगणाश्चैव गुह्यकाश्च विशाम्पते । चतुष्पदानि सर्व्वाणि च्यते गावस्तु सौरभाः ।
अरुणो गरुडश्चैव विनतायामजायत । सर्व्वान्महीधरान्नागान् देवी कद्रुर्व्यजायत ।
एवन्तु वृद्धिमगमन् विश्वे लोकाः परस्परं । तदा पौष्करके राजन् प्रादुर्भावे महात्मनः ।
पुराणे पुष्करस्यार्थं मया द्वैपायनाच्छ्रुतः । कथितस्तेऽनुपूर्व्वेण संस्तुतः परमर्षिभिः ।

एष पौष्करको नाम प्रादुर्भावो महात्मनः । सम्यक् ते कीर्त्तितो राजन् मया द्वैपायनेरितः ।
यथा तथानुपूर्व्व्येण संस्तुतः परमर्षिभिः । ११५९०
यश्चेदमग्र्यं प्रवरं पुराणं सदाऽप्रमत्तः शृणुयाद्यथोक्तं । अवाप्य कामानिह वीतशोकः परत्र च स्वर्गफलानि भुङ्क्ते ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे सर्व्वभूतोत्पत्तौ चतुरधिकद्विशतोऽध्यायः ॥ २०४ ॥
॥ जनमेजय उवाच ॥ श्रुतं नः परमं ब्रह्मन् स्ववंशचरितं महत् । दिव्यमन्योन्यसंभूतमर्चितं बहुभिर्गुणैः ।
छन्दोभिर्वृत्तसङ्घातैः समासैश्च सविस्तरैः । लघुभिर्मधुराभाषैर्ग्रथितं पदविग्रहैः ।
त्रिवर्गेणाभिसम्पन्नं धर्म्मेणार्थेन योजितं । कामेन बहुरूपेण शरीरान्तर्गतेन च ।
ब्राह्मणानां प्रभावैश्च योधानाञ्च पराक्रमैः । वैरनिर्यातनैश्चैव प्रतिज्ञानाञ्च पारगैः । ११५९५
रिपुश्चापि संघर्षेणानुबन्धः प्रयोजितः । वंशयोगविनाशाय नृपेण सह विग्रहात् ।
ये च तस्मिन्महारौद्रे संग्रामे निहता नृपाः । तेषां सर्व्वाणि राज्यानि पुत्राः सर्व्वे प्रपेदिरे ।
कौरवः प्रथितो राजा भगवच्छासनानुगः । धर्मश्च बहुधा प्रोक्तस्त्रयाणां वर्णसम्पदा ।
शूद्राणामपि विख्यातः स्वर्गहेतुर्द्विजर्षभ । अनुग्रहार्थं भूतानां नास्तिकाय कथञ्चन ।
चतुर्णां वर्णसंज्ञानां पृथक् पृथगनेकधा । मर्गैकार्थं पतन्त्रश्च भूतानां संप्रबोधिताः । ११६००
पृच्छतां देवचक्षारे लीपे चोपे च कर्म्मणि । हानि यस्यापि संयोगः स चापि बहुधा कृतः ।
द्वाभ्यां संयोगविहिता मधुवाम्बवसन्तयोः । नैतच्छक्यं समाख्यातुं भारताध्ययनं महत् ।
एकाहेन महाप्राज्ञ अपि दिव्येन चक्षुषा । ब्रह्मणोऽप्रस्य विस्तारं संक्षेपञ्च सुसंग्रहं ।
श्रोतुमिच्छामि भगवन् परं कौतूहलं हि मे ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे जनमेजयवाक्ये पञ्चाधिकद्विशतोऽध्यायः ॥ २०५ ॥
॥ वैशम्पायन उवाच ॥ शृणुष्वैकमना राजन् पञ्चेन्द्रियसमाहितः । कथां कथयतो राजन्निर्व्विकारेण चेतसा । ११६०५
ब्रह्मसम्भवसम्बद्धामबद्धं कर्म्मभिर्नृप । पुरस्ताद्ब्रह्म सम्पन्नं ब्रह्मणो यद्ददर्शितं ।
अव्यक्तं कारणं यत्तन्नित्यं सदसदात्मकं । निष्कलः पुरुषस्तस्मात् संबभूवात्मयोनिजः ।
दिव्यो दिव्येन वपुषा सर्व्वभूतपतिर्व्विभुः । अचिन्त्यश्चाव्ययश्चैव युगानां प्रभवोऽव्ययः ।
अभूतस्याप्यजातस्य सर्व्वस्य जगतावृतः । अव्यक्तात्परतरं यत्तत्पुराणविदो विदुः ।
सर्व्वतः पाणिपादान्तं सर्व्वतोऽक्षिशिरोमुखं । सर्व्वतः श्रुतिमल्लोके सर्व्वमावृत्य तिष्ठति । ११६१०
अमृतस्य मृतस्यैव विज्ञेयं यच्च कारणं । अव्यक्तो व्यक्तिरूपश्च परत्रापि न दृश्यते ।
विकारपुरुषोऽव्यक्तो ह्यरूपी रूपमाश्रितः । चरत्यचिन्त्यः सर्व्वेषु गूढोऽग्निरिव दारुषु ।
भूतभव्योद्भवो नाथः परमेष्ठी प्रजापतिः । प्रभुः सर्व्वस्य लोकस्य नाम चास्येति तत्त्वतः ।
अण्डात्तु पद्मे जातस्तस्मान्नारायणोऽभवत् । अव्यक्तो व्यक्तिमापन्नो ब्रह्मयोगेन कामतः ।
ब्रह्मभावे च तं विद्धि स ब्रह्मं लब्धवान् प्रभुः । प्रभुः सर्व्वस्य लोकस्य स्थावरस्येतरस्य च । ११६१५

अहन्त्विति स होवाच प्रजाः स्रक्ष्यामि भारत । प्रभवः सर्व्वभूतानां यस्य तस्येरिमाः प्रजाः ।
स्वभावाज्जायते सर्व्वं स्वभावाच्च तथाऽभवत् । अहङ्कारः स्वभावाच्च स च सर्व्वमिदं जगत् ।
सर्व्वव्यापी निरालम्बो अग्राह्योऽथ जयो भुवः । एष ब्रह्ममयो ज्योतिर्ब्रह्मशब्देन शब्दितः ।
अव्यक्तो व्यक्तिमापन्नः पञ्चभिः क्रतुलक्षणैः । धारयन् ब्रह्मणा व्यक्तं विविधं विततस्वरन् ।
अथ मूर्त्तिं समाधाय स्वभावाद्ब्रह्मचोदितः । ससर्ज्ज सलिलं ब्रह्मा येन सर्व्वमिदं ततं । ११८९०
वायुं पूर्व्वमथो सृष्ट्वा यो धातुर्षोडशात्मकः । धारणाद्धातुशब्दस्य लभते लोकसंस्थितं ।
तदेतत् वायुसम्भूतं कृत्स्नं जगदभूत् पुरा । एतद्वैरतिक्रान्तं पूर्व्वमेव सरस्वति ।
पृथक्त्वं गमितं तोयं पृथिवीशब्दमिच्छता । घनत्वाच्च द्रवत्वाच्च निखिलेनोपलक्ष्यते ।
फलत्वात् मोदमानाच्च सलिले सलिलोद्भवः । व्याजहार शुभां वाणीं समन्तात् पूरयन्निव ।
ऊर्द्ध्वं वै स्थातुमिच्छामि संक्षोदाम्युद्धरस्व मां । गम्भीरतोयविवरन्नूर्म्मिविक्षोभितान्तरं । ११८९५
तेजोमूर्त्तिधरा देवी सर्व्वभूतप्ररोहिणी । यथायोगेन सम्भूता सर्व्वत्र विषयैषिणी ।
श्रुत्वा तु गदितां तस्य गिरं तां सुशुभाषितां । वाराहं रूपमास्थाय निपपात महार्णवे ।
उद्धृत्य सोऽर्व्वानं तोयात् कृत्वा कर्म्म सुदुष्करं । समाधौ प्रलयं गत्वा प्रलीनो न च दृश्यते ।
यत्तद्ब्रह्ममयं ज्योतिराकाशमिति संज्ञितं । तच्च ब्रह्मा समुद्भूतः सर्व्वभूतपितामहः ।
अद्यापि मनसा धात्रा धार्य्यते ब्रह्मयोनिना । ध्यानयोगेन सूक्ष्मेण भूतानां हितकाम्यया । ११९००
भित्त्वा तु पृथिवीं मध्यमुपयाति समुद्भवं । तपनस्तूर्ध्वमातिष्ठद्रश्मिभिः प्रदहन्निव ।
तस्य मण्डलमध्यात्तु निःसृतं प्रतिमण्डलं । स सनातनजो ब्रह्मा सौम्यं सोमत्वमन्वगात् ।
सोममण्डलपर्य्यन्तात् पवनः समजायत । तदक्षरमयं ज्योतिस्तेजस्तेजोविवर्द्धनं ।
स तु योगमयाज्ज्ञानात् स्वभावाज्ज्योतिरुद्भवात् । सृजते पुरुषं दिव्यं ब्रह्मयोनिं सनातनं ।
द्रवं यत् सलिलं तस्य घनं यत् पृथिवी भवत् । छिद्रं तत्र तदाकाशं ज्योतिर्यच्चक्षुरेव तत् । ११९०५
वायुना स्पन्दते चैव संघाताज्ज्योतिरुद्भवः । पुरुषात् पौरुषो भावः पञ्चभूतमयो महान् ।
भूतात्मा वै मम तस्मिंस्तस्मिन्देहे सनातनः । गुहायां निहितं ज्ञानं योगाध्यक्षः सनातनः ।
तपनस्येव तद्रूपं योऽग्निर्ज्वलति देहिनां । शरीरे निश्चयो युक्ते धातुभिः सह सङ्गतः ।
स्वभावात् क्षयमायाति स्वभावाच्चयमेति च । स्वभावाद्विन्दते शान्तिं स्वभावाच्च न विन्दति ।
इन्द्रियैर्व्यतिमूढात्मा मोहितो ब्रह्मणः पदे । सम्भवं निधनञ्चैव कर्म्मभिः प्रतिपद्यते । ११९१०
यावत्तद्ब्रह्मविषयं नोपजानाति तत्त्वतः । तावत् संसारमाप्नोति सम्भवांश्च पुनः पुनः ।
इन्द्रियैर्व्यतिरिक्तो वै यदा भवति योगवित् । तदा ब्रह्मत्वमापन्नः प्रलयाग्रे प्रतिष्ठति ।
प्रतिबुद्धमसुं लोकं ध्रुवांश्च भवत्युत । न च रागव्यथैर्याति न च सज्जति कर्हिचित् ।
आगतिश्च गतिश्चैव निधनं सम्भवस्तथा । भूतेभ्यो वेत्ति सर्व्वज्ञः परां सिद्धिमुपागतः ।
आत्मनो गतयश्चैव तथा विषयगोचरं । पुरस्तात् कर्म्मभिर्व्वृत्ते पदे ब्रह्म प्रतिष्ठितं । ११९१५

चिन्तयन्तीश्च मनसा श्रद्धा पूर्व्वाश्च यातनाः । भिद्यमानाः प्रलोभेन वायुभिश्च इवार्णवः ।
पश्यते हृदयं नीलं परेभ्यो ज्ञानचक्षुषा । ब्रह्मप्रोक्तमिहात्मा वै विमुक्तो देहबन्धनात् ।
सृजेदपि परं लोकं संहरेदपि विद्यया । तेजोमूर्त्तिरिवाविद्धमिह लोकञ्च संसृजेत् ।
तिर्य्यग्योनौ गतानाञ्च कर्म्मभिर्निरयोपमैः । तानपि प्रतिमुच्येत ब्रह्मयुक्तेन चेतसा ।
अतरञ्च चरेद्दैवे योगं कर्म्मभिर्विन्दति । न चरं विद्यते तत्र यद्ब्रह्म कर्म्मभिर्ध्रुवं । ११६२०
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे षडधिकद्विशततोऽध्यायः ॥ २०६ ॥
॥ वैशम्पायन उवाच ॥ पृथिव्यां यत् कृतं छिद्रं तपनेन विवर्द्धता । तस्मिन् न्यस्तोऽथ मैनाकः स्वभावविहितोऽचलः ।
पर्व्वभिः पर्व्वतत्वञ्च लभते नाम संज्ञितं । अचलादचलत्वञ्च स्वभावान्मेरुरेव सः ।
तस्य पृष्ठे सुविस्तीर्णे नगस्य सुमहर्द्धिमान् । तस्मिंस्तु पुरुषो व्यक्तो वसति ज्योतिषप्रभः ।
विहितस्य स्वभावेन तेनैव परमात्मना । यत्तद्ब्रह्ममयं तेजो निहितं शिरसोऽन्तरे ।
तस्य ज्योतिर्म्मयं रूपं दीप्तं पुरुषविग्रहं । वदनादभिनिष्क्रान्तं ज्वलन्तमिव तेजसा । ११६२५
चतुर्भिर्व्वदनैर्युक्तं चतुर्भिश्च भुजोत्तमैः । वक्त्रं ब्रह्मसमुद्भूतं ब्रह्मा ब्राह्मणपुङ्गवः ।
तदेवैतन्महाभूतं पुनर्भावत्वमागतं । उद्धृता पृथिवी देवी पुरस्तात् सलिलाश्रयात् ।
ब्रह्मत्वं ब्रह्मणः स्थानाल्लोको लोकतां गतः । पद्मस्थो ब्रह्मलोकं पृष्ठं मेरोस्तदाऽभवत् ।
उच्छ्रितं योजनशतं सहस्रशतमेव च । एवमेव च विस्तारं चतुर्भिर्गुणितं गुणैः ।
अथवा नैव संख्यातुं शक्यं भूतेन केनचित् । समासकर्म्मैर्व्वहुभिरपि दिव्येन तेजसा । ११६३०
चतुर्भिः पार्श्वविस्तारैः शिलाभिरभिसंवृतैः । नगस्य तस्य राजेन्द्र विस्तारैः शतयोजनैः ।
कोटिकोटीशतगुणैर्गुणितं ब्रह्मवादिभिः । योगयुक्तैः सदा सिद्धैर्नित्यं ब्रह्मपरायणैः ।
मरुद्भिः सह देवेन्द्रै रुद्रैर्व्वसुभिरेव च । आदित्यैर्व्विश्वसहितैररक्ष वसुधाधिपान् ।
ररक्ष पृथिवीञ्चैव भगवान् विष्णुना सह । विवस्वद्वरुणाभ्याञ्च संघातं गमितं नृप ।
तेन ब्राह्मेण वपुषा ब्रह्मप्राप्तेन भारत । यत्तद्विष्णुमयं तेजः सर्व्वत्र समतां गतं । ११६३५
यत्तद्ब्रह्मेति च प्रोक्तं ब्राह्मणैर्व्वेदपारगैः । नियमैर्व्वहुभिः प्राप्तैः सत्यव्रतपरायणैः ।
एवमेते त्रयो लोका ब्राह्मेऽहनि प्रतिष्ठिताः । अहनि ब्रह्म चाव्यक्तं व्यक्तं प्राणैः प्रतिष्ठितं ।
ब्रह्मणो नियतं कर्म्म प्रभावेण प्रचोदितं । प्रवर्त्तमानं भावेन शश्वद् ब्रह्मवादिनां ।
एतद्ध्रुवमिति प्रोक्तं ब्राह्मणैर्व्वेदपारगैः । यदेकं ब्रह्मणः पादं विश्वत्वं गमितं परं ।
बहुत्वाद्धि प्रभावाणां विश्वशब्दः प्रयुज्यते । ब्राह्मणैर्ब्रह्मभूतात्मा सत्यव्रतपरायणैः । ११६४०
विश्वरूपं मनोरूपं बुद्धिरूपत्वमानयत् । एवं द्वन्द्वं स भगवान् प्रथमं मिथुनेऽसृजत् ।
स एव भगवान् विश्वं देव्या सह सनातनः । विधाय विपुलान् भोगान् ब्रह्मा चरति सानुगः ।
स एव भगवान् ब्रह्मा नित्यं ब्रह्मविदाम्वरः । निर्व्वाणपथगन्तॄणामकिञ्चनपथैषिणां ।
सोमात् सोमः समुत्पन्नो धारासलिलविग्रहात् । यथाऽभिषिक्तो भूतानां सैनापत्ये महेश्वरः ।

अभिषिच्य च भूतेशं कृत्वा कर्म्म स्वभावतः । नदति स्म तदा नादं तेन सा प्रोच्यते नदी ।
सा ब्रह्मलोकं सम्प्राप्य समभिभूय सहस्रशः । गाङ्गता गगनाद्देवी सप्तधा प्रससार ह ।
सहस्रधा वा राजेन्द्र बहुधा च पुनः पुनः । इमं लोकममुञ्चैव भावयन् चरसम्भवं ।
ततो भूतानि रोहन्ति महाभूतफलानि च । ततः सर्व्वे क्रियारम्भाः प्रावर्त्तन्त मनीषिणां ।
चतुर्भिर्व्वेदनैस्तस्य मुखपद्माद्विनिःसृता । तदाऽक्षरमयी सिद्धिर्द्विशत्वं समुपागता ।
तस्य ज्ञानमयं पुण्यं चतुष्पादं सनातनं । पतित्वमाभवद्देवो ब्रह्मा चापि पितामहः ।
पादा धर्म्मस्य चत्वारो यैरिदं धार्य्यते जगत् । ब्रह्मचर्य्येण व्रतेन गार्हस्थ्येन च पावने ।
गुरुभावेन वाक्येन गुह्यगामिनगामिना । इत्येते धर्म्मपादाः स्युः स्वर्गहेतोः प्रचोदिताः ।
न्यायाद्धर्म्मेण गुह्येन सोमो वर्द्धति मण्डले । ब्रह्मणो ब्रह्मचरणाद्देवा वर्त्तन्ति शाश्वताः ।
गृहस्थानभिवाक्येन तृप्यन्ति पितरस्तथा । ऋषयोऽपि च धर्म्मेण नगस्य शिरसि स्थिताः ।
नगस्य तस्य संस्पृश्य मेरोः शिखरमुत्तमं । पद्भ्यां संपीड्य वृषणौ ऋषिभिस्तैर्विचार्य्यते ।
ग्रीवां निगृह्य पृष्ठञ्च विनाम्य प्रहसन्निव । नाभिदेशे करौ न्यस्य सर्व्वशोऽङ्गानि संक्षिपन् ।
मूर्द्ध्नि ब्रह्म समुत्क्षिप्य मनसा स पितामहः । अहजन्मनसा विष्णुं योगाद्योगेश्वरस्य च ।
व्यतिरिक्तेन्द्रियो विष्णुर्विम्बाद्विम्बमिवोत्थितः । तेजोमूर्त्तिधरो देवो नभसीन्दुरिवोत्थितः ।
रराज ब्रह्मयोगात् स सहस्रांशुरिवापरः । विराजन्नभसो मध्ये प्रभाभिरतुलं प्रभुः ।
नोपलप्स्यति मूढात्मा प्रत्यक्षं ब्रह्म शाश्वतं । ललाटमध्ये तिष्ठन्तं द्विधाभूतं क्रियां प्रति ।
ज्योतिश्चक्षुषि सम्बद्धं विम्बं भास्करसोमयोः । बुद्ध्या पूर्व्वन्तु पश्यन्ति अध्यात्मविषये रताः ।
ब्राह्मणा वेदविद्वांसः सत्यव्रतपरायणाः । नेतरे यातु पश्यन्ति अध्यात्मं नावबुध्यते ।
हिंसायोगैरयोगात्मा सर्व्वप्राणिचरैर्नरः । भूतयो भुवि भूतेशो मोहप्राप्तेन चेतसा ।
कर्म्मभिः कुत्सितैरन्यैः सर्व्वप्राणिवधैषिणां । नराणां योगमास्थाय स्वेषु गात्रेषु भारत ।
समाहितमना ब्रह्मा मोक्षप्राप्तेन हेतुना । चन्द्रमण्डलसंस्थानाज्ज्योतिषोऽसौ महत्तदा ।
प्रविश्य हृदयं क्षिप्रं गायत्र्या नयनान्तरे । गर्भस्य सम्भवो यश्च चतुर्द्धा पुरुषात्मकः ।
ब्रह्मतेजोमयोऽव्यक्तः शाश्वतोऽथ ध्रुवोऽव्ययः । न चेन्द्रियगुणैर्युक्तो युक्तस्तेजोगुणेन च ।
चन्द्रांशुविमलप्रख्यो भ्राजिष्णुर्व्वर्णसंस्थितः । नेत्राभ्यां जनयद्देवो ऋग्वेदं यजुषा सह ।
सामवेदञ्च जिह्वाग्रादथर्व्वाणञ्च मूर्द्धतः । जातमात्रास्तु ते वेदाः क्षेत्रं विन्दन्ति तत्त्वतः ।
तेन वेदत्वमापन्ना यस्माद्विन्दन्ति तत्पदं । ते सृजन्ति तदा वेदा ब्रह्मपूर्व्वं सनातनं ।
पुरुषं दिव्यरूपाभं स्वैः स्वैर्भावैर्मनोभवैः । अथर्व्वाणस्तु यो भागः शीर्षं यज्ञस्य तत् स्मृतं ।
ग्रीवा बाह्वन्तरं चैव ऋग्भागः समीरितः । हृदयञ्चैव पार्श्वञ्च सामभागस्तु निर्म्मितः ।
वस्तिशीर्षकटीदेशजङ्घोरुचरणैः सह । एवमेव यजुर्भागः संघातो यज्ञकल्पितः ।
पुरुषो दिव्यरूपाभः सम्भूतो ह्यपरात् पदात् । स हि वेदमयो यज्ञः सर्व्वसत्त्वसुखावहः ।

उभयोर्लोकयोस्तात हिंसावर्ज्यः सनातनः । योगारम्भं कर्मसाध्यं ब्रह्मचर्य्यं सनातनं । ११६७५
प्रभवं सर्व्वभूतानां यो विन्दति स वेदवित् स भिक्षुः प्रोच्यते लोके सिद्धिरेव न संशयः ।
निर्म्मुक्तः सर्व्वकर्म्मभ्यो मुनिभिर्व्वेदपारगैः । वैष्णवं यज्ञमित्येवं ब्रुवते वेदपारगाः ।
ब्राह्मणा नियमश्रान्ताः क्षान्त्योपनिषदे पदे ।
॥ जनमेजय उवाच ॥ चैतन्यरूपसम्भो हि मनोयाज्ञस्य कामतः । कारणं श्रोतुमिच्छामि यथातत्त्वं महामुने ।
॥ वैशम्पायन उवाच ॥ न ह्यस्य कारणं किञ्चिद्बाह्यं भवति भारत । अन्तर्गतं कारणन्तु शारीरं मानसं नृप । ११६८०
येन वेद्यं विदुर्मर्त्या ब्राह्मणाः संशितव्रताः । अवेद्यमपि वेद्यञ्च शक्यं वेत्तुं न कर्म्मणा ।
ब्राह्मणेन विनीतेन सदा ब्रह्मनिषेविणा । सदा विदिततत्त्वेन सिद्धिर्येनोपलभ्यते ।
सदा चैव शुचिर्भूत्वा नियतो ब्रह्मकर्म्मणा । उपतिष्ठेच्च स गुरुं बद्धाञ्जलिपुटो द्विजः ।
सायम्प्रातश्च तत्त्वज्ञो मोक्षकर्म्माणि कारयेत् । विनीतो ब्रह्मभावेन समाहितमतिर्मुनिः ।
सम्प्रपश्येत मनसा वैष्णवं पदमुत्तमं । ध्यायन्नेव प्रसीदेत समाहितमतिर्द्विजः । ११६८५
गच्छेत परमं ब्रह्म निर्व्विकारेण चेतसा । अपुनर्भावतत्त्वज्ञो निर्म्ममो भावबन्धनात् ।
तदेवाचरमित्याहुर्यत्तद्ब्रह्म सनातनं । न हि तत् कर्म्मयोगेन विद्यायोगेन दर्शितं ।
ब्राह्मणानां विनीतानां वैष्णवे पदसञ्चये । सर्व्वञ्च व्यतिरिक्तानां कालयोगविगर्हिणां ।
अपुनर्भाविनो लोकाः कर्म्मयोगे प्रतिष्ठिताः । अनादानेन मनसा राजन् कर्म्माणि कर्म्मणि ।
आदानाद्बध्यते जन्तुरनादानात् प्रमुच्यते । ब्राह्मणेभ्यः क्रियाप्राप्तिर्जन्तोः पूर्व्वाज्जनाधिप । ११६९०
मुक्तश्चेन्द्रियबन्धेन प्राप्तश्च परमं पदं । न भूयः पुनरायाति मानुषं देहविग्रहं ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे सप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥

॥ जनमेजय उवाच ॥ उपसर्गांश्च योगस्य ध्यातव्यञ्चैव यत् पदं । सिद्धिं सिद्धिगुणांश्चैव श्रोतुमिच्छामि तत्त्वतः ।
॥ वैशम्पायन उवाच ॥ शृणु विस्तरतः सर्व्वं यथा पृच्छसि मेधया । उपपन्नेन मनसा ब्रह्मादीनामनेकधा ।
पञ्चेन्द्रियगुणांस्त्यक्त्वा पश्यतो ब्रह्मणो नृप । योगयुक्तेन मनसा पञ्चेन्द्रियनिवासिनः ।
ब्रह्मणश्चिन्तयानस्य ब्रह्माग्र्यं सनातनं । बहुरूपमनैश्वर्य्यात् प्रवक्ष्यामि निबोध तत् । ११६९५
पञ्चेन्द्रियस्य ग्रामस्य नवद्वारस्य भारत । कामक्रोधस्य मोहस्य संनिरुद्धस्य मेधया ।
तेजसा मूर्द्धि चाधाय धूमो दोधूयते महान् । नीललोहितवर्णाभैः पीतैः श्वेतैश्च धातुभिः ।
मञ्जिष्ठारागवर्णाभैः कपोतसदृशैस्तथा । शुक्लवैदूर्य्यवर्णाभैः पद्मरागसमप्रभैः ।
स्फाटिकैर्म्मणिवर्णाभैर्नागेन्द्रसदृशैस्तथा । इन्द्रगोपकवर्णाभैश्चन्द्रांशुसलिलप्रभैः ।
वक्रवर्णैः स धूमौघैरिन्द्रायुधसमप्रभैः । सम्पतद्भिश्च युगपन्मेघैरिव समागमे । ११७००
निरुध्यन् इवाकाशं पक्षवद्भिरिवाद्रिभिः । ते धूमवर्णाः संघाता घनाः सलिलधारिणः ।
निर्म्मुञ्चैव तोयौघान् विविशुर्व्वसुधातलं । मूर्द्धि चैव महानग्निर्मानसो धूयते प्रभुः ।
युक्तः परमयोगेण शतशोऽर्च्चिर्भिरावृतः । तस्याग्नेर्विस्फुलिङ्गानां सहस्राणि शतानि च ।

विसृजुः सर्व्वगात्रेभ्यो ज्वलन्तीव युगाक्षयः । यावन्ति वर्षधारास्तास्तावन्त्योऽर्च्चिषोऽनलस्य च ।
शमेयुर्व्वारिधाराभिर्विपुले वसुधातले । वर्षाभ्यां युज्यमानस्य वायुर्दोधूयते महान् । ११७०५
दिव्यसिद्धगुणोद्भूतः सूक्ष्मः प्राणविवर्द्धनः । वेगवान् भीमनिर्घोषो बलवान् घ्राणगोचरः ।
तैरेव चाग्निसंघातैर्धातुभिः सह सङ्गतः । सहस्रशोऽथ शतशो मूर्त्तिं कृत्वा पृथग्विधां ।
अग्निर्व्वायुर्जलं भूमिर्द्धातवो ब्रह्मचोदिताः । समवायत्वमापन्ना बीजभूता महीतले ।
संघातं ब्रह्मवेगेन धातवो गमिता नृप । षड्भ्यश्च चतुर्भ्योऽर्थेभ्य स सूक्ष्मः पुरुषो विराट् ।
तयोरन्यान् बहून् सूक्ष्मानसृजत् पुरुषोत्तमः । स एव भगवान् विष्णुर्व्यक्तोऽव्यक्तः प्रजापतिः । ११७१०
आधारः सर्व्वभूतानां प्रलये प्रलयान्तकृत् । तं मूर्त्तिं धातुभिर्व्वद्धं विशन्ति ब्रह्मचोदिताः ।
तेऽन्तरा पुरुषाः सर्व्वे ज्ञातारः सुखदुःखयोः । अथ चेष्टितुमारब्धा मूर्त्तयो ब्रह्मसम्मिताः ।
भित्त्वा च धरणीं देवीं प्रापद्यन्त दिशो दश । इत्येते पार्थिवाः सर्व्वे ऋषयो ब्रह्मनिर्म्मिताः ।
तत्रैव प्रलयं याता भूमित्वमुपयान्ति च । कर्म्मक्षयाद्विमुच्यन्ते धातुभिः कर्म्मबन्धनैः ।
कर्म्मक्षयाद्विमुक्तत्वादिन्द्रियाणाञ्च बन्धनात् । तामेव प्रकृतिं यान्ति अज्ञाता कर्म्मगोचरैः । ११७१५
चराज्जातं चरञ्चैव अग्निगर्भास्तपोमयाः । येन तन्तुरिवाच्छिन्नो भावाभावः प्रवर्त्तते ।
धूमाद्भ्रन्तु संभूतमभ्रात्तोयं सुनिर्म्मलं । जगती जलसम्भूता जगत्येव च यत्फलं ।
फलाद्रसश्च संजज्ञे रसात् प्राणश्च देहिनां । रसस्तु तन्मयो जज्ञे यत्तद्ब्रह्म सनातनं ।
ब्रह्मोद्दिष्टं प्रधानन्तु बहुभिः कारणान्तरैः । ब्राह्मणैस्तपसि श्रान्तैः सत्यव्रतपरायणैः ।
अव्यक्ताद्व्यक्तमापन्नं स्वेन भावेन भारत । अन्तःस्थं सर्व्वभूतेषु चरन्तं विद्यया सह । ११७२०
कर्म्म कर्त्तेति राजेन्द्र विषयस्थमनेकधा । नोपलभ्येत चक्षुर्भ्यां तपसा दग्धकिल्बिषैः ।
उपलभ्येत चक्षुर्भ्यां यतिभिर्ब्रह्मवादिभिः । निःसृतस्तु भ्रुवोर्म्मध्ये मेघमुक्त इवांशुमान् ।
चरद्भिः पश्चिमे लोके निर्द्वन्द्वैर्निष्परिग्रहैः । योगधर्म्मेण कौरव्य ध्रुवमासाद्यते फलं ।
प्रादुर्भावं चयश्चैव भूतस्य निधनं तथा । विधत्ते शतशो ब्रह्मा संचये च भवे तथा ।
कर्म्मणः कर्म्मयोगज्ञो भूतेभ्यो नात्र संशयः । अविनाशाय लोकस्य धर्म्मस्याप्यायनेन वै । ११७२५
युगं द्वादशसाहस्रं सहस्रयुगसंज्ञितं । एतद्ब्रह्मयुगं नाम युगानां प्रथमं युगं ।
एवं युगसहस्रान्ते संहारः प्रलयोऽन्तकृत् । सूक्ष्मं भवति लोकानां निर्व्विकारमचेतनं ।
तथा प्रलयमापन्नं जगत् सर्व्वं सनातनं । ब्रह्म सम्पद्यते सूक्ष्मं निर्म्मितं कारणैर्गुणैः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे अष्टाधिकद्विशतोऽध्यायः ॥ २०८ ॥
॥ जनमेजय उवाच ॥ प्राग्वंशं श्रोतुमिच्छामि विस्तरेण महामुने । आद्ययोर्युगयोर्ब्रह्मन् ब्रह्मप्राप्तस्य सर्व्वशः ।
॥ वैशम्पायन उवाच ॥ शृणु विस्तरतः सर्व्वं यन्मां पृच्छसि मेधया । उपपन्नेन मनसा दैवप्रत्ययसाधिना । ११७३०
वृद्धिम्प्राप्तस्तु भगवान् योगात्मा ब्रह्मसम्भवः । भूतानां बहुलत्वञ्च चकारेश्वरः प्रभुः ।
स्थितो ब्रह्मासने ब्रह्मा विचित्रः सहसा प्रभुः । अचलेनैव भावेन स्थाणुभूतेन भारत ।

रत्नस्य मोक्षविषये सर्व्वज्ञानमये पदे । यस्मात् पदसहस्राणि प्रभवन्त्युद्भवन्ति च ।
ब्रह्मयज्ञन्तु यजतो योगात् वेदात्मकं सदा । ब्रह्मणो विपुलं ज्ञानमैश्वर्य्यञ्च प्रवर्त्तते ।
ततः प्रथममैश्वर्य्यं युञ्जानेन प्रवर्त्तितं । ब्रह्मणा ब्रह्मभूतेन भूतानां हितमिच्छता । ११७३५
तदा त्वाकाशमैश्वर्य्यं युञ्जानस्य प्रवर्त्तते । ब्रह्मणो ब्रह्मभूतस्य निर्व्विकारेण कर्म्मणा ।
तदाऽन्तरीक्षं संप्राप्तं ब्रह्म निर्म्मलमव्ययं । संहारः सर्व्वभूतानां नराणां ब्रह्मवादिनां ।
ध्रुवमैश्वर्य्ययोगाणां प्रतिपद्यन्ति देहिनः । आकाशैश्वर्य्यभूतेन संयोगे ब्रह्मवादिनां ।
प्रवर्त्तमानमैश्वर्य्यं वायुभूतं करोति च । विकारैर्व्विक्रमैः प्राप्तैः सम्पतद्भिर्म्महाबलैः ।
एतैर्व्विकारैः संवृत्तैर्निरुद्धैश्चैव सर्व्वशः । ध्रुवमैश्वर्य्यमापन्नः सिद्धो भवति ब्राह्मणः । ११७४०
शरीरादभिनिष्क्रम्य आकाशेन प्रधावति । निरालम्बो निरालम्बामालम्ब्य मनसा ततः ।
ऐश्वर्य्यभूतो भूतात्मा चरन् दिवि न दृश्यते । चक्षुर्भिर्व्विपुलैर्लोकैः पुरन्दरमतैरपि ।
ओङ्कारं ये त्वधीयन्ते मनसा ब्रह्मसत्तमाः । विमुक्ताः सर्व्वकर्म्मभ्यस्ते तं पश्यन्ति साधवः ।
एतद्धि परमं ब्रह्म ब्राह्मणानां मनीषिणां । अन्तश्चरति भूतानां विद्धि चेतनया सह ।
एष शब्दो महानादः पुराणो ब्रह्मसम्भवः । वायुभूतोऽक्षरं प्राप्तो वदन्त्येवं द्विजातयः । ११७४५
अरूपी रूपसम्पन्नो धातुभिः सह सङ्गतः । अन्तश्चरति भूतेषु कामकारकरो वशी ।
ततः परमनुध्याय मनसा पूरयन्निव । वेदात्मकं तदा यज्ञं चिन्तयन्तो मनीषिणः ।
ब्राह्मणाः शुचयो दान्ता यशोऽप्युग्रंस्तदन्वयात् । ब्रह्मलोकं क्रमाणा वैष्णवं पदमुत्तमं ।
पदस्थैताः क्रियाः सर्व्वाः कुर्व्वन्ति विगतज्वराः । न च्युते प्रमवादाने भवमिच्छन्ति भारत ।
त्रिभिर्म्माल्योपहारैश्च प्रतिमानैश्च ये द्विजाः । यजन्ति परमात्मानं विष्णुं सत्यपराक्रमं । ११७५०
यजनं विक्रमश्चैव ब्रह्माद्याः संप्रचक्रिरे । ब्रह्मा च वैष्णवं तेजो वेदोक्तैर्व्वचनैर्नृप ।
ब्राह्मणैर्ब्रह्मविद्भिश्च ब्रह्मभिर्ब्रह्मवादिभिः । शुचिभिः कर्म्मनिर्म्मुक्तैः सत्यव्रतपरायणैः ।
धातुभिर्म्मोक्षकाले च महात्मा सम्प्रदृश्यते । तदेव परमं ब्रह्म वैष्णवं परमाद्भुतं ।
रसात्मकं तदैश्वर्य्यं विकारान्ते प्रदृश्यते । घोररूपा विकारास्ते व्यथयन्ति महात्मनः ।
सञ्छाद्यतीव तोयेन क्षुभ्यमाणो विचेतनः । ऊर्म्मिभिश्छाद्यते चैव शीतोष्णाभिर्विकारतः । ११७५५
महार्णवगतश्चैव दह्यते न च मज्जति । भग्नश्चैव महानद्यः सलिले चैव सीदति ।
सीदमानश्च सलिले स शीतात्पात्यते बलात् । आसनाच्छादनाच्चैव मुच्यमानो विचेतनः ।
श्वभ्रे प्रपद्यमानश्च तोयेन परिषिच्यते । शुक्लवर्णेन बहुधा स्रोतसा मूर्द्ध्नि सर्व्वशः ।
ऊर्द्ध्वं ज्योतिरवेक्षंश्च शुभैः पोतैश्च काश्यते । वारिपूरैः सुगम्भीरैर्व्विद्युद्भिरिव भासितैः ।
एतैर्व्विकारैः संवृत्तैर्निरुद्धैश्चैव सर्व्वशः । ध्रुवमैश्वर्य्यमासाद्य सिद्धो भवति ब्राह्मणः । ११७६०
रसात्मकं तदैश्वर्य्यं जिह्वायादभिनिःसृतं । सहस्रधारं विततं मेघत्वं समुपागतं ।
रसांश्च विविधान् योगात् संसिद्धः सृजते प्रभुः । धात्वर्थं सर्व्वभूतानां योगप्राप्तेन हेतुना ।

तेजसो रूपमैश्वर्य्यं विकारैः सह वर्द्धते। आत्मनो विघ्नजननं स्वस्थो ब्राह्मणकारणे।
उग्ररूपैर्व्विकारैश्च हन्यते दण्डपाणिभिः। घोररूपैः सुगम्भीरैः पिङ्गाक्षैर्न्नरविग्रहैः।
नेत्रं समुद्धरन्त्येमं जिह्वाग्रश्चास्य विन्दति। मदन्ति युगपन्नादं जृम्भमाणाः पुनः पुनः। ११६६५
पुनरेव तदा भूत्वा बहुरूपास्तदाऽभवन्। नृत्यमानाः प्रगायन्ति तर्पयन्तो विशेषतः।
स्त्रीभूताश्च ततः सर्व्वे युञ्जानाश्चावलम्बिरे। कण्ठेषु बहुरूपत्वात् विघ्नैश्चैव प्रलोभयन्।
मधुरैरभिधानैश्च व्याहरन्ति सभीतवत्। पतन्ति युगपत् सर्व्वे पादयोर्मूर्द्धभिर्नताः।
प्रमादं काङ्क्षमाणाश्च योगस्यान्तरविघ्नतः। बहुप्रकारं कथयन् नृत्यन्ति च रमन्ति च।
एभिर्व्विकारैर्ब्बहुभिर्निरुद्धैश्चैव सर्व्वशः। ध्रुवमैश्वर्य्यमासाद्य सिद्धो भवति ब्राह्मणः। ११६७०
तदर्च्चिष इवाग्नेया आदित्यस्येव रश्मयः। तेजोरूपकमैश्वर्य्यं जातास्ते जलविन्दवः।
ज्योतींषि चैव संवृत्ता आकाशे गुणसंस्तुताः। चरन्ति सततं लोके सूर्य्याचन्द्रमसोर्गतिं।
चन्द्रसूर्य्यात्मकं दिव्यं ज्योतिश्चक्रमनुत्तमं। एतद्विराजते लोके कालचक्रं ध्रुवञ्चरत्।
अर्द्धमासाश्च मासाश्च ऋतुः संवत्सराण्यथ। क्षणा लवा मुहूर्त्ताश्च कलाः काष्ठास्तथैव च।
अहोरात्रप्रमाणञ्च निमेषोन्मेषणं तथा। ताराणां गतयश्चैव ग्रहाणाश्च विशेषतः। ११६७५
अथ पार्थिवमैश्वर्य्यं विकारग्रहसंभवं। योगयुक्तास्त्वभिग्रस्ताः पात्यन्ते ह्यचलासनात्।
अलोभाच्छिद्यते लोके वेपमानोऽनुकीर्त्यते। सीदते वसुधामध्ये भिद्यमानः पुनः पुनः।
भूतानां बहुरूपैश्च अन्यैश्च तलवासिभिः। विषयैर्युज्यते क्षिप्रं संक्षेपात् संप्ररुध्यते।
ततः पार्थिवमैश्वर्य्यं सेवमानश्च सर्व्वतः। मूर्त्तिमद्भिश्च बहुधा धातुभिः स च हन्यते।
शक्तितोमरनिस्त्रिंशैर्गदाभिश्चाप्यनेकधा। असिभिः पात्यते चैव क्षुरधारैः सहस्रशः। ११६८०
भिद्यते चैव वाणाग्रैः सुतीक्ष्णैर्म्मर्म्मभेदिभिः। एभिर्व्विकारैर्न्निवृत्तैर्न्निरुद्धैश्चैव सर्व्वशः।
ध्रुवमैश्वर्य्यमापन्नः सिद्धो भवति ब्राह्मणः। ततः पार्थिवमैश्वर्य्यं निर्म्मुक्तस्य विकारतः।
प्रादुर्भवति युञ्जाने समाधौ प्रलयङ्कृते। दिव्यं तद्गन्धमाघ्राय दिव्यार्थांस्तान् शृणोति च।
दिव्यरूपैश्च विविधैश्छिद्यते न च भिद्यते। गच्छन् प्रकृतिना चान्तः प्रधानात्मा चरन्निव।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे नवाधिकद्विशततोऽध्यायः॥ २०९ ॥
॥ वैशम्पायन उवाच ॥ ततोऽन्यां धारणां गत्वा मनसा स पितामहः। ब्रह्मकर्म्मसमारम्भनिर्युक्तेनान्तरात्मना। ११६८५
सर्व्वाङ्गधारणां कृत्वा मनसा प्रहसन्निव। ब्रह्मयोगेण योगज्ञः सृजते मनसा प्रजाः।
चक्षुषो रूपसम्पन्ना ह्यप्सराः सृजते प्रभुः। नासिकाग्राच्च गन्धर्व्वान् सुचित्राम्बरवाससः।
तुम्बुरुप्रमुखान् सर्व्वान् शतशोऽथ सहस्रशः। नृत्यवादित्रकुशलान् कुशलान् सामगीतिषु।
ब्रह्मयोगेण योगज्ञः स्वयम्भूर्भगवान् प्रभुः। चारुनेत्रां सुकेशान्तां सुभ्रूश्चारुनिभाननां।
पद्मेन शतपत्रेण चारुणा च विराजितां। धर्म्यां शुचिगिरं सेव्यां ब्राह्मीं मूर्त्तिमतीं श्रियं। ११६९०
असृजन्मनसा ब्रह्मा सम्यक् प्रोक्तेन चेतसा। भावयोगेन भूतात्मा सर्व्वप्राणभृतां ततः।

चक्षुषो रूपसम्पन्नाः सृजन् सोऽप्सरसः प्रभुः । नासिकायाश्च गन्धर्व्वान् सुवाचः सुप्रवादितान् ।
गानप्रभावं संचक्रे गन्धर्व्वाणां विशेषतः । अन्येषाञ्चैव विप्राणां गानं ब्रह्मप्रकाशितं ।
पद्भ्यां सृजति भूतानि गतिमन्ति ध्रुवाणि च । नरकिन्नरयक्षांश्च पिशाचोरगराक्षसान् ।
गजान् सिंहांश्च व्याघ्रांश्च मृगांश्चैव सहस्रशः । तृणजातीश्च बहुधा भावहेतोश्चतुष्पदान् । ११७९५
ये तु हस्तान्निखादन्ति कर्म्मप्राप्तेन हेतुना । हस्तेभ्यः कर्म्म सस्रजे मन्तव्यं मनसा तथा ।
पायुना स विसर्गञ्च भूतानां सुखमिच्छतां । उपस्थेन तथानन्दं पञ्चेन्द्रियसमाधिना ।
हृदयादसृजद्धा वै बाहुभ्यां पक्षिणस्तथा । अङ्गानि चैव सत्त्वानि वेशैस्तैस्तैः पृथग्विधैः ।
ऋषिं त्वङ्गिरसञ्चैव मुनिं ज्वलिततेजसं । ब्रह्मवंशकरं दिव्यं व्यतिरिक्तषडिन्द्रियं ।
भुवोऽन्तरे जनयते योगाद्योगेश्वरः प्रभुः । ब्रह्मवंशकरं दिव्यं भृगुं परमधार्म्मिकं । ११८००
ललाटमध्यादसृजन्नारदं प्रियविग्रहं । सनत्कुमारं मूर्द्ध्नश्च महायोगी पितामहः ।
अभिषिच्य तु सोमञ्च यौवराज्ये पितामहः । ब्राह्मणानाञ्च राजानं शाश्वतं रजनीचरं ।
तपसा महता युक्तो यशैः सह निशाकरः । चचार नभसो मध्ये प्रभाभिर्भासयन् जगत् ।
स गात्रैर्भगवान् योगात् मनसा सिद्धिमागतः । सृष्टवान् सर्व्वभूतानि स्थावराणि चराणि च ।
तत्र स्थानानि भूतानां योगांश्चैव पृथग्विधान् । व्यधत्त शतशो ब्रह्मा सर्व्वभूतपितामहः । ११८०५
एष ब्रह्ममयो यज्ञो योगः सांख्यश्च तत्त्वतः । विज्ञानञ्च स्वभावश्च चेत्यं चेतश्च एव च ।
एकत्वञ्च पृथक्त्वञ्च सम्भवं निधनं तथा । कालः कालत्रयश्चैव ज्ञेयो विज्ञानमेव च ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे दशाधिकद्विशततोऽध्यायः ॥ २१० ॥
॥ जनमेजय उवाच ॥ श्रुतं ब्रह्मयुगं ब्रह्मन् युगानां प्रथमं युगं । क्षत्रस्यापि युगं ब्रह्मन् श्रोतुमिच्छामि तत्त्वतः ।
ससंक्षेपं सविस्तारं नियमैर्ब्बहुभिश्चितं । उपायज्ञैश्च कथितं क्रतुभिश्चोपशोभितं ।
॥ वैशम्पायन उवाच ॥ एतत्ते कथयिष्यामि यज्ञकर्म्मभिरर्च्चितं । दानधर्म्मैश्च विविधैः प्रजाभिरुपशोभितं । ११८१०
तेऽङ्गुष्ठमात्रा मुनय आदत्ताः सूर्य्यरश्मिभिः । मोक्षप्राप्तेन विधिना निराबाधेन कर्म्मणा ।
प्रवृत्ते चाप्रवृत्ते च नित्यं ब्रह्मपरायणाः । परायणस्य सङ्गम्य ब्रह्मणस्तु महीपते ।
शौद्धाः पावनाश्चैव ब्राह्मणाश्च महीपते । चारितब्रह्मचर्य्याश्च ब्रह्मज्ञानेन बोधिताः ।
पूर्णे युगसहस्रान्ते प्रभावे प्रलयं गताः । ब्राह्मणा वृत्तसम्पन्ना ज्ञानसिद्धाः समाहिताः ।
व्यतिरिक्तेन्द्रियो विष्णुर्योगात्मा ब्रह्मसम्भवः । दक्षः प्रजापतिर्भूत्वा सृजते विपुलाः प्रजाः । ११८१५
अक्षराद्ब्राह्मणाः सौम्याः क्षरात् क्षत्रियबान्धवाः । वैश्या विकारतश्चैव शूद्रा धूमविकारतः ।
श्वेतलोहितकैर्वर्णैः पीतैर्नीलैश्च ब्राह्मणाः । अभिनिर्व्वर्त्तिता वर्णाश्चिन्तयानेन विष्णुना ।
ततो वर्णत्वमापन्नाः प्रजा लोके चतुर्व्विधाः । ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव महीपते ।
एकलिङ्गाः पृथग्धर्म्मा द्विपादाः परमाद्भुताः । यातनयाऽभिसम्पन्ना गतिज्ञाः सर्व्वकर्म्मसु ।
त्रयाणां वर्णजातानां वेदप्रोक्ताः क्रियाः स्मृताः । तेन ब्राह्मणयोगेन वैष्णवेन महीपते । ११८२०

प्रज्ञया तेजसा योगात्मज्ञात् प्राचेतसः प्रभुः । विष्णुरेव महायोगी कर्म्मणामन्तरं गतः ।
ततो निर्म्माणसंभूताः शूद्राः कर्म्मविवर्ज्जिताः । तस्मान्नार्हन्ति सत्कारं न ह्यत्र ब्रह्म विद्यते ।
यथाऽग्नौ धूमसंघातो ह्यरण्या मथ्यमानया । प्रादुर्भूतो विसर्पन् वै नोपयुज्यति कर्म्मणि ।
एवं शूद्रा विसर्पन्तो भुवि कार्त्स्न्येन जन्मना । नासंस्कृतेन धर्म्मेण वेदप्रोक्तेन कर्म्मणा ।
ततोऽन्ये दक्षपुत्रास्तु सम्भूता ब्रह्मयोनयः । बलवन्तो महोत्साहा महावीर्य्या महौजसः । ११८२५
पित्रा प्रोक्ता महात्मानो दक्षेणाद्यब्रह्मकर्म्मणा । प्रमन्तानिच्छाम्यहं श्रोतुं धात्याः पुत्त्राऽबलो ह्ययं ।
ततो विधास्ये तत्त्वज्ञः प्रजानां विपुलं बलं । क्षेत्राणां विपुलत्वाद्धि ममापि विपुलाः प्रजाः ।
न तेषां दर्शयद्देवी चक्षुषा रूपमात्मनः । प्रजापतिसुतानां वै विपुला मानमिच्छतां ।
आत्मनो भावनिर्वृत्ते भाव्ये कृतयुगे तदा । जनित्री सर्व्वभूतानामण्डजानुद्भिज्जांस्तथा ।
संवेदजननी धात्री चेति माया प्रचोदिता । अमुनां तनुतांश्चैव जन्तूनां कर्म्मभोगिनां । ११८३०
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे एकादशाधिकद्विशततमोऽध्यायः ॥ २११ ॥
॥ जनमेजय उवाच ॥ साध्वहं श्रोतुमिच्छामि चेतायां ब्राह्मणोत्तम । यं ज्ञात्वा सर्व्वविद्यानां परं पश्येयमव्ययं ।
॥ वैशम्पायन उवाच ॥ दक्षस्तु पुरा नलभ्य स्त्रीभावं पुरुषोत्तमः । योगाद्योगेश्वरात्मानं निजघ्ने गिरिमूर्द्धनि ।
सुजानुः पीनजघना सुभ्रूः पद्मनिभानना । रक्तान्तनयना कान्ता सर्व्वभूतमनोरमा ।
दक्षः प्राचेतसस्तस्यां कन्यायां जनयत् प्रभुः । देहाद्धि योगविधिना कन्याः पद्मनिभाननाः ।
दक्षः पुरुषरूपेण स्त्रीरूपमपहाय च । दर्शने सर्व्वभूतानां कान्तः कान्ततरोऽभवत् । ११८३५
ताः कन्याः प्रददौ दक्षः स्वयं प्राचेतसः प्रभुः । ब्रह्मदेयेन विधिना ब्रह्मप्राप्तेन भारत ।
प्रददौ दश धर्म्माय कश्यपाय त्रयोदश । सप्तविंशति सोमाय पत्नीर्हेतोः समाहितः ।
दक्षो दत्त्वाऽथ ताः कन्याः ब्रह्मचर्य्यं प्रपद्य च । ब्रह्मणाऽध्युषितं पुण्यं समाहितमना मुनिः ।
तप्यमानो मृगैः सार्द्धं चचार वसुधां नृप । तृणमूलफलैर्वृद्धो ववृधे तपसा महत् ।
मृगास्तु तस्य चरितं फलं मोदन्ति ब्राह्मणाः । दीक्षिताः पुण्यकर्म्माणस्तपसा दग्धकिल्बिषाः । ११८४०
संग्रामकाले कालज्ञः शस्त्रेणाद्रियते मुनिः । कर्म्म यज्ञकृतां तात सिद्धिं पश्यति सत्त्वरं ।
दाममानप्रवीरास्तु निरुद्वेगा निरामिषाः । मृगैः सह जरां यान्ति सपत्नीकाः सपुत्त्रिणः ।
ब्राह्मणास्तोचसंसिद्धा जनित्वे प्रथमे पदे । ब्राह्मणाऽध्युषितत्वाच्च ब्रह्मचेत्रमिहोच्यते ।
युतिभिः कर्म्मभिर्युक्तैर्व्वर्ज्जितक्रोधैर्ज्जितेन्द्रियैः । चरद्भिर्व्वसुधां विप्रैरकिञ्चनपथैषिभिः ।
या प्रजा पूर्व्वमारूढा मानसी ब्रह्मचारिणी । सैवैषा व्यक्तमापन्ना स्वभावदुरतिक्रमा । ११८४५
अव्यक्ता व्यक्तमापन्ना स्वभावदुरतिक्रमा । व्यक्ताव्यक्तं गमिष्यत्येषा कालधर्म्मान्महीपते ।
स्थावरा जङ्गमाश्चैव सूक्ष्माः सूक्ष्मास्तु भारत । कालयोगेन कालज्ञा भवन्ति न भवन्ति च ।
एतास्त्वेताः प्रजाः सर्व्वा दक्षकन्यासु जज्ञिरे । कश्यपेनार्य्येणेह संयुक्ताः कालधर्म्मणा ।

आदित्या वसवो रुद्रा विश्वे च समरुद्गणाः । नागाश्चानेकशिरसः साध्या वै पन्नगास्तथा ।
गन्धर्व्वाः किन्नरा यक्षाः सुपर्णाश्च तथाऽपरे । गरुत्मान् सह पक्षैश्च किन्नराश्च सुवाससः । ११८५०
गावः पशुगणैः सार्द्धं नराश्च वसुधाधिप । धाराधराश्च वसुधाधातारश्च धराधराः ।
गजाः सिंहाश्च व्याघ्राश्च हयाः पक्षधरास्तथा । खड्गा विषाणिनश्चैव वृषभाश्च मृगास्तथा ।
चतुर्व्विषाणा नागेन्द्राः पद्माभा वर्णतः शुभाः । सर्व्वलक्षणसम्पन्नाः प्राणिनः कामरूपिणः ।
तथारूपैस्तथायागानैस्तैः शौचैस्तैः पराक्रमैः । मुनयः पुनरद्भूता धर्म्मवंशे सनातने ।
सेवन्तमनघा लोके धर्म्मिणो वेदगोचराः । यज्ञोद्भूताः सुराः सर्व्वे दिवि लोके प्रतिष्ठिताः । ११८५५
ये चान्ये तपसा सिद्धा गृहस्था मनुजाधिप । ब्रह्मचर्य्येण संसिद्धाः परिचर्य्यागता गुरोः ।
ये च योगगतिं प्राप्ताः सिद्धिक्षेत्रोपशोभिते । क्रियाधिकैः कर्म्मजन्यैर्दत्तिं लभन्ति वै द्विजाः ।
शिलोञ्छवृत्तयः शान्ताः सपत्नीका दृढव्रताः । सर्व्वे ते ते दिवि चरा भवन्ति चरितव्रताः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे द्वादशाधिकद्विशततोऽध्यायः ॥ २१२ ॥
॥ वैशम्पायन उवाच ॥ पितामहं पुरस्कृत्य मेरुपृष्ठे समाहिताः । जटाजिनधरा विप्रास्त्यक्तक्रोधा जितेन्द्रियाः ।
पर्व्वतान्तरसंसिद्धे बहुपादपसंवृते । धातुसंरञ्जितशिले समे निस्तृणकण्टके । ११८६०
त्रयाणां ब्रह्मवेदानां पञ्चस्वरविराजिते । मन्त्रयज्ञपरा नित्यं नित्यं ब्रह्महिते रताः ।
एकमेवाग्निमाधाय सर्व्वे ब्राह्मणपुङ्गवाः । विभिदुर्म्मन्त्रविषयैः सुसमाहितमानसाः ।
त्रिधा प्रणीता ज्वलना मुनिभिर्व्वेदपारगैः । यतस्त्रेतात्वमापन्नो यदेकस्त्रिविधः कृतः ।
एक एव महानग्निर्द्दविधा संप्रवर्त्तते । स्वाहाकारेण धर्म्मज्ञ मन्त्राणां कार्य्यसिद्धये ।
स्वयञ्च दक्षः सम्प्राप्तो भगवान् भूतसत्कृतः । ब्रह्मा ब्राह्मणनिर्म्माता सर्व्वभूतपितामहः । ११८६५
दण्डी चर्म्मी शरी खड्गी शिखी पद्मनिभाननः । प्रभवश्चस्तसन्तापो जितक्रोधो जितेन्द्रियः ।
यजते पुष्करे ब्रह्मा मेधया सह सङ्गतः । इन्द्रप्रोक्तानि सामानि गीयन्ते ब्रह्मवादिभिः ।
घृतं क्षीरं यवा व्रीहिः सर्व्वं परमकं हविः । वेदप्रोक्तं मखे न्यस्तं कल्पितं ब्रह्मणः पदे ।
निर्म्मथ्यारणिमाग्नेयीं शमीगर्भसमुत्थितां । स ब्रह्मा प्रथमं तस्मिन्नग्निमन्य प्रवर्त्तयत् ।
न ह्यन्यद्विहितं द्रव्यं यथाऽग्निर्यज्ञकर्म्मणि । प्रवर्त्तते विभागैर्व्वा कृतहव्यमयं बलं । ११८७०
फलानि तैः प्रयुक्तानि हवींषि विततेऽध्वरे । प्रयुञ्जते विप्रपक्षा मुनयो ब्रह्मवादिनः ।
पश्चाद्ये चतुरो वेदान् संप्रभाषद्बृहस्पतिः । ब्रह्मज्ञो ब्रह्मणो यज्ञे परया ब्रह्मसम्पदा ।
शिक्षाक्षरसमेताया मधुरायाः समन्ततः । सानुस्वारितरागायाः सरस्वत्याः प्रभाषते ।
तेन ब्राह्मणशब्देन ब्रह्मप्रोक्तेन भारत । विभाति स मखो व्यक्तं ब्रह्मलोक इवापरः ।
मुखैर्ब्रह्मा मखोत्तीर्णो ब्रह्मशब्दैरनामयैः । प्रयोगैः सम्प्रयुक्तैश्च जल्पन्निव प्रवर्त्तते । ११८७५
समिद्भिः सोमकलशैः पात्रैश्च बहुविस्तरैः । यवैर्व्रीहिभिराज्यैश्च पूर्णैश्च जलभाजनैः ।

क्रमप्राप्तैश्च पशुभिः कर्म्मभिश्च परान्वितैः। गोभिः पयस्विनीभिश्च पारिवाहैश्च कोमलैः।
ब्रह्मवृद्धो वयोवृद्धस्तपोवृद्धश्च भारत। ब्रह्मज्ञानमयो देवो विद्यया सह सङ्गतः।
मानसैश्च क्रियामूर्त्ता ये च भूताः स्वयं नृप। ब्रह्मा जुहोति तांस्तत्राग्न्यवह्निः सचितस्तदा।
तेजोमूर्त्तिधरैरूपैर्न च तत्कर्म्मणाऽस्पृशत्। वेदप्रोक्तेन विधिना सर्व्वप्राणभृतां नृप। ११८८०
निर्म्मथ्यारणिमाग्नेयीं शमीगर्भसमुत्थितं। यजते क्रतुना पूर्व्वमग्निष्टोमेन स प्रभुः।
सदस्यैस्तत्सदो व्यक्तं शुशुभे यज्ञकर्म्मणि। जल्पन्ते मधुरा वाचः सानुस्वारक्रियास्ततः।
कर्म्मभिश्च तपोयुक्तैर्वेदवेदाङ्गपारगैः। सूर्य्येन्दुसदृशैराजन् विरराज महाक्रतुः।
ब्रह्मघोषेण महता ब्रह्मवास इवापरः। वसुधामिह संप्राप्तैः सर्व्वैरेव दिवौकसैः।
वेदवेदाङ्गविद्भिश्च विनीतैर्ब्रह्मवादिभिः। गतागतैस्तपःश्रान्तैः स्वर्गलोके महीयते। ११८८५
ज्वलद्भिरिव विप्रैस्तैस्त्रिभिरेवाध्वरेऽग्निभिः। ब्रह्मलोक इवाभाति ब्रह्मणः स महाक्रतुः।
इन्द्रप्रोक्तानि सामानि गायन्ति ब्रह्मवादिनः। वचनानि प्रयुक्तानि यजूंषि विततेऽध्वरे।
तपःश्रान्ता ब्रह्मपराः सत्यव्रतसमाहिताः। श्रावयन्मुनयः सर्व्वे मनोभिः श्रोत्रवादिभिः।
होता चैवाभवद्राजन् ब्रह्मणे च बृहस्पतिः। सर्व्वधर्म्मविदां श्रेष्ठः पुराणो ब्रह्मसम्भवः।
यजमानस्य यज्ञान्ते विष्णोः पूजां प्रयुज्य च। अदित्याः पश्चिमे गर्भे तपसा संवृते नृप। ११८९०
पदं विष्णुरजो ब्रह्मा निर्द्वन्द्वो निष्परिग्रहः। यतः पदसहस्राणि भविष्यन्त्युद्भवन्ति च।
अवध्यस्याप्रमेयस्य व्यतिरिक्तस्य कर्म्मभिः। आत्माऽपि यस्य मुनयो भवन्ति निष्परिग्रहाः।
परिग्रहाश्च विषया दोषप्राप्ता महीपते। दोषाश्च युगपत् सर्व्वे छादयन्ति मनो बलात्।
इन्द्रियग्रामविषये चरन्तो निष्परिग्रहाः। परिग्रहं शुभं धर्म्ममविद्यालक्षणं विदुः।
विद्यालक्षणसंयोगाच्च सनन्दाद्यते नृप। यदि चेन्मुनिशब्देन गृह्यते ब्रह्मवादिभिः। ११८९५
वेदविद्याव्रतस्नातैर्नियतैः कुरुसत्तम। दिवि लोकः सतां स्थानं लोकानां लोक उच्यते।
यत्र देवा हव्ययुक्ता न क्षयं यान्ति भारत। यजमानश्च भोगैः स्वैः कर्म्मप्राप्तेऽमृते पदे।
मोदते सह पत्नीभिर्विज्वरो वसुधाधिप। यज्ञावसाने त्रैलोक्यं द्विजेभ्यः प्रददौ विभुः।
दयया सर्व्वभूतानां निर्म्मलेनान्तरात्मना। ते शेषसर्व्वगात्राणि परस्परविशेषिणः।
न शेकुः प्रविभागार्थं भेत्तुं सर्व्वोद्यमैरपि। ततस्ते ब्राह्मणगणा निषेदुर्व्वसुधातले। ११९००
श्रमेणाभिहताः सर्व्वे विवर्णवदना नृप। सुपार्श्वो गिरिमुख्यस्तु वाग्भिर्म्मधुरभाषिताः।
अब्रवीत् प्रणतः सर्व्वान्शिरसा तान् द्विजोत्तमान्। न हि शक्यो बलाद्भेत्तुं युष्माभिरसमन्तिभिः।
अपि वर्षशतैर्द्दिव्यैः परस्परविरोधिभिः। एकीभूता यदा सर्व्वे भविष्यथ समाहिताः।
अविरोधेन युगपद्विभज्य निर्वृताः। बलं हि रागदोषाभ्यां वर्द्धते ब्रह्मसत्तमाः।
विमुक्तं रागदोषाभ्यां ब्रह्म वर्द्धति शाश्वतं। यदाऽहं भेदयिष्यामि स्वर्गं भिन्नः शिलातलैः। ११९०५
धातुभिश्च विसर्पद्भिः शिखरैश्चावपातितैः। विशीर्णैः पार्श्वविवरैर्नगैश्चागमितैर्भुवि।

बहुभिर्व्यालरूपैश्च घोरमन्त्रैर्गुहाश्रयैः । प्रतिगृह्य च तद्वाक्यं शैलेन्द्रस्य सुभाषितं ।
तूष्णीम्बभूवुस्ते सर्व्वे तदा ब्राह्मणसत्तमाः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे त्रयोदशाधिकद्विशततमोऽध्यायः ॥ २१३ ॥
॥ वैशम्पायन उवाच ॥ बलिहोमांश्च कुर्व्वन्ते अहन्यहनि भारत । द्विजानां तपसाढ्यानां गृहधर्म्मेषु तिष्ठतां ।
देवताद्यास्तु पूज्यन्ते तदाप्रभृति भारत । तेषां ब्रह्मविदां राजन् पृथिव्यां ब्रह्मवादिभिः । ११९१०
तत्रैव ब्रह्मसदने समे निस्तृणकण्टके । प्राच्येऽथ गहने देशे पुण्ये पर्व्वतरोधसि ।
वासं यत्र प्रकुर्व्वन्ति दृष्ट्वा भगवतः क्रियां । तपोऽर्थिनो महाभागा ब्रह्मचर्य्यव्रते स्थिताः ।
गृहस्थधर्म्मे निरता दानप्राप्तेन चेतसा । मुनयश्चापि काङ्क्षन्ति धर्म्मेण हविकाङ्क्षिणः ।
अन्ये कर्म्मफले चैव रता ब्राह्मणपुङ्गवाः । अग्निहोत्रव्रतस्नाता जितक्रोधाः समाहिताः ।
दैवयुक्तेन चायुक्ताः कर्म्मणा ब्रह्मसत्तमाः । चीरवल्कलसंवीता नियता नियतेन्द्रियाः । ११९१५
चरन्तो ब्रह्मचर्य्यञ्च यममास्थाय दारुणं । अनेन विधिना राजन् क्रमप्राप्तेन सर्व्वशः ।
क्रमाद्यो वेद संस्कारं पुण्यं प्राप्ताः सनातनं । पूर्व्वैराचरितं राजन् मुनिभिर्ब्रह्मवादिभिः ।
अवेदविद्यो नागच्छेच्चापि रौद्रं व्रतञ्चरेत् । न च त्यागेन गच्छेत गृहधर्म्मञ्च न त्यजेत् ।
एतन्न गच्छेदध्वानमप्राप्तो वेदसञ्चयं । ऋचश्च सन्नयः सर्व्वाः सामगानञ्च भारत ।
ये चापि पुत्त्रिणो न स्युः श्रुत्वाऽप्यप्राप्नुयुः फलं । ब्राह्मणास्तु तपःश्रान्ता परिचर्य्यागता गुरोः । ११९२०
यस्य नैवं श्रुतं ब्रह्म न गृहीतं विशाम्पते । कामं तं धार्म्मिको राजा दासकर्म्माणि कारयेत् ।
अथवा नैव विद्येत यो ब्रह्म नाद्रियेद्द्विजः । श्रोत्रादीनामविषये सतः पूर्व्वं समाहरेत् ।
एवं सर्व्वक्रियारम्भं वेदपूर्व्वं समाचरेत् । ब्राह्मणो भूतिसम्पन्नो य इच्छेद्भूतिमात्मनः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे चतुर्द्दशाधिकद्विशततमोऽध्यायः ॥ २१४ ॥
॥ वैशम्पायन उवाच ॥ ते तु गोब्राह्मणानाञ्च चन्द्रादित्यपुरस्कृताः । ब्राह्मणान् पूजयन्राजन् वसुभिर्ब्रह्मसम्भवैः
नारदप्रमुखाश्चैव गन्धर्व्वा ऋषयो नृप । कुर्व्वन्ति सततं यज्ञैः क्रमप्राप्तं पितामहं । ११९२५
वचोभिर्म्मधुराभाषैः पञ्चेन्द्रियनिवासिभिः । सर्व्वभूतप्रियकरैः सर्व्वभूतहितैषिभिः ।
स्तूयमानश्च यज्ञान्ते पञ्चेन्द्रियसमाहितैः । प्रोवाच भगवान् ब्रह्मा दिष्ट्या दिष्ट्येति भारत ।
ततः कश्यपमाभाष्य प्रोवाच भगवान् प्रभुः । भवानपि सुतैः सार्द्धं यक्ष्यते वसुधातले ।
क्रतुभिः परमप्राप्तैः संपूर्णवरदक्षिणैः । सुरासुराश्च ते सर्व्वे यथाप्रतिगुणैः प्रभो ।
वयं यक्ष्यामहे सर्व्वे पूर्व्वं यक्ष्यामहे वयं । एवमन्योन्यसंरम्भाद्द्विषन्ते बलदर्पिताः । ११९३०
दैतेयाश्चाप्यदैतेयाः परस्परजयैषिणः । युद्धायैव प्रतिष्ठन्ति प्रगृह्य विपुलो भुवौ ।
निवार्य्यमाणा ऋषिभिस्तपसा दग्धकिल्बिषैः । अन्यैश्च बहुभिर्व्विप्रैर्व्वेदवेदाङ्गपारगैः ।
निवार्य्यमाणा युध्यन्ते वृषभा इव गोकुले । प्रयुद्धारम्भसंक्रान्ताः सर्व्वप्राणैर्जयैषिणः ।
पश्यतां सर्व्वभूतानां मृत्योर्व्विषयमागताः । ततः शब्देन महता परं क्रत्वा महाबलाः ।

हन्यन्ति बाहुभिः क्रुद्धाः सपक्षा इव पक्षिणः । चचाल वसुधा चैव पदाक्रान्ता च रोषिभिः । ११९३५
नौर्यथा पुरुषाक्रान्ता निषीदति महाजले । पर्व्वताश्च विशीर्य्यन्ते नर्द्दमाना वृषा इव ।
चुक्षुभुश्च महानद्यस्ताडिता मातरिश्वना । ततः समभवद्युद्धं मधोर्विष्णोश्च भारत ।
युगान्तकरणं घोरं सर्व्वप्राणिभयङ्करं । प्रममाथ बलं विष्णुः समग्रबलपौरुषं ।
वह्नेरिव बलं दीप्तं प्रमथत्यम्बुना यथा । तथा प्रशमितं तेन भगवत्यपकारिणा ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे पञ्चदशाधिकद्विशततोऽध्यायः ॥ २१५ ॥
॥ वैशम्पायन उवाच ॥ बलवान् स तु दैतेयो मधुर्भीमपराक्रमः । बबन्ध पाशैर्न्निशितैर्महेन्द्रं पर्व्वतान्तरे । ११९४०
… वै प्रह्लादवचनाल्लक्षणश्च भारत । ऐश्वर्य्यमैन्द्रमाक्रम्य भविष्यं बुद्धिसंश्रयात् ।
बद्ध्वेन्द्रं सहसा मध्ये पाशैर्मर्म्मविवर्ज्जितैः । आयसैर्व्वज्रभिच्छिन्नैर्व्वलवद्भिर्विदारणैः ।
विष्णुमेवाग्रणीरुग्रमाक्रयन् युद्धकोविदः । मध्ये गणानां सर्व्वेषां कालस्य वशमागतः ।
द्वैधीभूताः काश्यपेया मधोर्व्वशमुपागताः । युद्धार्थमभ्यधावन्त प्रगृह्य विपुला गदाः ।
गन्धर्व्वाः किन्नराश्चैव वाद्ये गीते च कोविदाः । प्रनृत्यन्ति प्रागयन्ति प्रहसन्ति च सर्व्वशः । ११९४५
तन्त्रीभिः सुप्रयुक्ताभिर्म्मधुराभिः स्वभावतः । मनो मधोर्व्विधुन्वन्ति युध्यमानस्य रागिणः ।
मधोर्व्विलिलमधुना नियोगात् पद्मयोनिनः । एतान् विकारान् कुर्व्वन्ति गन्धर्व्वाः सत्यवादिनः ।
तत्र शक्ता हि गान्धर्व्वे तस्मिन् शब्दे दधुर्म्मनः । दानवाश्च सुराश्चैव प्रत्यक्षं यान्ति प्राणदन् ।
मधोश्च मन आविश्य पश्यन् योगेन चक्षुषा । मन्दरं प्रापतद्विष्णुर्गूढोऽग्निरिव दारुषु ।
ऋषयो दीप्तमनसः किञ्चिद्व्यथितमानसाः । पितामहं पुरस्कृत्य क्षणेनान्तरधीयत । ११९५०
विष्णुं सोऽभ्यहनत् क्रुद्धो मधुर्म्मधुनिभेक्षणः । भुजेन शक्रुहेशान्ते न चकम्पे पदात् पदं ।
विष्णुश्चाभ्यहनद्दैत्यं करायेण स्तनान्तरे । स पपात महीं तूर्णं जानुभ्यां रुधिरं वमन् ।
न चैनं पतितं हन्ति विष्णुर्युद्धविशारदः । बाहुयुद्धे हि समयं मत्वाऽचिन्त्यपराक्रमः ।
इन्द्रध्वज इवोत्तिष्ठज्जानुभ्यां स महीतलात् । मधू रोषपरीतात्मा निर्द्दहन्निव चक्षुषा ।
परुषाभिस्ततो वाग्भिरन्योन्यमभिगर्ज्जतः । समीयतुर्व्बाहुयुद्धे परस्परजयैषिणौ । ११९५५
उभौ तौ बाहुबलिनावुभौ युद्धविशारदौ । उभौ च तपसा श्रान्तावुभौ सत्यपराक्रमौ ।
दृढप्रहारिणौ वीरावन्योन्यं तौ चकर्षतुः । शैलेन्द्राविव युध्यन्तौ पक्षैः पाषाणसन्निभैः ।
विकर्षन्तौ च मन्तौ च अन्योन्यं वसुधातले । गजाविव विषाणाग्रैर्नखाग्रैश्च विचेरतुः ।
ततो व्रणमुखैश्चैव सुस्राव रुधिरं बहु । शोभान्ते धातुसंसृष्टं शैलेभ्य इव काञ्चनं ।
संसिक्तौ रुधिरौघैश्च स्रवद्भिः समरक्षतौ । अधोगतैः पदाग्रैश्च तौ व्यदारयतां महीं । ११९६०
अभिद्रुत्य तु तौ वीरौ परस्परमनेकधा । पतङ्गाविव युध्येतां पक्षाभ्यां मांसगृध्नुनौ ।
शुश्रुवुश्चान्तरीक्षेऽथ सर्व्वभूतानि पुष्करे । सिद्धानां वाङ्मोन्मुक्ताः परया वर्णसम्पदा ।
स्तुतयो विष्णुसंयुक्ताः सत्याः सत्यपराक्रमे । शरीरं धातुसंयुक्तं संयुक्तं चेतनेन च ।

तद्ब्रह्म इन्द्रियैर्युक्तं तेजोभूतं सनातनं । ध्रुवं तिष्ठन्ति भूतानि सूक्ष्मे प्रलयतां गते ।
पुनस्तोद्भवते सूक्ष्मं बहुरूपमनेकधा । प्रबोध्य भावं भूतानां त्रिषु लोकेषु कामदः । ११९६५
सुरूपो बहुरूपस्त्वं लोकान् सञ्चरते वशी । मानसोऽभ्यनुभाव्याय बहुभिः कारणान्तरैः ।
योगात्मा धारयन्नुर्वीं नागात्मा नन्दिवर्द्धनः । ब्रह्मभूतं परञ्चैव सूक्ष्मेनात्मानमीश्वरः ।
ब्राह्मेण विप्रान् वसति युद्धेनैव च क्षत्रियान् । प्रदानकर्म्मणा वैश्यान् शूद्रान् परिचरेण च ।
गावः क्षीरप्रदानेन अश्वान् यज्ञेषु प्रोक्षणैः । पितरस्तोयपर्णैवेह हविर्भागेण देवताः ।
चतुर्भिर्व्यतिरिक्ताङ्गैस्त्रिभिरन्यैश्च धातुभिः । सप्तभिः पितृभिर्नित्यैस्त्वं लोकान् परिरक्षति । ११९७०
चन्द्रसूर्य्यात्मकं नित्यं तद्रूपं निहितात्मकं । प्रकाशे चाप्रकाशे च निगूढं स्वेन तेजसा ।
त्रयस्तु पितरो नित्यं वर्द्धयन्ति दिवाकरं । चतुर्भिः पितृभिश्चैव चन्द्रो वर्द्धति मण्डले ।
त्रयः पितृगणा नित्यं पिण्डान् प्रस्रादयन्ति ते । चत्वारोऽन्ये पितृगणाः सिद्धाः पञ्च च श्राद्दे ।
त्वमेव पञ्च तान् धर्म्मांस्त्वमेवापञ्चतान्विभो । सनातनमयो दिव्यः शाश्वतो ब्रह्मसम्भवः ।
तस्मात्ते तेज आदत्ते अग्निर्व्वायुश्च सर्व्वशः । अतस्त्वं कर्म्मणा तेन आदित्यः समपद्यथाः । ११९७५
यद्दस्यासि जगत् सर्व्वं रश्मिभिः प्रदहन्निव । युगान्तकाले सम्प्राप्ते परां सिद्धिमुपागतः ।
पर्व्वसन्धावमावास्यां लोकश्चरसि मानुषं । ऋषिभिः सह गूढात्मा सूर्य्येन्दुवसुसप्रभैः ।
सफलं कर्म्म कुर्व्वाणो यजतां पुष्टिवर्द्धनं । हेतूनामधिकाराय मा भूत् कर्म्मविपर्य्ययः ।
वानस्पत्यौषधीश्चैव युगपत् प्रतिपद्यसे । बालभावाय वसुधा पक्षे पक्षे जनिस्तव ।
भूतानां भुवि भूतेश भावार्थं वसुधातले । वसु यद्भुवि किञ्चित्तु तत् सर्व्वं त्वन्मयं विभो । ११९८०
त्वमेव द्विविधं धर्म्मं शाश्वतं वसुधातले । देवयज्ञं मन्त्रवाक्यमात्मयज्ञं समानुषं ।
द्विविधः स्वर्गमार्गश्च सूर्य्यश्चन्द्रश्च निर्म्मलः । चन्द्रमाः पितृयानश्च देवयानश्च भास्करः ।
त्वमेव वसुधायुक्तो विश्वश्चरसि मायया । एकीकृत्य गणान् सर्व्वान् संक्षिप्यामुत्र सम्भवः ।
एकस्त्वमसि संभूतः पुराणः पुरुषो विराट् । अव्ययस्याप्रमेयस्य काराकारकरो वशी ।
मूर्त्तस्तेजसि संभूतो वायुः पर्य्येति खेचरः । सप्तभीरूपसंख्यानैर्नित्यमाहृत्य तिष्ठसि । ११९८५
साधने ह्यभिनिर्व्वाणे संहारे प्रलये तथा । धाता धारणकाले च हिंसास्वपि धारिणि ।
सेव्यमानो मुनिगणैर्नित्यं विगतकल्मषैः । कर्म्मभिः सत्यमापन्नैः सनरागैर्जितेन्द्रियैः ।
स्तूयमानश्च विविधैः सिद्धैर्मुनिवरैस्तथा । सस्मार विपुलं देहं हरिर्हयशिरो महान् ।
कृत्वा वेदमयं रूपं सर्व्वदेवमयं वपुः । शिरोमध्ये महादेवो ब्रह्मा तु हृदयस्थितः ।
आदित्या रश्मयो बालाश्चक्षुषी शशिभास्करौ । जङ्घे तु वसवः साध्याः सर्व्वसन्धिषु देवताः । ११९९०
जिह्वा वैश्वानरो देवः सत्या देवी सरस्वती । मरुतो वरुणश्चैव जानुदेशे व्यवस्थितः ।
एवं कृत्वा तथा रूपं सुराणामद्भुतं महत् । असुरं पीडयामास क्रोधरक्तान्तलोचनः ।
मधुमेदोऽवपूर्णा च पृथिवी समदृश्यत । प्रमदेव घनान्ते च रक्ताशुकनिवासिनी ।

मेदिनीत्येव शब्दश्च लब्धः पृथ्व्या नरोत्तम । मामासुरसहस्रेण धरण्याः संप्रतिष्ठितं ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे षोडशाधिकद्विशततोऽध्यायः ॥ २१६ ॥
॥ वैशम्पायन उवाच ॥ मधोर्निपतनं दृष्ट्वा सर्व्वभूतानि पौष्करे । प्रहृष्टानि प्रगायन्ति प्रनृत्यन्ति च सर्व्वशः ।
सुपार्श्वो गिरिमुख्यश्च काञ्चनैः शिखरोत्तमैः । बहुधातुविचित्रैश्च खं लिखन्निव चाबभौ ।
गिरयश्चाभिशोभन्ते धातुभिः समरञ्जिताः । प्रांशुभिः शिखराग्रैश्च सविद्युत इवाम्बुदाः ।
पद्मवातोद्धुतो रेणुचूर्णैः साञ्जनवालुकैः । छादयन् पर्व्वताग्राणि महामेघ इवाबभौ ।
मेघसंश्लिष्टशिखराः पद्मविचित्रपादपाः । काञ्चनोद्भेदबहुलाः खे तिष्ठन्तीव पर्व्वताः ।
पद्मवन्तः सशिखरा हेमधातुभिरञ्जिताः । पवनेन समुद्धूतास्तासयन्ति विहङ्गमान् ।
काञ्चनाः पर्व्वताः सर्व्वे स्फाटिकैर्मणिभिश्चिताः । सूर्य्यकान्तैश्च बहुभिश्चन्द्रकान्तैश्च निर्म्मलैः ।
हिमवांश्च महाशैलः श्वेतैर्धातुभिराचितः । काञ्चनैः शिखराग्रैश्च सूर्य्यपादप्रकाशितैः ।
मणिभिश्च प्रकाशद्भिः पद्मान्तरविनिःसृतैः । तापपुष्पैश्च शिखरैर्दीप्यमानैः स्वतेजसा ।
मन्दरश्चोग्रशिखरः स्फाटिकैर्मणिभिश्चितः । वज्रगर्भैर्निरालम्बैः स्वर्गोपम इवाबभौ ।
सह शृङ्गैश्च कैलासः शिलाधातुविभूषितः । तोरणैश्चैव निविडैः प्रांशुभिश्चैव पादपैः ।
प्रवादयद्भिर्गन्धर्व्वैः किन्नरैश्च प्रगायिभिः । देवकन्याङ्गनाभिश्च प्रक्रीडित इवाबभौ ।
मधुरैर्व्वाद्यगीतैश्च नृत्यैश्चाभिसयोङ्गतैः । शृङ्गारैः सुप्रहारैश्च कैलासो मदनायते ।
आदित्याभासिभिः शृङ्गैर्भिन्नाञ्जनचयप्रभैः । विन्ध्यो नीलाम्बुदश्यामो त्रिभिन्न इव तोयदः ।
धान्यार्थं सर्व्वभूतानां मेरुपृष्ठे महाचले । निर्व्वमुर्निर्म्मलं तोयं मेघजालैरिवोत्तमैः ।
शिलाभिर्व्वहुचित्राभिर्द्धातुभिर्व्वहुचित्रितैः । प्रस्रवद्भिर्गुहाद्वारैः सलिलं स्फाटिकप्रभं ।
शोभन्ते वायुसंमूढा घना इव सविद्युतः । चित्रैः पुष्पैस्तरुगणाः शोभन्त इव भूषिताः ।
नगाः कनकसंभूतैर्व्विविधैरिव भूषणैः । विहङ्गमाभिलीनाश्च समासन्नमथाश्रिताः ।
विलम्बन्त्यः सपुष्पाश्च नृत्यन्ते वायुघट्टिताः । पवनेन समुद्धूता महता माधवेऽहनि ।
मुमुचुः पुष्पसंघातं तोयवेलेव वर्षति । फलवद्भिश्च विपुलैः शाखास्कन्धावरोहिभिः ।
पादपैः पर्णबहुलैर्भ्रियते च वसुन्धरा । मधुप्रिया मधुकरा मधुमत्तविहङ्गमाः ।
घोषयन्तीव गायन्तः कामस्यागमसम्भवं । विष्णुर्मधुनिहन्ता च चकार मधुवाहिनीं ।
नदीं प्रस्रवनिर्भेदां सुतीर्थां बहुलोदकां । अङ्गारवर्णसिकतां मधुतोयां मनोरमां ।
विमलैरम्बुभिः पूर्णां पुष्पसञ्चयवाहिनीं । विवेश पुष्करं सा तु ब्रह्मणो वाक्यचोदिता ।
ऋषिभिश्चानुचरिता ब्रह्मतत्त्वं निवेदिभिः । धात्री कपिलरूपेण गौर्भूत्वा क्षरते पयः ।
मधुरं विततैर्यज्ञे ब्रह्मणो वाक्यचोदिता । सरश्च पृथिवीभूतं सन्धातुं प्राप्तवान्महीं ।
शुद्धश्च भजते लोकं शाश्वतं परमाद्भुतं । सरस्वत्याः समुद्भूतं ब्रह्मसैन्त्र तमोनुदं ।
महातीर्थमतिक्रम्य पुष्करेषु विसर्पति । सुचारुरूपा धर्मज्ञा प्रजारूपेण छादयत् ।

रूपं कनकवर्णाभं तपोयुक्तेन वर्च्चसा । अजगन्धसतोन्मुक्तः संभूतः पर्व्वतो महान् ।
गुरुद्वारगुणप्राणः शाश्वतः सिद्धसेवितः । वेदिकाभिः सुचित्राभिः काञ्चनीभिर्विराजितः ।
पुष्कराणि परीत्यैव स्थितो विपुलदक्षिणः । महामेरोर्यथा रूपं पञ्चभिर्धातुभिर्वृतं । ११९८५
चेतनयाऽभिसम्पन्नो रूपेणाद्भुतदर्शनः । एवं रूपं करिष्यामि मनसा धर्म्मचारिणा ।
रूपं बहुविधं लोके पार्थिवीं चेतनां तथा । चींश्च लोकान् प्रपद्येयं पञ्चभिर्धातुलक्षणैः ।
षष्ठेन च स सर्व्वेयं मनसा धर्म्मचारिणीं । सर्व्वेषु भावमोहाभ्यां पश्यन्नपि समुद्भुयः ।
विमुक्तः सर्व्वसङ्गेभ्यो धारयन्निष्परिग्रहः । न च विन्देत मां कश्चिन्मनसा कामकारिणीं ।
पञ्चधातुनिबद्धाश्च नानाभावितचेष्टितां । ये च विष्णुमधीयन्ते बहुधा पादविग्रहैः । ११९९०
ते मां पश्येयुरव्यक्तां तपसा दग्धकिल्बिषाः । ये च मामभिरोहेयुर्नरा धर्म्मपथे स्थिताः ।
तेऽपि स्वर्गजितः स्वर्गं पश्येयुर्वीतकल्मषाः । यश्चैव पर्व्वतः प्रांशुर्म्मेरुपृष्ठे प्रतिष्ठितः ।
एतमारुह्य युध्येयुः प्राणत्यागेषु निर्म्मलाः । अप्सरोभिः समागम्य विचरेयुर्मनोजवाः ।
नन्दनं वनमासाद्य काम्यकञ्च महद्वनं । इमा विद्याः समास्थाय मञ्जकाः पुष्करेष्विह ।
शरीरं त्यदयिष्यन्ति व्रतैर्व्वहुविधैः शुभाः । सिद्धिं प्राप्य क्रमेयुस्ते कामैर्व्वहुविधैर्नराः । ११९९५
इमं लोकममुञ्चैव सम्पतेयुर्यथासुखं । गौरी सिद्धेति विख्याता त्रिषु लोकेषु विद्यया ।
प्रभावं तपसो दृष्ट्वा दर्शयन्ति समाहिताः । येषां ज्ञानाभिसन्धीनामभिज्ञानात् सशंसहाः ।
भवेयुस्ते निरारम्भा धातुभिर्म्मुक्तबन्धनाः । सहस्रगुणमप्यत्र दत्त्वा दानफलानि च ।
अविमानेन विप्राणां मनःशुद्धेन कर्म्मणा । सर्व्वैवाप्रमेयेण अत्यर्थं फलमाप्नुयुः ।
अमुष्मिन् लोके धर्म्मज्ञाः सह सर्व्वकुलोद्भवैः । येषामिह च सान्निध्यं यज्ञे ब्राह्मणसंकुले । १२०००
ते भूयो यजमानाद्या अभिषिच्य पुनः पुनः । तथा तां मन्यसे गौरीं मनसा धर्म्मचारिणीं ।
अनुग्रहाय भूतानां मामजस्र तपोधनं । सत्य एष वरो विप्र भविता नात्र संशयः ।
नाफलो विद्यते धर्म्मश्चरितो ब्रह्मचारिणा ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे सप्तदशाधिकद्विशततोऽध्यायः ॥ २१७ ॥
॥ वैशम्पायन उवाच ॥ दिशं जिगमिषुर्दिव्यामुत्तरां सत्यसाधनः । तथा स धातुनिचये पुण्ये पर्व्वतरोधसि ।
विष्णुः परमधर्म्मात्मा एकपादेन तस्थिवान् । दशवर्षसहस्राणि पुष्करे पुष्करेक्षणः । १२००५
आत्मन्यात्मानमाधाय तपसा ब्रह्मसम्भवः । घटते कर्म्मणोग्रेण लोकमुत्थानकारणात् ।
भास्वरो भस्मनाच्छाद्य गात्राणि स्वयमात्मनः । अष्टौ वर्षसहस्राणि सहस्राञ्च तपोधनः ।
तेजसा तेन ज्योतींषि विभाव्य ब्राह्मणर्षभः । तिष्ठते मनसो मध्ये योगात्मा भावयन् जगत् ।
सोमो विषयमाविश्य मनसा धारयन्मनः । मुक्तः परमधर्म्मात्मा ब्राह्मीं सिद्धिमुपागतः ।
सम्प्रदृश्यति सर्व्वत्र दिवि भूम्यम्बरे तथा । ज्योतिस्थः कर्म्म कुर्व्वाणो बहुरूपः स्वसम्पदा । १२०१०
महेश्वरो निगूढात्मा वृषरूपेण तिष्ठति । उद्धृत्य दक्षिणं पादं वायुभक्षः समाहितः ।

अष्टौ वर्षसहस्राणि सहस्रं शतमेव च। महायोगी महादेवो नियमाद्ब्रह्मसम्भवः।
अथ वायुर्घनीभूतो मध्ये चरति गोपतेः। फेनीभूतं समुद्गारैः पवनं निर्गिरन्मुखात्।
स निष्क्रान्तस्ततो वक्त्रात् प्राणेन परमात्मवान्। निर्यासभूतः पतितो नैवार्द्रो नैव पार्थिवः।
स फेनो वारिमाविश्य चचार वसुधातले। नैवार्द्रो नैव शुष्काङ्गो वायुः संघातमागतः। १२०५५
तत्काले फेनमुत्क्षिप्य पवनः सह वारिणा। निरालम्बे निरालम्बस्त्वभ्राणि समपद्यत।
ते क्षिपन्ति पयो भूमावात्मानं स्वेन घट्टिताः। नीलमेघारुणप्रख्या नैवार्द्रा नैव पार्थिवाः।
शाश्वतीं मूर्त्तिं समाधाय वायुः सर्व्वत्रगो वशी। समाः सहस्रं संपूर्णं चचार विपुलं तपः।
वह्निर्बद्धजटी भूत्वा चीरवल्कलवासधृक्। तपस्तप्यदनाहारो मौनमास्थाय पुष्करे।
वर्षाणाञ्च सहस्राणि त्रीणि चैकस्य यत्नतः। तस्याग्नेस्तेजःसंभूतो महानग्निः प्रवर्त्तते। १२०६०
स्वर्गप्रकाशश्चैव स्वर्गवासी तमोनुदः। दिव्यो भूतप्रकाशाख्यस्तपसा ब्रह्मसम्भवः।
तपश्चरति धूमाग्निर्लोकानां भूतभावनः। तत्तमो भुवि राजेन्द्र मानुषेषु प्रतिष्ठितं।
भास्करस्तेजसंहारो यतो भवति सत्तम। मर्त्यानां सर्व्वभूतानां तेज आक्षिप्य वर्त्तते।
न तु योगबले राजन् ब्राह्मणस्य विशेषतः। तत्तमो नाशयेद्राजौ नाप्यहो भविता दयं।
पुष्पमित्रो महातेजा यत्तः सर्व्वत्रगो वशी। तपश्चरति धर्म्मात्मा पुष्करेषु समाहितः। १२०६५
महेन्द्रशिखराद्धारा यावत्यो यान्ति मेदिनीं। तावत्स्वरूपमास्थाय तिष्ठते निखिलाः समाः।
जानुभ्यां पतितो भूमौ ज्योतिर्नभसि पश्यति। समाः सहस्रं निखिलं नेत्रैरनिमिषैर्जगत।
नेत्राणि बहुधा तस्य नेत्रान्तैरभिनिःसृताः। मध्यं दिनकरे प्राप्ते रश्मिवान् स परिग्रहे।
ते रश्मयः प्रभानेत्रैः शतशोऽथ सहस्रशः। रराज तेजःसंयोगाज्ज्वलद्भिरिव पावकः।
सविस्फुलिङ्गैर्नेत्रान्तैरादित्यमनुवर्त्तते। कर्म्मणोऽन्ते युगान्ते वा जगतो बहुरूपिणः। १२०७०
बहुधा तु पुनर्भूत्वा निषण्णो वसुधातले। समाः सहस्रं संपूर्णं तपस्तेपे सुदारुणं।
निगृहीतेन्द्रियो भूत्वा नाप्सरोभिर्ललाम ह। मेरोः शिखरमासाद्य कामं कामेन पीडयन्।
तपःकामः स यक्षस्तु कुवेरो नरवाहनः। विष्णुरेव तपोऽध्यक्षस्तेजसोऽन्तेन जृम्भते।
न हि कश्चित् पुमानस्ति य एतत्तप आचरेत्। त्रिषु लोकेषु राजेन्द्र ऋते विष्णुं सनातनं।
वासुकिर्बहुशीर्षस्तु नागेन्द्रो मौनमास्थितः। तप आचरते सम्यक् निधाय मनसा मनः। १२०७५
शेषः सत्यधृतिर्नागो बलवान् ब्रह्मसम्भवः। वृक्षमारुह्य धर्म्मात्मा अवाक्शीर्षोऽवलम्बते।
जिह्वाभिर्लेलिहानाभिर्गात्रजं विषमुत्सृजन्। समासहस्रं संपूर्णं निराहारस्तपोधनः।
कालकूटं विषं तद्धि सुमहत् समपद्यत। येन लोको ह्यभिग्रस्तो न सुखं विन्दते नृप।
सर्व्वत्रानुगतं तीक्ष्णं भुजगेषु महोतलं। जङ्गमं स्थावरञ्चैव सर्व्वत्रानुगतं विषं।
परस्परं विरुद्धेन हिंसायुक्तेन भारत। नाशयत्यात्मनोऽङ्गानि तेन तीक्ष्णेन भारत। १२०८०
अथ ब्रह्मा महाभागो भूतानां हितकाम्यया। सर्व्वं विसृजते राजन् ब्रह्माचरमथं हितं।

गरुत्मान् विततैः पक्षैर्नखाग्रैः सलिलं महीं । समाधवस्यं संपूर्णं स्वलाग्रेणावलम्बते ।
पर्णभारैश्च विकचैर्विशीर्णैर्वसुधातले । रराज वसुधा चैव तैः पर्णैर्व्यक्तचित्रितैः ।
येन वित्तेन जीवेयुः सर्व्वभूतानि भारत । इह लोके मनुष्येषु देवलोके च भारत ।
द्यौरिवाचितनक्षत्रा महीतलविसर्पिभिः । भगवान् हिमसंपाते तपस्येकचरो वशी । १२०८५
पुष्कराश्रमि धर्म्मात्मा मनुष्योऽजिनमूर्द्धजः । अथ स्वनसमाकस्य पृथिवी शंकुदेहिनी ।
तपश्चरति धर्म्मात्मा वाक्समुद्यम्य दक्षिणं । सायं वर्षसहस्रञ्च शतमेकञ्च सुव्रता ।
तपश्चरति संयोगादायुभक्ता समाहिता । समाधियोगात् सङ्गादा ब्रह्मयोगस्य भारत ।
येनेयं पृथिवी राजन् धार्य्यते ब्रह्मयोगिना । अनाद्यन्तमनित्येन सर्व्वत्र त्रिदशैषिणा ।
योऽसौ विष्णुरगाधात्मा परमात्मा निराकृतिः । दिनेऽनिवर्णो भवति रात्रौ भवति वै स्थिरः । १२०९०
सत्यसन्धः स धर्म्मात्मा कामकारकरोऽभवत् । तस्य यः शोषतः पाणिः पृथिव्यां पृथिवीसमः ।
रात्रौ तपसो भवति मण्डलं विपुलं नभः । स चन्द्रविषयं राजञ्छमथाबाध दृश्यति ।
ग्रहाणां गतयश्चैव ताराणाञ्च विशेषतः । तां छायामाविशत् सोमात् नवाक्षिर्मण्डलेन वै ।
पृथिव्यां दक्षिणे हस्तो महायोगी महामनाः । सैषा छाया शशीभूता शशिमण्डलमाविशत् ।
अलिङ्गा पृथिवीलिङ्गादद्भुतादथवा दिवि । अङ्गैरङ्गान्युपगुह्य तपश्चरति दुश्चरं । १२०९५
निश्चयात् प्रोच्य पादौ तु पृथ्वी वाच्यमुपागता । सूर्य्यार्च्चिर्भिः पीड्यमानाद्राजयति महीतलात् ।
महीव चाम्बुसमनाद्युगान्ते विष्णुतेजसा । रराज सूर्य्यरश्मिभिर्व्यतिषक्ता महानदी ।
स्फाटिकेव शुभा सैषा काञ्चनैर्धातुभिर्वृता । आदित्येन समादत्ता रश्मितोऽभिसंभवैः ।
मण्डलान्तर्गता देवी चक्षुषा नोपलभ्यते । रश्मिभिः पुनरुत्कीर्णा ततो योगेन धावति ।
आकाशगङ्गा संहृता विपुलैरम्बुबिन्दुभिः । शीतच्छायैश्च तरुभिर्लताभिश्च सुगन्धिभिः । १२१००
पद्मषण्डैश्च विविधैः शुभशुभे दिव्यगन्धिभिः । काञ्चनापीडजघना स्फाटिकाम्बरमेखला ।
पद्मरेणुभिरापीता चक्रवाकावतंसिका । नीलगर्भसुकेशान्ता पुष्पपक्षाग्रसंकुला ।
शोभते विप्रसर्पन्ती प्रमदेव विभूषिता । सैषा गङ्गाफलं लेभे पुष्करेषु समागता ।
सुतपाश्चन्द्रविहिता लोकानां धारणे रता । सरस्वती स्वरैर्व्यक्तमधीते ब्रह्मवादिनी ।
पृष्ठात्प्रयाता शैलेन्द्रे मन्दरे मन्दगामिनी । स्वच्छंदासतुरो वेदान् पादैश्चतुर्भिराहृतान् । १२१०५
यजुर्भिः सामभिश्चैव ग्रथिताञ्छिक्षया तथा । ऋषिभिर्व्यसनप्रख्यैस्तपसा दग्धकिल्विषैः ।
सुपार्श्वस्य गिरेः पादैः परिदायैः सुपार्श्वैः । निखनन् सर्व्वभूतानि नियमेन च पूज्यते ।
मन्दराग्रे त्रिपर्य्यन्तं जगत्कृत्स्नमतीन्द्रियं । विरामनियमे श्रान्ते तूष्णीभूता बभूव ह ।
न वाचमीरयद्देवी नियामत् सत्यवादिनी । अथ भूतानि सर्व्वाणि तूष्णीभूतानि सर्व्वशः ।
न शेकुरभिधानार्थं व्याहर्त्तुं वदतैर्व्वशात् । विभज्य योगं मनसा सर्व्वभूतेष्वनुपदं । १२११०
सरस्वती स्वरयुता व्याजहार महास्वनं । सरस्वत्या समायुक्ता श्रियं गच्छन्ति देहिनः ।

अग्निमेवाथ ते सर्व्वे गानं गायन्ति शिवया । आदित्या वसवो रुद्रा मरुतश्चाश्विभिः सह ।
जटिलाश्चीरवसना मुञ्जमेखलधारिणः । गन्धर्व्वाः किन्नराश्चैव सनागाः सह चारणैः ।
तपश्चरन्ति सहिताः पुष्करेषु मनीषिणः । अपि कीटपतङ्गैश्च सह सर्व्वैः सरीसृपैः ।
शोषयन्ति शरीराणि तपसोग्रेण भारत । विष्णुर्व्विष्णुत्वमापन्नो देहान्तरविवर्ज्जितः । १२११५
संरक्षति महायोगो सर्व्वांस्तान् ब्रह्मचारिणः । पुष्करे रमते विष्णुः पुनरेव द्विधाकृतः ।
दीप्यमानः स्वतेजोभिर्विधूम इव पावकः । सोऽग्निर्मनःसमुद्भूतः पृथिवीं तापयन्निव ।
प्रधावति समं तेन मण्डलं द्व्यर्धयोजनं । विरराजार्च्चिभिर्दीप्तैः पृष्ठतश्चावलम्बिभिः ।
विशीर्णपार्श्वविभवैर्म्मयूखैरिव दीपितः । तस्याग्नेर्व्विस्फुलिङ्गानां न शेकुर्धारणे रताः ।
विप्रकीर्णस्य वासुधामर्य्यादामिव भास्करः । सोऽग्निर्दीप्यति सर्व्वांश्चैव विधूम इव पावकः । १२१२०
स्फुलिङ्गैर्ज्वलनप्रख्यैर्व्वेष्टितो वा महाध्वरे । सोऽग्निर्धूमगतश्चात्र तिष्ठते विपुलस्तदा ।
यावद्विष्णुः क्रमप्राप्तो नियमस्य समापनात् । रक्षां कृत्वा न तं विद्यात् विष्णुर्विष्णुपराक्रमः ।
भूत्वा शतशरीरो वै नागो बालाहकोऽभवत् । तमग्निमात्मसंसृष्टं लेलिहानं महामतिः ।
प्रतिप्रवृद्धं तेजोभिर्भूतानां हितकाम्यया । वारिणा सुखशीतेन प्राणिनां प्राणवर्द्धनः ।
न्यषिञ्चद्दहनं तत्र नागो बालाहकस्तदा । ततः सिद्धगणैर्जुष्टः पुष्करे तप्यते तपः । १२१२५
संहृत्य मनसात्मानं महायोगी महाबलः । संहृत्य पादगात्राणि मनो मूर्द्ध्नि विधारयन् ।
अचलं स्थानमासाद्य तूष्णीम्भूतो बभूव ह । एष धर्म्मो हि धर्म्माणां सोपधानविकल्पितः ।
हितः सर्व्वेषु भूतेषु इह चामुत्र चोभयोः । अथ दैत्या हतास्तत्र समागम्योद्यतायुधाः ।
मायाप्रायैर्व्बहुविधैर्नगरैरभिसंवृताः । अग्निं दैत्याः पर्व्वताग्रैरभिघ्नन्ति परन्तप ।
ज्वलन्तं ज्वलनप्रख्या महाकाया महाबलाः । मेघीभूताश्च मायाभिर्व्वर्षन्ति बलदर्पिताः । १२१३०
तस्मिन्नेवाग्निसंघाते संघातं तं महाबलाः । ते शैलास्तर्व्विषा दग्धाः शतशोऽथ सहस्रशः ।
युगान्ते प्रभुरादित्यो जनानिव दिधक्षति । न शेकुरग्निं दैत्यास्ते मायाभिमुखमुद्यतं ।
आदित्यमिव दीप्यन्तं नभः सूर्य्योदये यथा । विहतैस्तथा सर्व्वैर्दैत्या भग्नपराक्रमाः ।
गन्धमादनमासाद्य निषण्णा नगमूर्द्धनि । स चाग्निर्व्वैष्णवैर्लोकैर्विद्युद्भिः सह सङ्गतः ।
अन्तरीक्षचरान्दैत्यान्निर्द्दहन् विचरन्दिवि । नागो बालाहकश्चैव मेघैः संघातमागतः । १२१३५
मुमोच सलिलं भूमौ पर्ज्जन्य इव वृष्टिमान् । मन्त्रैः सञ्चोदितो नागो द्विजेन्द्रैर्वदनोद्गतैः ।
मुमोच तोयसंघातं मानवश्चिप्रजं अलं ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे अष्टादशाधिकद्विशततोऽध्यायः ॥ २१८ ॥
॥ जनमेजय उवाच ॥ संयुज्य तपसा देवाः किं कुर्व्वन्त ततः परं । न हि तद्विद्यते लोके तपसा यन्न लभ्यते ।
॥ वैशम्पायन उवाच ॥ अथ दीक्षां समास्थाय सर्व्वे विष्णुमया गणाः । पुष्करादग्निमुद्धृत्य प्रणीय च यथाविधि ।
जुहुवुर्म्मन्त्रविधिना ब्राह्मणा मन्त्रचोदिताः । हविषा मन्त्रपूतेन यथा वै विधिरेव च । १२१४०

स चाग्निर्व्विधिवत्तत्र वर्द्धते ब्रह्मतेजसा । तेजोभिर्व्विकलीभूतः प्रभुः प्रकृषविग्रहः ।
ब्रह्मदण्ड इति ख्यातो वपुषा निर्दहन्निव । दिव्यरूपप्रहरणो ह्यसिचर्म्मधनुर्द्धरः ।
सगदो लाङ्गली चक्री शरी चर्म्मी परश्वधी । शूली वज्री खड्गपाणिः शक्तिमान् वरकार्मुकी ।
विष्णुश्चक्रधरः खड्गी मुषली लाङ्गलायुधः । शरो लाङ्गलमालम्ब्य मुषलञ्च महाबलः ।
वज्रमिन्द्रस्तपोयोगाच्छतपर्व्वाणमाक्षिपत् । रुद्रः शूलं पिनाकञ्च मनसा धारयन् प्रभुः । १२१४५
मृत्युर्द्दण्डं सपाशञ्च कालः शक्तिमगृह्णत । जग्राह परशुं त्वष्टा कुवेरस्य परश्वधं ।
निर्व्विकारैः समायुक्ताः शतशोऽथ सहस्रशः । विश्वकर्म्मा च त्वष्टा च चक्राते ह्यायुधं बहु ।
इन्द्रायाशीरथं प्रादात् सूर्य्याय च प्रतापिने । परमात्मा ददौ विष्णू रुद्राय च महात्मने ।
छन्दोमिरेव त्वष्टा च स चकाराथ वाहिनीं । विश्वकर्म्मा विमानानि चकार बहुभिः क्रमैः ।
शरीरांशं समुद्धृत्य विष्णुः सत्यपराक्रमः । पुष्करात् पर्व्वणि घनात् धृतनाथं प्रवर्त्तयत् । १२१५०
चाश्चैव सूर्य्यच्छत्राणां त्वरया समकल्पयत् । ययाऽभियुज्य संग्रामे शत्रुं निर्व्विभिदे रणे ।
स तं दण्डं समुचितं निर्व्विकारं समाहितं । ब्रह्मा जग्राह विधिना अन्तर्द्धानगतः प्रभुः ।
स्वैः प्रभावैश्च विधिना सोऽस्त्रग्राममचतुर्व्विधं । ऐन्द्रमाग्नेयवायव्यं रौद्रं रौद्रेण वर्च्चसा ।
एभिर्व्विकारैः संयुक्ता दितेः पुत्रा महाबलाः । तपसा शिक्षया चैव अस्त्रैः प्रहरणैरपि ।
बलेन चतुरङ्गेण वीर्य्येण सुसमाहिताः । अप्रधृष्या रणे सर्व्वे वर्णनैवाभवंस्तदा । १२१५५
ते विहाय गुहामध्ये सभाण्डोपस्करे रथे । मन्दरस्य गिरेः पादे विचेरुर्व्वसुधातले ।
चतुरङ्गं बलं सर्व्वं संहृत्य तपसः प्रभुः । विष्णुरेव महायोगी चचार वसुधातले ।
भूयोऽन्यत्तप आभिद्युश्चरन्तो ब्राह्मणैः सह । तैश्च सर्व्वैः सुरगणैस्सर्व्वचोरनिवासिभिः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे ऊनविंशत्यधिकद्विशततोऽध्यायः ॥ २१९ ॥
॥ जनमेजय उवाच ॥ वर्त्तमाने खिले ब्रह्मन्निर्म्मर्थ्यादे महायहे । अविभागे च भूतानां कथमासन् प्रजास्तदा ।
॥ वैशम्पायन उवाच ॥ पृथुं वैण्यं प्रजापालमभ्यषिञ्चत् प्रजापतिः । राज्याय ऋषिभिः सार्द्धं प्रजा धर्म्मपरायणाः । १२१६०
एष नः परमो राजा सानुरागो व्यजायत । त्रेतायां संप्रवृत्तायामन्योन्यमनुजल्पिरे ।
एष नो वृत्तिदाता च शिल्पानाञ्च समर्पिता । निर्म्माता सर्व्वभूतानां सत्यप्राप्तेन कर्म्मणा ।
एतस्मिन्नन्तरे देवा गन्धमादनसानुषु । बहुभिर्नियमैः श्रान्ता निषण्णा गिरिसानुषु ।
अथ गन्धं समासाद्य समन्ताद्देवदानवाः । माधवे समये प्राप्ते तेन गन्धेन दर्पिताः ।
पुष्पमात्रस्य यद्वीर्य्यं मारुतेन विसर्पितं । मनोग्राहि सुखं सर्व्वं पार्थिवं गन्धमुत्तमं । १२१६५
ते दैत्यास्तेन गन्धेन किञ्चिद्विस्मयमागताः । प्रसन्नमनसो भूत्वा परं सौख्यमुपागताः ।
ऊचुश्च सहिताः सर्व्वे तेन गन्धेन दर्पिताः । पुष्पमात्रस्य यद्वीर्य्यं किं तस्य फलतो भवेत् ।
अनुमानेन विज्ञेया विविधाः कर्म्मवृत्तयः । शुभाश्चैवाशुभाश्चैव बुद्धिप्राणेन देहिनां ।
तस्मादयं पयोमध्ये ओषधीर्निर्म्मथयामहे । मन्दरेण विशालेन बलिना कामरूपिणा ।

समुद्रमभिसंरब्धा मथ्नीमः सोमजं जलं। पीत्वा च सहिताः सर्व्वे प्रस्थिताः कामरूपिणः। ११९७०
विष्णुरेवाग्रणीस्तेषां भविष्यति महाबलः। दिवञ्च वसुधाञ्चैव भोक्ष्यामः सह शत्रुभिः।
समूलपत्रशाखाश्च सपुष्पाः सफलाश्रिमः। सर्व्वपर्व्वतांश्च गच्छेमो वसुधां वसुधातले।
उद्धृत्य गिरिपादेभ्यो गन्धमादनसानुजान्। प्रभाष्य वचनं दैत्या मन्दरस्य प्रकम्पने।
समुद्धर्त्तुं प्रधावन्तः कम्पयन्ति स्म मेदिनीं। निश्चयेन महावीर्य्या बाहुभिः परिणाहिभिः।
न शेकुस्ते समुद्धर्त्तुं शैलेन्द्रं दनुवंशजाः। निपेतुर्जानुभिर्घृष्टा विपुले पर्व्वतान्तरे। ११९७५
समाधायात्मनात्मानं तपसा दग्धकिल्विषाः। पितामहं प्रपद्यन्त शिरोभिः कामरूपिणः।
तेषां मनोऽभिलषितं ब्रह्मा सर्व्वजगो वशी। ज्ञात्वा बहुविधैर्व्वाक्यैर्व्याजहार सरस्वतीं।
अशरीरां शरीरस्थः परया वर्णसम्पदा। सर्व्वलोकपतिर्ब्रह्मा लोकानां हितकाम्यया।
आदित्यैर्व्वसुभिश्चैव रुद्रैश्च समरुद्गणैः। देवैर्यक्षैः सगन्धर्व्वैः किन्नरैश्च प्रगायिभिः।
समेत्य सहितैः सर्व्वैरुद्धर्त्तुं शक्यते गिरिः। अमृतार्थे महातेजा धातुभिः समरञ्जितः। ११९८०
सुरासुरगणाः सर्व्वे समुत्पाट्य महागिरिं। हस्तारूढाः प्रपश्यन्ति वीरुधो हि नवं रसं।
एतच्छ्रुत्वा तु वचनं सर्व्वेषामन्तिके तदा। दैतेया बाहुबलिनो मनोभिर्वाग्भिरेव च।
विक्रीडभूता बहुधा बभूवुर्लवणाम्भसः। यत्र पुष्करविन्यस्तं सहितैर्देवदानवैः।
सुरासुरगणाः सर्व्वे सहिता लवणाम्भसः। मन्दरं पुष्करं कृत्वा नेत्रं वासुकिमेव च।
समाः सहस्रं मथितं जलमोषधिभिः सह। क्षीरभूतं समायोगादमृतं समपद्यत। ११९८५
तज्जहुरसुराः पूर्व्वमाक्रान्ता लोभमन्युना। तदा पश्चाज्जहुर्देवाः कामतेजोबलान्विताः।
धन्वन्तरिस्तथा मद्यं श्रीर्देवी कौस्तुभो मणिः। शशाङ्को विमलश्चापि समुत्तस्थुः समन्ततः।
उच्चैःश्रवा हयो रम्यः पीयूषं तदनन्तरं। पश्चाद्देवास्तदा पातुमुद्यता राजसत्तम।
न च केचित् पिबन्त्यन्ये दैत्या नैव च दानवाः। विच्छेदाय हरिः संख्ये राहोश्चक्रेण कं मृधे।
अभियुक्तं पितृगणैर्मुनिभिश्च सनातनैः। तदिन्द्रहस्तादमृतं जहार पृथिवी स्वयं। ११९९०
जगामान्तर्गता देवी ब्रह्मवाक्यप्रचोदिता।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे विंशत्यधिकद्विशततमोऽध्यायः॥ २२०॥

॥ जनमेजय उवाच। निहते दैत्यसंघाते विष्णोश्चातिपराक्रमे। दैतेया दानवाश्चापि किमिच्छन्ति पराक्रमात्।
॥ वैशम्पायन उवाच॥ दानवा राज्यमिच्छन्ति पराक्रम्य महाबलाः। तप इच्छन्ति सहिता देवाः सत्यपराक्रमाः।
॥ जनमेजय उवाच। कथं कालस्य महतो हिरण्यकशिपुस्तदा। यजते ब्रह्मणः क्षेत्रे प्राप्तैश्वर्य्यः स कामदः।
॥ वैशम्पायन उवाच॥ यजेदुरुसुवर्णेन राजसूयेन पार्थिवः। क्रतुना दानवश्रेष्ठो वसुधायां महाबलः। ११९९५
गङ्गायमुनयोर्म्मध्ये यदभूद्विपुलं तपः। समेयुस्तत्र सहिता यजमाने महासुरे।
ब्राह्मणा वेदविद्वांसो महाव्रतपरायणाः। यतयश्चापरे सिद्धा योगधर्म्मेण भारत।
मुनयो वालिखिल्याश्च नानाधर्म्मेण शोषिताः। बहवो हि द्विजा मुख्या नित्यं धर्म्मपरायणाः।

स्वध्यायश्च महाभागा विप्रैः पूज्याः सहस्रशः । विपुले रत्नविभवे ह्रियमाणे इतस्ततः ।
शुक्रस्तु सह पुत्रेण दैत्यं याजयते प्रभुः । हिरण्यकशिपुं मध्ये गणानां ज्वलनप्रभः । १२२००
हिरण्यकशिपुश्चैव व्याजहार सरस्वतीं । कामादहं ददामीति तदै सम्प्रतिपद्यतां ।
विष्णुर्वामनरूपेण भिक्षां तां प्रतिगृह्णाति । हिरण्यकशिपोर्हस्ताद्द्वे पदे पदमेव च ।
ततः क्रमितुमारेभे विष्णुः सत्यपराक्रमः । त्रीन् लोकांस्त्रिपदैः क्रान्त्वा दिव्यं वपुरधारयत् ।
हृतराज्याश्च दैतेयाः पातालविवरं ययुः । ससैन्यगणसङ्घाः सप्रासाः सासितोमराः ।
सयन्त्रवरगुप्ताश्चैव सपताकरथध्वजाः । सचर्म्मवर्म्मकोषाश्च सायुधाः सपरश्वधाः । १२२०५
ततेन्द्रं विष्णुसहिताः सर्वास्तेऽभ्युत्थिता गणाः । अभ्यषिञ्चन् प्रमुदिता लोकानामधिपं सुराः ।
स तान् स्वधामृतेनाशु पितॄन् वै समतर्पयत् । ब्रह्मा तदमृतं दिव्यं महेन्द्राय प्रयच्छति ।
अक्षयश्चाव्ययश्चैव संवृत्तस्तेन कर्म्मणा । ततः शङ्खमुपाध्मासीत् द्विषतां लोमहर्षणं ।
पितामहकरोद्भूतं अमिते प्रथमे पदे । तं श्रुत्वा शङ्खशब्दन्तु त्रयो लोकाः समाहिताः ।
निर्वृतिं परमां प्राप्ता इन्द्रं नाथमवाप्य च । सर्व्वैः प्रहरणैश्चैव संयुक्ता वह्निसम्भवैः । १२२१०
मन्दराग्रे सुविहितैर्ज्वलद्भिरिव पावकैः ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे एकविंशत्यधिकद्विशततमोऽध्यायः ॥ २२१ ॥

॥ वैशम्पायन उवाच ॥ ततो महति वृत्तान्ते स्थिते राज्ये महोदये । देवानां मानुषाणाञ्च सहवासोऽभवत्तदा ।
एकतः समधीयन्त संहिताः प्ररुदन्ति च । स्वयञ्च भागं गृह्णन्ति यज्ञकर्म्मणि भारत ।
प्राचेतसं ततो दक्षं दीक्षित्वा वै बृहस्पतिः । वाजिमेधाय भगवानृषिभिः परिवारितः ।
तस्मिन्प्रातामहे यज्ञे दक्षस्य विदितात्मनः । शामित्रमकरोद्रुद्रो भागार्थं सह नन्दिना । १२२१५
रुद्रस्यैव हि तद्रूपं द्विधाभूतं तदोजसा । जातः परमधर्म्मात्मा नन्दी पुरुषविग्रहः ।
तेन योगेन राजेन्द्र यज्ञस्तद्ब्रह्म सनातनं । विहितं सत्यवचनैस्तेनैव परमात्मना ।
स्वरूपैश्चाप्यरूपैश्च विरूपार्थैर्घटोदरैः । ऊर्द्ध्वनेत्रैर्महाकायैर्व्विकटैर्व्वामनैस्तथा ।
शिखिभिर्जटिभिश्चैव व्यक्तैश्च शङ्कुकर्णिभिः । चीरिभिश्चर्म्मिभिश्चैव कूटमुद्गरपाणिभिः ।
सघण्टाचीरिभिश्चैव मुञ्जमेखलधारिभिः । सहस्तकटकैश्चैव स्वर्णकुण्डलधारिभिः । १२२२०
सडिण्डिमैः सभेरीकैः समृदङ्गैः सवेणुभिः । एतैः परिवृतो देवो मखं तं समुपाव्रजत् ।
सशङ्खमुरजैश्चापि सतालतलपाणिभिः । उग्रायुधधरो देवः सपिनाक इवान्तकः ।
विरराजार्चिभिर्दीप्तैर्मखे मखवतां वरः । कालाग्निरिव दीप्तार्चिर्जगद्दग्धुमिवोद्यतः ।
नन्दी पिनाकपाणिश्च जघ्नतुर्मखमुत्तमं । युगान्त इव कालाग्निः क्षिप्रं दग्धुमिवोद्यतः ।
यूपमुत्क्षिप्य धावन्ति निशाचरगणास्ततः । वासवप्रमुखांश्चैव चोरचर्म्मनिवासिनः । १२२२५
हवींष्यन्ये पिबन्त्येव जिह्वाभिस्ताम्रलोचनाः । भक्षयन्ति पशूनन्ये रसनाद्यैः प्रलम्बिभिः ।
मुमुचुश्चापरे यूपान् प्रसभं प्रहरन्ति च । वह्निमन्ये प्रसिञ्चन्ति वारिभिः प्रहसन्ति च ।

सोममन्ये जहुः केचिच्चैवाज्यमीपमैः । दर्भान् कश्चित् प्रलुम्पन्ति हस्तैः पद्मदलप्रभैः ।
बभञ्जिरे च यूपायान् कलसांश्चैव चिक्षिपुः । चिच्छिदुः काञ्चनान् वृक्षान् शोभार्थं संप्रकल्पितान् ।
विभिदुश्चैव वाणेश्च सुमसुश्च हिरण्मयान् । लुलुपुश्चैव पात्राणि ममन्थुश्चारणीमथ । १२२१०
अरुंश्चैव प्राग्वंशं लुलुपुश्च समाहिताः । चखादिरे पुरोडाशान्नन्यश्चैवावकर्त्तिरे ।
एवं दिवा च रात्रौ च भिद्यमानो महामखः । चुक्रोश च महानादं भिद्यमान इवार्णवः ।
धनुः सशरमादाय पूर्व्वदत्तं स्वयम्भुवा । क्रतं कौचकवेणुन्यां समरेषु महाबलं ।
प्रतिगृह्य महादेवः स शरैः समयोजयत् । धनुर्विगृह्य जानुभ्यां जघान सुमहाक्रतुं ।
स विद्धस्तेन वाणेन खं समुत्पतितः क्रतुः । मृगो भूत्वा नर्द्दमानो ब्रह्माणमुपधावति । १२२१५
शरेणाभिहतस्त्राणं न लेभे प्रथमं भुवि । शरणार्थी स्वयं प्राप्तः शरेणान्तर्गतेन च ।
तमुवाच मृगं ब्रह्मा शुभं सानुनयं वचः । स्वरेणोत्तमवीर्य्येण गम्भीरेण सुभाषिणा ।
एवंरूपो नभसि त्वं भविष्यसि महामृग । विजितश्च त्रिपर्व्वेण शरेणानतपर्व्वणा ।
तिष्ठ नक्षत्रशिरसि सह रुद्रेण नित्यशः । सोमेन सह संयुक्तो ह्यव्ययेनाव्ययेन च ।
दिवि सप्ताश्रभूताभिस्ताराभिः सह सङ्गतः । ज्योतिषां ज्योतिर्भूतस्त्वं भुवस्त्वं शाश्वतो भव । १२२२०
यच्चैतद्रुधिरं दिव्यं क्षतात् समभिनिःसृतं । नभस्युत्पतितश्चैव प्रवेगेण प्रधावतः ।
क्षतजं बहुवर्णञ्च केतुमण्डलसंस्थितं । निमित्तभूतं भूतानां वर्षं वर्षप्रदं तथा ।
सुखं दुःखञ्च भूतानां दर्शनात् संप्रवर्त्तते । इन्द्रियश्रवणाच्चैव नभसीन्द्रायुधोऽभवत् ।
चक्षुषी मानुषे राजन् विस्मयात् समवेक्षतां । अद्भुतं बहुचित्रञ्च मनसा संप्रकल्पितं ।
न तु रात्रौ प्रदृश्येत खे तु सङ्गणसंश्रितं । दिवस्यैव सदा त्वपि महत् कार्य्यं प्रदृश्यते । १२२२५
भूमावेव समुत्तिष्ठदाकाशे प्रविलीयते । शतशश्च समं सर्व्वे प्रधावन्ति प्रचेतसः ।
भयाद्रुद्रस्य महतो धन्विनो वाणपाणयः । नन्दी रुद्रगणैः सार्द्धं पिनाकी समतिष्ठत ।
युगान्तकाले ज्वलितो ब्रह्मदण्ड इवोद्यतः । विष्णुः शार्ङ्गायसंभूतं प्रगृह्य विपुलं धनुः ।
प्रातिष्ठत महाबाहुः पाणिना चक्रमादधत् । गदां सघण्टामन्येन खड्गमन्येन पाणिना ।
प्रगृह्य सोऽग्रतोऽतिष्ठद्रुद्रायोद्यतपाणये । ततः शार्ङ्गायसंभूतं प्रगृह्य विपुलं धनुः । १२२३०
शङ्खञ्चाप्रतिमं लोके शरांश्चानतपर्व्वणः । विष्णुरग्रे स्थितो भाति सबलः संहताञ्जलिः ।
बद्धगोधाङ्गुलित्राणः सचन्द्र इव तोयदः । आदित्या वसवश्चैव दिव्यैः प्रहरणैः सह ।
विष्णुमेवाभितः सर्व्वे अतिष्ठन् ज्वलनप्रभाः । मरुतश्चैव विश्वे च रुद्रमेवाभिपद्यत ।
गन्धर्व्वाः किन्नराश्चैव नागा यक्षाः सपन्नगाः । ऋषयो न्यस्तदण्डाश्च उभयोः पक्षयोर्हिताः ।
जपन्ति शान्तये नित्यं लोकानां हितकाम्यया । रुद्रः शरेणाभ्यहनद्विष्णुर्नारायणो रणे । १२२३५
हृदि सर्व्वाङ्गसन्धीषु तीक्ष्णाग्रेण च पत्रिणा । न चकम्पे तदा विष्णुः सर्व्वात्मा ब्रह्मसंभवः ।
न च रोषमना देहं हतं बिभ्रत् षडिन्द्रियैः । विष्णुश्च धनुरादाय शरेण समयोजयत ।

जत्रुदेशे मुमोचाशु ब्रह्मदण्डमिवोद्यतं। स विद्धस्तेन बाणेन महादेवो न कम्पते।
वज्रेणेव महाशैलस्त्रिमन्दरस्य न चाल्यते। ततः प्रसभमाप्लुत्य रुद्रं विष्णुः सनातनः।
जग्राह कण्ठे भगवान्नीलकण्ठस्ततोऽभवत्। अनादिनिधनो देवः चम्यतां भगवान्मम। १२२६०
सर्व्वभूतागमाचार्य्यः कर्म्मणा च न चाल्यते। कर्म्मणाञ्चैव कर्त्ता च विकर्त्ता चैव भारत।
अरोपलाश्च भूतानां सर्व्वभूतेषु चोत्तमः। स्वयमेव हि यत्कर्म्म विधत्ते कर्म्मयोगिषु।
तयोः शुभमनो राजन् स्वयमेव तथाऽकरोत्। अन्तरीक्षाच्छुभा वाचः श्रूयन्ते मधुराक्षराः।
सिद्धानां वदनोन्मुक्ताः सनातन नमोऽस्तु ते। नन्दी पिनाकमुद्यम्य बलवान्रुद्रसम्भवः।
मूर्द्धन्यभिजघानाजौ विष्णुं क्रोधेन मूर्च्छितः। ततः प्रहसितो विष्णुर्नन्दिं दृष्ट्वा सुरोत्तमः। १२२६५
स्तम्भयामास भगवान् सर्व्वभूतपतिर्हरिः। विष्णुर्ब्रह्मपरो भूत्वा तेजसा प्रज्वलन्निव।
क्षमया च समायुक्तः स्थितः स्थाणुरिवाचलः। अचिन्त्यश्चाप्रमेयश्च अजेयश्चाप्यरिन्दमः।
युगान्ताग्निसमो भूत्वा शान्तात्मा हरिरव्ययः। प्रसन्नः कल्पयामास भागं रुद्राय धीमते।
विष्णुर्द्धर्म्मपरो नित्यं त्यक्तकामः सुरर्षभः। विष्णुना चैव राजेन्द्र स यज्ञः सन्धितः पुनः।
यथापवत्रु ते सर्व्वे गणा आसन्महीपते। तस्मिन् युद्धे महाघोरे विष्णोरुद्रस्य चैव ह। १२२७०
यथापवं भवेद्युद्धं दक्षयज्ञविनाशने। विष्णोश्चैव यज्ञस्य तदा लोके प्रतिष्ठितः।
सर्व्वभूतेषु राजेन्द्र स्थितो यज्ञः सनातनः। दक्षो यज्ञफलञ्चैव प्राप्तवान् स प्रजापतिः।
एष पौष्करको नाम प्रादुर्भावो महात्मनः। पुराणे पुष्करे चैव यथा द्वैपायनेरितः।
यथावदनुपूर्व्व्येण संस्तुतः परमर्षिभिः।
यश्चैनमग्र्यं प्रवरं पुराणं सदाऽप्रमत्तः शृणुयाद्यथोक्तं। अवाप्य कामानिह वीतशोकः परत्र स स्वर्गफलानि भुङ्क्ते। १२२७५
इमाञ्चोदाहृतां दिव्यां कथाममितबुद्धिमान्। श्रावयेद्यस्तु विप्रेभ्यः शुचिः प्रयतमानसः।
अधीत्य सर्व्वमध्यात्मं देवलोके महीयते।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौष्करे द्वाविंशत्यधिकद्विशततमोऽध्यायः ॥ २२२ ॥

॥ जनमेजय उवाच ॥ प्रादुर्भावः पुराणेषु विष्णोरमिततेजसः। सतां कथयतां विप्र वाराह इति नः श्रुतं।
न जाने तस्य चरितं न विधिं न च विस्तरं। न कर्म्मगुणसन्तानं न हेतुं न मनीषितं।
किमात्मको वराहोऽसौ का मूर्त्तिः काऽस्य देवता। किमाचारः किम्प्रभावः किं वा तेन पुरा कृतं। १२२८०
एतन्मे संश तत्त्वेन वाराहं श्रुतिविस्तरं। यज्ञार्थन्तु समेतानां द्विजातीनां महात्मनां।
॥ वैशम्पायन उवाच ॥ हन्त ते कथयिष्यामि पुराणं ब्रह्मसम्मितं। नानाश्रुतिसमायुक्तं कृष्णद्वैपायनेरितं।
महावराहचरितं कृष्णस्याद्भुतकर्म्मणः। यथा नारायणो राजन् वाराहं वपुरास्थितः।
दंष्ट्रया गां समुद्रस्थामुज्जहारारिसूदनः। छान्दसीभिरुदाराभिः श्रुतिभिः समलङ्कृतः।
शुचिः प्रयतवाग्भूत्वा निबोध जनमेजय। इदं पुराणं परमं पुण्यं वेदैश्च सम्मितं। १२२८५
नानाश्रुतिसमायुक्तं नास्तिकाय न कीर्त्तयेत्। पुराणमेतदखिलं सांख्यं योगं तथैव च।

कार्त्स्न्येन विधिना प्रोक्तं सोऽस्यार्थं वेदयिष्यति। विश्वेदेवास्तथा साध्या रुद्रादित्यास्तथाऽश्विनौ।
प्रजानां पतयश्चैव सप्त चैव महर्षयः। मनःसंकल्पजाश्चैव पूर्व्वजाश्च महर्षयः।
वसवोऽप्सरसश्चैव गन्धर्व्वा यक्षराक्षसाः। दैत्याः पिशाचा नागाश्च भूतानि विविधानि च।
ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्रा म्लेच्छादयो भुवि। चतुष्पदानि सत्त्वानि तिर्य्यग्योनिगतानि च। ११२८०
जङ्गमानि च सत्त्वानि यच्चान्यज्जीवसंज्ञितं। पूर्णे युगसहस्रान्ते ब्राह्मेऽहनि तथा गते।
निर्व्वाणे सर्व्वभूतानां सर्व्वोत्पातसमुद्भवे। हिरण्यरेतास्त्रिशिखस्ततो भूत्वा वृषाकपिः।
शिखाभिर्व्विधमल्लोकान् संशोषयति देहिनः। दह्यमानास्ततस्तस्य तेजोरश्मिभिरध्वतः।
विवर्णवर्णा दग्धाङ्गा हतार्च्चिशाङ्गिरामनैः। साङ्गोपनिषदा वेदा इतिहासपुरोगमाः।
सर्व्वविद्याः क्रियाश्चैव सत्यधर्म्मपरायणाः। ब्रह्माणमग्रतः कृत्वा प्रभवं विश्वतोमुखं। ११२८५
सर्व्वे देवगणाश्चैव त्रयस्त्रिंशच्च छन्दजाः। तस्मिन्नहनि संप्राप्ते तं हंसं महदक्षरं।
प्रविशन्ति महायोगं हरिं नारायणं प्रभुं। तेषां तत्र प्रविष्टानां प्रलयोत्पत्तिरुच्यते।
यथा सूर्य्यस्य सततमुदयास्तमने प्रभो। पूर्णे युगसहस्रान्ते कल्पो निःशेष उच्यते।
यस्मिन् जीवकृतं सर्व्वं निःशेषं नावतिष्ठते। संहृत्य लोकान्निखिलान् सस्रासुरपन्नगान्।
कृत्वात्मगर्भे भगवानास्त एको जगद्गुरुः। स स्रष्टा सर्व्वभूतानां कल्पान्तेषु पुनः पुनः। ११२९०
अव्यक्तः शाश्वतो देवस्तस्मिन् सर्व्वमिदं जगत्। नष्टार्ककिरणेऽलोके चन्द्ररश्मिविवर्ज्जिते।
त्यक्तधूमाग्निपवने क्षीणयज्ञतपःक्रिये। अपक्षिगणसंपाते सर्व्वप्राण्यचरे पथि।
अमर्य्यादाकुले रौद्रे सर्व्वतस्तमसा वृते। अदृश्ये सर्व्वलोकेऽस्मिन्नभावे सर्व्वकर्म्मणां।
प्रशान्ते सर्व्वसम्पाते नष्टवैरपरिग्रहे। गते स्वभावसंस्थानं लोके नारायणात्मके।
परमेष्ठी हृषीकेशः शयनायोपचक्रमे। पीतवासा लोहिताक्षः कृष्णजीमूतसन्निभः। ११२९५
शिखासहस्रविकचं जटाभारं समुद्वहन्। श्रीवत्सकलिलं पुण्यं रक्तचन्दनभूषितं।
वक्षो बिभ्रन्महाबाहुः सविद्युदिव तोयदः। पुण्डरीकसहस्रस्य मालाऽस्य शुशुभे तदा।
पत्नी चैव स्वयं लक्ष्मीर्देहमावृत्य तिष्ठति। ततः स्वपिति धर्म्मात्मा सर्व्वलोकपितामहः।
कमप्यमितविक्रान्तो निद्रायोगमुपागतः। ततो वर्षसहस्रे तु पूर्णे स पुरुषोत्तमः।
स्वयमेव विभुर्भूत्वा बुध्यते त्रिबुधाधिपः। ततश्चिन्तयते भूयः सृष्टिं लोकस्य लोककृत्। ११३१०
पितृदेवासुरनरान् पारमेष्ठ्येन कर्म्मणा। ततश्चिन्तयते कार्य्यं देवेषु समितिञ्जयः।
सम्भवं सर्व्वलोकस्य विदधाति स वाक्पतिः। कर्त्ता चैव विकर्त्ता च संहर्त्ता च प्रजापतिः।
धाता विधाता च तथा संयमो नियमो यमः। नारायणपरा वेदा नारायणपराः क्रियाः।
नारायणपरो यज्ञो नारायणपरा श्रुतिः। नारायणपरो मोक्षो नारायणपरा गतिः।
नारायणपरो धर्म्मो नारायणपरः क्रतुः। नारायणपरं ज्ञानं नारायणपरं तपः। ११३१५
नारायणपरं सत्यं नारायणपरं परं। नारायणात् परो देवो न भूतो न भविष्यति।

स स्वयम्भूरिति ज्ञेयः स ब्रह्मा भुवनाधिपः । स वायुरिति विज्ञेय एव यज्ञः प्रजापतिः ।
सदसच्च स विज्ञेयः सर्व्वज्ञः स प्रजाकरः । यद्वेदितव्यं त्रिदशैस्तदेव परिविन्दति ।
यच्च वेद्यं भगवतो देवा अपि न तद्विदुः । प्रजानां पतयः सप्त ऋषयश्च सहामरैः ।
नास्यान्तमधिगच्छन्ति तेनानन्त इति श्रुतिः । यदस्य परमं रूपं तन्न पश्यन्ति देवताः । १२२२०
प्रादुर्भावेषु संभूतं यत्तदर्चन्ति देवताः । दर्शितं यदनेनैव तदवेक्षन्ति देवताः ।
यन्न दर्शितवानेष कस्तदन्वेष्टुमर्हति । ग्रामणीः सर्व्वभूतानामग्निमारुतयोर्गतिः ।
तेजसस्तपसश्चैव निधानममृतस्य च । चातुराश्रम्यधर्म्मेशश्चातुर्होत्रफलाशनः ।
चतुःसागरपर्य्यन्तश्चतुर्युगनिवर्त्तकः । तदेष संहृत्य जगत् कृत्वा गर्भस्थमात्मनः ।
मुमोचाण्डं महायोगी धृत्वा वर्षसहस्रकं । १२२२५
सुरासुरद्विजभुजगाप्सरोगणैर्द्रुमौषधिक्षितिधरयक्षगुह्यकैः । प्रजापतिः श्रुतिधररचमां कुलं सदाऽसृजज्जगदिदमात्मना प्रभुः ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वाराहे प्रादुर्भावे त्रयोविंशत्यधिकद्विशततोऽध्यायः ॥ २२३ ॥

॥ वैशम्पायन उवाच ॥ जगदण्डमिदं पूर्व्वमासीत् सर्व्वं हिरण्मयं । प्रजापतेर्मूर्त्तिमयमितीयं वैदिकी श्रुतिः ।
तद्वै वर्षसहस्रान्ते बिभेदोर्द्ध्वमुखं विभुः । लोकोद्भवनहेतुर्व्वा बिभेदाधोमुखं पुनः ।
भूयोऽष्टधा विभेदाण्डं विभुर्व्वै लोकयोनिकृत् । चकार जगतश्चात्र विभागं सर्व्वभागवित् ।
यच्छिद्रमूर्द्ध्वमाकाशं परा सुकृतिनां गतिः । विहितं विश्वयोगेन यदधस्ताद्रसातलं । १२२३०
यदण्डमकरोत् पूर्व्वं देवलोकसिसृक्षया । समन्तादष्टधा योगी च्छिद्राणि कृतवांश्च सः ।
दिशश्च विदिशः सर्व्वा मनसैवाकरोद्द्विधा । नानारागविरागाणि यान्यण्डशकलानि वै ।
बहुवर्णधराश्चित्रा बभूवुस्ते बलाहकाः । यदण्डमध्ये स्कन्नन्तु द्रवमासीत् समाहितं ।
जातरूपं समभवत्तत् सर्व्वं पृथिवीतले । तस्य क्लेदार्णवौघेन प्राच्छाद्यत समन्ततः ।
पृथिवी निखिला राजन् युगान्ते सागरैरिव । यथाण्डमकरोदूर्द्ध्वं देवलोकचिकीर्षया । १२२३५
तत्र यत् सलिलं स्कन्नं सोऽभवत् काञ्चनो गिरिः । तेनाम्भसा वृताः सर्व्वा दिशश्चोपदिशश्च ह ।
अन्तरीक्षञ्च नाकञ्च यच्चान्यत् किञ्चिदन्तरं । यत्र यत्र जलं स्कन्नं तत्र तत्रोत्थितो गिरिः ।
सहस्रशैलगहना विषमा मेदिनी त्वभूत् । तैः सा पर्व्वतजालैश्च बहुयोजनविस्तृतैः ।
पीडिता गुरुभिर्द्देवी पृथिवी व्यथिताऽभवत् । महीतले भूरिजलं दिव्यं नारायणात्मकं ।
हिरण्मयं समुत्सृज्य तेजश्च जलरूपि तत् । अशक्ता वै धारयितुमधस्तात् प्राविशत्तया । १२२४०
पीड्यमाना भगवतस्तेजसा तेन सा क्षितिः । पृथिवीं विशतीं दृष्ट्वा तामधो मधुसूदनः ।
उद्धारार्थं मनश्चक्रे लोकानां हितकाम्यया ।

॥ भगवानुवाच ॥ एषा मत्तेजसो वीर्य्यं समासाद्य तपस्विनी । रसातलं प्रविशति पङ्के गौरिव दुर्ब्बला ।

॥ पृथिव्युवाच ॥ त्रिविक्रमायामितविक्रमाय महानृसिंहाय चतुर्भुजाय । श्रीशार्ङ्गचक्रासिगदाधराय नमोऽस्तु ते काम
वरप्रदाय ।

त्वयात्मा धार्य्यते देव त्वया संधार्य्यते जगत् । त्वं धारयसि भूतानि भुवनं त्वं बिभर्षि च । १२२४५
यत्त्वया धार्य्यते किञ्चित्तेजसा च बलेन च । ततस्तव प्रसादेन मया पश्चात्तु धार्य्यते ।
त्वया धृतं धारयामि नाधृतं धारयाम्यहं । न हि तद्विद्यते भूतं यत्त्वया नेह धार्य्यते ।
त्वमेव कुरुषे वीर नारायण युगे युगे । मम भारावतरणं जगतो हितकाम्यया ।
दानवैस्तेजसा क्रान्ता रसातलतलं गता । त्रयाख मां सुरश्रेष्ठ त्वामेव शरणं गता ।
दानवैः पीड्यमानाऽहं राक्षसैश्च दुरात्मभिः । त्वामेव शरणं नित्यमुपयामि सनातनं । १२२५०
तावन्मेऽस्ति भयं भूयो यावन्न त्वां ककुद्मिनं । शरणं मनसा यामि शतशोऽप्युपलक्षये ।
॥ भगवानुवाच ॥ माभैर्द्धरणि कल्याणि शान्तिं व्रज समाहिता । एष त्वामुचितं स्थानमानयामि मनीषितं ।
॥ वैशम्पायन उवाच ॥ ततो महात्मा मनसा दिव्यं रूपमचिन्तयत् । किं नु रूपमहं कृत्वा उद्धरेयं वसुन्धरां ।
जले निमग्नां धरणीं येनाहं वै समुद्धरे । इति सञ्चिन्त्य मनसा हरिर्नारायणः प्रभुः ।
जलक्रीडारुचिस्तस्माद्वाराहं वपुरस्मरत् । हरिरुद्धरणे युक्तस्तदाऽभूदस्य भूमिधृक् । १२२५५
अधृष्यं सर्व्वभूतानां वाङ्मयं ब्रह्मसंज्ञितं । दशयोजनविस्तारमुच्छ्रितं शतयोजनं ।
नीलजीमूतसङ्काशं मेघस्तनितनिस्वनं । गिरिसंहननं भीमं श्वेततीक्ष्णाग्रदंष्ट्रिणं ।
विद्युदग्निप्रकाशाक्षमादित्यसमतेजसं । पीनवृत्तायतस्कन्धं दृप्तशार्दूलविक्रमं ।
पीनोन्नतकटीदेशं वृषलक्षणलक्षितं । रूपमास्थाय विपुलं वाराहममितं हरिः ।
पृथिव्युद्धरणार्थाय प्रविवेश रसातलं । वेदपादो यूपदंष्ट्रः क्रतुदन्तश्चितीमुखः । १२२६०
अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः । अहोरात्रेक्षणधरो वेदाङ्गश्रुतिभूषणः ।
आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान् । सत्यधर्म्ममयः श्रीमान् क्रमविक्रमसत्कृतः ।
प्रायश्चित्तमहाघोणः पशुजानुर्म्महाकृतिः । उद्गात्रन्त्रो होमलिङ्गो बीजौषधिमहाफलः ।
वाय्वन्तरात्मा मन्त्रस्फिक् विकृतः सोमशोणितः । वेदिस्कन्धो हविर्गन्धो हव्यकव्यातिवेगवान् ।
प्राग्वंशकायो द्युतिमान्नानादीक्षाभिरन्वितः । दक्षिणाहृदयो योगी महासत्रमयो महान् । १२२६५
उपाकर्म्मोष्ठरुचकः प्रवर्ग्यावर्त्तभूषणः । नानाच्छन्दोगतिपथो गुह्योपनिषदासनः ।
छायापत्नीसहायो वै मणिशृङ्ग इवोच्छ्रितः । भूत्वा यज्ञवराहोऽसौ द्रागधः प्राविशत्प्रभुः ।
अद्भिः सञ्छादितामुर्व्वीं स तामार्च्छत प्रजापतिः । रसातलतले मग्नां रसातलतलं गतः ।
प्रभुर्लोकहितार्थाय दंष्ट्राग्रेणोज्जहार गां । ततः स्वस्थानमानीय पृथिवीं पृथिवीधरः ।
मुमोच पूर्व्वं सहसा धारयित्वा धराधरः । ततो जगाम निर्व्वाणं मेदिनी तस्य धारणात् । १२२७०
चकार च नमस्कारं तस्मै देवाय विष्णवे । एवं यज्ञवराहेण भूत्वा लोकहितार्थिना ।
उद्धृता पृथिवी देवी सागराम्बुधरा पुरा । अथोद्धृत्य क्षितिं देवो जगतः स्थापनेच्छया ।
पृथिवीप्रविभागाय मनश्चक्रेऽम्बुजेक्षणः । रसातलगतामेवं विचिन्त्य स सुरोत्तमः ।

ततो विभुः प्रवरवराहरूपधृक् वृषाकपिः प्रसभमथैकदंष्ट्रया । समुद्धरद्धरणिमतुल्यविक्रमो महायशा लोकहितार्थमच्युतः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वाराहे पृथिव्युद्धरणे चतुर्विंशत्यधिकद्विशततोऽध्यायः ॥ २२४ ॥

॥ वैशम्पायन उवाच ॥ तस्योपरि जलौघस्य महती नौरिव स्थिता । विततत्वात्तु देहस्य न ययौ संप्लवं मही । १२३७५
ततः स चिन्तयामास प्रविभागं क्षितेर्विभुः । समुच्छ्रयञ्च सर्व्वेषां पर्व्वतानां समन्ततः ।
विलेखनं प्रमाणञ्च गतिं प्रभवमेव च । माहात्म्यञ्च विशेषञ्च नदीनामन्वचिन्तयत् ।
चतुरस्रां धरां कृत्वा कृत्वा चैव महार्णवान् । मध्ये पृथिव्याः सौवर्णमकरोन्मेरुपर्व्वतं ।
शतयोजनविस्तारं सहस्रञ्च समुच्छ्रितं । जातरूपमयैः शृङ्गैस्तरुणादित्यसन्निभैः ।
आत्मतेजोगुणमयं वेदिकाभोगकल्पितं । विविधांश्च महास्कन्धान् काञ्चनान् पुष्करेक्षणः । १२३८०
नित्यपुष्पफलान् वृक्षान् कृतवांस्तत्र पर्व्वते । प्राचीं दिशमथो गत्वा चकारोदयपर्व्वतं ।
शतयोजनविस्तारं तावद्द्विगुणमुच्छ्रितं । चकार स महादेवः पुनः सौमनसं गिरिं ।
नानारत्नसहस्राणां कृत्वा तत्र तु सञ्चयान् । वेदिकां बहुवर्णाञ्च सन्ध्याभ्राभामकल्पयत् ।
सहस्रशृङ्गञ्च गिरिं नानामणिशताचितं । कृतवान् वृक्षगहनं शतयोजनमुच्छ्रितं ।
आसनं तत्र परमं सर्व्वभूतनमस्कृतं । कृतवानात्मनः स्थानं विश्वकर्म्मा प्रजापतिः । १२३८५
शैशिरञ्च महाशैलं तुषारचयसन्निभं । चकार दुर्गगहनं कन्दरान्तरमण्डितं ।
शिशिरप्रभवाञ्चैव नदीं द्विजगणाकुलां । चकार पुलिनोपेतां वसुधारामिति श्रुतिः ।
सा दिशं निखिलां प्राचीं पुण्यैर्म्मुनिशतैर्युता । शोभयत्यम्लपद्मैर्मुकाशञ्च विभूषितैः ।
नित्यपुष्पफलोपेतैश्छादयद्भिः समन्ततः । भूषिताऽभ्यधिकं कान्तैः सा नदी तीरजैर्द्रुमैः ।
कृत्वा प्राचीविभागन्तु दक्षिणायामथो दिशि । चकार पर्व्वतं रम्यमङ्कं काञ्चनराजतं । १२३९०
एकतः सूर्य्यसंकाशमेकतः शशिसन्निभं । स विभ्रत् शुशुभेऽतीव द्वौ वर्णौ पर्व्वतोत्तमः ।
तेजसा युगपद्व्याप्तं सूर्य्याचन्द्रमसोरिव । वपुष्मन्तमथो तत्र भानुमन्तं महागिरिं ।
सर्व्वकामफलैर्वृक्षैर्वृतं दिव्यैर्म्मनोरमैः । चकार कुञ्जरञ्चैव कुञ्जरप्रतिमाकृतिं ।
सर्व्वतः काञ्चनगुहं बहुयोजनविस्तृतं । ऋषभतिमञ्चैव ऋषभं नाम पर्व्वतं ।
हेमचन्दनवृक्षाढ्यं पुष्पहासं स सृष्टवान् । महेन्द्रमय शैलेन्द्रं शतयोजनमुच्छ्रितं । १२३९५
जातरूपमयैः शृङ्गैः सुपुष्पितमहाद्रुमं । मेदिन्यां कृतवान्देवः प्रतिक्षोभमिवाचलं ।
नानारत्नसमाकीर्णं सूर्य्येन्दुसदृशप्रभं । चकार मलयञ्चाद्रिं चित्रपुष्पितपादपं ।
मैनाकञ्च महाशैलं शिलाजालसमाकुलं । दक्षिणस्यां दिशि शुभं चकाराचलमायतं ।
सहस्रशिखरं विन्ध्यं नानाद्रुमलतावृतं । नदीञ्च विपुलावर्त्तां पुलिनश्रोणिभूषितां ।
चीरसंकाशसलिलां पयोधारामिति श्रुतिः । सुरम्यां तोयकलिलां विचित्रां दक्षिणां दिशं । १२४००
दिव्यतीर्थशतापाङ्गीं स्रावयन्तीं शुभाम्भसा । दिशं याम्यां प्रतिष्ठाप्य प्रतीचीं दिशमागमत् ।

अकरोत्तत्र शैलेन्द्रं शतयोजनमुच्छ्रितं । शोभितं शिखरैश्चित्रैः सुप्रवृद्धैर्हिरण्मयैः ।
काञ्चनीभिः शिलाभिश्च गुहाभिश्च विभूषितं । समाकुलं सूर्य्यनिभैः सालैस्तालैश्च भास्वरैः ।
सुशुभैर्जातरूपैश्च श्रीमद्भिश्चित्रवेदिकैः । षष्टिं गिरिसहस्राणि तत्रासौ संन्यवेशयत् ।
मेरुप्रतिमरूपाणि वपुषा प्रभया च ह । सहस्रजलधारञ्च पर्व्वतं मेरुसन्निभं । १२४०५
पुण्यतीर्थगुणोपेतं भगवान् संन्यवेशयत् । षष्टियोजनविस्तारं तावदेव समुच्छ्रितं ।
आत्मरूपोपमं तत्र वाराहं नाम नामतः । निवेशयामास विभुर्द्दिव्यं वैदूर्य्यपर्व्वतं ।
राजताः काञ्चनाश्चैव यत्र दिव्याः शिलोच्चयाः । तत्रैव चक्रसदृशं चक्रवन्तं महाचलं ।
सहस्रकूटं विपुलं भगवान् संन्यवेशयत् । शङ्खप्रतिमरूपञ्च राजतं पर्व्वतोत्तमं ।
सितद्रुमशताकीर्णं शङ्खं नाम्ना न्यवेशयत् । सुवर्णरत्नसंभूतं पारिजातं महाद्रुमं । १२४१०
महतः पर्व्वतस्याग्रे पुष्पहासं न्यवेशयत् । शुभामतिरसाश्चैव घृतधारेति विश्रुतां ।
वराहः सरितं पुण्यां प्रतीच्यामकरोत् प्रभुः । प्रतीच्यां स विधिं कृत्वा पर्व्वतं काञ्चनोज्ज्वलं ।
गुणोत्तरञ्चोत्तरस्यां संन्यवेशयदच्युतः । ततः सोमगिरिं सौम्यमन्तरीक्षप्रमाणतः ।
रुक्मधातुप्रतिच्छन्नमकरोद्भास्करप्रभं । स च देशो विसूर्य्योऽपि तस्य भासा प्रकाशते ।
तस्य लक्ष्म्याऽधिकं भाति तपता रविणा यथा । सूक्ष्मलक्षणविज्ञेयस्तपतीव दिवाकरः । १२४१५
सहस्रशिखरञ्चैव नानातीर्थसमाकुलं । चकार रत्नसंकीर्णं भूयोऽस्तं नाम पर्व्वतं ।
मनोहरगुणोपेतं मन्दरञ्चाचलोत्तमं । उद्दामपुष्पगन्धञ्च पर्व्वतं गन्धमादनं ।
चकार तस्य शृङ्गेषु सुवर्णरससम्भवां । जम्बूं जाम्बूनदमयीमत्यन्ताद्भुतदर्शनां ।
गिरिं त्रिशिखरञ्चैव तथा पुष्करपर्व्वतं । शुभ्रं पाण्डरमेघाभं कैलासञ्च नगोत्तमं ।
हिमवन्तञ्च शैलेन्द्रं दिव्यधातुविभूषितं । निवेशयामास हरिर्व्वाराहीं तनुमास्थितः । १२४२०
नदीं सर्व्वगुणोपेतामुत्तरस्यां दिशि प्रभुः । मधुधारां स कृतवान् दिव्यां सुखशताकुलां ।
सर्व्वे चैव क्षितिधराः सपक्षाः कामचारिणः । तदा कृता भगवता विधात्रा परमेष्ठिना ।
स कृत्वा प्रविभागन्तु पृथिव्या लोकभावनः । देवासुराणामुत्पत्तौ कृतवान् बुद्धिमच्युतः ।
सर्व्वासु दिक्षु चतुरोपमांश्चकार शैलान् विविधाभिरामान् । हिताय लोकस्य स लोकनाथः पुण्या नदीश्चापि जलोपगूढाः ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वाराहे पञ्चविंशत्यधिकद्विशततोऽध्यायः ॥ २२५ ॥

॥ वैशम्पायन उवाच ॥ जगत्स्रष्टुमना देवश्चिन्तयामास पूर्व्वतः । तस्य चिन्तयतो वक्त्रान्निःसृतः पुरुषः किल । १२४२५
ततः स पुरुषो देवं किं करोमीत्युपस्थितः । प्रत्युवाच स्मितं कृत्वा देवदेवो जगत्पतिः ।
विभजात्मानमित्युक्त्वा गतोऽन्तर्द्धानमीश्वरः । अन्तर्हितस्य देवस्य सशरीरस्य भास्वतः ।
प्रदीपस्येव शान्तस्य गतिस्तस्य न विद्यते । ततस्तेनेरितां वाणीं सोऽन्वचिन्तयत प्रभुः ।
हिरण्यगर्भो भगवान् य एष च्छन्दसा स्तुतः । एकः प्रजापतिः पूर्व्वमभवद्भुवनाधिपः ।
तदाप्रभृति तस्याद्यो यज्ञभागो विधीयते । १२४३०

॥ प्रजापतिरुवाच ॥ विभजात्मानमित्युक्तस्तेनाचिन्त्य सुमहात्मना । कथमात्मा विभक्तव्यः स्यात् संशयो ह्यत्र मे महान् ।
इति चिन्तयतस्तस्य ओमित्येवोत्थितः स्वरः । स भूमावन्तरीक्षे च नाके च कृतवान् स्वनं ।
तस्यैवाभ्यसतस्तस्य मनःसारमयं पुनः । हृदयाद्देवदेवस्य वषट्कारः समुत्थितः ।
भूम्यन्तरीक्षनाकानां भूयः स्वरात्मिकाः पराः । महास्मृतिमयाः पुण्या महाव्याहृतयोऽभवन् ।
छन्दसां प्रवरा देवी चतुर्विंशाक्षराऽभवत् । तत्पदं संस्मरन् दिव्यं सावित्रीमकरोत् प्रभुः । १२४३५
ऋक्सामाथर्व्वयजुषश्चतुरो भगवान् प्रभुः । चकार निखिलान् वेदान् ब्रह्मयुक्तेन कर्म्मणा ।
ततो मनसि तस्यैव सनः सनक एव च । सनातनश्च भगवान् सरद्दश्च सनन्दकः ।
सनत्कुमारश्च विभुस्तत्र जज्ञे सनातनः । मानसा रुद्रपूर्व्वा वै इत्येते सप्तमर्षयः ।
सह्याणं कपिलश्चैव यद्वेतान् ब्रह्मयोगिनः । यतयो योगतन्त्रेषु यान् स्तुवन्ति द्विजातयः ।
ततो मरीचिमत्रिञ्च पुलस्त्यं पुलहं क्रतुं । भृगुमङ्गिरसञ्चैव मनुञ्चैव प्रजापतिं । १२४४०
पितॄंश्च सर्व्वभूतानां सदेवासुररक्षसां । महर्षीनसृजत् प्रभुरष्टावेतांश्च मानसान् ।
एते युगसहस्रान्ते याश्चैवासमभवन् प्रजाः । कल्पे निःशेषमुक्ते वै ततो गच्छन्ति निर्वृतिं ।
ततो वर्षसहस्रान्ते उत्पत्तिस्तु विधीयते । एतेषामेव देवानां प्रजाकारणयोगिनां ।
किन्तु कर्म्मविशेषेण देवतानां युगे युगे । नामसंख्याविशेषास्तु तथा युगविपर्य्ययः ।
अङ्गुष्ठाद्दक्षिणाद्दक्ष उत्पन्नो भगवानृषिः । तस्यैव तु पुनर्भार्य्या वामाङ्गुष्ठादजायत । ॥
तत्र तस्याभवन् कन्या विश्रुता लोकमातरः । याभिर्व्याप्तास्त्रयो लोकाः प्रजाभिर्मनुजाधिप ।
अदितिश्च दितिश्चैव दनुं प्राधां मुनिं तथा । खसामनायुषां कद्रुं विनतां सुरभीं तथा ।
इरां क्रोधवशाश्चैव सुरसाञ्च त्रयोदश । एताश्चैव तु दुहितॄः प्रददौ कश्यपाय तु ।
प्रजाः सञ्चिन्त्य मनसा गतिज्ञानान्तरात्मना । अरुन्धतीं वसुं यामीं लम्बां भानुं मरुत्वतीं ।
संकल्पाञ्च मुहूर्त्तांश्च साध्यां विश्वाञ्च भारत । मनवे ब्रह्मपुत्राय दक्ष एता ददौ दश । १२४५०
ततः सर्व्वानवद्याङ्गीः कन्याः कमललोचनाः । पूर्णचन्द्रानना दिव्या गन्धवत्यो मनोरमाः ।
कीर्त्तिं लक्ष्मीं धृतिं तुष्टिं बुद्धिं मेधां क्रियां तथा । मतिं पुष्टिञ्च लज्जाञ्च दक्षो धर्म्माय वै ददौ ।
आत्रेयश्चैव यो भूतस्तस्य तोयात्मकः प्रभुः । पुत्रो ग्रहाणामधिपः [illegible] ।
तस्मै नक्षत्रयोगिन्यः सप्तविंशतिरुत्तमाः । रोहिणीप्रमुखाः कन्या दक्षः प्राचेतसो ददौ ।
एतासां पुत्रपौत्रांश्च प्रोच्यमानान्मया शृणु । कश्यपस्य समोऽस्यैव धर्म्मस्य शशिनस्तथा । १२४५५
अर्य्यमा वरुणो मित्रः पूषा धाता पुरन्दरः । त्वष्टा भगोऽंशः सविता पर्ज्जन्यश्चेति विश्रुताः ।
अदित्यां जज्ञिरे देवाः कश्यपाल्लोकभावनाः । दित्यां पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतं ।
हिरण्यकशिपुश्चैव हिरण्याक्षश्च वीर्य्यवान् । द्वावप्यमितविक्रान्तौ तपसा कश्यपोपमौ ।
हिरण्यकशिपोः पुत्राः पञ्चैव सुमहाबलाः । प्रह्लादश्चैव संह्लादस्तथाऽनुह्लाद एव च ।
ह्रदश्चैव तु विक्रान्तः पञ्चमोऽनुह्रदस्तथा । प्रह्लादस्य त्रयः पुत्रा विक्रान्ताश्च महाबलाः । १२४६०

विरोचनश्च जम्भश्च कुजम्भश्चेति विश्रुताः । बलिर्विरोचनसुतो बाण एको बलेः सुतः ।
बाणस्य चेन्द्रदमनः पुत्रः परपुरञ्जयः । दनोस्तु पुत्रा बहवो वंशे ख्याता महाबलाः ।
विप्रचित्तिः प्रथमजस्तेषां राजा बभूव ह । गणः प्रजज्ञे क्रोधाख्याः पुत्रपौत्रमनन्तकं ।
रौद्राः क्रोधवशा नाम क्रूरकर्म्माण एव ते । सिंहिका सुषुवे राहुं घरं चन्द्रार्कमर्द्दनं ।
पस्तारश्चैव चन्द्रस्य सूर्य्यस्य च महाप्रभं । काश्यपाः कालकन्यस्तु गणः परमदारुणः । १२४६५
अभवद्दीप्तसूर्य्याभो नीलमेघसमप्रभः । सहस्रशीर्षः शेषस्तु वासुकिस्तक्षकस्तथा ।
बहूनां कद्रुपुत्राणामेते प्राधान्यमागताः । धर्म्मात्मानो वेदविदः सदा प्राणिहिते रताः ।
लोकतन्त्रधराश्चैव वरदाः कामरूपिणः । तार्क्ष्यश्चारिष्टनेमिश्च गरुडश्च महाबलः ।
अरुणश्चारुणिश्चैव विनतायाः सुताः स्मृताः । इरायाश्चाप्सरसः पुत्रा विविधाः पुण्यलक्षणाः ।
सुषुवेऽष्टौ महाभागाः प्राधा देवर्षिपूजिताः । अनवद्यामनूकाञ्च अनूनामरुणप्रियां । १२४७०
अनुगां सुभगाञ्चैव स्त्रियः प्राधा व्यजायत । अलम्बुषा मिश्रकेशी पुण्डरीका तिलोत्तमा ।
सुरूपा लक्ष्मणा क्षेमा तथा रम्भा मनोरमा । असिता च सुबाहुश्च सुवृत्ता सुमुखी तथा ।
सुप्रिया च सुगन्धा च सुरसा च प्रमाथिनी । काम्या शारद्वती चैव मौनेयाऽप्सरसः स्मृताः ।
विश्वावसुर्भरण्यश्च गन्धर्व्वाश्चैव विश्रुताः । मेनका सहजन्या च पर्णिनी पुञ्जिकस्थला ।
घृतस्थला घृताची च विश्वाची चोर्व्वशी तथा । अनुम्लोचेति विख्याता प्रम्लोचेति च ता दश । १२४७५
मनोवती चापि तथा वैदिक्योऽप्सरसः स्मृताः । प्रजापतेस्तु संकल्पात् संभूता भुवनप्रियाः ।
अमृतं ब्राह्मणा गावो रुद्राश्चेति चतुष्टयं । सुरभ्यपत्यमित्येवं पुराणे निश्चयं गतं ।
एतद्वै कश्यपापत्यं मनोज्ञं निबोधत । संक्षेपेणैव तत् सर्व्वं कीर्त्तयिष्यामि तेऽनघ ।
विश्वेदेवास्तु विश्वायाः साध्या साध्यान् व्यजायत । मरुत्वत्या मरुत्वन्तो वसोस्तु वसवस्तथा ।
भानोस्तु भानवस्तात मुहूर्त्तास्तु मुहूर्त्तजाः । लम्बा घोषं विजज्ञेऽथ नागवीथी च जामिजा । १२४८०
पृथिवीविषयं सर्व्वमरुन्धत्या व्यजायत । संकल्पायास्तु कौरव्य जज्ञे संकल्प एव च ।
धर्म्मस्य पुत्रो लक्ष्म्यास्तु जज्ञे कामो जगत्प्रियः । हर्षो यशश्च कामस्य रत्याः पुत्रद्वयं स्मृतं ।
सोमस्य पुत्रो रोहिण्यां जज्ञे वर्च्चा महाप्रभः । उदयन्नेव भगवान् वर्च्चस्वी येन जायते ।
एवं पुत्रसहस्राणि स्त्रीणाञ्चैव परस्परं । एतावन्तु जगन्मूलं यत्र लोकाः प्रतिष्ठिताः ।
प्रजापतिस्तु भगवान् गुणतः प्रेक्ष्य देहिनः । आधिपत्येषु मुख्येषु न्ययोजयत योगवित् । १२४८५
दिशो दश क्षितिमृषयोऽर्णवान् खगान् द्रुमौषधीरुरगसरित्सुरासुरान् । प्रजापतीन् भुवनसृजो नभो भुवः क्रिया मखानथ
कृतवान् गिरींश्च सः ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वाराहे जगत्सर्गे षड्विंशत्यधिकद्विशते ऽध्यायः ॥ २२६ ॥

॥ वैशम्पायन उवाच ॥ त्रयाणामथ लोकानामादित्यानाञ्च भारत । चकार शक्रं राजानमादित्यसमतेजसं ।
स वज्री कवची जिष्णुरदित्यामथ जज्ञिवान् । स्तुतः सहायो भगवान् यथा सोऽध्वर्य्युभिः स्तुतः ।

जातमात्रस्तु भगवानदित्यां स कुशेर्हतः । तदा प्रभृति देवेशः कौशिकत्वमुपागतः ।
अभिषिच्याधिराज्ये तु सहस्राक्षं पुरन्दरं । ब्रह्मा क्रमेण राज्यानि व्यादेष्टुमुपचक्रमे । १२४९०
यज्ञानां तपसाञ्चैव नक्षत्रग्रहयोस्तथा । द्विजानामोषधीनाञ्च सोमं राज्येऽभ्यषेचयत् ।
दक्षं प्रजानान्तु पतिमम्भसां वरुणं पतिं । पितॄणां सर्व्वनिधनं कालं वैश्वानरं प्रभुं ।
गन्धानाञ्चैव सर्व्वेषां भूतानाञ्चाशरीरिणां । शब्दाकाशबलानाञ्च वायुरीशस्तदा कृतः ।
सर्व्वभूतपिशाचानां मातॄणाञ्च तथा गवां । उत्पातग्रहरोगाणां व्याधीनामीतिनां तथा ।
प्रेतानाञ्चैव सर्व्वेषां महादेवः कृतः प्रभुः । यक्षाणां राक्षसानाञ्च गुह्यकानां धनस्य च । १२४९५
रत्नानाञ्चैव सर्व्वेषां कृतो वैश्रवणः प्रभुः । सर्व्वेषां दंष्ट्रिणां शेषो नागानामथ वासुकिः ।
सरीसृपाणां सर्व्वेषां प्रभुत्वे तक्षकः कृतः । सागराणां नदीनाञ्च मेघानां वर्षितस्य च ।
आदित्यानामवरजः पर्ज्जन्योऽधिपतिः कृतः । गन्धर्व्वाणामधिपतिस्तथा चित्ररथः कृतः ।
सर्व्वाप्सरोगणानाञ्च कामदेवः कृतः प्रभुः । चतुष्पदानां सर्व्वेषां वाहनानाञ्च सर्व्वशः ।
महेश्वरध्वजः श्रीमान् गोवृषोऽधिपतिः कृतः । दैत्यानाञ्च महातेजा हिरण्याक्षः कृतः प्रभुः । १२५००
हिरण्यकशिपुश्चैव यौवराज्येऽभिषेचितः । दानवानाञ्च सर्व्वेषामसुराणां महाबलः ।
विप्रचित्तिः प्रथमजस्तेषां राज्येऽभिषेचितः । गणानां कालकेयानां महाकालः कृतः प्रभुः ।
अनायुषायाः पुत्राणां वृत्रो राजा तदा कृतः । सिंहिकातनयो यस्तु राहुर्नाम महाग्रहः ।
उत्पातानामनेकेषामशुभानां पतिः कृतः । ऋतूनामथ मासानां युगानाञ्चैव भारत ।
पक्षाणाञ्च क्षपाणाञ्च तथाऽहस्तिथिपर्व्वणां । कलाकाष्ठामुहूर्त्तानां गतेरयनयोस्तथा । १२५०५
कृतः संवत्सरो राजा योगस्य गणितस्य च । पक्षिणामथ सर्व्वेषां चक्षुषाञ्च महाबलः ।
सुपर्णो भोगिनाञ्चैव गरुडोऽधिपतिः कृतः । अरुणो गरुडभ्राता जवापुष्पसमप्रभः ।
योगानाञ्चैव सर्व्वेषां साध्यानामधिपः कृतः । पुत्रोऽस्य विरजो नाम कश्यपस्य प्रजापतेः ।
राजा प्राच्यां दिशि तथा वासवेनाभिषेचितः । आदित्यस्य विभोः पुत्रो धर्म्मराजो महायशाः ।
दक्षिणस्यां दिशि यमो महेन्द्रेणाभिसत्कृतः । कश्यपस्यौरसः पुत्रः सलिलान्तर्गतः पुरा । १२५१०
अम्बुराज इति ख्यातः प्रतीच्यां दिशि पार्थिवः । पुलस्त्यपुत्रो द्युतिमान् महेन्द्रप्रतिमः प्रभुः ।
एकाक्षः पिङ्गलो नाम सौम्यायां दिशि पार्थिवः । एवं विभज्य राज्यानि स्वयम्भूर्लोकभावनः ।
लोकांश्च त्रिदिवे दिव्यानददत् स पृथक् पृथक् । कस्यचित् सूर्य्यसङ्काशान् कस्यचिदग्निसप्रभान् ।
कस्यचिद्विद्युदुद्योतान् कस्यचिच्चन्द्रनिर्म्मलान् । नानावर्णान् कामगमाननेकशतयोजनान् ।
सतां सुकृतिनां लोकान् पापदुष्कृतिदुर्लभान् । ये च भासा विभान्त्यग्रे सौम्यास्तारागणा इव । १२५१५
एते सुकृतिनां लोका यत्र पुण्यकृतो गताः । ये यजन्ते मखैः पुण्यैः समाप्तवरदक्षिणैः ।
स्वदारनिरता दान्ता ऋजवः सत्यवादिनः । दीनानुग्रहकर्त्तारो ब्रह्मण्या लोभवर्ज्जिताः ।
ते त्यक्तरजसः सन्तो यान्ति तत्र तपोऽन्विताः । एवं नियोज्य तनयान् ब्रह्मा लोकपितामहः ।

पुष्करं ब्रह्मसदनमारुरोह प्रजापतिः । सर्व्वे स्वयम्भूदत्तेषु पालनेषु दिवौकसः ।
रेमिरे स्वेषु लोकेषु महेन्द्रेणाभिपालिताः । १२५००
स्वयम्भुवा शक्रपुरःसराः सुराः कृता यथार्हं प्रतिपालनेषु ते । यथा दिवञ्च प्रतिपेदिरे शुभं मुदञ्च जग्मुर्म्मखभागभोजिनः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वाराहे अधिपतिस्थापने सप्तविंशत्यधिकद्विशततमोऽध्यायः ॥ २२७॥
॥ वैशम्पायन उवाच ॥ कदाचित्तु सपक्षास्ते पर्व्वता धरणीधराः । प्रस्थिता धरणीं त्यक्त्वा नूनं तस्यैव मायया ।
ततोऽसुराणां निलयं हिरण्याक्षेण पालितं । दिशं प्रतीचीमागम्य ह्रदेऽमज्जन् यथा गजाः ।
तत्रासुरेभ्यः शंसन्त आधिपत्यं सुरालये । तच्छ्रुत्वाऽथासुराः सर्व्वे चक्रुरुद्योगमुत्तमं ।
क्रूराश्च बुद्धिमतुलां पृथिवीहरणे रताः । आयुधानि च दिव्यानि जगृहुर्भीमविक्रमाः । १२५०५
चक्राशनी तथा खड्गान् भुसुण्डीश्च धनूंषि च । प्रासान् पाशांश्च शक्तीश्च मुषलानि गदास्तथा ।
केचित् कवचिनः सज्जा मत्तानागान् समास्थिताः । केचिदश्वरथान्नागानपरेऽश्वान्महासुराः ।
केचिदुष्ट्रान् वृषानन्ये महिषान् गर्द्दभानपि । स्वबाहुबलमास्थाय केचिच्चैव पदातयः ।
परिवार्य्य हिरण्याक्षं तस्थुबद्धाः पताकिनः । इतश्चेतश्च निश्चेरुर्हृष्टाः सर्व्वे युयुत्सवः ।
ततो देवगणाः सर्व्वे पुरन्दरपुरोगमाः । दैत्यानां विदितोद्योगाश्चक्रुरुद्योगमुत्तमं । १२५१०
महता चतुरङ्गेण बलेन सुसमाहिताः । बहुगोधाङ्गुलित्राणास्तूणवन्तः सकार्म्मुकाः ।
उग्रायुधधरा देवाः स्वेष्वनीकेष्ववस्थिताः । ऐरावतगतं शक्रमन्वगच्छन्त प्रहृताः ।
ततस्तूर्य्यनिनादैश्च भेरीणाञ्च महास्वनैः । अभ्यद्रवद्धिरण्याक्षो देवराजं पुरन्दरं ।
तीक्ष्णैः परश्वधनिस्त्रिंशैर्गदातोमरशक्तिभिः । मुषलैर्भिन्दिपालैश्च छादयामास वासवं ।
ततोऽस्त्रबलवर्गेन अर्ध्यंशत्यः सुदारुणाः । घोररूपा महावेगा निपेतुर्ब्बाणवृष्टयः । १२५१५
शिष्टाश्च दैत्या बलिनः शितधारैः परश्वधैः । परिघैरायसैः खड्गैः क्षेपणीयैश्च मुद्गरैः ।
गण्डशैलैश्च विपुलैरश्मभिश्चाद्रिसन्निभैः । घातनीभिश्च गुर्व्वीभिः शतघ्नीभिस्तथैव च ।
युगैर्यन्त्रैश्च निर्युक्तैरर्गलैश्च विदारणैः । सर्व्वान्देवगणान्दैत्याः संनिजघ्नुः सवासवान् ।
धूम्रकेशं हरिश्मश्रुं नानाप्रहरणायुतं । रक्तसन्ध्याभ्रसंकाशं किरीटोत्तमधारिणं ।
नीलपीताम्बरधरं सितोद्वृत्तोग्रदंष्ट्रिणं । आजानुबाहुं हर्य्यक्षं वैदूर्य्याभरणोज्ज्वलं । १२५२०
समुद्यतायुधं दृष्ट्वा सर्व्वतस्तं महासुरं । हिरण्याक्षं महावीर्य्यं दैत्यानामभयप्रदं ।
युगान्ताग्निसमं भीमं स्थितं मृत्युमिवायतः । प्रविव्यथुः सुराः सर्व्वे तदा शक्रपुरोगमाः ।
दृष्ट्वायान्तं हिरण्याक्षं महाद्रिमिव जङ्गमं । ततः संविग्नमनसः प्रगृहीतशरासनाः ।
सहस्राक्षं पुरस्कृत्य तस्थुस्ते रणमूर्द्धनि । सा तु दैत्यचमू रेजे हिरण्यकवचोज्ज्वला ।
प्रवृद्धमेघ[illegible]णा [illegible]रदी द्यौरिवामला । तेऽन्योन्यमभिसंपेतुः पातयन्तः परस्परं । १२५२५
बभञ्जुर्बाहुभिर्बाहून् द्वन्द्वमन्ये युयुत्सवः । गदानिपातैर्भग्नाङ्गा बाणैश्च मथितोरसः ।
विनिपेतुः पृथक्केचित्तथाऽन्ये विमुघूर्णिरे । बभञ्जिरे रथान् केचित् केचित् संमृदिता रथैः ।

सम्बाधमन्ये संप्राप्ता न शेकुश्चलितुं रथाः । दानवौघमहामेघं देवायुधतडिद्युति ।
अन्योन्यबाणवर्षेण युद्धदुर्द्दिनमाबभौ । हिरण्याक्षश्च बलवान् क्रुद्धः स दितिनन्दनः ।
अवर्द्धत महातेजाः समुद्र इव पर्व्वणि । तस्य क्रुद्धस्य सहसा मुखान्निश्चेरुरर्चिषः । १२५५०
साग्निधूमस्य पवनो ववौ तस्य समीपतः । सोऽस्त्रजालैर्बहुविधैर्द्धनुर्भिः परिघैरपि ।
सर्व्वमाकाशमावव्रे पर्व्वतैरुच्छ्रितैरिव । बहुभिः शितनिस्त्रिंशैश्छिन्नभिन्नशिरोरसः ।
न शेकुश्चलितुं देवा हिरण्याक्षार्द्दिता युधि । तेन विद्राविता देवा हिरण्याक्षेण संयुगे ।
न शेकुर्यत्नवन्तोऽपि यत्नं कर्त्तुमचेतसः । सर्व्वे विवासिता देवा हिरण्याक्षेण संयुगे ।
तेन शक्रः सहस्राक्षस्तम्भितोऽस्त्रेण धीमता । ऐरावतगतः सद्यो नाशकच्चलितुं भयात् । १२५५५
सर्व्वांश्च निखिलान्देवान् पराजित्य स दानवः । स्तम्भयित्वा च देवेशमात्मस्थं मन्यते जगत् ।
स तोयमेघप्रतिमोग्रनिस्वनं प्रभिन्नमातङ्गविलासविक्रमं । धनुर्विधुन्वन्तमुदारवर्चसं तदाऽसुरेन्द्रं ददृशुः सुराः स्थितं ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि शक्रस्तम्भने अष्टाविंशत्यधिकद्विशततोऽध्यायः ॥ २२८ ॥
॥ वैशम्पायन उवाच ॥ निष्प्रयत्ने सुरपतौ निर्ज्जितेषु सुरेषु च । हिरण्याक्षवधे बुद्धिं चक्रे चक्रगदाधरः ।
वाराहः पर्व्वतो नाम्ना पूर्व्वं यः समुदाहृतः । स एव भूत्वा भगवानाजगामासुरान्तकृत् ।
ततश्चन्द्रप्रतीकाशमष्टचक्रमनुत्तमं । सहस्रारस्य तच्चक्रं चक्रपर्व्वतसन्निभं । १२५६०
महादेवो महाबुद्धिर्महायोगी महेश्वरः । पठ्यते योऽमरैः सर्व्वैर्गुह्यैर्नामभिरव्ययः ।
सदा सर्व्वात्मनि श्रेष्ठः सद्भिर्यः सेव्यते सदा । दृश्यते च पुराणेषु यो लोके लोकभावनः ।
यो वैकुण्ठः सुरेन्द्राणामनन्तो भोगिनामपि । विष्णुर्यो योगविदुषां यो यज्ञो यज्ञकर्म्मणां ।
मखे यस्य प्रसादेन भुवनस्था दिवौकसः । आज्यं महर्षिभिर्द्दत्तमश्नुवन्ति त्रिधाहुतं ।
यो नैधनोऽग्निर्द्दैत्यानां यः सुराणां परा गतिः । यः पवित्रं पवित्राणां स्वयम्भोरपि यो विभुः । १२५६५
यस्य चक्रं प्रविष्टानि दानवानां युगे युगे । कुलान्याकुलतां यान्ति यानि दृप्तानि वीर्य्यतः ।
ततो दैत्यद्रवकरं पौराणं शङ्खमुत्तमं । दध्मौ प्राणेन बलवानाक्षिपन्दैत्यजीवितं ।
श्रुत्वा शङ्खस्वनं घोरमसुराणां भयावहं । क्षुभिता दानवाः सर्व्वे दिशो दश व्यलोकयन् ।
ततः संरक्तनयनो हिरण्याक्षो महासुरः । कोऽयं स्थिति ब्रुवन्रोषान्नारायणमुदैक्षत ।
वराहरूपिणं देवं स्थितं पुरुषविग्रहं । शङ्खचक्रोद्यतकरं देवानामार्त्तिनाशनं । १२५७०
रराज शङ्खचक्राभ्यां ताभ्यामसुरसूदनः । सूर्य्याचन्द्रमसोर्मध्ये यथा नीलपयोधरः ।
ततोऽसुरगणाः सर्व्वे हिरण्याक्षपुरोगमाः । उद्यतायुधनिस्त्रिंशा दृष्ट्वा देवमुपाद्रवन् ।
पीड्यमानोऽतिबलिभिर्द्दैत्यैः सर्व्वायुधोद्यतैः । न चचाल हरिर्युद्धे कम्पमान इवाचलः ।
ततः प्रज्वलितां शक्तिं वराहोरसि दानवः । हिरण्याक्षो महातेजाः पातयामास वीर्य्यवान् ।
तस्याः शक्त्याः प्रहारेण शक्त्या विस्मयमागतः । समीपमागतां दृष्ट्वा महाशक्तिं महाबलः । १२५७५
हुङ्कारेणैव निर्भर्त्स्य पातयामास भूतले । तस्यां प्रतिहतायान्तु शक्त्यां साध्विति चाब्रवीत् ।

यः प्रभुः सर्व्वदेवानां वराहस्तेन ताडितः । ततो भगवता चक्रमाविध्यादित्यसन्निभं ।
पातितं दानवेन्द्रस्य शिरस्युत्तमकर्म्मणा । ततः छिन्नश्चैव शिरस्तस्य भूमौ पपात ह ।
दैत्येन्द्रस्याशनिहतं मेरोः शृङ्गमिवोत्तमं । हिरण्याक्षे हते दैत्ये ये शेषास्तत्र दानवाः ।
सर्व्वे तस्य भयत्रस्ता जग्मुराशु दिशो दश । १२५८०
स सर्व्वलोकाप्रतिचक्रचक्रो महाहवेष्वप्रतिमोग्रचक्रः । बभौ वराहो युधि चक्रपाणिः कालो युगान्तेष्विव दण्डपाणिः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वाराहे ऊनत्रिंशदधिकद्विशततोऽध्यायः ॥ २२९ ॥
॥ वैशम्पायन उवाच ॥ विद्राव्य तु रणे सर्व्वानसुरान् पुरुषोत्तमः । मुमोच तत्र बद्धांस्तान् पुरन्दरमुखान् सुरान् ।
ततः प्रकृतिमापन्नाः सर्व्वे देवगणास्तदा । पुरन्दरं पुरस्कृत्य नारायणमुपस्थिताः ।
॥ देवा ऊचुः ॥ तव प्रसादाद्भगवंस्तत्र बाहुबलेन च । जीवामोऽद्य महाबाहो विमुक्तास्त्वान्तकाननात् ।
त्वत्प्रसादाद्धि भगवन् किं कुर्व्वन्त्वदितेः सुताः । इच्छामः पादशुश्रूषां तव कर्त्तुं सनातन । १२५८५
॥ वैशम्पायन उवाच ॥ तच्छ्रुत्वा वचनं तेषां पुण्डरीकनिभेक्षणः । उवाच वचनं देवान्मुदा युक्तो हतद्विषः ।
॥ भगवानुवाच ॥ यो यस्य भवतां लोको मयैव विहितः पुरा । पाल्यतां स तु यत्नेन नियोगस्य कथंचित् क्वचित् ।
ऐश्वर्य्यं प्रतिपन्नाः स्थ क्रतुभागपुरस्कृतं । मयैव पूर्व्वं निर्द्दिष्टो नियोगः प्रतिपाल्यतां ।
शक्रश्चोवाच भगवान् वचनं दुन्दुभिस्वनः । इदं यथावत्कर्त्तव्यं सत्यं चासत्यं च त्वया ।
गच्छन्तु तपसा स्वर्गं मुनयः संशितव्रताः । यज्ञैरिष्ट्वा याजूकाः फलन्ते प्राप्नुवन्तु च । १२५९०
भावः सद्धर्म्मशीलानामभावः पापकर्म्मणां । सन्तः स्वर्गजितः सन्तु सर्व्वाश्रमनिवासिनः ।
सत्यशूरा दानशूरा रणशूराश्च ये नराः । ते स्वर्गफलमश्नन्तु सदा ये चानसूयवः ।
अश्रद्दधानाः पुरुषाः कामिनोऽर्थपराः शठाः । अब्रह्मण्या नास्तिकाश्च नरकं यान्तु मानवाः ।
एतावत् क्रियतां वाक्यं मयोक्तं त्रिदशेश्वराः । ततो मयि स्थिते सर्व्वे वो बाधिष्यन्ति नारयः ।
इत्युक्त्वाऽन्तर्हितो देवः शङ्खचक्रगदाधरः । देवतानाञ्च सर्व्वेषामभवद्विस्मयो महान् । १२५९५
एतदत्यद्भुतं दृष्ट्वा वराहचरितं सुराः । नमस्कृत्य वराहाय नाकपृष्ठमितो गताः ।
ततः स्वान्याधिपत्यानि प्रतिपन्नानि दैवतैः । सर्व्वलोकाधिपत्ये च प्रतिष्ठां वासवो गतः ।
विमुक्ता दानवगणैः प्रकृतिं धरणी गता । स्वैर्य्यहेतोर्द्धरण्यास्तु ज्ञात्वा चागत्य नागिरीन् ।
स्वेषु स्थानेषु संस्थाप्य पर्व्वतानां पुरन्दरः । चिच्छेद भगवान् पक्षान् वज्रेण शतपर्व्वणा ।
सर्व्वेषामेव पक्षास्तु छिन्नाः शक्रेण धीमता । एकः सपक्षो मैनाकः सुरेन्द्रस्तमयः कृतः । १२६००
एष नारायणस्याद्यः प्रादुर्भावो महात्मनः । वाराह इति विप्रेन्द्रैः पुराणे परिकीर्त्तितः ।
कृष्णद्वैपायनमतं नानाश्रुतिसमाहितं । नाशुचये न पापाय न नृशंसाय कीर्त्तयेत् ।
न क्षुद्राय न मोषाय न गुरुद्वेषकारिणे । नाशिष्याय तथा राजन् कृतघ्नाय चैव हि ।
आयुष्कामैर्यशस्कामैर्धर्म्मकामैश्च मानवैः । अर्थैर्विभिश्च श्रोतव्यो देवानामेष वै जयः ।
पुराणो वेदसम्बद्धः शिवः स्वस्त्ययनो महान् । पावनः सर्व्वभूतानां सात्त्विको विजयप्रदः । १२६०५

एष कौरव्य तत्त्वेन कथितस्तेऽनुपूर्व्वशः। वराहस्य नरश्रेष्ठ प्रादुर्भावो महात्मनः।
ये यजन्ति मखैः पुण्यैर्देवतानि पितॄनपि। आत्मानमात्मना नित्यं विष्णुमेव यजन्ति ते।
लोकायनाय त्रिदशायनाय ब्रह्मायणायात्मभवायनाय। नारायणायात्महितायनाय महावराहाय नमस्कुरुध्व।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वाराहे प्रादुर्भावे त्रिंशदधिकद्विशततोऽध्यायः॥ २३०॥

॥ वैशम्पायन उवाच ॥ वाराह एष कथितो नारसिंहमतः शृणु। यत्र भूत्वा मृगेन्द्रेण हिरण्यकशिपुर्हतः।
पुरा कृतयुगे राजन् हिरण्यकशिपुः प्रभुः। दैत्यानामादिपुरुषश्चकार सुमहत्तपः।
दशवर्षसहस्राणि शतानि दश पञ्च च। जलवासी समभवत् स्थानमौनदृढव्रतः।
ततः शमदमाभ्याञ्च ब्रह्मचर्य्येण चैव हि। ब्रह्मा प्रीतोऽभवत्तस्य तपसा नियमेन च।
ततः स्वयम्भूर्भगवान् स्वयमागत्य तत्र ह। विमानेनार्कवर्णेन हंसयुक्तेन भास्वता।
आदित्यैर्व्वसुभिः साध्यैर्म्मरुद्भिर्द्दैवतैस्तथा। रुद्रैर्विश्वसहायैश्च यक्षराक्षसकिन्नरैः।
दिग्भिश्चापि विदिग्भिश्च नदीभिः सागरैस्तथा। नक्षत्रैश्च मुहूर्त्तैश्च खचरैश्च महाग्रहैः।
देवैर्ब्रह्मर्षिभिः सार्द्धं सिद्धैः सप्तर्षिभिस्तथा। राजर्षिभिः पुण्यकृद्भिर्गन्धर्व्वैरप्सरोगणैः।
चराचरगुरुः श्रीमान् वृतः सर्व्वैः सुरैस्तथा। ब्रह्मा ब्रह्मविदां श्रेष्ठो दैत्यं वचनमब्रवीत्।
॥ ब्रह्मोवाच ॥ प्रीतोऽस्मि तव भक्तस्य तपसाऽनेन सुव्रत। वरं वरय भद्रं ते यथेष्टं काममाप्नुहि।
ततो हिरण्यकशिपुः प्रीतात्मा दानवोत्तमः। कृताञ्जलिपुटः श्रीमान् वचनञ्चेदमब्रवीत्।
॥ हिरण्यकशिपुरुवाच ॥ न देवासुरगन्धर्व्वा न यक्षोरगराक्षसाः। न मानुषाः पिशाचा वा निहन्युर्म्मां कथञ्चन।
ऋषयो नैव मां क्रुद्धाः सर्व्वलोकपितामह। शपेयुस्तपसा युक्ता वर एष वृतो मया।
न शस्त्रेण न चास्त्रेण गिरिणा पादपेन वा। न शुष्केण न चार्द्रेण स्यान्न चान्येन मे बधः।
न स्वर्गेऽप्यथ पाताले नाकाशे नावनिस्थले। न चाभ्यन्तररात्र्यह्नोर्न चाप्यन्येन मे बधः।
पाणिप्रहारेणैकेन सभृत्यबलवाहनं। यो मां नाशयितुं शक्तः स मे मृत्युर्भविष्यति।
भवेयमहमेवार्कः सोमो वायुर्हुताशनः। सलिलञ्चान्तरीक्षञ्च नक्षत्राणि दिशो दश।
अहं कामश्च क्रोधश्च वरुणो वासवो यमः। धनदश्च धनाध्यक्षो यक्षः किम्पुरुषाधिपः।
मूर्त्तिमन्ति च दिव्यानि तथाऽस्त्राणि महाहवे। उपतिष्ठन्तु मां देव सर्व्वलोकपितामह।
॥ ब्रह्मोवाच ॥ एते दिव्या वरास्तात मया दत्तास्तवाद्भुताः। सर्व्वान् कामान् मत्प्रभावात् प्राप्स्यसि त्वं न संशयः।
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा स भगवान् जगामाकाशमेव तु। वैराजं ब्रह्मसदनं ब्रह्मर्षिगणसेवितं।
ततो देवाश्च नागाश्च गन्धर्व्वा ऋषिभिः सह। वरप्रदानं श्रुत्वैवं पितामहमुपस्थिताः।
॥ देवा ऊचुः ॥ वरेणानेन भगवन् बाधिष्यति स नोऽसुरः। तत्प्रसीदस्व भगवन् बधोऽप्यस्य विचिन्त्यतां।
॥ वैशम्पायन उवाच ॥ ततो लोकहितं वाक्यं श्रुत्वा देवः प्रजापतिः। भगवान् सर्व्वलोकानामादिकर्त्ता स्वयं प्रभुः।
स्रष्टा च हव्यकव्यानामव्यक्तः प्रकृतिर्ध्रुवः। आश्वासयामास सुरान् सुशीतैर्व्वचनाम्बुभिः।
अवश्यं त्रिदशास्तेन प्राप्तव्यं तपसः फलं। तपसोऽन्तेऽस्य भगवान् बधं विष्णुः करिष्यति।

एतच्छ्रुत्वा सुराः सर्व्वे वाक्यं पङ्कजजन्मनः । स्वानि स्थानानि दिव्यानि प्रतिजग्मुर्मुदा युताः । १२६३५
लब्धमात्रे वरे तस्मिन् सर्व्वाः सोऽबाधत प्रजाः । हिरण्यकशिपुर्दैत्यो वरदानेन दर्पितः ।
आश्रमेषु मुनीन् सर्व्वान् ब्राह्मणान् संशितव्रतान् । सत्यधर्म्मरतान् दान्तान् धर्षयामास वीर्य्यवान् ।
देवांस्त्रिभुवनस्थांश्च पराजित्य महासुरः । त्रैलोक्यं वशमानीय स्वर्गे वसति दैत्यराट् ।
यदा वरमदोन्मत्तश्चोदितः कालधर्म्मणा । यज्ञियानकरोद्दैत्यान् देवतांश्चाप्ययज्ञियाः ।
तदादित्याश्च साध्याश्च विश्वे च वसवस्तथा । रुद्रा देवगणा यक्षा देवद्विजमहर्षयः । १२६४०
शरण्यं शरणं विष्णुमुपतस्थुर्महाबलं । देवं देवमयं यज्ञं ब्रह्मदेवं सनातनं ।
भूतं भव्यं भविष्यञ्च प्रजालोकनमस्कृतं ।
|| देवा ऊचुः || नारायण महाभाग देवास्त्वां शरणं गताः । त्रायस्व जहि दैत्येन्द्रं हिरण्यकशिपुं प्रभो ।
त्वं हि नः परमो धाता त्वं हि नः परमो गुरुः । त्वं हि नः परमो देवो ब्रह्मादीनां सुरोत्तम ।
त्वं पद्मामलपत्राक्ष शत्रुपक्षक्षयावह । क्षयाय दितिवंशस्य शरणं भव नः प्रभो । १२६४५
|| विष्णुरुवाच || भयं त्यजध्वममरा अभयं वो ददाम्यहं । तथैव त्रिदिवं यूयमचिरात् प्रतिपत्स्यथ ।
एषोऽहं सगणं दैत्यं वरदानेन दर्पितं । अवध्यममरेन्द्राणां दानवेन्द्रं निहन्मि वै ।
|| वैशम्पायन उवाच || एवमुक्त्वा तु भगवान् विसृज्य त्रिदिवौकसः । वधं संकल्पयामास हिरण्यकशिपोः प्रभुः ।
सोऽचिरेणैव कालेन हिमवत्पार्श्वमागतः । किं नु रूपं समास्थाय निहन्म्येनं महासुरं ।
यत्सिद्धिकरमाशु स्याद्वधस्य विबुधद्विषः । अनुत्पन्नस्ततस्तस्य सोत्पन्नो रूपमीदृशं । १२६५०
नारसिंहमनाधृष्यं दैत्यदानवरक्षसां । सहायस्तु महाबाहुरोङ्कारमेव च ।
अथोङ्कारसहायो वै भगवान् विष्णुरच्युतः । हिरण्यकशिपोः स्थानं जगाम प्रभुरीश्वरः ।
तेजसा भास्कराकारः कान्त्या चन्द्र इवापरः । नरस्य कृत्वाऽर्द्धतनुं सिंहस्यार्द्धतनुं तथा ।
नारसिंहेन वपुषा पाणिं संस्पृश्य पाणिना । ततोऽपश्यत विस्तीर्णां दिव्यां रम्यां मनोरमां ।
सर्व्वकामयुतां शुभ्रां हिरण्यकशिपोः सभां । विस्तीर्णां योजनशतं पञ्चयोजनमुच्छ्रितां । १२६५५
वैहायसीं कामगमां शतमध्यर्द्धमायतां । जराशोकक्लमत्यक्तां निष्प्रकम्पां शिवां शुभां ।
शुभ्रासनवतीं रम्यां ज्वलन्तीमिव तेजसा । अन्तः सलिलसंयुक्तां विहितां विश्वकर्म्मणा ।
दिव्यरत्नमयैर्वृक्षैः फलपुष्पप्रदैर्युतां । नीलपीतासितश्यामैः श्वेतैर्लोहितकैरपि ।
अवतानैस्तथा गुल्मैर्मञ्जरीशतधारिभिः । सिताभ्रघनसंकाशा प्लवन्तीवाप्सु दृश्यते ।
धन्यासनवती दृश्या द्योतमाना च सा शुभा । प्रभावती भास्वरा च दिव्यगन्धा मनोरमा । १२६६०
सुसुखा न च दुःखा सा न शीता न च घर्म्मदा । न क्षुत्पिपासे ग्लानिं वा प्राप्य तां प्राप्नुवन्ति हि ।
नानारूपैर्विरचिता विचित्रैरतिभास्वरैः । स्तम्भैर्मणिमयैर्दिव्यैः शाश्वती चाव्यया च सा ।
अतिचन्द्रञ्च सूर्य्यञ्च पावकञ्च स्वयम्प्रभा । दीप्यते नाकपृष्ठस्था भर्त्सयन्तीव भास्करं ।
सर्व्वे च कामाः प्रचुरा ये दिव्या ये च मानुषाः । रसवन्तः प्रभूताश्च भक्ष्यभोज्यं तथाऽक्षयं ।

पुण्यगन्धाः स्रजस्तत्र नित्यपुष्पफला द्रुमाः । उष्णे शीतानि तोयानि शीते चोष्णानि सन्ति वै । ११९६५
पुष्पिताग्रान्महाशाखान् प्रवालाङ्कुरधारिणः । लतावितानसंछन्नान् सरःसु च नदीषु च ।
द्रुमान् बहुविधांस्तत्र मृगेन्द्रो ददृशे प्रभुः । गन्धवन्ति च पुष्पाणि रसवन्ति फलानि च ।
तानि शीतानि तोयानि तत्र तत्र सरांसि च । अपश्यत् सर्व्वतीर्थानि सभायां तस्य स प्रभुः ।
नलिनैः पुण्डरीकैश्च शतपत्रैः सुगन्धिभिः । रक्तैः कुवलयैर्नीलैः कुमुदैः सन्ततानि च ।
सकान्तैर्धार्त्तराष्ट्रैश्च राजहंसैः सरःप्रियैः । कारण्डवैश्चक्रवाकैः सारसैः कुररैरपि । ११९७०
विमलस्फाटिकाभानि पाण्डरच्छदनानि च । कलहंसोपगीतानि सारसाभिरुतानि च ।
गन्धयुक्ताः शुभास्तत्र पुष्पमञ्जरिधारिणीः । दृष्टवान् पादपाग्रेषु नानापुष्पधरा लताः ।
केतकाशोकसरलाः पुन्नागतिलकार्ज्जुनाः । चूतनीपकदम्बाश्च नागपुष्पाः प्रियङ्गवः ।
शाल्मल्यः पाटलीवृक्षा वकुलाः सहरिद्रवः । सालास्तालाः पियालाश्च चम्पकाश्च मनोहराः ।
तथैवान्ये व्यराजन्त सभायां पुष्पिता द्रुमाः । वैद्रुमाश्च द्रुमा दिव्या ज्वलिताग्निसमप्रभाः । ११९७५
स्कन्धवन्तः सुशाखाश्च बहुतालसमुच्छ्रयाः । अश्मन्तकाशोकपर्णाश्च भान्ति वञ्जुलकद्रुमाः ।
वरणा वत्सनाभाश्च पनसाश्चन्दनैः सह । नीलाः सुमनसश्चैव पीताश्चाश्वत्थतिन्दुकाः ।
प्राचीनामलका लोध्रा मल्लिका भद्रदारवः । आम्रातकास्तथा जम्बू लकुचाः शैलवालुकाः ।
सर्ज्जरसाः कुन्दुरवः पुन्नागाः कुटजास्तथा । रक्ताः कुरबकाश्चैव नीपाश्चागुरुभिः सह ।
कदम्बाश्चैव भव्याश्च दाडिमा वीजपूरकाः । कालीयका दुकूलाश्च हिङ्गवस्तैलपर्णिकाः । ११९८०
खर्ज्जूरा नारिकेलाश्च चर्म्मवृक्षा हरीतकी । मधूकाः सप्तपर्णाश्च बिल्वाः पारावतास्तथा ।
पनसाश्च तमालाश्च नानागुल्मलतावृताः । लताश्च विविधाकाराः पत्रपुष्पफलोपगाः ।
एते चान्ये च बहवस्तत्र काननजा द्रुमाः । नानापुष्पफलोपेता व्यराजन्त समन्ततः ।
चकोराः शतपत्राश्च मत्तकोकिलसारिकाः । पुष्पितान् फलितांस्तांस्तान् संपतन्ति महाद्रुमान् ।
रक्तपीतारुणास्तत्र पादपाग्रगता द्विजाः । परस्परमवैक्षन्त प्रहृष्टा जीवजीवकाः । ११९८५

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि नारसिंहे हिरण्यकशिपुसभावर्णने एकत्रिंशदधिकद्विशतोऽध्यायः॥२३१॥

॥ वैशम्पायन उवाच ॥ तस्यां सभायां दैत्येन्द्रो हिरण्यकशिपुः प्रभुः । आसीन आसने रम्ये नल्वमात्रे प्रमाणतः ।
दिवाकरनिभे दीप्ते दिव्यास्तरणसंवृते । रराज सुचिरं राजन् ज्वलत्काञ्चनकुण्डलः ।
तस्य दैत्यपतेर्मन्दं विरजस्कः समन्ततः । दिव्यगन्धवहस्तत्र मारुतः सुसुखो ववौ ।
तत्र देवाः सगन्धर्व्वा गन्धर्व्वाप्सरसां वृताः । दिव्यतालेन दिव्यानि अनुगीतानि गायनाः ।
विश्वाची सहजन्या च प्रम्लोचेति च विश्रुता । दिव्या च सौरभेयी च समीची पुञ्जिकस्थला । ११९९०
मिश्रकेशी च रम्भा च चित्रसेना शुचिस्मिता । चारुनेत्रा घृताची च मेनका चोर्व्वशी तथा ।
एताः सहस्रशश्चान्या नृत्यगीतविशारदाः । उपातिष्ठन्त राजानं हिरण्यकशिपुं तदा ।
हिरण्यकशिपुस्तत्र विचित्राभरणाम्बरः । स्त्रीसहस्रैर्वृतः शूरस्तस्थौ ज्वलितकुण्डलः ।

तथासीनं महाबाहुं हिरण्यकशिपुं प्रभुं। उपासन्ति दितेः पुत्राः सर्व्वे लब्धवराः पुरा ।
बलिर्व्वैरोचनिस्तत्र नरकः पृथिवीसुतः । प्रह्लादो विप्रचित्तिश्च गविष्ठश्च महासुरः। १२९९५
चन्द्रहन्ता क्रोधहन्ता सुनामा सुमनिस्तथा । घटोदरो महापार्श्वः क्रथनः पिठरस्तथा ।
विश्वरूपः सुरूपश्च विरूपश्च महाबलः। दशग्रीवश्च वाली च मेघवासा महाबलः ।
घटाभो विकटाभश्च संह्रादश्चेन्द्रतापनः । दैत्यदानवसंघाश्च सर्व्वे ज्वलितकुण्डलाः ।
स्रग्विणो वाग्मिनः सर्व्वे सर्व्वे सुचरितव्रताः । सर्व्वे लब्धवराः शूराः सर्व्वे विगतमृत्यवः।
एते चान्ये च बहवो हिरण्यकशिपुं प्रभुं । उपासन्त महात्मानं सर्व्वे दिव्यपरिच्छदाः। १३०००
विमानैर्विविधाकारैर्भ्राजमानैरिवाग्निभिः । स्रग्विणो भूषिताः सर्व्वे गमनागमने रताः ।
विचित्राभरणोपेता विचित्रवसनास्तथा । विचित्रसक्कवचा विचित्रध्वजवाहनाः ।
महेन्द्रचापसदृशैर्विचित्रैरङ्गदैर्व्वरैः । भूषिताङ्गा दितेः पुत्रास्तमुपासन्त नित्यशः।
तस्यां सभायां दिव्यायामसुराः पर्व्वतोपमाः । हिरण्मयमुकुटाः सर्व्वे दिवाकरकरप्रभाः ।
कनकमणिविचित्रवेदिकायामुपहितनिर्म्मलवज्रवीथिकायां । स तु मृगपतिरीक्षितः सभायां सुरुचिररत्नगवाक्ष
संवृतायां । १३००५
कनकविमलहारभूषिताङ्गं दितितनयं मृगाधिपो ददर्श। दिवसकरकरप्रभं ज्वलन्तं दितिजसहस्रगणैर्निषेव्यमाणं।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि नारसिंहे द्वाविंशदधिकद्विशततोऽध्यायः ॥ २२२ ॥
॥ वैशम्पायन उवाच ॥ ततो दृष्ट्वा महाबाहुं कालचक्रमिवागतं । नारसिंहवपुश्छन्नं भस्मच्छन्नमिवानलं ।
विकुञ्चितसटन्तस्य नरसिंहस्य भारत । रूपौदार्य्यं सभा तत्र समस्ता शशिसन्निभं ।
अहो रूपमिदं चित्रं शङ्खकुन्देन्दुसन्निभं । अब्रुवन्दानवाः सर्व्वे हिरण्यकशिपुश्च सः ।
एवं हि ब्रुवतां तेषां सिंहस्थानां महात्मनां । नरसिंहेन चतुर्थी चोदिता कालधर्म्मणा । १३०१०
हिरण्यकशिपोः पुत्रः प्रह्लादो नाम वीर्य्यवान्। दिव्येन चक्षुषा सिंहमपश्यद्देवमागतं ।
तं दृष्ट्वा रुक्मशैलाभमपूर्व्वां तनुमास्थितं । विस्मिता दानवाः सर्व्वे हिरण्यकशिपुश्च सः ।
॥ प्रह्लाद उवाच ॥ महाराज महाबाहो दैत्यानामादिसम्भव । न श्रुतं नैव नो दृष्टं नारसिंहमिदं वपुः ।
अव्यक्तप्रभवं दिव्यं किमिदं रूपमद्भुतं। दैत्यान्तकरणं घोरं शंसतीव मनांसि नः ।
अस्य देवाः शरीरस्थाः सागराः सरितस्तथा । हिमवान् पारियात्रश्च ये चान्ये कुलपर्व्वताः । १३०१५
चन्द्रमाः सह नक्षत्रैरादित्यैश्चाग्निना सह । धनदो वरुणश्चैव यमः शक्रः शचीपतिः ।
मरुतो देवगन्धर्व्वा ऋषयश्च तपोधनाः। नागा यक्षाः पिशाचाश्च राक्षसा भीमविक्रमाः ।
ब्रह्मा देवः पशुपतिर्ल्ललाटस्था विभाति वै। स्थावराणि च भूतानि जङ्गमानि तथैव च ।
भवांश्च सहितोऽस्माभिः सर्व्वैर्दैत्यगणैर्वृतः । विमानशतसंकीर्णा तथैवाभ्यन्तरा सभा।
सर्व्वं त्रिभुवनं राजन् लोकधर्म्माश्च शाश्वताः। दृश्यते नरसिंहेऽस्मिन् यथेन्दौ विमले जगत्। १३०२०
प्रजापतिश्चात्र मनुर्महात्मा ग्रहाश्च योगाश्च मही नभश्च । उत्पातकालश्च धृतिः स्मृतिश्च रजश्च सत्त्वञ्च तपो दमश्च ।

सनत्कुमारश्च महानुभावो विश्वे च देवा वसवश्च सर्व्वे । क्रोधश्च कामश्च तथैव हर्षो दर्पश्च मोहः पितरश्च सर्व्वे ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि नारसिंहे प्रह्लादवाक्ये त्रयस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३३ ॥

॥ वैशम्पायन उवाच ॥ प्रह्लादस्य वचः श्रुत्वा हिरण्यकशिपुस्ततः । उवाच दानवान् सर्व्वान् सगणान्दनुजाधिपः ।

मृगेन्द्रो गृह्यतां शीघ्रमपूर्व्वां तनुमास्थितः । यदि वा संशयः कश्चिद्वध्यतां वनगोचरः ।

तच्छ्रुत्वा दानवाः सर्व्वे मृगेन्द्रं भीमविक्रमं । परिक्षिपन्तो मुदितास्त्रासयामासुरोजसा ।

सिंहनादं विमुच्याथ नरसिंहो महाबलः । बभञ्ज तां सभां दिव्यां व्यादितास्य इवान्तकः ।

सभायां भज्यमानायां हिरण्यकशिपुः स्वयं । चिक्षेपास्त्राणि घोराणि सिंहायाद्भुतविक्रमः ।

सर्व्वास्त्राणामथ श्रेष्ठं दण्डमस्त्रं सुभैरवं । कालचक्रं तथाऽत्युग्रं विष्णुचक्रं तथाऽपरं ।

धर्म्मचक्रं महाचक्रमजितं नाम नामतः । चक्रमैन्द्रं तथा घोरमृषिचक्रं तथैव च ।

पैतामहं महच्चक्रं तथा त्रैलोक्यसंहतं । विचित्रामशनिञ्चैव शुष्कार्द्रं चाशनिद्वयं ।

रौद्रं तदुग्रं शूलञ्च कङ्कालं मुषलं तथा । अस्त्रं ब्रह्मशिरश्चैव ब्राह्ममस्त्रं तथैव च ।

ऐषीकमस्त्रमैन्द्रञ्च आग्नेयं शैशिरन्तथा । वायव्यं मथनं नाम कापालमथ किङ्करं ।

तथाऽप्रतिहतां शक्तिं क्रौञ्चमस्त्रं तथैव च । अस्त्रं हयशिरो नाम सोमास्त्रं शिशिरप्रभं ।

पैशाचमस्त्रमजितं सर्पमस्त्रं तथाऽद्भुतं । मोहनं शोषणञ्चैव सन्तापनविलापनं ।

जृम्भणं पातनञ्चैव त्वाष्ट्रञ्चापि सुदारुणं । कालमुद्गरमक्षोभ्यं क्षोभणञ्च महाप्रभं ।

संवर्त्तं मोहनञ्चैव तथा मायाधरं परं । गान्धर्व्वमस्त्रं दयितमसिरत्नञ्च नन्दकं ।

प्रस्वापनं प्रमथनं वारुणञ्चास्त्रमुत्तमं । अस्त्रं पाशुपतञ्चैव यस्याप्रतिहता गतिः ।

एतान्यस्त्राणि सर्व्वाणि हिरण्यकशिपुस्तदा । चिक्षेप नरसिंहस्य दीप्तस्याग्नेरिवाहुतिः ।

अस्त्रैः प्रज्वलितैः सिंहमावृणोदसुराधिपः । विवस्वान् घर्म्मसमये हिमवन्तमिवांशुभिः ।

स ह्यमर्षानिलोद्धूतो दैत्यानां सैन्यसागरः । क्षणेनाप्लावयत् सिंहं मैनाकमिव सागरः ।

प्रासैः पाशैश्च खड्गैश्च गदाभिर्म्मुषलैस्तथा । वज्रैरशनिभिश्चैव शिलाभिश्च महाद्रुमैः ।

मुद्गरैः कूटपाशैश्च शूलोलूखलपर्व्वतैः । शतघ्नीभिश्च दीप्ताभिर्द्दण्डैरपि सुदारुणैः ।

परिवार्य्य समन्तात्तु निघ्नन्तस्ते हरिं तदा । स्वल्पमप्यस्य न क्षुब्धमूर्ज्जितस्य महात्मनः ।

ते दानवाः पाशगृहीतहस्ता महेन्द्रवज्राशनितुल्यवेगाः । समन्ततोऽभ्युद्यतबाहुदण्डाः स्थितास्त्रिशीर्षा इव नागपोताः ।

सुवर्णमालाकुलभूषिताङ्गाः पीतांशुका भूषितभोगभाजः । मुक्तावलीदामविभूषिताङ्गा हंसा इवाभान्ति विशालपक्षाः ।

तेषान्तु वायुप्रतिमौजसां वै केयूरमालावलयोत्कटानां । तान्युत्तमाङ्गान्यभितो विभान्ति प्रभातसूर्य्यांशुसमप्रभाणि ।

क्षिप्तैः समन्ताज्ज्वलितानलप्रभैर्म्महास्त्रपूगैः स समावृतो बभौ । गिरिर्य्यथा सन्ततवर्षिभिर्घनैः कृतान्धकारोऽन्तमकन्दरद्रुमः ।

तैर्हन्यमानोऽपि महास्त्रजालैर्म्महाबलैर्द्दैत्यगणैः समेतैः । नाकम्पताजौ भगवान् प्रतापवान् स्थितः प्रकृत्या हिमवानिवाचलः ।

सन्त्रासितास्ते नरसिंहरूपिणा दितेः सुताः पावकतुल्यवर्च्चसः । भयाद्विचेलुः पवनोद्धुता यथा महोर्म्मयः सागरवारिसम्भवाः ।

शतैर्हुर्णिः सुमहातिवेगा युगान्तकालानलतिग्मवेगान् शरौघान्। एकाग्रवक्रा सुसुपूर्णबिंबे महासुराः क्रोधविदीपिताङ्गाः। १२७५०

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि नारसिंहे चतुर्विंशदधिकद्विशततमोऽध्यायः ॥ २२४ ॥

॥ वैशम्पायन उवाच ॥ खराः खरमुखाश्चैव मकराशीविषाननाः। ईहामृगमुखाश्चान्ये वराहमुखसंस्थिताः।
बालसूर्य्यमुखाश्चैव धूमकेतुमुखास्तथा। अर्द्धचन्द्रार्द्धवक्त्राश्च महोग्राग्निमुखास्तथा।
हंसकुक्कुटवक्त्राश्च व्यादितास्या भयावहाः। पञ्चास्या लेलिहानाश्च काकगृध्रमुखास्तथा।
द्विजिह्वाक्राथशीर्षाश्च तथोल्कामुखसंस्थिताः। महाग्राहनिभाश्चान्ये दानवा बलदर्पिताः।
कैलासवपुषस्तस्य शरीरे शरवृष्टिभिः। अवध्यस्य मृगेन्द्रस्य न व्यथां चक्रुराहवे। १२७५५
एवं भूयोऽपरान् घोरानसृजन्दानवाः शरान्। मृगेन्द्रोरसि संक्रुद्धा निःश्वसन्त इवोरगाः।
ते दानवशरा घोरा मृगेन्द्राय समीरिताः। विलयं जग्मुराकाशे खद्योता इव पर्व्वते।
ततश्चक्राणि घोराणि दैत्याः क्रोधसमन्विताः। मृगेन्द्रायाक्षिपन्नाशु प्रज्वलन्ति समन्ततः।
तैरासीद्गगनं चक्रैः संपतद्भिः समाकुलं। युगान्ते संप्रकाशद्भिश्चन्द्रादित्यग्रहैरिव।
तानि सर्व्वाणि चक्राणि मृगेन्द्रेण महात्मना। निगीर्णानि प्रदीप्तानि पावकार्च्चिःसमानि वै। १२७६०
तानि चक्राणि वदनं प्रविशन्ति विभान्ति वै। मेघोदरदरीं घोरां चन्द्रसूर्य्यग्रहा इव।
हिरण्यकशिपुर्दैत्यो भूयः प्रासृजदूर्ज्जितां। शक्तिं प्रज्वलितां घोरां धौतशस्त्रतडित्प्रभां।
तामापतन्तीं संप्रेक्ष्य मृगेन्द्रः शक्तिमुत्तमां। हुङ्कारेणैव रौद्रेण बभञ्ज भगवांस्तदा।
रराज भग्ना सा शक्तिर्मृगेन्द्रेण महीतले। सविस्फुलिङ्गा ज्वलिता महोल्केव नभश्च्युता।
नाराचपङ्क्तिः सिंहस्य छिन्ना रेजे विदूरतः। नीलोत्पलपलाशानां मालेवोज्ज्वलदर्शना। १२७६५
गर्ज्जित्वा स यथाकामं विक्रम्य च यथासुखं। तत्सैन्यमुत्सारितवांस्तृणाग्राणीव मारुतः।
ततोऽश्मवर्षं दैत्येन्द्रा व्यसृजन्त नभोगताः। नगमात्रैः शिलाखण्डैर्गिरिकूटैर्महाप्रभैः।
तदश्मवर्षं सिंहस्य गात्रे निपतितं महत्। दिशो दश प्रकीर्णं हि खद्योतप्रकरो यथा।
तमश्मौघैर्दितिसुतास्तदा सिंहमरिन्दमं। प्राच्छादयन् यथा मेघा धाराभिरिव पर्व्वतं।
न च तं चालयामासुर्दैत्यौघा देवसत्तमं। भीमवेगाचलश्रेष्ठं समुद्रा इव मन्दरं। १२७७०
ततोऽश्मवर्षे विहते जलवर्षमनन्तरं। धाराभिरक्षमात्राभिः प्रादुरासीत् समन्ततः।
नभसः प्रच्युता धारास्तिग्मवेगाः सहस्रशः। आवृण्वन् सर्व्वतो व्योम दिशश्चोपदिशस्तथा।
धाराणाञ्च निपातेन वायोर्विस्फूर्ज्जितेन च। वर्द्धता चैव वर्षेण न प्राज्ञायत किञ्चन।
धारा दिवि च संयुक्ता वसुधायाञ्च सर्व्वशः। न स्पृशन्ति स्म तं तत्र निपतन्त्योऽनिशं भुवि।
बाह्यतो ववृषुर्व्वर्षं नोपरिष्टात्तु तोयदाः। मृगेन्द्रप्रतिरूपस्य स्थितस्य युधि मायया। १२७७५
हतेऽश्मवर्षे तुमुले जलवर्षे च शोषिते। सोऽसृजद्दानवो मायामग्निवायुसमीरितां।
नभसः प्रच्युतश्चैव तिग्मवेगः समन्ततः। आविरासीन्महारौद्रो दीप्ततेजा हुताशनः।
स सृष्टः पावकस्तेन दैत्येन्द्रेण महात्मना। न शशाक महातेजा दग्धुमप्रतिमौजसं।

तस्मिन्नस्तोयदैः शार्ङ्गं सहस्राक्षो महाद्युतिः । सहसा तोयवर्षेण शमयामास पावकं ।
तस्यां प्रतिहतायान्तु मायायां युधि दानवाः । ससृजुर्घोरसङ्काशं तामसीं सुमहत्तमां ।
तमसा संवृते लोके दैत्येष्वात्तायुधेषु वै । स्वतेजसा परिवृतो दिवाकर इवाबभौ ।
त्रिशिखां भ्रुकुटिञ्चास्य ददृशुर्दानवा रणे । ललाटस्थां त्रिकूटस्थां गङ्गां त्रिपथगामिव ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि नारसिंहे पञ्चत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३५ ॥
॥ वैशम्पायन उवाच ॥ ततः सर्व्वासु मायासु हतासु दितिनन्दनाः । हिरण्यकशिपुं दैत्या विषण्णाः शरणं गताः ।
ततः प्रज्वलितः क्रोधात् प्रदहन्निव चक्षुषा । हिरण्यकशिपुर्दैत्यश्चालयामास मेदिनीं ।
ततः प्रक्षुभिताः सर्व्वे सागराः सलिलाकराः । चलिता गिरयः सर्व्वे काननानि च सर्व्वशः ।
तस्मिन् क्रुद्धे तु दैत्येन्द्रे तमोभूतमभूज्जगत् । तमसा सम्वच्छन्नं न प्राज्ञायत किञ्चन ।
आवहः प्रवहश्चैव विवहश्च समीरणः । परावहः संवहश्च उद्वहश्च महाबलः ।
तथा परिवहः श्रीमानुत्पातभयशंसिनः । इत्येते क्षुभिताः सप्त मारुता गगनेचराः ।
ये ग्रहाः सर्व्वलोकस्य क्षये प्रादुर्भवन्ति वै । ते ग्रहा गगने हृष्टा व्यचरन्त यथासुखं ।
अयोगतश्चाप्यचरद्योगं दिवि निशाकरः । सग्रहं सहनक्षत्रं प्रजज्वाल नभो निशि ।
विवर्णतश्च भगवान् गतो दिवि दिवाकरः । कृष्णः कबन्धश्च महान् लक्ष्यते स्म नभस्तले ।
अमुञ्चच्चार्चिषा सूर्य्यो धूमवर्त्तिं महाभयां । गगनस्थश्च भगवान् सततं परिविष्यते ।
सप्त धूमनिभा घोराः सूर्य्या दिवि समुत्थिताः । सोमस्य गगनस्थस्य ग्रहास्तिष्ठन्ति शृङ्गगाः ।
वामे च दक्षिणे चैव स्थितौ शुक्रबृहस्पती । शनैश्चरो लोहिताङ्गो लोहिताङ्गसमद्युतिः ।
समं समभिरोहन्ति दुर्गाणि गगनेचराः । शृङ्गाणि क्रमशो घोरा युगान्तावर्त्तका ग्रहाः ।
चन्द्रमाश्च सनक्षत्रो ग्रहैः सप्तभिरावृतः । चराचरविनाशाय रोहिणीं नाभ्यवर्त्तत ।
गृहीतो राहुणा सूर्य्य उल्काभिरभिहन्यते । उल्काः प्रज्वलिताश्चन्द्रे प्रचेलुर्घोरदर्शनाः ।
देवानामपि यो देवः सोऽप्यवर्षत शोणितं । अपतद्गगनादुल्का विद्युद्रूपा सनिस्वना ।
अकाले स्म द्रुमाः सर्व्वे पुष्प्यन्ति च फलन्ति च । लताश्च सफलाः सर्व्वा या आहुर्दैत्यनाशनं ।
फले फलान्यजायन्त पुष्पे पुष्पं तथैव च । उन्मीलन्ति निमीलन्ति हसन्ति च रुदन्ति च ।
विक्रोशन्ति च गम्भीरं धूमायन्ते ज्वलन्ति च । प्रतिमाः सर्व्वदेवानां कथयन्त्यो युगक्षयं ।
आरण्यैः सह संसृष्टा ग्राम्याश्च मृगपक्षिणः । चक्रुः सुभैरवं तत्र मृगेन्द्रे समुपस्थिते ।
नद्यश्च प्रतिलोमं वै वहन्ति कलुषोदकाः । न प्रकाशन्ति च दिशो रजोरेणुसमाकुलाः ।
वानस्पत्या न पूज्यन्ते पूजनार्हाः कथञ्चन । वायुवेगेन हन्यन्ते भज्यन्ते प्रणदन्ति च ।
यदा च सर्व्वभूतानां छाया न परिवर्त्तते । अपराह्णगते सूर्य्ये लोकानां भयकारके ।
तदा हिरण्यकशिपोर्दैत्यस्योपरि वेश्मनः । भाण्डागारायुधागारे निविष्टमभवन्मधु ।
तथैव चायुधागारे धूमराजिरदृश्यत । स तान्दृष्ट्वा महोत्पातान् हिरण्यकशिपुस्तदा ।

पुरोहितं तदा शुक्रं वचनञ्चेदमब्रवीत् । किमर्थं भगवन्नेते महोत्पाताः समुत्थिताः ।
श्रोतुमिच्छामि कार्त्स्न्येन परं कौतूहलं हि मे ।
॥ शुक्र उवाच ॥ शृणु राजन्नवहितो वदतो मे महासुर । यदर्थमेते दृश्यन्ते महोत्पाता महाभयाः । ११८१०
यदैते सम्प्रदृश्यन्ते राष्ट्रे राज्ञि महासुर । देशो वा ह्रियते तस्य राजा वा वधमृच्छति ।
तत्र बुद्ध्या समीचस्व यथा सर्व्वं यदीच्छसि । महद्भयं हि नचिराद्भविष्यति न संशयः ।
एतावदुक्त्वा शुक्रस्तु हिरण्यकशिपुं तदा । सत्त्वोत्सुक्ता च दैत्येन्द्रं जगाम स्वं निवेशनं ।
तस्मिन् गते तु दैत्येन्द्रो ध्यात्वा सुचिरं तदा । भाषाशुक्रे सुदीनात्मा ब्रह्मवाक्यमनुस्मरन् ।
असुराणां विनाशाय सुराणां विजयाय च । दृश्यन्ते विविधोत्पाता घोरा घोरनिदर्शनाः । ११८१५
एते चान्ये च बहवो घोरा ह्युत्पातसंभवाः । दैत्येन्द्रस्य विनाशाय दृश्यन्ते कालनिर्म्मिताः ।
ततो हिरण्यकशिपुर्गदामादाय सत्वरं । अभ्यद्रवत वेगेन धरणीमनुकम्पयन् ।
हिरण्यकशिपुर्दैत्यः पदा संस्पृष्टवान्महीं । सन्दष्टोष्ठपुटः क्रोधाद्वाराह इव पूर्व्वजः ।
मेदिन्यां कम्पमानायां दैत्येन्द्रेण महात्मना । महीधरेभ्यो नागेन्द्रा निष्पेतुर्भयविक्लवाः ।
विषज्वालाकुलैर्व्वक्त्रैर्विमुञ्चन्तो हुताशनं । चतुःशीर्षाः पञ्चशीर्षाः सप्तशीर्षाश्च पन्नगाः । ११८२०
वासुकिस्तक्षकश्चैव कर्क्कोटकधनञ्जयौ । एलापत्रः कालियश्च महापद्मश्च वीर्य्यवान् ।
सहस्रशीर्षः नागो हेमतालध्वजः प्रभुः । शेषोऽनन्तो महीपालो दुष्प्रकम्पः प्रकम्पितः ।
दीप्तान्यन्तर्जलस्थानि पृथिवीधरणानि वै । क्रुद्धेन तत्र दैत्येन कम्पितानि समन्ततः ।
पातालतलवासिन्यो नागतेजोधराः शिवाः । आपश्च सहसा क्षुब्धा दुष्प्रकम्पतमाः शुभाः ।
नदी भागीरथी चैव सरयूः कौशिकी तथा । यमुना चैव कावेरी कृष्णवेणा तथैव च । ११८२५
तुङ्गवेणा महाभागा नदी गोदावरी तथा । चर्म्मण्वती च सिन्धुश्च तथा नदनदीपतिः ।
मेकलप्रभवश्चैव शोणो मणिनिभोदकः । सुस्रोता नर्म्मदा चैव तथा वेत्रवती नदी ।
गोमती गोकुलाकीर्णा तथा पूर्व्वा सरस्वती । मही कालमही चैव तमसा पुष्पवाहिनी ।
सीता चेक्षुमती चैव देविका च महानदी । जाम्बूनदो रत्नचितः सर्व्वरत्नोपशोभितः ।
सुवर्णकूटकश्चैव सुवर्णाकरमण्डितः । महानदश्च लौहित्यः शैलकाननभूषितः । ११८३०
पत्तनं कौशिकाराणां द्रविडा रजताकराः । मगधाश्च महाग्रामा पौण्ड्रा वङ्गास्तथैव च ।
सुह्माः पल्हा विदेहाश्च मालवाः काशिकोसलाः । भवनं वैनतेयस्य सुपर्णस्य च कम्पितं ।
कैलासशिखराकारं यत्कृतं विश्वकर्म्मणा । रक्ततोयो भीमवेगो लौहित्यो नाम सागरः ।
शुभ्रः पाण्डरमेघाभः क्षीरोदश्चैव सागरः । उदयश्चैव शैलेन्द्र उच्छ्रितः शतयोजनं ।
सुवर्णवेदिकः श्रीमान्मेघपंक्तिनिषेवितः । भ्राजमानोऽर्कसदृशैर्जातरूपमयैर्द्रुमैः । ११८३५
शालैस्तालैस्तमालैश्च कर्णिकारैः सुपुष्पितैः । अयोमुखश्च विपुलः पर्व्वतो धातुमण्डितः ।
तमालवनगन्धश्च पर्व्वतो मलयः शुभः । सुराष्ट्राश्चैव वाह्लीका मद्राभीरास्तथैव च ।

भोजाः पाण्ड्याश्च अङ्गाश्च कलिङ्गाश्चाथ सिंहलाः । तथैव चोलाः पौण्ड्राश्च ताम्रचूडाः सकेरलाः ।
क्षोभितास्तेन दैत्येन सर्व्वाः साप्सरोगणाः । अगस्त्यभवनञ्चैव यदगम्यकृतं पुरा ।
सिद्धचारणसंघैश्च सेवितं सुमनोरमं । विचित्रनानाविहगं सुपुष्पितमहाद्रुमं । १२८४०
जातरूपमयैः शृङ्गैरप्सरोगणसेवितं । गिरिः पुष्पितकश्चैव लक्ष्मीवान् प्रियदर्शनः ।
उत्थितः सागरं भित्त्वा नभःस्वच्चन्द्रसूर्य्ययोः । रराज सुमहाशृङ्गैर्गगनं विलिखन्निव ।
चन्द्रसूर्य्यांशुसंकाशैः सागराम्बुसमावृतः । विद्युत्वान् पर्व्वतः श्रीमानायतः शतयोजनं ।
विद्युतां यत्र सम्पाता निपात्यन्ते नगोत्तमे । ऋषभः पर्व्वतश्चैव श्रीमान् वृषभसंस्थितः ।
कुञ्जरः पर्व्वतश्चैव यत्रागस्त्यगृहं शुभं । विशालरथ्या दुर्द्धर्षा सर्पाणामालया पुरी । १२८४५
तथा भोगवती चापि दैत्येन्द्रेण प्रकम्पिता । महामेघगिरिश्चैव पारियात्रश्च पर्व्वतः ।
चक्रवांश्च गिरिश्रेष्ठो वराहश्चैव पर्व्वतः । प्राग्ज्योतिषपुरञ्चैव जातरूपमयं शुभं ।
यस्मिन्वसति दुष्टात्मा नरको नाम दानवः । मेघश्च पर्व्वतश्रेष्ठो मेघगम्भीरनिस्वनः ।
यत्र षष्टिः सहस्राणि पर्व्वतानां विशाम्पते । तरुणादित्यसंकाशो मेरुश्चैव महागिरिः ।
देवावासः शुभः पुण्यो गिरिराजो हिरण्मयः । हेमकूटो महाशैलस्तथा मेघसखो गिरिः । १२८५०
कैलासश्चापि शैलेन्द्रो दानवेन्द्रेण कम्पितः । यक्षराक्षसगन्धर्व्वैर्नित्यं सेवितकन्दरः ।
श्रीमान्मनोहरश्चैव नित्यं पुष्पितपादपः । हेमपुष्करसञ्छन्नं तेन वैखानसं सरः ।
कम्पितं मानसञ्चैव राजहंसनिषेवितं । त्रिशृङ्गः पर्व्वतश्चैव कुमारी च सरिद्वरा ।
तुषारचयसंकाशो मन्दरश्चैव पर्व्वतः । उशीरबीजश्च गिरी रुद्रोपस्थस्तथाऽद्रिराट् ।
प्रजापतेश्च निलयस्तथा पुष्करपर्व्वतः । देवाभ्रपर्व्वतश्चैव तथा वै वालुको गिरिः । १२८५५
क्रौञ्चः सप्तर्षिशैलश्च धूमवर्णश्च पर्व्वतः । एते चान्ये च गिरयो देशा जनपदास्तथा ।
नद्यश्च सागराः सर्व्वे दानवेन्द्रेण कम्पिताः । कपिलश्च महीपुत्रो व्याघ्राक्षश्चैव कम्पितः ।
खेचराश्च निशापुत्राः पातालतलवासिनः । गणस्तथाऽपरो रौद्रो मेघनामाऽङ्कुशायुधः ।
ऊर्द्ध्वगो भीमवेगश्च सर्व्व एवाभिकम्पिताः ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि नारसिंहे षड्विंशदधिकद्विशततोऽध्यायः ॥ २२६ ॥

॥ वैशम्पायन उवाच ॥ ततादित्याश्च साध्याश्च विश्वे च वसवस्तथा । रुद्रा देवा महात्मानो मरुतश्च महाबलाः । १२८६०
आगम्य ते जगन्नाथस्य सकाशं सर्व्वसर्व्वशः । ऊचुः संत्रस्तमनसो देवा लोकसर्व्वार्हिताः ।
जहि देव दितेः पुत्रं दानवं लोकनाशनं । दुर्व्वृत्तमसदाचारं सह सर्व्वैर्महासुरैः ।
त्वं कृपामन्तको नान्यो दैत्यानां दैत्यनाशन । तस्मात्त्वय हितार्थाय लोकानां स्वस्ति वै कुरु ।
त्वं गुरुः सर्व्वलोकानां त्वमिन्द्रस्त्वं पितामहः । ऋते त्वदन्यच्छरणं न भूतं न भविष्यति ।
तच्छ्रुत्वा वचनं देवो देवानामादिसम्भवः । ननाद सुमहानादमतिगम्भीरनिस्वनः । १२८६५
पाटितान्यसुरेन्द्राणां मृगेन्द्रेण महात्मना । सिंहनादेन महता हृदयानि मनांसि च ।

गणः क्रोधवशो नाम कालकेयस्तथाऽपरः । वेगश्च वेगवेगश्च वैचित्रेयश्च वीर्य्यवान् ।
संह्रादीयो महानादो विंदेयश्च तथा गणः । कपिलश्च मरीपुत्रो व्याघाक्षः चितिकम्पनः ।
खेचराश्च निशापुत्राः पातालतलवासिनः । गणस्तथाऽपरो रौद्रो मेघनादोऽश्मायुधः ।
ऊर्द्ध्वगो भीमवेगश्च भीमकर्म्माऽर्क्कलोचनः । वज्री शूली करालश्च हिरण्यकशिपुस्ततः । ११८७०
जीमूतघनसंकाशो जीमूतघनवेगवान् । जीमूतघननिर्घोषो जीमूतसदृशद्युतिः ।
देवारिर्दितिजो दृप्तो नृसिंहं समुपाद्रवत् । समुत्पत्य ततस्तीक्ष्णैर्मृगेन्द्रेण महानखैः ।
तदोङ्कारसहायेन विदार्य्य निहतो युधि ।
मही च लोकश्च शशी नभश्च ग्रहाश्च सूर्य्यश्च दिशश्च सर्व्वाः । नद्यश्च शैलाश्च महार्णवाश्च गताः प्रसादं दितिपुत्रनाशात् ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि नारसिंहे हिरण्यकशिपुवधे सप्तचित्वारिंशदधिकद्विशततमोऽध्यायः ॥ २१७ ॥
॥ वैशम्पायन उवाच ॥ ततः प्रमुदिता देवा ऋषयश्च तपोधनाः । तुष्टुवुर्विविधैस्तोत्रैरादिदेवं सनातनं । ११८७५
॥ देवा ऊचुः ॥ यत्त्वया विहितं देव नारसिंहमिदं वपुः । एतदेवार्चयिष्यन्ति परावरविदो जनाः ।
मृगेन्द्रस्त्वञ्च लोकेषु सर्व्वसत्त्वेषु वा विभो । गास्यन्ति च त्वां मुनयो मृगेन्द्र इति नित्यशः ।
त्वत्प्रसादात् स्वकं स्थानं प्रतिपन्नाः स्म वै विभो । इत्युक्तवत्सु देवेषु नृसिंहस्य महात्मनः ।
ब्रह्मा च परमप्रीतो विष्णोः स्तोत्रमुदैरयत् ।
॥ ब्रह्मोवाच ॥ भवानक्षरमव्यक्तमचिन्त्यं गुह्यमुत्तमं । कूटस्थमकृतं कर्त्तृ सनातनमनामयं । ११८८०
सांख्ये योगे च या बुद्धिस्तत्त्वार्थपरिनिष्ठिता । तां भवान् वेद विश्वात्मा पुरुषः शाश्वतो ध्रुवः ।
व्यक्ताव्यक्तश्च भगवांस्त्वत्तः सर्व्वमिदं जगत् । भवानेव वयं देवा भवानात्मा भवान् प्रभुः ।
चतुर्व्विभक्तमूर्त्तिस्त्वं सर्व्वलोकगुरुर्व्विभुः । चतुर्युगसहस्रेशः सर्व्वलोकान्तकान्तकः ।
चतुर्व्वेदश्चतुर्होत्रश्चतुरात्मा सनातनः । प्रतिष्ठा सर्व्वलोकानामनन्तबलपौरुषः ।
कपिलप्रभृतीनाञ्च त्वं यतीनां परा गतिः । अनादिमध्यनिधनः सर्व्वात्मा पुरुषोत्तमः । ११८८५
स्रष्टा त्वं त्वञ्च संहर्त्ता त्वमेको लोकभावनः । भवान् ब्रह्मा च रुद्रश्च महेन्द्रो वरुणो यमः ।
भवान् कर्त्ता विकर्त्ता च लोकानां प्रभवोऽव्ययः ।
पराञ्च सिद्धिं परमञ्च देवं परञ्च मन्त्रं परमं तपश्च । परञ्च धर्म्मं परमं यशश्च त्वामाहुरग्र्यं पुरुषं पुराणं ।
परञ्च सत्यं परमं हविश्च परं पवित्रं परमञ्च मार्गं । परञ्च यज्ञं परमञ्च होत्रं त्वामाहुरग्र्यं पुरुषं पुराणं ।
परं शरीरं परमञ्च धाम परञ्च योगं परमाञ्च वाणीं । परं रहस्यं परमां गतिञ्च त्वामाहुरग्र्यं पुरुषं पुराणं । ११८९०
परं परस्यापि परं पदं यत् परं परस्यापि परञ्च देवं । परं परस्यापि परं प्रभुञ्च त्वामाहुरग्र्यं पुरुषं पुराणं ।
परं परस्यापि परं प्रधानं परं परस्यापि परञ्च तत्त्वं । परं परस्यापि परञ्च धाम त्वामाहुरग्र्यं पुरुषं पुराणं ।
परं परस्यापि परं यशो यत् परं परस्यापि परं परं यत् । परं परस्यापि परं पवित्रं त्वामाहुरग्र्यं पुरुषं पुराणं ।
परं परस्यापि परं पुराणं परञ्च गुह्यं परमञ्च मन्त्रं । परेण योगेन परं सुगुप्तं त्वामाहुरग्र्यं पुरुषं पुराणं ।
॥ वैशम्पायन उवाच ॥ एवमुक्त्वा तु भगवान् सर्व्वलोकपितामहः । स्तुत्वा नारायणं देवं ब्रह्मलोकं गतः प्रभुः । ११८९१

ततो महत्सु तूर्य्येषु नृत्यत्स्वप्सरःसु च । क्षीरोदस्योत्तरं कूलं जगाम हरिरीश्वरः ।
नारसिंहं वपुस्त्यक्त्वा स्थापयित्वा च तद्वपुः । पौराणं रूपमास्थाय प्रययौ गरुडध्वजः ।
अष्टचक्रेण यानेन भूतयुक्तेन भास्वता । अव्यक्तप्रकृतिर्देवः स्वस्थानमगमत् प्रभुः ।
एवं महात्मना तेन नृसिंहवपुषा तदा । देवारिर्निहतो राजन् हिरण्यकशिपुः पुरा ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि नारसिंहे वपुःस्थापने अष्टत्रिंशदधिकद्विशततमोऽध्यायः ॥२३८॥

॥ वैशम्पायन उवाच ॥ नारसिंहो मया प्रोक्तो भूयोऽयं वामनोऽपरः । यत्र वामनमास्थाय रूपं रूपवताम्वरः ।
बलेर्ब्बलवतो यज्ञे विष्णुना प्रभविष्णुना । विक्रमैस्त्रिभिराक्रम्य त्रैलोक्यमखिलं हृतं ।
समुद्ररसना चोर्व्वी नानानगविभूषिता । हृत्वा दत्ता सुरेन्द्राय शक्राय प्रभविष्णुना ।
॥ जनमेजय उवाच ॥ अत्र मे संशयो ब्रह्मन्स्तत्र मे विस्मयो महान् । कथं नारायणो देवो वामनत्वमुपागतः ।
यः पुराणे पुराणात्मा भूत्वा नारायणो विभुः । पद्मनाभो महाबाहुर्लोकानां प्रकृतिर्ध्रुवः ।
अनादिमध्यनिधनस्त्रैलोक्यादिः सनातनः । देवदेवः सुराध्यक्षः स्रष्टा लोकनमस्कृतः ।
हव्यकव्यवहः श्रीमान् हव्यकव्यभुगव्ययः । अदित्या देवमातुस्तु कथं गर्भेऽभवत् प्रभुः ।
स्रष्टा यो वासवस्यापि स कथं वासवानुजः । प्रसूतो दिवि देवेशो विष्णुत्वं प्राप्तवान् कथं ।
एतदाचक्ष्व मे ब्रह्मन् प्रादुर्भावं महात्मनः ।
॥ वैशम्पायन उवाच ॥ शृणु राजन् कथां दिव्यामर्चितामृषिपुङ्गवैः । पुराणैः कविभिः प्रोक्तां ब्रह्मोक्तां ब्राह्मणेरितां ।
मारीचस्य सुरेशस्य कश्यपस्य प्रजापतेः । अदितिर्दितिर्द्वे भार्य्ये भगिन्यौ जनमेजय ।
अदित्यां जज्ञिरे देवाः कश्यपस्य महात्मनः । धाताऽर्य्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ।
इन्द्रो विवस्वान् पूषा च पर्ज्जन्यो दशमः स्मृतः । ततस्त्वेकादशस्त्वष्टा द्वादशो विष्णुरुच्यते ।
दित्यां प्रसूतो बलवान् हिरण्यकशिपुः प्रभुः । तस्यानुजस्तु दैत्येन्द्रो हिरण्याक्षो महाबलः ।
हिरण्यकशिपोः पुत्राः पञ्च घोरपराक्रमाः । प्रह्लादह्लादौ संह्लादो जम्भोऽनुह्लाद एव च ।
विरोचनस्तु प्राह्लादिस्तस्य पुत्रो बलिः स्मृतः । पुत्रपौत्रैर्बलवतां तेषामक्षयमव्ययं ।
तेजस्विनां सुरारीणां दैत्येन्द्राणां महात्मनां । गणाः सुबहवो राजन् देशे देशे सहस्रशः ।
ते दृष्ट्वा नरसिंहेन हिरण्यकशिपुं हतं । दैत्या देववधार्थाय बलिमिन्द्रं प्रचक्रिरे ।
दृष्ट्वा धर्म्मपरं नित्यं सत्यवाक्यं जितेन्द्रियं । शौर्य्याध्ययनसम्पन्नं सर्व्वशास्त्रविशारदं ।
परावरगृहीतार्थं तत्त्वदर्शिनमव्ययं । तेजस्विनं कृतप्रज्ञं हिरण्यकशिपुं यथा ।
अभिषेकेण दिव्येन बलिं वैरोचनिं प्रभुं । दैत्याधिपत्ये दितिजास्तदा सर्व्वेऽभ्यपूजयन् ।
अभिषिक्तस्तु दैत्यैस्तैर्बलिर्ब्बलवतां वरः । ब्रह्मणा चैव तुष्टेन हिरण्यकशिपोः पदे ।
अभिषिक्तोऽसुरैः सार्द्धं बलिर्वैरोचनिस्तदा । काञ्चनैः कलशैः स्फीतैः सर्व्वतीर्थाम्बुसंभृतैः ।
जयशब्दं ततश्चक्रुरभिषिक्तस्य दानवाः । बलेरतुलवीर्य्यस्य सिंहासनगतस्य च ।
कृतेन्द्रं दानवाः सर्व्वे बलिं बलवताम्वरं । ततो विज्ञापयामासुः शिरोभिः पतिताः क्षितौ ।

॥ दैत्या ऊचुः ॥ विदितं तव दैत्येन्द्र हिरण्यकशिपोर्यथा। त्रैलोक्यमासीदखिलं सह स्थावरजङ्गमं। १२९२५
पितामहस्तु ते हत्वा सुरैः सुरनिसूदन। हतं तदेव त्रैलोक्यं शक्रश्चैवाभिषेचितः।
तत्त्वं पैतामहं राज्यं प्रत्याहर्त्तुमिहार्हसि। अस्माभिः सहितो नाथ त्रैलोक्यमिदमव्ययं।
प्रत्यानयस्व भद्रं ते राज्यं पैतामहं विभो।
असुरगणसहस्रसंवृतस्त्वं जय दिवि देवपतिं सहानुगं तं। अमितबलपराक्रमोऽसि राजन्नतिशयसे स्वगुणैः पितामहं स्वं।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने बलेरभिषेके ऊनचत्वारिंशदधिकद्विशततोऽध्यायः॥ २२९ ॥
॥ वैशम्पायन उवाच ॥ निशम्य तेषां वचनं महामतिर्बलिस्तदा प्रीतमना महाबलः। आज्ञापयामास स दैत्यकोटीस्त्रैलोक्य
मद्यैव जयेम सर्व्वं। १२९३०
तस्य तद्वचनं श्रुत्वा बलेर्वैरोचनेस्तदा। उद्योगं परमञ्चक्रुर्दानवा युद्धदुर्म्मदाः।
महापार्श्वो निकुम्भश्च पूर्णकुम्भश्च वीर्य्यवान्। काञ्चनाक्षः कपिस्कन्धो व्याघ्राक्षः क्षितिकम्पनः।
सितकेशोऽर्द्धवक्त्रश्च वज्रनाभः शिखी जटी। सहस्रबाहुर्विकचो सोमाक्षः प्रियदर्शनः।
एकाक्ष एकपान्मुण्डो विद्युदक्षश्चतुर्भुजः। गजोदरो गजशिरा गजस्कन्धो गजेक्षणः।
अष्टदंष्ट्रश्चतुर्दंष्ट्रो मेघनादी जलन्धमः। करालो ज्वालजिह्वश्च शताङ्गः शतलोचनः। १२९३५
सहस्रपात् कृष्णमुखः कृष्णश्चैव महासुरः। रणोत्कटो दानपतिः शैलकम्पी कुलाकुलः।
समुद्रो रभसश्चण्डो धूम्रश्चैव प्रियङ्करः। गोशृङ्गो गोखुरो रौद्रो गोदन्तः स्वस्तिको ध्रुवः।
भीमपो मांसभक्षश्च वेगवान् केतुमान् शिविः। पङ्कदिग्धशरीरश्च वृहत्कीर्त्तिर्महाहनुः।
समप्रभो विकुम्भाण्डो विरूपाक्षो हराहरौ। श्वेतशीर्षश्चन्द्रहनुश्चन्द्रहा चन्द्रतापनः।
विदरो दीर्घजङ्घश्च मद्यपो मारुताशनः। कालकक्षो महाक्रोधः शलभः कुलभः क्रथः। १२९४०
समुद्रमथनो नादी विदर्भश्च महाबलः। प्रलम्बो नरको बालो खड्गमः काललोचनः।
वरिष्ठश्च गविष्ठश्च भूतलोन्मथनो विभुः। सुप्रसादः किरीटी च सूचीवक्त्रो महासुरः।
सुबाहुः खञ्जबाहुश्च वरुणः कलशोदरः। सोमपो देवयाजी च प्रवरो वीरमर्द्दनः।
शुशुपुष्पश्च शङ्कश्च कुशनेत्रः शशिध्वजः। यथास्मृति मया प्रोक्ता मारीचेः कोपिवर्द्धनाः।
एते चान्ये च बहवो नानाभूषणभूषिताः। रथैर्गजैस्तुरङ्गैश्च युयुत्सवो देवोद्यताः। १२९४५
दिव्यमाल्याम्बरधरा दिव्यस्रगनुलेपनाः। दिव्यैश्च कवचैर्बद्धा दिव्यैश्चैवोपकृतैर्ध्वजैः।
दिव्याम्बरधरा दैत्या गर्ज्जमाना इवाम्बुदाः। वृहद्भिः स्यन्दनाघोषैस्त्रासयन्तो वसुन्धरां।
महाबला दिव्यबलास्त्रधारिणो भुजङ्गभोगप्रतिमैर्महाभुजैः। सुदुर्जया दैत्यवृषाः सुरारयो दितिप्रिया लोहितलोचि
तेक्षणाः।
ते जगमुरर्कज्वलनेन्दुवीर्य्या महेन्द्रवज्राशनितुल्यवेगाः। विवृत्तदंष्ट्रा हरिधूम्रकेशा विनर्द्दमानाः शरदीव मेघाः।
सहस्रबाहुर्बाणस्तु बलेः पुत्रो महाबलः। रथातिरथकोट्याऽसौ संनद्धस्त्र स वीर्य्यवान्। १२९५०
सर्व्वे मायाधराः शूराः सर्व्वे दिव्यास्त्रयोधिनः। सर्व्वे बलमदोत्सिक्ताः सर्व्वे लब्धवरास्तथा।

सर्व्वे काञ्चनशैलाभाः सर्व्वे कौशेयवाससः। किरीटोष्णीषमुकुटा दिव्यभूषणभूषिताः।
हिरण्यकवचाः सर्व्वे हिरण्यध्वजकेतवः। चन्दनाक्ता व्यराजन्त शारदा इव खे घनाः।
तापनीयैर्व्वरैर्निष्कैः कालाग्निज्वलितप्रभैः। हेमपर्व्वतशृङ्गाभाः पुष्पिता इव किंशुकाः।
तेषां मध्यगतो बाणः प्रावृषीवोत्थितो घनः। स्थितः शक्तिगदापाणिस्त्रिनल्वप्रतिमे रथे। १२९५५
चित्राश्वेशाध्वजयुगे चित्रभक्तिविराजिते। गदापरिघसंपूर्णे हेमजालविभूषिते।
सन्धीयमानो दितिजैर्वालिखिल्यैरिवांशुमान्। नानाप्रहरणैर्घोरैस्तीक्ष्णदंष्ट्रैरिवोरगैः।
पञ्च तत्र महावीर्य्या दानवा युद्धदुर्म्मदाः। ररक्षुरथमव्यग्रा ख्यादितास्त्रा भयानकाः।
सुबाहुर्मेघनादश्च भीमवेगश्च वीर्य्यवान्। तथा गगनमूर्द्धा च वेगवान् केतुमानपि।
कनकरजतभक्तिचित्रपार्श्वे पतगपतिप्रतिमे रथे स्थितोऽभूत्। जलदनिनदतुल्यनेमिघोषे सुरगणसैन्यवधाय दानवेन्द्रः। १२९६०
अनायुषायाः पुत्रस्तु बलो नाम महासुरः। हतः शतसहस्रेण रथानां भीमवर्चसां।
युगान्तसहस्रेण रथनागश्च वीर्य्यवान्। नीलायसमयं घोरं वायसाङ्कं सुदुर्ज्जयं।
नीलाम्बरधरः श्रीमान् वैदूर्य्याचलसन्निभः। महता रथवृन्देन प्रययौ दानवस्तदा।
तच्चैकार्णवसंकाशे सैन्यमध्ये व्यराजत। प्रभातसमये श्रीमान् समुद्रस्य इवांशुमान्।
स तप्तजाम्बूनदतुल्यवर्च्चसा निशाकराकारतडिद्गणारुणः। किरीटमुख्येन विभाति शोभिना यथा गिरिः शृङ्गवरेण भास्वता। १२९[६५]
षष्टीरथसहस्राणि नमुचेरसुरस्य वै। खरयुक्तानि सर्व्वाणि मेघतुल्यरवाणि च।
नानाप्रहरणाः सर्व्वे सर्व्वे ते चित्रयोधिनः। महाभ्रघनसंकाशा वेगवन्तो महाबलाः।
रथो व्याघ्रसहस्रेण युक्तः परमवीर्य्यवान्। नमुचेरसुरेन्द्रस्य सर्व्वरत्नविभूषितः।
शार्दूलचिह्नः शुशुभे तस्य केतुर्हिरण्मयः। रथमध्येऽसुरेशस्य दिनमध्ये रविर्यथा।
स भीमवेगस्य महाबलस्य प्रगृह्य चापं हिमवानिव स्थितः। नीलाम्बरः काञ्चनपद्ममाली दिशागजो यद्वदलङ्कृतः। १२९७०
किङ्किणीजालनिर्घोषं तपनीयपरिष्कृतं। सपताकध्वजोपेतं ससन्ध्यमिव तोयदं।
चक्रैश्चतुर्भिः संयुक्तमष्टनल्वायतान्तरं। हेमजालाकुलं दीप्तं कालचक्रमिवोद्यतं।
नानायुधधरं दिव्यं व्याघ्रचर्म्मपरिच्छदं। ईहामृगगणाकीर्णं चित्रभक्तिविराजितं।
तूणीरशतसंपूर्णं शक्तितोमरसङ्कुलं। गदामुद्गरसम्बाधमारुरोह मयो रथं।
युक्तमृक्षसहस्रेण लम्बकेशरवर्च्चसा। राजतेनेव शैलेन शोभितं सिंहकेतुना। १२९७५
स तदा शुशुभे दैत्यो विश्वकर्म्मकृते वशी। रथरत्ने स्थितः श्रीमानुदयस्थ इवांशुमान्।
विमलरजतविन्दुशोभिताङ्गं मणिकनकोज्ज्वलचारुभक्तिचित्रं। अयुतशतसहस्रमूर्च्छितानां मयमनुयाति महाहवे रथानां।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने चत्वारिंशदधिकद्विशततोऽध्यायः ॥ २४० ॥

॥ वैशम्पायन उवाच ॥ पुलोमा तु महादैत्यस्तिमिराकारसन्निभः। आरुरोहाश्वयं घोरं रथं पररथारुजं।
पर्व्वतोत्करसंकाशं लोहजालान्तराम्बरं। नेमिघोषेण महता क्षुभ्यन्तमिव सागरं।
गदापरिघनिस्त्रिंशप्रासतोमरैः सपरश्वधैः। शक्तिमुद्गरसम्पूर्णं सतोयमिव तोयदं। १२९८०

रथमुष्ट्रसहस्रेण संयुक्तं वायुवेगिना । पुलोमारुह्य युद्धाय प्रस्थितो युद्धदुर्म्मदः ।

षष्टीरथसहस्राणि पुलोमानं महाबलं । अन्वयु: सूर्य्यवर्णानि भ्राजमानानि तेजसा ।

खड्गध्वजेन महता तप्तकाञ्चनवर्च्चसा । शुशुभे रथमध्यस्थ: पर्व्वतस्थ इवांशुमान् ।

सुचारुचामीकरपट्टनद्धां महागदां कालनिभां महात्मा । प्रगृह्य बभ्राज स सैन्यमध्ये कार्ष्णायसीं केतुरिवोच्छ्रितोऽग्र्यः ।

हयग्रीवस्तु बलवान् हयग्रीवैर्महासुरै: । वृत: शतसहस्रेण रथानां रथसत्तम: । १२९८५

धराधरनिभाकारं सपत्नानीकमर्द्दनं । स्यन्दनं भीममास्थाय युद्धायाभिमुख: स्थित: ।

श्वेतशैलप्रतीकाश: श्वेतकुण्डलभूषण: । शुशुभे रथमध्यस्थ: श्वेतशृङ्ग इवाचल: ।

महता सप्तशीर्षेण राजता नागकेतुना । वैदूर्य्यमणिचित्रेण प्रवालाङ्कुरशोभिना ।

अमितबलपराक्रमद्युतीनां वररथिनामनुजग्मुरूर्ज्जितानां । असुरगणशतानि गच्छमानं त्रिदशगणा इव वासवं प्रयान्तं ।

प्रह्लादस्तु महाप्राज्ञ: सर्व्वशास्त्रविशारद: । सर्व्वमायाधर: श्रीमान् यष्टा क्रतुशतै: प्रभु: । १२९९०

समनह्यत तेजस्वी पावकार्च्चि:समप्रभ: । रथाग्र्येण महता दुर्द्दिनाम्भोदनादिना ।

शूरेणामितवीर्य्येण हेमकुण्डलधारिणा । वृतो दैत्यसहस्रेण देवैरिव पितामह: ।

स्ववीर्य्यादग्रणीर्दृप्तो मत्तवारणविक्रम: । सुरसैन्यस्य सर्व्वस्य प्रतिशत्रुरिव स्थित: ।

स धैर्य्येणादधेस्तुल्यो वपुषाऽग्निरिव ज्वलन् । तेजसा भास्कराकार: क्षमया पृथिवीसम: ।

तालध्वजेन दीप्तेन रथेनातिविराजता । यान्तं तमनुयान्ति स्म दानवा: शतसंघश: । १२९९५

हिरण्यकवचा: सर्व्वे सर्व्वे रत्नविभूषिता: । दिव्याङ्गरागाभरणा: समरेष्वनिवर्त्तिन: ।

जाम्बूनदविचित्राङ्गा वैदूर्य्यरचिताङ्गदा: । दिव्यस्यन्दनमध्यस्था: खस्था इव महाग्रहा: ।

आचारवांश्चैव जितेन्द्रियश्च धर्म्मे रत: सत्यपरोऽनसूयु: । स्थितोऽग्नितोयाम्बुदवायुकल्पो रूपी यथा सर्व्वहर: कृतान्त: ।

शम्बरस्तु महामायो दैत्यानां रथयूथप: । आरुरोह रथं दिव्यं सर्व्वयुद्धविशारद: ।

लोहिताक्षो महाबाहु: प्रतप्तोत्तमकुण्डल: । जीमूतघनसंकाशो दिव्यस्रगनुलेपन: । १३०००

विद्युद्योतनिकाशेन मुकुटेनार्कवर्च्चसा । मणिरत्नविचित्रेण वैदूर्य्यान्तरशोभिना ।

तपनीयेन महता कवचेन विराजता । सन्ध्याभ्रेणेव सञ्छन्न: श्रीमानस्तशिलोच्चय: ।

त्रिंशच्छतसहस्राणि दैत्यानां चित्रयोधिनां । बलिनां कालकल्पानामन्वयु: शम्बरं तदा ।

युक्तं हयसहस्रेण शुक्लवर्णेन राजता । क्रौञ्चध्वजेन दीप्तेन रथेनाहवशोभिना ।

व्यासक्तवैदूर्य्यसुवर्णजालं नानाविहङ्गोज्ज्वलभक्तिचित्रं । विद्युत्प्रभं भीमरवं सुवेगं रथं समारुह्य रराज दैत्य: । १३००५

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने प्रादुर्भावे दैत्यसन्नहने एकचत्वारिंशदधिकद्विशततमोऽध्याय: ॥२४१

॥ वैशम्पायन उवाच ॥ अनुह्रादस्तु तत्रैव दैत्य: परपुरञ्जय: । हिरण्यकशिपो: पुत्र: प्रययौ युद्धलालस:

चतुश्चक्रेण यानेन त्रिनल्वप्रतिमेन च । युक्तेनाश्वैर्महावीर्य्यै: सिंहवक्त्रैरजिह्मगै: ।

भीमगम्भीरघोषेण नेमिघोषेण वल्गुना । चालयन् वसुधां सर्व्वां सशैलवनकाननां ।

विमर्द्दमाना दैत्यांस्तु समन्तात् पर्य्यवारयन् । शतं शतसहस्राणां रथानां हेममालिनां ।

परिघैर्भिन्दिपालैश्च प्रासैः पाशैः परश्वधैः । विविधायुधहस्तास्ते शूलमुद्गरपाणयः । १२०१०
सुवर्णजालनिर्युक्तैर्वर्म्मैश्च समलङ्कृताः । रथैश्च कवचैश्चान्ये शोभमाना महासुराः ।
ततो विशालोच्छ्रितशैलरूपे बभौ रथे काञ्चनरत्नचित्रे । दैत्याधिपः सत्त्वबलानुरूपः समास्थितस्त्वप्रतिमेयरूपे ।
विरोचनश्च बलवान् वैश्वानरसमद्युतिः । महता रथवंशेन सर्व्वास्त्रकुशलः शुचिः ।
व्यूहानां विनियोगज्ञो ज्ञानविज्ञानतत्त्ववित् । बलेः पिताऽसुरवरः सुराणामिव वासवः ।
सर्व्वायुधधरोपेतं किङ्किणीजालभूषितं । सुयुक्तं वाजिमुख्यानां सहस्रेणाशुगामिना । १२०११
रथमारुह्य दैत्येन्द्रो बभौ मेरुरिवापरः । किङ्किणीजालपर्य्यन्तं गजेन्द्रध्वजशोभितं ।
सन्ध्याभ्रसमवर्णाभिः पताकाभिरलङ्कृतं ।
प्रवालजाम्बूनदभक्तिचित्रं व्यालम्बिमुक्ताफलशोभितञ्च । रथं समारुह्य किरीटमाली ययौ स युद्धाभिमुखोऽसुरेन्द्रः
विरोचनानुजश्चैव कुजम्भो नाम वीर्य्यवान् । स्यन्दनैर्व्वज्रसाहस्रैर्व्वर्णकाञ्चनभूषितैः ।
वृतो मदबलोत्सिक्तैर्दैवारिभिररिन्दमः । प्रासपाशगदाहस्तैर्दानवैर्युद्धकाङ्क्षिभिः । १२०१२
स पर्व्वतनिभाकारो भिन्नाञ्जनचयप्रभः । महता भ्राजमानेन किरीटेनार्कवर्चसा ।
सर्व्वरत्नविचित्रेण कवचेन सुसंवृतः । महता दीप्तवपुषा स्वर्गद्वार इवांशुमान् ।
शातकौम्भेन महता तालरूपेण केतुना । रराज रथमध्यस्थो मेरुस्थ इव भास्करः ।
रथपटुरतिवीर्य्यसत्त्वबुद्धिः सुरसमराभिमुखः प्रयाति तूर्णं । असुरगणसमावृतः कुजम्भस्त्रिदशगणैरिव वृत्रहाऽमरेन्द्रः ।
असिलोमा च तत्रैव दानवः पर्व्वतायुधः । दारुणं वपुरास्थाय दारुणो दारुणाननः । १२०१३
रौद्रः शकटचक्राक्षो महाकायो महाबलः । कृष्णवासा महादंष्ट्रः किरीटी लोहिताननः ।
वृतो दैत्यसहस्रौघैर्गिरिपादपयोधिभिः । नानारूपधरैर्दीप्तैर्दैत्यैस्त्रिदशशत्रुभिः ।
ते शूलहस्ता गगने चरन्त इतस्ततस्तोयदभीमनादाः । खं छादयन्तस्तपनीयनिष्का यथोत्थिता प्रावृषि कालमेघाः ।
अनायुषायाः पुत्रस्तु वृत्रो नाम महासुरः । देवशत्रुर्महाकायस्ताम्रास्यो निम्नतोदरः ।
दीप्तजिह्वो हरिश्मश्रुरूर्द्ध्वरोमा महाबलः । नीलाङ्गो लोहितग्रीवः किरीटी लोहिताम्बरः । १२०१४
आजानुबाहुर्विकृतः श्वेतदंष्ट्रो विभीषणः । महामायाधरो भीमो हेमकेयूरभूषणः ।
महता मणिचित्रेण कवचेन सुसंवृतः । हेममालाधरो रौद्रश्चक्रकेतुरमर्षणः ।
किङ्किणीशतसंघुष्टं तपनीयपरिष्कृतं । युक्तं हयसहस्रेण रक्तध्वजपताकिना ।
रथानीकेन महता युद्धायाभिमुखो ययौ । दिव्यं स्यन्दनमास्थाय दैत्यानां नन्दिवर्द्धनः ।
तपितकनकविन्दुपिङ्गलाक्षो दितिवृषभोऽसुरसैन्ययुद्धनेता । विकसितकमलाभचारुवक्त्रः सितदशनः शुशुभे तदा रथस्थः । १२०१५
एकचक्रस्तु तत्रैव सूर्य्यचक्र इवोदितः । कालचक्रोपमो रौद्रश्चक्रायुध इवोद्यतः ।
सर्व्वायुधमयं दिव्यं रथमास्थाय भास्वरं । वृतो दैत्यगणैर्दृप्तैः कालायसशिलायुधैः ।
तथाशीतिसहस्राणि रथिनां चित्रयोधिनां । आयसैः काञ्चनैश्चैव सन्नद्धा वरवर्म्मिणः ।

व्यराजन्ताम्बरीचस्था नीला इव पयोधराः । सर्व्वे कालान्तकप्रख्या रुधिराक्ता महाबलाः ।
सन्दष्टौष्ठपुटा घोरा महाकाया महासुराः । वधाय सुरसैन्यस्य संनह्यन्त महाबलाः । ११०४०
सर्व्वे कालान्तकप्रख्या वीराः समरदुर्ज्जयाः । सागरोदरगम्भीरा नीलवर्णा दुरासदाः ।
नेदुर्यान्तोऽसुरवरा वेलातीता इवार्णवाः ।
ते भूरिमायाः सुविष्टब्धकायाः किरीटिनः काञ्चनभूषिताङ्गाः । ययुस्तदा स्वायुधदीप्तहस्ता नभः सपक्षा इव पर्व्वतेन्द्राः ।
संदिष्टो बलिपुत्रेण वृत्रभ्राता बलोऽसुरः । वधाय सुरसैन्यस्य संनह्यतेति वीर्य्यवान् ।
हेममाली महादंष्ट्रः स्रग्वी रुचिरकुण्डलः । रक्तमाल्याम्बरधरस्तद्वत् समरदुर्ज्जयः । ११०४५
सुमहावृत्तनयनः सकिरीटो धनुर्द्धरः । प्रभिन्न इव मातङ्गः शार्दूलसमविक्रमः ।
महातालनिभश्चापं महारुचिरसायकं । विस्फारयन्महावेगं वज्रनिष्पेषनिस्वनं ।
रथेन खरयुक्तेन ध्वजेन भुजगेन च । शुशुभे स्यन्दनस्थः स सन्ध्यागत इवांशुमान् ।
रथैस्तु बहुसाहस्रैर्हेमपट्टविभूषितैः । शूलमुद्गरसंकीर्णैस्तोयपूर्णैरिवाम्बुदैः ।
स दैत्येन्द्रोऽभिचक्राम युद्धकाल उपस्थिते । ११०५०
पवनसमगतिर्विशालवक्षा विकसितपङ्कजचारुगर्भगौरः । प्रवररथगतो ययौ स तूर्णं त्रिदशगणैरभिलक्षितप्रभावः ।
सिंहिकातनयश्चैव राहुर्नाम महासुरः । विकटः पर्व्वताकारः शतशीर्षः शतोदरः ।
पीतमाल्याम्बरधरो जाम्बूनदविभूषितः । स्निग्धवैदूर्य्यसङ्काशः पद्मपत्रनिभेक्षणः ।
सर्व्वकाञ्चनसंयुक्तं मणिजालपरिष्कृतं । पताकाशतसम्बाधं युक्तं परमवाजिभिः ।
आरुरोह रथं तूर्णं दैत्यः परमवीर्य्यवान् । ननाद च महाघोरं कम्पयन् वसुधातलं । ११०५५
मयेन विहितो दिव्यस्तस्य केतुर्हिरण्मयः । मयूरपक्षसङ्काशं कवचञ्चायसं महत् ।
भीमवेगरवैस्तान्यैरथैर्दिव्यैः सुभास्वरैः । नानाप्रहरणाकीर्णैः सेव्यमानो महाबलः ।
अमरगणपतिर्गजेन्द्रगामी गतिरभवत् सुगतिर्महासुराणां । अरिगणमभितो विभुः प्रयातो गिरिवरमस्तमिवांशुमान् सुदीप्तः ।
विप्रचित्तिस्तु तत्रैव दनोर्वंशविवर्द्धनः । कश्यपस्यात्मजः श्रीमान् ब्रह्मणस्तेजसा समः ।
यष्टा क्रतुसहस्राणां वेदविस्तपसाऽन्वितः । स्वयम्भुवा दत्तवरो वरदश्च स्वयं प्रभुः । ११०६०
ईशित्वञ्च वशित्वञ्च महत्त्वञ्च महाद्युतिः । ऐश्वर्य्यगुणसम्पन्नो ब्रह्मेव स्वयमूर्ज्जितः ।
सार्द्धं पुत्त्रैश्च पौत्रैश्च समन्तान्महाबलः । सर्व्वे मायाधराः शूराः कृतास्त्रा रणदुर्ज्जयाः ।
सर्व्वे कमलगर्भाभा मेरुशृङ्गोच्छ्रयोच्छ्रिताः । सर्व्वे रजतसङ्काशाः कैलासशिखरोपमाः ।
मयेन निर्म्मिताश्चैव रथाः पररथारुजः । विचरन्तो व्यराजन्त शारदा इव तोयदाः ।
सर्व्वे हंसध्वजाः श्वेताः श्वेतदण्डसमुच्छ्रयाः । श्वेताम्बरधरा दैत्याः श्वेतमाल्यविभूषिताः । ११०६५
श्वेतातपत्राः सर्व्वे वै श्वेतकुण्डलमण्डिताः । मुक्ताहाराहतोरस्का भान्ति नाकेश्वरा इव ।
महापर्व्वतनिभाकाराः प्रभूणां लोमहर्षणाः । रक्तचित्राम्बरधराश्चित्राभरणभूषिताः ।

त्रैलोक्यविजयं नाम रथमास्थाय वीर्य्यवान् । कैलासशिखराकारमष्टनल्वायतान्तरं ।
युक्तं वाजिसहस्रेण सितेन शशिवर्चसा । पताकाशतसङ्कीर्णं नानायुधसमन्वितं ।
हंसेन्दुकुन्दप्रतिमं विशालं श्वेतातपत्रं दनुजेश्वरस्य । विभाति तस्योपरि धार्य्यमाणं श्वेताद्रिमूर्द्धीव गतः शशाङ्कः । १२०७०
केशी दानवमुख्यस्तु दीप्ततास्रविलोचनः । नीलमेघचयप्रख्यः कालः परुषविग्रहः ।
महापर्वतनिभाकारः शत्रूणां लोमहर्षणः । चित्रमाल्याम्बरधरो रत्नाभरणभूषितः ।
शताक्षः शतबाहुश्च हरिश्मश्रुर्महाबलः । शङ्कुकर्णो महानादो वपुषा घोरदर्शनः ।
संयुक्तैर्दिव्यमहिषैर्घण्टाकोटिकृतस्वनं । महाबाण्डिगाकारमास्थाय रथमुत्तमं ।
ध्वजेनाग्र्येण महता नीलकेशरवर्चसा । नानारागविचित्राभिः पताकाभिर्विभूषितं । १२०७५
दशपञ्चाशत्सहस्राणि रथानामुग्रतेजसां । ययुस्तस्यासुरेन्द्रस्य प्रयातस्य सुरान् प्रति ।
भान्ति भिन्नाञ्जननिभाः प्रयातस्य महात्मनः । दंष्ट्राङ्कुचन्द्रवदनाः सबलाका इवाम्बुदाः ।
तत्तस्य वैदूर्य्यसुवर्णचित्रं विद्युत्प्रभं भास्करसन्निकाशं । किरीटमाभात्यसुरेश्वरस्य दावाग्निदीप्तं शिखरं यथाऽद्रेः ।
वृषपर्व्वाऽसुरश्चैव श्रीमान् सुरनिसूदनः । आरुरोह रथं दीप्तं मेरुशृङ्गमिवांशुमान् ।
प्रतप्तजाम्बूनदचित्रकूबरं महारथं भारसहं महार्हं । स्वलङ्कृतं राजतनेमिमण्डलं गभस्तिनद्धं तडित्प्रकाशं । १२०८०
केयूरमुक्ताङ्गदनद्धबाहुः सहस्रतारेण च वर्म्मणा सः । सांग्रामिकैराभरणैश्च चित्रैर्मध्याह्नसूर्य्यप्रतिमो बभूव ।
महाबलो बद्धतलाङ्गुलित्रो बलोत्कटः किंशुकलोहिताक्षः । विकृष्य चामीकरचारुचित्रं चापं स्थितो वृत्तविशालनेत्रः ।
महासुरेन्द्रस्तु महासुरैर्वृतो बलिस्तदा स्यन्दनमारुरोह । वैदूर्य्यहेमोपचितं विशालं विद्युत्प्रभं षोडशनल्वमात्रं ।
युक्तं सहस्रेण दितेः सुतानां गजाननानां विकृताकृतीनां । चामीकरोरश्छदभूषितानां विनर्द्दतां प्रावृडिवाम्बुदानां ।
महारथं देवरथप्रकाशं सहस्रमायेन मयेन सृष्टं । ईहामृगाकीर्णितभक्तिचित्रं दिव्यं रथं वीररथानुयातं । १२०८५
सकिङ्किणीकां विमलां सुचित्रां हिरण्मयैः पद्मशतैरलङ्कृतां । अभ्याददे वैजयिकीं जयाय स्रजं बलिर्हेमविचित्रपुष्पां ।
आमुच्य मालां प्रभया विचित्रां बलिस्तदा भाति भुजैर्विशालैः । रराज तैः सर्व्वसमृद्धियुक्तैर्महार्चिषा सूर्य्य इवाम्बरस्थः ।
स्रजं तदा बध्यति चारुशुभ्रां सर्व्वासुराणामिव हारभूतां । वैरोचनिः सर्व्वश्रियाऽभिजुष्टो विभ्राजतेऽसौ शरदीव चन्द्रः ।
मेरोस्तटैः काञ्चनरागरक्तैरादित्यसंसक्तमिवाभ्रजालं । प्रासाश्च पाशाश्च हिरण्मद्धाश्चर्म्माणि खड्गाश्च परश्वधाश्च ।
धनूंषि चेन्द्रायुधसप्रभाणि दिव्या गदा वज्रमुखाश्च शक्त्यः । दिव्याश्च शूला त्रिशिखाश्च दीप्ता नाराचपूर्णा विविधाश्च
तूणाः । १२०९०
धृता रथे दैत्यवृषस्य तस्य चकाशिरे प्रज्वलिता यथोल्काः । तस्यामरापीडधराः सुदंष्ट्राः सुवर्णमुक्तामणिहेमचित्राः ।
वीजन्ति बालव्यजनैर्विनीताः स्वलङ्कृताः स्यन्दनवेदिकास्थाः । अयःशिरा वाजिशिरा दुरापः शिशिर्महतेजा विकचः
शताक्षः ।
जयो निकुम्भः कुपथश्च दानवा ररक्षुरेते दश दानवाधिपं । पुरःसराश्चैव सहस्रशोऽसुराः पदातयो दानवराजरक्षिणः ।
शतघ्निचक्राशनिशक्तिपाणयः संजग्मुरेतेऽनिलतुल्यवेगिनः । घण्टाः समग्राश्च पनीयनद्धाः साडम्बरा झर्झरडिण्डिमाश्च ।
महास्वना दुन्दुभयश्च नेदुः प्रयाणकाले दितिजेश्वरस्य । तस्योच्छ्रितः काञ्चनवेदिकाढ्यो हिरण्मयो दिव्यमहापताकः । १२०९५

महाध्वजो वै तपनीयनद्धो रराज वीरस्य यथा विवस्वान् । समुच्छ्रितं काञ्चनमातपत्रं स्रक् काञ्चनी वक्षसि चास्य भाति ।
समन्ततश्चैनमुपाचरन्ति दैत्यर्षयः प्राञ्जलयो जपन्तः । पुरोहिताः शत्रुवधे समाहितास्तथैव चान्ये श्रुतशीलवृद्धाः ।
जेपुश्च मन्त्रांश्च महौषधीभिर्वीराशिषः स्वस्त्ययनं प्रचक्रुः । स तत्र वस्त्राणि शुभांश्च गा वै ग्रामांश्च रत्नानि तथैव निष्कान् ।
बलिर्द्विजेभ्यः प्रयतः प्रयच्छन् विराजतेऽतीव यथा धनेशः । सहस्रसूर्य्यो बहुकिङ्किणीकः परार्द्ध्यजाम्बूनदहेमचित्रः ।
सहस्रचन्द्रोऽप्युततारकश्च रथो बलेरग्निरिवाविभाति । तमास्थितो दानवसंघटबोते महाबलः कार्मुकष्टक्सनाणः । १२१००
उदर्त्तयिष्यंस्त्रिदशेन्द्रसेनामतीव रौद्रं स बिभर्त्ति रूपं । स वेगवान् वीररथौघसंकुलः प्रयाति देवान् प्रति दैत्यसागरः ।
महानिलोद्धूततरङ्गसङ्कुलो यथाऽर्णवो लोकविनाशनाय । त्रैलोक्यविनाशकरैर्वपुर्भिस्तान्यपतो भान्ति बलेरथस्य ।
महाबलान्युच्छ्रितकार्मुकाणि सपर्व्वतानीव वनानि राजन् ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने दैत्यसन्नहने द्वाचत्वारिंशदधिकद्विशततोऽध्यायः ॥ २४२ ॥

॥ वैशम्पायन उवाच ॥ श्रुतस्ते दैत्यसैन्यस्य विस्तरो जनमेजय । भूयस्त्रिदशसैन्यस्य शृणु विस्तरमादितः ।
सुराधिपस्तु भगवानाज्ञापयदथो सुरान् । मरुद्गणांस्तथादित्यान् विश्वान् साध्यांश्च वासवः । १२१०५
वसूनष्टौ भृशं सर्व्वान् यक्षरक्षोमहोरगान् । विद्याधरगणान् सर्व्वान् गन्धर्व्वांश्च महारथान् ।
महार्णवांश्च शैलांश्च तथा रुद्रान्महौजसः । यमवैश्रवणौ चोभौ वरुणञ्च जलाधिपं ।
ये च सिद्धा महात्मानः पितरश्च मनस्विनः । राजर्षयश्च शतशो योगसिद्धास्तथैव च ।
त्रिदशाज्ञापकः शक्र आज्ञापयति वीर्य्यवान् । भवन्तो दैत्यनाशाय संनह्यन्तामिति प्रभुः ।
शक्रस्य वचनं श्रुत्वा ततः सर्व्वे दिवौकसः । सन्नह्यन्त महात्मानः शक्रस्य समविक्रमाः । १२११०
नानाकवचिनः सर्व्वे विचित्रकवचध्वजाः । नानायुधोद्यतकरा मत्ता इव महागजाः ।
केचिदारुरुहुर्व्योमान् केचिदारुरुहुर्गजान् । रथानारुरुहुः केचित् केचिदारुरुहुर्हयान् ।
हरिभिश्चुर्हरिभिर्वेगो द्विरदैरावतध्वजं । रथं हरिहयैर्युक्तं स प्रायात् समरं प्रति ।
आदित्यवर्णं विपुलं सुनाभं स्वयम्भुवा निर्म्मितमीश्वरार्थं । जालैश्च जाम्बूनदभक्तिचित्रैरलङ्कृतं काञ्चनदामभिश्च ।
सकूवरोपस्करबन्धुरेषं विद्युत्प्रभाभिः शतमाभितायं । कैलासशृङ्गोपममिन्द्रयानं सुचारुचारु प्रतिचक्रचक्रं । १२११५
ताराशतैः खचितं ज्वलद्भिर्हैर्वार्हेमाञ्चार्चितसर्व्वदेहं । समुच्छ्रितजाम्बूनदमध्यायां जाज्वल्यमानं वपुषोत्तमेन ।
आस्थाय तं भासुरमाशुवेगं शचीपतिर्लोकपतिः सुरेशः । वज्रस्य भर्त्ता भुवनस्य गोप्ता ययौ महात्मा भगवान्महेन्द्रः ।
आमुच्य वर्म्माथ सहस्रतारं कृताशनादित्यसमप्रभावं । सूर्य्यप्रभञ्चामुमुचे किरीटं मालाञ्च जाम्बूनदवैजयन्तीं ।
त्वष्ट्रा कृतं भास्कररश्मिदीप्तं सुतीक्ष्णघोरामलनैकधारं । महासुराणां रुधिराशमुग्रं प्रगृह्य वज्रं शतपर्व्वभीमं ।
महाशनी द्वे च महाघनाभे दीप्तामसोघाश्च स शक्तिमुग्रां । चक्रं तथैन्द्रं सुमहच्च चापं प्रगृह्य शक्रः प्रययौ रणाय । १२१२०
सहस्रद्युम्भूतपतिः सनातनः सनातनानामपि यः सनातनः । खड्गञ्च देवाधिपतिर्महात्मा वेधाश्रमादाय च चर्म्म चित्रं ।
क्षीरोदविक्षोभसमुत्थितानि पुराऽमृतादुत्तमभूषणानि । देवासुराणां श्रमनिर्म्मितानि सोमार्कनक्षत्रतडित्प्रभाणि ।
रत्नान्यदित्या मणिकुण्डलानि युद्धे प्रयातस्य सुरेश्वरस्य । तैर्भूषितो याति सरक्तचक्षुरुद्योतयन् वै विदिशो दिशश्च ।
हरिः प्रभुर्नैकसहस्रचित्रो विभाति युद्धाभिमुखः सुरेन्द्रः । यथा सितं शारदमभ्रवृन्दं नभस्तलं खगसहस्रचित्रं ।

स्तुवन्ति यान्तं विपुलैर्वचोभिर्जयाशिषा चार्च्चितसत्त्ववीर्य्यं । ऋचिर्वसिष्ठो जमदग्निरौर्व्वो बृहस्पतिर्नारदपर्व्वतौ च ॥१११२५
समन्वयुर्देवगणा महेन्द्रं प्रयान्तमादित्यसमप्रभावं । विश्वे च देवा मरुतश्च सर्व्वे साध्यास्तथादित्यगणाश्च सर्व्वे ।
ते देवराजस्य पुरन्दरस्य हयाश्च ते मातलिसंप्रहीताः । प्रयान्ति देवेश्वरमुद्वहन्तो नभस्तलं पक्षिरिवाविपन्नाः ।
महर्षयश्चैव सुरर्षयश्च राजर्षयश्चाप्यथ पुण्यलोकाः । सर्व्वेऽनुजग्मुः सहसा ज्वलन्तं तेजोऽन्वितं शक्रमभिप्रयान्तं ।
प्रगृह्य शूलानि परश्वधांश्च दीप्तानि चापानि तथाऽसनींश्च । वर्म्माणि चामुच्य हिरण्मयानि प्रयान्ति सूर्य्याग्निसमप्रभाणि ।
तथा कुबेरोऽश्वसहस्रयुक्तं श्रेष्ठं रथं सर्व्वसहं महार्हं । दिव्यं समारुह्य रणाय यातो धनेश्वरो दीप्तगदाग्रहस्तः । १११३०
निशाचराः पावकधूम्रकाया रक्षोवृषा रुद्रसखस्य तस्य । विशालनानायुधदीप्तहस्ता यान्त्यग्रतो वैश्रवणस्य राज्ञः ।
ते लोहिताक्षाः परिपार्श्वे देवं व्रजन्ति भिन्नाञ्जनचूर्णवर्णाः । यक्षोत्तमा यक्षपतिं धनेशं रक्षन्ति वै प्रासगदासिहस्ताः ।
पुण्यः प्रभुः प्राणपतिर्यतात्मा वैवस्वतो धर्म्मभृतामवरिष्ठः । तडिद्गणाभं शतवाजियुक्तं रथं समारोहत सूर्य्यकल्पं ।
तं लोकपालं पितरोऽनुजग्मुर्निर्निक्तपापा ज्वलितास्तपोभिः । सर्व्वे च भूता भुवनप्रधाना नानायुधव्यग्रकराः सुभीमाः ।
दण्डं महास्त्रं प्रतिगृह्य देवो लोकाङ्कुशं विप्रहनिश्चिताग्रं । हिरण्मयानां कमलोत्पलानां मालां मनोज्ञामवसज्य कण्ठे ।१११३५
स्थितोऽर्च्चिमेदामिषलोहिताक्षः सर्व्वासुराणां निधनं विकाङ्क्षन् । तेजोमयं मुद्गरमुग्ररूपं विकर्षमाणोऽरुणधूम्रनेत्रः ।
समन्वितो व्याधिगणैरनेकैर्ययौ हरिश्मश्रुरुदारसत्त्वः । महासुराणां निधनाय बुद्धिं चक्रे तथा व्याधिपतिः कृतान्तः ।
ततस्त्रिशीर्षैर्भुजगैर्द्दृढाङ्गैर्युक्तं रथं हेमचितं महात्मा । आस्थाय कुन्देन्दुनिभं जलेशो ययौ रणायासुरदर्पहन्ता ।
वैदूर्य्यमुक्तामणिभूषिताङ्गस्तेजोमयः पाशगृहीतहस्तः । महासुराणां निधनाय देवः प्रयाति रूप्याङ्गदनद्धबाहुः ।
अन्वीयमानो जलदेवताभिर्निषेव्यमाणो जलजैश्च सत्त्वैः । संस्तूयमानश्च महर्षिवृन्दैः संपूज्यमानश्च महाभुजङ्गैः । १११४०
कैलासशृङ्गप्रतिमोऽप्रमेयः समुद्रनाथोऽमृतपो महात्मा । महोरगैः श्वेतनयैश्च गुप्तो ययौ रथेनार्कसमप्रभेण ।
युद्धाय तं यान्तमदीनसत्त्वं नभस्तले चन्द्रमिवातिकान्तं । पश्यन्ति भूतानि महानुभावं संहृष्टरोमाणि कृताञ्जलीनि ।
धाताऽर्य्यमांऽशोऽथ भगो विवस्वान् पर्ज्जन्यमित्रौ च शशी च देवः । त्वष्टा तथैवोर्ज्जितविश्वकर्म्मा पूषा च साक्षा
देवराजः ।
सारस्वदैः सध्वजकिङ्किणीकैर्वैदूर्य्यनिष्काञ्चितहेमकण्ठैः । हयोत्तमैः शक्रहयप्रकाशैर्युक्तान् यानानारुरुहुः सुरास्ते ।
दिवाकराकारनिभानि केचिद्धुताशनार्च्चिःप्रतिमानि केचित् । निशाकरांशुप्रतिमानि केचित्तडिद्गुणोद्योतनिभानि
केचित् । १११४५
नीलांशुमेघप्रतिमानि केचित् कार्ष्णायसाकारनिभानि केचित् । वर्म्माणि दिव्यानि महाप्रभाणि त्वष्ट्रा कृतान्युत्तमभानुमन्ति ।
आमुच्य मालाश्च सुवर्णपद्माः प्रयान्ति तोयानिलतुल्यवेगाः । द्वावश्विनौ चापि महानुभावौ रूपोत्तमौ धर्म्मभृतां वरिष्ठौ ।
रथं समारुह्य सुवर्णचित्रं रणं गतौ काञ्चनगौरवर्णौ । सर्व्वाः सुता वै वसवश्च सर्व्वे बलोत्कटा दैत्यवधाय देवाः ।
रथांश्च नागांश्च महाप्रमाणानास्थाय जग्मुः सुशितासिहस्ताः । रुद्राश्च सर्व्वेऽरुणधूम्रकायाः श्वेतैर्ययुर्गोपतिभिर्द्दृढाङ्गैः ।
महौजसः सत्त्वगुणोपपन्ना दीप्तात्मतेजोभिरभिज्वलन्तः । नानायुधव्यग्रकराः सुरास्ते लोकान् समस्तानिव निर्द्दहन्तः । १११५०
ययुः ससैन्यास्तपनीयकण्ठाः सविद्युतस्तोयधरा यथैव । विश्वे च देवास्तपसा ज्वलन्तो वीर्य्योत्तमाः सूर्य्यमरीचिवर्णाः ।
ययुः ससैन्या युधि दुर्निवार्य्या बलोत्कटाः पुष्करमालिनश्च । रथैः सुयुक्तैस्तपनीयवर्णैर्वैदूर्य्यमुक्तामणिदामचित्रैः ।

नानायुधाकारसमाकुलास्ते पारिप्लवैश्चैव वितानपत्रैः। तेजोमयैः काञ्चनजालचित्रैः युतिर्महद्भिः पावकवन्निभैस्तैः।
उरश्छदैः सध्वजकिङ्किणीकैर्हयैश्च वायोः समवेगवद्भिः। दिग्नागकेन्द्रैश्च महाबलैस्तैः कैलासशृङ्गप्रतिमैर्व्वहद्भिः।
प्रजग्मुरुग्रायुधदीप्तहस्तास्ततुर्युगान्ते ज्वलिता इवोल्काः। साध्याश्च देवाः सुमहाप्रभावाः स्वाधीनचक्राः प्रतिदीप्तवक्त्राः॥१११०५
ययुः सजाम्बूनदभूषिताङ्गा गङ्गौघसाम्यैर्गगनैर्विमानैः। विद्योतयन्तो विदिशो दिशश्च महाबलास्ते जयतां वरिष्ठाः।
वरिष्ठपृष्ठाष्टभुजाः सुदृप्ता वैश्वानरार्कप्रतिमप्रभावाः। ते ब्रह्मविद्भिश्च नमस्यमानाः संपूज्यमानाश्च सुरैः सशक्रैः।
गन्धर्व्वसंघैरनुगम्यमाना वधाय तेषाममुराधिपानां। वैदूर्य्यरत्नस्फटिकाग्रचित्रैश्छत्रैः सुवर्णैश्च परिष्कृतानां।
रूपं बभूवोत्कटभूषणानां दैत्येन्द्रनाशाय विभूषितानां। आत्मप्रभाभिश्च बलोत्कटाभिर्व्वर्णप्रभाभिश्च तमोनुदाभिः।
ध्वजोत्तमाभिः स्वशरीरभाभिर्महाप्रभाभिश्च महोज्ज्वलाभिः। विभान्ति ते देववराः ससाध्याः प्रभातशार्दूलनर्सिंह
नादाः। ११११०
महारथस्थास्तु दिवौकसस्ते महाबलाः शत्रुबलं प्रयान्ति। महास्त्रहस्ता ययुरुग्ररूपा महासुराणां निधनाय देवाः।
तथैव सर्व्वे मरुतोऽतिवीर्य्या बलोत्कटास्ते समरं प्रतीताः। ययुर्महामेघसमानवर्णा बह्वायुधास्तोयदनादनादाः।
महेन्द्रकेतुप्रतिमा महाबला गदां प्रगृह्यासुरसूदनां युधि। रणोत्कटा लोहितचन्दनाक्ताः सुगन्धिमाल्याम्बरभूषिताङ्गाः।
ते युद्धशौण्डाः सुभुजाः सुदीप्ता वीर्य्योत्कटाः क्रोधविलोहिताक्षाः। ययुः सजाम्बूनदपद्ममाला यथेष्टनानायुधकामरूपाः।
खड्गप्रभाश्यामलितांसपीठाः पुरन्दरं वै परिवार्य्य देवाः। वैदूर्य्यचामीकरचारुचित्राण्याबध्य गात्रेषु महाप्रभाणि। ११११५
वर्म्माणि दैत्यास्त्रनिवारणानि प्रयान्ति युद्धाय सपत्नसाहाः। तैरच्छ्रितैः काञ्चनवेदिकाढ्यैर्म्महारथध्वजैर्भास्कररश्मिवर्णैः।
यथौ सुराणां पृतनोग्रतेजाः समुन्नदन्तो युधि सिंहनादान्। इत्येतदुग्रं त्रिदशेश्वरस्य सैन्यं तदासीत् सुमहाप्रभावं।
युद्धं प्रयातस्य जयावहस्य वधाय तेषामसुराधिपानां।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने देवसन्नहने त्रिचत्वारिंशदधिकद्विशततोऽध्यायः॥ २४३ ॥
॥ वैशम्पायन उवाच॥ ततः प्रवृत्तोऽसुरदेवविग्रहस्तदाऽद्भुतो वै त्रिदशासुराकुलः। वेलामतिक्रम्य युगान्तकाले महार्णवानामिव सङ्गमो महान्।
नानायुधोद्योतविदीपिताङ्गा महाबला व्यायतकार्म्मुकास्ते। मदोत्कटा वारणमत्तहस्ताः सुदुर्ज्जयास्तोयदनादनादाः। १११२०
विस्फारयन्तः सहसा धनूंषि चक्राणि चादित्यसमप्रभाणि। समुत्क्षिपन्तो ह्यशनीश्च घोराः खड्गांश्च ते वज्रमुखांश्च शक्तीः।
महागदाः काञ्चनपट्टनद्धास्तथायसान् कार्म्मुकमुद्गरांश्च। शूलानि वृक्षांश्च विसृज्य दीप्तान्नदन्ति शूराः शतशो रणस्थाः।
एतस्मिन्नन्तरे तेषामन्योन्यमभिनिघ्नतां। द्वन्द्वयुद्धान्यवर्त्तन्त देवानां दानवैः सह।
मरुतां पञ्चमो यस्तु वाणं सोऽयुध्यतासुरं। महाबलः सुरवरः सावित्र इति यं विदुः।
अनायुषायाः पुत्रस्तु बलो नाम महासुरः। सोऽयुध्यत रणेऽत्युग्रो ध्रुवेण वसुना सह। १११२५
पुलोमा तु महादैत्यो बलिना वायुना सह। सधैर्य्यः पर्व्वताकारो रणेऽयुध्यत दर्प्पितः।
नमुचिश्चासुरश्रेष्ठो धरेण समयुध्यत। सार्द्धं सर्व्वेण सैन्येन व्यादितास्य इवान्तकः।
विश्वकर्म्मा सुरश्रेष्ठो मयेन समयुध्यत। प्रवरौ विश्वकर्म्माणौ ख्यातौ देवासुरेश्वरौ।
हयग्रीवश्च दितिजः सह पूष्णा व्ययुध्यत। शूरेणामितवीर्य्येण भास्कराकारतेजसा।

शम्बरस्तु महावीर्य्यो महामायो महासुरः। अनेनायुध्यत तदा वह्निना युद्धदुर्मदः। १२१८०
शरभः शलभश्चैव दैत्यानां चन्द्रभास्करौ। प्रयुद्धौ सह सोमेन शिशिरांशेन धीमता।
विरोचनस्तु बलवान् बलेर्बलवतः पिता। विश्वकर्म्मेण साध्येन तदाऽयुध्यत दानवः।
कुजम्भस्तु महातेजा हिरण्यकशिपोः सुतः। अंशेनायुध्यत सह साध्यवरेण वै।
अश्विलोमा तु बलिना मारुतेन महाहवे। तदाऽयुध्यत हीनाख्यो विहतः पर्व्वतायुधः।
अनायुषायाः पुत्रस्तु वृत्रो नाम महासुरः। अश्विभ्यां देववैद्याभ्यां सहायुध्यत संयुगे। १२१८५
एकचक्रस्तु दितिजस्त्वश्वग्रीवो दुरासदः। सहायुध्यत देवेन साध्येन दितिजारिणा।
बलस्तु मधुपिङ्गाक्षो वृत्रभ्राता महासुरः। मृगव्याधेन रुद्रेण सहायुध्यत वीर्य्यवान्।
राहुस्तु विकृताकारः शतशीर्षो महोदरः। अजैकपादेन रणे सहायुध्यत वीर्य्यवान्।
केशी तु दानवश्रेष्ठः प्रावृट्कालाम्बुदप्रभः। धनेश्वरेण महता सहायुध्यत संयुगे।
बलिना वृषपर्व्वा तु सह निकुम्भुना रणे। विश्वदेवेन देवेन सहायुध्यत वीर्य्यवान्। १२१९०
प्रह्लादस्तु महावीर्य्यो वीरैः स्वैस्तनयैर्वृतः। युयुधे सह कालेन रणे काल इव स्थितः।
अनुह्लादः कुबेरेण धनदेन महाबलः। गदाहस्तेन युयुधे क्षोभयन् देववाहिनीम्।
विप्रचित्तिस्तु दैत्येन्द्रो वरुणेन महात्मना। प्रवृत्तो वै रणं कर्त्तुं दैत्यानां नन्दिवर्द्धनः।
बलिस्तु सह शक्रेण सुरेशेन महात्मना। युयुधे देवराजेन बलिना बलवान् रणे।
शेषा देवाश्च दैत्याश्च जघ्नुरन्योन्यमाहवे। विनदन्तो महानादान् प्रासासिशरशक्तिभिः। १२१९५
अदृश्यन्त महोत्पाता ये प्रोक्ता जगतः क्षये। मरुतः सप्त ते क्षुब्धा व्यशीर्य्यन्त च पर्व्वताः।
सप्त चैवोत्थिताः सूर्य्याः शोषयन्तो महार्णवान्। वसुधाऽभिद्यत धरा मथ्यमानेव वायुना।
व्युत्थिताश्च महामेघाः शक्रचापाङ्कितोदराः। प्रणेदुः सर्व्वभूतानि सर्व्वाः सतिमिरा दिशः।
देवानामनयः क्रूरो दृश्यते कालनिर्म्मितः। घोरोत्पातः समुद्भूतो युगान्तसमये यथा।
न चान्तरीक्षं न दिशो न भूमिर्न भास्करोऽदृश्यत रेणुजालैः। ववुश्च वातास्तुमुलाः सधूमा दिशश्च सर्व्वास्तिमिरोपगूढाः। १२२००
एते चान्ये च बहवो दृश्यन्ते दैवनिर्म्मिताः। भूमौ तथाऽन्तरीक्षे च घोरोत्पाताः समन्ततः।
तद्युद्धं देवदैत्यानां भीमानां भीमदर्शनम्। अपश्यत मुहूर्त्तं स सर्व्वैरेव सुरैः सह।
वेदैश्चतुर्भिः साङ्गैश्च विद्याभिश्च सनातनः। पद्मयोनिर्वृतः श्रीमान् विद्वद्भिश्च परमर्षिभिः।
नानामणिस्तम्भसहस्रचित्रमारुह्य यानं ददृशे स्वयम्भूः। सुभास्वरं भूतसहस्रयुक्तं प्रदीप्यमाणं वपुषा परेण।
प्रतप्तजाम्बूनददामचित्रमानन्दभेरीशतसंप्रणादं। महच्च चन्द्रांशुभिरंशुमन्तं वैदूर्य्यसोमार्कविभूषिताङ्गं। १२२०५
तमात्मजो वै पुलहः पुलस्त्यस्तथा मरीचिर्भृगुरङ्गिराश्च। ऋक्सामभिः सम्यगभिष्टुवन्तः सेवन्ति देवं वरदं विमाने।
ते पावका देवगुरुं दिवीशं साङ्गाश्च वेदा मखदेवताश्च। सेवन्ति सेव्यं भुवनेश्वरेशं भूतानि चान्यानि महानुभावं।
एते च भूयश्च महर्षिमुख्या वैखानसाः पावकयोनयश्च। सर्व्वे यथार्हं वपुरीश्वरस्य धृतोत्सुकाः सर्व्वसुरासुराणां।

योगेश्वराः षट् च दिवाकराभा वाय्वग्निभूषितसर्व्वदेहाः । अन्तर्हिता वै हरयश्च वेत्रभक्ता नारायणश्चैव नरश्च देवः ।
वक्त्रैश्चतुर्भिर्दधरैश्चतुर्भिः संपूर्णचन्द्रप्रतिमैः सुकान्तैः । सर्व्वा दिशो निर्व्वितिमिराश्चकार नवोदितोऽसौ शरदीव चन्द्रः । ११२१०
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने देवासुरयुद्धे चतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४४ ॥

॥ वैशम्पायन उवाच ॥ उभयोः सेनयोराजन् भूयो युद्धमवर्त्तत । शङ्खानकनिनादेन त्रैलोक्यमिदमव्ययं ।
गोमुखाडम्बराणाञ्च भेरीणां मुरजैः सह । झर्झरीडिण्डिमानाञ्च व्यसृजन्त महास्वनाः ।
प्रवृत्तो युद्धयज्ञस्तु तुमुलो लोमहर्षणः । रणभूमौ महानादः स्वर्गीयः शूरसत्तमः ।
युद्धयज्ञस्य नेताऽभूत् प्रह्लादो नाम दानवः । विरोचनस्तथाऽध्वर्य्युर्युद्धयज्ञप्रवर्त्तकः ।
होता चैवात्र नमुचिर्हव्यस्त्वौपकल्पकः । मन्त्राश्च दैत्याः प्रथिता यज्ञकर्म्मणि तत्र वै । ११२१५
अनुयातास्तु पितरमधिका वा पराक्रमैः । यष्टा वै तत्र बाणस्तु सम्यगेवावतिष्ठते ।
ऐन्द्रं पाशुपतं ब्राह्मं स्थूणाकर्णं सुदुर्ज्जयं । मन्त्रास्तत्राभ्यवर्त्तन्त साध्वनुह्रादयोजिताः ।
उद्गाता च मयः श्रीमान् स्थितः शत्रुभयङ्करः । विनदन् दितिजश्रेष्ठो देवानीकान्यवारयत् ।
बलिस्तु बलवान्राजा वैश्वानरसमद्युतिः । अर्थेऽभिश्च संयुक्तो ब्रह्मत्वमकरोत् प्रभुः ।
रणाग्निर्ज्वलितो घोरो वैरेन्धनसमीरितः । हूयते त्वसुरैस्तत्र रथवेद्यां सुसंस्कृतः । ११२२०
शङ्खशब्दः सुविपुलो भेरीणाञ्च महास्वनः । उद्घुष्टं तुमुलश्चैव सुमहत्पुण्य प्रयुज्यते ।
बलश्च बलकश्चैव पुलोमा च महासुरः । प्रशस्तं चमसं कृत्वा सर्व्वं सम्यक् प्रचक्रिरे ।
कल्माषदण्डा विमला विपुला रथपङ्क्तयः । यूपाश्च समकल्पन्त युद्धयज्ञे महाफले ।
कर्णिनालीकनाराचवत्सदन्तोपबृंहकाः । तोमराः सोमकलशा विचित्राणि धनूंषि च ।
अस्थीन्यन्त्रकपालानि पुरोडाशाः शिरांसि च । आज्यञ्च रुधिरं रौद्रं तस्मिन् युद्धेऽभिहूयते । ११२२५
इध्माः परिघयस्तत्र प्रस्तारा विपुला गदाः । हयग्रीवोऽसिलोमा च राहुः केशी च दानवः ।
विरोचनश्च जम्भश्च कुजम्भश्च महाबलः । सदस्यास्तत्र तु मखे विप्रचित्तिस्तु वीर्य्यवान् ।
दृषवस्तु सुवस्तत्र रथाश्चमद्रुमाः शुभाः । धनुष्कोट्यो धनुर्ज्याश्च स्रुचस्तत्र महामखे ।
प्रतिप्रास्थानिकं कर्म्म वृषपर्व्वाऽकरोत्तदा । बलिस्तु दीक्षितस्तत्र तस्य पत्नी महाचमूः ।
शम्बरस्तत्र शामित्रमकरोद्दितिनन्दनः । अतिरात्रे महाबाहुर्वितते यज्ञकर्म्मणि । ११२३०
दक्षिणा तस्य यज्ञस्य कालनेमिः प्रतापवान् । वैताने कर्म्मणि तते यः ख्यातो हव्यवाडिव ।
त्रिदशामान्तु सैन्यस्य शरीरैर्गतजीवितैः । तस्मिन् यज्ञे तु सवनं वर्द्धते दैत्यनिर्म्मितं ।
देवानां रुधिरं संख्ये पपुरुग्राः दितेः सुताः । नर्द्दमानाः प्रमुदिताः सोमपानं रणाध्वरे ।
यदा बलिर्महादैत्यो विजेता समरे सुरान् । तदा त्ववभृथो यज्ञे भविता वै न संशयः ।
महासुरेन्द्रपतयो यज्वानो भूरिदक्षिणाः । वेदवन्तो यशस्वन्तः शूराः सर्व्वे तनुत्यजः । ११२३५
त्रैलोक्यहरणे सक्ता युद्धयज्ञाय दीक्षिताः । बद्धकृष्णाजिनाः सर्व्वे व्रतिनो मुञ्जधारिणः ।
एकनिश्चयकार्य्याश्च त्रैलोक्यजयकाङ्क्षिणः । सुरदानवसैन्यानां शब्दः समभवन्महान् ।

नानायुधधरहस्तानां त्वरितानां प्रधावतां । क्ष्वेडितोत्क्रुष्टनिनदैर्गजबृंहितनिस्वनैः ।
शङ्खदुन्दुभिनिर्घोषैर्हयहेषितनिस्वनैः । रथनेमिस्वनैर्घोरैस्तुमुलः सर्व्वतोऽभवत् ।
हयानां हेषमाणानां दानवानाञ्च गर्ज्जतां । क्ष्वेडितोत्क्रुष्टसंनादैः पाथिपा इव वेलया । १२२४०
दानवानां परेषाञ्च शस्त्रवर्षि महान्ति च । समरे भीमकर्म्माणि सैन्यानि प्रचकाशिरे ।
ततो नागा रथाश्चैव जाम्बूनदविभूषिताः । भ्राजमाना व्यदृश्यन्त मेघा इव सविद्युतः ।
ऋष्टिशक्तिगदा दीप्ताः शूलखड्गपरश्वधाः । चारु बभ्राजिरे तत्र सेनयोरेषु सर्व्वशः ।
रथा बहुविधाकाराः शतशोऽथ सहस्रशः । हेमतुङ्गशिखरा ज्वलन्त इव पर्व्वताः ।
दानवानां सुराणाञ्च समालोक्य तु सैनिकाः । काञ्चनैः कवचैः सर्व्वे ज्वलिताग्निसमप्रभैः । १२२४५
सन्नद्धाः समदृश्यन्त ज्योतींषि गगने यथा । उद्यतैरायुधैश्चित्रैस्तलबद्धाः पताकिनः ।
ऋषभाक्षा सुरगणास्तमूढुगता बभुः । नानावर्णाः पताकाश्च ध्वजमालाश्च संयुगे ।
युध्यतां रणशौण्डानामीरयामास मारुतः । ध्वजाञ्छत्राण्यवस्त्राणि वर्म्माणि कवचानि च ।
रश्मिभिर्भासयामास रश्मिवर्णानि रश्मिवान् । सर्व्वेषामप्रमेयाणां बलानां पाकशासिणां ।
रजः सञ्छादयामास पत्तीनाञ्चाम्बरं दिशः । दीप्ताम्बरधराः सर्व्वे दीप्ता युद्धाय संस्थिताः । २५०
प्रतितस्थुरिरेऽन्योन्यमनीकं प्रत्यनीकतः । गिरिकूटोच्छ्रयाः सर्व्वे तदा ते देवदानवाः ।
अन्योन्यमभिनिघ्नन्तो रणस्थाश्चित्रयोधिनः । मुद्गरैर्मुषलैः शूलैरयस्तुण्डैस्तथोलूखलैः ।
वज्रैरशनिभिश्चैव खड्गपट्टादिभिस्तथा । उद्यतैरायुधैश्चित्रैस्तलबद्धाः पताकिनः ।
वाणैः सुरुचिरैस्तीक्ष्णैः पत्रवाजैर्दुरासदैः । तथा प्रवर्त्तिते तेषां विमर्द्देऽद्भुतविक्रमे ।
सावित्रस्य बधं प्रेप्सुर्बाणो जग्राह कार्मुकं । शरजालेन दिव्येन छादयामास सुरोत्तमं । १२२५५
सन्त्वैक्षत इवार्च्चिष्मान् संप्रजज्वाल तेजसा । सागराभां महासेनां देवानां दैत्यपुङ्गवः ।
अशोषयत वाणौघैरर्कोऽशुभिरिवार्णवं । मारुतः स महावेगः सावित्रः शक्तिमुत्तमां ।
चिक्षेप बलिपुत्राय शक्रोऽशनिमिवाद्रये । आपतन्ती च सा शक्तिर्महोल्का ज्वलिता यथा ।
द्विधा च्छिन्ना क्षुरप्रेण वाणेनाद्भुतकर्म्मणा । हतायामथ शक्त्यान्तु सावित्रो देवसत्तमः ।
विश्वकर्म्मकृतं दिव्यं सुतीक्ष्णं दानवार्द्दनं । सुपीतधारं विपुलं विमलं चन्द्रवर्च्चसं । १२२६०
अष्टकाञ्चिचितं खड्गमाशीविषविषोपमं । तं गृहीत्वा रणमुखे प्रज्वलन्तं महाप्रभं ।
वाणाभ्याशे महातेजाः खड्गपाणिरवस्थितः । तत्र स्थितं समालक्ष्य सावित्रं बलिनन्दनः ।
लोहिताक्षो महाकायश्चिक्षेप च ननाद च । ततोऽर्ककिरणाकाराननलप्रतिमाञ्छरान् ।
सन्दधे चाशु बाणौघानाशीविषसमान् बली । रुक्मपुङ्खान् प्रदीप्ताग्रानुग्रवेगानलङ्कृतान् ।
आकर्णपूर्णांश्चिक्षेप शरानग्र्यान् समन्ततः । दृढचापप्रयुक्तास्ते शरा वैश्वानरप्रभाः । १२२६५
सावित्रं छादयामासुः कैलासमिव तोयदाः । स च्छाद्यमानः शस्त्रौघैर्बाणेन बलिसूनुना ।
पराङ्मुखः सुरवरः प्रयातः सरथध्वजः । तं पराजित्य सावित्रं बाणः परमदर्पितः ।

प्रगृह्य कार्म्मुकं घोरं मतः शक्ररथं प्रति। बलवान्पृथुरस्केन प्रगृह्य महतीं गदां।
ध्रुवाय वसवे मूर्ध्नि रौद्रीं चिक्षेप दानवः। तस्य निर्भिद्य तिलशो देहमच्छिद्य वर्म वै।
गदावेगेन भीमेन ध्रुवस्य समरे तदा। शेषास्तु वसवः सर्व्वे दिव्यास्त्रैर्घोरदर्शनाः। ११९७०
प्राच्छादयन्त दैत्यमादित्यमिव तोयदाः। ततः सोऽमर्षितो वायोर्भ्राता दानवसत्तमः।
अवातरद्रथात्तस्माद्गदामुद्यम्य वेगवान्। शिरःसु पातयामास प्रभूणां तां गदां तदा।
दिशः प्राद्रावयत्सर्व्वाञ्छिरस्त्रान् सा महागदा। रुद्राग्निरिवेन्द्रेण प्रयुक्ता सुमहात्मना।
तस्याः सविद्युद्घोषायास्तेन शब्देन वेजिताः। व्यद्रवन्त परित्रस्ता रथेभ्यो रथिनस्तदा।
तदुदीर्णं रथानीकं सूर्य्याभं मेघनिस्वनं। देवानां शरधाराभिरभ्यवर्षत्समन्ततः। ११९७५
क्षुरप्रैर्विशिखैर्भल्लैर्वत्सदन्तैः शिलीमुखैः। मुहुर्मुहुर्महातेजाः प्रत्यविध्यन्महासुरं।
बलकस्तु महाबाहुर्व्यादितास्य इवान्तकः। तडित्कार्मुकवृष्टिं वैश्वानरसमप्रभः।
पिबन्निव शरौघांस्तान् देवचापसमुत्थितान्। अभ्यद्रवत दैत्येन्द्रो महार्णव इवापरः।
अवस्फूर्ज्जन् दिशः सर्व्वाः स्वेन वीर्य्येण दानवः। आवर्जंस्त्रिदशान् देवान् विष्णुवेगो नगानिव।
अन्तर्द्धानरता देवा वायुर्दैत्यानिवौजसा। समयस्तु महेष्वासाव् वसुभ्यां समसज्जत। ११९८०
आपश्चैवानिलश्चैव ववर्षतुररिन्दमौ। शरवर्षाणि दीप्तानि मेघाविव पर्व्वतौ।
चिप्तांस्तान् विशिखान्दीप्तांश्चिच्छेद स नभस्तले। अस्त्रजालमपाकृत्य कर्म्म युद्धमभिद्रुते।
तौ समं शरवर्षाभ्यामन्योन्यमभिजघ्नतुः। उभावभिजनौ शूरौ देवदैत्यौ यशस्करौ।
तौ नखैरिव शार्दूलौ दन्तैरिव महाद्विपौ। रथशक्तिभिरन्योन्यं विशिखैश्चाप्यकृन्ततां।
निर्भिन्दन्तौ च गात्राणि विलिखन्तौ च सायकैः। शमयन्तौ च बलिनौ प्रतुदन्तौ रणे स्थितौ। ११९८५
चरन्तौ विविधान्मार्गान्मण्डलानि च भागशः। मुहुराजघ्नतुः क्रुद्धावन्योन्यमभिमानिनौ।
असिभ्यां चर्म्मणी दिव्ये विपुले च शरासने। निकृत्याऽचलसङ्काशौ बाहुयुद्धं प्रचक्रतुः।
व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ। बाहुभिः समसज्जेतामायसैः परिघैरिव।
तयोरासीद्भुजाघातनिनदः प्रयतस्तया। यथैव भीमः संह्रादो वज्रपर्व्वतयोरिव।
द्विपाविव विषाणाग्रैः शृङ्गैरिव महावृषौ। अन्योन्यमभिसंरब्धौ मुहूर्त्तं पर्य्यकर्षतां। ११९९०
ततः पराजितो देवो बलकेन तदा ध्रुवः। रथं त्यक्त्वा भयात्तस्य प्रनष्टः प्राद्रुतो वसुः।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामनप्रादुर्भावे देवासुरयुद्धे पञ्चचत्वारिंशदधिकद्विशततमोऽध्यायः॥२४५॥
॥ वैशम्पायन उवाच ॥ पुनरेव तु तत्रासीत्सम्प्रयुद्धं सुदारुणं। क्रुद्धस्य नमुचेश्चैव धरस्य च महात्मनः।
संरब्धौ च महाबाहू महेष्वासावरिन्दमौ। परस्परमुदीक्षेतां दहन्ताविव लोचनैः।
विस्फार्य्य च महच्चापं हेमपृष्ठं दुरासदं। संरम्भात् स वसुश्रेष्ठस्त्यक्त्वा प्राणानयुध्यत।
स सायकमयैर्ज्जालैर्धरो दैत्यरथं प्रति। भानुमद्भिः शिलाधौतैर्नतैः प्राच्छादयत् प्रभो। ११९९५
ततः प्रहस्य नमुचिर्धरस्य तु शिलाशितान्। अप्रमत्तः सायकान्दीप्तान् भीमवेगान्दुरासदान्।

महातेजा महाबाहुर्म्महावेगो महारथः । विव्याधातिरथो दैत्यो नवभिर्निशितैः शरैः ।
स तोत्त्रैरिव मातङ्गो वार्य्यमाणः पतत्त्रिभिः । अभ्यधावत संक्रुद्धो नमुचिं वसुसत्तमः ।
तमापतन्तं वेगेन नमुचीरभसाद्रणे । दैत्यः प्रत्यसरद्देवं मत्तो मत्तमिव द्विपं ।
ततः प्राध्मापयच्छङ्खं भेरीशतनिनादितं । विक्षोभ्य तद्बलं हर्षादुद्धूतार्णवसप्रभं । १२१००
अश्वानृष्यसवर्णांश्च हंसवर्णैः स वाजिभिः । निघ्नन् समरे दैत्यो वसुं प्राच्छादयच्छरैः ।
समाश्लिष्टौ तथाऽन्योन्यं वसुदानवयो रथौ । दृष्ट्वा प्राकम्पत मुक्तकेशानां महद्बलं ।
क्रोधसंरम्भरक्ताक्षौ प्रेक्षमाणौ परस्परं । गर्ज्जन्ताविव शार्दूलौ प्रभिन्नाविव वारणौ ।
यमराष्ट्रोपमं रौद्रमासीदायोधनं तयोः । नराश्वरथसम्बाधं मत्तवारणसंकुलं ।
समाजमिव तं दृष्ट्वा प्रेक्षमाणा महारथाः । आशंसन्तो जयं ताभ्यां योधास्ते गणशः स्थिताः । १२१०५
तयोः प्रैक्षन्त समरं सन्निकृष्टं महात्मनोः । सिद्धगन्धर्व्वमुनयो देवदानवयोस्तदा ।
तौ च्छादयन्तावन्योन्यं समरे निशितैः शरैः । शरजालावृतं व्योम चक्रतुश्च महाबलौ ।
तावन्योन्यं जिघांसन्तौ शरैस्तीक्ष्णैर्महारथौ । प्रेक्षणीयतरावास्तां वृष्टिमन्ताविवाम्बुदौ ।
सुवर्णविकृतान् बाणान् प्रमुञ्चन्तावरिन्दमौ । भास्कराभं तदाकाशमुल्काभिरिव चक्रतुः ।
तयोः शराः प्रकाशन्ते देवदानवयोस्तदा । पंक्तयः शरदि मत्तानां सारसानामिवाम्बरे । १२११०
छिन्नाश्वगजानां हि शरीरैर्गतजीवितैः । क्षणेन संवृता भूमिर्म्मेघैरिव नभस्तलं ।
ततः सुधारं ज्वलितं सूर्य्यमण्डलसन्निभं । धराय वसवे क्रुद्धं चक्रं नमुचिना रणे ।
पतता तेन चक्रेण धरस्य स्यन्दनोत्तमः । सध्वजः सायुधः साश्वो दग्धोऽर्ककिरणप्रभः ।
स त्यक्त्वा तं रथं देवः प्रदीप्तं चक्रतेजसा । भयात्तस्यासुरेन्द्रस्य गतः स्वं वसुसत्तमः ।
पराजित्यासुरो देवं नमुचिर्ब्बलगर्व्वितः । प्रयातः स्वेन सैन्येन भूयः सुरचमूं प्रति । १२११५
अथ त्वष्टा मयश्चैव देवदैत्यौ सुविश्रुतौ । प्रवरौ विश्वकर्म्माणौ मायाशतविशारदौ ।
तयोः प्राणहरस्यासीत् संप्रहारो महात्मनोः । अन्योन्यस्पर्द्धिनोस्तत्र चिरात्प्रभृति दीप्तयोः ।
त्वष्टा तु निशितैर्ब्बाणैर्दैत्यं तं बलगर्व्वितं । पराक्रान्तं पराक्रम्य विव्याध बहुभिः शरैः ।
मयस्तु प्रतिविव्याध त्वष्टारं निशितैः शरैः । महावेगैः प्रसन्नाग्रैः शातकुम्भविभूषितैः ।
ननाद दितिजश्रेष्ठं हत्वा त्वष्टा शरैर्म्मयं । संक्रुद्धो दैत्यसैन्यस्य विचिन्वन्निव जीवितं । १२१२०
शक्तिं कनकवैदूर्य्यचित्रदण्डां महाप्रभां । देवो गृहीत्वा समरे दैत्येन्द्रे प्रत्यवासृजत् ।
भीमां सर्व्वायसीं त्वष्टा पुरन्दर इवाशनिं । तां लघुभुजनिर्म्मुक्तामर्कवैश्वानरप्रभां ।
मयश्चिच्छेद तीक्ष्णाग्रैः शीघ्रं सप्तभिराशुगैः । ततः छिन्दन्निव प्राणांस्त्वष्टुः कोपान्महासुरः ।
प्रेषयामास संरब्धः शरान् बर्हिणवाससः । चिच्छेद बाणांस्त्वष्टा तान् ज्वलितैर्नतपर्व्वभिः ।
दैत्यस्य सुमहावेगैः सुवर्णविकृतैः शरैः । तौ वृषाविव नर्द्दन्तौ बलिनौ वाशितान्तरे । १२१२५
शार्दूलाविव चान्योन्यं प्रसक्तावभिजघ्नतुः । अन्योन्यं प्रतिविध्यन्तावन्योन्यस्यान्तरैषिणौ ।

अन्योन्यमभिवीक्षेतां क्रुद्धावाशीविषाविव । महागजाविवासाद्य विषाणाग्रैः परस्परं ।
शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः । ततः सुविपुलां दीप्तां मयो रुक्माङ्गदां गदां ।
त्वष्टरि प्राहिणोत् क्रुद्धः सर्व्वप्राणहरां रणे । तया जघानातिरथस्त्वष्टुरुत्तमवाजिनः ।
गदया दानवः क्रुद्धो वज्रेणेन्द्र इवाचलान् । अथ क्रुद्धो महादैत्यः क्षुराभ्यां तस्य संयुगे ।
पुनर्द्वाभ्यां शराभ्यान्तु निशिताभ्यां महारणे । ध्वजं त्वष्टुरथ च्छित्त्वा सूतं प्रेष्य यमक्षयं ।
महाकायान्महावेगान् सदश्वान् गदयाऽहनत् । दृष्ट्वा त्वष्टा तु समरे ध्वजं सूतञ्च पातितं ।
हताश्वस्तमुत्सृज्य रथं भूमौ व्यवस्थितः । विस्फार्य्य सुमहच्चापं युद्धाय कृतनिश्चयः ।
हताश्वस्तं विरथं कृत्वा रिपुमवस्थितः । जयश्रिया सेव्यमानो दीप्यमान इवानलः ।
मयः कालान्तकप्रख्यश्चापपाणिरदृश्यत । निर्द्दहन्देवसैन्यानि दावाग्निरिव काननं ।
त्वष्टुः सोऽक्षिपतात्युग्रो नाराचांस्तिग्मतेजसः । चतुर्द्दश शिलाधौतान् सायकान् विविधाकृतीन् ।
ते पपुस्तस्य देवस्य शोणितं रुक्मभूषणाः । आशीविषा इव क्रुद्धा भुजगाः कालचोदिताः ।
ते तु क्षितिं समासाद्य शोभन्ते स्मासृगुक्षिताः । अर्द्धप्रविष्टाः संरब्धा बिलानीव महोरगाः ।
तं प्रत्यविध्यत्त्वष्टा तु जाम्बूनदविभूषितैः । चतुर्द्दशभिरत्युग्रैर्नाराचैरभिदारयन् ।
ते तस्य दैत्यस्य भुजं सव्यं निर्भिद्य पत्रिणः । विदार्य्य प्राविशन् भूमिं भुजङ्गा इव वेगिताः ।
ते व्यकाशन्त नाराचाः प्रविशन्तो वसुन्धरां । अस्तं गच्छन्तमादित्यं प्रविशन्त इवांशवः ।
मयस्तु त्रिभिरत्युग्रैस्त्वष्टारन्तु पतत्रिभिः । अर्द्दयामास दैत्येन्द्रो ज्वलितैः शोणिताशनैः ।
त्वष्टाऽथ मयनिर्म्मुक्तैः सायकैरर्द्दितो भृशं । अपायाद्रथमुत्सृज्य व्रीडयाऽभिसमन्वितः ।
तं तत्र हतसूताश्वं भुजङ्गमिव निर्विषं । त्वष्टारं विरथं कृत्वा मुदितः स तु दानवः ।
विस्फारयन् सुरुचिरं चापं रुक्माङ्गदं दृढं । रणे व्यतिष्ठद्दैत्येन्द्रो ज्वलन्निव हुताशनः ।
पुलोमा तु बलश्लाघी दृप्तो दानवसत्तमः । रणे श्वेताश्वयुक्तेन रथेन प्रत्यदृश्यत ।
ततो वै सर्व्वभूतानां शरीरान्तरचारिणा । बलिना कालकल्पेन समायुध्यत वायुना ।
पुलोम्नस्तत्र पवनः श्रुत्वा ज्यातलनिस्वनं । नामृष्यत यथा मत्तो गजः प्रतिगजस्वनं ।
दैत्यचापच्युतैर्ब्बाणैः प्राच्छाद्यन्त दिशो दश । रश्मिजालैरिवार्कस्य विततं साम्बरं जगत् ।
स तान्समथनः क्रुद्धः श्वसन्निव महोरगः । बभौ दैत्यशरैर्व्वायू रश्मिवानिव भास्करः ।
दैत्यचापभुजोत्सृष्टाः शरा बर्हिणवाससः । रुक्मपुङ्खा व्यकाशन्त हंसाः श्रेणीकृता इव ।
चापध्वजपताकाभ्यश्छत्रादीषामुखाद्युगात् । प्रपतन्तः स्म दृश्यन्ते दैत्यस्यायतशः शराः ।
एवं सुतीक्ष्णान् खचराञ्ज्वलभानिव पावके । सुवर्णविकृतांश्चित्रान्मुमोच दितिजः शरान् ।
तमन्तकमिव क्रुद्धमापतन्तं स मारुतः । त्यक्ता प्राणान्तिकस्य विव्याध नवभिः शरैः ।
तस्य वेगमसंहार्य्यं दृष्ट्वा वायुः सनातनः । उत्तमं जवमास्थाय व्यधमत्सायकव्रजान् ।
ततो विधम्य बलवान् शरजालानि मारुतः । निर्व्याध दैत्यं विंशत्या विशिखैर्नतपर्व्वभिः ।

मरुद्गणानां प्रवरा इव दिव्या महौजसः । साधु साध्विति वेगेन सिंहनादं प्रचक्रिरे ।
तस्मिन् समुत्थिते शब्दे तुमुले लोमहर्षणे । अभ्यधावन्त दितिजाः पौलोमाः क्रोधमूर्च्छिताः ।
ततः प्रच्छादयामासुः पवनं शरवृष्टिभिः । पर्व्वतं वारिधाराभिः प्रावृषीव वलाहकाः ।
ते पीडयन्तः पवनं क्रुद्धाः सप्त महारथाः । प्रजासंहरणे घोराः सोमं सप्तग्रहा इव । १२२६०
ततो दक्षिणमक्षोभ्यं नानारत्नविभूषितं । करं करिकराकारमुद्यम्य युधि मारुतः ।
तेषां मूर्द्धसु दैत्यानां पातयामास वीर्य्यवान् । निहता वायुवेगेन तेन सप्त महारथाः ।
त्यक्त्वा प्राणान् पुलोमा तु विव्याध नवभिः शरैः । तस्यापि तमसंहार्य्यं दृष्ट्वा वायुः सनातनः ।
असम्भिन्नय शरौघांस्तान् ज्वलितान् वै पुलोमतः । तेषां विदार्य्य तेजांसि दानवानां महात्मनां ।
शोणितक्लिन्नमुकुटा गैरिकाक्ता इवाद्रयः । ते च्छिन्नमर्म्मास्थिभुजाः पतन्तो भान्ति दानवाः । १२२६५
मातङ्गयूथपा रुग्णाः पुष्पिता इव पादपाः । तेषां विदारितैर्देहैर्दानवानां महात्मनां ।
ततः प्रावर्त्तत नदी रौद्ररूपा भयावहा । प्रस्रवन्ती रणे रक्तं भीरूणां भयवर्द्धिनी ।
देवदैत्यगजाश्वानां रुधिरौघपरिस्रुता । रणभूमिरभूद्रौद्रा तत्र तत्र सहस्रशः ।
संवृता गतसत्त्वैश्च यत्तराक्षसखेचरैः । सानुषङ्गपताकैश्च पातितैश्च ध्वजै रथैः ।
शीर्णकुम्भैस्तथा नागैर्घण्टाभिः सुविभूषितैः । सुवर्णपुङ्खैर्ज्वलितैर्नाराचैस्तिग्मतेजितैः । १२२७०
देवदानवनिर्म्मुक्तैः सविषैरुरगैरिव । प्रासतोमरभल्लैश्च शक्तिखड्गपरश्वधैः ।
सुवर्णविकृतैश्चापैर्गदामुषलपट्टिशैः । कनकाङ्गदकेयूरैर्मुकुटैः कुण्डलैः शुभैः ।
तनुत्रैः सतलत्रैश्च हारैर्निष्कैश्च शोभनैः । हतैश्च दितिजैर्भिन्नैः शस्त्रस्यन्दनवर्ज्जितैः ।
पातितैरपविद्धैश्च प्रबभौ द्यौरिव ग्रहैः । निपातितध्वजरथो हतवाजिरथद्विपः ।
विमर्द्दो देवदैत्यानां सदृशः कर्म्मणा बभौ । अथ दैत्यसहस्रेण पौलोमेन महारथः । १२२७५
संवृतः पवनः श्रीमान् गदामुषलपाणिना । ते जघ्नुः शतसाहस्राः पवनं दानवोत्तमाः ।
तैर्बध्यमानस्स बभौ तोत्त्राहत इव द्विपः । हत्वाऽष्टौ तत्र दैत्यानां शतानि पवनः प्रभुः ।
कृत्वा मार्गं महाबाहुः प्रयातः स महारथः । अद्यापि च सुविस्तीर्णः पन्थाः संदृश्यते दिवि ।
नाम्ना वायुपथो नाम सिद्धाः पश्यन्ति तं सदा ।
॥ वैशम्पायन उवाच ॥ हयग्रीवस्तु दितिजः पूषाणमासाद्य वीर्य्यवान् । ननाद सुमहानादं सिंहवत्सुमहाबलः । १२२८०
विस्फार्य्य सुमहाचापं हेमजालविभूषितं । पूषणं दितिजोऽपश्यत् क्रुद्धो घोरेण चक्षुषा ।
भुजाभ्यामाददानस्य सन्दधानस्य सायकान् । मुञ्चतः कर्षतो वाऽपि ददृशे तत्र नान्तरं ।
अग्निचक्रोपमं दीप्तं मण्डलीकृतकार्म्मुकं । तत्रासीद्दानवेन्द्रस्य सव्यदक्षिणमस्यतः ।
रुक्मपुङ्खैस्ततस्तस्य चापमुक्तैः शितैः शरैः । प्राच्छाद्यन्त शिलाधौतैर्दिशः सूर्य्यस्य च प्रभाः ।
ततः काञ्चनपुङ्खानां शराणां नतपर्व्वणां । नभश्चराणां नभसि दृश्यन्ते बहवो व्रजाः । १२२८५
गिरिशृङ्गनिभाश्चापात्प्रभवन्तः शरोत्तमाः । श्रेणीकृताः प्रकाशन्ते यान्तः क्रौञ्चा इवाम्बरे ।

गार्द्धपत्रान् शिलाधौतान् कार्त्तस्वरविभूषितान् । प्रसन्नाग्रान्महावेगान्मुमोच दितिजः शरान् ।
ततश्चापबलोद्धूताः शातकुम्भविभूषिताः । देहे समवकीर्य्यन्त पूष्णः सुनिशिताः शराः ।
ते व्योम्नि रुक्मविकृताः संप्रकाशन्त सर्व्वशः । खद्योता इव सर्व्वान्ते खे चरन्तः सहस्रशः ।
शिलाधौताः प्रसन्नाग्राः पूषणं विव्यधुः शराः । दैत्यः प्रच्छादयामास पूषणं शरवृष्टिभिः ।
पर्व्वतं वारिधाराभिश्छादयन्निव तोयदः । ततस्तु पूष्णो देवस्य बलवीर्य्यपराक्रमं ।
व्यवसायञ्च सत्त्वञ्च ददृशुस्त्रिदशाऽद्भुतं । तां समुद्रादिवोद्भूतां शरवृष्टिं समुत्थितां ।
नाचिन्तयत्तदा पूषा दैत्यश्चाप्यद्रवद्रुषा । हेमपृष्ठं महानादं पूष्ण आसीन्महद्धनुः ।
विकृष्टं मण्डलीभूतं शक्रायुधमिवापरं । ततः शराः प्रादुरासन् पूरयन्त इवाम्बरं ।
सुवर्णपुङ्खाः पूष्णस्ते प्रभवन्तः शरासनात् । मालेव रुक्मपुङ्खानां वितता व्योम्नि पत्रिणां ।
प्रादुरासीन्महाघोरा वृहती पूषकार्मुकात् । ततो व्योम्नि विमुक्तानि शरजालानि सर्व्वशः ।
आहतानि व्यशीर्य्यन्त शरैः सन्नतपर्व्वभिः । ततः कनकपुङ्खानां शराणां कङ्कवाससां ।
पततां पात्यमानानां खमासीत् संवृतं भृशं । पूषा लच्छादयद्बाणैर्हयग्रीवं शिलाशितैः ।
नामाङ्कैरर्कसदृशैर्दिव्यैर्हेमपरिष्कृतैः । ततो व्यसृजदुग्राणि शरवर्षाणि दानवः ।
अमर्षी बलवान् क्रुद्धो दिधक्षन्निव पावकः । पूष्णस्त्वाजौ ध्वजञ्चैव पताकां धनुरेव च ।
रश्मीन् योक्त्राणि चाश्वानां हयग्रीवो रणेऽच्छिनत् । अथाश्वांश्चास्य पुनर्भित्त्वा चतुर्भिः सायकोत्तमैः ।
सारथिं सुमहातेजा रथोपस्थादपातयत् । कृतस्तु विरथः पूषा हयग्रीवेण संयुगे ।
समकम्पत भीतोऽसौ सिन्धोरिव महोर्म्मयः । गतः शक्रस्याभ्याशं मुक्तो मृत्युमुखादिव ।
तत्राद्भुतमिदं भूयो युद्धमासीत् सुदारुणं । कृतप्रतिकृतं घोरं शम्बरस्य भगस्य च ।
सप्तकिष्कुपरीणाहं द्वादशारत्निकार्म्मुकं । वासवाशनिनिर्घोषं दृढज्यं भारसाधनं ।
कर्षंस्तथाग्निसदृशान् व्यसृजत् सायकान् बहून् । क्रोधसंरक्तनयनः शम्बरः सर्व्वयोगवित् ।
तेन वित्रास्यमानानि देवसैन्यानि सर्व्वशः । समकम्पन्त भीतानि सिन्धोरिव महोर्म्मयः ।
तमापतन्तं संप्रेक्ष्य विरूपाक्षं विभीषणं । भगः प्रस्फुरमाणोष्ठस्त्वरमाणो न्यवारयत् ।
ततो भगो महेष्वासो दिव्यं विस्फारयन्धनुः । अवाकिरद्दिशः सर्व्वा ज्याविक्षेपेण नादयन् ।
तमभ्ययाद्भगो दैत्यं तूर्णमस्यन्तमन्तिकात् । मातङ्गमिव मातङ्गो दृप्यं प्रतिरूपो यथा ।
तौ प्रगृह्य महावेगौ धनुषी भारसाधने । प्रच्छादयेतामन्योन्यं तक्षमाणौ महेषुभिः ।
तयोः सुतुमुलं युद्धमासीद्घोरं महारणे । भगशम्बरयोर्भीममप्रमेयं महात्मनोः ।
अथ पूर्णायतोत्सृष्टैः शरैः सन्नतपर्व्वभिः । व्यदारयेतामन्योन्यं कांस्ये निर्भिद्य वर्म्मणी ।
तौ तु विक्षतसर्व्वाङ्गौ शोणितौघपरिप्लुतौ । संप्रेक्षमाणौ रथिनावुभौ परमदुर्म्मदौ ।
तक्षमाणौ शितैर्बाणैर्जीवितुमशक्नुतां । ततो विव्याध समरे त्वरमाणोऽसुरो भगं ।
नाराचैः क्रोधताम्राक्षः कालान्तकयमोपमः । गरुत्मानिव चाकाशे पोथयानो महोरगान् ।

नाराचा न्यपतन्देहे तूर्णं शम्बरचोदिताः । अप्राप्तानन्तरीक्षे तान् भगश्चिच्छेद पत्रिभिः ।
ज्वलितान् सुमहावेगान् दिवाकरसमप्रभान् । ततो भगं चतुःषष्ट्या विव्याधासुरसत्तमः ।
सायकानां सुतीक्ष्णानां सुमुखानां सुवेगिनां । तयोस्तु सुचिरं कालं युद्धं सममिवाभवत् ।
शम्बरस्य च मायाभिर्नादृश्यत ततोऽन्तरं । दोर्भ्यां विक्षिपतश्चापं रथं विष्टभ्य तिष्ठतः ।
श्रूयते धनुषः शब्दो विस्फूर्ज्जितमिवाशनेः । स भगस्य हयान् हत्वा छित्त्वा च ध्वजमाहवे ।
अभ्यवर्षच्छरैर्दैत्यः पर्ज्जन्य इव वृष्टिमान् । न तस्यासीदनिर्भिन्नं गात्रे ह्यङ्गुलमन्तरं ।
भगादित्यस्य देवस्य शम्बरेणास्त्रयोधिना । दैत्यस्य चाद्भुतं दिव्यमस्त्रेणास्त्रमवारयत् ।
मायायुद्धेन मायावी शम्बरस्तु महाबलः । अवध्यदङ्गं दत्यो मायाभिर्लाघवेन च ।
सहस्रमायो द्युतिमान्देवसेनानिसूदनः । शम्बरोऽदृश्यत पुनः सङ्कलः शतधा शरैः ।
पतितोऽदृश्यत पुनर्व्यसुर्भूमौ महाबलः । अथ स्म दृश्यते भूयः शतधा शैलसन्निभः ।
दिशागजेन्द्रमारूढो दृश्यते च पुनर्बली । प्रादेशमात्रश्च पुनर्भूत्वा भवति शैलवत् ।
महामेघनिभः श्रीमांस्तिर्य्यगूर्द्ध्वश्च सोऽभवत् । पुनः कृत्वा विरूपाणि घोराणि विकृतानि वै ।
सर्व्वां भीषयते सेनां देवानां भीमदर्शनः । ते भीताः प्रपलायन्ते सिंहं दृष्ट्वा मृगा इव ।
ततश्चान्यं नवं देहं कृत्वा प्रांशुतरं पुनः । गच्छत्यूर्द्ध्वगतिं घोरो दिशः शब्देन पूरयन् ।
नभस्तलगतश्चापि वर्षते वासवो यथा । सम्वर्त्तकाम्बुदप्रख्यः पूरयन् पृथिवीमिमां ।
संवर्त्तकोऽनलश्चैव भूत्वा भीमपराक्रमः । शतावर्त्तः शतशिखो ददाह च पुनः सुरान् ।
मुक्तस्ताश्च महाशैलः शतवर्ष्मा शतोदरः । अदृश्यत दि ं स्तम्भन् कैलास इव पर्व्वतः ।
यान्यादित्याश्च साध्याश्च यानि विश्वे च देवताः । चिक्षिपुः शस्त्राणि दिव्यानि तान्यसौ ग्रसतेऽसुरः ।
युध्यमानश्च समरे सरथः सोऽसुरोत्तमः । गन्धर्व्वनगराकारस्तत्रैवान्तरधीयत ।
तं भीताः समुदैक्षन्त त्रिदशा भीमविक्रमं । सहस्रमायं समरे शम्बरं चित्रयोधिनं ।
भगोऽपि भयसंत्रस्तो दानवेन्द्रस्य संयुगे । रथं त्यक्त्वा महाभागो महेन्द्रं शरणं गतः ।
पराजित्य तु तं देवं दानवेन्द्रः प्रतापवान् । गतो यत्र महातेजा जातवेदा महाप्रभः ।
स वह्निं वाग्भिरुग्राभिः क्रुद्धो ऽतर्ज्जयतासकृत् । भवान्विष हि ते मृत्युरित्युक्त्वाऽन्तर्दधे च सः ।
एतस्मिन्नन्तरे चैव ब्राह्मणेन्द्रो महाबलः । जघान सोमः शीतास्त्रो दानवानां चमूं रणे ।
कैलासशिखराकारो द्युतिमद्भिर्हयैर्वृतः । अवधीद्दानवान्क्रुद्धो दण्डपाणिरिवान्तकः ।
पोथयन्रथवृन्दानि वाजिवृन्दानि वै प्रभुः । दैत्येषु व्यचरच्छ्रीमान् युगान्ते कालवद्बली ।
स कर्षन्रथवृन्दानि ऊरुवेगेन चन्द्रमाः । ददाह दानवान् सर्व्वान् दावाग्निरिव चोदितः ।
मृद्गन्रथेभ्यो रथिनो गजेभ्यो गजयोधिनः । सादिनाश्चाश्वपृष्ठेभ्यो भूमौ चैव पदातिनः ।
हिमेन व्यधमत् सर्व्वान् वायुर्वृक्षानिवौजसा । चन्द्रमाः सुमहातेजा दानवानां महाचमूं ।
तदाऽस्त्रमभवत्तस्य प्रदिग्धं शत्रुशोणितैः । पिनाकमिव रुद्रस्य क्रुद्धस्याभिघ्नतः पशून् ।

युगान्तकोपमः श्रीमान् दैत्येषु व्यचरद्बली । आवार्य्य महतीं सेनां प्राद्रवन्तीं पुनः पुनः ।
चन्द्रं मृत्युमिवायान्तं दृष्ट्वा योधा विसिस्मियुः । यतो यतः प्रक्षिपति शिशिरास्त्रं तमोनुदः ।
ततस्ततो व्यशीर्य्यन्त दैत्यसैन्यानि सर्व्वशः । व्यदारयत सैन्यानि स्वबलेनाभिसंवृतः ।
ग्रसन्तमरिसैन्यानि व्यादितास्यमिवान्तकं । तं तथा भीमकर्म्माणं शशीतास्त्रं महाहवे । १२४५०
दृष्ट्वा शशाङ्कमायान्तं दैत्यानां चन्द्रभास्करौ । तावमाचाणि चापानि कर्षमाणौ महाबलौ ।
छादयेतां शरैश्चन्द्रं वृष्टिमन्ताविवाम्बुदौ । अथ विस्फार्य्यमाणानां कार्म्मुकाणां सुरासुरैः ।
अभवत्तुमुलः शब्दो दिशः संनादयन्निव । विनदद्भिर्म्महानागैर्हेषमाणैश्च वाजिभिः ।
भेरीशङ्खमृदङ्गैश्च वाद्यमानैर्नभस्तले । युयुधुस्ते संक्रुद्धा जयग्टद्धा यशस्विनः ।
अन्योन्यमभिगर्ज्जन्तो गोष्ठेष्विव महावृषाः । शिरसां पात्यमानानां समरे निशितैः शरैः । १२४५५
अश्मवृष्टिरिवाकाशे ह्यभवत् सेनयोस्तयोः । कुण्डलोष्णीषधारीणि जातरूपस्रजांसि च ।
पतितानि स्म दृश्यन्ते शिरांसि रणमूर्द्धनि । विशिखोन्मथितैर्गात्रैर्बाहुभिश्च सकार्म्मुकैः ।
सहस्ताभरणैश्चान्यैः प्रच्छन्नैर्हाधिरोक्षितैः । कवचैराष्टतैर्गात्रैश्छत्रैश्चापि भास्वरैः ।
मुण्डैश्च चन्द्रसङ्काशैस्तप्तकुण्डलभूषणैः । गजवाजिमनुष्याणां सर्व्वगात्रैः समन्ततः ।
आसीत्सर्व्वा समाकीर्णा मुहूर्त्तेन वसुन्धरा । चापमेघाश्च विपुलाः शस्त्रविद्युत्प्रकाशिनः । १२४६०
वाहनानाञ्च निर्घोषः स्तनयित्नुसमोऽभवत् । स संप्रहारस्तुमुलः कटुकः शोणितोदकः ।
प्रावर्त्तत सुराणाञ्च दानवानाञ्च संयुगे ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने देवासुरयुद्धे षट्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४६ ॥

॥ वैशम्पायन उवाच ॥ तस्मिन्महाहवे रौद्रे तुमुले लोमहर्षणे । ववर्षुः शरवर्षाणि संरब्धा देवदानवाः ।
व्यक्रोशन्त गजास्तत्र शरवर्षप्रपीडिताः । अश्वाश्च पर्य्यधावन्त हतारोहा दिशो दश ।
उत्पत्य निपतन्त्यन्ये शरवर्षप्रपीडिताः । देवानां दानवानाञ्च गजाश्वरथिनां तदा । १२४६५
समरे तत्र शूराणां प्रवराणां तरस्विनां । धनुर्ज्यातलशब्देन न प्राज्ञायत किञ्चन ।
शरशक्तिगदाभिस्तु खड्गैश्चामिततेजसः । निजघ्नुर्म्महतीं सेनामन्योन्यस्य परन्तपाः ।
खड्गनामुत्तमाङ्गानां कार्म्मुकाणाञ्च संयुगे । राशयः समदृश्यन्त देवदैत्यसमागमे ।
अश्वानां कुञ्जराणाञ्च रथानाञ्च वरूथिनां । अन्तं स्म नाधिगच्छन्ति निहतानां सुरासुरैः ।
गदाभिरष्टिभिः प्रासैर्बाणैः संनतपर्व्वभिः । योधास्तत्राभ्यहन्यन्त हस्त्यश्वाश्चापि तद्रण । १२४७०
प्रावर्त्तत ततो घोरा शोणितौघतरङ्गिणी । नदी मध्येन सैन्यानां केशशैवलशाद्वला ।
हाहाकारमहाशब्दो योधानामभवत्तदा । दानवैर्हन्यमानानां त्रिदशानां महारणे ।
एकं तदभवद्युद्धं देवानामसुरैः सह । विभीषणं महारौद्रं विश्वं भीतदर्शनं ।
विरोचनस्तु तत्रैव विष्वक्सेनं महारणे । जघान रुधिराभाश्च साध्यं परमधर्म्मिणं ।
तमायान्तमभिप्रेक्ष्य विष्वक्सेनः शरैस्त्रिभिः । अमेयात्मा सुरश्रेष्ठः प्रत्यविध्यत् स्तनान्तरे । १२४७५

साध्यस्य बाणाभिहतस्तोत्राहित इव द्विपः । विरोचनः प्रजज्वाल क्रोधेनाग्निरिवाध्वरे ।
स कार्म्मुकविनिर्मुक्तैर्निघ्नन्दानवसत्तमः । विष्वक्सेनं बिभेदाजौ दीप्तैः सप्तभिराशुगैः ।
सोऽतिविद्धो बलवता दानवेन सुरोत्तमः । मूर्च्छामभिजगामाशु ध्वजस्थापाश्रयस्तदा ।
ततः स पुनराश्वस्य साध्यो युद्धे मनो दधे । विस्फार्य्य सुमहच्चापं दैत्यमध्ये व्यवस्थितः ।
विरोचनस्तु बलवानभ्ययुध्यत सर्व्वशः । क्षोभयन् सुरसैन्यानि समन्तान्निशितैः शरैः । १२४८०
ततस्तस्यासुरेन्द्रस्य युध्यमानस्य संयुगे । श्रूयते तुमुलः शब्दो जीमूतस्येव गर्ज्जतः ।
स जगर्ज्ज महाघोरो विनिघ्नन्देववाहिनीं । चण्डमेघोऽम्बवर्षीव सविद्युत्स्तनयित्नुमान् ।
दिशो विद्रावयामास शरवर्षेण दानवः । सर्व्वसैन्यानि देवानामुद्यतास्त्रो महाहवे ।
ते प्राद्रवन्त वित्रस्ता रथेभ्यो रथिनस्तदा । सादिनश्चाश्वपृष्ठेभ्यो भूमौ चापि पदातयः ।
श्रुत्वा कार्म्मुकनिर्घोषं विस्फूर्जितमिवाशनेः । सर्व्वसैन्यानि भीतानि व्यवालीयन्त संयुगे । १२४८५
विरोचनभयत्रस्ता रथेभ्यो रथिनस्तदा । पदातीनां ययुः संघा यत्र देवः शचीपतिः ।
विष्वक्सेनस्य साध्यस्य सर्व्वतः सुमहाबलः । पादरक्षसहस्राणि निजघान चतुर्द्दश ।
अश्ववृन्देषु नागेषु रथानीकेषु वा विभुः । पदातीनाञ्च संघेषु विनिघ्नन् प्रत्यदृश्यत ।
विनत्य श्येनवत् पक्षौ सर्व्वतः स वरूथिनीं । भित्त्वा भित्त्वा महाबाहुः शिरांस्याजावकृन्तत ।
सादिनश्च पदाताश्च हतशेषास्तथा रथाः । विष्वक्सेनेन सहिता विरोचनमभिद्रवन् । १२४९०
तेऽसिचर्म्मगदाशक्तिपरिघप्रासतोमरैः । तमेवानुप्रधावन्तः सिंहनादं विनेदिरे ।
अथ सोऽसिं समुद्यम्य जवमास्थाय दानवः । चकर्त्त रथिनामाजौ शिरांसि च धनूंषि च ।
रथनागाश्ववृन्देषु बलवानरिमर्द्दनः । विरोचनश्चरन् मार्गान् प्रकारानेकविंशतिं ।
भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं प्रसृतं सृतं । सम्पातं समुदीर्णञ्च दर्शयामास दानवः ।
केचिद्वरासिना रुग्णा दानवेन महात्मना । विनेदुर्भिन्नमर्म्माणो निपेतुश्च गतासवः । १२४९५
छिन्नपृष्ठा हतारोहा दानवेन महात्मना । विद्रुताः स्वान्यनीकानि जग्मुस्त्रिदशवारणाः ।
निपेतुरुर्व्व्यामाकाशान्निकृत्ता दृढधन्वना । विविधास्तोमराश्चापा महामात्रशिरांसि च ।
प्रतीपमाहरन्नागानश्वांश्च भृशविह्वलान् । चकर्त्त रथिनामाजौ शिरांसि च धनूंषि च ।
आप्लुत्य रथिनः कांश्चित् परामृश्य महाबलः । सूतांश्चिच्छेद खड्गेन ध्वजानपि च दानवः ।
मुहुरुत्पततो दिक्षु धावतश्च यशस्विनः । मार्गांश्च चरतश्चित्रान् व्यस्मयन्त ततोऽसुराः । १२५००
निजघान पदा कांश्चिद्दाक्षिप्यान्यानपोथयत् । खड्गेनान्यांश्च चिच्छेद नादेनान्यानभीषयत् ।
ऊरुस्तम्भगृहीताश्च प्रपतन्त्यपरे भुवि । अपरे चैनमालोक्य भयात् प्राणानवासृजन् ।
तस्मिंस्तु वर्त्तमाने वै युद्धे महति दारुणे । रथौघवाजिनागानां सुराणाञ्च महाक्षये ।
कुजम्भो दितिजश्रेष्ठो धाम्ममादित्यमाहवे । योधयामास समरे वृषः प्रतिवृषं यथा ।
जघानाचलसंकाशो मत्तवारणविक्रमः । स्फुरद्भिर्निशितैस्तीक्ष्णैः शरैर्व्वज्रभिराशुगैः । १२५०५

देवसेनासहस्राणि सरथानि महाहवे । तस्य बाणपथं प्राप्य नाभ्यवर्त्तन्त सर्व्वशः ।
प्रणेदुः सर्व्वभूतानि बभूवुस्तिमिरा दिशः । देवानामजयश्चात्र प्रत्यदृश्यत दारुणः ।
अंशस्तु दानवेन्द्रस्य जघानोत्तमविक्रमः । अनीकं दशसाहस्रं कुञ्जराणां तरस्विनां ।
आपतन्तं गजानीकं कुजम्भो वीक्ष्य दानवः । गदापाणिरवारोहद्रथोपस्थादरिन्दमः ।
अद्रिसारमयीं गुर्व्वीं प्रगृह्य महतीं गदां । अभ्यद्रवद्गजानीकं व्यादितास्य इवान्तकः । १२५१०
स गजान् गदया निघ्नन् व्यचरत् समरे बली । कुजम्भो दानवश्रेष्ठो दण्डपाणिरिवान्तकः ।
विशीर्णदन्तांश्च बहून् भिन्नकुम्भांश्च वारणान् । अकरोद्दानवश्रेष्ठ उद्दिश्योद्दिश्य ताम् बली ।
विशीर्णदन्ता बहवो भिन्नकुम्भास्तथाऽपरे । कुजम्भेनार्द्दिता नागा व्यद्रवन्त दिशो दश ।
कुजम्भस्य च येऽमात्या दानवा घोरदर्शनाः । नाराचैर्विमलैस्तीक्ष्णैरभ्यघ्नन् गजयोधिनः ।
क्षुरैः क्षुरप्रैर्भल्लैश्च दान्तैरञ्जलिकैस्तथा । चिच्छेद चोत्तमाङ्गानि कुजम्भो दानवोत्तमः । १२५१५
शिरोभिः प्रपतद्भिश्च गगनं समपूर्य्यत । अश्मवृष्टिरिवाभाति बाहुभिश्च महाङ्कुशैः ।
कृत्तोत्तमाङ्गाः स्कन्धेषु गजानां गजयोधिनः । अदृश्यन्त महाराज ताला विशिरसो यथा ।
आपतन्तं महानागमंशस्यासुरसत्तमः । विव्याधैकेषुणा क्रुद्धस्ततः स विमुखोऽभवत् ।
विगाह्यैवं गजानीकं कुजम्भो दानवोत्तमः । विनिघ्नन् प्रवरान् सैन्यान् गदया गदिनाम्वरः ।
एकप्रहाराभिहतान् कुजम्भेन महागजान् । अपश्यन्त सुराः सर्व्वे पर्व्वतानिव पातितान् । १२५२०
कुजम्भस्य च मार्गेषु विशीर्णास्ते महागजाः । वज्राहता इवेन्द्रेण विशीर्णा इव पर्व्वताः ।
अमन्यन्त सुरास्तञ्च मूर्त्तिमन्तमिवान्तकं । गन्धादेव व्यशीर्य्यन्त सिंहस्येवेतरे मृगाः ।
स स्रायसीं गदां बिभ्रद्दुषितां असृक्शोणितैः । व्यादितास्यो मदम् क्रुद्धो रौद्रं रूपमधारयत् ।
यथा हि भगवान् क्रुद्धः प्रजानां संक्षये पुरा । प्रक्रीडमानो गदया रणमध्ये महासुरः ।
गोपाल इव दण्डेन कालयत् स महागजान् । क्रुद्धं कालमिवाकाशे दण्डमुद्यम्य दानवं । १२५२५
अपश्यन्त सुराः सर्व्वे कुजम्भं भीमविक्रमं । हतारोहास्तु तत्रान्ये प्रभिन्ना वारणोत्तमाः ।
गदया हन्यमानाश्च वार्णैश्च भृशविक्षताः । असहन्तः कुजम्भस्य गदावेगं महाहवे ।
स्वान्यनीकानि मृद्नन्तः प्राद्रवन्त महागजाः । महावात इवाभ्राणि विधम्य गदया गजान् ।
अतिष्ठत् समरे दैत्यः कालः संवर्त्तको यथा ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने देवासुरयुद्धे सप्तचत्वारिंशदधिकद्विशततोऽध्यायः ॥२४७॥

॥ वैशम्पायन उवाच ॥ ततः सर्व्वाणि सैन्यानि देवराजस्य शासनात् । अभ्यद्रवन्त दितिजान्नदतो भैरवान्रवान् । १२५३०
तं बलौघमपर्य्यन्तं देवानां सुदुरासदं । रथनागाश्वकलिलं शङ्खदुन्दुभिनादितं ।
आपतन्तं मुदश्चारं रजसा सर्व्वतो वृतं । दैत्यसागरमक्षोभ्यं समुद्रमिव पर्व्वणि ।
तदाश्चर्य्यमपर्य्यन्तमश्रद्धेयमिवाद्भुतं । रथनागाश्वकलिलं समुदीर्णं महाबलं ।
आवार्य्य तरसा सर्व्वं कुजम्भो बलिनाम्वरः । अतिष्ठत् समरे दैत्यो गिरिर्मेरुरिवाचलः ।

अनीकानि कुजम्भस्तु गदया संन्यवारयत्। अनीकिनी कुजम्भेन वारिताऽभून्निरुद्यमा। ११६३५
तस्मिंस्तथा वर्त्तमाने संप्रहारे सुदारुणे। तेषान्तु संप्रहारे वै वर्त्तमाने महात्मनां।
असिलोमा हरिश्चैव जघ्नतुर्व्वै परस्परं। असिलोमा तु बलवान् संक्रुद्धो दानवाधिपः।
देवसैन्यस्य सर्व्वस्य धूमकेतुरिवोत्थितः। तमांस्यर्क इवापोहन् सुरसैन्यानि संयुगे।
सहस्ररश्मिप्रतिमो दानवस्य रथोत्तमः। शरैर्मेघ इवावर्षन् देवानीके प्रतापवान्।
शरौघैरश्मिभिर्द्दीप्तैः प्रतपन् घोरदर्शनः। रौद्रः क्रूरो दुराधर्षो दुर्व्वार्य्यो ध्वजिनीमुखे। ११६४०
युध्यते हरिणा सार्द्धं पच्यमान इव प्रभुः। उग्रेषुरुग्रदन्तो नृत्यमानो महागजान्।
सुराणामुत्तमाङ्गानि प्राचिनोत् सुमहाबलः। पच्यमानः स सैन्यानि शरदंष्ट्रः प्रतापवान्।
असिजिह्वो दुराधर्षश्चापव्यात्ताननोऽसुरः। परश्वधधरः श्रीमान् खड्गापूरितध्वनिः।
अतिष्ठद्दानवव्याघ्रः संयुगे व्याघ्रवद्बली। मौर्व्वीघोषस्तनयित्नुः पृषत्कपृषतो महान्।
धनुर्विद्युद्गुणाटोपो महामेघ इवापरः। बलौघसागरो घोरो बाहुग्राहो दुरासदः। ११६४५
कार्म्मुकोर्म्मितरङ्गौघो बाणावर्त्तमहाह्रदः। गदासिमकरो रौद्रो व्याविलः शिरसोद्धृतः।
नाराचमीनः सुमहान् गर्ज्जितोत्क्रुष्टघोषवान्। हयान् गजान् पदातांश्च रथांश्च तरसा बहून्।
न्यमज्जयत संग्रामे परवीरान्महारथान्। अप्लावयत्स देवौघान् दारुणो दानवेश्वरः।
प्रामर्द्दत युधि श्रीमान्दैत्यश्रेष्ठो महाबलः। अपश्यंस्त्रिदशाः सर्व्वे युद्धआम्बुनदप्रभं।
सम्रद्धं तत्र युध्यन्तं ज्वलन्तमिव पावकं। मध्यन्दिनगतं सूर्य्यं तपन्तमिव तेजसा। ११६५०
न शेकुः सर्व्वसैन्यानि दानवं प्रसमीक्षितुं। यथा प्रवृद्धो घर्म्मान्ते दहेत्कक्षं हुताशनः।
तथा सुरवरान्दैत्यो दहति स्म स्वतेजसा। देवानां दानवानाञ्च बलं मर्द्दति दारुणं।
विमूढमभवत्सर्व्वमाकुलञ्च समन्ततः। ततः शूरा बलोदग्रा हस्त्यश्वरथधूर्गताः।
आर्थ्यां बुद्धिं समास्थाय न त्यजन्ति महाहवं। तदुत्पिञ्जलकं युद्धमभवद्रोमहर्षणं।
देवदानवयोर्घोरं रुधिरस्रावकर्द्दमं। न दिशः संप्रजानन्ति भयपाशनिपीडिताः। ११६५५
शस्त्रघातांश्च विविधान्दानवानां महारणे। अन्योन्यं मूढचित्तास्ते निमग्नुर्व्याकुलीकृताः।
स्वान् परांश्चाभ्यजानन्त विमूढाः शस्त्रतेजसा। शिरोरुहेषु संगृह्य कश्चित्क्रूरस्य संयुगे।
शूरश्छिनत्ति मूर्द्धानं सन्दष्टौष्ठपुटाननः। बाहुभिर्मुष्टिभिश्चैव वज्रकल्पैः सुदारुणैः।
प्रहरन्ति रणे वीरा न्यस्तशस्त्राः परस्परं। योधप्राणहरे रौद्रे स्वर्गद्वारविघट्टने।
सङ्कुले तुमुले युद्धे वर्त्तमाने भयावहे। हयो हयं गजो नागं वीरो वीरं महाहवे॥ ११६६०
अभिदुद्राव वेगेन न्यहनच्चैवमन्तिकात्। असुराश्च सुराश्चैव विक्रमाढ्या महारथाः।
उत्सृजन्तो रणे प्राणान्निजघ्नुरितरेतरं। मुक्तकेशा विकवचा विरथाश्छिन्नकार्म्मुकाः।
हस्तैः पादैरयुध्यन्त दानवास्त्रिदशैः सह। हरिस्तु निशितं भल्लं प्रेषयामास संयुगे।
स तस्य धनुषः कोटिं छित्त्वा भूमावपातयत्। पुनश्चापि पृषत्कानां शतानि नतपर्व्वणां।

प्राहिणोत्सहसा तस्य दानवेन्द्रस्य संयुगे। तस्य देहे विमुक्तास्ते मारुतेन समीरिताः। ११६६५
मग्नार्द्धकाया विबभुः पन्नगा इव पर्व्वते। स तैर्निपातितैर्गात्रैः क्षरद्भिरसृगव्ययं।
बभौ दैत्यो महाबाहुर्मेरुर्धातुमिवोत्सृजन्। ततोऽसिलोमा संक्रुद्धः प्रगृह्यान्यन्महद्धनुः।
रुक्मपुङ्खांश्च निशितान् प्रेषयामास सायकान्। तैस्तं मर्म्मसु विव्याध सर्पानलविषोपमैः।
गात्रं सञ्छादयामास मेघाभैरिव पर्व्वतं। भूयः सन्धाय च शरं सुभीमाशनिसन्निभं।
सुपुङ्खं सूर्य्यसङ्काशं बाणमप्रतिमं रणे। तेन विद्धः स बाणेन संयुगे भीमकर्म्मणा। ११६७०
सुमोह सहसा देवो भूमौ च निपपात ह। ततो हाहाकृतं सर्व्वं देवे भूतलमास्थिते।
जगत्सदेवमाविग्नं यथाऽर्कपतने तथा। परिवारांस्तु समरे जघानास्य महासुरः।
एकत्रिंशत्सहस्राणि योधानां दानवोत्तमः। जयश्रिया सेव्यमानो दीप्यमान इवानलः।
प्रगृह्य कार्म्मुकं घोरं गतः शक्ररथं प्रति। तत्रैव तु महायुद्धे समेत्यावश्विनावुभौ।
प्रयुद्धौ सह वृत्रेण बलिना देवतारिणा। बाणखड्गधनुष्पाणिः समरे त्यक्तजीवितः। ११६७५
आसाद्य सोऽश्विनौ वृत्रः स्थितो गिरिरिवाचलः। ततः शङ्खमुपाध्माय द्विषतां लोमहर्षणं।
व्याघोषतलनिर्घोषैः सर्व्वभूतान्यमोहयत्। ततः संहृष्टरोमाणः शङ्खशब्दं विशुश्रुवुः।
सचराचरदेवौघास्तस्यार्णवसमस्वनं। गदापरिघनिस्त्रिंशशक्तिशूलपरश्वधाः।
प्रगृहीता व्यराजन्त सचराचरबाहुभिः। तैः प्रमुक्तान्महाकायैः शूलशक्तिपरश्वधान्।
भल्लैर्वृत्रः प्रचिच्छेद भीमवेगरवैस्तथा। सोऽन्तरीक्षचराणाञ्च भूमिष्ठानाञ्च गर्ज्जतां। ११६८०
शरैर्विव्याध गात्राणि देवानां प्रियदर्शनः। वृत्रासुरभुजोत्सृष्टैर्बहुभिर्यतरत्तमां।
निकृत्तान्येव दृश्यन्ते शरीराणि शिरांसि च। अथ रक्तमहावृष्टिरभ्यवर्षत मेदिनीं।
गदापरिघभिन्नानां देवानां गात्रसम्भवा। प्रच्छादयामास देवौघैर्वृत्रं भीमपराक्रमं।
ददृशुः सर्व्वभूतानि सूर्य्यमभ्रगणैरिव। स रश्मिभिरिवादित्यः प्रतपन् सर्व्वदेवताः।
अविध्यद्बलवान् क्रुद्धः सायकैर्म्मर्म्मभेदिभिः। नदतो विविधान्नादान्नर्द्दतस्यापि सायकैः। ११६८५
न मोहमसुरेन्द्रस्य ददृशुस्त्रिदशा रणे। तेऽसिशक्तिगदाभिश्च परिघप्रासतोमरैः।
परश्वधैस्त्रिशूलैश्च प्रववर्षुर्महारथाः। ततो वृत्रः सुसंक्रुद्धस्तदाऽभ्यर्द्दितो बली।
अभ्यवर्षच्छितैर्बाणैस्तान् सर्व्वान् सत्यविक्रमः। ते वै विप्रकृता देवा विप्रकीर्णमहायुधाः।
घोरमार्त्तस्वरं चक्रुर्वृत्रासुरभयार्द्दिताः। उत्सृज्य ते गदाशक्तिशूलासिपरशून् रणे।
उत्तरां दिशमाजग्मुस्त्रासिता दृढधन्वना। ततः शूलगदापाणिर्व्यूढोरस्को महाभुजः। ११६९०
प्रावल्गन् रणे दैत्यस्त्रासयन् सचराचरं। तत्रैकस्तु महाबाहुरश्वी शूलधरः प्रभुः।
अभ्यधावत दैत्येन्द्रं वृत्रमप्रतिमं रणे। गृहीतचापो वेगेन प्रभिन्न इव वारणः।
वत्सदन्तैस्त्रिभिः पार्श्वे विव्याधासुरसत्तमं। सोऽतिविद्धो महेष्वासो वृत्रः परमकोपनः।
गदां जग्राह बलवान् गदायुद्धविशारदः। तां प्रगृह्य गदां भीमामद्रिसारमयीं दृढां।

अश्विनं सहसागम्य ताडयामास वीर्य्यवान्। दीप्यमानं ततः शूलमश्वी सुविपुलं दृढं । ११९९५
प्रचिक्षेप तदा दैत्याय समरे लोमहर्षणं । भङ्क्त्वा शूलं गदाग्रेण गदायुद्धविशारदः ।
अश्विनं सहसाऽभ्यर्च्छद्गरुत्मानिव पन्नगं । सोऽन्तरीक्षं समुत्पत्य विधूय महतीं गदां ।
नासत्योरसि चिक्षेप गिरिशृङ्गोपमां बली । गदयाऽभिहतोऽथाश्वी त्यक्त्वा शूलमनुत्तमं ।
प्रययौ सहसा तत्र यत्रायुध्यत वासवः । पराजित्य तु संग्रामे सोऽश्विनं भिभीमविक्रमं ।
जयश्रिया सेव्यमानो वृत्रो युद्धे व्यवस्थितः । १२०००
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने देवासुरयुद्धे अष्टचत्वारिंशदधिकद्विशततोऽध्यायः ॥२४८॥
॥ वैशम्पायन उवाच ॥ तत्रैव सुमहायुद्धे रणाजिर्द्देवसत्तमः । युध्यते सह दैत्येन एकचक्रेण धीमता ।
प्रच्छाद्य रथपन्थानमुत्क्रोशन्तं महारवं । एकचक्रस्य सैन्यन्तु शरवर्षैरवाकिरत् ।
महासुरा महावीर्य्या महापट्टिशयोधिनः । शूलानि च भुशुण्डीश्च क्षिपन्ति स्म महारणे ।
तच्छूलवर्षं सुमहद्गदाशक्तिसमाकुलं । अशिवं दितिजैर्मुक्तं दुर्निवार्य्यं चराचरैः ।
अन्योन्यमभ्यवर्त्तन्त देवासुरगणा युधि । महाद्रिशिखराकारा वीर्य्यवन्तो महारथाः । १२००५
शतं शताश्च तुरगास्तस्य युक्ता महारथे । महासुरवरस्यैव हिरण्यकशिपोर्युधि ।
तेषां चरणपातेन चक्रनेमिस्वनेन च । तस्य बाणनिपातैश्च हता वै शतशः सुराः ।
ततः स लघुभिस्तीक्ष्णैः शरैः सन्नतपर्व्वभिः । आयुधान्यच्छिनत् क्रुद्धः शतशोऽथ सहस्रशः ।
बध्यमानाः शरैस्तीक्ष्णैरथद्विरदवाजिनः । गमिताः प्रलयं केचिच्छिद्रैर्हीनत्रा रणे ।
ततः प्रक्षीयमाणांस्तानुपलभ्य दितेः सुताः । त्यक्त्वा प्राणान् न्यवर्त्तन्त प्रसह्योतशरासनाः । १२०१०
ते दिशो विदिशश्चैव प्रतिरुद्ध्य प्रहारिणः । अभ्यवर्षन्नतिशितैः शस्त्रैर्देवान्दितिसुता रणे ।
रणाजिर्ज्वलितं घोरं परमं तिग्मतेजसं । मुमोचास्त्रं महाबाहुर्मथनं नाम संयुगे ।
ततः शस्त्राणि शूलानि निशितानि सहस्रशः । अस्त्रवीर्य्येण महता दितिजः संप्रचिच्छिदे ।
छित्त्वा शूलांश्च तान् सर्व्वानेकचक्रो महासुरः । प्रत्यविध्यत तं साध्यं दशभिर्निशितैः शरैः ।
अस्त्रवेगं निहत्यैवं सोऽस्त्रैस्तस्यानु सैनिकान् । ज्वलितैरपरैः शीघ्रैस्तानविध्यत् सहस्रशः । १२०१५
तेषां छिन्नानि गात्राणि विसृजन्ति स्म शोणितं । प्रावृषीवातिवृष्टानि शृङ्गाणि धरणीभृतां ।
इन्द्राशनिसमस्पर्शैर्वेगवद्भिरजिह्मगैः । दितिजैर्बध्यमानाश्च विचेलुः सुरसत्तमाः ।
एकचक्रो रणे तिष्ठन्नपश्यद्गजयूथपान् । वराभरणनिर्ह्रादान् समुद्रस्वननिस्वनान् ।
मत्तान् सुकल्पितान् दृप्तान्महामात्रैरधिष्ठितान् । कुलीनान् वीर्य्यसम्पन्नान् प्रतिद्विरदघातिनः ।
शिक्षितान् गजशिक्षायामैरावणसमान् युधि । न्यहनत् परसैन्यस्य गजान् गज इवासुरः । १२०२०
विक्षरन्तो महानागान् भीमरूपांस्त्रिधा मदं । मेघस्तनितनिर्घोषान् महाद्रीनिव चोच्छ्रितान् ।
सहस्रसम्मितान् दिव्यान् जाम्बूनदपरिष्कृतान् । सुवर्णजालैर्विततांस्तरुणादित्यवर्च्चसः ।
एकचक्रो गदापाणिर्व्यसृजन् गदिनाम्वरः । उत्सारयामास गजान् महाभ्राणीव मारुतः ।

निहत्य गदया सर्व्वांस्तान् गजान् गजमर्द्दनः। भूयोऽश्वसंघान् स बली निर्ज्जघान महासुरः।
शुकवर्णान्नवर्णान्मयूरसदृशांस्तथा। पारावतसवर्णांश्च हंसवर्णांस्तथैव च। १२३२५
मल्लिकाक्षान् विरूपाक्षान् क्रौञ्चवर्णान्मनोजवान्। अश्वसैन्यं महाबाहुस्तदप्रतिमपौरुषः।
निसूदयामास बली गदया भीमविक्रमः। रणाजिरस्य समरे कर्म्म दृष्ट्वा सुरद्विषः।
अचिन्त्यविक्रमः श्रीमान् स युद्धाद्विरराम ह। गदायुद्धेषु कुशलो रथेन रथयूथपः।
हृष्टसैन्यो महाबाहुः प्रस्थितः शक्रसन्निधौ। त्रिंशच्छतसहस्राणि प्राणिनां विनिहत्य च।
रणेऽतिष्ठत् स दैत्येन्द्रो विधूम इव पावकः। तस्मिन्नेव तु संग्रामे बलो नाम महासुरः। १२३३०
मृगव्याधं महात्मानं योधयत्यजितं रणे। मृगव्याधस्य रुद्रस्य महापारिषदास्ततः।
समुत्पेतुर्बलं दृष्ट्वा हुताग्निसमतेजसः। गजैर्मत्तैरथैर्हृष्टैर्वाजिभिश्च महाजवैः।
अस्त्रैश्च निशितैस्तीक्ष्णैर्भीमैश्चोपचिता रणे। ततस्ते ददृशुर्वीरा दीप्यमानं महासुरं।
रश्मिवन्तमिवोद्यन्तं सुतेजोरश्मिमालिनं। संग्रामस्थं महावेगं महासत्त्वं महाबलं।
महामतिं महोत्साहं महाकायं महारथं। तं समीक्ष्य महायोधं दिक्षु सर्व्वास्ववस्थितं। १२३३५
ततः प्रहरणैर्घोरैरभिपेतुः समन्ततः। तस्य सर्व्वायसाः पीताः शरास्तीक्ष्णमुखाः शिताः।
शिरस्यद्रिप्रतीकाशे मृगव्याधेन पातिताः। तैरर्पितैरथाविद्धः शरैः शिरसि दानवः।
उत्पपात तदा व्योम दिशो दश विनादयन्। ततस्तं त्रिदशो वीरः सरथः सज्यकार्मुकः।
अनुवव्राज संहृष्टः खे तदा सुमहाबलः। असुरं छादयामास तं व्योम्नि शरवृष्टिभिः।
वृष्टिमानिव जीमूतो निदाघान्ते धराधरं। अर्द्यमानस्ततस्तेन मृगव्याधेन दानवः। १२३४०
चकार निनदं घोरमम्बरे जलदो यथा। स दूरं सहसोत्पत्य मृगव्याधरथेऽसुरः।
निपपात महावेगः पक्षवानिव पर्व्वतः। बभञ्ज च ततो दैत्यो भग्नशाकुवरं रथं।
मृगव्याधः परित्यज्य स्थितो भूमौ महाबलः। विरथं प्रेक्ष्य रुद्रन्तु तस्य पारिषदाः शुभाः।
उत्थिता रोषताम्राक्षा व्योम्नि मुद्गरपाणयः। स तु तैः सहसोत्थाय विष्ठितो विमलेऽम्बरे।
मुद्गरैरर्द्दितो भीमैर्वृक्षः परशुभिर्यथा। तेषां वेगवतां वेगान्निहत्य समहासुरः। १२३४५
निपपात पुनर्भूमौ सुपर्णसमविक्रमः। स सालवृक्षमुत्पाट्य महाशाखं महाबलः।
सर्व्वान् पारिषदान् संख्ये सूदयामास दानवः। स तैर्विततदेहस्तु रुधिरौघपरिप्लुतः।
शुशुभे दानवश्रेष्ठो बालसूर्य्य इवोदितः। अथोत्पाट्य गिरेः शृङ्गं स मृगव्यालपादपं।
जघान तान् पारिषदान् समरे दानवेश्वरः। ततस्तेष्ववसन्नेषु महापारिषदेषु वै।
बलं तवदशेषं स नाशयामास वीर्य्यवान्। अश्वैरश्वान् गजैर्नागान् योधैर्योधान्रथैरथान्। १२३५०
दानवः सूदयामास युगान्तेऽन्तकवत् प्रजाः। छत्रैरश्वैश्च नागैश्च भग्नैश्च महारथैः।
छिन्नैश्चाभवद्भूमी रुद्धमार्गा समन्ततः। एवं बलश्च दैत्येन्द्रो मृगव्याधश्च वीर्य्यवान्।
युधि प्रयुद्धौ बलिनौ प्रभिन्नाविव वारणौ। तथैव युध्यते रुद्रो द्वितीयो राक्षसा सह।

विश्रुतस्त्रिषु लोकेषु क्रोधात्मा अज एकपात् । तत्तयोस्तुमुलं युद्धं सुमहल्लोमहर्षणं ।
आसीत् प्रतिभयं रौद्रं वीराणां जयमिच्छतां । देवदानवदेहैस्तु दुस्तरा केशशाद्वला ।
शरीरसंघातवहा प्रसृता लोहितापगा । निजघानासुरं क्रुद्धो रुद्रो रौद्राकृतिः प्रभुः ।
गाढं शतमुखं युद्धे शत्रुसैन्यविदारणं । तस्य काञ्चनचित्राङ्गं रथं साश्वं ससारथिं ।
जघान समरे श्रीमान् क्रुद्धो दैत्यस्य सायकैः । तस्य पारिषदो ह्येको रथशक्त्या महाबलः ।
बिभेद समरे हृष्टो दानवं तं स्तनान्तरे । विभिन्नगात्रो रुद्रेण तथा पारिषदैरपि ।
रुद्रस्य रथमायान्तं राजन्दानवसत्तमः । प्रममाथ तलेनाशु सहसा क्रोधमूर्च्छितः ।
भिन्नगात्रः शरैस्तीक्ष्णैः स रुद्रममितौजसं । रुद्रपारिषदांश्चापि जघानाशु पराक्रमी ।
सृजन्तं शरवर्षाणि दानवं घोरदर्शनं । बिभेद समरे रुद्रो बाणैः सन्नतपर्व्वभिः ।
वर्त्तमाने तथा रौद्रे संग्रामे लोमहर्षणे । रुधिरौघप्रवाहिन्यो महानद्यः प्रसुस्रवुः ।
दानवः समरे रुद्रं नीलाञ्जनचयोपमः । निर्बिभेद शरैस्तीक्ष्णैर्मेरुं सूर्य्य इवांशुभिः ।
हतैर्द्दानवमुख्यैस्तु शूलशक्तिपरश्वधैः । पतितैः पर्व्वताभैश्च दानवैः कामरूपिभिः ।
वर्त्तमाने महाघोरे संग्रामे लोमहर्षणे । महाभेरीमृदङ्गानां पणवानां तथैव च ।
शङ्खानां पटहानाञ्च सम्बभूव महास्वनः । हतानां स्वनतां तत्र दैत्यानाञ्चापि निस्वनः ।
देवानाञ्च तथा तत्र शुश्रुवे दारुणो महान् । तुरङ्गमखुरोत्कीर्णं रथनेमिसमुद्धतं ।
रुरोध मार्गं योधानां चर्चूर्णि च धरारजः । शस्त्रपुष्पोपहारा सा तत्रासीद्युद्धमेदिनी ।
दुर्द्दर्शा दुर्विगाह्या च मांसशोणितकर्द्दमा । भग्नैः खड्गैर्गदाभिश्च शक्तितोमरपट्टिशैः ।
अपविद्धैश्च शतशो रथैः सांग्रामिकैर्हतैः । निहतैः कुञ्जरैश्चैत्तैस्तथा त्रिदशदानवैः ।
चक्राक्षयुगशस्त्रैश्च भग्नैरवनिमाश्रितैः । बभूवायोधनं घोरं पिशिताशनसङ्कुलं ।
उत्पेतुश्च कबन्धानि दिक्षु सर्व्वासु संयुगे । अन्योन्यबद्धवैराणां शूराणां जयमिच्छतां ।
संप्रहारस्तदा युद्धे वर्त्तते स्म भयङ्करः । सैन्यानां संप्रयुद्धानां शूराणामनिवर्त्तिनां ।
अजस्य चैकपादस्य राहोश्चैव महात्मनः । तेषान्तु तत्रापततां सैन्यानामतिनिस्वनः ।
उद्वर्त्ततामन्तकाले समुद्राणामिव स्वनः । तत्रैकस्तु स धूम्राक्षो भीमो रुद्रो महाबलः ।
बिभेद केशिनं शक्त्या गदापट्टिशशूलभृत् । घोरा नानाप्रहरणा भीमाक्षा भीमदर्शनाः ।
निष्पेतू रुद्रदयिता महापारिषदास्तथा । रथमास्थाय स श्रीमांस्तप्तकाञ्चनकुण्डलः ।
दानवैः संवृतः केशी युध्यते युधि दुर्ज्जयः । तस्य संग्रामशौण्डस्य संग्रामापि युयुत्सतः ।
निष्पेतुरुग्रवीर्य्यस्य ज्वालाः प्रवितता मुखात् । स तु सिंहाश्रितस्कन्धः शार्दूलसमविक्रमः ।
महाजलदसंकाशो मृदङ्गसमनिस्वनः । तस्य निष्पतमानस्य दानवैः संवृतस्य वै ।
बभूव सुमहानादः क्षोभयंस्त्रिदिवं तथा । तेन शब्देन वित्रस्ता त्रिदशानां महाचमूः ।
द्रुमशैलप्रहरणा योद्धुमेवाभ्यवर्त्तत । तेषाञ्च देवदैत्यानां युयुत्सूनां परस्परं ।

सन्निपातः सुतुमुलो रौद्रो लोकभयावहः। तेषां युद्धं महाघोरं संजज्ञे लोमहर्षणं।
देवदानवसंघानां प्राणांस्त्यक्त्वा महाहवे। सर्व्वे ह्यतिबलाः शूराः सर्व्वे पर्व्वतसन्निभाः।
सर्व्वे सर्व्वास्त्रविद्वांसः सर्व्वे सर्व्वायुधोद्यताः। त्रिदशा दानवाश्चैव परस्परजिघांसवः।
तेषां विनदतां शब्दः संयुगे मेघनिस्वनः। शुश्रुवेऽतिमहाघोरस्त्रस्थावरकम्पनः।
रेणुश्चारुणसङ्काशः सुभीमः समपद्यत। उद्भूतो देवदैत्यौघैः संरुरोध दिशो दश।
अन्योन्यं रजसा तेन कौशेयारुणपाण्डुना। संवृता बहुरूपेण ददृशुर्नैव संयुगे।
न ध्वजो वा पताका वा न वर्म्म तुरगोऽपि वा। आयुधं स्यन्दनो वाऽपि ददृशे नैव सारथिः।
शब्दस्तुमुलस्तेषामन्योन्यमभिधावतां। श्रूयते तुमुले युद्धे न रूपाणि चकाशिरे।
दानवा एव संरब्धा दानवान् जघ्नुराहवे। त्रिदशांस्त्रिदशाश्चापि निजघ्नुस्तुमुले तदा।
ते परांश्च विनिघ्नन्तः स्वांश्च युद्धे सुरासुराः। रुधिरार्द्रा तथा चक्रुर्मेदिनीन्ते सुरासुराः।
ततस्तु रुधिरौघेण संसिक्तं स्यदितं रजः। शरीरशतसंकीर्णा बभूव स महारणः।
शूलशक्तिगदाखड्गपरिघप्रासतोमरैः। त्रिदशा दानवाश्चैव जघ्नुरन्योन्यमाहवे।
बाहुभिः परिघाकारैर्निघ्नन्तः पर्व्वतैस्तथा। रुद्रपारिषदाः सर्व्वे सूदयन्ति स्म दानवान्।
रुद्रपारिषदांश्चैव महाद्रुमसहास्त्रभिः। निजघ्नुः समतिक्रम्य शरैश्चासाद्य दानवाः।
एतस्मिन्नन्तरे क्रुद्धः केशी दानवसत्तमः। संयमहर्षी घोरः स स्वान्यनीकानि हर्षयन्।
तेषां परमसंक्रुद्धो वज्रमस्त्रमुदैरयत्। वज्रेणास्त्रेण दिव्येन दैत्येन सुमहात्मना।
महापारिषदाः सर्व्वे हता युधि सुदुर्ज्जयाः। वज्रास्त्रपीडिता भ्रान्ता रुद्रपारिषदा युधि।
विप्रकीर्णद्रुमाः पेतुः शैला वज्रहता इव। एवं तत्तुमुलं युद्धमभवल्लोमहर्षणं।
केशिनः सह रुद्रेण तदद्भुतमिवाभवत्।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामनप्रादुर्भावे देवासुरयुद्धे ऊनपञ्चाशदधिकद्विशतोऽध्यायः। २४९ ॥

॥ वैशम्पायन उवाच ॥ वृषपर्व्वा तु दैत्येन्द्रो विष्वमद्भुतविक्रमं। निष्कम्भुं योधयामास लोहितार्कसमद्युति।
क्रोधमूर्च्छितवक्त्रस्तु धुन्वन् परमकार्म्मुकं। ध्वजिनीं प्रेक्ष्य शत्रूणां सारथिं त्वरितोऽब्रवीत्।
अत्रैव तावत्त्वरितं नय मे सारथे रथं। एते हि देवाः सहिता घ्नन्ति नः समरे बलं।
एतानिहन्तुमिच्छामि समरश्लाघिनो रणे। एतैर्हि दानवानीके कृतं छिद्रमिदं महत्।
ततः प्रजविताश्वेन रथेन रथिनाम्बरः। अरीनभ्यहनत् क्रुद्धः शरजालैर्महासुरः।
न स्थातुं देवताः शक्ताः किं पुनर्योद्धुमाहवे। वृषपर्व्वेषुभिर्भिन्नाः सर्व्व एवाभिदुद्रुवुः।
तान्मृत्युवशमापन्नान् दैवसैन्यवशङ्गतान्। समीक्ष्य धातो निष्कम्भुरवतस्थे महाबलः।
दृष्ट्वा तं तत्र निष्कम्भुं सर्व्वशस्त्रिदशोत्तमाः। समेत्य सहिताः सर्व्वे तं द्रुतं पर्य्यवारयन्।
व्यवस्थितञ्च निष्कम्भुं दृष्ट्वा ते त्रिदशोत्तमाः। बभूवुर्ब्बलवन्तो वै तस्यास्त्रबलतेजसा।
वृषपर्व्वा तु शैलाभं निष्कम्भुं समरे स्थितं। महेन्द्र इव धाराभिः शरवर्षैरवाकिरत्।

अचिन्तयित्वा बाणांस्तान् शरीरे पतितान् बहून् । स्थितस्तमूमुखे श्रीमान् ससैन्यः स महाबलः ।
संप्रहृष्टो महातेजा वृषपर्व्वाणमाहवे । अभिदुद्राव वेगेन कम्पयन्निव मेदिनीं ।
तस्य त्वाधावमानस्य दीप्यमानस्य तेजसा । बभूव रूपं दुर्द्धर्षं दीप्तस्येव विभावसोः । १२७१५
रथं त्यक्त्वा स तु श्रीमान् सक्रोधः कमलेक्षणः । वृक्षमुत्पाटयामास महाशाखं महोच्छ्रयं ।
ततश्चिक्षेप तं वृक्षं निष्कम्भुर्वृषपर्व्वणः । तं गृहीत्वा महावृक्षं पाणिनैकेन दानवः ।
विनद्य सुमहानादं भ्रामयित्वा च वीर्य्यवान् । सगजांश्च गजारोहान् सरथान् रथिनस्तदा ।
जघान दानवस्तेन शाखिना त्रिदशांस्तथा । तमन्तकमिव क्रुद्धं समरे प्राणहारिणं ।
वृषपर्व्वाणमासाद्य त्रिदशा विप्रदुद्रुवुः । तमापतन्तं संक्रुद्धं त्रिदशानां भयावहं । १२७२०
ददर्श वीरो निष्कम्भुश्चुकोप च ननाद च । स तत्र निशितैर्बाणैस्त्रिंशता मर्म्मभेदिभिः ।
निर्ब्बिभेद महावीर्य्यो निष्कम्भुर्दानवाधिपं । दैत्यानामथ निष्कम्भुः शरशक्तिभिरर्द्दितः ।
विद्धः समरमूर्द्धस्थो रुधिरं प्रास्रवद्वहु । उद्विग्ना मुक्तकेशाश्च भग्नदर्पाः पराजिताः ।
स्रवन्तो दुद्रुवुः सर्व्वे भयाद्वै वृषपर्व्वणः । अन्योन्यं प्रममन्थुस्ते त्रासिता वृषपर्व्वणा ।
पृष्ठतस्त्राससंमूढाः प्रेक्षमाणा मुहुर्म्मुहुः । त्यक्तप्रहरणाः सर्व्वे कृतास्ते वृषपर्व्वणा । १२७२५
संग्रामे युद्धशौण्डेन तदा निष्कम्भुसैनिकाः । तत्रैव तु महावीर्य्यः प्रह्लादः कालमाहवे ।
योधयामास रक्ताक्षो हिरण्यकशिपोः सुतः । तस्य दानववीरस्य युद्धकाले जयक्रियाः ।
चकार त्वरया युक्तो भार्गवो विजयावहाः । कृताशनं तर्पयतो ब्राह्मणांश्च नमस्यतः ।
आज्यगन्धं प्रतिवहन् मारुतः सुरभिर्ववौ । स्रजश्च विविधाकारा जयार्थमभिमन्त्रिताः ।
प्रह्लादस्य शुभे मूर्द्ध्नि आबबन्धोशना स्वयं । कालेन सह संग्रामे प्रयुद्धस्य महात्मनः । १२७३०
प्रह्लादस्यातिवीर्य्यस्य शान्तिश्चक्रे स भार्गवः । दश शिष्यसहस्राणि भार्गवस्य महात्मनः ।
यानि दानवमुख्यानां जेपुः शान्तिमनुत्तमां । अथर्व्वाणमयो दिव्यं मन्त्रसंतवचोदितं ।
रणप्रवेशसदृशं कर्म्म वैजयिकं कृतं । ततः सर्व्वास्त्रविद्वांसः समरेष्वनिवर्त्तिनः ।
विद्याव्रतसमायुक्ताः कृतस्वस्त्ययनक्रियाः । धनुर्हस्ताः कवचिनो वेगेनाप्लुत्य दानवाः ।
बलिमभ्यर्च्च्य राजानं प्रह्लादं पर्य्यवारयन् । आस्थाय दिव्यं विपुलं रथं पररथारुजं । १२७३५
नानाप्रहरणाकीर्णं सचक्रमिव पर्व्वतं । तद्बभूव मुहूर्त्तेन क्ष्वेडितास्फोटिताकुलं ।
मेरोः शिखरमापूर्णं यौरिवाम्बुधरागमे । स्रजः पद्मपलाशानामामुच्य सुविभूषिताः ।
बान्धवान् संपरिष्वज्य संपतन्ति रणप्रियाः । महायुधधरः श्रीमान् शुभवर्म्मधरः प्रभुः ।
सतनुत्रशिरस्त्राणो धन्वी परमदुर्ज्जयः । सिंहशार्दूलदृप्तानां नदतां किङ्किणीकिनां ।
तस्य सैन्यसहस्राणि प्रयान्त्यग्रे महारणे । सैन्यपक्षगतास्तस्य रथाः परमदुर्ज्जयाः । १२७४०
सप्ततिर्व्वै महाभाग गजास्तावन्त एव च । मध्ये व्यूहोदरस्थस्तु कालनेमिर्महासुरः ।
धनुर्विस्फारयन् घोरं ननाद प्रजहास च । तस्मिन् शतसहस्राणि पुरो यान्ति महाद्युतेः ।

दानवानां बलवतां शक्रप्रतिमतेजसां । स समं वर्द्धमानस्तु पक्षाभ्यां विसृतो महान् ।
अभवद्दानवव्यूहो दुर्भेद्यः सर्व्वदैवतैः । ततः शतसहस्राणि दानवानां धनुर्भृतां ।
नानाप्रहरणानाञ्च परिमाणं न विद्यते । गदापरिघनिस्त्रिंशशूलपट्टिशमुद्गरैः ।
प्रग्रहीतैर्व्वराजन्त दानवाः पर्व्वता इव । गर्ज्जन्तो विनदन्तश्च विक्रोशन्तश्च दानवाः ।
अयुध्यन्त महावीर्य्याः समरेष्वनिवर्त्तिनः । ततस्तूर्य्यसहस्राणां संजज्ञे निस्वनो महान् ।
हयानाञ्च गजानाञ्च गर्ज्जतामतिवेगिनां । दुन्दुभीनाञ्च निर्घोषः पर्ज्जन्यनिनदोपमः ।
शुश्रुवे शङ्खशब्दश्च पटहानाञ्च निस्वनः । तेन शङ्खनिनादेन भेरीतूर्य्यरवेण च ।
निर्घोषेण रथानाञ्च क्रोशतीव नभस्तलं । सागरप्रतिमौघेन बलेन महता वृतः ।
प्रह्लादोऽयुध्यत क्रुद्धः कालान्तकयमोपमः । तस्य नादेन रौद्रेण घोरेणाप्रतिमौजसः ।
विनेदुः सर्व्वभूतानि त्रैलोक्यविकृतैः स्वरैः । अन्तरीक्षात् पपातोल्का वायुश्च परुषो ववौ ।
वमन्त्यः पावकं घोरं शिवाश्चैव ववाशिरे । प्रह्लादस्तु महावीर्य्यः प्रहसन् युद्धदुर्मदः ।
उवाच वचनं श्रीमांस्तत्कालसदृशमुत्तमं । अद्याहं दर्शयिष्यामि स्वबाहुबलमूर्ज्जितं ।
अद्य मद्बाणनिहतान् देवान् द्रक्ष्यथ संयुगे । बान्धवा निहता येषां त्रिदशैरिह सङ्गरे ।
अद्य ते निर्व्वपिष्यन्ति शत्रुमांसानि दानवाः । इममद्य समुद्भूतं रेणुं सनरमूर्द्धनि ।
अहं संशमयिष्यामि शत्रुशोणितविस्रवैः । तिमिरौघहतार्कञ्च सैन्यरेणुहृणीकृतं ।
आकाशं संपतिष्यन्ति खद्योता इव मे शराः । हृष्टाः संपरिमोदध्वं देवेभ्यस्त्यज्यतां भयं ।
अद्याहं निहनिष्यामि कालेन्द्रं धनुषा रणे । तोषयिष्यामि राजानं बलिं बलवतां वरं ।
त्रिदशान् समरे जित्वा बाणैरन्तकसन्निभैः । अक्षयाः सन्ति मे तूणाः शरास्चाशीविषोपमाः ।
स्थातुं मे पुरतः शक्ताः के रणे जीवितेप्सवः । हत्वा रिपुगणांस्तु हिरनुरागश्च राजसु ।
हतस्य त्रिदिवे वासो नास्ति युद्धसमा गतिः । ते भयं पृष्ठतः कृत्वा रणे दानवसत्तमाः ।
निहत्येमानरीन् सर्व्वान् मोदध्वं नन्दने वने । एवमुक्त्वा महासैन्यं प्रह्लादो दानवोत्तमः ।
कालस्य समरे सैन्यं तरसा ऽमर्द्दतासुरः । सर्व्वास्वपि च शूरस्य नित्यश्चाप्यपराजितः ।
युद्धेष्वभिमुखो नित्यं स्वबाहुबलदर्पितः । षष्टीरथसहस्राणि विविधायुधधारिणां ।
प्रह्लादस्यातिवीर्य्यस्य ये तस्य तनया मिताः । तैस्तु क्रतुशतैरिष्टं विपुलैराप्तदक्षिणैः ।
शान्ता धर्म्मपरा नित्यं नित्यं व्रतपरायणाः । दातारः प्रियवक्तारो वक्तारः शास्त्रवस्तुषु ।
स्वदारनिरता दान्ता ब्रह्मण्याः सत्यसङ्गराः । यष्टारः क्रतुभिर्नित्यं नित्यस्वाध्ययने रताः ।
इष्वस्त्रकुशलाः सर्व्वे बहुशो दृढविक्रमाः । मत्तवारणविक्रान्ताः शत्रुसैन्यविमर्द्दकाः ।
ईरयन्तः पटाक्षेपैः सुघोरान् वातरेचकान् । युद्धोत्सुकधियो नित्यं क्रोधरक्तितलोचनाः ।
सन्दष्टौष्ठपुटा दैत्या विनेदुर्भीमविक्रमाः । क्ष्वेडितास्फोटितरवैर्हर्षयन्तः परस्परं ।
रेणुशङ्खरवैश्चैव सिंहनादैश्च पुष्कलैः । आश्रुत्याश्रुत्य सहसा रणे वसुरनेकशः ।

तालसाराणि चापानि विकर्ष्य सुमहाभुजाः । असृजमाणाः सहसा दानवा बाणपाणयः ।
सुरासुरैरप्यजितं योधयन्ति रणेऽन्तकं । प्रतप्तहेमाभरणाः सर्व्वे ते श्वेतवाससः ।
दानवा मानिनः सर्व्वे सर्व्वे स्वर्गाभिकाङ्क्षिणः । सर्व्वे जयैषिणो वीराः सर्व्वे शत्रुवधोद्यताः । १२७७५
शुशुभे सा चमूर्दृप्ता पताकाध्वजमालिनी । गजाश्वरथसम्बाधा स्वर्गमार्गाभिकाङ्क्षिणी ।
ततः कालस्तु निर्यातो भीमो भीमपराक्रमः । विनदन् सुमहाकायो व्याधिभिर्व्वहुभिर्वृतः ।
ददर्श महतीं सेनां दानवानां बलीयसां । अभिसंजातहर्षाणां कालं समभिगर्ज्जतां ।
आपतन्तं तदाऽनीकं दानवानां तरस्विनां । प्रतिलोमं चकाराशु व्याधिभिः सहितोऽन्तकः ।
प्रविश्य ध्वजिनीं तेषां घातयामास वीर्य्यवान् । कालो रुधिररक्ताक्षः स्वेनानीकेन संवृतः । १२७८०
प्रह्लादबलमत्युग्रं प्रह्लादञ्च महासुरं । आजघान रणे कालो दण्डमुद्गरपट्टिशैः ।
शरशक्त्यृष्टिखड्गाश्च शूलानि मुषलानि च । गदाश्च परिघाश्चैव विविधाश्च परश्वधाः ।
धनूंषि च विचित्राणि शतघ्न्यश्च स्थिरायसाः । पात्यन्ते व्याधिभिर्युद्धे दानवानां चमूमुखे ।
बहवो व्याधयो युद्धे बह्वनसुरपुङ्गवान् । व्याधीनपि च दैत्यौघा निजघ्नुर्व्वहवो बहून् ।
शूलेन मथिताः केचित् केचिच्छिन्नाः परश्वधैः । परिघैराहताः केचित् केचिच्च परमायुधैः । १२७८५
केचिद्द्विधाकृताः खड्गैः स्फुरन्तः पतिता भुवि । व्याधयो दानवैरेवं नानाशस्त्रैर्विदारिताः ।
ते चापि व्याधिभिः सर्व्वे विविधैरायुधोत्तमैः । खड्गैश्च विमलैस्तीक्ष्णैः प्रासतोमरमुद्गरैः ।
विभिन्ना दानवाः शूलैर्निकृत्ताश्च परश्वधैः । मुद्गरैः पट्टिशैश्चैव व्याधिभिश्च हता भृशं ।
क्षताः शस्त्रैरनेकैश्च मुष्टिभिश्च हता भृशं । वेमुः शोणितमक्षोभ्यं विष्टब्धदशनेक्षणाः ।
आर्त्तस्वरश्च महतां सिंहनादश्च गर्ज्जतां । बभूव तुमुलः शब्दः संग्रामे लोमहर्षणः । १२७९०
मुष्टिभिश्चोत्तमाङ्गानि तलैर्गात्राणि चासकृत् । मर्दितानि महीं जग्मुस्तिष्ठतामेव संयुगे ।
वस्त्रफेना ध्वजावर्त्ता छिन्नबाहुमहोरगा । शूलशक्तिमहामत्स्या चापग्राहसमाकुला ।
रथैश्चोपलसम्बाधा ध्वजद्रुमसमावृता । सशब्दघोरविस्तारा लोहितोदाऽभवन्नदी ।
स्वधनुःशक्रधनुषौ काञ्चनाङ्गदविद्युतौ । तौ दैत्यकालजलदौ शरधारां ववर्षतुः ।
तौ महामेघसङ्काशौ रथनागगतौ तदा । बभूवतुरतिक्रुद्धौ साम्बुगर्भाविवाम्बुदौ । १२७९५
तप्तकाञ्चनसन्नाहौ दिव्यहारविभूषितौ । तौ विरेजतुरायत्तौ सूर्य्यवैश्वानराविव ।
तौ महाचलसंकाशावन्योन्यस्य चमूं तदा । वज्राशनिसमस्पर्शैर्बाणैर्ज्जघ्नतुराहवे ।
परस्परं समासाद्य तयोर्युधि दुरासदे । नाशंसन्त तदा योधा जीवितान्यपि संयुगे ।
शरनिर्भिन्नसर्व्वाङ्गा युधि प्रक्षीणजीविताः । निपेतुर्योधमुख्यास्तु रुधिरोक्षितवक्षसः ।
पतितैर्निपतद्भिश्च पात्यमानैश्च संयुगे । बभूव भूः समाकीर्णा योधैरुद्गतजीवितैः । १२८००
न ददृशाते शरान् घोरान् न च सन्दधतोस्तयोः । अन्तरं ददृशे कश्चित् प्रयत्नादपि संयुगे ।
लघुत्वाच्च महाबाहू युद्धशौण्डौ महाबलौ । मण्डलीकृतचापौ तु सहसैव बभूवतुः ।

प्रह्लादस्य तु बाणौघैर्द्द्राव्यान्तकवाहिनी । तुद्यमाना बलवता वायुनेवाभ्रमण्डलं ।
हतदर्पन्तु विज्ञाय प्रह्लादः कालमाहवे । अपयातश्च समरादिषवं संप्रतर्क्य तं ।
मल वशगतश्चैव प्रह्लादो युद्धदुर्म्मदः । तथैवान्यां चमूं भूयः प्रामर्द्दत महासुरः ।
कालप्रह्लादयोर्युद्धमभवद्यादृशं तदा । तादृशं सर्व्वभूतेषु न भूतं न भविष्यति ।
एवमद्भुतवीर्य्यौजा महारणकृतश्रमः । प्रह्लादः परिवृद्धोऽथ कालस्त्वपहतो रणात् ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने देवासुरयुद्धे पञ्चाशदधिकद्विशततोऽध्यायः ॥ २५० ॥
॥ वैशम्पायन उवाच ॥ अनुह्लादो धनाध्यक्षं प्रह्लादस्यानुजो बली । ससैन्यो योधयामास क्षोभयन् यक्षवाहिनीं ।
महता च बलौघेन अनुह्लादः सुरोत्तमं । अर्द्दयामास संक्रुद्धो धनाध्यक्षं प्रतापवान् ।
अभ्यर्थ्यमानस्त्विदाशानामेवक्षामुदायुधान् । चकार कदनं घोरं धनुष्पाणिर्म्महासुरः ।
आवर्त्त इव संजज्ञे बलस्य महतो महान् । क्षुभितस्याप्रमेयस्य सागरस्येव संभ्रवः ।
त्रिदशानां शरीरैश्च दानवानाञ्च मेदिनी । बभूव निचिता सर्व्वा पर्व्वतैरिव संवृता ।
मेरुपृष्ठन्तु रक्तेन रञ्जितं संप्रकाशते । सर्व्वतो माधवे मासि पुष्पितैरिव किंशुकैः ।
हतैर्व्विरैर्गजैरश्वैः प्रावर्त्तत महानदी । शोणितोदा महाघोरा यमराष्ट्रविवर्द्धिनी ।
शस्त्रमेदोमहापङ्का विप्रकीर्णान्त्रशैवला । छिन्नकायशिरोमीना अङ्गावयवशर्क्करा ।
गृध्रहंसगणाकीर्णा कङ्कसारसनादिनी । वसाफेनसमाकीर्णा प्रोतकुष्टस्वनितस्वना ।
तां कापुरुषदुर्द्धर्षां युद्धभूमिमहानदीं । नदीमिवातपापाये हंससारसशोभितां ।
त्रिदशा दानवाश्चैव तेरुस्तां दुस्तरां तदा । यथा पद्मरजोध्वस्तां नलिनीं गजयूथपाः ।
ततः सृजन्तं बाणौघाननुह्लादं रथे स्थितं । ददर्श तरसा देवो निघ्नन्तं यक्षवाहिनीं ।
क्रुद्धस्ततो दैत्यबलं सूदयामास वित्तपः । विक्षिपन्निव खे वायुर्म्महाभ्रपटलं बलात् ।
समीक्ष्य तुमुलं युद्धमनुह्लादस्तु भूपतिः । रथेनादित्यवर्णेन कुवेरमभिदुद्रुवे ।
स धनुर्धन्विनां श्रेष्ठो विकृष्य रणमूर्द्धनि । उत्ससर्ज्ज शितान् बाणान् वित्तेशस्य महात्मनः ।
कुवेरं प्राप्य ते बाणा निर्भिद्य सुसमाहिताः । अपरान् पृष्ठतो जघ्नुर्व्यालकान् यक्षराक्षसान् ।
देवः शरैरभिहतो निशितैर्ज्ज्वलनोपमैः । अनुह्लादं प्रत्युदियात् संक्रुद्धः परमाहवे ।
ततो वैश्रवणो राजा क्रुद्धो यक्षगणैः सह । ववर्ष शरवर्षाणि दानवान् प्रति वीर्य्यवान् ।
तद्यथा शारदं वर्षं गोवृषः शीघ्रमागतं । अपारयन् वारयितुं प्रतिगृह्णाति मीलितः ।
एवमेव कुवेरस्य शरवर्षं महासुरः । निमीलिताक्षः सहसा दैत्योऽसहत दारुणं ।
रोषितः शरवर्षेण धनदेन महाबलः । इन्द्रकेतुप्रतीकाशमभितोऽपश्यत द्रुमं ।
प्रवृद्धशाखाविटपं तरुणाङ्कुरपल्लवं । उत्पाट्य कुपितो दैत्यस्तरुं फलसमाकुलं ।
निजघान स यक्षश्रेष्ठान् कुवेरस्य महाजवान् । तस्य कर्म्म महाघोरं दृष्ट्वा सर्व्वे महासुराः ।
सिंहनादं नदन्ति स्म ह्यनुह्लादप्रहर्षिताः । तयोः सुतुमुलं युद्धं संजज्ञे देवदैत्ययोः ।

ततस्तौ क्रोधरक्ताक्षावन्योन्यवधकाङ्क्षिणौ । अन्योन्यं विविधैः शस्त्रैर्घोरैर्जघ्नतुराहवे ।
त्रिदशैर्दानवा युद्धे मथिताः प्राणवत्तरैः । दानवैस्त्रिदशाश्चापि क्रुद्धैर्भुवि निपातिताः ।
दानवास्त्वथ संक्रुद्धास्त्रिदशान्निशितैः शरैः । विव्यधुर्व्वज्रसंकाशैः कङ्कपत्रैरजिह्मगैः ।
विदार्य्यमाणा दैत्येन्द्रैस्त्रिदशास्तु महाबलैः । अमर्षिततरा भूयस्तक्रुः कर्म्माण्यभीतवत् । ११८७५
ते गदाभिः सुभीमाभिः पट्टिशैः शूलमुद्गरैः । परिघैश्च सुतीक्ष्णाग्रैर्दानवाः पीडिताः शरैः ।
शरनिर्भिन्नगात्राश्च खड्गविच्छिन्नवक्षसः । जगृहुस्ते शिलाश्चैव द्रुमांश्चासुरसत्तमाः ।
ते भीमवेगा दितिजा गर्ज्जमानाः पुनः पुनः । समन्युस्त्रिदशान् वीर्य्याच्छतशोऽथ सहस्रशः ।
ततः सुतुमुलं युद्धं तेषां तत्समवर्त्तत । शिलाभिर्विपुलाभिश्च बहुशाखैश्च पादपैः ।
परिघैः पट्टिशैश्चैव भिन्दिपालैः परश्वधैः । केचिन्निकृत्तशिरसः केचिच्च विदलीकृताः । ११८८०
केचिदभिहता भूमौ रुधिरार्द्राः सुरासुराः । केचिद्विद्राविता नष्टाः परस्परवधार्द्दिताः ।
विभिन्नहृदयाः केचिच्छिन्नपादाश्च शेरते । विदारितास्त्रिशूलैश्च केचित्तत्र गतासवः ।
तद्युद्धं सुमहद्भीमं देवदानवसंकुलं । बभूव शस्त्रतुमुलं शिलापादपसंकुलं ।
धनुर्ज्यातन्त्रिमधुरं हिक्कातालसमन्वितं । आर्त्तस्तनितनिर्घोषं युद्धगान्धर्व्वमाबभौ ।
कुवेरस्तु धनुष्पाणिर्द्दानवाग्रणमूर्द्धनि । दिशो विद्रावयामास संक्रुद्धः शरवृष्टिभिः । ११८८५
कुवेरेणार्द्दितं सैन्यं विद्रुतं प्रेक्ष्य दानवः । अभ्यद्रवदनुह्रादः प्रगृह्य विपुलां शिलां ।
क्रोधाद्द्विगुणरक्ताक्षः पितुस्तुल्यपराक्रमः । शिलां तां पातयामास कुवेरस्य रथोत्तमे ।
आपतन्तीं शिलां दृष्ट्वा गदापाणिर्द्धनाधिपः । रथादाप्लुत्य वेगेन वसुधायां व्यतिष्ठत ।
सचक्रकूवरहयं सध्वजं सशरासनं । भंक्त्वा रथोत्तमं तस्य निपपात शिला भुवि ।
प्रमथ्य तु कुवेरस्य प्रह्लादस्यानुजो रथं । सुराणां कदनं चक्रे सस्कन्धविटपैर्द्रुमैः । ११८९०
प्रभिन्नशिरसो भग्नास्त्रिदशाः शोणितोक्षिताः । द्रुमैः प्रमथिताङ्गाश्च निपेतुर्द्धरणीतले ।
विद्राव्य विपुलं सैन्यमनुह्रादो महासुरः । गिरिशृङ्गं महद्गृह्य कुवेरमभिदुद्रुवे ।
तमापतन्तं धनदो गदामुद्यम्य वीर्य्यवान् । विनर्द्दन्नाक्रयामास दानवेन्द्रं महाबलः ।
तस्य क्रुद्धस्य संक्रुद्धो गदां तां बहुकण्टकां । न्यपातयत वित्तेशो दानवस्योरसि प्रभुः ।
दैत्यस्तु क्रोधरक्ताक्षस्तं प्रहारमचिन्तयन् । वित्तेशस्योपरि तदा गिरिशृङ्गमपातयत् । ११८९५
स विह्वलितसर्व्वाङ्गो गिरिशृङ्गेण ताडितः । पपात सहसा भूमौ स पिङ्गाक्षो महाबलः ।
रराज पतितो भूमौ विकीर्ण इव पर्व्वतः । वित्तेशं विह्वलं दृष्ट्वा सर्व्वे ते यक्षराक्षसाः ।
परिवार्य्य महात्मानं ररक्षुर्भीमविक्रमाः । मुहूर्त्तं विह्वलो भूत्वा प्रभुर्विश्रवसः सुतः ।
उत्थितः सहसा देवः पिङ्गलाक्षो महाबलः । ननाद च महानादं त्रैलोक्यमभिनादयन् ।
जनयन्निव निर्घोषं विधमन्निव पर्व्वतान् । तमवध्यन्तु विज्ञाय निहतं पुनरुत्थितं । ११९००
प्रेक्ष्य पिङ्गाक्षमायान्तं दानवा विप्रदुद्रुवुः । तांस्तु विद्रवतो दृष्ट्वा अनुह्रादोऽसुरोऽब्रवीत् ।

कालनेमिं मुनेमिञ्च महानेमिञ्च दानवं। आत्मानञ्चैव वीर्य्यञ्च विसृत्याभिजनं तथा ।
क्व गच्छथ भयत्रस्ताः प्राकृता इव दानवाः । निवर्त्तध्वं महावीर्य्याः किं प्राणान् परिरक्षथ ।
नालं युद्धाय यश्चाऽयं महतीयं विभीषिका । एतां समुत्थितामद्य दानवानां विभीषिकां ।
विक्रम्य विधमिष्यामि निवर्त्तध्वं महासुराः । तेऽसुराः संनिवृत्याथ समदा इव कुञ्जराः । ११८६५
निजघ्नुः परमक्रुद्धा देवसैन्यं महासुराः । क्षीणप्रहरणाः केचिन्मेघगम्भीरनिस्वनाः ।
दर्पोत्कटा भुजैरेव संप्रहारं प्रचक्रिरे । पांशुभिश्चैव काष्ठैश्च शिलाभिश्च महाबलाः ।
बाहुभिश्च तथाऽन्योन्यमाक्षिपन्ति स्म वेगिताः । मुष्टिभिश्च तलैश्चैव नखपातैर्महाबलाः ।
पादपैश्च महाशाखैरयुध्यन्त महारणे । अनुह्रादस्तु संक्रुद्धो देवतानां महाचमूं ।
ममन्थ परमायस्तो वनान्यग्निरिवोत्थितः । रुधिरार्द्रास्तु बहवः शेरते योधसत्तमाः । ११८७०
निकृत्ताः पतिता भूमौ ताम्रपुष्पा इव द्रुमाः । अनुह्रादस्य विक्रान्तो देवस्याशीविषोपमान् ।
युध्यमानस्य समरे व्यसृजन्निशितान् शरान् । धनाधिपेन विद्धस्य अनुह्रादस्य संयुगे ।
अङ्गारमिश्राः क्रुद्धस्य मुखान्निश्चेरुरर्चिषः । अथ बाणसहस्रेण विंशेन दानवोत्तमः ।
विव्याध समरे क्रुद्धो दण्डपाणिरिवान्तकः । कुबेरस्तु शरैर्भिन्नः समन्तात् क्षतजोक्षितः ।
रुधिरं परिसुस्राव गिरिः प्रस्रवणैरिव । लब्ध्वा स तु पुनः संज्ञां रोषरक्तेक्षणः सुरः । ११८७५
गदामथ समामाद्य भीमां भीमपराक्रमः । चिक्षेप दैत्यमुद्दिश्य बलवान् क्रोधमूर्च्छितः ।
अप्राप्तामन्तरे सोऽथ तां गदां गदयाऽसुरः । बभञ्ज विनदन् क्रुद्धस्तदाश्चर्य्यमभूत्तदा ।
प्रगृह्य तु गदां भूयो ह्यभिदुद्राव दानवं । तमापतन्तं दृष्ट्वैव अनुह्रादो महाबलः ।
गिरिशृङ्गमथोत्पाट्य कैलासाचलसन्निभं । धनाधिपं प्रदुद्राव व्यादितास्य इवान्तकः ।
तमन्तकमिवायान्तमजय्यं सकलैः सुरैः । ग्रसन्तमिव दैतेयं त्रैलोक्यमखिलं रुषा । ११८८०
तमालोक्य तथारूपं धनाध्यक्षो रणं भयात् । अपहाय ययौ तत्र यत्र देवः शचीपतिः ।
तस्य चातिमहत् कर्म्म दृष्ट्वा वित्तपतिस्तदा । जगाम भयसंत्रस्तो यत्र देवः शचीपतिः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने देवासुरयुद्धे एकपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५१ ॥
॥ वैशम्पायन उवाच ॥ विप्रचित्तिस्तु वरुणं दैत्यानामधिपोऽव्ययः । जघानेषुगणैः क्रुद्धो दीप्तैरिव महोरगैः ।
संदह्यमानो दैत्येन दीप्तैः शरगभस्तिभिः । नाभ्यजानत कर्त्तव्यं संग्रामे स जलेश्वरः ।
सर्व्वलोकेश्वरस्येव परमेष्ठी प्रजापतिः । नाशक्नोद्यतः स्थातुं विप्रचित्तेर्ज्जलाधिपः । ११८८५
वज्रो नाम महाव्यूहो निर्भयः सर्व्वतोमुखः । संव्यूह्य प्रत्ययुध्यन्त दानवा देववाहिनीं ।
अग्निज्वालासमन्तत्र रविमण्डलसन्निभं । मुखमाभाति दैत्यस्य विप्रचित्तेर्महात्मनः ।
वरुणस्तु महातेजा विप्रचित्तिं महासुरं । प्रदहन्निव तेजोभिर्ज्जिगीषुः प्रत्यवैक्षत ।
स्रग्दाममालाभरणं दत्तपञ्चाङ्गुलान्तरं । जग्राह परिघं दैत्यः कैलासशिखरोपमं ।
पिनद्धं काञ्चनैः पट्टैर्हेममालिनमायसं । यमदण्डोपमं घोरं दैत्यानां भयनाशनं । ११८९०

भ्रामयामास तं क्रुद्धो महाशक्रध्वजोपमं। विननाद निरुत्साहो विप्रचित्तिर्महासुरः।
स कण्ठस्थेन निष्केण भुजस्थैरपि चाङ्गदैः। कुण्डलाभ्यां विचित्राभ्यां स्रजा चैव विचित्रया।
दानवो भूषणैर्भाति परिघेणायसेन च। यथेन्द्रधनुषा मेघः सविद्युत्स्तनयित्नुमान्।
प्रस्फोट्य परिघाग्रेण वायुस्कन्धं महात्मनः। प्रजज्वाल सधूमार्चिः सवर्णजनितोऽनलः।
विद्याधरगणैः सार्द्धं गन्धर्व्वनगरैरपि। सह चैवामरावत्या सिद्धलोकैस्तथा सह। ११८९५
ग्रहनक्षत्ररचितं सार्कचन्द्रविभूषितं। दैत्येन्द्रपरिघोद्धूतं भ्रमतीव नभस्तलं।
दुरासदः स संजज्ञे परिघाभरणः प्रभुः। सुरेन्धनोऽसुरेन्द्राग्निर्युगान्ताग्निरिवोत्थितः।
त्रिदशा वरुणश्चैव न शेकुः स्पन्दितुं भयात्। तत्रासीन्निर्भयस्त्वेकः कौशिको वासवः प्रभुः।
भास्करप्रतिमं घोरं परिघं रौद्रदर्शनं। पातयामास सेनायां जलेशस्य स दानवः।
पतता तेन संग्रामे जलेशस्य महात्मनः। भूतानां दशसाहस्रं परिघेण समाहतं। ११९००
तेषां गात्राणि चासाद्य व्यशीर्य्यत सहस्रधा। विशीर्य्यमाणो विबभावुल्काशतमिवाम्बरे।
भूयश्चैनं तदा भ्राम्य वरुणायाभ्यपातयत्। पात्यमाने तदा तस्मिन् शरीरे वरुणस्य च।
स भिन्नः परिघो घोरो देवगात्रे व्यशीर्य्यत। शीर्य्यमाणस्य चूर्णानि खद्योता इव चाम्बरे।
स तु तेन प्रहारेण न चचाल जलाधिपः। परिघेणाहतः संख्ये यथा भूमिचलेऽचलः।
स्वसैन्येष्वथ भग्नेषु भिन्नदेहेषु चाहवे। मुहूर्त्तमगमत् क्षोभमपाम्पतिरमर्षणः। ११९०५
सोऽमर्षवशमापन्नो वरुणोऽमितविक्रमः। सर्व्वसंहारमकरोत् स्वपक्षस्योऽरिमर्द्दनः।
स सागरैश्चतुर्भिश्च वृतो दीप्तैश्च पन्नगैः। शङ्खमुक्तामणिनिभो बिभ्रत्तोयमयं वपुः।
पाण्डरोद्धूतवसनो नानारत्नचिताङ्गदः। वरुणः पाशहस्तः श्रीमान् कूर्म्ममीनसमाकुलः।
वरुणस्तु तदा क्रुद्धस्तान्निरीक्ष्य स्वसैनिकान्। उवाच हृष्टो युध्यध्वं दानवानां जिघांसया।
अहमेनं हनिष्यामि भयं मुक्त्वा तु युध्यत। ततस्ते पन्नगाः सर्व्वे महार्णवसमाश्रयाः। ११९१०
अभ्युर्दैत्याननमुखे नर्दन्तो जयगर्द्धिनः। ते तु नालीकनाराचैर्गदाभिर्मुषलैस्तथा।
अभ्यघ्नन्दानवान्दीप्तान्मुदिता वरुणानुगाः। विप्रचित्तिस्तु संक्रुद्धो महाबलपराक्रमः।
पन्नगाणां शरीराणि व्यधमत्क्षणमूर्द्धनि। गारुडेन च सोऽस्त्रेण पन्नगान्दानवोत्तमः।
घातयामास समरे गारुडैः पन्नगाशनैः। स शरैः सूर्य्यसंकाशैः शातकुम्भविभूषितैः।
पन्नगान् समरे वीरः प्रममाथ सुदुर्ज्जयः। ते भिन्नगात्राः समरे पन्नगाः शरपीडिताः। ११९१५
पेतुर्म्मथितसर्व्वाङ्गा गजा इव महागजैः। तं तपन्तमिवादित्यं दीप्तैर्व्वाणगभस्तिभिः।
अभ्यधावत संक्रुद्धः समरे वरुणः प्रभुः। ततस्ते दानवास्तत्र भिन्नदेहाः सहस्रशः।
व्यथिता विद्रवन्ति स्म दिशो दश विचेतसः। इन्द्रस्यार्थे पराक्रम्य वरुणस्त्यक्तजीवितः।
विनर्द्दमानो युयुधे समरे पाशभृद्धरः। वारुणाः पर्व्वताग्रैश्च मुष्टिभिश्च बलोत्कटाः।
अभ्यवर्त्तन्त समरे विप्रचित्तिं महासुरं। ताड्यन्तश्च शिलाभिश्च प्रहरन्तो बलोत्कटाम्। ११९२०

व्यपोहत महातेजा विप्रचित्तिर्महासुरः । ततः पावकसङ्काशैः सपुङ्खैः शीघ्रगामिभिः ।
वरुणस्य महावेगान् विभेद समरे हयान् । कर्म्मणा तेन महता विप्रचित्तेर्महात्मनः ।
अग्नेराध्याह्नतस्येव तेजः समभिवर्द्धत । स शरैः सूर्य्यसङ्काशैः सुपुङ्खैः शीघ्रगामिभिः ।
वारुणीं तां महासेनां निर्भिद्य महाबलः । शोणिताक्तां सायकाक्रान्तां शरजालेन मोहिताम् ।
शूलशक्त्यृष्टिभिन्नाङ्गां चकार रुधिरोक्षिताम् । अभिद्रुतस्तु दैत्येन ससैन्यः सलिलाधिपः । ११८२५
महेन्द्रं शरणं प्राप्तो विप्रचित्तेर्भयार्द्दितः ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने देवासुरयुद्धे द्विपञ्चाशदधिकद्विशततोऽध्यायः ॥ २५२ ॥

॥ वैशम्पायन उवाच ॥ पराजयन्तु दैत्यानां दृष्ट्वाऽग्निरखिलद्विजोत्तमः । चकार बुद्धिं दैत्यानां वधे मन्त्रार्थिभिः स्तुतः ।
स्वयम्प्रभायाः शाण्डिल्या यः पुत्रो हव्यवाहनः । हिरण्यरेताः पिङ्गाक्षो देवदूतो हुताशनः ।
लोहितो लोहितग्रीवो हर्त्ता दाता हविः कविः । पावको विश्वभुग्देवः सर्व्वदेवाननः प्रभुः ।
सुमहात्मा सुवर्च्चस्कः महार्च्चिश्चित्रभावसुः । कृष्णवर्त्मा चित्रभानुर्हव्यवाग्रुक्मवान् स्वराट् । ११८३०
लोकसाक्षीऽद्विजश्रेष्ठप्रियोऽर्च्चिष्मान् वषट्कृतः । हव्यभवः शमीगर्भः स्वयोनिः सर्व्वकर्म्मकृत् ।
पावनः सर्व्वभूतानां विद्यानां तपोनिधिः । शमनः सर्व्वपापानां लेलिहानस्तनूनपात् ।
प्रदक्षिणावर्त्तशिखः शुचिरोमा मखाकृतिः । हव्यभुग्भूतभव्येशो हव्यभागहरो हरिः ।
सोमपः स महातेजा भूतेशः सर्व्वभूतपात् । अधृष्यः पावको भूतिर्भूतात्मा वै स्वधाधिपः ।
स्वाहापतिः सामगीतः सोमपूताशनोऽर्च्चिषुक् । देवदेवो महाक्रोधो रुद्रात्मा ब्रह्मसंस्तुतः । ११८३५
लोहिताश्वं वायुचक्रं रथमास्थाय भूतकृत् । धूमकेतुर्धूमशिखो नीलवासाः सुरोत्तमः ।
उद्यम्य दिव्यमाग्नेयमस्त्रं देवो रणे महत् । दानवानां सहस्राणि प्रयुतान्यर्बुदानि च ।
समरे विजयाकाङ्क्षी ददाहानिलसारथिः । प्राणो यः सर्व्वभूतानां देहे तिष्ठति पञ्चधा ।
यन्ता यस्य हुताशस्य सखा च प्रभुरीश्वरः । प्रभञ्जनो यो लोकानां युगान्ते सर्व्वनाशनः ।
सप्तस्वरगता यस्य योनिर्गीर्भिरुदीर्य्यते । यो ह्याकाशमयो देवो दूरगः शब्दसंभवः । ११८४०
यः कर्त्ता च विकर्त्ता च गतिर्गतिमतां प्रभुः । वेदकर्त्ता समो लोके ब्रह्मणा यः सनातनः
अमूर्त्तिमन्तं यं प्राहुर्महाभूतं महत्तरं । सोऽग्निं समीरयामास शमीगर्भं समीरणः ।
त्रिदिवारोहिभिर्ज्वालैर्जृम्भमाणो दिशो दश । दानवानामभावाय युगान्ताग्निरिवाभवत् ।
मेदोमज्जामहापङ्कां केशशैवलशाद्वलां । योधशीर्षोपलवहां मृतद्विपतटोत्कटां ।
शोणितोदां रणे दृष्ट्वा संग्रामसरितं विभुः । वह्निः प्रस्कन्दयामास दैत्यानां भयवर्द्धनः । ११८४५
ततोऽग्निर्द्दितिजान् सर्व्वान् प्रह्लादप्रमुखांस्तदा । पराजयामास विभुः क्रोशमानान्सहा स्ववे ।
केचित्प्रदीप्तैर्मु[illegible] केचिद्दीप्तैः शिरोरुहैः । केचिद्गात्रैः प्रदीप्तैश्च केचिद्दीप्तैर्भुजाननैः ।
केचित् प्रदीप्तैरुरुभिः केचिच्छत्रैर्ध्वजैरपि । असुरास्तत्र दृश्यन्ते प्रदीप्तेनाग्निना वृताः ।
असुरा भयवित्रस्ता विद्रुताश्च दिशो दश । त्यक्त्वायुधानि सर्व्वाणि विप्रकीर्णरथध्वजाः ।

तद्दृष्ट्वा खे समागच्छत् प्रलयानलसन्निभं । शमयामास दैत्येन्द्रो वारुणास्त्रेण बुद्धिमान् । १४००५
संक्रुद्धो मघवान् वज्रमग्रहीत् पर्व्वतोपमं । हन्तुकामो रणश्लाघी बलिं दैत्याधिपं रणे ।
ततः शुश्राव देवेन्द्रः कौशिको हरिवाहनः । अशरीरां तदा वाणीं तस्मिन्नहनि वैशसे ।
निवर्त्तस्व महाबाहो सुराणां नन्दिवर्द्धन । पुरन्दर सुरश्रेष्ठ न जेष्यसि बलिं रणे ।
तपसा ह्युत्तमो दैत्यो वरदानेन चाधिकः । स्वयम्भूपरितोषाच्च सत्याद्धर्म्माच्च वासव ।
नैष शक्यस्त्वया जेतुं त्रिदशैर्वा सुरेश्वर । यो ह्यस्य भगवान् जेता तं शृणुष्व सनातनं । १४०१०
ब्रह्मणो यो हि सर्व्वस्वं देवानां वै परा गतिः । परं रहस्यं धर्म्मस्य परस्य च परा गतिः ।
परात्परतरः श्रीमान् परावरगतिः प्रभुः । व्यक्ताव्यक्तो महाभूतो भूतभव्यभवत्प्रभुः ।
सहस्रशीर्षः पुरुषः सहस्राक्षः सहस्रपात् । शङ्खचक्रगदापाणिः पीतवासाः सुरारिहा ।
जेताऽजय्यो जयः श्रीमान् सोऽस्य जेता भविष्यति । श्रुत्वा दिव्यान्तु परमां वाणीं तामशरीरिणीं ।
अपयातो रणाच्छक्रः सह सर्व्वैर्मरुद्गणैः । अपयाते तु देवेन्द्रे कौशिके हरिवाहने । १४०१५
सिंहनादो महानासीद्दानवानां महामृधे । ततः किलकिलाशब्दः क्ष्वेडितास्फोटनिस्वनः ।
शङ्खानां निनदश्चात्र योधानां वल्गितस्वनः । वादित्राणाञ्च निर्घोषस्तुमुलश्चाभवत्तदा ।
जयशब्दरवैश्चैव देवानान्तु पराजये । ससैन्यो दैत्यराजस्तु प्रयातः ससुहृद्गणः ।
बलीन्द्रो विबभौ दैत्यो हिरण्यकशिपुर्यथा ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने देवासुरयुद्धे शक्रापयाने पञ्चपञ्चाशदधिकद्विशतोऽध्यायः ॥२५५॥

॥ वैशम्पायन उवाच ॥ निष्प्रयत्नेषु देवेषु त्रैलोक्ये दैत्यपालिते । जये बलेर्ब्बलवतो मयशम्बरघोषिते । १४०२०
शुद्धासु दिक्षु सर्व्वासु प्रवृत्ते धर्म्मकर्म्मणि । अप्रावृते धर्म्मपथे ह्ययनस्थे दिवाकरे ।
प्रह्रादशम्बरमयैरनुह्रादेन चैव ह । दिक्षु सर्व्वासु गुप्तासु गगने दैत्यपालिते ।
दैत्येषु मखशोभार्थे स्वर्गार्थं दर्शयत्सु च । प्रकृतिस्थे तदा लोके वर्त्तमाने च सत्पथे ।
अभावे सर्व्वपापानां भावे चैव तदा स्थिरे । भावे तपसि सिद्धानामभावे पापकर्म्मणां ।
चतुष्पादे स्थिते धर्म्मे अधर्म्मे पादविग्रहे । प्रजापालनयुक्तेषु भ्राजमानेषु राजसु । १४०२५
स्वधर्म्मसंप्रयुक्तेषु सर्व्वाश्रमनिवासिषु । अभिषिक्तोऽसुरैः सर्व्वैर्द्दैवराज्ये बलिस्तदा ।
हृष्टेष्वसुरसंघेषु नदत्सु मुदितेषु च । अथाभ्युपगता लक्ष्मीर्बलिं पद्मासने स्थिता ।
पद्मोद्यतकरा देवी वरदा शूरसेविनी ।
॥ श्रीरुवाच ॥ बले बलवतां श्रेष्ठ दैत्यराज महाद्युते । प्रीताऽस्मि तव भद्रं ते देवतानां पराजये ।
यत्त्वया युधि विक्रम्य देवराजः पराजितः । दृष्ट्वा ते परमं सत्त्वं ततोऽहं स्वयमागता । १४०३०
नाश्चर्य्यं दानवश्रेष्ठ हिरण्यकशिपोः कुले । प्रसूतस्यासुरेन्द्रस्य तव कर्म्मेदमीदृशं ।
विशेषितस्त्वया राजन्दैत्येन्द्रः स पितामहः । येन भुक्तं हि निखिलं त्रैलोक्यमिदमव्ययं ।
विशेषतस्तव विभो सर्व्वो धर्म्मः स्थितः पथि । तेन त्रैलोक्यमव्यग्रं भोक्ष्यस्यमितविक्रम ।

एवमुक्त्वा तु सा देवी लक्ष्मीर्दैत्यनृपं बलिं । प्रविष्टा वरदा सौम्या सर्व्वभूतमनोरमा ।
शिष्टाश्च देव्यः प्रवरा ह्रीः कीर्त्तिर्द्युतिरेव च । प्रभा धृतिः क्षमा भूतिर्नीतिर्विद्या दया मतिः । १४०३५
स्मृतिर्मेधा तथा तुष्टिः पुष्टिर्मुक्तिस्तथैव च । श्रुतिः प्रीतिरिडा कान्तिः शान्तिः पुष्टिः क्रिया तथा ।
सर्व्वाश्चाप्सरसो दिव्या नृत्यगीतविशारदाः । उपतस्थुर्महाभागास्तं बलिमिन्द्रं महारथं ।
प्रतिपन्नन्तु दैतेयैस्त्रैलोक्यं सचराचरं । प्राप्तश्चैश्वर्य्यमतुलं बलिना ब्रह्मवादिना ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने देवासुरयुद्धे षट्पञ्चाशदधिकद्विशततोऽध्यायः ॥ २५६ ॥
॥ जनमेजय उवाच ॥ पराजिताः सुरा दैत्यैः किमकुर्व्वत वै मुने । कथञ्च त्रिदिवं लब्धं भूयो देवैर्द्विजोत्तम ।
॥ वैशम्पायन उवाच ॥ श्रुत्वा वाणीन्तु तां दिव्यां सह देवैः सुराधिपः । प्राग्दिशं प्रस्थितः श्रीमानदित्यालयमुत्तमं । १४०४०
प्राप्यादित्यालयं शक्रः कथयामास तां गिरं । अदित्या या तदा युद्धे तेन दिव्या पुरा श्रुता ।
॥ अदितिरुवाच ॥ यद्येवं पुत्र युष्माभिर्न शक्यो हन्तुमाहवे । बलिर्विरोचनसुतः सर्व्वैश्चैव मरुद्गणैः ।
सहस्रशिरसा हन्तुं केवलं शक्यतेऽसुरः । तेनैकेन सहस्राक्ष न ह्यन्येन शतक्रतो ।
तद्वः पृच्छामि पितरं कश्यपं ब्रह्मवादिनं । पराजयार्थं दैत्यस्य बलेस्तस्य महात्मनः ।
ततोऽदित्या सह सुराः सम्प्राप्ताः कश्यपान्तिकं । अपश्यन् कश्यपं तत्र मुनिं दीप्ततपोनिधिं । १४०४५
आद्यं देवगुरुं दिव्यं क्लिन्नं त्रिषवणाम्बुभिः । तेजसा भास्कराकारं शौरमग्निशिखाप्रभं ।
न्यस्तदण्डं तपोयुक्तं बद्धकृष्णाजिनोत्तरं । वल्कलाजिनसंवीतं जटामण्डलभूषितं ।
हुताशमिव दीप्यन्तं साज्यमन्त्रपुरस्कृतं । स्वाध्यायनिरतं नित्यं वपुष्मन्तमिवानलं ।
तं ब्रह्मवादिनां श्रेष्ठं सुरासुरगुरुं प्रभुं । प्रतपन्तमिवादित्यं मारीचं दीप्ततेजसं ।
यः स्रष्टा सर्व्वभूतानां प्रजानां पतिरुत्तमः । आत्मभावविशेषेण तृतीयो यः प्रजापतिः । १४०५०
ततः प्रणम्य ते वीराः सहादित्या सुरर्षभाः । ऊचुः प्राञ्जलयः सर्व्वे ब्रह्माणमिव मानसाः ।
यच्छ्रुतं युधि शक्रेण सरस्वत्या समीरितं । अजेयस्त्रिदशैः सर्व्वैर्बलिर्दानव इत्युत ।
श्रुत्वा तु वचनं तेषां पुत्राणां कश्यपस्तदा । चकार बुद्धिं गमने ब्रह्मलोकाय लोककृत् ।
॥ कश्यप उवाच ॥ पुत्रा गच्छाम सदनं ब्रह्मणः परमाद्भुतं । यथाश्रुतञ्च तत्रैव ब्रह्मणे वदतानघाः ।
॥ वैशम्पायन उवाच ॥ ततो दित्या सह सुरा याम्यं कश्यपमन्वयुः । प्रस्थितं ब्रह्मसदनं देवर्षिगणसेवितं । १४०५५
ते मुहूर्त्तेन संप्राप्ता ब्रह्मलोकं दिवौकसः । दिव्यैः कामगमैर्यानैर्यथार्हं सुमहाबलाः ।
ब्रह्माणं द्रष्टुमिच्छन्तस्तपसो राशिमव्ययं । अभ्यगच्छन्त विस्तीर्णां ब्रह्मणः परमां सभां ।
षट्पदोद्गीतमधुरां सामगीतविमिश्रितां । श्रेयस्करीममित्रघ्नीं दृष्ट्वा संजहृषुर्मुदा ।
ऋग्भिश्च महाभागैर्व्वेदवेदाङ्गपारगैः । ऋचो बह्वृचमुख्यैश्च प्रेर्य्यमाणपदाक्षराः ।
शुश्रुवुस्तेऽमरव्याप्ता विततेषु च कर्म्मसु । यज्ञवेदाङ्गविदुषां पदक्रमविदां तथा । १४०६०
ब्रह्मर्षीणाञ्च घोषेण सा बभूव निनादिता । यज्ञसंस्तवविद्भिश्च शिक्षाविद्भिस्तथा द्विजैः ।
शब्दनिर्व्वचनार्थज्ञैः सर्व्वविद्याविशारदैः । मीमांसाहेतुवाक्यज्ञैः सर्व्ववादविशारदैः ।

घुष्टपुष्टस्वरैस्तत्र द्विजेन्द्रैर्व्वल्गुभाषितैः। नादितं ब्रह्मसदनं प्रवरं देवसद्मवत्।
ते तत्र समनुप्राप्ताः शृण्वन्तो वै ध्वनिं सुराः। पूतान्यात्मशरीराणि मेनिरे तु न संशयः।
तूष्णीम्भूता एकचित्ता ब्रह्मणो गतमानसाः। विस्मयोत्फुल्लनयना निरैक्षन्त परस्परं। १४०६५
नमस्कुर्व्वन्ति च पुनर्ब्रह्माणं परमं प्रभुं। मनसैव सुरश्रेष्ठाः पुरस्कृत्य तु काश्यपं।
पुनः संघुष्टपरमं वेदोच्चरणनिस्वनं। गम्भीरोदारमधुरं सुस्वरं हंसगद्गदं।
ऐक्यनानात्वसंयोगसमवायविशारदैः। लोकायतिकमुख्यैश्च शुश्रुवुः स्वनमीरितं।
तत्र तत्र च विप्रेन्द्रान् नियतान् संशितव्रतान्। जपहोमपरान्मुख्यान् ददृशुः काश्यपात्मजाः।
तस्यां सभायामास्ते वै ब्रह्मा लोकपितामहः। सुरासुरगुरुः श्रीमान् विदधद्देवमायया। १४०७०
उपासते च तत्रैनं प्रजानां पतयः प्रभुं। दक्षः प्रचेताः पुलहो मरीचिश्च द्विजोत्तमः।
भृगुरत्रिर्वशिष्ठश्च गौतमो नारदस्तथा। विद्या मनोऽन्तरीक्षञ्च वायुस्तेजो जलं मही।
शब्दः स्पर्शश्च रूपञ्च रसो गन्धस्तथैव च। प्रकृतिश्च विकारश्च यच्चान्यत् कारणं भुवः।
साङ्गोपाङ्गाश्चतुर्व्वेदाः सरहस्यपदक्रमाः। क्रियाश्च क्रतवश्चैव संकल्पः प्राण एव च।
एते चान्ये च बहवः स्वयम्भुवमुपस्थिताः। अर्थो धर्म्मश्च कामश्च द्वेषो हर्षश्च सर्व्वदा। १४०७५
शुक्रो बृहस्पतिश्चैव संवर्त्तो बुध एव च। शनैश्चरश्च राहुश्च ग्रहाः सर्व्वे तथैव च।
मरुतो विश्वकर्म्मा च नक्षत्राणि च भारत। दिवाकरश्च सोमश्च ब्रह्माणं समुपासते।
सावित्री दुर्गतरणी वाणी सप्तविधा तथा। सर्व्वाणि स्मृतिशास्त्राणि गाथाश्च निगमास्तथा।
भाष्याणि सर्व्वशास्त्राणि देहवन्ति विशाम्पते। क्षणा लवा मुहूर्त्ताश्च दिवा रात्रिश्च भारत।
अर्द्धमासाश्च मासाश्च ऋतवः षट् तथैव च। संवत्सराश्चतुर्युगं सन्ध्या रात्रिश्चतुर्विधा। १४०८०
कालचक्रञ्च यद्दिव्यं नित्यगं ध्रुवमव्ययं। एते चान्ये च बहवः स्वयम्भुवमुपस्थिताः।
तां प्रविष्टः सभां दिव्यां ब्रह्मणः सर्व्वकामदां। कश्यपस्त्रिदशैः सार्द्धं पुत्रैर्द्धर्म्मविदाम्बरः।
सर्व्वतेजोमयं दिव्यं ब्रह्मर्षिगणसेवितं। ब्राह्म्या श्रिया दीप्यमानमचिन्त्यं विगतक्लमं।
ब्रह्माणं वीक्ष्य ते सर्व्वे परमासनमास्थितं। शिरोभिः प्रणता दूरं परमेष्ठिनमव्ययं।
शिरोभिः स्पृश्य चरणौ नियताः परमात्मनः। विमुक्ताः सर्व्वपापेभ्यः शान्ता विगतकल्मषाः। १४०८५
दृष्ट्वा तु तान् सुरान् सर्व्वान् कश्यपेन सहागतान्। आह ब्रह्मा महातेजा देवानां प्रभुरीश्वरः।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने ब्रह्मलोकागमने सप्तपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५७ ॥

॥ ब्रह्मोवाच ॥ यदर्थमिह संप्राप्ता भवन्तः सर्व्व एव हि। विज्ञातमर्थ्यहमप्येतमर्थं महाबलाः।
भविष्यति च वः सोऽर्थः काङ्क्षितो यः सुरोत्तमाः। बलेर्दानवमुख्यस्य यो विजेता भविष्यति।
न केवलं सुरारीणामेको जेता स विश्वकृत्। त्रैलोक्यस्यापि जेताऽसौ देवानामपि च प्रभुः।
यो धाता सर्व्वभूतानां विश्वं यस्य सनातनः। पूर्व्वजं यं सदा प्राहुर्हेमगर्भं निदर्शनं। १४०९०
आत्मा वै येन विभुना कृतोऽजेयो महात्मना। बलेरतुलवीर्य्यस्य विश्वस्य जगतस्तथा।

प्रभवः स हि सर्व्वेषामस्माकमपि पूर्व्वजः । अचिन्त्यः स हि विश्वात्मा योगयुक्तः परन्तपः ।
तं देवापि महात्मानं न विदुः कोऽप्यसाविति । देवानस्मांश्च विश्वञ्च स वेत्ति पुरुषोत्तमः ।
तस्यैव तु प्रसादेन प्रवक्ष्ये परमां गतिं । यत्र योगं समास्थाय तपश्चरति दुश्चरं ।
क्षीरोदस्योत्तरे कूले उदीच्यां दिशि देवताः । अमृतं नाम परमं स्थानमाहुर्म्मनीषिणः । १४८९५
भवन्तस्तत्र वै गत्वा तपसा संशितव्रताः । अमृतं स्थानमासाद्य तपश्चरत दुश्चरं ।
ततः श्रोष्यथ विस्पष्टां स्निग्धगम्भीरनिस्वनां । उष्णागे तोयपूर्णस्य तोयदस्य समस्वनां ।
दिव्यां स्पष्टाक्षरपदां रम्यामभयदां शिवां । वाणीं परमसंस्कारां वरदां ब्रह्मवादिनीं ।
दिव्यां सरस्वतीं सत्यां सर्व्वकल्मषनाशिनीं । सर्व्वदेवातिदेवस्य भाषितां भावितात्मनः ।
तस्य व्रतसमाप्तौ तु यावद्व्रतविसर्ज्जनं । अमोघस्य तु देवस्य विश्वरूपां महात्मनः । १४९००
स्वागतं वः सुरश्रेष्ठा मत्सकाशमिहागताः । कस्य वा कं वरं देवा ददानि वरदः स्थितः ।
तं दितिः कश्यपश्चैव गृह्णीयातां वरं ततः । प्रणम्य शिरसा पादौ तस्मै योगात्मने तदा ।
भगवानेव नः पुत्रो भवत्विति न संशयः । उक्तश्च परया भक्त्या तथाऽस्त्विति स वक्ष्यति ।
देवा ब्रुवन्तु ते सर्व्वे भ्राता नस्त्वं भवेति च । तथाऽस्त्विति च स श्रीमान् वक्ष्यते सर्व्वलोककृत् ।
तस्माद्देवं गृहीत्वा तु वरं त्रिदशसत्तमाः । कृतकृत्याः पुनः सर्व्वे गच्छध्वं स्वं स्वमालयं । १४९०५
तथाऽस्त्विति सुराः सर्व्वे कश्यपोऽदितिरेव च । ब्रह्माणं वन्द्य चरणौ गताः सौम्यां दिशं प्रति ।
तेऽचिरेणैव संप्राप्ताः क्षीरोदं सरितां पतिं । यथोद्दिष्टं भगवता ब्रह्मणा ब्रह्मवादिना ।
तेऽतीत्य सागरान् सर्व्वान् पर्व्वतांश्च सकाननान् । नदीश्च विविधा दिव्याः पृथिव्यां सुरसत्तमाः ।
अपश्यंस्ते सुघोराश्च सर्व्वसत्त्वविवर्ज्जितां । अभास्कराममर्य्यादां तमसा संवृतां दिशं ।
अमृतं स्थानमासाद्य कश्यपेन सुराः सह । दीक्षिताः कामदं दिव्यं व्रतं वर्षसहस्रिकं । १४९१०
प्रसादार्थं सुरेशाय तस्मै योगाय धीमते । नारायणाय देवाय सहस्राक्षाय भूतये ।
ब्रह्मचर्य्येण मौनेन स्थानवीरासनेन च । दमेन च सुराः सर्व्वे तपो दुश्चरमाश्रिताः ।
कश्यपस्तत्र भगवान् प्रसादार्थं महात्मनः । उदैरयत वेदोक्तं यमाहुः परमं स्तवं ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने अष्टपञ्चाशदधिकद्विशततोऽध्यायः ॥ २५८ ॥

॥ कश्यप उवाच ॥ नमोऽस्तु ते देवदेवेश एकशृङ्ग वराह वृषार्चिष सिन्धुवृष वृषाकपे सुरवृष सुरनिर्म्मित अनिर्म्मित भद्र॰ कपिल विष्वक्सेन ध्रुव धर्म्म धर्म्मराज वैकुण्ठ वृतावर्त्त अनादिमध्यनिधन धनञ्जय शुचिश्रवः पृश्निज वृषिण अज अजय अमृतेशय सनातन विधातस्त्रिकाम त्रिधाम त्रिककुत्ककुद्मिन् दुन्दुभे महानाभ लोकनाभ पद्मनाभ लोकनाथ विरिञ्चे वरिष्ठ बहुरूप क्षय अक्षय विरूप विश्वरूप सत्याक्षर हंसाक्षर हव्यभुक् खण्डपरशो शुक्र मुञ्जकेश हंस महाहंस महदक्षर हृषीकेश सूक्ष्म परमसूक्ष्म तुराषाट् विश्वमूर्त्ते सुराग्रज नील सितासितो विरजस्तमो रजः सत्त्व सत्त्वधाम सर्व्वलोक सर्व्वलोकप्रतिष्ठ शिपिविष्ट सुतपस्तपोग्र अग्र अग्रज धर्म्मनाभ गभस्तिनाभ धर्म्मनेमे सत्यधाम सत्याक्षर गभस्तिनेमे

चन्द्ररथ विपाप्मन् त्वमेव समुद्रवास अनेकपात्सहस्रशीर्ष सहस्रसम्मित महाशीर्ष सहस्रदृक् सहस्रपात् अधोमुख महामुख महापुरुष पुरुषोत्तम सहस्रबाहो सहस्रमूर्त्ते सहस्रास्य सहस्रभुज सहस्राक्ष सहस्रप्रभ सहस्रशस्त्वामाहुर्वेदाः ।

विश्वदेव विश्वसम्भव सर्व्वेषामेव देवानां त्वमग्र आद्यो गतिः विश्वं त्वमाप्ययनं विश्वं त्वामाहुः पुष्पहास परम वरद त्वमेव वषट्कार वौषट् ओङ्कारं त्वामेकमाहुरग्र्यं मखभागप्राशिनं ॥ १४११५

शतधार सहस्रधार भूर्द्द भुवर्द्द स्वर्द्द भूर्भुवस्वर्द्द त्वमेव भूत भुवन स्वधा त्वमेव ब्रह्मप्रिय ब्रह्ममय ब्रह्मादिस्त्वमेव ॥

द्यौरसि पृथिव्यसि पूषाऽसि मातरिश्वाऽसि धर्म्मोऽसि मघवाऽसि होता पोता हन्ता नेता मन्ता होम्यहोता पर स्यरस्त्वं होम्यहोता त्वमेव ॥

आपाऽसि विश्ववाक् धाता परमेण धाम्ना त्वमेव दिग्भ्यः सुक् सुग्भाण्ड इज्योऽसि यष्टा त्वमसि समिद्धस्त्वं गतिर्गतिमताम सि मोक्षोऽधिधाताऽसि गुह्योऽसि सिद्धोऽसि धन्योऽसि योगोऽसि परमोऽसि यज्ञोऽसि सोमोऽसि यूपोऽसि दीक्षाऽसि दक्षि णाऽसि विश्वमसि ।

स्थविष्ठ स्थविर विश्वतुराषाट् हिरण्यगर्भ हिरण्यनाभ हिरण्यनारायण नारायणान्तर नृणामयन आदित्यवर्ण आ दित्य तेजो महापुरुष सुरोत्तम । आदिदेव पद्मनाभ पद्मेशय पद्माक्ष पद्मगर्भ हिरण्याक्ष केशवशुक्ल विश्वदेव विश्वतोमुख विश्वाक्ष स्त्रिवसम्भव विश्वभुक् त्वमेव ॥

भूर्विक्रम भुवर्विक्रम स्वर्विक्रम क्रमावभुक्रमाक्रम सुविभुः प्रभाकरशम्भुः स्वयम्भूश्च भूतादिः । भूतात्मन् प्रभुश्चतुर्म्महा भूत विश्वभूत विश्वं त्वमेव विश्वगोप्ताऽसि विश्वसम्भव । पवित्रमसि होत्रमसि सत्यमसि तेजोऽसि सर्व्वमसि हविर्विश्वभुक् ऊर्द्ध कर्म्मन् अमृतेन्धन अमृतन्धम दिवस्पते ओतप्रोत विश्वसृक् विश्वपते घृतार्चिः अग्ने रोहिण सुरासुरगुरो महादेव नृदेवदेव । त द्रुहिन अनन्तकर्म्मन् वंश प्राग्वंश विश्वपास्त्वं त्वमेव विश्वं विभर्षि वरार्थिनो नस्त्रायस्वेति ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने महापुरुषस्तवे ऊनषष्ट्यधिकद्विशतोऽध्यायः ॥ २५९ ॥

॥ वैशम्पायन उवाच ॥ नारायणस्तु भगवान् श्रुत्वैतत्परमं स्तवं । ब्रह्मज्ञेन द्विजेन्द्रेण कश्यपेन समीरितं ।

स्निग्धगम्भीरनिर्घोषं जीमूतघननिस्वनं । मनसा प्रीतियुक्तेन त्रिबुधानां महात्मनां ।

उवाच वचनं सम्यक् हृष्टपुष्टपदाक्षरं । अकाशात् प्रभुस्त्वेषे शब्दो दर्शनं नोपलभ्यते ।

श्रीमान् प्रीतमना देवः प्रोवाच प्रभुरीश्वरः ।

॥ विष्णुरुवाच ॥ प्रीतोऽस्मि वः सुरश्रेष्ठाः सर्व्वेषामेव निश्चयात् । वरं वृणुत भद्रं वो वरदोऽस्मि सुरोत्तमाः । १४११९

॥ कश्यप उवाच ॥ यदेव भगवान् प्रीतः सर्व्वेषाममरोत्तम । तदेव सत्यकत्याः सत्त्वं हि नः परमा गतिः ।

यदि प्रसन्नो भगवान् दातव्यश्च वरो यदि । वासवस्यानुजो भ्राता ज्ञातीनां नन्दिवर्द्धनः ।

अदित्यामेव वै श्रीमान् भगवानस्तु मे सुतः ।

॥ वैशम्पायन उवाच ॥ अदितिर्देवमाता च एतमेवार्थमुत्तमं । पुत्रार्थे वरदं प्राह भगवन्तं वरार्थिनी ।

याचे त्वां पुत्रकामा वै भवान् पुत्रो भवत्विति । १४१२०

॥ देवा ऊचुः ॥ निःश्रेयसार्थं सर्व्वेषां देवानां हि महातपाः । भ्राता भर्त्ता च धाता च शरणं त्वं भवस्व नः ।

अदित्याः पुत्रतां याते त्वयि देवाः सवासवाः । देवशब्दं वदिष्यन्ति काश्यपस्यात्मजो भव ।
॥ वैशम्पायन उवाच ॥ ततस्तानब्रवीद्विष्णुर्देवान् कश्यपमेव च । एवं भवतु भद्रं वो यथेष्टं काममाप्नुत ।
सर्व्वेषामेव युष्माकं ये भविष्यन्ति शत्रवः । मुहूर्त्तमपि ते सर्व्वे न स्थास्यन्ति ममाग्रतः ।
हत्वाऽसुरगणान् सर्व्वान् ये चान्ये देवशत्रवः । करिष्ये देवताः सर्व्वा यज्ञभागाग्रभोजनाः । १४१३५
हव्यादांश्च सुरान् सर्व्वान् कव्यादांश्च पितॄनपि । करिष्ये विबुधश्रेष्ठाः पारमेष्ठ्येन कर्म्मणा ।
यथागतेन मार्गेण निवर्त्तध्वं सुरोत्तमाः । देवमातुस्तथाऽदित्याः कश्यपस्यामितात्मनः ।
यथामनीषितं कर्त्ता गच्छध्वं स्वं स्वमालयं ।
॥ वैशम्पायन उवाच ॥ एवमुक्ते तु वचने विष्णुना प्रभविष्णुना । देवाः प्रहृष्टमनसः पूजयन्ति स्म सर्व्वशः ।
विश्वेदेवा महात्मानः कश्यपोऽदितिरेव च । साध्या मरुद्गणाश्चैव शक्रश्चैव महाबलः । १४१४०
नमस्कृत्य सुरेशाय तस्मै देवाय रंहसे । प्रयाताः प्राग्दिशं पुण्यां विपुलं काश्यपाश्रमं ।
ते काश्यपाश्रमं गत्वा ब्रह्मर्षिगणसेवितं । चेरुः स्वाध्यायनिरता अदित्या गर्भमीप्सवः ।
अदितिर्देवमाता च गर्भं दध्रेऽमितौजसं । भूतात्मानं महात्मानं दिव्यं वर्षसहस्रिकं ।
पूर्णे वर्षसहस्रे तु प्रसूता गर्भमुत्तमं । सुराणां शरणं देवमसुराणां विनाशनं ।
गर्भस्थेन तु तेनैव परित्रातास्तदा सुराः । आददानेन तेजांसि त्रैलोक्यस्य महात्मना । १४१४५
तस्मिन् जाते तु देवेशे त्रैलोक्यस्य सुखावहे । भयदे दैत्यसंघानां सुराणां नन्दिवर्द्धने ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने वामनप्रसूतौ षष्टिकद्विशततमोऽध्यायः ॥ २६० ॥
॥ वैशम्पायन उवाच ॥ प्रजानां पतयः सप्त सप्त चैव महर्षयः । तस्य देवस्य जातस्य नमस्कारं प्रचक्रिरे ।
भरद्वाजः कश्यपो गौतमश्च विश्वामित्रो जमदग्निर्वशिष्ठः । यत्रोदितो भास्करेऽभूत् प्रनष्टे सोऽप्यत्रापि भगवानाजगाम ।
मरीचिरङ्गिराश्चैव पुलस्त्यः पुलहः क्रतुः । दक्षः प्रजापतिश्चैव नमस्कारं प्रचक्रिरे ।
और्व्वो वशिष्ठपुत्रश्च स्तम्बः कश्यप एव च । कपीवानकपीवांश्च दत्तोलिश्च्यवनस्तथा । १४१५०
वशिष्ठपुत्राः सप्तासन् वाशिष्ठा इति विश्रुताः । हिरण्यगर्भस्य सुता ऊर्ज्जजाताः सुतेजसः ।
गार्ग्यः पृथुस्तथैवाग्र्यो जान्यो वामन एव च । देवबाहुर्यदुध्रश्च पर्ज्जन्यश्चैव सोमजः ।
हिरण्यरोमा वेदशिराः सत्यनेत्रस्तथैव च । विश्वोऽतिविश्वश्च्यवनः सुधामा विरजास्तथा ।
अतिनामा सहिष्णुश्च नमस्कारमकुर्व्वत । विद्योतमानवपुषः सर्व्वाभरणभूषिताः ।
उपानृत्यन्त देवेशं विष्णुमप्सरसां गणाः । ततो गन्धर्व्वतूर्य्येषु प्रणदत्सु विहायसि । १४१५५
बहुभिः सह गन्धर्व्वैः प्रागायत च तुम्बुरुः । महाश्रुतिश्चित्रशिरा ऊर्णायुरनघस्तथा ।
गोमायुः सूर्य्यवर्चाश्च सोमवर्चाश्च सप्तमः । युगपस्तृणपः कार्ष्णिर्नन्दिश्चित्ररथस्तथा ।
त्रयोदशः शालिशिराः पर्ज्जन्यश्च चतुर्दशः । कलिः पञ्चदशस्त्वत्र नारदश्चैव षोडशः ।
हाहाहूहूश्च गन्धर्व्वौ हंसश्चैव महाद्युतिः । इत्येते देवगन्धर्व्वा उपागायन्त केशवं ।
तथैवाप्सरसो हृष्टाः सर्व्वालङ्कारभूषिताः । उपानृत्यन्त देवेशं सर्व्वाङ्गशुभदर्शनाः । १४१६०

ननृतुश्च महाभागा जगुश्चायतलोचनाः । सुमध्या चारुमध्या च प्रियमुख्या वरानना ।
अनूका च तथा यामी मिश्रकेशी अलम्बुषा । मरीचिः शुचिका चैव विद्युत्पर्णा तिलोत्तमा ।
अद्रिका लक्षणा चैव रम्भा तद्वन्मनोरमा । असिता च सुबाहुश्च अविघ्ना सुभगा तथा ।
उर्व्वशी चित्रलेखा च सुग्रीवी च सुलोचना । पुण्डरीकसुगन्धा च सुरथा च प्रमाथिनी ।
काम्या शारद्वती चैव तथाऽन्यास्तत्र संघशः । मेनका सहजन्या च पर्णिका पुञ्जिकस्थला । १४१६५
एताश्च परमोऽन्याश्च प्रनृत्यन्ति सहस्रशः । धाताऽर्य्यमा च मित्रश्च वरुणोऽंशो भगस्तथा ।
इन्द्रः पूषा विवस्वांश्च त्वष्टा च सविता तथा । कथितो विष्णुरित्येव काश्यपेयो गणस्तथा ।
आदित्या द्वादशैते तु ज्वलन्तो वह्निवर्च्चसः । चक्रुस्तस्य सुरेशस्य नमस्कारं महात्मनः ।
मृगव्याधश्च सर्पश्च निर्ऋतिश्च महायशाः । अजैकपादहिर्बुध्नः पिनाकी चापराजितः ।
दहनोऽथेश्वरश्चैव कपाली च विशाम्पते । स्थाणुर्भवश्च भगवान्रुद्रास्तत्राऽवतस्थिरे । १४१७०
अश्विनौ वसवश्चाष्टौ मरुतश्च महाबलाः । विश्वेदेवाश्च साध्याश्च तस्य प्राञ्जलयः स्थिताः ।
शेषानुजा महाभागा वासुकिप्रमुखास्तथा । कच्छपश्चापकुञ्जश्च धृतराष्ट्रबलाहकौ ।
अष्टव्यास्तेजसा दीप्ता महाक्रोधा महाबलाः । एते नागा महात्मानः सर्व्वे प्राञ्जलयः स्थिताः ।
एते चान्ये च बहवो नागास्तस्य महात्मनः । तस्थुः प्राञ्जलयः सर्व्वे नमस्कारं प्रचक्रिरे ।
तार्क्ष्यश्चारिष्टनेमिश्च गरुडश्च महाबलः । अरुणश्चारुणिश्चैव तस्य प्राञ्जलयः स्थिताः । १४१७५
पितामहश्च भगवान् स्वयमागम्य लोककृत् । प्राह देवगुरुः श्रीमान् सह सर्व्वैर्महात्मभिः ।
॥ ब्रह्मोवाच ॥ यस्मात् प्रसूयते लोकः प्रभविष्णुः सनातनः । तस्माल्लोकेश्वरः श्रीमान् विष्णुरेव भवत्वयं ।
एवमुक्त्वा तु भगवान् सार्द्धं देवर्षिभिः प्रभुः । नमस्कृत्य सुरेशाय जगाम त्रिदिवं पुनः ।
स तु जातः सुरेशानः कश्यपस्यात्मजः प्रभुः । नवदुर्द्दिनमेघाभो रक्ताक्षो वामनाकृतिः ।
श्रीवत्सेनोरसि श्रीमान् रोमजातेन राजता । उत्फुल्लनयनाः सर्व्वाः पश्यन्त्यप्सरसस्तदा । १४१८०
दिवि सूर्य्यसहस्रस्य भवेद्युगपदुत्थिता । यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ।
सुरोपेन्द्रतिमः श्रीमान् भूर्भुवोभूतभावनः । शुचिरोमा महोरस्कः सर्व्वतेजोमयः प्रभुः ।
या गतिः पुण्यशीलानामगतिः पापकर्म्मणां । योगयुक्ता महात्मानो यं विदुर्योगवित्तमं ।
यस्याष्टगुणमैश्वर्य्यं यमाहुर्देवसत्तमं । यं प्राप्य शाश्वतं विप्रा नियता मोक्षकाङ्क्षिणः ।
जन्मतो मरणाच्चैव मुच्यन्ते योगभाविताः । यदेतत्तप इत्याहुः सर्व्वाश्रमनिवासिनः । १४१८५
सेवन्ते यं यताहारा दुश्चरं व्रतमास्थिताः । योऽनन्त इति नागेषु सेव्यते सर्व्वभोगिभिः ।
सहस्रमूर्द्धा रक्ताक्षः शेषादिभिरनुत्तमैः । यो यज्ञ इति विप्रेन्द्रैरिज्यते स्वर्गलिप्सुभिः ।
नानाख्यानगतः श्रीमानेकः कविरनुत्तमः । यं वेदा गान्ति वेत्तारं यज्ञभागप्रदायिनं ।
वृषार्चिश्चन्द्रसूर्य्याक्षं देवमाकाशविग्रहं । स उवाच सुरान् सर्व्वान् वाचा वै परया विभुः ।
जानन्नपि महातेजा गतो योगेन बालतां । किं करोमि सुरश्रेष्ठा वरं कस्य ददामि वः । १४१९०

यत् काङ्क्षितं वः सर्व्वेषां तद्दै ब्रूत मुदा युताः । तस्य तद्वचनं श्रुत्वा वामनस्य महात्मनः ।
सर्व्वे ते हृष्टमनसो देवाः कश्यपनन्दनं । ऊचुः प्राञ्जलयो विष्णुं सुराः शक्रपुरोगमाः ।
ब्रह्मणो वरदानेन हृतं नो निखिलं जगत् । तपसा महता चैव विक्रमेण बलेन च ।
बलिना दैत्यमुख्येन सर्व्वेण महात्मना । अवध्यः किल सोऽस्माकं सर्व्वेषां देवसत्तम ।
भवान् प्रभवते तस्य नान्यः कश्चन सुव्रत । तत् प्रपद्यामहे सर्व्वे भवन्तं शरणार्थिनः ।
शरण्यं वरदं देवं सर्व्वभूतभयापहं । कश्यपाच्च हितार्थाय लोकानाञ्च सुरेश्वर ।
प्रियार्थञ्च तथाऽदित्याः कश्यपस्य तथैव च । कव्यं पितॄणामुचितं सुराणां हव्यमुत्तमं ।
प्रवर्त्ततां महाबाहो यथा पूर्व्वं सुरोत्तम । आनृण्यार्थं सुरेशस्य वासवस्य महात्मनः ।
प्रत्यानय सुरेन्द्रस्य त्रैलोक्यमिदमव्ययं । क्रतुना वाजिमेधेन यजते स हि दानवः ।
यत्प्रत्यानयने युक्तं लोकानां तद्विचिन्तय ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने शक्रवाक्ये एकषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६१ ॥

॥ वैशम्पायन उवाच ॥ एवमुक्ते तदा देवैर्विष्णुर्वामनरूपधृक् । प्रहर्षयन्नुवाचाथ सर्व्वान्देवानिदं वचः ।
॥ वामन उवाच ॥ तस्य यज्ञसकाशं मां महर्षिर्वेदपारगः । बृहस्पतिर्महातेजा नयत्वङ्गिरसः सुतः ।
तस्याहं समनुप्राप्तो यज्ञवाटं सुरोत्तमाः । विधास्ये यथायुक्तं त्रैलोक्यहरणाय वै ।
॥ वैशम्पायन उवाच ॥ ततो बृहस्पतिः श्रीमानानयद्वामनं प्रभुं । यज्ञवाटं महातेजा दानवेन्द्रस्य धीमतः ।
मौञ्जी यज्ञोपवीती च छत्री दण्डाजिनी तथा । वामनो धृतरक्षो भगवान् बालरूपधृक् ।
लोकेश्वरेश्वरः श्रीमान् सुरैर्ब्रह्मपुरोगमैः । अन्वास्यमानो भगवानदृष्टोऽप्ययम् इहाव्रजत् ।
दानवाधिपतेस्तस्य बलेर्वैरोचनस्य ह । यज्ञवाटमचिन्त्यात्मा जगाम सुरसत्तमः ।
पालितेऽपि हि दैतेयैः सांग्रामिकपरिच्छदैः । द्वारे दानवसम्बाधे सहसैव विवेश ह ।
ऋत्विग्भिश्चैव सम्बाध्यैः सर्व्वतः परिवारितं । दैत्यदानवराजेन्द्रमुपतस्थे वरं बली ।
तं गत्वा यज्ञवाटन्तु ब्रह्मर्षिगणसंकुलं । आत्मानमेव भगवान् वर्णयामास तं क्रतुं ।
वर्णयित्वा यथान्यायं यज्ञं यज्ञः सनातनः । विस्तरेणामरश्रेष्ठः प्रयोगैर्विविधैस्तथा ।
शुक्रादीनृत्विजश्चापि यज्ञकर्म्मविचक्षणः । सर्व्वानेव निजग्राह चकार च निरुत्तरान् ।
आराद्य बलेस्तस्य ऋत्विजामभितस्तथा । यज्ञमात्मानमेवासौ हेतुभिः कारणं विभुः ।
वैदिकैरप्रकाशैश्च पुनरप्यथ भारत । प्रत्यक्षमृषिसंघानां दर्शयामास चित्रगुः ।
ततो निरुत्तरान् दृष्ट्वा सोपाध्यायानृषीन् कृतान् । अदृष्टेनापि दृष्टांस्तान् वामनेन महौजसा ।
अद्भुतश्चापि मेने स वैरोचनसुतो बलिः । मूर्द्ध्ना कृताञ्जलिश्चेदमब्रवीद्विस्मितो वचः ।
कुतस्त्वं कोऽसि कस्यासि किञ्चेहास्ति प्रयोजनं । नैवंविधपरिज्ञानो दृष्टपूर्व्वो मया द्विजः ।
बालो मतिमतां श्रेष्ठो ज्ञानविज्ञानकोविदः । शिष्टवाग्रूपसम्पन्नो मनोज्ञः प्रियदर्शनः ।
नेदृशाः सन्ति देवानामृषीणाञ्चापि सूनवः । न नागानां न यक्षाणां नासुराणां न रक्षसां ।

न पितॄणां न सिद्धानां गन्धर्व्वाणां तथैव च । योऽसि सोऽसि नमस्तेऽस्तु ब्रूहि किं करवाणि ते । १४२२०
॥ वैशम्पायन उवाच ॥ उक्त एवमचिन्त्यात्मा बलिना वामनस्तदा । प्रोवाचोपायतत्त्वज्ञः स्मितपूर्व्वमिदं वचः ।
॥ विष्णुरुवाच ॥ अहो यज्ञोऽसुरेन्द्रस्य बहुभक्ष्यः सुसंस्कृतः । पितामहस्येव पुरा यजतः परमेष्ठिनः ।
सुरेश्वरस्य शक्रस्य यमस्य वरुणस्य च । विशेषितस्तथा यज्ञो दानवेन्द्र महाबल ।
यजता वाजिमेधेन क्रतूनां प्रवरेण तु । सर्व्वपापविनाशाय स्वर्गमार्गप्रदर्शिना ।
सर्व्वकाममयो ह्येष सम्मतो ब्रह्मवादिनां । क्रतूनां प्रवरः श्रीमानश्वमेध इति स्मृतः । १४२२५
सुवर्णशृङ्गो हि महानुभावो लोहखुरो वायुजवो महात्मा । सत्येषणः काञ्चनगर्भगौरः स विश्वयोनिः परमो हि मेध्यः ।
आस्थाय वै वाजिनमश्वमेधमिष्ट्वा नरा दुष्कृतमुत्तरन्ति । आज्ञस्य यं वेदविदो द्विजेन्द्रा वैश्वानरं वाजिनमश्वमेधं ।
यथाश्रमाणां प्रवरो गृहाश्रमो यथा नराणां प्रवरा द्विजातयः । यथाऽसुराणां प्रवरो भवानिह तथा क्रतूनां प्रवरोऽश्वमे ।
॥ वैशम्पायन उवाच ॥ एतच्छ्रुत्वा तु दैत्येन्द्रो वामनेन समीरितं । मुदा परमया युक्तः प्राह दैत्यपतिर्व्वलि
॥ बलिरुवाच ॥ कस्यासि ब्राह्मणश्रेष्ठ किमिच्छसि ददामि ते । वरं वरय भद्रं ते यथेष्टं काममाप्नुहि । १४२३०
॥ वामन उवाच ॥ न राज्यं न च यानानि न रत्नानि न च स्त्रियः । कामये यदि तुष्टोऽसि धर्म्मे च यदि ते मतिः ।
गुर्व्वर्थं मे प्रयच्छस्व पदानि त्रीणि दानव । त्वमग्निशरणार्थाय एष मे परमो वरः ।
॥ बलिरुवाच ॥ त्रिभिः किं तव विप्रेन्द्र पदैः प्रवदताम्वर । शतं शतसहस्राणां पदानां मार्गतां भवान् ।
॥ शुक्र उवाच ॥ मा ददस्व महाबाहो न त्वं वेत्सि महासुर । एष मायाप्रतिच्छन्नो भगवान् प्रवरो हरिः ।
वामनं रूपमास्थाय शक्रप्रियचिकीर्षया । त्वां वञ्चयितुमायातो बटुरूपधरो हरिः । १४२३५
एवमुक्तः स शुक्रेण चिरं सञ्चिन्त्य वै बलिः । अर्घ्येण समायुक्तः किमतः याचयिष्यते ।
गृह्य हस्तेन संभ्रान्तो भृङ्गारं कनकोद्भवं ।
॥ बलिरुवाच ॥ विप्रेन्द्र प्राङ्मुखस्तिष्ठ स्थितोऽस्मि कमलेक्षण । प्रतीच्छ देहि किं भूमिं का मात्रा भोः पदत्रयं ।
दत्तं वः पातय जलं नैव मिथ्या भवेद्गुरुः ।
॥ शुक्र उवाच ॥ भो न देयं कुतो दैत्य विज्ञातोऽयं मया ध्रुवं । कोऽयं विष्णुरहो प्रीतिर्वञ्चितस्त्वं न वञ्चितः । १४२४०
कथं न नाथो यदि विष्णुरेष स्वयमुपस्थितः । दास्यामि देवदेवाय यद्यदिच्छत्ययं प्रभुः ।
को वाऽन्यः पात्रभूतोऽस्मात् विष्णोः परतरं भवेत् । एवमुक्त्वा बलिः शीघ्रं पातयामास वै जलं ।
॥ वामन उवाच ॥ पदानि त्रीणि दैत्येन्द्र पर्य्याप्तानि ममानघ । यन्मया पूर्व्वमुक्तं हि तत्तथा न तदन्यथा ।
॥ वैशम्पायन उवाच ॥ इत्येतद्वचनं श्रुत्वा वामनस्य महौजसः । कृष्णाजिनोत्तरीयं स कृत्वा वैरोचनिस्तदा ।
एवमस्त्विति दैत्येशो वाक्यमुक्त्वाऽरिसूदनः । ततो वारिसमापूर्णं भृङ्गारं स परामृशत् । १४२४५
वामनो ह्यसुरेन्द्रस्य चिकीर्षुः कदनं महत् । क्षिप्रं प्रसारयामास दैत्यक्षयकरं करं ।
प्राङ्मुखस्यापि दैत्यप्रवरस्य सुमनसा जलं । दातुकामः करे यावत्तावत्तं प्रत्यषेधयत् ।
तस्य तद्रूपमालोक्य ह्यचिन्त्यस्यामितौजसः । अभूतपूर्व्वं देवारेर्जिहीर्षोः श्रियमासुरीं ।
इङ्गितज्ञो महाप्राज्ञः प्रह्लादस्त्वब्रवीद्वचः ।

॥ प्रह्लाद उवाच ॥ मा ददस्व जलं हस्ते वटोर्व्वामनरूपिणः । स स्वामी येन ते पूर्व्वं नित्यः प्रपितामहः । १४२५०
विष्णुरेष महाप्राज्ञस्त्वां वञ्चयितुमागतः ।
॥ बलिरुवाच ॥ हन्त तस्मै प्रदास्यामि देवायेमं प्रतिग्रहं । अनुग्रहकरं देवमीदृशमन्यतः प्रभुं ।
ब्राह्मणोऽपि गरीयांसं पात्रं लप्स्यामहे कथं । अवश्यमसुरश्रेष्ठ दातव्यं दानिनेन वै ।
इत्युक्त्वाऽसुरसंघानां मध्ये वैरोचनिस्तदा । देवाय प्रददौ तस्मै पदानि त्रीणि विष्णवे ।
॥ प्रह्लाद उवाच ॥ दानवेश्वर मादास्त्वं विप्रायास्मै प्रतिग्रहं । नैनं विप्रशिशुं मन्ये नेदृशो भवति द्विजः । १४२५५
रूपेणानेन दैत्येन्द्र सत्यमेतद्ब्रवीमि ते । नरसिंहमहं मन्ये तमेव पुनरागतं ।
एवमुक्तस्तदा तेन प्रह्लादेनामितौजसा । प्रह्लादमब्रवीद्वाक्यमिदं निर्भर्त्सयन्निव ।
॥ बलिरुवाच ॥ देहीति याचते यो हि नास्तीत्याह च योऽसुर । उभयोरप्यलक्ष्मीर्वै भागस्तं विशते नरं ।
प्रतिज्ञाय तु यो विप्रे न ददाति प्रतिग्रहं । स याति नरकं पापी पितृगोत्रसमन्वितः ।
अलक्ष्मीभयभीतोऽहं ददाम्यस्मै वसुन्धरां । प्रतिग्रहीता वाऽप्यन्यः कश्चिन्नास्माद्द्विजोऽथ वै । १४२६०
नाधिको विद्यते यस्मात्तद्ददामि वसुन्धरां । ह्रदयस्य च मे तुष्टिः परा भवति दानव ।
दृष्ट्वा वामनरूपेण याचन्तं द्विजपुङ्गवं । एष तस्मात् प्रदास्यामि न स्थास्यामि निवारितः ।
भूयश्च प्राब्रवीदेनं वामनं वटुरूपिणं । त्वयैः स्वयमते किमेते पादैस्त्रिभिरनुत्तम ।
कृत्स्नां ददामि ते विप्र पृथिवीं सागरैर्वृतां ।
॥ वामन उवाच ॥ न पृथ्वीं कामये कृत्स्नां सन्तुष्टोऽस्मि पदैस्त्रिभिः । एष एव हि निष्ठो मे वरो दानवसत्तम । १४२६५
॥ वैशम्पायन उवाच ॥ तथाऽस्त्विति बलिः प्रोक्त्वा स्वर्थयामास दानवः । पदानि त्रीणि देवाय विष्णवेऽमिततेजसे ।
तोये तु पतिते हस्ते वामनोऽभूदवामनः । सर्व्वदेवमयं रूपं दर्शयामास वै प्रभुः ।
भूः पादौ द्यौः शिरश्चास्य चन्द्रादित्यौ च चक्षुषी । पादाङ्गुल्यः पिशाचाश्च हस्ताङ्गुल्यश्च गुह्यकाः ।
विश्वेदेवाश्च जानुस्था जंघे साध्याः सुरोत्तमाः । यक्षा नखेषु संभूता रेखास्वप्सरसस्तथा ।
विद्युतो विपुला दृष्टिः केशाः सूर्य्यांशवस्तथा । तारका रोमकूपाणि रोमाणि च महर्षयः । १४२७०
बाहवो विदिशस्तस्य दिशः श्रोत्रे तथैव च । अश्विनौ श्रवणे चास्य नासा वायुर्महाबलः ।
प्रसादश्चन्द्रमाश्चैव मनो धर्म्मस्तथैव च । सत्यमस्याभवद्वाणी जिह्वा देवी सरस्वती ।
ग्रीवाऽदितिर्म्महादेवी तालुः सूर्य्यश्च दीप्तिमान् । द्वारं स्वर्गस्य नाभिर्वै मित्रस्त्वष्टा च वै भ्रुवौ ।
मुखं वैश्वानरश्चास्य वृषणौ तु प्रजापतिः । ह्रदयं भगवान् ब्रह्मा पुंस्त्वं वै कश्यपो मुनिः ।
पृष्ठेऽस्य वसवो देवा मरुतः सर्व्वसन्धिषु । सर्व्वच्छन्दांसि दशना ज्योतींषि विपुलाः प्रभाः । १४२७५
उरो रुद्रो महादेवो धैर्य्यञ्चास्य महार्णवः । उदरञ्चास्य गन्धर्व्वा भुजगाश्च महाबलाः ।
लक्ष्मीर्म्मेधा धृतिः कान्तिः सर्व्वविद्याश्च वै कटिः । ललाटमस्य परमं परम् स्थानं परमात्मनः ।
सर्व्वज्योतींषि यानीह तपः शक्रश्च देवराट् । तस्य देवातिदेवस्य तेजो ह्यासन्महात्मनः ।
स्तनौ कक्षौ च वेदाश्च ओष्ठौ चास्य मखास्तथा । इष्टयः पशुबन्धाश्च द्विजानां चेष्टितानि च ।

तस्य देवमयं रूपं दृष्ट्वा विष्णोर्महासुराः । उपासर्पन्त संक्रुद्धाः पतङ्गा इव पावकं ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने विश्वरूपप्रकाशे द्विषष्ट्यधिकद्विशततोऽध्यायः ॥ २६२ ॥

॥ वैशम्पायन उवाच ॥ शृणु नामानि सर्व्वेषां रूपाण्याभरणानि च । आयुधानि च मुख्यानि दानवानां महात्मनां ।

विप्रचित्तिः शिविः शङ्कुरयःशङ्कुस्तथैव च । अयःशिरा अश्वशिरा हयग्रीवश्च वीर्य्यवान् ।

वेगवान् केतुमानुग्रः सोग्रव्यग्रो महासुरः । पुष्करः पुष्कलश्चैव साश्वोऽश्वपतिरेव च ।

प्रह्रादो ऽश्वशिराः कुम्भः संह्रादो गगनप्रियः । अनुह्रादो हरिहरौ वराहः संहरोऽरुजः ।

वृषपर्व्वा विरूपाक्षो मुनीन्द्रश्चन्द्रलोचनः । निष्प्रभः सुप्रभः श्रीमांस्तथैव च निरूदरः ।

एकवक्त्रो महावक्त्रो द्विवक्त्रः कालसन्निभः । दृहत्कीर्त्तिर्महाजिह्वः शङ्कुकर्णो महाध्वनिः ।

शरभः शलभश्चैव कुपथः कापथः क्रथः । दीर्घजिह्वोऽर्कनयनो मृदुचापो मृदुप्रियः ।

वायुर्गविष्ठो नमुचिः शम्बरो विषरो महान् । चन्द्रहन्ता क्रोधहन्ता क्रोधवर्द्धन एव च ।

कालकः कालकाचश्च वृत्रः क्रोधो विमोचनः । गरिष्ठश्च हविष्ठश्च प्रलम्बो नरकः पृथुः ।

इन्द्रतापनवातापी केतुमान् बलदर्पितः । असिलोमा पुलोमा च वास्कलः प्रमदो मदः ।

खसृमः कालवदनः करालः केशिरेव च । एकाक्षश्चैव राहुश्च तुहुण्डः समलः स्वपः ।

एते चान्ये च बहवः क्रममाणं त्रिविक्रमं । उपतस्थुर्महात्मानं विष्णुं दैत्यगणास्तदा ।

पाशोद्यतकराः केचिद्व्यादितास्याः खरस्वनाः । शतघ्नीचक्रहस्ताश्च परश्वधधरास्तथा ।

प्रासमुद्गरहस्ताश्च तथा परिघपाणयः । महाशिलाव्यग्रकराः शूलहस्ता महाबलाः ।

महावृक्षोद्यतकरास्तथैव च धनुर्द्धराः । महापट्टिशहस्ताश्च तथा मुषलपाणयः ।

गदाभुशुण्डीहस्ताश्च वज्रहस्तास्तथाऽपरे । असिकम्पनहस्ताश्च दानवा युद्धदुर्म्मदाः ।

नानाप्रहरणा घोरा नानावेषा महाबलाः । कूर्म्मकुक्कुटवक्त्राश्च हंसवक्त्रास्तथाऽपरे ।

खरोष्ट्रवदनाश्चैव वराहवदनास्तथा । भीमा मकरवक्त्राश्च शिशुमारमुखास्तथा ।

मार्ज्जारशुकवक्त्राश्च अश्ववक्त्राश्च दानवाः । गोवक्त्रा बभ्रुवक्त्राश्च घोरा मृगमुखास्तथा ।

उष्ट्रश्यालकिवक्त्राश्च गजवक्त्राश्च दानवाः । नकुलश्येनवक्त्राश्च पारावतमुखास्तथा ।

शाखामृगाननाः शूराश्छागाऽविमहिषाननाः । सारमेयमुखा रौद्राः क्रौञ्चवक्त्राश्च दानवाः ।

चक्रवाकमुखाश्चैव गोधावक्त्रास्तथाऽपरे । नक्रघोराननाः क्रूरा व्याघ्रशार्दूलवक्त्रकाः ।

खड्गिसिंहमुखाश्चैव मयूरवदनास्तथा । गजेन्द्रचर्म्मवसनास्तथा कृष्णाजिनाम्बराः ।

चीरसंवृतगात्राश्च तथा फलकवाससः । उष्णीषिणो मुकुटिनस्तथा कुण्डलिनोऽपरे ।

किरीटिनो लम्बशिखाः कम्बुग्रीवाः सुवर्च्चसः । नानावेषधरा दैत्या नानामाल्यानुलेपनाः ।

स्वान्यायुधानि दीप्तानि प्रगृह्यासुरसत्तमाः । क्रममाणं हृषीकेशमुपातिष्ठन्त दानवाः ।

प्रमथ्य सर्व्वान् दैतेयान् पादहस्ततलैः प्रभुः । जहार त्रिदिवं देवस्त्रिभिर्विक्रमणैर्हरिः ।

रूपं कृत्वा महाकायं जहाराशु स मेदिनीं । त्रैलोक्यं क्रममाणस्य द्युतिरादित्यसन्निभा ।

तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे। नभः प्रक्रममाणस्य सक्थिदेशे महात्मनः।
परं विक्रममाणस्य पादमूले व्यवस्थितौ। विष्णोरमितवीर्य्यस्य वदन्त्येवं द्विजातयः। १४२१०
जित्वा लोकांस्ततः कृत्स्नान् हत्वा चासुरपुङ्गवान्। ददौ शक्राय वसुधां हरिर्लोकनमस्कृतः।
सुतलं नाम पातालमधस्ताद्वसुधातले। बलेर्द्दत्तं निवासाय विष्णुना प्रभविष्णुना।
तद्वाप्यासुरश्रेष्ठश्चकार मतिमुत्तमां। रसातलतले वासमकरोदसुराधिपः।
तत्रस्थस्य महातेजा ध्यानं परमुपाश्रितः। उवाच वचनं धीमान् विष्णुं लोकनमस्कृतं।
किं मया देव कर्त्तव्यं ब्रूहि सर्व्वमशेषतः। ततो दैत्याधिपं प्राह देवो विष्णुः सुरोत्तमः। १४२१५
॥ विष्णुरुवाच ॥ ददामि ते महाभाग वरं वरय सुव्रत। परितुष्टोऽस्मि भद्रं ते यथेष्टं काममाप्नुहि।
मा च शक्रस्य वचनं पर्य्यशासीः कथञ्चन। अहमाज्ञापयामि त्वां श्रेयश्चैवमवाप्स्यसि।
एवमुक्त्वा ततो विष्णुरथ भूयोऽसुराधिपं। वाचा परमया प्राह सान्त्वयन् सर्व्वलोककृत्।
यत्त्वया सलिलं दत्तं गृहीतं पाणिना मया। तस्मात्ते दत्त देवेभ्यो नास्ति जीवितसंशयः।
सुतलं नाम पातालं तत्र त्वं सानुगो वस। सर्व्वदैत्यगणैः सार्द्धं मत्प्रसादान्महासुर। १४२२०
न च ते देवदेवस्य शक्रस्यामिततेजसः। शासनं प्रतिहन्तव्यं स्मरता मम शासनं।
देवताश्चापि ते सर्व्वाः पूज्या एव महासुर। प्राप्स्यस्येवं महाभाग दिव्यान् कामान् यथेप्सितान्।
इह चामुत्र च सुखं विविधांश्च परिच्छदान्। दैत्याधिपत्यञ्च पुनर्मत्प्रसादादवाप्स्यसि।
भोगांश्च विविधान् सम्यक् यज्ञांश्चैव सदक्षिणान्। यदा चैतां मया प्रोक्तां मर्य्यादां लङ्घयिष्यसि।
बन्धिष्यन्ति तदा हि त्वां नागा भोगैर्म्महौजसः। नमस्कार्य्यश्च ते नित्यं महेन्द्रस्त्रिदशाधिपः। १४२२५
मम ज्येष्ठः सुरश्रेष्ठः शासनं प्रतिगृह्यतां।
॥ बलिरुवाच ॥ देवदेव महाभाग शङ्खचक्रगदाधर। सुरासुरगुरुश्रेष्ठ सर्व्वलोकमहेश्वर।
तत्रासतो मे पाताले भागं ब्रूहि सुरोत्तम। कथं तत्र मया स्थेयं विबुधानां महेश्वर।
मम किं चिदशश्रेष्ठ प्राशनार्थं भविष्यति। तद्वदस्व सुरश्रेष्ठ हरिर्येन ममाव्यया।
॥ त्रिविक्रम उवाच ॥ अश्रोत्रियं श्राद्धमधीतमव्रतमदक्षिणं यज्ञमनृत्विजाकृतं। अश्रद्धया दत्तमसंस्कृतं हविर्भागाः षडेते
तव दैत्यसत्तम। १४२३०
पुण्यं भद्द्विषिणां यच्च मद्भक्तद्वेषिणां तथा। क्रयविक्रयसक्तानां पुण्यं यच्चाग्निहोत्रिणां।
अश्रद्धया यच्च दानं ददतां यजतां तथा। तत्सर्व्वं तव दैत्येन्द्र मत्प्रसादाद्भविष्यति।
॥ वैशम्पायन उवाच ॥ एतच्छ्रुत्वा तु वचनं बलिर्विष्णोर्म्महात्मनः। एवमस्त्विति तं प्रोक्त्वा पातालमसुरोत्तमः।
प्रविवेश महाभागो देवाज्ञां प्रतिपालयन्। एतस्मिन्नन्तरे चापि विष्णुस्त्रिदशपूजितः।
भगवानपि [illegible]ख्यानां प्रविभागं चकार ह। ददौ चैन्द्रीं दिशं पूर्व्वां शक्रायामिततेजसे। १४२३५
याम्यां यमाय देवाय पितृराजे महात्मने। पश्चिमाञ्च दिशं देवो वरुणाय ददौ प्रभुः।
उत्तरान्तु कुवेराय यक्षाधिपतये दिशं। अधस्तान्नागराजाय सोमायोर्द्ध्वं दिशं ददौ।

एवं विभज्य त्रैलोक्यं विष्णुर्भुवननायकः । लोकायतनमनं यातो देवानामजितः प्रभुः ।
वामनः सर्व्वभूतेषु प्रतिष्ठाप्य च वासवं । जगाम त्रिदिवं देवः पूज्यमानो महर्षिभिः ।
तस्मिन् प्रयाते दुर्द्धर्षे वामनेऽमिततेजसि । सर्व्वे मुमुदिरे देवाः पुरस्कृत्य शतक्रतुं । १४२४०
॥ वैशम्पायन उवाच ॥ गते तु त्रिदिवं कृष्णे बद्धा वैरोचनिं बलिं । नागैः शतशिरोभिश्च कल्पकालान्तरा द्विजैः ।
नागबन्धनदुःखार्त्तं बलिं वैरोचनिं ततः । बहुकालात्परो देवर्षिर्नारदः प्रत्यपद्यत ।
स तं कृच्छ्रगतं दृष्ट्वा श्रद्धयाऽभिपरिप्लुतः । उवाच दानवश्रेष्ठ मोक्षोपायं ददामि ते ।
स्तवं देवातिदेवस्य वासुदेवस्य धीमतः । अनादिनिधनस्याद्य अव्ययस्याव्ययस्य च ।
तमधीष्वाद्य दैत्येन्द्र विशुद्धेनान्तरात्मना । तद्गतस्तन्मना भूत्वा क्षिप्रं मोक्षमवाप्स्यसि । १४२४५
ततो विरोचनसुतः प्रयतः प्राञ्जलिः शुचिः । नीचैर्विमलमानसो नारदात् समधीतवान् ।
तमधीत्य स्तवं दिव्यं नारदेन समीरितं । पृथिवी येनोद्धृता येन तं जजाप महासुरः ।
नमोऽस्त्वनन्तपतये भूधराय महात्मने । अतीन्द्रियाय देवाय सनातनाय विष्णवे ।
सप्त सूर्य्यं वपुः कृत्वा त्रीन् लोकान् क्षयानपि । भगवान् कालकालस्त्वं तेन सत्येन मोचय ।
नष्टचन्द्रार्कगगने क्षोणयम्बुतपःस्थिते । पुनर्व्विसृजसे लोकांस्तेन सत्येन मोचय । १४२५०
ब्रह्मरुद्रेन्द्रवाय्वग्निपरिक्षुजगत्पर्व्वताः । त्वत्स्था दृष्टा त्रिविक्रम तेन सत्येन मोचय ।
मार्कण्डेन पुरा कल्पे प्रविश्य जठरं तव । चराचरगतं दृष्टं तेन सत्येन मोचय ।
एको विश्वमहार्णवस्त्वं योगी योगमुपागतः । पुनस्त्रैलोक्यमुत्सृज्य तेन सत्येन मोचय ।
जलशय्यामुपासीनो योगनिद्रामुपागतः । लोकान् विस्मयसे भूयस्तेन सत्येन मोचय ।
वाराहं रूपमास्थाय वेदयज्ञपुरस्कृतं । धरा जलोद्धृता येन तेन सत्येन मोचय । १४२५५
उद्धृत्य दंष्ट्रया यज्ञं येन पिण्डान् कृतानपि । ये पितॄणामपि हरे तेन सत्येन मोचय ।
प्रदुद्रुवुः सुराः सर्व्वे हिरण्याक्षभयार्द्दिताः । परित्रातास्त्वया देव तेन सत्येन मोचय ।
दीर्घवक्त्रेण रूपेण हिरण्याक्षस्य संयुगे । शिरो जहार चक्रेण तेन सत्येन मोचय ।
भग्नमूर्द्धास्थिमर्मास्थ्नो हिरण्यकशिपुः पुरा । हुङ्कारेण हतो दैत्यस्तेन सत्येन मोचय ।
दानवाभ्यां हृता वेदा ब्रह्मणः पश्यतः पुरा । परित्रातास्त्वया देव तेन सत्येन मोचय । १४२६०
कृत्वा हयशिरोरूपं हत्वा तु मधुकैटभौ । ब्रह्मणे तेऽर्पिता वेदास्तेन सत्येन मोचय ।
देवदानवगन्धर्व्वा यक्षविद्याधरोरगाः । अन्तं तव न पश्यन्ति तेन सत्येन मोचय ।
अपान्तरतमा नाम जातो देवस्य वै सुतः । कृताश्च तेन वेदार्थास्तेन सत्येन मोचय ।
वेदयज्ञाग्निहोत्राणि सिद्धयज्ञकर्माणि च । रहस्यं तव देवेश तेन सत्येन मोचय ।
ऋषिर्दीर्घतपा नाम जात्यन्धो मुनिसत्तमः । त्वत्प्रसादाच्च चक्षुष्मांस्तेन सत्येन मोचय । १४२६५
ग्राहग्रस्तं गजेन्द्रस्य दीनं मृत्युवशे स्थितं । भक्तं मोचितवानसि हि तेन सत्येन मोचय ।
अव्ययस्याव्ययस्य त्वं ब्रह्मण्यो ज्ञानसत्तमः । उपेन्द्रनामा विख्यातोऽसि तेन सत्येन मोचय ।

शंखचक्रगदातूणं शार्ङ्गं गरुडमेव च। प्रसादयामि शिरसा ते बन्धान्मोचयन्तु मां।
ततः प्रसन्नो भगवानादिदेश खगोत्तमं। गरुडं नागहन्तारं बलिं मोचय बन्धनात्।
ततो निश्चित्य गरुडः पक्षावतुलविक्रमः। जगाम वसुधामूलं यत्रास्ते संयतो बलिः।
आगमं तस्य विज्ञाय नागा मुक्त्वा महासुरं। ययुः पुरीं भोगवतीं वैनतेयभयार्दिताः।
मुक्तं विष्णुप्रसादेन चिन्तयानमधोमुखं। भ्रष्टश्रियमुवाचेदं गरुत्मानपपन्नगं।
॥ गरुड उवाच ॥ दानवेन्द्र महाबाहो विष्णुस्त्वामब्रवीत् प्रभुः। मुक्तो निवस पाताले सपुत्रजनबान्धवः।
इतस्त्वया न गन्तव्यं गव्यूतिमपि दानव। समयं यदि भिन्द्यास्त्वं मूर्द्धा ते शतधा भवेत्।
पक्षीन्द्रवचनं श्रुत्वा दानवेन्द्रोऽब्रवीदिदं। स्थितोऽस्मि समये तस्य अनन्तस्य महात्मनः।
जीव्योपायन्तु भगवान्मम किञ्चित् करोतु सः। इहस्थोऽहं सुखासीनो येनाप्याये खगेश्वर।
बलेस्तु वचनं श्रुत्वा गरुत्मानिदमब्रवीत्। पूर्व्वमेव कृतस्तेन जीव्योपायो महात्मना।
वर्त्तयिष्यन्ति ये यज्ञं विधिहीना ह्यमृत्विजः। प्रायश्चित्तमजानन्तो यज्ञभागं ततस्तव।
नैतेषां यज्ञभागं वै प्रतिगृह्णन्ति देवताः। अनेनाप्यायित बले सुखमत्र निवत्स्यसि।
॥ वैशम्पायन उवाच ॥ सन्दिश्यैवं भगवान्दक्षवान् कश्यपात्मजः। दानवेन्द्रे महाबाहो विष्णुस्त्रैलोक्यभावनः।
इमं स्तवमनन्तस्य सर्व्वपापप्रमोचनं। यः पठेत नरो भक्त्या तस्य नश्यति किल्बिषं।
गोहत्यायाः प्रमुच्येत ब्रह्मघ्नो ब्रह्महत्यया। अपुत्रो लभते पुत्रं कन्या चैवेप्सितं पतिं।
लग्नगर्भा प्रमुच्येत गुर्व्विणी जनयेत् सुतं। ये च मोक्षैषिणो लोके योगिनः सांख्यकापिलाः।
स्तवेनानेन गच्छन्ति श्वेतद्वीपमकल्मषाः। सर्व्वकामप्रदो ह्येष स्तवोऽनन्तस्य कीर्त्यते।
यः पठेत् प्रातरुत्थाय शुचिः प्रयतमानसः। सर्व्वकामनवाप्नोति मानवो नात्र संशयः।
एष वै वामनो नाम प्रादुर्भावो महात्मनः। वेदविद्भिर्द्विजैरेतत् पठ्यते वैष्णवं यशः।
यश्चेमं वामनं दिव्यं प्रादुर्भावं महात्मनः। शृणुयान्नियतो भक्त्या नरः पर्व्वसु पर्व्वसु।
परान् विजयते राजा यथा विष्णुर्महाबलः। यशश्च महदाप्नोति प्रेत्य सद्गतिमाप्नुयात्।
प्रियो भवति भूतानां सर्व्वेषां नात्र संशयः। पुत्रांश्च लभते धन्यान् मेधागुणसमन्वितान्।
प्रीयते पठतश्चास्य देवदेवो जनार्द्दनः। सर्व्वकामयुतश्चैव कृष्णद्वैपायनोऽब्रवीत्।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि वामने प्रादुर्भावे त्रिषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६३ ॥
॥ जनमेजय उवाच ॥ किमर्थं भगवान् विष्णुर्देवदेवो जनार्द्दनः। गतः कैलासशिखरमालयं शङ्करस्य च।
नारदाद्यैस्तपोवृद्धैर्मुनिभिस्तत्त्वदर्शिभिः। तत्र दृष्टो महादेवः शङ्करो नीललोहितः।
केशवेन पुरा विप्र कुर्व्वता तप उत्तमं। अर्च्चितो देवदेवेन शङ्करश्चेति नः श्रुतं।
देवौ तत्र जगन्नाथौ दृष्टवन्तौ पुरातनौ। अर्च्चयाञ्चक्रिरे देवा इन्द्राद्याः शङ्करं हरिं।
तौ हि देवौ महादेवावेकीभूतौ द्विधाकृतौ। एकात्मानौ जगद्योनी सृष्टिसंहारकारकौ।
परस्परसमावेशाज्जगतः पालने स्थितौ। तयोस्तत्र यथा वृत्तं कैलासे पर्व्वतोत्तमे।

ऋषयः किमचेष्टन्त दृष्ट्वा तौ पुरुषोत्तमौ । एतत् सर्व्वमशेषेण वक्तुमर्हसि सत्तम ।
यथा गतो हरिर्विष्णुः कृष्णो जिष्णुः पुरातनः । यथा च शङ्करः साक्षात्कृतवान्नागभूषणः ।
एतत् सर्व्वं विप्रवर्य्य ब्रूहि तत्त्वेन यत्नतः ।
॥ वैशम्पायन उवाच ॥ शृणुष्वावहितो राजन् यथा कृष्णो गतो नगं । यथा च दृष्टो देवेशः शङ्करो वृषवाहनः । १४४००
यथा चचार स तपो यथा ते मुनयो गताः । एवं तयोर्यथा वृत्तं तथा शृणु नरोत्तम ।
द्वैपायनोऽथ भगवान् यथा प्रोवाच मां तथा । नमस्कृत्वा प्रवक्ष्यामि केशवं खगवाहनं ।
यथाशक्ति यथायुक्तं शृणु यत्नेन सुव्रत । न चाशुश्रूषवे वाच्यं नृशंसायातपस्विने ।
नानधीताय वक्तव्यं पुण्यं पुण्यवतां सदा । स्वर्ग्यं यशस्यं धन्यञ्च बुद्धिशुद्धिकरं सदा ।
ध्येयं पुण्यात्मनां नित्यमिदं वेदार्थनिश्चितं । अनेकारण्यसंयुक्तं सेवन्ते नित्यमीदृशं । १४४०५
मुनयो वेदनिरता नारदाद्यास्तपोधनाः । अत्यद्भुतं महापुण्यं वृत्तं कैलासपर्व्वते ।
शिवयोर्द्देवयोस्तत्र हरेश्चैव भवस्य च । हतेष्वसुरसंघेषु नरकादिषु भूमिप ।
हतेष्वथ नृपेष्वेवं किञ्चिच्छिष्टेषु शत्रुषु । शासति स्म सदा विष्णुः पृथिवीं पुरुषोत्तमः ।
द्वारवत्यां जगन्नाथो वसन् वृष्णिभिरीश्वरः । रुक्मिण्या सङ्गतो देवो वसंस्तत्र पुरे हरिः ।
कदाचिच्च तया सार्द्धं शेते रात्रौ जगत्पतिः । विश्रम्भं यथायोगं प्रीतः प्रीतियुजा तया । १४४१०
अथोवाच तदा देवी रुक्मिणी रुक्मभूषणं । पुत्रमिच्छामि देवेश त्वत्तो माधव नन्दनं ।
बलिनं रूपसम्पन्नं त्वयैव सदृशं प्रभो । वृष्णीनामपि नेतारं वीर्य्यवन्तं तपोनिधिं ।
सर्व्वशास्त्रार्थकुशलं राजविद्यापुरस्कृतं । एवमादिगुणैर्युक्तं दातुमर्हसि सत्तम ।
त्वयि सर्व्वस्य दातृत्वं नित्यमेव प्रतिष्ठितं । त्वं हि सर्व्वस्य कर्त्ता च दाता भोक्ता जगत्पतिः ।
विशेषतस्तु भृत्यानां शुश्रूषानियतात्मनां । वक्तव्यं किमु देवेश यदि भक्ताऽस्मि केशव । १४४१५
अनुग्रहो यदि स्यान्मे देवदेव जगत्पते । दातुमर्हसि पुत्रं त्वं वीर्य्यवन्तं जनार्द्दन ।
॥ वैशम्पायन उवाच ॥ इत्युक्तो देवदेवेशः प्रियया प्रीयमाणया । तया महिष्या रुक्मिण्या रुक्मिशत्रुर्यदूद्वहः ।
प्रोवाच वचनं काले रुक्मिणीं यादवेश्वरः । दाताऽस्मि तादृशं पुत्रं यं त्वमिच्छसि मानिनि ।
नित्यभक्ताऽसि मे देवि नाच कार्य्या विचारणा । अवश्यं तव दास्यामि पुत्रं शत्रुनिवर्हणं ।
पुत्रेण लोकान् जयति सतां कामदुघा हि ये । नरकं पुदिति ख्यातं दुःखञ्च नरकं विदुः । १४४२०
पुत्स्त्राणात्ततः पुत्रमिहेच्छन्ति परत्र च । अनन्ताः पुत्रिणो लोकाः पुरुषस्य प्रिये शुभाः ।
पतिर्ज्जायां प्रविशति गर्भो भूत्वा स मातरं । तस्यां पुनर्नवो भूत्वा दशमे मासि जायते ।
पुत्रवन्तं विभेतीन्द्रः किंनु तेनाजितं भवेत् । नापुत्रो विन्दते लोकान् कुपुत्राद्वन्ध्यता वरा ।
कुपुत्रो नरके यस्मात् सुपुत्रात् स्वर्ग एव हि । तस्माद्विनीतं सत्पुत्रं श्रुतवन्तं दयापरं ।
विद्यया विनयो यस्माद्विद्यायुक्तं सुधार्म्मिकं । इच्छेत् पुत्रं पुत्रकामः पुरुषो यत्नवान् बुधः । १४४२५
तस्माद्दास्यामि ते पुत्रं विद्यावन्तं सुधार्म्मिकं । एष गच्छामि पुत्रार्थं कैलासं पर्व्वतोत्तमं ।

तत्रोपास्य महादेवं शङ्करं नीललोहितं । ततो भ्यस्यामि पुत्रन्ते भवाद्भूतहिते रतात् ।
तपसा ब्रह्मचर्य्येण भवं शङ्करमव्ययं । तोषयित्वा विरूपाक्षमादिदेवमजं विभुं ।
गमिष्याम्यहमद्यैव द्रष्टुं शङ्करमव्ययं । स च मे दास्यते पुत्रं तोषितस्तपसा मया ।
तत्र गत्वा महादेवं नमस्कृत्य सहोमया । प्रविश्य बदरीं पुण्यां मुनिजुष्टां तपोमयीं । १४४३०
अग्निहोत्राकुलां दिव्यां गङ्गाम्बुप्लावितां सदा । मृगपक्षिसमायुक्तां सिंहद्विपशताकुलां ।
बदरीफलसंपूर्णां वानरैः शोभितद्रुमां । वेत्रारूढमहावृक्षां कदलीखण्डमण्डितां ।
मुनिभिर्वेदतत्त्वार्थविचारनिपुणैः सदा । वेदनिश्चिततत्त्वार्थैः प्रमाणकुशलैर्युतां ।
इदमेकमिदं तत्त्वमिति निश्चितमानसैः । उपास्यमानामन्यत्र सिद्धैः सिद्धार्थतत्परैः ।
इतिहासपुराणज्ञैः सेव्यमानां महर्षिभिः । गच्छद्भिः स्वर्गनिलयं परित्यज्य कलेवरं । १४४३५
प्रसिद्धां महतीं देवीं यास्यामि सुकृतालयां । इत्युक्त्वा विररामैव देवदेवो जनार्द्दनः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां चतुःषष्ट्यधिकद्विशततोऽध्यायः ॥ २६४ ॥
॥ वैशम्पायन उवाच ॥ प्रभातायान्तु शर्व्वर्य्यां गन्तुमैच्छज्जनार्द्दनः । हुताग्निः कृतकल्याणः समाप्तवरदक्षिणः ।
गाश्च दत्त्वाऽथ विप्रेभ्यो नमस्कृत्य द्विजोत्तमान् । आस्थानमण्डपं कृष्णः प्रविवेश जगत्पतिः ।
आसनं महदास्थाय वृष्णीनाहूय सर्व्वशः । बलभद्रं शिनेः पुत्रं हार्द्दिक्यं शटसारणौ ।
उग्रसेनं महाबुद्धिमुद्धवं नीतिमत्तरं । यस्य बुद्धिं समाश्रित्य जीवन्ति यादवाः सुखं । १४४४०
नेता च यदुवृष्णीनां स तु धर्म्मपरः सदा । यस्य बिभ्यति देवाश्च नीतेस्तस्य महात्मनः ।
यस्य बुद्धिवशाद्विष्णुः शशास पृथिवीं तदा । तञ्च वृष्णिवरं वीरमुद्धवं देवसप्रभं ।
अन्यानपि यदून् सर्व्वानुवाच भगवान् हरिः । शृण्वन्तु मम वाक्यानि यादवाः सर्व्व एव हि ।
शृणु चापि वचो मह्यं पितुरुद्धव मे सखे । बाल्यात् प्रभृति यो यत्नो मम दुष्टनिवर्हणे ।
प्रत्यक्षं भवता दृष्टं पूतनानिधनं नृप । केशी च निहतो बाल्ये मया बालेन यादवाः । १४४४५
गोवर्द्धनो धृतः शैलो गावश्च परिपालिताः । अभिषिक्तोऽस्मि शक्रेण देवानामग्रतः स्थितः ।
कंसोऽपि निधनं नीतो मया चाणूरमुष्टिकौ । उग्रसेनोऽभिषिक्तश्च कृता द्वारवती मया ।
अन्ये चापि नृपा राजन् बलिनो निहता मया । योऽपि वीरो जरासन्धो निगृहीतो बलान्मया ।
भीमेन बलिना राजन्नयेन मम यादवाः । शृगालो निहतः संख्ये गोमन्ताद्वञ्चता मया ।
योऽपि वीरो दुरात्माऽसौ दानवो नरको हतः । निष्कण्टकमिमं लोकं कृतवान् राजसत्तमाः । १४४५०
किन्तु वीरो नृपो जज्ञे सखा भीमस्य यादवाः । पौण्ड्रो वीर्य्यवतां नेता द्वेष्टा चासौ सदा मम ।
शिष्यो द्रोणस्य राजेन्द्रो बली ब्रह्मास्त्रवित् कृती । शास्त्रज्ञो नीतिमान् साक्षान्नेता सर्व्वस्य यत्नवान् ।
योद्धा युद्धप्रियो राजा जामदग्न्य इवापरः । एकान्तशत्रुरस्माकं छिद्रान्वेषी सदा मम ।
बाधिष्यते पुरीं योद्धा च्छिद्रं यदि लभेत सः । न ह्यप्रमाथी बलवान् पौण्ड्रस्येशो नृपोत्तमाः ।
यत्ता भवन्तस्तिष्ठन्तु प्रगृहीतशरासनाः । यथा न बाधते राजा पुरीं यदुकुलाश्रयां । १४४५५

अद्यन्तु यास्ये कैलासं कुतश्चित् कारणान्नृपाः । शङ्करं द्रष्टुकामोऽस्मि भूतभावनभावनं ।
यावदागमनं मह्यं तावद्यत्ता भवन्त्विह । मया विरहितां चेमां यदि जानाति पुण्ड्रकः ।
आगमिष्यति राजेन्द्रा योत्स्यते च पुरीमिमां । इमां निर्यादवां कर्त्तुं शक्नोतीति च मे मतिः ।
यत्ता भवत राजेन्द्राः खड्गैः पाशैः परश्वधैः । पाषाणैः कर्पणीयैश्च सन्नद्धा भवत स्वकैः ।
पिधाय च कपाटानि महाद्वाराणि यत्नतः । एक एव महाद्वारो गमनागमने सदा । १४४६०
मुद्रया सह गच्छन्तु राज्ञो ये गन्तुमीप्सवः । न चामुद्रः प्रवेष्टव्यो द्वारपालस्य पश्यतः ।
यावदागमनं मह्यं तावदेवं भविष्यति । मृगया नात्र कर्त्तव्या न च क्रीडा वहिः पुरात् ।
ज्ञातव्याश्च परे स्वे च गमनागमने सदा । एवमादिक्रिया कार्य्या यावदागमनं मम ।
इत्युक्त्वा यादवान् सर्व्वान् सात्यकिं पुनराह च ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां पञ्चषष्ठ्यधिकद्विशततमोऽध्यायः ॥ २६५ ॥
॥ भगवानुवाच ॥ सात्यके शृणु मद्वाक्यं यत्तो भव युधाम्बर । त्वन्तु खड्गी गदी भूत्वा चापी वाणी तलत्रवान् । १४४६५
तिष्ठ यत्नेन रक्षस्व पुरीं बहुनृपाश्रयां । न च निद्रा त्वया कार्य्या रात्रौ यदूद्वह प्रभो ।
न च व्याख्या त्वया कार्य्या शास्त्राणां शास्त्रतत्पर । न च वादस्त्वया कार्य्यो वादिभिः सह वृष्णिप ।
त्वं हि योद्धा बली चैव धनुर्वेदस्य वेदवित् । तथा कुरु यथा वीर नोपहास्या भवेमहि ।
॥ सात्यकिरुवाच ॥ करिष्यामि वचस्तुभ्यं यथाशक्ति जनार्द्दन । आज्ञा तव जगन्नाथ धार्य्या यत्नेन मे सदा ।
भृत्यवत् प्रचरिष्यामि कामपालस्य माधव । यावदागमनं तुभ्यं तावत् स्थास्यामि यत्नतः । १४४७०
प्रसादस्तव गोविन्द यदि स्यान्मयि माधव । किं नात्र मम दुःसाध्यं शत्रूणां निग्रहे रणे ।
यदि शक्रं यमं वाऽपि कुवेरमपि पाशिनं । सर्व्वानेतान् विजेष्यामि किमुपेन्द्र नृपोत्तमं ।
गच्छ कार्य्यं कुरुष्वेदं यत्तोऽहं सततं हरे । उद्धवं पुनराहेदं कृष्णः पद्मनिभेक्षणः ।
शृणूद्धव त्वं वाक्यं मे कुर्य्यास्त्वेतत् प्रयत्नवान् । रक्ष्या नयेन राजेन्द्र पुरी द्वारवती त्वया ।
यत्तो भव सदा तात कुरु साहाय्यमत्र नः । लज्जा मम समुत्पन्ना वदतस्तव साम्प्रतं । १४४७५
त्वं हि नेता समस्तस्य विद्यापारस्य सर्व्वतः । को नु शक्ष्यति मेधावी वक्तुं विद्यावतः पुरः ।
यत्कार्य्यं तद्भवान् वेत्ति ह्यकार्य्यञ्चापि सर्व्वतः । अतोऽहं विरमे तात वक्तुं सम्प्रति वृष्णिप ।
॥ उद्धव उवाच ॥ किमद्य तव गोविन्द वर्त्तते साम्प्रतं प्रभो । अहो प्रसन्नता मह्यं किन्तु प्रीतिरियं तव ।
जानाम्यहं जगन्नाथ प्रसादस्त्वेष विस्तरः । यस्य प्रसन्नो भवसि तस्य किं नास्ति केशव ।
त्वं हि सर्व्वस्य जगतः कर्त्ता हर्त्ता प्रधानतः । प्रभवः सर्व्वकार्य्याणां वक्ता श्रोता प्रमाणवित् । १४४८०
ध्याता ध्यानमयो ध्येय इति ब्रह्मविदो विदुः । जेता देवरिपूणाञ्च गोप्ता नाकसदां भवान् ।
त्वन्नाथा वयमेवेति जीवामो निहतद्विषः । इयं नीतिरता मन्ये नेता नीतेर्यतो भवान् ।
को नु नाम नयं वेद त्वामृते साम्प्रतं वद । नीतिस्त्वं सर्व्वकार्य्याणामिति मे निश्चिता मतिः ।
दुर्गाढो नयमार्गोऽयमित्याहुस्तद्विदो जनाः । चतुर्द्धा प्रोच्यते नीतिः सामदाने जनार्द्दन ।

दण्डो भेदो मनुष्याणां निग्रहावग्रहे सदा । दण्ड्येषु दण्डमिच्छन्ति सामान्यन्तु नये हरे । १४४८५
बलवत्स्वथ दानन्तु त्रयाणामप्यगोचरे । प्रयोक्तव्यो महाभेद इति नीतिमतां मतं ।
तेषु तेष्वथ सर्व्वेषु प्रमाणं त्वां विदुर्बुधाः । किमत्र बहुनोक्तेन सर्व्वं त्वयि समर्पितं ।
॥ वैशम्पायन उवाच ॥ इत्युक्त्वा विररामैव उद्धवो नीतिमत्तरः । ततः स भगवान् विष्णुरेवमेव नृपोत्तम ।
कामपालं महाबाहुमुवाच यदुसंसदि । उग्रसेनं नृपं राजंस्तथा हार्द्दिक्यमेव च ।
कामपालं पुनर्विष्णुरिदं प्रोवाच तत्त्ववित् । न प्रमादस्त्वया कार्य्यः सर्व्वदा यत्नवान् भव । १४४९०
स्थिते त्वयि महाबाहो का पीडा जगतो भवेत् । गदो भव सदा त्वार्य्य न क्रीडा सर्व्वदा भवेत् ।
रक्ष त्वं सर्व्वदा यस्मात् पुरीं द्वारवतीं प्रभो । नोपहास्या यथा स्याम तथा कुरु गदी भव ।
उत्साहः सर्व्वदा कार्य्यो निरुत्साहो न यत्नतः । वाढमित्यब्रवीद्रामः कृष्णं वृष्णिकुलोद्भवं ।
वृष्णयः सर्व्व एवैते स्वं स्वं सद्म समाययुः । गन्तुमैच्छज्जगन्नाथः कैलासं पर्व्वतोत्तमं ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां षट्षष्ट्यधिकद्विशततोऽध्यायः ॥ २६६ ॥
॥ वैशम्पायन उवाच ॥ ततः सञ्चिन्तयामास गरुडं पक्षिपुङ्गवं । आगच्छ त्वरितं तार्क्ष्य इति विष्णुर्जगत्पतिः । १४४९५
ततः स भगवांस्तार्क्ष्यो वेदराशिरिति स्मृतः । बलवान् विक्रमी योगशास्त्रनेता कुरूद्वह ।
यज्ञमूर्त्तिः पुराणात्मा साममूर्द्धा च पावनः । ऋग्वेदपक्षवान् पक्षी पिङ्गलो जटिलाकृतिः ।
ताम्रतुण्डः सोमहरः शत्रुजेता महाशिराः । पन्नगारिः पद्मनेत्रः साक्षाद्विष्णुरिवापरः ।
वाहनं देवदेवस्य दानवौघभयङ्करः । राक्षसासुरसंघानां जेता पक्षबलेन यः ।
प्रादुरासीन्महावीर्य्यः केशवस्याग्रतस्तदा । जानुभ्यामपतद्भूमौ नमो विष्णो जगत्पते । १४५००
नमस्ते देवदेवेश हरे स्वामिन्निति ब्रुवन् । पस्पर्श पाणिना कृष्णः स्वागतं तार्क्ष्य पुङ्गव ।
इत्युवाच तदा तार्क्ष्यं यास्ये कैलासपर्व्वतं । शूलिनं द्रष्टुमिच्छामि शङ्करं शाश्वतं शिवं ।
वाढमित्यब्रवीत्तार्क्ष्य आरुरोहैनं जनार्द्दनः । तिष्ठध्वमिति होवाच यादवान् पार्श्ववर्त्तिनः ।
ततो ययौ जगन्नाथो दिशं प्रागुत्तरां हरिः । रवेण महता तार्क्ष्यस्त्रैलोक्यं समकम्पयत् ।
सागरं क्षोभयामास पक्षाभ्यां पक्षी व्रजंस्तदा । पक्षेण पर्व्वतान् सर्व्वान् वहन् देवं जनार्द्दनं । १४५०५
ततो देवाः सगन्धर्व्वा आकाशेऽधिष्ठितास्तदा । तुष्टुवुः पुण्डरीकाक्षं वाग्भिरिष्टाभिरीश्वरं ।
जय देव जगन्नाथ जय विष्णो जगत्पते । जयाजय नमो देव भूतभावन भावन ।
नमः परमसिंहाय दैत्यदानवनाशन । जयाजेय हरे देव योगिध्येय परागते ।
नारायण नमो देव कृष्ण कृष्ण हरे हर । आदिकर्त्तः पुराणात्मन् ब्रह्मयोने सनातन ।
नमस्ते सकलेशाय निर्गुणाय गुणात्मने । भक्तिप्रियाय भक्ताय नमो दानवनाशन । १४५१०
अचिन्त्यमूर्त्तये तुभ्यं नमस्ते सकलेश्वर । इत्यादिभिस्तदा देवं वाग्भिरीशानमव्ययं ।
तुष्टुवुर्देवगन्धर्व्वा ऋषयः सिद्धचारणाः । शृण्वन्नेव जगन्नाथः स्तुतिवाक्यानि तानि च ।
ययौ सार्द्धं सुरगणैर्मुनिभिर्व्वेदपारगैः । यत्र पूर्व्वं स्वयं विष्णुस्तपस्तेपे सुदारुणं ।

लोकवृद्धिकरं श्रीमान् लोकानां हितकाम्यया । वर्षायुतं तपस्तप्तं विष्णुना प्रभविष्णुना ।
यत्र विष्णुर्जगन्नाथस्तपसाम्ना सुदारुणं । द्विधाऽकरोत् स्वमात्मानं नरनारायणाख्यया । १४९१५
गङ्गा यत्र परिक्षिप्ता मध्ये धावति पावनी । यत्र शक्रः स्वयं हत्वा वृत्रं वेदार्थतत्त्वगं ।
ब्रह्महत्याविनाशार्थं तपो वर्षायुतं चरत् । यत्र सिद्धाश्च सिद्धाः स्युर्ध्यात्वा देवं जनार्द्दनं ।
यत्र हत्वा रणे रामो रावणं लोकरावणं । एतच्छ्रामनमिच्छंश्च तपो घोरमतप्यत ।
देवाश्च मुनयश्चैव सिद्धिं यान्ति शुश्रूषितव्रताः । यत्र नित्यं जगन्नाथः साक्षाद्वसति केशवः ।
यत्र यज्ञाः प्रवर्त्तन्ते नित्यं मुनिगणैः सह । यस्याः स्मरणमात्रेण नरः स्वर्गं गमिष्यति । १४९२०
स्वर्गसोपानमिच्छन्ति यां पुण्यां मुनिसत्तमाः । शुचयो निश्चितां यान्ति यत्र नित्यं नृपोत्तम ।
धामाग्र्यः पुण्यशीलानां स्थानमुत्तमधर्म्मिणां । यत्र विष्णुं समाराध्य देवाः स्वर्गं समाययुः ।
सिद्धक्षेत्रमिदं प्राहुर्ऋषयो वीतमत्सराः । विशालां वदरीं विष्णुस्तां द्रष्टुं स किलेश्वरः ।
सायाह्ने चामरगणैर्मुनिभिस्तत्त्वदर्शिभिः । प्रविवेश महापुण्यमृषिजुष्टं तपोवनं ।
अग्निहोत्राकुले काले पक्षिव्याहारसंकुले । नीडस्थेषु विहङ्गेषु दुह्यमानासु गोषु च । १४९२५
तूष्णीम्भावव्यवस्थितेषु मुनिवीरेषु सर्व्वतः । समाधिस्थेषु सिद्धेषु चिन्तयत्सु जनार्द्दनं ।
अधिश्रितेषु हविषु ज्वाल्यमानेषु चाग्निषु । हूयमानेषु तत्रैव पावकेषु समन्ततः ।
अतिथौ पूज्यमाने च सन्ध्याश्लिष्टे जगन्मये । स तस्यामथ वेलायां देवैः सह जनार्द्दनः ।
विवेश वदरीं विष्णुर्मुनिजुष्टां तपोमयीं । आश्रमस्याथ मध्यन्तु प्रविश्य हरिरीश्वरः ।
गरुडादवरुह्याथ दीपिकादीपिते तदा । प्रदेशे पुण्डरीकाक्षः स्थितस्तावत् सहामरैः । १४९३०
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां सप्तषष्ट्यधिकद्विशततोऽध्यायः ॥ २६७ ॥
॥ वैशम्पायन उवाच ॥ ततो मुनिगणा दृष्ट्वा देवदेवमवस्थितं । समाप्य चाग्निहोत्राणि सम्पूज्यातिथिसत्तमान् ।
मुनयो दीर्घतपसः समाधौ कृतनिश्चयाः । जटिनो मुण्डिनः केचित् शिराधमनिसन्तताः ।
निर्म्मांसा नीरसाः केचिद्वेतालाइव केचन । अश्मकुट्टाशनपराः पराभिक्षास्तथा परे ।
वेदविद्याव्रतस्नाता निराहारा महातपाः । स्मरन्तः सर्व्वदा विष्णुं तद्भक्तास्तत्परायणाः ।
आसन्नमुक्तयः केचित् केचिद्ध्यानैकतत्पराः । ध्यानेन मनसा विष्णुं दृष्टवन्तस्तपोधनाः । १४९३५
संवत्सराशिनः केचित् केचिज्जलविचारिणः । शक्रस्य भयदातारः श्रुतिस्मृतिपरायणाः ।
वशिष्ठो वामदेवश्च रैभ्यो धूम्रस्तथैव च । जाजलिः काश्यपः कण्वो भरद्वाजोऽथ गौतमः ।
अत्रिरश्वशिराश्चैव शङ्खः शङ्खनिधिः कुणिः । पाराशर्य्यः पवित्राक्षो याज्ञवल्क्यो महामनाः ।
कक्षीवानङ्गिराश्चैव मुनिर्दीर्घतपास्तथा । असितो देवलस्तात वाल्मीकिश्च महातपाः ।
एते चान्ये च मुनयो द्रष्टुमीश्वरमव्ययं । आदायार्घ्यं यथायोगमुटजात् स्वात् समाययुः । १४९४०
ते च गत्वा हरिं कृष्णं द्रष्टुमीशं जनार्द्दनं । भक्तिमासाद्य देवं प्रणेमुर्भक्तवत्सलं ।
नमोऽस्तु कृष्ण कृष्णेति देवदेवेति केशवं । प्रणवात्मन् जगन्नाथ नताः स्म शिरसा हरे ।

कृष्ण विष्णो हृषीकेश केशवेति च सर्व्वदा । प्रणामप्रवणा विप्राः प्राञ्जलित्वं जगत्पतिं ।
इदमर्घ्यमिदं पाद्यमिदं विष्टरमेव च । कृतार्थाः सर्व्वथा देव प्रसन्नो नो जगत्पतिः ।
किं कुर्म्मः किं नु नः कृत्यं कश्चिद्दोषः प्रभो हरे । इति प्राञ्जलयः सर्व्वे प्राञ्जद्देवस्य पश्यतः । १५४५
कृष्णोऽपि तद्यथायोगमुपयुज्य महामरैः । कृतं सर्व्वं मुनिवरा वर्द्धतां तप उत्तमं ।
इति भुवन् पुराणात्मा प्रीतस्तेन महात्मना । आसनं लम्भयामास रात्रौ देवो जनार्द्दनः ।
कुशलं पृष्टवान् भूयो मुनीनां भवितात्मनां । अग्निहोत्रेषु तपसि तथा भृत्येषु सर्व्वतः ।
एवमादि जगन्नाथः पृष्टवानीश्वरस्तदा । सर्व्वत्र कुशलं तत्र भूयः कृष्णस्य सर्व्वतः ।
आतिथ्यं चक्रिरे ते तु नीवारैः फलमूलकैः । देवानामथ सर्व्वेषां विष्णोः कृष्णस्य यत्नतः । १५५०
आतिथ्यमुपयुञ्जानस्ततः प्रीतो ऽभवद्धरिः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां अष्टषष्ठ्यधिकद्विशततोऽध्यायः ॥ २६८ ॥
॥ वैशम्पायन उवाच ॥ ततः स भगवान् विष्णुर्दुर्विज्ञेयगतिः प्रभुः । यत्र पूर्व्वं तपस्तप्तमात्मना यादवेश्वरः ।
गङ्गायाश्चोत्तरे तीरे देशं द्रष्टुमुपागतः । स्वयमेव हरिः साक्षात् प्रविवेश तपोवनं ।
प्रविश्य सुचिरं देशं ददर्श च मनोरमं । निषसाद ततस्तस्मिन्नाश्रमे पुष्पवर्द्धने ।
समाधौ योजयामास मनः पद्मनिभेक्षणः । किमप्येव जगन्नाथो ध्यात्वा देवेश्वरः स्थितः । १५५५
स्थिते देवगुरौ तत्र समाधौ दीपवद्धरौ । तत्र शब्दो महाघोरः प्रादुरासीत् समन्ततः ।
खाद खादत मोदेत यात यात मृगानिमान् । प्रेषयेह शुनः सर्व्वान् प्रमादाच्छार्ङ्गधन्वनः ।
एष विष्णुरयं कृष्णो हरिरीश इतोऽच्युतः । नमोऽस्तु विष्णो देवेश स्वामिन्माधव केशव ।
इत्यादिशब्दः सुमहान् मृगाननुविनर्द्दतां । मृगाणां भीतियुक्तानामुग्राणां द्वीपिनां तथा ।
गजानां नर्द्दतां राजन् बृंहितश्च ततस्ततः । महावातसमुद्भूतक्षुभितस्येव वारिधेः । १५६०
नादस्त्रैलोक्यवित्रासः प्रादुरासीत्तदा निशि । श्रुत्वा शब्दं हरिर्देवस्तादृशं तत्र धिष्ठितः ।
समाधिक्षोभमासाद्य निश्वस्य च जगत्पतिः । ततः सञ्चिन्तयामास कोऽयमेव महात्मनः ।
कस्यायमीदृशः शब्दः स्तुतियुक्तो मम त्विति । अहोऽस्मिन्मृगयाशब्दः शुनां सञ्चरतां वने ।
मृगाणामथ सर्व्वेषां नादश्च सुमहानयं । व्यामिश्रः स्तुतियुक्ताभिर्गीर्भिर्मम समन्ततः ।
इति सञ्चिन्त्य मनसा दिशो विप्रेक्ष्य सर्व्वतः । तत आस्ते हरिस्तत्र ज्ञातुं तस्य समुद्भवं । १५६५
ततो मृगाः समाधावन् यत्र तिष्ठति केशवः । तांश्चैवानुचरो राजन् श्वगणः समपद्यत ।
अथ वै दीपिका राजन् शतशोऽथ सहस्रशः । ततस्तमोऽपि व्यनशद्दिवेव समपद्यत ।
ततोऽनु भूतसंघाश्च समदृश्यन्त तत्र ह । पिशाचाश्च महाघोरा नदन्तो बहुविस्वनं ।
भक्षयन्तोऽथ पिशितं पिबन्तो रुधिरं बहु । प्रादुरासन् महाघोराः पिशाचा विकृताननाः ।
हन्यमाना हता राजन् पतन्तः पतिता मृगाः । इतश्चेतश्च धावन्तो बाणैर्विद्धा मृगद्विषः । १५७०
ततो मृगसहस्राणि समुदीर्णानि भारत । यत्रासौ तिष्ठते देवस्तत्र यातानि भारत ।

अन्तरीकृत्य देवेशं स्थितानीत्यनुशुश्रुम । पिशाच्यो विकृताकाराः कराला लोमहर्षणाः ।
पुत्रवत्यः समापेतुर्यत्र तिष्ठति केशवः । श्वगणास्तत्र राजेन्द्र चरन्त्येव ततस्ततः ।
ततः स भगवान् विष्णुः सर्व्वमालोक्य विष्ठितः । विस्मयं परमं गत्वा पश्यन्नास्ते स्म केशवः ।
कस्यैष विस्तृतो नादः कस्य वाऽयं जनोऽपतत् । को नु मां स्तौति भक्त्या तु भविष्ये प्रीतिमानहं । १५५७५
कस्य मुक्तिः समायाता प्रीते मयि सुदुर्लभा । इति सञ्चिन्त्य भगवानास्ते प्राकृतवद्धरिः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां ऊनसप्तत्यधिकद्विशततोऽध्यायः ॥ २६९ ॥
॥ वैशम्पायन उवाच ॥ तेषामनु महाघोरौ पिशाचौ विकृताननौ । प्रांशू पिङ्गलरोमाणौ दीर्घजिह्वौ महाहनू ।
लम्बकेशौ विरूपाक्षौ होहोहाहेति वादिनौ । खादन्तौ मांसपिटकं पिबन्तौ रुधिरं बहु ।
आन्त्रवेष्टितसर्व्वाङ्गौ दीर्घौ कृशकृतोदरौ । लम्बमानमहाप्रान्तशूलप्रोतशिरोधरौ ।
कर्षन्तौ शवयूथानि बाहुभ्यां तत्र तत्र ह । हसन्तौ विविधं हासं स्वजातिसदृशं नृप । १५५८०
वदन्तौ बहुरूपाणि वचांसि प्राकृतानि च । कम्पयन्तौ महावृक्षानूरुपादपघट्टनैः ।
सृक्किणी लेलिहन्तौ च दन्तान् कटकटायिनौ । अस्थिस्नायुसमाकीर्णौ धमनीरज्जुसन्ततौ ।
वदन्तौ कृष्ण कृष्णेति माधवेति च सन्ततं । कदा नु द्रक्ष्यते विष्णुः स इदानीं क्व तिष्ठति ।
स्वामी नः कुत्र वसति कुतो द्रष्टुं यतामहे । अत्र वा कुत्र देवेशः कुतो नु स्थास्यते हरिः ।
कुतः पद्मपलाशाक्षः साक्षादिन्द्रानुजो हरिः । यमाहुः पुण्डरीकाक्षं ब्रह्म ब्रह्मविदो जनाः । १५५८५
तमजं पुरुषं विष्णुं द्रष्टुमभ्युद्यता वयं । अन्तकाले जगन्नाथं प्रविवेश जगत्त्रयं ।
तमजं विश्वकर्त्तारं कुतो द्रक्ष्याम साम्प्रतं । यस्य विस्तार एवैष लोकः प्राणिनिवासितः ।
तं द्रष्टुं देवमीशानं यतामः सांप्रतं हरिं । दशा घोरतमा लोके विदिष्टा सर्व्वजन्तुभिः ।
पैशाचीयं समुत्पन्ना कथं नौ प्राविशद्बलात् । नरमांसास्थिकलुषा सर्व्वभीतिप्रदायिनी ।
अहो नौ दुष्कृतं कर्म्म प्राकृतं कर्म्मसञ्चये । अत्रैव महती प्रीतिर्वर्त्तते सर्व्वदा तथा । १५५९०
यावन्नौ दुष्कृतं कर्म्म तावत् स्थास्यति तादृशी । दशा सा सर्व्वविदिष्टा प्राणिपीडनकारिणी ।
सर्व्वथा दुष्कृतं कर्म्म बहुभिर्जन्मसञ्चयैः । तथाहि तत् फलं घोरमद्यापि न निवर्त्तते ।
यतः स्म प्राणिनो हन्तुं श्वगणैः सह साम्प्रतं । तथाहि प्राणिनो लोके बाल्यमादौ समास्थिताः ।
अज्ञानावृतचित्तास्तु कृत्याकृत्यं न जानते । तथा यौवनिनो मत्ता विषयैर्व्याकुलीकृताः ।
यतन्ते श्रेयसे नैव ततो विषयसंस्थिताः । विषयाकृष्टचित्ता हि मनुष्या न विजानते । १५५९५
तथा च वृद्धभावे तु व्याधिभिर्बहुभिर्वृताः । ज्वरादिभिर्महाघोरैर्नानादुःखविधायिभिः ।
यतन्ते न हि वै श्रेयो विनष्टेन्द्रियगोचराः । ततो मृता गर्भवासे वसन्ति सततं नराः ।
विण्मूत्रकलिले घोरे दुःखैर्बहुभिराचिताः । च्यवन्ते तु ततो घोराद्गर्भात् संसारमण्डले ।
परस्परं विहिंसन्तः कुर्व्वन्तः कर्म्मसञ्चयं । मज्जन्त्येवं सदा घोरे संसारे दुःखसङ्कुले ।
पापानि बहुरूपाणि कुर्व्वते ज्ञानतस्तदा । संसारस्यैव महिमा विस्तृतः सर्व्वजन्तुषु । १५६००

अच्छेद्यः शस्त्रसंपातैरुपायैर्ब्बहुभिः सदा । एतस्मान्न निवर्त्तन्ते मर्त्याः प्राकृतबुद्धयः ।
इमं हत्वा मनुष्येन्द्रमिदमस्माद्धराम्यहं । चोरयित्वा धनमिदं हरिष्येऽस्यादृदाम्यहं ।
निर्भर्त्स्यैनमिमं शान्तं हरिष्यामि धनं बली । इत्यादिव्याकुला मूर्खा यतन्ते प्राणिपीडनं ।
अस्यैव दुःखमूलस्य संसारस्य सदा हरिः । भेषजं सर्व्वथा देवः शङ्खचक्रगदाधरः ।
आदिदेवः पुराणात्मा आत्मा ब्रह्मविदां सदा । ते वयं सर्व्वयत्नेन द्रक्ष्यामः सर्व्वथा हरिं । १४९०५
इत्थं पिशाचौ भाषन्तौ प्रादुरास्तां हरेः पुरः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां सप्तत्यधिकद्विशततमोऽध्यायः ॥ २७० ॥
॥ वैशम्पायन उवाच ॥ ततः स भगवान् विष्णुः पिशाचौ मांसभक्षकौ । ददर्शाथ महाघोरौ दीपिकाधारिणौ हरिः ।
विलोकयाञ्चक्रतुस्तौ पिशाचौ देवकीसुतं । स्थितं सुखासने विष्णुं दृष्ट्वा लोकेश्वरेश्वरं ।
तौ च गत्वा समुद्देशं पिशाचौ केशवस्य ह । ततस्तावूचतुर्विष्णुमन्तरीक्षस्थ केशवं ।
को भवान् कस्य वा मर्त्य कुतश्चागम्यते त्वया । किमर्थमिह संप्राप्तो वने घोरे मृगाकुले । १४९१०
निर्म्मनुष्ये दीपिवृते पिशाचगणसेविते । श्वापदैः सेव्यमाने च विपिने व्याघ्रसंकुले ।
सुकुमारोऽनवद्याङ्गः साक्षाद्विष्णुरिवापरः । पद्मपत्रेक्षणः श्यामः पद्माभः श्रीपतिः स्वयं ।
अस्मत्प्रीतिकरः साक्षात् प्राप्तो विष्णुरिवापरः । देवो वा यदि वा यक्षो गन्धर्व्वः किन्नरोऽपि वा ।
इन्द्रो वा धनदो वाऽपि यमोऽथ वरुणोऽपि वा । एकाकी विपिने घोरे ह्याचारि समता इव ।
ब्रूहि मर्त्य यथातत्त्वं ज्ञातुमिच्छामि मानव । एवं पृष्टः पिशाचाभ्यामाह विष्णुस्त्रिविक्रमः । १४९१५
क्षत्रियोऽस्मीति मामाहुर्म्मनुष्याः प्रकृतिस्थिताः । यदुवंशे समुत्पन्नः क्षात्त्रवृत्तमनुष्ठितः ।
लोकानामथ पाताऽस्मि शास्ता दुष्टस्य सर्व्वदा । कैलासं गन्तुकामोऽस्मि द्रष्टुं देवमुमापतिं ।
इत्येवं मम वृत्तान्तः कथ्यतां कौ युवामिति । युवामिह समायातौ किमर्थं ब्राह्मणाश्रमं ।
एषा हि महती पुण्या नानाविप्रनिषेविता । वदरीयं समाख्याता न क्षुद्रैराश्रिता क्वचित् ।
तपस्विभिस्तपोयुक्तैर्जुष्टा सिद्धनिषेविता । स्वगणा नात्र दृश्यन्ते पिशाचा मांसभोजनाः । १४९२०
न हन्तव्या मृगाश्चात्र मृगया नात्र वर्त्तते । न तु क्षुद्रैः प्रवेष्टव्या न कृतघ्नैर्न नास्तिकैः ।
अहमस्य तु देशस्य रक्षिता नात्र संशयः । व्यतिक्रमो यदि भवेत्तस्य शास्ताऽस्मि यत्नतः ।
को भवन्तौ क नु युवां कस्येयं महती चमूः । नातः परं प्रवेष्टव्यमत्र यथास्थानं संस्थिताः ।
विप्रास्तत्र प्रवर्त्तन्ते तपःसु च तपस्विनां । इहैव स्थीयतां तावत्कथयस्व ततः सुखं ।
अन्यथाऽहं निषेद्धा स्यां बलाद्वाक्यैस्तथैव च । १४९२५
॥ वैशम्पायन उवाच ॥ एवं पृष्टौ पिशाचौ तु वाक्यमेवोपचक्रतुः । तयोरेको महाघोरः पिशाचो दीर्घबाहुकः ।
उवाच वचनं तत्र यथा हृदि समर्पितं ।
॥ पिशाच उवाच ॥ श्रूयतामभिधास्यामि समाहितमना भव । नमस्कृत्य जगन्नाथं हरिं कृष्णं जगत्पतिं ।
आदिदेवमजं विष्णुं वरेण्यमनघं शुचिं । वक्ष्यामि सकलं यदत्तया शृणु यदीच्छसि ।

घण्टाकर्णोऽस्मि नाम्नाऽहं पिशाचो घोरदर्शनः । मांसादो विकृतो घोरः साक्षान्मृत्युरिवापरः । १४३३०
धनदस्यानुगन्ताऽहं साक्षाद्रुद्रसखस्य च । ममायमनुजः साक्षादन्तकस्यान्तको ह्यहं ।
मृगयेयं सुमहती विष्णोः पूजार्थमित्युत । ममेयं वर्त्तते सेना स्वगणोऽपि ममैव तु ।
आगतोऽहं महाशैलात् कैलासाद्भूतसेवितात् । अहं पिशाचवेशेन संविष्टः पापकर्मकृत् ।
सततं दूषयन् विष्णुं घण्टामाबध्य कर्णयोः । मम न प्रविशेन्नाम विष्णोरिति विचिन्तयन् ।
अहं कैलासनिलयमासाद्य वृषभध्वजं । आराध्य तं महादेवमस्तुवं सततं शिवं । १४३३५
ततः प्रसन्नो मामाह वृणीष्वेति वरं हरः । ततो मुक्तिर्मया तत्र प्रार्थिता देवसन्निधौ ।
मुक्तिं प्रार्थयमानं मां पुनराह त्रिलोचनः । मुक्तिप्रदाता सर्व्वेषां विष्णुरेव न संशयः ।
तस्माद्गत्वा च बदरीं तत्राराध्य जनार्द्दनं । मुक्तिं प्राप्नुहि गोविन्दान्नरनारायणाश्रमे ।
इत्युक्तो देवदेवेन शूलिना ज्ञातवानहं । तमेव परमं मत्वा गोविन्दं गरुडध्वजं ।
तस्मात् प्रार्थयमानः सन्मुक्तिं देशमिमं गतः । अन्यच्च शृणु मे कार्य्यं यदि कौतूहलं तव । १४३४०
पुरी द्वारवती नाम पश्चिमस्योदधेस्तटे । यदुवृष्णिसमाकीर्णा सागरोर्म्मिसमाकुला ।
अध्यास्ते स हरिर्विष्णुस्तां पुरीं पुरुषोत्तमः । द्रष्टुं लोकहितार्थाय वसन्तं द्वारकापुरे ।
निर्गताः साम्प्रतं मर्त्य वयमेतैः सहानुगैः । विष्णुः सर्व्वेश्वरः साक्षाद्द्रष्टव्योऽस्माभिरद्य वै ।
लोकानां प्रभवः पाता कर्त्ता हर्त्ता जगत्पतिः । आदेरादिः समस्तस्य प्रभवः कारणं हरिः ।
कर्त्ता समस्तस्य हरिः पुरातनः प्रभुः प्रभूणामपि यः सदात्मकः । तमादिदेवं वरदं वरेण्यं द्रष्टुं हरिं संप्रति संयताः स्मः । १४३४५
यस्य प्रसादाज्जगदेवमासीत् सप्राणिगन्धर्व्वमहोरगौघं । देवं जगद्योनिमजं जनार्द्दनं द्रष्टुं हरिं संप्रति संयताः स्मः ।
यस्योदरादिश्वमिदं प्रभूतं लयञ्च यस्मिन् समुपैति कल्पे । यस्यैव साक्षादनुवर्त्ति विश्वं द्रक्ष्याम देवं पुरुषोत्तमं हरिं ।
स्रष्टा च योऽसौ सकलस्य देवः पाता च हर्त्ता च हरिः स एव । द्रक्ष्याम नित्यं भुवनेश्वरं हरिं पुराणमाद्यं प्रभविष्णुमव्ययं ।
अजस्य कर्त्ता भुवनस्य गोप्ता भुवस्य कर्त्ता हरिरेक एव । संयोगिते योगविशुद्धबुद्धिं लभेम तेनैव मतिः समाकुला ।
निगीर्य्य विश्वं सकलं जगत्पतिः शेते शिशुत्वं समवाप्य साक्षात् । वटस्य पत्रे जगतां निवासः पादौ च विक्षिप्य करौ निधुन्वन् । १४३५०
यस्योदरे देवमुनिः पुरातनो ददर्श लोकानखिलान् स्वमायया । प्रविश्य विश्वं सकलं यथावद्वहिर्यथाभूतमभूदिदं महत् ।
निगीर्य्य विश्वं जगदादिकाले शेते महात्मा जलधेर्जलौघे । देव्या श्रिया चामरलोलहस्तया निषेव्यमाणः पुरुषोत्तमस्तदा ।
नाभेश्च यस्याविरभूत् सपत्रं पद्मं महत् काञ्चनसप्रभं प्रभोः । जन्मास्पदं लोकगुरोर्यदासीद्विस्तारि पद्मं जगदादिसृष्टौ ।
दधार यो भूतपतिर्महामहीं दंष्ट्राग्रसंस्थापितरूढमूलां । नदन्महाभेघ इवादिकाले कुर्व्वन् वराहो मुनिगीतमूर्त्तिः ।
हरिः पुराणः पुरुषोत्तमः प्रभुः कर्त्ता समस्तस्य समस्तसाक्षी । यज्ञात्मको यज्ञपतिर्जगत्पतिर्द्रष्टुं तमीशं वयमुद्यताः स्मः । १४३५५
कश्चिद्बहुत्वेन वदन्ति देवमेकात्मना केचिदिमं पुराणं । वेदान्तसंस्थापितसत्त्वयुक्तं द्रष्टुं तमीशं वयमुद्यताः स्मः ।

अनेकमेके बहुधा वदन्ति श्रुतिस्मृतिन्यायविनिविष्टचित्ताः । आश्चर्य्यमात्मानमजं पुराविदो द्रष्टुं तमीशं वयमुद्यताः स्मः ।
यं प्राहुराद्यं वरदं वरेण्यमेकान्ततत्त्वं मुनयः पुरातनाः । यं सर्व्वगं देवमजं जनार्द्दनं द्रष्टुं हरिं संप्रति संयताः स्मः ।
यस्मिन् विश्वमिदं प्रोतमादिकाले जगत्पतौ । तं द्रष्टुमद्य संवृत्ताः किं नु वक्ष्याम साम्प्रतं ।
गच्छामो वयमन्यत्र गच्छ त्वं काममन्यतः । यदि ते रोचते मर्त्य यथेष्टं गच्छ सांप्रतं ।
रात्रिमध्यमनुप्राप्तं नात्र कार्य्या विचारणा । इत्युक्त्वा घोररूपोऽसौ पिशाचो विकृताननः ।
तस्मिन्नेव समे देशे पीत्वा च रुधिरं बहु । भक्षयित्वा यथाकामं मांसराशिं विचक्षणः ।
अपः संस्पृश्य तत्रैव पार्श्वे संस्थाप्य साधनं । आन्त्रपाशं महाघोरं संस्थाप्य विपुलं महत् ।
आसनं कुशसंयुक्तं कृत्वा चाभ्युक्ष्य वारिणा । उत्सार्य्य श्वगणान् सर्व्वान् यत्नेन महता तदा ।
सुखासनं समास्थाय समाधौ यतते स्वपः । एकचित्तस्तदा भूत्वा नमस्कृत्य च केशवं ।
इमं मन्त्रं पठन् घोरः पिशाचो भक्तवत्सलं । नमो भगवते तस्मै वासुदेवाय चक्रिणे ।
नमस्ते गदिने तुभ्यं वासुदेवाय धीमते । नमो नारायणायास्तु विष्णवे प्रभविष्णवे ।
मम भूयान्मनःशुद्धिः कीर्त्तनात्तव केशव । जन्मेदमीदृशं घोरं माभून्मम दुरासदं ।
देवदूतो भविष्यामि स्मरणात्तव गोपते । तव चक्रप्रहारेण कायो नश्यतु मामकः ।
मम भूयो भवो माभूदेषा मे प्रार्थना विभो । अर्थिनां कल्पवृक्षोऽसि दाता सर्व्वस्य सर्व्वदा ।
यत्र यत्र भवेज्जन्म तत्र तत्र भवान् हृदि । वर्त्ततां मम देवेश प्रार्थनैषा मम परा ।
नमस्तुभ्यं नमस्तुभ्यं भवत्वेव सदा मम । निर्विघ्ना प्रार्थना देव नमस्तेऽस्तु सदा मम ।
यदा मे मरणं भूयात्तदा माभूत् स्मृतिभ्रमः । दिने दिने क्षणं चित्तं त्वयि संस्थं भवत्विति ।
एवं प्रेरय मां देव माभूत्ते चित्तमीदृशं । नृशंसोऽयं पिशाचोऽयं दयाऽस्मिन् का भवेदिति ।
एवं चिन्तय मां देव भृत्यो मह्यमिति प्रभो । परपीडा न मत्तोऽस्तु नमोऽस्तु भगवन् प्रभो ।
इन्द्रियाणीन्द्रियार्थेषु माभूवन् सांप्रतं हि मे । अन्तकाले समाप्येवं प्रसादात्तव केशव ।
पृथिवी पातु मे घ्राणं रसनां पातु मे पयः । सूर्य्यस्य पातु मे चक्षुः स्पर्शं पातु च मारुतः ।
श्रोत्रमाकाशमप्येतु मनः ॥ णाञ्च गच्छतु । जलं मां रक्षतां नित्यं पृथिवी रक्षतां हरे ।
सूर्य्यो मां रक्षतां विष्णो नमस्ते सूर्य्यतेजसे । वायुर्म्मां रक्षतां दुःखादाकाशश्च जनार्द्दन ।
न मनः सर्व्वगं देव रक्षतां विषयान्तरे । मनो विपर्य्यये घोरं पुरुषान् हन्ति नित्यशः ।
पापेषु योजयेत् पुंसः परपीडात्मकेषु च । मनस्तद्रक्षतां देव भूयो भूयो जनार्द्दन ।
माभून्मनसि कालुष्यं मनो मे निर्म्मलं भवेत् । कलुषं यस्य तच्चित्तं नरके पातयत्यमुं ।
वाह्यानि निर्म्मलान्येवमिन्द्रियाणि भवन्त्युत । न तानि कार्य्यवन्तीह मनश्चेत् कलुषं भवेत् ।
नाङ्गानि मुण्डिनाऽमेध्यं गृहीत्वा यो व्यवस्थितः । वहिः प्रक्षालनं कुर्व्वन् किं भवेत्तस्य केशव ।
व्यर्थो हि केवलं तस्य प्रयत्नो वाह्यगोचरः । तस्मात् सर्व्वप्रयत्नेन चित्तं रक्ष जनार्द्दन ।
बलवानिन्द्रियग्रामो वारयैनं जनार्द्दन । परिवादाज्जगन्नाथ वाचं रक्ष दुरुद्वह ।

परद्रव्यान्मनो रक्ष परदाराज्जनार्द्दन । सर्व्वत्र मे दया भूयात् प्रमादात्तव केशव ।
त्वय्येव भक्तिरचला भूयाद्भूतेषु मे दया । बहुनाऽत्र किमुक्तेन शृणुष्वेदं वचो मम ।
सुखे दुःखे च रागे च भोजने गमने तथा । जाग्रत्स्वप्नेषु सर्व्वत्र त्वय्येव रमतां मनः ।
मामकं देवदेवेश नमस्तेऽस्तु जनार्द्दन । इति ब्रुवन् घोरतमो ज्ञात्वा क्षीणोऽथचिन्तकः । १४६६०
पिशाचो भगवद्भक्तः समाधिं समपद्यत । दृढं बद्धात्मनः कायमात्मपाशेन मांसपः ।
निश्चलेनैव मनसा सुखमास्ते स्म संयतः । ध्यायन् हरिं जगद्योनिं विष्णुं पीताम्बरं शिवं ।
मुकुन्दमादिपुरुषमेकाकारमनामयं । नित्यशुद्धं ज्ञानगम्यं कारणं सर्व्वदेहिनां ।
नासिकाग्रं समालोक्य पठन् ब्रह्म सनातनं । निर्वातस्थो यथा दीपः प्रोच्चरन् प्रणवं सदा ।
प्रणवं वाचकं मत्वा वाच्यं ब्रह्मेति निश्चितः । एकाग्रं सततं कृत्वा चित्तं विष्णौ समर्पितं । १४६६५
विकल्परहितं चित्तं हृदि मध्ये न्यवेशयत् । पुण्डरीके शुभदले समावेश्य जगत्पतिं ।
आस्ते सुखं महायोगी पिशिताशस्तदा महान् । त्रिधामानं जपंस्तत्र स्मरन् विष्णुं सनातनं ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां घण्टाकर्णसमाधौ एकसप्तत्यधिकद्विशततोऽध्यायः २७१ ॥

॥ वैशम्पायन उवाच ॥ ततः स भगवान् विष्णुः पिशाचं दृष्टवांस्तदा । चिन्तयन्तं स्वमात्मानं शुद्धं शुद्धिसमन्वितं
आत्मन्येव स्थितं साक्षात् पठन्तं प्रणवं सकृत् । प्रार्थयन्तं स्वमात्मानमेकान्ते नियतं हरिः ।
अचिन्तयज्जगन्नाथः कारणं पुण्यसञ्चयं । ध्यात्वा तु सुचिरं विष्णुः कारणं पुण्यकर्म्मणः । १४७००
धनदस्योपदेशेन पठन् सुबहुशः स्थितः । वासुदेवेति कृष्णेति माधवेति च मां सदा ।
जनार्द्दन हरे विष्णो भूतभावन भावन । नरकारे जगन्नाथ नारायण परायण ।
इति मां नामभिर्नित्यं पठत्येव दिवानिशं । स्वपन् जाग्रंस्तथा तिष्ठन् भुञ्जन् गच्छंस्तथा वदन् ।
भक्षयन्मांसपिटकं पिबन् शोणितमेव च । बाधमानश्च सुचिरं हत्वा चापि मृगान् बहून् ।
हनने भोजने चैव जाग्रत्स्वप्ने तथैव च । सर्व्वेष्वपि च कार्य्येषु कर्त्ताऽहमिति मन्यते । १४७०५
एतस्य कर्म्मणः पाक एष घोरस्य कर्म्मणः । निश्चित्यैवं जगन्नाथः प्रीतस्तस्य बभूव ह ।
अदर्शयत् स्वमात्मानमनन्यस्य जगत्पतिः । शुद्धेऽन्तःकरणे तस्य पिशाचस्याथ भूमिप ।
स च घोरः पिशाचोऽपि ददर्शात्मनि केशवं । पीतकौशेयवसनं पद्माक्षं श्यामलं हरिं ।
शंखिनं चक्रिणं विष्णुं स्रग्विणं गदिनं विभुं । किरीटिनं कौस्तुभिनं श्रीवत्साङ्कितोरसं ।
नीलमेघनिभं कान्तं गरुडस्थं प्रभञ्जनं । चतुर्भुजं शुभगिरं निश्चलं सर्व्वगं शिवं । १४७१०
अनादिनिधनं नित्यं मायाविनममायिनं । सत्ययुक्तं सदा शुद्धं बुद्धिगम्यं सदाऽमलं ।
मनस्थं जगन्नाथं दृष्ट्वा विष्णुमनेकधा । अनुमील्यैव नयने कृतार्थोऽस्मीत्यमन्यत ।
अद्य दृष्टो हरिर्विष्णुः साक्षात् सर्व्वगतः शुभः । प्रसन्नो हि हरिर्मह्यं तेनाहं दृष्टवान् हरिं ।
सिद्धं मे जन्मनः कार्य्यं किमतः कृत्यमस्ति मे । ग्रन्थयो मम निर्भिन्ना वश्यान्येवेन्द्रियाणि मे ।
प्रायेण जितमित्येव मनो मन्ये स्थिते हरौ । ईर्षणा च निरस्ता मे प्रसन्नोऽहं तथाऽभवं । १४७१५

एतेभ्योऽपि पिशाचेभ्यो निर्मुक्तः सांप्रतं तथा । योऽसौ ममानुजः साक्षात् स च भक्तस्तया हरौ ।
कालेन चैव निर्मुक्तो विष्णोः सायुज्यमाप्नुयात् । इत्येवं चिन्तयित्वा स आत्मपाशं विभिद्य च ।
क्रमेण प्राणानुत्सृज्य विलोक्य च दिशस्तथा । शरीरं सुसमं कृत्वा प्राविशत् सुखेन च ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां घण्टाकर्णस्य विष्णुसाक्षात्कारे द्विसप्तत्यधिकद्विशतोऽध्यायः ॥ २७२ ॥
॥ वैशम्पायन उवाच ॥ पिशिताशो जगन्नाथं ददर्शाथ जगद्गुरुं । समाधौ च यथा दृष्टं भूमौ चापि तथा हरिं ।
अयं विष्णुरयं विष्णुरित्यूचे पिशिताशनः । समाधौ च यथा दृष्टः सोऽयमत्रापि दृश्यते । १४०२०
इत्युवाच पुनर्ब्रूते नृत्यन्निव हसन्निव ।
अयं स चक्री शरशार्ङ्गधन्वा गदी रथी शङ्खजलजपाणिः । सहस्रमूर्द्धा सकलामरेशो जगत्प्रसूतिर्ज्जगतां निवासः ।
विष्णुर्ज्जिष्णुर्ज्जगन्नाथः पुराणः पुरुषोत्तमः । विश्वेशो विश्वकर्त्ता च सोऽयमेव सनातनः ।
अस्यैव देवस्य हरेः स्तनान्तरे विराजते कौस्तुभरत्नदीपः । यस्य प्रसादाज्जगदेतदादौ विराजते चन्द्रमसेव रात्रिः ।
योऽसौ पृथ्वीं दधाराग्रदंष्ट्रया जलमध्यगात् । सोऽयमेव हरिः साक्षाद्वाराहं वपुरास्थितः । १४०२५
बद्ध्वा तदा दानवमुग्रपौरुषं ददौ च शक्राय ततोऽनु राज्यं । बलिं बलाद्येव हरिः स वामनस्तुतस्य भक्त्या मुनिभिः पुरातनैः ।
दंष्ट्राकरालः सुमहान् हत्वा यो दानवान् रणे । निःशोकमखिलं लोकं चकारासौ जनार्द्दनः ।
आदौ दधारैकभुजेन मन्दरं निर्ज्जित्य सर्व्वानसुरान्महार्णवे । ददौ च शक्राय सुधामयं महान् स एष साक्षादिह मामव स्थितः ।
यः शेते जलधौ नागे देव्या लक्ष्म्या सुखावहं । हत्वा तौ दानवौ घोरौ मधुकैटभसंज्ञितौ ।
यमाहुराद्यं विपुलं जगत्पतिं सर्व्वस्य धातारमजं जनित्रं । अणोरणीयांसमतिप्रमाणं स्थूलात् स्थविष्ठं हरिमेव विष्णुं । १४०३०
यत्र स्थितमिदं सर्व्वं प्राप्ते लोकस्य नाशने । आदौ यस्मात् समुत्पन्नं सोऽयं विष्णुरितः स्थितः ।
यस्येच्छया सर्व्वमिदं प्रवर्त्तते निवर्त्तते चापि जनार्द्दनस्य । अयं स विष्णुः पुरुषोत्तमः शिवः प्रवर्त्तते मामिह यदावेश्वरः ।
भृगोर्वंशे समुत्पन्नो जामदग्न्य इति श्रुतः । शिष्यत्वं समवाप्यैव भृगव्याधस्य यः स्थितः ।
जघान वीर्य्यादतुलं महारणे कुठारशस्त्रेण गिरीशशिष्यः । सहस्रबाहुं कृतवीर्य्यसम्भवं हयैश्च नागैश्च रथैश्च निर्गतं ।
कुरुक्षेत्रं समासाद्य यश्चकार पितृक्रियां । निःक्षत्रियमिमं लोकं कृतवानेकविंशतिं । १४०३५
रघोरथ कुले जातो रामो नाम जनार्द्दनः । सीतया च श्रिया युक्तो लक्ष्मणानुचरः कृती ।
कृत्वा च सेतुं जलधौ जनार्द्दनो हत्वा च रक्षःपतिमाशुगैः शरैः । दत्त्वा च राज्यं स विभीषणाय दाशाश्वमेधैरयजच्च योऽसौ ।
वसुदेवकुले जातो वासुदेवेति शब्दितः । गोकुले क्रीडते योऽसौ सङ्कर्षणसहायवान् ।
उत्तानशायी शिशुरूपधारी पीत्वा स्तनं पूतनिकाप्रदत्तं । व्यसुं चकाराशु जनार्द्दनस्तदा दनोः सुतां तामवधत् स एव हरिः ।
पयःपानं तथा कुर्व्वन् भञ्जयन्दधिपिण्डकं । दाम्ना वद्धोदरो विष्णुर्माता रूषितया दृढं । १४०४०
ततश्च दाम्ना सुदृढेन बद्धो जघान योऽसौ यमलार्ज्जुनौ च । क्रीडन् हरिर्गोकुलवासवासो गोपीभिराक्रम्य मुखं स्तनञ्च ।

॥ वैशम्पायन उवाच ॥ ततः स भगवान् विष्णुर्मुनिभ्यस्तमनादितः । कथयामास यद्दृत्तं शिवा तस्य महात्मनः ।
तच्छ्रुत्वा मुनयः सर्व्वे विस्मयं परमं गताः । अहोऽस्य कर्म्मणः पाकस्तव सन्दर्शनादिति ।
अर्च्चितो मुनिभिः सर्व्वैः प्रीतः प्रीतिमतां प्रियः । ततः प्रभाते विमले सूर्य्ये चाभ्युदिते सति ।
आरुह्य गरुडं विष्णुर्ययौ कैलासमुत्तमं । भवद्भिस्तत्र गन्तव्यमित्युक्ता मुनिसत्तमान् ।
यत्र विश्वेश्वराः सिद्धास्तपस्यन्ति यतव्रताः । यत्र वैश्रवणः साक्षादुपास्ते शङ्करं सदा । १४८००
यत्र तन्मानसं नाम सरो हंसालयं महत् । यत्र भृङ्गिरिटिर्देवमुपास्ते शङ्करं शिवं ।
गाणपत्यमवाप्याथ हरपार्श्वचरः सदा । यत्र सिंहा वराहाश्च द्विपदोपिमृगैः सह ।
क्रीडन्ति वन्यरतयः परस्परहिते रताः । यत्र नद्यः समुत्पन्ना गङ्गाद्याः सागरङ्गमाः ।
यत्र विश्वेश्वरः शम्भुरच्छिनद्ब्रह्मणः शिरः । यत्रोत्पन्ना महावेगा भूतानां हरतां वसुः ।
उमया यत्र सहितः शङ्करो नीललोहितः । ऋषिभिः प्रार्थितः पूर्व्वं ददौ यत्र गिरिः सुतां । १४८०५
शङ्कराय जगद्धात्रे शिवाय जगतीपते । यत्र लेभे हरिश्चक्रमुपास्य बहुभिर्द्दिनैः ।
पुष्करैः शतपत्रैश्च नेत्रेण च जगत्पतिं । गुहां यत्र समाश्रित्य क्रीडन्ते सिद्धकिन्नराः ।
प्रियाभिः सह मोदन्ते पिबन्ते मधु चोत्तमं । यमुद्धृत्य भुजैः सर्व्वैः पौलस्त्यो विरराम ह ।
तमारुह्य महाशैलं देवकीनन्दनो हरिः । मानसस्योत्तरं तीरं जगाम यदुनन्दनः ।
तपश्चर्त्तुं किल हरिर्विष्णुः सर्व्वेश्वरः शिवः । जटी चीरी जगन्नाथो मानुषं वपुराश्रितः । १४८१०
तपसे धृतचित्तस्तु शुचौ भूमावुपाविशत् । अवरुह्य ततो याना[illegible]दसमाश्रितात् ।
द्वादशाब्दं तपश्चर्त्तुं मनो दध्रे ततो हरिः । फाल्गुनेन तु मासेन समारम्भे जगत्पतिः ।
शाकभक्षः कृतजपो वेदाध्ययनतत्परः । किमुद्दिश्य जगन्नाथस्तपश्चरति मानवः ।
तं न विद्मो यथाकामं दुर्ज्ञेयेश्वरचिन्तनात् । तपस्यति तदा विष्णौ पर्व्वते भूतसेविते ।
गरुडः कश्यपसुत इन्धनानि समाचिनोत् । होमार्थं वासुदेवस्य चरतस्तप उत्तमं । १४८१५
चक्रराजोऽथ पुष्पाणि सञ्चिनोति तदा हरेः । दिक्षु सर्व्वासु सर्व्वत्र ररक्ष जलजस्तदा ।
खड्ग आहृत्य यत्नेन कुशान् सुवङ्गमस्तदा । गदा कौमोदकी चैव परिचर्य्यां चकार ह ।
धनुःप्रवरमत्युग्रं शार्ङ्गं दानवभीषणं । स्थितं हि पुरतस्तस्य यथेष्टं भृत्यवत् स्वयं ।
जुहोति भगवान् विष्णुरेधोभिर्व्वङ्गभिः सदा । आज्यादिभिस्तदा हव्यैरग्निं सम्पूज्य माधवः ।
सप्तार्च्चिषः समाप्तिश्च समस्तव्यस्ततः कृति । एकस्मिन्नेकदा मासे भुञ्जानो नियतात्मवान् । १४८२०
द्वितीये त्वथ षण्मासे भुञ्जन्नेकेन केशवः । एकस्मिन् वत्सरे भुञ्जंस्तथैवैकेन केनचित् ।
समाप्य तु ततः सर्व्वमेवमेव जगत्पतिः । द्वादशाब्दे तथा पूर्णे ऊर्ज्जमासे जगत्पतिः ।
जुह्वन् वह्निं समाध्यायन् पठन्मन्त्रं जनार्द्दनः । आरण्यकं पठन् विष्णुः साक्षात् सर्व्वेश्वरो हरिः ।
आस्ते ध्यानपरस्तत्र पठन् प्रणवमुत्तमं ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां पञ्चसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७५ ॥

॥ वैशम्पायन उवाच ॥ ततः इन्द्रः स्वयं तत्र आरुह्य गजमुत्तमं । द्रष्टुं सर्व्वेश्वरं विष्णुं तपस्यन्तं समाययौ । १४८२५
ततो यमस्तु भगवानारुह्य महिषं वरं । किङ्करैश्च स्वयं साक्षादाययौ नगमुत्तमं ।
प्रचेता हंसमारुह्य वारुणैश्च समन्वितः । श्वेतच्छत्रसमायुक्तः श्वेतव्यजनवीजितः ।
ययौ कैलासशिखरं द्रष्टुं केशवमञ्जसा । अन्ये चापि तथा देवा आदित्या वसवस्तथा ।
रुद्राश्चैव तथा राजन् द्रष्टुं केशवमाययुः । सिद्धाश्च मुनयश्चैव तथाऽन्ये मुनिसत्तमाः ।
सर्व्वाश्चाप्सरसो राजन् नृत्यगीतविशारदाः । ततो देवगणः सर्व्वः कैलासं समपद्यत । १४८३०
पर्व्वतो नारदश्चैव तथाऽन्ये ऋषिसत्तमाः । विस्मयस्मितलोलाक्षाः सर्व्वे देवगणास्तथा ।
आश्चर्य्यं खलु पश्यध्वं न भूतं न भविष्यति । योगिध्येयः स्वयं कृष्णो यक्ष्यति गुरुः स्वयं ।
को न्वत्र समयो भूयादिति ते मेनिरे गणाः ।
तत. समाप्ते सकले जगत्पतेर्व्रते समूले सकलेश्वरः शिवः । द्रष्टुं हरिं लोकहितैषिणं प्रभुं ययौ भवान्या सह भूतसंघैः ।
सार्द्धं कुवेरेण सगुह्यकेन सख्या प्रियेण प्रभुरीश्वरः शिवः । स्वयं जटी भूतपिशाचसंवृतः शरी च खड्गी शशिखण्डशेखरः । १४८३५
करेण बिभ्रत् सह दर्भकुण्डिकां करेण साक्षादपरेण दीपिकां । अन्येन बिभ्रन्महतीं स डिण्डिमां शूलञ्च बिभ्रन्नपरेण बाहुना ।
मृणाल् स रुद्राक्षकृतान् समुद्वहन् जटाभिरापिङ्गलतासमूर्त्तिः । विराजमानः प्रभुरिन्दुशेखरो वृषेण युक्तः स्मितेन शङ्करः ।
उमास्तनद्वन्द्वसमर्पितानसस्तया समाश्लिष्य निपीडिताधरः । गङ्गाम्बुविक्षालितचन्द्रशेखरस्ताश्चापि वीक्षन् बहुशस्तदा शिवः ।
भस्माङ्गरागैरनुलेपिताननो महोरगैर्ब्बद्धजटः सनातनः । शिरःकपालैः परिशोभितस्तदा द्रष्टुं हरिं केशवमभ्ययाच्छिवः ।
यमाक्षरंग्र पुरुषं महान्तं पुरातनं सांख्यनिबद्धहृदयः । यस्यापि देवस्य गुणान् समग्रांस्तत्त्वांश्चतुर्विंशतिमाक्षरेके । १४८४०
यमाक्षरेकं पुरुषं पुरातनं कणादनामानमजं महेश्वरं । दक्षस्य यज्ञं विनिहत्य यो वै विनाश्य देवानसुरान् सनातनः ।
यं विदुर्भूततत्त्वज्ञं भूयिष्ठं भूतभावनं । वामदेवं विरूपाक्षमाहुस्तत्त्वविदो जनाः ।
महादेवं सहस्राक्षं कालमूर्त्तिं चतुर्भुजं । रुद्रं रोदननामानमाहुर्विश्वेश्वरं शिवं ।
अप्रमेयमनाधारमाहुर्माहेश्वरा जनाः । नग्नं नागोपवीतन्तु नागिनं अशिवक्षमं ।
आहुर्विश्वेश्वरं शान्तं शिवमादिं सनातनं । यस्य मूर्त्तिरिमाः सर्व्वा धराद्याः सकला नृप । १४८४५
भूमिरापोऽनलो वायुः खं सूर्य्यश्च तथा शशी । तथैव यजमानश्च प्रकृतिश्चैवमष्टधा ।
महादेवो महायोगी गिरिशो नीललोहितः । आदिकर्त्ता महीभर्त्ता शूलपाणिरुमापतिः ।
द्रष्टुं विश्वेश्वरं विष्णुं भूतसंघैः समाययौ ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां षट्सप्तत्यधिकद्विशततोऽध्यायः ॥ २७६ ॥
॥ वैशम्पायन उवाच ॥ तस्यागे समपद्यन्त भूतसंघाः सहस्रशः । घण्टाकर्णो विरूपाक्षः कुण्डधारः कुमुदहः ।
दीर्घरोमा दीर्घभुजो दीर्घबाहुर्निरञ्जनः । उरुवक्षाः शतमुखः शतग्रीवः शतोदरः । १४८५०

कुण्डोदरो महाग्रीवः स्थूलजिह्वो द्विबाहुकः । पार्श्ववक्त्रः सिंहमुख उन्नतांसो महाहनुः ।
त्रिबाहुः पञ्चबाहुश्च व्याघ्रवक्त्रः सितानन । एते चान्ये च बहवो दीर्घास्या दीर्घलोचनाः
नृत्यन्तः प्रहसन्तश्च स्फोटयन्तः परस्परं । तथाऽन्ये घोररूपाश्च तथाऽन्ये विकृताननाः ।
प्रेतभक्षाः प्रेतवाहा मांसशोणितभोजनाः । शवानि सुबहून्याशु भक्षयन्तस्ततस्ततः ।
पिबन्तो रुधिरं घोरं खण्डयन्तः शवान् बहून् । कराला विवृता दीर्घा धमनिस्नायुसन्तताः । १४८५५
नानाविधाः सुवीराश्च शूलाग्रप्रोतमानुषाः । शिरोमालावृताः केचिदान्त्रपाशावपाशिताः ।
डिण्डिमैरट्टहासैश्च नादयन्तो वसुन्धरां । कपालिनो भैरवाश्च जटिला मुण्डिनस्तथा ।
एवं बहुविधा घोराः पिशाचा विकृताननाः । तथाऽन्ये मुनिवीराश्च ध्यायन्तः परमेश्वरं ।
पठन्तो वेदवाक्यानि शास्त्राणि विविधानि च । कुण्डिकास्थकराः केचित् केचित् कुशविचीरिणः ।
कौपीनवसनाः केचित् केचित् काषयसंवृताः । स्तुवन्तः शङ्करं भक्त्या स्तोत्रैर्माहेश्वरैस्तथा । १४८६०
एकत्र ते मुनिगणा अपरत्र गणास्तथा । अन्यत्र सिद्धगन्धर्व्वाः प्रियाभिः प्रियसङ्गताः ।
नृत्येऽपि कुशलाः सर्व्वे गायन्ति स्म च कन्यकाः । विद्याधरास्तथाऽन्यत्र स्तुवन्तः शङ्करं शिवं ।
ननृतुस्तस्य पुरतो गच्छतोऽप्सरसां गणाः । एवमेतैर्महाघोरैः पिशाचैर्भूतकिन्नरैः ।
मुनिभिश्चापरैर्भिश्च समं शर्व्वः समाययौ । यत्र विश्वेश्वरो विष्णुस्तपस्तेपे सुदारुणं ।
यत्र ते लोकपालाश्च तिष्ठन्ति स्म दिदृक्षया । उमया लोकभाविन्या गङ्गया चन्द्रशेखरः । १४८६५
स सर्व्वलोकप्रभवो हरिः शिवो जटी च साक्षात् प्रणवात्मकः कृती । द्रष्टुं हरिं विष्णुमुदारविक्रमो ययौ यथेष्टं पि- ॥
तृवैर्वृतः ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां महादेवागमने सप्तसप्तत्यधिकद्विशततोऽध्यायः ॥ २७७ ॥

॥ वैशम्पायन उवाच ॥ एवं बहुविधैर्भूतैः पिशाचैरुरगैः सह । आगत्य भगवान् रुद्रः शङ्करो वृषवाहनः ।
ददर्श विष्णुं देवेशं तपन्तं तप उत्तमं । जुह्वानमग्निं विधिवद्धूयैर्मध्यैर्ज्जगत्पतिं ।
गरुडाहृतकाष्ठन्तु जटिलं चीरवाससं । शक्रेणानीतकुसुमं खड्गानीतकुशं तथा ।
गदाकृतसमाचारं देवदेवं जनार्द्दनं । इन्द्राद्यैर्द्देवसंघैश्च वृतं मुनिगणैः सह । १४८७०
अचिन्त्यं सर्व्वभूतानां ध्यायन्तं किमपि प्रभुं । अवरुह्य वृषात् शर्व्वो भगवान् भूतभावनः ।
ततः प्रीतः प्रसन्नात्मा ललाटाच्च उमापतिः । ततो भूताः पिशाचाश्च राक्षसा गुह्यकास्तथा ।
मुनयो विप्रवर्य्याश्च जयशब्दं प्रचक्रिरे । जय देव जगन्नाथ जय रुद्र जनार्द्दन ।
जय विष्णो हृषीकेश नारायण परायण । जय रुद्र पुराणात्मन् जय देव हरेश्वर ।
आदिदेव जगन्नाथ जय शङ्कर भावन । जय कौस्तुभदीप्ताङ्ग जय भस्मविराजित । १४८७५
जय चक्रगदापाणे जय शूलिन् त्रिलोचन । जय मौक्तिकदीप्ताङ्ग जय नागविभूषण ।
इति ते मुनयः सर्व्वे प्रणामं चक्रिरे हरिं । तत उत्थाय भगवान् दृष्ट्वा देवमवस्थितं ।
वृषध्वजं विरूपाक्षं शङ्करं नीललोहितं । ततो हृष्टमना विष्णुस्तुष्टाव हरमीश्वरं ।

॥ भगवानुवाच ॥ नमस्ते शितिकण्ठाय नीलग्रीवाय वेधसे । नमस्ते शोचिषे अस्तु नमस्ते उपवासिने ।
नमस्ते मीढुषे अस्तु नमस्ते गदिने हर । नमस्ते विश्वतनवे वृषाय वृषरूपिणे । १४८८०
अमूर्त्ताय च देवाय नमस्तेऽस्तु पिनाकिने । नमः कुब्जाय कूप्याय शिवाय शिवरूपिणे ।
नमस्तुण्डाय तुण्ड्याय नमस्तुटितुटाय च । नमः शिवाय शान्ताय गिरिशाय च ते नमः ।
नमो हराय हिरण्याय नमो हरिहराय च । नमोऽघोराय घोराय घोरघोरप्रियाय च ।
नमोऽघण्टाय घण्टाय नमो घटिघटाय च । नमः शर्व्वाय शान्ताय भूताधिपतये नमः ।
नमो विरूपरूपाय पुराय पुरहारिणे । नम आद्याय विज्ञाय शुचये ऽष्टस्वरूपिणे । १४८८५
नमः पिनाकहस्ताय नमः शूलासिधारिणे । नमः खट्वाङ्गहस्ताय नमस्ते कृत्तिवाससे ।
नमस्ते देवदेवाय नम आकाशमूर्त्तये । हराय हरिरूपाय नमस्ते तिग्मतेजसे ।
भक्तप्रियाय भक्ताय भक्तानां वरदायिने । नमोऽभ्रमूर्त्तये देव जगन्मूर्त्तिधराय च ।
नमश्चन्द्राय देवाय सूर्य्याय च नमो नमः । नमः प्रधानदेवाय भूतानां पतये नमः ।
करालाय च मुण्डाय विकृताय कपर्द्दिने । अजाय च नमस्तुभ्यं भूतभावन भावन । १४८९०
नमोऽस्तु हरिकेशाय पिङ्गलाय नमो नमः । नमस्तेऽभीषुहस्ताय तीरभीरुहराय च ।
हराय भीतिरूपाय घोराणां भीतिदायिने । नमो दक्षमखघ्नाय भगनेत्राय हारिणे ।
उमापते नमस्तुभ्यं कैलासनिलयाय च । आदिदेवाय देवाय भवाय भवरूपिणे ।
नमः कपालहस्ताय नमो यमयनाय च । त्र्यम्बकाय नमस्तुभ्यं त्र्यक्षाय च शिवाय च ।
वरदाय वरेण्याय नमस्ते चन्द्रशेखर । नम इध्माय हविषे ध्रुवाय च कृशाय च । १४८९५
नमस्ते शक्तियुक्ताय नागपाशप्रियाय च । विरूपाय सुरूपाय मद्यपानप्रियाय च ।
श्मशानरतये नित्यं जयशब्दप्रियाय च । खरप्रियाय खर्व्वाय खराय खररूपिणे ।
भद्रप्रियाय भद्राय भद्ररूपधराय च । विरूपाय सुरूपाय महाघोराय ते नमः ।
घण्टाय घण्टभूषाय घण्टाभूषणभूषिणे । तीव्राय तीव्ररूपाय तीव्ररूपप्रियाय च ।
नग्नाय नग्नरूपाय नग्नरूपप्रियाय च । भूतवास नमस्तुभ्यं सर्व्वावास नमो नमः । १४९००
नमः सर्व्वात्मने तुभ्यं नमस्ते भूतिदायक । नमस्ते वामदेवाय महादेवाय ते नमः ।
का नु वाक् स्तुतिरूपा ते को नु स्तोतुं प्रशक्नुयात् । कस्य वा स्फुरते जिह्वा स्तुतौ स्तुतिमतां वर ।
क्षमस्व भगवन्देव भक्तोऽहं त्राहि मां हर । सर्व्वात्मन् सर्व्वभूतेश त्राहि मां सततं हर ।
रक्ष देव जगन्नाथ लोकान् सर्व्वात्मना हर । त्राहि भक्तान्महादेव भक्तप्रिय सदा हर ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां ईश्वरस्तुतौ अष्टसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७८ ॥
॥ वैशम्पायन उवाच ॥ ततो वृषध्वजो देवः शूली साक्षादुमापतिः । करं करेण संस्पृश्य विष्णोश्चक्रधरस्य ह । १४९०५
प्रोवाच भगवान्रुद्रः केशवं गरुडध्वजं । शृण्वतां सर्व्वदेवानां मुनीनां भावितात्मनां ।
किमिदं देवदेवेश चक्रपाणे जनार्द्दन । तपश्चर्य्यां किमर्थन्ते प्रार्थना तव का विभो ।

त्वयं विष्णुर्भवान्नित्यं तपस्त्वं तपतां हरे । पुत्रार्थं प्रति ते देव तपश्चर्य्या जनार्द्दन ।
पुत्रो दत्तो मया देव पूर्व्वमेव जगत्पते । शृणु तत्रापि भगवान् कारणं कारणात्मक ।
तपश्चर्त्तुं प्रवृत्तोऽहं कुतश्चित् कारणाद्धरे । वर्षायुतं महाघोरं पुरा कृतयुगे तदा । १४९१०
भवानी तत्र मे देव परिचर्त्तुं तदाऽभवत् । पित्रा नियुक्ता देवेश उमैषा वरवर्णिनी ।
भीत इन्द्रस्तदा देव मारं मां प्रेषयत्तदा । मधुना सह संयुक्तो मारो मामागतस्तदा ।
लक्ष्यं मामकरोत्तत्र वाणस्य प्रेषितस्य ह । एषा मां सेवते तत्र दानात् पुष्पादीनां हरे ।
ततः क्रुद्धोऽहमभवं दृष्ट्वा मारं तथाविधं । क्रुध्यतो मम देवेश नेत्रादग्निः पपात ह ।
सोऽयमग्निस्तदा मारं भस्मसात् कृतवान् हरे । अचिन्तयं तदा विष्णो शक्रस्यैतत् चिकीर्षितं । १४९१५
ततः प्रभृति देवेश दया तं प्रति वर्त्तते । ब्रह्मणा च नियुक्तोऽस्मि प्रीतस्तत्र जनार्द्दन । *
नियुक्तः पुत्ररूपेण स तं देव जगत्पते । ज्येष्ठस्तव सुतो देवः प्रद्युम्नेत्यभिविश्रुतः ।
स्मरं तं विद्धि देवेश नात्र कार्य्या विचारणा । इत्युक्त्वा पुनराहेदं याथात्म्यं दर्शयन्निव ।
मुनीनां श्रोतुकामानां याथात्म्यं तत्र सत्तम । अञ्जलिं सपुटं कृत्वा विष्णुमुद्दिश्य शङ्करः ।
उमया सार्द्धमीशानो याथात्म्यं वक्तुमैहत । हरे कुर्व्वति तत्रैवमञ्जलीं कुरुसत्तम । १४९२०
मुनयो देवगन्धर्व्वाः सिद्धाश्च सहकिन्नराः । अञ्जलिं चक्रिरे विष्णौ देवदेवेश्वरे हरौ ।
॥ महेश्वर उवाच ॥ यत्तत् कारणमाहुस्तत् सांख्याः प्रकृतिसंज्ञकं । त्रिधाभूतं जगद्योनि प्रधानं कारणात्मकं ।
सत्त्वं रजस्तमो विष्णो जगदण्ड जनार्द्दन । तस्य कारणमाहुस्त्वां सांख्यास्तत्त्वविदो हरे ।
ततो महान् समुत्पन्नः प्रकृतिर्यच्च कारणं । तद्रूपेण भवान् विष्णो परिणम्याधितिष्ठति ।
तस्मात्तु महतो घोरादहङ्कारो महानभूत् । सत्त्वमादौ जगन्नाथ परिणामस्तथा वहिः । १४९२५
अहङ्कारात् प्रभो देव कारणानि महान्ति च । तन्मात्राणि तथा पञ्च भूतानि प्रभवन्त्युत ।
तानि त्वमाहुरीशानं भूतानीह जगत्पते । पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमं ।
चक्षुर्घ्राणं तथा स्पर्शो रसना श्रोत्रमेव च । मनः षष्ठं तथा देव प्रेरकं तत्र तत्र ह ।
कर्म्मेन्द्रियाणि चान्यानि वागादीनि जनार्द्दन । त्वमेव तानि सर्व्वाणि करोषि नियतात्मवान् ।
स्वेषु स्वेषु जगन्नाथ विषयेषु तथा हरे । निवेशयसि देवेश योगयन्निन्द्रियपद्धतिं । १४९३०
यदा त्वं रजसा युक्तस्तदा भूतानि सृष्टवान् । यदा च सत्त्वयुक्तोऽसि तदा पाता जगत्त्रयं ।
यदा त्वं तमसाकृष्टस्तदा संहरसे जगत् । त्रिभिरेव गुणैर्युक्तः सृष्टिरक्षाविनाशनं ।
वर्त्तसे त्रिविधां भूतिमामाद्याय नियतात्मवान् । इन्द्रियाणीन्द्रियार्थेषु नियोजयसि माधव ।
प्राणिनामुपभोगार्थमन्नं सृष्ट्वा जगद्गुरो । तस्मात् सर्व्वत्र भूतेषु वर्त्तसे सर्व्वभोगवान् ।
ब्रह्मा त्वं सृष्टिकालेषु स्थितौ विष्णुरसि प्रभो । संहारे रुद्रनामाऽसि त्रिधामा त्वमसि प्रभो । १४९३५
भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । एताः प्रकृतयो देव भिन्नाः सर्व्वत्र ते हरे ।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । सहस्रधा सहस्रास्य सहस्रात्मा दिवस्पतिः ।

भूमिं सर्व्वामिमां व्याप्य सप्तद्वीपांससागरां । अणुः सर्व्वगो भूत्वा अत्यतिष्ठद्दशाङ्गुलं ।
त्वमेवेदं जगत् सर्व्वं यद्भूतं यच्च भविष्यति । त्वत्तो विराट् प्रादुरभूत् सम्राट् चैव जनार्द्दन ।
तव वक्त्राज्जगन्नाथ ब्राह्मणो लोकरक्षकः । प्रादुरासीत् पुराणात्मन् षट्कर्म्मनिरतः सदा । १४८४०
राजन्यस्तु तथा बाह्वोरासीत् संरक्षणे रतः । ऊर्व्वोर्वैश्यस्तथा विष्णो पादाच्छूद्र उदाहृतः ।
एवं वर्णा जगन्नाथ तव देहाज्जनार्द्दन । मनसस्तव देवेश चन्द्रमाः समपद्यत ।
सुखकृत् सर्व्वभूतानां शीतांशुरमृतप्रभः । अक्ष्णोः सूर्य्यः समुत्पन्नः सर्व्वप्राणिविलोचनः ।
यस्य भासा जगत्सर्व्वं भासते भानुमानसौ । मुखादपश्च अग्निश्च प्राणाद्वायुरजायत ।
पद्भ्यां भूमिः समुत्पन्ना दिशः श्रोत्रात् जगत्पते । एवं सृष्ट्वा जगत् सर्व्वं व्याप्य चैवमवस्थितः । १४८४५
व्याप्य सर्व्वानिमान् लोकान् स्थितः सर्व्वत्र केशव । ततश्च विष्णुनामाऽसि धातोर्व्याप्तेश्च दर्शनात् ।
नारा आपः समाख्यातास्तासामयनमादितः । यतस्त्वं भूतनव्येश तन्नारायणशब्दितः ।
हरसि प्राणिनो देव ततो हरिरिति स्मृतः । शं करोषि सदा देव ततः शङ्करताङ्गतः ।
बृहत्वाद्बृंहणत्वाच्च तस्माद्ब्रह्मेति शब्दितः । मधुरिन्द्रियनामेति ततो मधुनिषूदनः ।
हृषीकाणीन्द्रियाण्याहुस्तेषामीशो यतो भवान् । हृषीकेशस्ततो विष्णो ख्यातो देवेषु केशव । १४८५०
क इति ब्रह्मणो नाम ईशोऽहं सर्व्वदेहिनां । आवां तवाङ्गसम्भूतौ तस्मात्केशवनामवान् ।
सा विद्या च हरे प्रोक्ता तस्या ईशो यतो भवान् । तस्मान्माधवनामाऽसि धवः स्वामीति शब्दितः ।
गौरेषा श्रूयते वाणी तांश्च वेद यतो भवान् । गोविन्दस्तु ततो देव मुनिभिः कथ्यते भवान् ।
त्रिरित्येव त्रयो वेदाः कीर्त्तिता मुनिसत्तमैः । क्रमते तांस्तया सर्व्वान् त्रिविक्रम इति स्मृतः ।
अणुर्वामननामाऽसि यतस्त्वं वामनाख्यया । मननान्मुनिरेवासि यमनात् यतिरुच्यसे । १४८५५
तपश्चरसि यस्मात्त्वं तपस्वीति च शब्दितः । वसन्ति त्वयि भूतानि भूतावासस्ततो हरे ।
ईशस्त्वं सर्व्वभूतानामीश्वरोऽसि ततो हरे । प्रणवः सर्व्ववेदानां गायत्री च्छन्दसां प्रभो ।
अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रयः । रुद्राणामहमेवासि वसूनां पावको भवान् ।
अश्वत्थो वृक्षजातीनां ब्रह्मा लोकगुरुर्भवान् । मेरुस्त्वं पर्व्वतेन्द्राणां देवर्षीणाञ्च नारदः ।
ज्ञानवान् दैत्यमध्ये तु प्रह्लादो भक्तवत्सलः । सर्पाणामेव सर्व्वेषां भवान् वासुकिसंज्ञितः । १४८६०
गुह्यकानाञ्च सर्व्वेषां भवान् धनद एव च । वरुणो यादसां राजा गङ्गा त्रिपथगा भवान् ।
आदिस्त्वं सर्व्वभूतानां मध्यमन्तस्तथा भवान् । त्वत्तः सम्भवदिदं त्वयि सर्व्वं प्रलीयते ।
अहं त्वं सर्व्वगो देव त्वमेवाहं जनार्द्दन । आवयोरन्तरं नास्ति शब्दैरर्थैर्जगत्पते ।
नामानि तव गोविन्द यानि लोके महान्ति च । तान्येव मम नामानि नात्र कार्य्या विचारणा ।
त्वदुपासा जगन्नाथ सैवास्तु मम गोपते । यश्च त्वां द्वेष्टि देवेश स मां द्वेष्टि न संशयः । १४८६५
त्वद्विस्तारो यतो देव अहं भूतपतिस्मृतः । न तदस्ति विना देव यत्ते विरहितं हरे ।
यदासीद्वर्त्तते यच्च यच्च भावि जगत्पते । सर्व्वं त्वमेव देवेश विना किञ्चित्त्वया न हि ।

स्तुवन्ति देवाः सततं भवन्तं स्वैर्गुणैः प्रभो । ऋक् च त्वं यजुरेवासि समासि सततं प्रभो ।
किमुच्यते मया देव सर्व्वं त्वं भूतभावन । नमः सर्व्वात्मना देव विष्णो माधव केशव ।
नमस्करोमि सर्व्वात्मन्नमस्तेऽस्तु सदा हरे । नमः पुष्करनाभाय वन्दे त्वामहमीश्वर । १४८७०
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां विष्णुस्तवे ऊनाशीत्यधिकद्विशततोऽध्यायः ॥ २७९ ॥
॥ वैशम्पायन उवाच ॥ इत्युक्त्वा देवदेवेशं मुनीनाह पुनः शिवः । एवं जानीत हे विप्रा ये भक्ता द्रष्टुमागताः ।
एतदेव परं वस्तु नैतस्मात् परमस्ति वः । एतदेव विजानीध्वमेतद्वः परमं तपः ।
एतदेव सदा विप्रा ध्येयं सततमानसैः । एतद्वः परमं श्रेय एतद्वः परमं धनं ।
एतद्वो जन्मनः कृत्यमेतद्वस्तपसः फलं । एष वः पुण्यनिलयः एष धर्म्मः सनातनः ।
एष वो मोक्षदाता च एष मोक्ष उदाहृतः । एष पुण्यप्रदः साक्षादेतद्वः कर्म्मणां फलं । १४८७५
एतदेव प्रशंसन्ति विद्वांसो ब्रह्मवादिनः । एष श्रेयोगतिर्व्विप्रा प्रार्थ्या ब्रह्मविदां सदा ।
एतदेव प्रशंसन्ति सांख्ययोगसमाश्रिताः । एष ब्रह्मविदां मार्गः कथितो वेदवादिभिः ।
एवमेव विजानीत नात्र कार्य्या विचारणा । हरिरेकः सदा ध्येयो भवद्भिः सत्त्वमास्थितैः ।
नान्यो जगति देवोऽस्मिन् विष्णोर्नारायणात् परः । ओमित्येव सदा विप्राः पठत ध्यात केशवं ।
ततो निःश्रेयसप्राप्तिर्भविष्यति न संशयः । एवं ध्यातो हरिः साक्षात् प्रसन्नो वो भविष्यति । १४८८०
भवनाशमयं देवः करिष्यति दृढं हरिः । सदा ध्यात हरिं विप्रा यदीच्छा प्राप्तुमच्युतं ।
एष संसारविभवं विनाशयति वो गुरुः । स्मरध्वं सततं विष्णुं पठध्वं त्रिशरीरिणं ।
मनःसंयमनं विप्राः कुरुध्वं यत्नतः सदा । शुद्धेऽन्तःकरणे विष्णुः प्रसीदति तपोधनाः ।
ध्यात्वा मां सर्व्वयत्नेन ततो जानीत केशवं । उपास्योऽहं सदा विप्रा उपास्येऽस्मिन् हरौ स्मृतः ।
उपायोऽद्य मया प्रोक्तो नात्र सन्देह इत्यपि । अयं मार्गो सदा विप्रा यतध्वमघनाशने । १४८८५
यथा वो बुद्धिरखिला शुद्धा भवति यत्नतः । तथा कुरुत विप्रेन्द्रा यथा देवः प्रसीदति ।
॥ वैशम्पायन उवाच ॥ एवमुक्तास्ततः सर्व्वे मुनयः पुण्यशीलिनः । यथावदुपगृह्णाना निरसन् संशयं नृप ।
एवमेवेति तं विप्राः प्राहुः प्राञ्जलयो हरं । छिन्नो नः संशयः सर्व्वो गृहीतोऽर्थः स तादृशः ।
एतदर्थं समायाता वयमद्य तवालयं । सङ्क्रमाद्युवयोः सर्व्वो नष्टो मोहो महानिह ।
यथा वदसि देवेश तथा नः श्रेयसं परं । यथाह भगवान् रुद्रो यतामः सततं हरौ । १४८९०
इति ते मुनयः प्रीताः प्रणेमुः केशवं हरिं ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां रुद्रोपदेशे अशीत्यधिकद्विशततोऽध्यायः ॥ २८० ॥
॥ वैशम्पायन उवाच ॥ ततः स भगवान् रुद्रः सर्व्वान् विस्मापयन्निव । स्तुत्या प्रचक्रमे स्तोतुं विष्णुं विश्वेश्वरं हरिं ।
अर्च्चाभिः श्रुतियुक्ताभिर्म्मुनीनां शृण्वतां तदा ।
॥ महेश्वर उवाच ॥ नमो भगवते तुभ्यं वासुदेवाय धीमते । यस्य भासा जगत् सर्व्वं भासते नित्यमच्युत ।
नमो भगवते देव नित्यं सूर्य्यात्मने नमः । यः शीतयति शीतांशुर्ल्लोकान् सर्व्वानिमान् प्रभुः । १४८९५

नमस्ते विष्णवे देव नित्यं सोमात्मने नमः। यः प्रजाः प्राणयत्येको विश्वात्मा भूतभावनः।
नमः सर्व्वात्मने देव नमो वाय्वात्मने हरे। यो दधार करेणासौ कुशचीरादि यत् सदा।
दधार वेदान् सर्व्वांश्च तस्मै ब्रह्मात्मने नमः। सर्व्वान् संहरते यस्तु संहारे विश्वदृक् सदा।
क्रोधात्माऽसि विरूपोऽसि तुभ्यं रुद्रात्मने नमः। सृष्टौ स्रष्टा समस्तानां प्राणिनां प्राणदायिने।
अजाय विष्णवे तुभ्यं स्रष्ट्रे विश्वसृजे नमः। आदौ प्रकृतिमूलाय भूतानां प्रभवाय च।
नमस्ते देवदेवेश प्रधानाय नमो नमः। पृथिव्यां गन्धरूपेण संस्थितः प्राणिनां हरे।
दृढाय दृढरूपाय तुभ्यं गन्धात्मने नमः। अपां रसाय सर्व्वत्र प्राणिनां सुखहेतवे।
नमस्ते विश्वरूपाय रसाय च नमो नमः। तेजसा भास्वरो यस्तु घृणी जन्तुहितः सदा।
तस्मै देव जगन्नाथ नमो भास्वररूपिणे। वायौ स्पर्शो गुणो यत्र शीतोष्णसुखदुःखदः।
नमस्ते वायुरूपाय नमः स्पर्शात्मने हरे। आकाशेऽवस्थितः शब्दः सर्व्वश्रोत्रनिवेशनः।
नमस्ते भगवन् विष्णो तुभ्यं शब्दात्मने नमः। यो दधार जगत् सर्व्वं मायामानुषदेहवान्।
नमस्तुभ्यं जगन्नाथ मायिने ऽमायदायिने। नम आद्याय बीजाय निर्गुणाय गुणात्मने।
अचिन्त्याय सुचिन्त्याय तस्मै चिन्तात्मने नमः। हराय हरिरूपाय ब्रह्मणे ब्रह्मदायिने।
नमो ब्रह्मविदे तुभ्यं तुभ्यं ब्रह्मात्मने नमः। नमः सहस्रशिरसे सहस्रकिरणाय च।
नमः सहस्रवक्त्राय सहस्रनयनाय च। विश्वाय विश्वरूपाय विश्वकर्म्मे नमो नमः।
विश्ववक्त्र नमो नित्यं भूतावास नमो नमः। इन्द्रियार्थस्वरूपाय विषयाय सदा हरे।
नमोऽश्वशिरसे तुभ्यं वेदाभरणरूपिणे। अग्नये ऽग्निपते तुभ्यं ज्योतिषां पतये नमः।
सूर्य्याय सूर्य्यवपुषे तेजसां पतये नमः। नमः सोमाय सौम्याय नमः शीतात्मने हरे।
नमो वषट्कृते तुभ्यं स्वाहास्वधास्वरूपिणे। नमो यज्ञाय इज्याय हविषे हव्यसंस्कृते।
नमः स्रुवाय पात्राय यज्ञाङ्गाय पराय च। नमः प्रणवदेहाय चरायाप्यचराय च।
वेदरूपाय वेदाय शास्त्राय शास्त्ररूपिणे। गदिने खड्गिने तुभ्यं शङ्खिने चक्रिणे नमः।
शूलिने चर्म्मिणे नित्यं वरदाय नमो नमः। बुद्धप्रियाय बुद्धाय प्रबुद्धाय सुखाय च।
हरये विष्णवे तुभ्यं नमः सर्व्वात्मने गुरो। नमस्ते सर्व्वलोकेश सर्व्वज्ञ नमो नमः।
नमः स्वभावशुद्धाय नमस्ते यज्ञसूकर। नमो विष्णो नमो विष्णो नमो विष्णो नमो हरे।
नमस्ते चास्तु देवाय वासुदेवाय धीमते। नमः कृष्णाय सर्व्वाय सर्व्वावास नमो नमः।
नमो भूयो नमस्तेऽस्तु पाहि लोकान् जनार्द्दन। इति स्तुत्वा जगन्नाथमवाच मुनिसत्तमान्।
इमं स्तोत्रमधीयाना नित्यं भजत केशवं। शरण्यं सर्व्वभूतानां स वः श्रेयो विधास्यति।
ये चेमं धारयिष्यन्ति स्तवं पापविमोचनं। तेषां प्रीतः प्रसन्नात्मा पठतां शृण्वतां हरिः।
श्रेयो दास्यति धर्म्मात्मा नात्र कार्य्या विचारणा। अवश्यं मनसा ध्यात केशवं भक्तवत्सलं।
श्रेयः प्राप्तुं यदीच्छन्त भवन्तः शंसितव्रताः। इत्युक्त्वा भगवान् रुद्रस्तत्रैवान्तरधीयत।

सगणः शङ्करः साक्षाद्‌मया भूतभावनः । ततस्ते मुनयः सर्व्वे परां निर्वृतिमाययुः ।
तमेव परमं तत्त्वं मत्वा नारायणं हरिं । विस्मयं परमं गत्वा मेनिरे स्वकृतार्थतां ।
लोकपालास्तदा विष्णुं नमस्कृत्य हरिं तदा । जग्मुः स्वान्यथ वेश्मानि गणैः सर्व्वैर्नृपोत्तम ।
आरुह्य भगवान् विष्णुर्गरुडं पक्षिपुङ्गवं । शङ्खी चक्री गदी खड्गी शार्ङ्गी तूणी तलत्रवान् ।
यथागतं जगन्नाथो ययौ वदरिकामनु । सा यत्राऽऽस्ते पुण्डरीकाक्षो नित्यं मुनिनिषेवितं ।
तत्र गत्वा यथायोगं विश्रम्य हरिरीश्वरः । अर्च्चितो मुनिभिः सर्व्वैर्निषसाद सुखासने ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कैलासयात्रायां कृष्णप्रत्यागमने एकाशीत्यधिकद्विशततमोऽध्यायः ॥ २८१ ॥
॥ वैशम्पायन उवाच ॥ एतस्मिन्नेव काले तु पौण्ड्रो नृपवरोत्तमः । बलवान् सत्त्वसम्पन्नो योद्धा विपुलविक्रमः ।
वृष्णिशत्रुस्तदा राजा कृष्णद्वेषी बलात् सदा । नृपान् सर्व्वान् समाहूय प्रोवाच नृपसंसदि ।
जिता च पृथिवी सर्व्वा जिताश्च नृपसत्तमाः । वृष्णयस्ते बलोन्मत्ताः कृष्णमाश्रित्य गर्व्विताः ।
दास्यन्ति मे करं सर्व्वे न हि ते मम शत्रवः । कृष्णः शक्रबलोन्मत्तो मामवज्ञाय तिष्ठति ।
अहं चक्रीति गर्व्वोऽभूत्तस्य गोपस्य सर्व्वदा । शङ्खी चक्री गदी शार्ङ्गी शरी तूणी महायशाः ।
एवमादिर्महागर्व्वस्तस्य संप्रति वर्त्तते । लोके च मम यन्नाम वासुदेवेति विश्रुतं ।
अपहृत्य मम तन्नाम गोपो मदबलान्वितः । तस्य चक्रस्य यच्चक्रं ममापि निर्मितं महत् ।
गर्व्वहन्तृ सदा तस्य नाम्ना चापि सुदर्शनं । सहस्रारं महाघोरं तस्य चक्रस्य नाशनं ।
अनेकप्रहृतं चक्रं गोपजस्य नृपोत्तमाः । ममाप्येतद्धनुर्दिव्यं शार्ङ्गं नाम महारवं ।
गदा कौमोदकी नाम्ना ममेयं महती दृढा । कालायससहस्रस्य सारेण सुकृता मया ।
खड्गो नन्दकनामाऽसौ ममायं विपुलो दृढः । अन्तकस्यान्तको घोरस्तस्य खड्गस्य नाशकः ।
ततश्चाहं गदी खड्गी शार्ङ्गी शङ्खी तनुत्रवान् । युधि जेता च कृष्णस्य नात्र कार्य्या विचारणा ।
माद्य ब्रूत नृपाश्चैनं गदिनं चक्रिणं तथा । शंखिनं शार्ङ्गिणं वीरं ब्रूत नित्यं नृपोत्तमाः ।
वासुदेवेति मां ब्रूत न तु गोपं यदूत्तमं । एकोऽहं वासुदेवो हि हत्वा तं गोपदारकं ।
सख्युर्मम बलाद्धन्ता नरकस्य महात्मनः । मां तथा यदि न ब्रूत दण्ड्या भारशतैः शतं ।
सुवर्णस्य च निष्कस्य धान्यस्य बहुशस्तथा । तथा ब्रुवति राजेन्द्रे मनसा दुःसहं यथा ।
केचित्तज्ज्ञाससमायुक्ता आसते वीर्य्यवत्तराः । स्मरन्तो बलवीर्य्यस्य केशवस्य सदा नृपाः ।
अपरे तु नृपा राजन्नेवमेवेति चुक्रुशुः । अन्ये बलमदोत्सिक्ता जेष्यामः केशवं रणे ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौण्ड्रकवधे द्व्यशीत्यधिकद्विशततमोऽध्यायः ॥ २८२ ॥
॥ वैशम्पायन उवाच ॥ ततः कैलासशिखरान्निर्गतो मुनिसत्तमः । नारदः सर्व्वलोकज्ञः पौण्ड्रस्य नगरं प्रति ।
अवतीर्य्य नभोभागात् प्रत्यागम्य नरोत्तमं । द्वाःस्थेन च समाज्ञप्तः प्रविवेश गृहोत्तमं ।
अर्घ्यादिसमुदाचारं नृपाल्लब्ध्वा महामुनिः । निषसादासने शुभ्रे स्वास्तृते शुभवाससा ।
कुशलं पृष्टवान् भूयो नृपः स मुनिसत्तमं । उवाच नारदं भूयः पौण्ड्रको बलगर्व्वितः ।

भवान् सर्व्वत्र कुशलः सर्व्वकार्य्येषु पण्डितः । पूजितो देवसिद्धेषु गन्धर्व्वेषु महात्मसु ।
सर्व्वत्रगो निराबाधो गन्ता सर्व्वत्र सर्व्वदा । अगम्यं तव विप्रेन्द्र ब्रह्माण्डेऽत्र न किञ्चन । १५०५५
नारदेदं वद त्वं हि यत्र यत्र गतो भवान् । तत्र तत्र नृपः सिद्धो लोकप्रथितवीर्य्यवान् ।
पौण्ड्र एव च विख्यातो वासुदेवेति शब्दितः । शङ्खी चक्री गदी शार्ङ्गी खड्गी तूणी तथैव च ।
विजेता राजसिंहानां दाता सर्व्वस्य सर्व्वदा । भोक्ता राज्यस्य सर्व्वत्र शास्ता राजा बलाहली ।
अजेयः शत्रुसैन्यानां रक्षिता स्वजनस्य च । योऽस्य गोपकनामाऽसौ वासुदेवेति शब्दितः ।
तस्य वीर्य्यबलेन स सो नाम्नो हि मम धारणे । स हि गोपो वृथा वाक्यादुदारयत्येव नाम मे । १५०६०
इदं निश्चिनु विप्रेन्द्र एक एव भवाम्यहं । वासुदेवो जगत्यस्मिन्निर्जित्य बलिनं यदुं ।
वृष्णीन् सर्व्वान् बलात् क्षिप्रं निर्द्दहिष्ये च तां पुरीं । द्वारकां वृष्णिनिलयां योद्धा चाहं महामते ।
एते च बलिनः सर्व्वे नृपा मम समागताः । अश्वाश्च वेगिनः सन्ति रथा वायुजवा मम ।
उग्रा मत्ताः सहस्रञ्च गजा नियुतमेव च । एतेनैव बलेनाजौ हनिष्ये केशवं रणे ।
तस्मादेवं सदा विप्र वद मन्मन् पुरे मम । इन्द्रस्यापि सदा विप्र वद नारद सांप्रतं । १५०६५
प्रार्थनैषा मम विभो नमस्ये त्वां तपोधन ।
॥ नारद उवाच ॥ सर्व्वगः सदा चास्मि यावद्ब्रह्माण्डसंस्थितिः । अवार्य्यः सर्व्वकार्य्येषु गमने केनचिन्नृप ।
किन्तु वक्तुं तथा राजन्नोत्सहे नृपसत्तम । महीं शासति देवेशे चक्रपाणौ जनार्द्दने ।
विष्णौ सर्व्वगते देवे दुष्टान् हत्वा सबान्धवान् । वासुदेवेति को नाम तिष्ठत्यस्मिन् धराविति ।
को नाम वक्तुमेवेदं कृष्णे शासति गोमतीं । अज्ञानादक्तुमेवञ्च समर्थाः प्राकृता नराः । १५०७०
हरिः सर्व्वगतो दिष्ट्या दर्पं ते व्यपनेष्यति । अचिन्त्यविभवो विष्णुः शार्ङ्गधन्वा गदाधरः ।
आदिदेवः पुराणात्मा दर्पन्ते व्यपनेष्यति । हास्यमेतन्महाराज यच्च वै तत्र संस्थितं ।
शार्ङ्गं खड्गं तथा राजन् महाघोरं न दृश्यते । अतीव हासकालोऽयं तव संप्रति वर्त्तते ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौण्ड्रकनारदसंवादे त्र्यशीत्यधिकद्विशततमोऽध्यायः ॥ २८३ ॥
॥ वैशम्पायन उवाच ॥ ततः क्रुद्धो महाराज पौण्ड्रो मदबलान्वितः । नारदं विप्रवर्य्यं तं प्रोवाच नृपसंसदि ।
किमिदं विप्र विप्रर्षे राजाऽहं वो द्विजैः सह । गच्छ त्वं काममथवा मुने शापप्रदः सदा । १५०७५
भीतस्त्वत्तो महाबुद्धे गच्छ त्वं काममद्य हि । इत्युक्तो नृपवर्य्येण तूष्णीमेव स नारदः ।
जगामाकाशगमनो यत्र तिष्ठति केशवः । स गत्वा विष्णुसङ्काशं विष्णोः सर्व्वं शशंस ह ।
तच्छ्रुत्वा भगवान् विष्णुर्धैर्य्यं वदतामिति । दर्पं तस्यापनेष्यामि श्रीमन्ते द्विजसत्तम ।
इत्युक्ता विरराभैव तस्मिन् वदरिकाश्रमे । ततः पौण्ड्रो महाबाहुः सर्व्वैर्भूभृद्भिरीश्वरः ।
अश्वैरनेकसाहस्रैर्गजैर्ब्बहुभिरन्वितः । शस्त्रकोटिसमायुक्तः स राजा मत्यमङ्करः । १५०८०
अनेकशतसाहस्रैः पत्तिभिः स समन्वितः । एकलव्यप्रभृतिभीराजभिश्च समन्ततः ।
अष्टौ रथसहस्राणि नागानामयुतं तथा । अर्ब्बुदं पत्तिसंघानां तद्बलं समपद्यत ।

एतेन तु बलेनाजौ प्रस्फुरन्नृपसत्तमः । विरराज महाराजन्नुदयस्थो यथा रविः ।
स ययौ मध्यरात्रेण नगरीं द्वारकामनु । ततो दीपिकाहस्ता रात्रौ तमसि दारुणे ।
ययुर्व्विविधशस्त्राढ्याः संपतन्तो महाबलाः । द्वारकां वीर्य्यसम्पन्नां महाघोरां नृपोत्तमाः । १५०८५
रथैर्महान्तमारुह्य शस्त्रौघैश्च समावृतं । पट्टिशासिसमाकीर्णं गदापरिघसंकुलं ।
शक्तितोमरसंकीर्णं ध्वजमालासमाचितं । किङ्किणीजालसंयुक्तं शरासिप्राससंयुतं ।
महाघोरं महारौद्रं युगान्तजलदोपमं । धनुर्गदासमाकीर्णं महामेघोपमं महत् ।
अभ्यर्कसदृशाकारं ययौ द्वारवतीमनु । गृहीतदीपिको राजा वीर्य्यवान् बलवान्नृप ।
हन्तुमैच्छज्जगन्नाथं वृष्णींश्चैव समन्ततः । आकर्षन् बलमुख्यांस्तान् राज्ञः सर्व्वान्महाद्युतिः । १५०९०
पुरद्वारं समासाद्य बलं संस्थाप्य यत्नतः । इदं प्रोवाच राजा तु नृपान् सर्व्वानवस्थितान् ।
ताड्यतामत्र भेरी तु नाम विश्राव्य मामकं । युध्यतां युध्यतामत्र देयं वा प्रतिदीयतां ।
आगतः पौण्ड्रको राजा युद्धार्थी वीर्य्यवत्तरः । हन्तुकामः समग्रान् वः कृष्णबाहुबलाश्रयान् ।
इति ते प्रेषिताः सर्व्वे समीयुः सूचका यदून् । दीपिकाश्च प्रदीप्यन्ते बह्वः शतसहस्रशः ।
इतश्चेतश्च राजानो युध्यन्ते युद्धलालसाः । पुरीं ते परतस्तत्र शस्त्रिणः क्षत्रियास्तथा । १५०९५
सिंहनादं प्रकुर्व्वन्तः शस्त्रधारासमाकुलाः । कुतोऽयं वृष्णिप्रवरः कुतो राजा जगत्पतिः ।
कुतोऽयं सात्यकिर्व्वीरः कुतो हार्द्दिक्य एव च । कुतो नु बलभद्रश्च सर्व्वयादवसत्तमः ।
इत्येवं कथयन्तो वै राजानः सर्व्व एव ते ।
आदाय शस्त्राणि बहूनि सर्व्वतः शरांश्च चापानि बहूनि सर्व्वे । युद्धाय सन्नाहनिबद्धशोभा ययुर्हरेः पुरीं द्वारवतीं नृपोत्तमाः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौण्ड्रकस्य द्वारकागमने चतुरशीत्यधिकद्विशततोऽध्यायः ॥ २८४ ॥

॥ वैशम्पायन उवाच ॥ ततश्च यादवाः सर्व्वे दृष्ट्वा सैनिकसञ्चयं । रात्रौ च श्रमनं प्राप्तं महाशस्त्रसमाकुलं । १
महावातसमुद्भूतकल्पान्तसागरोपमं । सन्नद्धाः समपद्यन्त शस्त्रिणो युद्धलालसाः ।
गृहीतदीपिकाः सर्व्वे यादवाः शस्त्रयोधिनः । सात्यकिर्ब्बलभद्रश्च हार्द्दिक्यः निशठस्तथा ।
उद्धवोऽथ महाबुद्धिरुग्रसेनो महाबलः । अन्ये च यादवाः सर्व्वे कवचग्रहे रताः ।
समस्तयुद्धकुशला रात्रौ सन्नाहयोधिनः । शस्त्रिणः खड्गिनश्चैव सर्व्वे शस्त्रसमाकुलाः ।
युद्धाय समपद्यन्त बहवो बाहुशालिनः । रथिनो गजिनश्चैव सादिनः सायुधास्तथा । १५१०५
नित्ययुक्ता महात्मानो धन्विनः पुरुषोत्तमाः । निर्ययुर्नगरात्तूर्णं दीपिकाभिः समन्ततः ।
कुतः पौण्ड्रक इत्येवं वदन्तः सर्व्वसात्त्वताः । दीपिकादीपितो देशो निस्तमाः समपद्यत ।
ततो वितिमिरो देशः समन्तात् प्रत्यपद्यत । युद्धं समभवद्घोरं वृष्णिभिः शत्रुभिः सह ।
ततो महान् समभवत्स नादो रोमहर्षणः । हया हयैः समायुक्ता गजाश्च गजयूथपैः ।
रथा रथैः समायुक्ताः सादिभिः सादिनस्तथा । खड्गिनः खड्गिभिः सार्द्धं गदिभिर्गदिनस्तथा । १५११०
परस्परव्यतीकारो रण आसीत् सुदारुणः । महाप्रलयसंक्षोभः शब्दस्तेषां महात्मनां ।

धावन्तः प्रहरन्त्येतान् सर्व्वतो नृप हन्ति नः। अयमेष महाबाहुः खड्गी पतति वीर्य्यवान्।
अयमेव शरो घोरो वर्त्ततेऽतिसुदारुणः। गदी चायं महावीर्य्यः सर्व्वतो बाधते नृप।
अयं रथी शरी चापी गदी तूणी तनुत्रवान्। पट्टिशी सर्व्वतो याति कुन्तपाणिरयं बली।
अयमत्र महाशूली संस्थितः सर्व्वतो दिशं। गजोऽयं सविषाणाग्रो वर्त्तते सर्व्वतः प्रति।
अयं सर्व्वगः शूरो वेगवान् वातसन्निभः। शरान् शरैः समाहन्ति दण्डान् दण्डैः समुत्पतेत्।
कुन्तान् कुन्तैः महाराज मुद्गरैश्च गदास्तथा। परिघान् परिघैः सार्द्धं शूलान् शूलैः समन्ततः।
एवं तेषां महाराज कुर्व्वतां रणमुत्तमं। संग्रामः सुमहानासीच्छब्दश्चापि महानभूत्।
भूतानि सुबहून्याशो शब्दयन्ति महान्ति च। प्रादुरासन् सशस्त्राणि शङ्खानाञ्चैव निस्वनः।
रात्रौ प्रादुरभूच्छब्दः संग्रामे लोमहर्षणः। प्रावर्त्तत महायुद्धं वृष्णीनाञ्चैव तैः सह।
केचिद्धताः समापेतुः पृथिव्यां पृथिवीक्षितः। केचित् पतितमाश्रित्य विप्रकीर्णशिरोधराः।
पेतुरुर्व्व्यां महावीर्य्या राजानः शस्त्रपाणयः। केचिच्च भिन्नमर्म्माणः समापेतुः महस्रशः।
परस्परं समाश्रित्य परस्परवधैषिणः। न्यस्तशस्त्रा महात्मानः समन्तात् छिन्नविग्रहाः।
पेतुर्गतासवः केचित् यमराष्ट्रविवर्द्धनाः। एवन्ते निहता राजन् पोथिताः सर्व्व एव तु।
एतस्मिन्नन्तरे शूर एकलव्यो निषादपः। धनुर्गृह्य महाघोरं कालान्तकसमोपमः।
शरैरनेकसाहस्रैरर्द्दयामास यादवान्। परःशतैः शराणान्तु निशितैर्म्मर्म्मभेदिभिः।
वृष्णीनाञ्च बलं सर्व्वं पोथयामास सर्व्वतः। युध्यतः शस्त्रपाणींश्च चालयन् वीर्य्यवत्तरान्।
निशठं पञ्चविंशत्या शराणां नतपर्व्वणां। सारणं दशभिर्विद्ध्वा हार्द्दिक्यं पञ्चभिः शरैः।
उग्रसेनं नवत्या तु वसुदेवञ्च सप्तभिः। उद्धवं दशभिश्चैव स्वक्रूरं पञ्चभिः शरैः।
एवमेवं दृशः सर्व्वे निहता निशितैः शरैः। विद्राव्य यादवीं सेनां नाम विश्राव्य वीर्य्यवान्।
एकलव्यो यदुवृषान् वीर्य्यवान् बलवानहं। इदानीं सात्यकिर्व्विरः क यास्यति महाबलः।
मदमत्तो हली साक्षात् क यातोह गदाधरः। इत्याह सिंहनादेन सिंहवत् विस्मापयन्निव।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौण्ड्रकवधे रात्रियुद्धे पञ्चाशीत्यधिकद्विशततमोऽध्यायः॥ २८५॥

॥ वैशम्पायन उवाच॥ निवृत्तेष्वथ सैन्येषु वृष्णिवीरेषु वै दिवि। भीतेष्वथ महाराज हतेषु युधि सर्व्वतः।
दीपिकासु प्रशान्तासु निःशब्दे सति सर्व्वतः। जितमित्येव तन्मत्वा वृष्णीनां बलमुत्तमं।
ततः पौण्ड्रो महावीर्य्यो वभाषे सैनिकान् स्वकान्। शीघ्रं गच्छत राजेन्द्राः शूद्रैः कुन्तैः पुरीमिमां।
कुठारैः कुन्तलैश्चैव पाषाणैः सर्व्वतो दिशं। कर्णाग्रैः सुघोरैस्तान् सर्व्वतो यात भूमिपाः।
भिद्यन्तां प्राकारचयाः प्रासादाश्च समन्ततः। गृह्यन्तां कन्यकाः सर्व्वा दास्यश्चैव समन्ततः।
गृह्यन्तां रत्नमुख्याश्च धनानि सुबहून्यथ। ते तथेति महात्मानो राजानः सर्व्व एव तु।
कुठारैः सर्व्वतश्चैव चिच्छिदुः पौण्ड्रकाज्ञया। प्राकारांश्चैव सर्व्वत्र प्रासादान् वरसद्मयाम्।
अथ तत्र महान् शब्दः प्रादुरासीत् समन्ततः। अट्टेषु पात्यमानेषु प्राकारेषु महाबलैः।

पूर्व्वद्वारे महाराज भिन्नाः प्राकारसञ्चयाः । श्रुत्वा शब्दं महाघोरं सात्यकिः क्रोधमूर्च्छितः ।
सयि सर्व्वं समारोप्य केशवो यादवेश्वरः । गतः कैलासशिखरं द्रष्टुं शङ्करमव्ययं ।
अवश्यं हि मया रक्ष्या पुरी द्वारवती स्थिरं । इति सञ्चिन्त्य मनसा धनुरादाय सत्वरं ।
रथं महान्तमारुह्य दारुकस्य महात्मनः । पुत्त्रेण संहृतं घोरं यन्त्रा च स्वयमेव हि ।
धनुर्म्महत्तदादाय शरांश्चाशीविषोपमान् । आमुच्य कवचं घोरं दृढं संपातदुःसहं । १५१४५
अङ्गदी कुण्डली तूणी शरी चापी गदासिमान् । ययौ युद्धाय शैनेयः संस्मरन् केशवं वचः ।
दीपिकादीपिते देशे ययौ सात्यकिरुत्तमः । तथैव बलदेवोऽपि रथमारुह्य भास्वरं ।
गदी शरी महावीर्य्यः प्रायाद्रणचिकीर्षया । सिंहनादं प्रकुर्व्वन् वै मुञ्चन् वै भैरवं रवं ।
उद्धवोऽपि बली साक्षाद्गजमारुह्य सत्वरं । कृत्वा महारवं घोरं सर्व्वयादवसत्तमः ।
ययौ नीतिं विचिन्वानः परां प्रीतिं महाबलः । अन्ये च वृष्णयः सर्व्वे ययुः संग्रामलालसाः । १५१५०
रथान् गजान् समारुह्य हार्द्दिक्यप्रमुखास्तदा । दीपिकाभिश्च सर्व्वत्र पुरोहस्ताभिरीश्वराः ।
सिंहनादं प्रकुर्व्वन्तः स्मरन्तः कैशवं वचः । पूर्व्वद्वारं समागम्य वृष्णयो युद्धलालसाः ।
ते समेत्य यथायोगं स्थितास्तत्र महाबलाः । स्थिते सैन्ये महाघोरे दीपिकादीपिते तथा ।
शिनिर्व्वीरः शरी चापी गदी तूणीरवान् विभो । वायव्यास्त्रं समादाय योजयित्वा महाशरं ।
आकर्णपूर्णमाकृष्य धनुःप्रवरमुत्तमं । मुमोच परसैन्येषु शिनिर्व्वीरः प्रतापवान् । १५१५५
वायव्यास्त्रेण ते सर्व्वे तत्रस्था नरसत्तमाः । विजिता अस्त्रवीर्य्येण यत्र तिष्ठति पौण्ड्रकः ।
तत्र गत्वा स्थिताः सर्व्वे निर्द्धूता वातरंहसा । यत्र पूर्व्वं स्थिताः सर्व्वे विद्रुता राजसत्तमाः ।
तत्र स्थित्वा च शैनेयः शरमादाय सत्वरः । निशितं सर्पसङ्काशं बभाषे सात्यकिस्तदा ।
क इदानीं महाबुद्धिः पाण्ड्रको राजसत्तमः । स्थितोऽस्मि व्यवसायेन शरी चापी महाबलः ।
यदि द्रष्टा दुरात्मानं ततो हन्ता नृपाधमं । भृत्योऽस्मि केशवस्याहं जिघांसुः पौण्ड्रकं स्थितः । १५१६०
छित्त्वा शिरस्तु तस्याथ सर्व्वक्षत्त्रस्य पश्यतः । बलिं दास्यामि रक्षोभ्यः स्वभ्यस्यैव दुरात्मनः ।
को नाम ईदृशं कर्म्म चौरवच्च समाचरेत् । सुप्तेषु निशि सर्व्वेषु यादवेषु महात्मसु ।
चौरोऽयं सर्व्वथा राजा न हि राजबलान्वितः । यदि शक्तो न कुर्य्याच्च चौर्य्यमेवं नृपाधमः ।
अहोऽस्य बलिता राज्ञश्चौर्य्यकार्य्यं प्रकुर्व्वतः । सर्व्वथा गमनं तस्य न हि पश्यामि सांप्रतं ।
इत्युक्त्वा सात्यकिर्व्वीरः प्रजहास महाबलः । विस्फार्य्य सुदृढं चापं सन्दधे कार्म्मुके शरं । १५१६५
आकर्ण्य वचनं वीरः सात्यकेस्तस्य धीमतः । क नु कृष्णः क गोपालः कुतः सोऽद्य प्रवर्त्तते ।
स्त्रीहन्ता पशुहन्ता च क च स्वामीति सेवितः । स इदानीं क वर्त्तेत गृहीत्वा मम नाम तत् ।
हत्वा मत्युर्महावीर्य्यो नरकस्य महात्मनः । ममैव तात युद्धेऽस्मिन् हते तस्मिन् दुरात्मनि ।
गच्छ त्वं कुमतो वीर योद्धुं न क्षमते भवान् । अथवा तिष्ठ किञ्चित्तु ततो द्रष्टाऽसि मे बलं ।
शिरस्ते पातयिष्यामि शरैर्घोरैर्दुरासदैः । हतस्य तव वीरेह भूमिः पास्यति शोणितं । १५१७०

श्राध्यते स तथा गोपो हतः सात्यकिरित्यपि। यो गर्व्वस्तस्य गोपस्य सर्व्वदा वर्त्तते महान्।
विनश्यतु स तु क्षिप्रं हते त्वयि यदूत्तम। त्वयि रक्षां समादिश्य गोपः कैलासपर्व्वतं।
गत इत्येवमस्माभिः श्रुतं पूर्व्वं महामते। शरं मद्बाण निशितं यदि शक्तोऽसि सात्यके।
इत्युक्त्वा बाणमादाय घयौ योद्धुं व्यवस्थितः।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौण्ड्रकवधे रात्रियुद्धे षडशीत्यधिकद्विशततोऽध्यायः ॥ २८६ ॥

॥ वैशम्पायन उवाच ॥ ततः क्रुद्धो महाराज सात्यकिर्वृष्णिपुङ्गवः। उवाच वचनं राजन् वासुदेवं स्मरन्निव। ११९७५
अवोचदीदृशं वाक्यं वासुदेवं नृपाधमः। को नाम जगतां नाथमित्थं ब्रूयाज्जिजीविषुः।
मृत्युसंस्था सर्व्वथा याति वदन्तं तादृशं वचः। जिह्वा ते शतधा दीर्य्यादिदन्तस्तादृशं वचः।
एष ते पातयिष्यामि शिरः कायाच्च पौण्ड्रक। यन्नाम वासुदेवेति तव संप्रति वर्त्तते।
यावत् पतति कायात्ते शिरस्तावत् प्रवर्त्तते। स एव श्वो नु भगवान् वासुदेवो भविष्यति।
एक एव जगन्नाथः कर्त्ता सर्व्वस्य सर्व्वगः। दुरात्मन् सर्व्वथा देवो भविष्यति न संशयः। ११९८०
एष तेऽहं शिरः कायात् पातयिष्यामि राजक। यद्यसौ भगवान् विष्णुर्नागमिष्यति सांप्रतं।
अस्त्रवीर्य्यं बलञ्चैव सर्व्वं दर्शय साम्प्रतं। नातः परतरं राजन् वीर्य्यं तव च वर्त्तते।
सर्व्वं दर्शय यत्नेन स्थितोऽस्मि व्यवसायवान्। शरी चापी गदी खड्गी सर्व्वथाऽहमुपस्थितः।
नैतन्नगरमायासीः सत्येनैतद्ब्रवीम्यहं। सर्व्वथा कृतकृत्योऽस्मि दृष्ट्वा त्वां वासुदेवक।
तवाङ्गं तिलशः कृत्वा श्वभ्यो दास्यामि राजक। इत्युक्त्वा बाणमादाय वासुदेवं महाबलः। ११९८५
आकर्णपूर्णमाकृष्य विव्याध निशितं शरं। स तेन विद्धो यदुना वासुदेवः प्रतापवान्।
नवभिर्दशभिश्चैव शरैः सन्नतपर्व्वभिः। विव्याध सात्यकिं राजा नदंश्च बहुधा किल।
ततो नाराचमादाय निशितं यमसन्निभं। धनुराकृष्य भगवान् वासुदेवो नृपोत्तम।
विव्याध सात्यकिं भूयो निशि प्रह्लादयन् स्वकान्। नाराचेन समाविद्धः सात्यकिः सत्यसङ्गरः।
ललाटे सुदृढं वीरो वृष्णीनामग्रणीस्तदा। निषसाद रथोपस्थे निश्चेष्ट इव सत्तम। ११९९०
ततः स पौण्ड्रको राजाऽविध्यद्दशभिराशुगैः। सारथिं पञ्चविंशत्या हयांश्च चतुरो नृप।
ते हया रुधिराक्ताङ्गाः सारथिश्च समन्ततः। विक्लवाः समपद्यन्त सासुदेवस्य पश्यतः।
वासुदेवो रथे चापि सिंहनादं समादधे। तेन नादेन तत्राभूद्विबुद्धः सात्यकिर्नृप।
विद्धान् हयांस्तथा दृष्ट्वा सारथिञ्च तथा गतं। शैनेयोऽथ महावीर्य्यो रुषितो नृपसत्तम।
बलं द्रक्ष्यामि ते वीर्य्यमित्युक्त्वा बाणमाददे। विव्याध तेन बाणेन वक्षस्येनं महाबलं। ११९९५
ततश्चचाल तेनाशु वासुदेवः शरेण ह। सुस्रुवे रुधिरं घोरमत्युष्णं वक्षसा नृप।
रथोपस्थे पपात राजन् निश्वसन्नुरगो यथा। कृत्यञ्चापि न जानाति केवलं निषसाद ह।
सात्यकिस्तु रथं विद्ध्वा दशभिः सायकैस्तथा। ध्वजं चिच्छेद भल्लेन वासुदेवस्य वृष्णिपः।
हयांश्च चतुरो हत्वा बाणैः सारथिमेव च। युयुधानोऽथ राजेन्द्र बाणैः सारथिमेव च।

सारथेश्च शिरः कायादाहरत् स रथात्तदा। रथयन्त्रिञ्च चिच्छेद हयाश्च व्यसवोऽभवन्। १५२००
चक्रञ्च निलयः कृत्वा वार्ष्णेयं शरभिरञ्जसा। जहास विपुलं राजन् वासुदेवं महाबलः।
ततः परं महत्सायं सात्यकिर्वृष्णिनन्दनः। शब्दं कृत्वा बली साक्षात् सर्व्वक्षत्रस्य पश्यतः।
शरैः सप्रतिसंख्यातैरर्द्दयामास सत्वरं। ते शराः शलभाकारा निपेतुः सर्व्वतस्तदा।
शिरसः पार्श्वतश्चैव पृष्ठतः पुरतस्तथा। केवलं धैर्य्यमिच्छयत्तृषार्त्तः शरावन् यथा।
यथा मनस्वी विक्रान्त तथा तिष्ठति पौण्ड्रकः। ततश्चुक्रोध बलवान् वासुदेवः प्रतापवान्। १५२०५
अर्द्धचन्द्रं समादाय विव्याध युधि सात्यकिं। विद्धः सप्तभिरायान्तं क्रोधेन प्रस्फुरन्निव।
विद्धोऽथ सात्यकिस्तेन शरैः पञ्चभिराशुगैः। चापं चिच्छेद पौण्ड्रस्य सिंहनादं तथाऽनदत्।
वासुदेवो गदां गृह्य भ्रामयित्वा पदात् पदं। त्वरितं पातयामास सात्यकेर्व्वक्षसि प्रभो।
सव्येन तां समाकृष्य करेण यदुनन्दनः। शरं प्रगृह्य विव्याध सात्यकिर्युधि पौण्ड्रकं।
तदनन्तरं गृहीत्वाशु वासुदेवः प्रतापवान्। शक्तिभिर्द्दशभिश्चैव सात्यकिं निजघान ह। १५२१०
ताभिर्विद्धो रणे वीरः सात्यकिः सत्यसङ्गरः। अपास्य धनुरन्यत्तद्धनुरादाय सत्वरं।
आजघान गदापाणिर्वृष्णीनामग्रणीर्नृप।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौण्ड्रकसात्यकियुद्धे सप्ताशीत्यधिकद्विशततमोऽध्यायः॥ २८७॥

॥ वैशम्पायन उवाच॥ ततः क्रुद्धो गदापाणिः सात्यकिर्वृष्णिनन्दनः। वासुदेवं जघानाशु गदया तीक्ष्णया नृप।
सात्यकिं वासुदेवस्तु गदयाऽभ्यहनद्बली। तावुद्यतगदौ वीरौ शुशुभाते सुदारुणौ।
दृप्तौ वने यथा सिंहौ परस्परवधैषिणौ। ततः स सात्यकिः क्रुद्धः सव्यं मण्डलमागमत्। १५२१५
दक्षिणं वासुदेवस्तु तं जघान स्तनान्तरे। युयुधानोऽथ वीरस्तु बाह्वोर्मध्यमताडयत्।
दृढं स ताडितो वीरो जानुभ्यामपतद्भुवि। तत उत्थाय वीरस्तु ललाटेऽभ्यहनत् गदां।
विपन्नः किञ्चिदायस्तस्तत उत्थाय सत्वरं। गदयाऽभ्यहनद्वीरः सात्यकिः पौण्ड्रसत्तमं।
वासुदेवो बली वीरः साक्षान्मृत्युरिवापरः। जघान गदया वृष्णिं निर्द्दहन्निव चक्षुषा।
स तया ताडितो वृष्णिर्गदया बाहुमुक्तया। आलम्ब्य भूमिं सहसा मूर्च्छितोऽन्तगतो यथा। १५२२०
संज्ञां पुनः समालभ्य पाणिभ्यां दृढमेव च। गदां तस्य महाराज गृहीत्वा प्रग्रहेण ह।
द्विधा कृत्वा महागुर्व्वीं गदां कालायसीं शुभां। उत्सृज्य सहसा वीरः सिंहनादं व्यनीनदत्।
तत उत्सृज्य राजा तु वासुदेवो महाबलः। सव्येन सात्यकिं गृह्य दक्षिणेन करेण ह।
मुष्टिं कृत्वा महाघोरां वासुदेवः प्रतापवान्। ताडयामास मध्ये तु स्तनयोः सात्यकेर्नृप।
शैनेयो वृष्णिवीरस्तु गदामुत्सृज्य सत्वरं। तलेनाभ्याहनद्वीरो वासुदेवं रणाजिरे। १५२२५
तलेन वासुदेवोऽपि सात्यकिं सत्यसङ्गरं। तयोरेवं महाघोरं तलयुद्धं प्रवर्त्तत।
जानुभ्यां मुष्टिभिश्चैव बाहुभ्यां शिरसा तदा। उरसोरः समाहत्य जानुभ्यां जानुनी तथा।
कराभ्यां करमाहत्य तौ युद्धं संप्रचक्रतुः। तलयोस्तत्र राजेन्द्र वृष्ण्योः सन्निकर्षयोः।

वने यथाऽग्निरुत्पन्नस्तथैवाभून्महास्वनः । तावाजौ प्रथितौ वीरावुभौ पौण्ड्रकसात्यकी ।
निशि स्तिमितमूकायां शस्त्रं त्यक्त्वा महाबलौ । युयुधाते महारङ्गे मल्लौ द्वाविव विश्रुतौ । १५२१०
उभे सेने महाराज संशयं जग्मतुस्तदा । किन्नु स्यात् सात्यकिर्वीरो हतस्तेन भविष्यति ।
आहोस्विद्वासुदेवस्तु हतस्तेन महात्मना । अथवा तौ महावीरौ परस्परवधैषिणौ ।
युध्यमानौ महावीरौ नरौ स्वर्गं गमिष्यतः । अन्यथा नोपरम्येतां युद्धाद्धीरौ सुनिश्चितौ ।
अहो वीर्य्यमहो धैर्य्यमेतयोर्ब्बलशालिनोः । एतौ महाबलौ लोके एतौ प्रकृतिसत्तमौ ।
नैव युद्धं महाघोरमासीद्देवासुरेष्वपि । न श्रुतो न च वा दृष्टः संग्रामोऽयं कदाचन । १५२१५
एवं ते सैनिका ब्रूयुः सेनयोरुभयोरपि । रात्रौ निशीथे संघोषे दृष्ट्वा युद्धं सुदारुणं ।
अथ तौ बाहुभिर्वीरौ सन्निपेततुरञ्जसा । दशभिर्म्मुष्टिभिर्ज्जघ्ने सात्यकिः पौण्ड्रकं तदा ।
पञ्चभिः सात्यकिं पौण्ड्रः समाजघ्ने महाबलः । तयोश्चटचटाशब्दो ब्रह्माण्डक्षोभणो महान् ।
प्रादुरासीत्तु सर्व्वत्र सर्व्वान् विस्मापयन्निव ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौण्ड्रकसात्यकियुद्धे अष्टाशीत्यधिकद्विशततमोऽध्यायः ॥ २८८ ॥

॥ वैशम्पायन उवाच ॥ एतस्मिन्नन्तरे क्रुद्ध एकलव्यो निषादपः । बलभद्रमभिप्रेक्ष्य धनुरादाय सत्वरं । १५२२०
नाराचैर्द्दशभिर्विद्ध्वा बाणैश्च दशभिः परैः । चिच्छेद धनुरुद्धं तत् सर्व्वसैन्यस्य पश्यतः ।
सूतं दशभिराहत्य रथं त्रिंशद्भिरेव च । ध्वजं चिच्छेद भल्लेन निषादस्य जगत्पतिः ।
ततोऽपरं महच्चापं निषादो वीर्य्यसम्मतः । दृढमौर्व्वीसमायुक्तं दशतालप्रमाणतः ।
कामपालं शरेणाशु जघान जनमध्यतः । बलदेवो महावीर्य्यः शेषसर्प इव श्वसन् ।
दशभिस्तद्धनुर्द्दिव्यं शरैः सर्व्वसहैर्ब्बलैः । चिच्छेद मुष्टिदेशे तु माधवो माधवाग्रजः । १५२२५
एकलव्यो निषादेशः खड्गमादाय सत्वरः । प्राहिणोद्बलदेवाय निशितं घोरविग्रहं ।
तमन्तरे यदुर्वीरो वृष्णिवीरः प्रतापवान् । तिलशः पञ्चभिर्ब्बाणैश्चकार यदुनन्दनः ।
ततो महत् परं खड्गं सर्व्वकालायसं शुभं । प्राहिणोत् सायकैः कायमालोक्याथ निषादपः ।
तच्चापि दशभिर्वीरो माधवो यदुनन्दनः । बाह्वोरन्तरयोश्चैव निर्बिभेद महारणे ।
ततः शक्तिं समादाय घण्टामालाकुलां नृप । निषादो बलदेवाय प्रेषयित्वा महाबलः । १५२३०
सिंहनादं महाघोरमकरोत् स निषादपः । सा शक्तिः प्रेषिता तेन बलदेवमुपागमत् ।
उत्पतन्तीं महाघोरां बलभद्रः प्रतापवान् । आदायाथ निषादेशं सर्व्वान् विस्मापयन्निव ।
तयैव तं जघानाशु वक्षोदेशे स माधवः । स तया ताडितो वीरः स्वशक्त्या निषादपः ।
विह्वलः सर्व्वगात्रेषु निपपात महीतले । प्राणसंशयमापन्नो निषादो रामताडितः ।
निषादास्तस्य राजेन्द्र शतशोऽथ सहस्रशः । अष्टाशीतिसहस्राणि निषादास्तस्य योधिनः । १५२३५
गदिनः खड्गिनश्चैव महेष्वासा महाबलाः । शरैरनेकसाहस्रैः शक्तिभिश्च परश्वधैः ।
गदाभिः पट्टिशैः शूलैः परिघैः प्रासतोमरैः । कुन्तैरथ कुठारैश्च यादवानां ससैनिकं ।

शलभा इव राजेन्द्र दीप्यमानं हुताशनं । ते शतं पातयाञ्चक्रू रामं राममिवापरे ।
केचित् कुठारैराजघ्नुः केचित् कुन्तैः परश्वधैः । गदाभिः केचिदाघ्नन्ति शक्तिभिश्च तथाऽपरे ।
निजघ्नुः सहसा रामं प्रस्फुरन्तं यथा यथा । ततः क्रुद्धो हली साचात् हलमुद्यम्य सत्वरं । १५२६०
सर्व्वानाकर्षयामास मुषलेन हि पीडयन् । ते हन्यमाना राजेन्द्र निषादाः पर्व्वताश्रयाः ।
निपेतुर्द्धरणीपृष्ठे शतशोऽथ सहस्रशः । शरेण तान्महाराज हत्वा सर्व्वान्महाबलान् ।
सिंहवन्नानदंस्तत्र तस्थौ रामो महाबलः । ततो रात्रौ महाघोराः पिशाचाः पिशिताशनाः ।
आकृष्य मांसयूथानि भक्षयन्तः समासते । पिबन्तः शोणितं कोष्ठात् संच्छिद्य च शवं बहु ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि एकलव्यसैन्यवधे ऊननवत्यधिकद्विशतोऽध्यायः ॥ २८९ ॥
॥ वैशम्पायन उवाच ॥ क्रव्यादाः सर्व्व एवाशु भक्षयन्तस्तदा शवं । हसन्तो विविधं घोरं नादयन्तो वसुन्धरां । १५२६५
राक्षसाः पिशिताशाश्च पिबन्तः शोणितं बहु । आशिखं भुञ्जते राजन् शवस्य पिशिताशनाः ।
नृत्यन्ति स्म तदा राजन्नगर्य्यां रणतोषिणः । काका बलाका गृध्राश्च श्येना गोमायवस्तथा ।
भक्षयन्तः प्रवर्त्तन्ते राक्षसाश्चैव दारुणाः । एतस्मिन्नन्तरे वीरो निषादो लब्धसंज्ञकः ।
हतान् सर्व्वान् समालोक्य निषादान्नगचारिणः । गदामादाय कुपितो राममेव जगाम ह ।
जघान गदया राजन् जत्रुदेशे निषादपः । ततो रामो दृढं राजन्निशादं बाहुशालिनं । १५२७०
आजघ्ने गदया क्रूरं मदमत्तो हलायुधः । तयोश्च तुमुलं युद्धं गदाभ्यां समवर्त्तत ।
आकाशे शब्द आसीत्तु तयोर्युद्धे महाभुज । समुद्राणां यथा घोषः सर्व्वेषां सन्निगच्छतां ।
कल्पक्षये महाराज शब्दः सुतुमुलोऽभवत् । चोभितो नागराजश्च नागाः चोभं समाययुः ।
पृथिवी चान्तरीक्षञ्च सर्व्वं शब्दमयं बभौ । ततः स पौण्ड्रको राजा सात्यकिं वृष्णिनन्दनं ।
गदयैव जघानाशु सत्वरं रणकोविदः । युयुधानो बली राजन् वासुदेवं जघान ह । १५२७५
तयोश्च तुमुलः शब्दः प्रादुरासीन्महारणे । चतुर्णां युध्यतां राजन् परस्परवधैषिणां ।
ब्रह्माण्डक्षोभणो राजन् शब्द आसीत् सुदारुणः । ततो रजः प्रादुरभूत्तस्मिन् संग्राममूर्द्धनि ।
तारका निष्प्रभा राजंस्तमस्येवं क्षयं गते । उषसि प्रतिबुद्धायां तमो निःशेषतां ययौ ।
उदितो भगवान् सूर्य्यश्चन्द्रश्च क्षयमाययौ । तयोर्युद्धं प्रादुरभूच्चतुर्णां बाहुशालिनां ।
देवासुरसमं राजन्नुदिते भास्करे महत् । १५२८०
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौण्ड्रकवधे नवत्यधिकद्विशतोऽध्यायः ॥ २९० ॥
॥ वैशम्पायन उवाच ॥ ततः प्रभाते विमले भगवान् देवकीसुतः । गन्तुमैच्छज्जगन्नाथः पुरीं वदरिकाश्रमात् ।
नमस्कृत्य मुनीन् सर्व्वान् ययौ द्वारवतीं नृप । आरुह्य गरुडं विष्णुर्वेगेन महता प्रभुः ।
समहान् शुश्रुवे शब्दस्तेषां युद्धं प्रकुर्व्वतां । गच्छता देवदेवेन पुरीं द्वारवतीं नृप ।
अचिन्तयज्जगन्नाथः को न्वयं शब्द उत्थितः । संग्रामसम्भवो घोर आर्य्यशैनेयसंयुतः ।
व्यक्तमागतवान् पौण्ड्रो नगरीं द्वारकामनु । तेन युद्धं समभवत् पौण्ड्रकेण महात्मना । १५२८५

यदूनां वृष्णिवीराणां युध्यतामितरेतरं । शब्दोऽयं सुमहान् व्यक्तो मात्र कार्य्या विचारणा ।
इत्येवं चिन्तयित्वा तु दध्मौ शङ्खं महारवं । पाञ्चजन्यं हरिः साक्षात् प्रीणयन् वृष्णिपुङ्गवान् ।
रोदसी पूरयामास तेन शब्देन केशवः । यादवा वृष्णयश्चैव श्रुत्वा शङ्खस्य तं रवं ।
व्यक्तमायाति भगवान् पाञ्चजन्यरवो ह्ययं । इति ते मेनिरे राजन् वृष्णयो यादवास्तथा ।
निर्भयाः समपद्यन्त वृष्णयो यादवाश्च ते । तस्मिन्नेव क्षणे दृष्टस्तार्क्ष्यश्च पततांवरः । १११९०
ततश्च देवकीसूनुर्दृष्टस्तैर्यादवेश्वरः । सूताश्च मागधाश्चैव पुरो यान्ति जगत्पतेः ।
स्तुत्या स्तुतं हरिं विष्णुमीश्वरं कमलेक्षणं । ततश्च यादवाः सर्व्वे परिवव्रुर्जनार्द्दनं ।
कृष्णस्तु गरुडं भूयो गच्छ त्वं नाकमुत्तमं । इत्युक्त्वा गरुडं विष्णुर्विसृज्य यदुनन्दनः ।
दारुकं पुनराहेदं रथमानय मे प्रभो । स तथेति प्रतिज्ञाय रथमादाय सत्वरं ।
रथोऽयं भगवन् देव किमतः कृत्यमस्ति मे । इत्युक्त्वा रथमादाय प्रणम्याग्रे स्थितो हरेः । १११९५
गते च गरुडे विष्णू रथमारुह्य सत्वरं । यत्र युद्धं समभवत्तत्र याति स्म केशवः ।
तत्र गत्वा महाराज युध्यतांश्च महात्मनां । पाञ्चजन्यं महाशङ्खं दध्मौ यदूत्तमोत्तमः ।
पौण्ड्रोऽथ वासुदेवस्तु कृष्णं दृष्ट्वा रणोत्सुकं । सात्यकिं पृष्ठतः कृत्वा वासुदेवमुपागमत् ।
क्रुद्धोऽथ सात्यकी राजन् वारयामास पौण्ड्रकं । न गन्तव्यमितो राजन् नैष धर्म्मः सनातनः ।
जित्वा मां गच्छ राजेन्द्र परं योद्धुं महारणे । क्षत्रियोऽसि महावीर स्थिते मयि रणोत्सुके । ११२००
एष ते गर्व्वमखिलं नाशयिष्यामि संयुगे । इत्युक्त्वा वारयतस्तस्यौ गच्छतो यादवेश्वरः ।
पौण्ड्रकस्य शिनेर्नप्ता पश्यतः केशवस्य ह । अवज्ञाय शिनेः पौत्रं कृष्णमेव जगाम ह ।
निर्भर्त्स्य सहसा भूयः सात्यकिः क्रोधमूर्च्छितः । गदया प्राहरत् पौण्ड्रं वासुदेवस्य पश्यतः ।
यथाप्राणं यथायोगं सात्यकिः सत्यविक्रमः । दृष्ट्वाऽथ भगवानेवं सात्यकिं प्रशशंस ह ।
निवार्य्य सात्यकिं कृष्णो यथेष्टं क्रियतामसौ । उपारमद्यथायोगं सात्यकिः कृष्णवारितः । ११२०५
स ततः पौण्ड्रको राजा वासुदेवमुवाच ह । भो भो यादव गोपाल इदानीं क्व गतो भवान् ।
त्वां द्रष्टुमथ संप्राप्तो वासुदेवोऽस्मि साम्प्रतं । हत्वा त्वां सबलं कृष्ण बलैर्व्वहुभिरन्वितः ।
अहमेको भविष्यामि वासुदेवो महीतले । यच्चक्रं तव गोविन्द प्रथितं सुप्रभं महत् ।
अनेन मम चक्रेण पीडितोऽसि च तद्रणे । चक्रमस्तीति यद्वीर्य्यं तत्र माधव सांप्रतं ।
नाशयिष्यामि तत् सर्व्वं सर्व्वक्षत्रस्य पश्यतः । शार्ङ्गीति मां विजानीहि न त्वं शार्ङ्गीति शिष्यते । ११२१०
शङ्खी चाहं गदी चाहं चक्री चाहं जनार्द्दन । मामेव हि सदा भूयर्जानन्तो वीर्य्यशालिनः ।
आदौ त्वबलवृद्धाज्ञान् हत्वा स्त्रीवालकान् बहून् । गाश्च हत्वा महागर्व्वस्तव संप्रति वर्त्तते ।
तत्तेऽहं व्यपनेष्यामि यदि तिष्ठसि मत्पुरः । शस्त्रं गृहाण गोविन्द यदि योद्धुं व्यवस्थितः ।
इत्युक्त्वा वाणमादाय तस्थौ पार्श्वे जगत्पतेः । एतद्वचनमाकर्ण्य वासुदेवस्य भाषितं ।
स्मितं कृत्वा हरिः कृष्णो बभाषे पौण्ड्रकं नृपं । कामं वद नृप त्वं हि पातकस्य सदा नर । ११२१५

गोघाती बालघाती च स्त्रीहन्ता सर्व्वथा नृप । चक्री भव गदी राजन् शार्ङ्गी च सततं भव ।
नामधेयं वृथा मह्यं वासुदेवेति च प्रभो । शार्ङ्गी चक्री गदी शङ्खीत्येवमादि यथा मम ।
किन्तु वक्ष्यामि किञ्चित्तु शृणुष्व यदि मन्यसे । क्षत्त्रिया बलिनो ये तु स्थिते मयि जगत्पतौ ।
तथाऽनुब्रुवते त्वां हि जीवत्येव मयि प्रभो । यत्ते चक्रं महाघोरमसुरान्तकरं महत् ।
तत्तुल्यं मम चक्रस्य वृत्ततो न तु वीर्य्यतः । आयुधेष्वपि सर्व्वत्र शब्दसादृश्यमस्ति ते । १५३१०
गोपोऽहं सर्व्वदा राजन् प्राणिनां प्राणदः सदा । गोप्ता सर्व्वेषु लोकेषु शास्ता दुष्टस्य सर्व्वदा ।
कत्थनं सर्व्वदा कार्य्यं जित्वा राजन्नृपाधम । अजित्वा किं भवान् ब्रूते स्थिते मयि च शत्रिणि ।
हत्वा मां ब्रूहि राजेन्द्र यदि शक्तोऽसि पौण्ड्रक । स्थितोऽहं चक्रमाश्रित्य रथी चापी गदासिमान् ।
रथमारुह्य युद्धेऽस्मिन् सन्नद्धो भव मानद । इत्युक्त्वा भगवान् विष्णुः सिंहनादं व्यनीनदत् ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कृष्णपौण्ड्रकयुद्धे एकनवत्यधिकद्विशततोऽध्यायः ॥ २९१ ॥

॥ वैशम्पायन उवाच ॥ ततः शरं समादाय वासुदेवः प्रतापवान् । पौण्ड्रं जघान सहसा निशितेन शरेण ह । १५३१५
पौण्ड्रोऽथ वासुदेवस्तु शरैर्दशभिराशुगैः । वासुदेवं जघानाशु वार्ष्णेयं वृष्णिनन्दनं ।
दारुकं पञ्चविंशत्या हयान् दशभिरेव च । सप्तत्या वासुदेवन्तु यादवं वासुदेवकः ।
ततः प्रहस्य सुचिरं केशवः केशिसूदनः । हृष्टोऽस्मीति मनसा संपूज्य यदुनन्दनः ।
आकृष्य शार्ङ्गं बलवान् सन्धाय रिपुसूदनः । नाराचेन सुतीक्ष्णेन ध्वजं चिच्छेद केशवः ।
सारथेश्च शिरः कायादाहृत्य यदुनन्दनः । अश्वांश्च चतुरो हत्वा चतुर्भिः सायकोत्तमैः । १५३२०
रथं राज्ञः समाहत्य तयोर्भा पार्ष्णिसारथी । चक्रञ्च तिलशः कृत्वा हसन् किञ्चिदवस्थितः ।
पौण्ड्रको वासुदेवस्तु रथादाप्लुत्य सत्वरः । आदाय निशितं खड्गं प्राहिणोत् केशवाय सः ।
स खड्गं शतधा कृत्वा तूष्णीमासीच्च केशवः । ततोऽपरं महाघोरं परिघं कालसन्निभं ।
गृहीत्वा वासुदेवाय वासुदेवः प्रतापवान् । प्राहिणोद्वृष्णिवीराय सर्व्वक्षत्रस्य पश्यतः ।
तद्द्विधा जगतां नाथश्चकार यदुनन्दनः । ततश्चक्रं महाघोरं सहस्रारं महाप्रभं । १५३२५
त्रिंशद्भारसमायुक्तमाधसस्यमसिबहा । आदायाथ महाराज केशवं वाक्यमब्रवीत् ।
पश्येदं निशितं घोरं तव चक्रविनाशनं । अनेन तव गोविन्द दर्पं दर्पवतांवर ।
अपनेष्यामि वार्ष्णेय सर्व्वक्षत्रस्य पश्यतः । त्वामुद्दिश्य महाघोरं कृतमन्यद्दुरासदं ।
यदि शक्तो हरे कृष्ण दारयेदं महास्पदं । इत्युक्त्वा तच्छतगुणं भ्रामयित्वा महाबलः ।
चिक्षेपाय महावीर्य्यः पौण्ड्रको नृपसत्तमः । अवप्लुत्य ततो देशात्तदुत्सृज्य महाबलः । १५३३०
सिंहनादं महाघोरं व्यनदद्वीर्य्यवांस्तदा । ततो विस्मयमापन्नो भगवान् देवकीसुतः ।
अहो वीर्य्यमहो धैर्य्यमस्य पौण्ड्रस्य दुःसहं । इति मत्वा जगन्नाथ उत्थितश्च रथोत्तमात् ।
ततः शिलां समादाय प्रेषयामास केशवे । तां शिलां प्रेषयामास तस्मै यदुकुलोद्वहः ।
पौण्ड्रेण सुचिरं कालं विक्रीड्य भगवान् हरिः । ततश्च चक्रमादाय निशितं रक्तभोजनं ।

दैत्यमांसप्रदिग्धाङ्गं नारीगर्भविमोचनं । शातकुम्भमयं घोरं दैत्यदानवनाशनं । १५३४५
सहस्रारं शतारन्तदद्भुतं दैत्यभीषणं । ऐश्वर्य्यञ्च परमं नित्यं सुरगणार्च्चितं ।
विष्णुः कृष्णस्तथा शार्ङ्गी नित्यं युक्तः सदा हरिः । जघान तेन गोविन्दः पौण्ड्रकं नृपसत्तमं ।
तस्य देहं विदार्य्याशु चक्रं पिशितभोजनं । कृष्णस्याथ करं भूयः प्राप सर्व्वेश्वरस्य ह ।
ततः स पौण्ड्रको राजा गतासुः प्रापतद्भुवि । निहत्य भगवान् विष्णुर्विजयगतिः प्रभुः ।
प्रविवेश सुधर्म्मान्तु यादवैः पूजितो हरिः । १५३५०
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौण्ड्रकवधे द्विनवत्यधिकद्विशततोऽध्यायः ॥ २९२ ॥
॥ वैशम्पायन उवाच ॥ निषादेशं ततो रामः शक्त्या वीर्य्यवतांवरः । आजघान स्तनद्वन्द्वे सिंहनादं तथाऽनदत् ।
ततः क्रुद्धो निषादेशो रामं सत्त्वं महाबलं । गदया लोकविख्यातो जघान स्तनयोरपि ।
आहतः स तु तेनाशु बलभद्रो महाबलः । उभाभ्याञ्चैव रामस्तु कराभ्यां वृष्णिपुङ्गवः ।
गदां गृह्य महाघोरामायान्तीं प्राणहारिणीं । दुद्रावाथ निषादेशः समुद्रं मकरालयं ।
धावत्येवं तदा राजन् एकलव्ये निषादपे । धावत्येव च रामोऽपि यत्र यातो निषादपः । १५३५५
सागरं स प्रविश्याशु गत्वा योजनपञ्चकं । भीत एव तदा राजन्नेकलव्यो निषादपः ।
कश्चिद्द्वीपान्तरं राजन् प्रविश्य न्यवसत्तदा । ततो रामो निषादेशं जिगाय यदुनन्दनः ।
तां सभां मणिरत्नाढ्यां प्रविवेश हलायुधः । सात्यकिर्युद्धसंसक्तां सभां प्रविवेश ह ।
अन्ये च यादवा राजन् यथायोगमुपस्थिताः । आसनेषु च सर्व्वेषु वृष्णिवीरेषु सर्व्वतः ।
अभिवाद्य यथायोगं वृष्णीन् सर्व्वांश्च केशवः । उवाच वचनं काले भगवान् देवकीसुतः । १५३६०
दृष्टं कैलासशिखरं शङ्करो नीललोहितः । स तु मह्यं यदुवरा प्रीतिमांश्च ददौ वरं ।
तत्र देवाः समायाता मुनयश्च तपोधनाः । दृष्ट्वा मां शङ्करश्चैव प्रीतः स्तुत्वा समाययौ ।
अत्यद्भुतं मया दृष्टं राजेन्द्रा यादवसत्तमाः । पिशाचौ द्वौ महाघोरौ वदन्तौ मामिकां कथां ।
मृगयां चक्रतुस्तौ तु चिन्तयन्तौ तु मां सदा । दृष्ट्वा मां तौ तु राजेन्द्राः प्रीतिमन्तौ तपस्विनौ ।
भक्तिनम्रौ महात्मानौ प्रणामं चक्रतुस्तदा । ततोऽहं सर्व्वथा प्रीतस्तौ नीतौ स्वर्गमुत्तमं । १५३६५
तोषयित्वा महादेवं मया चाद्य समागतं ।
॥ वैशम्पायन उवाच ॥ ततस्ते वृष्णयः सर्व्वे देवदेवं शशंसिरे । सर्व्वथा कृतकृत्यास्ते वृष्णयः केशवाश्रयाः ।
यादवाः सर्व्व एवात्र स्वं स्वं जग्मुर्यथालयं । अभ्यन्तरं जगन्नाथः प्रविश्य हरिरीश्वरः ।
रुक्मिणीसत्यभामाभ्यामाचचक्षे यथाऽभवत् । ते प्रीते प्रीतियुक्तेन केशवेन समन्विते ।
एतत्ते सर्व्वमाख्यातं केशवस्य च चेष्टितं । शशास पृथिवीं कृत्स्नां दुष्टान् हत्वा महाबलान् । १५३७०
नरकं घोररूपं बाणं पौण्ड्रकं नृपसत्तमं । हयग्रीवं निशुम्भञ्च तथा सुन्दोपसुन्दकौ ।
एवञ्च विप्रान् देवेशो मुनीन् मुनिवरार्च्चितः । विप्रेभ्यश्च ददौ वित्तं गाश्च दत्त्वा स केशवः ।
अग्निहोत्रे प्रयुञ्जानो ब्राह्मणांश्च सुतर्पयन् । मुनींश्च ब्रह्मचर्य्येण देवान् यज्ञैरनेकधा ।

स्वधया च पितॄन् सर्व्वान् प्रीणयन्नेव सर्व्वदा । तस्मिन् शासति देवेशे राज्यं निष्कण्टकं प्रभो ।
सुखमेव प्रजाः सर्व्वा जीवन्ति ब्राह्मणादयः । १५३७५
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि पौण्ड्रकवधे त्रिनवत्यधिकद्विशततमोऽध्यायः ॥ २९३ ॥
॥ जनमेजय उवाच ॥ भूय एव द्विजश्रेष्ठ शङ्खचक्रगदाभृतः । चरितं श्रोतुमिच्छामि विस्तरेण तपोधन ।
न हि मे तृप्तिरस्तीह शृण्वतः केशवीं कथां । को नु नाम हरेर्व्विष्णोर्द्देवदेवस्य चक्रिणः ।
शृण्वन् स्तुवं स्मरन् वाऽपि तृप्तिं याति दिवानिशं । पुरुषार्थोऽयमेवैको यत्कथाश्रवणं हरेः ।
कथमासीज्जगद्धेतोर्हंसस्य डिम्भकस्य च । समितिः सर्व्वभूतानां सदा विस्मयदायिनी ।
विचक्रस्य कथं युद्धं दानवस्य महात्मनः । स तयोर्म्मित्रतां यात इत्येवमनुशुश्रुम । १५३८०
तौ सुतौ वीर्य्यसम्पन्नौ शिष्यौ भृगुसुतस्य च । सर्व्वास्त्रकुशलौ वीरौ हराल्लब्धवरौ किल ।
संग्रामः सुमहानासीदित्युक्तं भवता पुरा । तयोश्च नृपयोर्व्विप्र केशवस्य जगत्पतेः ।
कस्य पुत्रौ समुत्पन्नौ यथाऽभूद्विग्रहो महान् । अष्टाशीतिसहस्राणि दानवानां तरस्विनां ।
बलान्यथ विचक्रस्य शितशूलधराणि च । आसन् युद्धे महाराज दानवस्य जयैषिणः ।
यदूनामन्तरप्रेप्सुर्यदूनां युद्धकाङ्क्षया । देवासुरे महायुद्धे देवान् जयति दुर्द्धरः । १५३८५
तद्वधार्थं सदा यत्नमकरोच्चैव केशवः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने जनमेजयवाक्ये चतुर्नवत्यधिकद्विशततमोऽध्यायः ॥२९४ ॥
॥ वैशम्पायन उवाच ॥ आसीत् शाल्वेषु राजेन्द्र ब्रह्मदत्तो नृपोत्तमः । नाम्ना राजन् स पूतात्मा सर्व्वभूतदयापरः ।
पञ्चयज्ञपरो नित्यं जितात्मा विजितेन्द्रियः । ब्रह्मविद्देदविच्चैव सदा यज्ञपरः शिवः ।
तस्य भार्य्ये महीपाल रूपौदार्य्यगुणान्विते । बभूवतुः सुसंयत्ते अनपत्ये नृपोत्तम ।
स ताभ्यां मुमुदे राजा शच्या शक्र इवाम्बरे । नाम्ना मित्रसहो नाम सखा चासीन्महामते । १५३९०
तस्य राज्ञो महायोगी वेदवेदान्ततत्परः । अनपत्यः स विप्रेन्द्रो यथा राजा बभूव ह ।
स राजा सहितस्ताभ्यामर्च्चयामास शङ्करं । पुत्रार्थं शूलिनं शर्व्वं दशवर्षाण्यनन्यधीः ।
स विप्रो वैष्णवं सत्रं पुत्रार्थं समयोजयत् । अर्च्चितस्तेन राजेन्द्र शङ्करो नीललोहितः ।
आत्मानं दर्शयामास स्वप्ने राजानमब्रवीत् । प्रीतोऽस्मि तव भद्रन्ते वरं वरय सुव्रत ।
अथ राजा जगन्नाथमुवाचेदं स्मयन्निव । पुत्रौ मम भवेतां हि तथेत्युक्त्वा वृषध्वजः । १५३९५
अन्तर्द्धानं गतः शम्भुः प्रतिबुद्धस्ततो नृपः । सोऽपि मित्रसहो विद्वान् देवं केशवमव्ययं ।
पञ्चवर्षं जगन्नाथमर्च्चयामास भक्तितः । अर्च्चितस्तेन विप्रेण देवदेवो जनार्द्दनः ।
पुत्रमेकं ददौ तस्मै स्वात्मना सदृशं हरिः । ते भार्य्ये गर्भमाधत्तां तेजसा शङ्करस्य ह ।
विप्रभार्य्या महाराज वैष्णवं तेज आदधत् । महिष्यौ ते महावीर्य्यौ पुत्रौ शङ्करनिर्म्मितौ ।
असूयतां महीपाल क्रमेणैव नृपस्य ह । स तयोश्च महाराज नामकर्म्मादिकाः क्रियाः । १५४००

चकार विधिवत् सर्व्वं विप्रेभ्यो दत्त्वा बहुधनं। स च विप्रो विनीतात्मा पुत्रमेकं हि लब्धवान्।
साक्षादिव जगन्नाथं स्थितं पुत्रात्मना नृप। जातकर्म्मादिकं सर्व्वं ब्राह्मणः स चकार ह।
तौ कुमारावयं चैव त्रयः सुतपुत्रोऽभवन्। वेदानधीत्य ते सर्व्वान् श्रुत्वा चान्वीक्षिकीं तथा।
धनुर्व्वेदे तथाऽस्त्रे च निपुणास्तेऽभवंस्तदा। हंसो ज्येष्ठो नृपसुतो डिम्भकोऽनन्तरोऽभवत्।
स च विप्रसुतो राजन् जनार्द्दन इति स्मृतः। अन्योन्यमित्रतां याताः सर्व्वे चैव कुमारकाः। ११४०५
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने पञ्चनवत्यधिकद्विशततोऽध्यायः॥ १९५॥
॥ वैशम्पायन उवाच ॥ हंसश्च डिम्भकश्चैव तपस्यर्त्थं महामते। मनश्चक्रतुरात्मानौ शङ्करस्य नृपोत्तम।
गत्वा तु हिमवत्पार्श्वं तपश्चक्रतुरञ्जसा। उद्दिश्य शङ्करं शर्व्वं नीलग्रीवमुमापतिं।
वीर्य्यास्त्रे चैव नो स्यातामित्याधाय तु मानसे। एकाग्रौ प्रयतौ भूत्वा वाय्वम्बुप्राशिनौ नृप।
नमस्ते देवदेवेति शङ्करेति दिवानिशं। हर शर्व्व शिवानन्द नीलग्रीव उमापते।
वृषध्वज विरूपाक्ष त्र्यम्बक जगतांपते। भक्तिप्रिय गिरीशेश वामदेव शिवाच्युत। ११४१०
सद्योजात महादेव देवदेव गुहाश्रय। भूतभावन भूतेश प्रणवात्मन् सदाशिव।
इत्यादिनामभिर्नित्यं स्तुवन्तौ शङ्करं भवं। हृदि कृत्वा विरूपाक्षं तपस्तेपतुरञ्जसा।
निर्म्ममौ निरहङ्कारौ मौनव्रतसमाश्रितौ। वर्षाणि च तदा राजन् पञ्च चक्रतुरोजसा।
ततः प्रीतो ऽभवच्छर्व्वस्ताभ्यां संयमनेन च। स ददौ दर्शनं नैजं व्याघ्रचर्म्माम्बरो हरः।
त्रियक्षः शङ्करः शर्व्वः शूलपाणिरुमापतिः। अग्रतः संस्थितं शर्व्वं चन्द्रार्द्धकृतशेखरं। ११४१५
तौ दृष्ट्वा प्रीतमनसौ नमश्चक्रतुरञ्जसा।
॥ श्रीभगवानुवाच ॥ वरं वरय भद्रं वो यथेच्छा वां तथाऽस्तु वो। तावूचतुस्तदा राजन् प्रीतश्चेद् भगवन् यदि।
देवासुरचमूमुख्यैरजेयौ गन्धर्व्वदानवैः। आवामजय्यौ सर्व्वात्मन्नेष नो प्रथमो वरः।
द्वितीयो नौ विरूपाक्ष रौद्राख्याणाश्च संग्रहः। माहेश्वरं तथा रौद्रमस्त्रं ब्रह्मशिरो महत्।
अभेद्यं कवचं दिव्यमच्छेद्यञ्चापि कार्म्मुकं। परशुश्च तथा शर्व्व सदा रक्षार्थमेव च। ११४२०
सहायौ दौ महादेव भूतौ युद्धे हि गच्छतां। एवमस्त्विति देवेश आह शङ्करिटो हरः।
कुण्डोदरं विरूपाक्षं सर्व्वप्राणिहिते रतं। युवामथ च भूतेशौ सहायौ सततं रणे।
सङ्ग्रामं गच्छतां घोरमेतयोः शूलपाणिनोः। इत्युक्त्वा भगवान् शर्व्वस्तत्रैवान्तरधीयत।
तनस्तौ वीर्य्यसम्पन्नौ हंसो डिम्भक एव च। कृतास्त्रौ शस्त्रसम्पन्नौ चापिनौ वीर्य्यवत्तरौ।
आमुक्तकवचौ वीरावजय्यौ देवदानवैः। अत्यन्तभक्तौ देवेशे शङ्करे नीललोहिते। ११४२५
नित्योत्सवकरौ देवे भस्मोद्धूलनशोभिनौ। कृतत्रिपुण्ड्रकौ नित्यं जटायुक्तशिरोधरौ।
रुद्राक्षार्पितसर्व्वाङ्गौ व्याघ्रचर्म्मकृताम्बरौ। नमः शिवाय शान्ताय महादेवाय धीमते।
इत्यादिभिर्महादेवं स्तुवन्तौ नामभिः शिवं। साक्षादिव महादेवौ रेजतुर्लिङ्गधारिणौ।
ततः स्वभवनं गत्वा पितुः पादाववन्दतां। पितुश्च सख्युर्व्विप्रस्य मातुश्च चरणौ तदा।

जनार्द्दनोऽपि धर्म्मात्मा कालेन महता नृप । विद्यापारं महाबुद्धिर्योगेनाथाप्युपेयिवान् ।
स च विष्णुं हृषीकेशं पीतकौशेयवाससं । ब्रह्मतत्त्वपरो नित्यमुपास्ते विजितेन्द्रियः ।
हंसश्च डिम्भकश्चैव कृतदारौ बभूवतुः । जनार्द्दनोऽपि धर्म्मात्मा कृतदारो बभूव ह ।
सर्व्वे ते यज्ञनिरताः पञ्चयज्ञपरास्तथा । स्वदारनिरताः सर्व्वे गुरुशुश्रूषणे रताः ।
धर्म्म एव परं श्रेय इति ते मेनिरे नृप ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने षण्णवत्यधिकद्विशततोऽध्यायः ॥ २९६ ॥

॥ वैशम्पायन उवाच ॥ ततः कदाचित्तौ वीरौ मृगयामाटतुः किल । जनार्द्दनेन सहितौ रथैर्न्नागैर्गजैरपि ।
वनं गत्वा तु तौ वीरौ सिंहव्याघ्रांश्च जघ्नतुः । शितैर्बाणैर्म्महाराज वराहानथ सर्व्वशः ।
व्यालानन्यान्मृगान् हिंस्रान् श्वभिश्च सहितौ नृप । एष आयाति विपुलो वराहो दीर्घलोचनः ।
एनं बाणेन सञ्छिन्धि याति चायं मृगाधिपः । अयमन्योऽत्र महिषः शृङ्गप्रोतसरीसृपः ।
एते खलु मृगाः सार्द्धं श्वाभिर्धावन्ति सर्व्वशः । एतद्भ्रमति सर्व्वत्र सितं शशकुलं महत् ।
शार्दूलं पिबत सार्द्धून हन्तव्यमिदं शुभं । ग्रहीतव्यमिदं सर्व्वैर्निरुध्य श्वगणैरिह ।
इत्यादिशब्दः सुमहान् मृगयां कुर्व्वतां नृप । क्षत्रियाणां नृपश्रेष्ठ व्याधानां चैव धावतां ।
हत्वा मृगान् सुबहुशो व्याघ्रान् सिंहान्नृपोत्तमौ । श्रमश्च जग्मतुर्वीरौ मध्यं याते दिवाकरे ।
अलं हि मृगयाऽस्माकं श्रमः समुपजायते । इत्यूचतुर्म्महाराज पुष्करं जग्मतुः सरः ।
सरःसमीपमागम्य मुनिसिद्धनिषेवितं । वीजमारुतमानूपं श्रमात्तत्र सुखं स्थितौ ।
ततो जनाः सरः सर्व्वे विगाह्य श्रमकर्षिताः । बिसान् प्रवालान् पद्मानां भक्षयामासुरार्त्तवत् ।
जनार्द्दनेन सहितौ हंसो डिम्भक एव च । सरः कचित् समाश्रित्य श्रमं संत्यज्य तिष्ठतः ।
विश्रम्य सरसस्तीरे तदासाते सुखं नृपौ । शृण्वतां परं ब्रह्म मुनिमुख्यैः समीरितं ।
माध्यन्दिनं तदा सर्व्वैः सवनं सुस्वरं नृपौ । ततः प्रीतौ नृपौ भूत्वा श्रुत्वा वेदध्वनींस्तदा ।
ऐच्छतां तौ तदा द्रष्टुं यज्ञं मुनिकृतं तदा । स्थापयित्वा ततः सेनां सर्व्वां मृगसमन्वितां ।
आदाय च महावीर्य्याः शरान् कतिचिदेव च । जनार्द्दनस्तदा वीरौ हंसो डिम्भक एव च ।
पदातिनो महाराज जग्मुश्चैवाश्रमं किल । महर्षेः कश्यपस्याथ सत्रं वैष्णवसंज्ञितं ।
यजतो मुनिभिः सार्द्धं जपहोमपरायणैः ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने सप्तनवत्यधिकद्विशततोऽध्यायः ॥ २९७ ॥

॥ वैशम्पायन उवाच ॥ जनार्द्दनश्च धर्म्मात्मा हंसो डिम्भक एव च । सदः प्रविश्य सत्रस्य नमश्चक्रुर्मुनीश्वरान् ।
तानागतान् महात्मानो मुनयः शिष्यसंयुताः । अर्घ्यपाद्यासनादीनि चक्रुः पूजाञ्च यत्नतः ।
तौ नृपौ स च विप्रेन्द्रः सपर्य्यां प्रतिगृह्य च । प्रीतात्मानो महात्मान आसते सुसुखं नृप ।
ततो हंसो बभाषे तान्मुनीन् संयतवाङ्नृप । पिता हि नौ मुनिश्रेष्ठा यष्टुमैच्छत् ससाधनं ।
गन्तव्यं तत्र युष्माभिः सत्रान्ते मुनिसत्तमाः । राजसूयेन यज्ञेन कृत्वा दिग्विजयं वयं ।

याजयिष्यामहे विप्राः पितरं धार्म्मिकं नृपं । आयान्तु तत्र विप्रेन्द्राः सशिष्याः सपरिच्छदाः ।
वयमद्यैव सहिता दिशो जेष्यामहे ध्रुवं । शक्तावहमयमेवैतत् कर्त्तुं सैनिकसञ्चयैः ।
आवयोः पुरतः स्थातुं न शक्ता देवदानवाः । कैलासनिलयाद्देवाद्वरं लब्धा स्म यत्नतः । ११४६०
अजेय्या शत्रुसंघानामस्त्राणि विविधानि च । इत्युक्त्वा विरराभैव हंसो मदबलान्वितः ।
॥ मुनय ऊचुः ॥ यदि स्यात्तत्र गच्छामो वयं शिष्यैर्नृपोत्तम । आस्महे चान्यथा राजन्नित्यूचुः किल तापसाः ।
॥ वैशम्पायन उवाच ॥ ततो देशान्महाराज गन्तुं निश्चितमानसौ । पुष्करस्योत्तरं तीरं दुर्व्वासा यत्र तिष्ठति ।
यतयो नियता भूत्वा सम्यग्ब्रह्मनिषेविणः । ब्रह्मसूत्रपदे सक्तास्तदर्थालोकतत्पराः ।
निर्म्ममा निरहङ्काराः कौपीनाच्छादनव्रताः । तमात्मानं जगद्योनिं विष्णुं विश्वेश्वरं विभुं । ११४६५
ब्रह्मरूपं शुभं शान्तमक्षरं सर्व्वतोमुखं । वेदान्तमूर्त्तिमव्यक्तमनन्तं शाश्वतं शिवं ।
नित्ययुक्तं विरूपाक्षं भूताधारमनामयं । ध्यायन्तः सर्व्वदा देवं मनसा सर्व्वतोमुखं ।
दुर्व्वाससा सहोपास्यं वेदान्तैकरसं प्रभुं । तर्कनिश्चिततत्त्वार्थाः सुविनिर्म्मलचेतसः ।
हंसाः परमहंसाश्च शिष्या दुर्व्वाससः प्रभो । तत्र गत्वा महात्मानौ तौ दृष्ट्वा तूर्द्ध्वरेतसं ।
दुर्व्वाससं महाबुद्धिं विचिन्वानं परं पदं । क्रुद्धो यदि स दुर्व्वासा दग्धुं लोकानिमान् क्षमः । ११४७०
देवा अपि च यं द्रष्टुं क्रुद्धं वै न क्षमाः सदा । रोषमूर्त्तिः सदा यस्तु रुद्रात्मा विश्वरूपधृक् ।
रक्तकौपीनवसनो हंसः परम एव च । दृष्ट्वैनञ्च तयोरेवं बुद्धिरासीन्महामते ।
को नामासौ महाभूतः काषायो वर्णवित्तमः । कस्त्वायमाश्रमो नाम विहाय च गृहाश्रमं ।
गृहस्थ एव धर्म्मात्मा गृहस्थो धर्म्मवित्तमः । गृहस्थो धर्म्मरूपस्तु गृहस्थो वर्ण एव च ।
गृहस्थस्य सदा माता प्राणिनां जीवनं सदा । तं विनाऽन्येन रूपेण वर्त्तते यो हि मूर्खवत् । ११४७५
उन्मत्तोऽयं विरूपोऽयमथ वा मूर्ख एव च । ध्यायन्निव सदा चायमास्ते वञ्चयिताऽपि वा ।
किन्नेते प्राकृतात्मानो ध्यायन्त इव किञ्चन । वयमेतान् दुरारोहानाश्रमान्नरकप्रकान् ।
स्थापयिष्यामहे सर्व्वान्मन्दबुद्धीनिमान् गृहे । बलादेव द्विजानेतान्मूढविज्ञानतत्परान् ।
असद्गृहगृहीतांश्च बालिशान्दुर्म्मतीनिमान् । एषां शास्ता च को मूढो न विप्रो वयमत्र ह ।
धर्म्मवर्त्मनि संस्थाप्य पुनर्यास्याव निर्वृतौ । इति सञ्चिन्त्य तौ वीरौ विप्रेण सहितौ नृप । ११४८०
जनार्द्दनेन राजानौ मोहाद्भाग्यवशान्नृप । समीपं तस्य राजेन्द्र यतेर्जग्मतुरक्षमौ ।
गत्वा च प्रोचतुरुभौ दुर्व्वाससमतीन्द्रियं । यतींश्च नियतान् क्रुद्धौ राजानौ राजसत्तम ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने अष्टनवत्यधिकद्विशततोऽध्यायः ॥ १९८ ॥

॥ हंसडिम्भकावूचतुः ॥ ज्ञानलेशाद्विहीनात्मन् किन्ते व्यवसितं द्विज । कस्त्वायमाश्रमो विप्र भवता यः समाश्रितः ।
गृहमेधं परित्यज्य किन्त्वया साधितं पदं । दम्भ एव भवान् व्यक्तं शोके नास्त्यत्र कारणं ।
लोकानिमान् सदा मूढ नाशयिष्यसि निर्वृतः । एतान् सर्व्वान् विनेताऽसि नरके पातयिष्यसि । ११४८५
स्वयं नष्टः परान्मूर्ख नाशयिष्यसि यत्नतः । अहो शास्ता कथं नास्ति तव मन्दमतेर्द्विज ।

सर्व्वथा त्वद्विनेता च पापं नास्त्यत्र संशयः। त्यक्त्वेममाश्रमं विप्र गृही भव यतात्मवान्।
पञ्चयज्ञान् सदा विप्र कुरु यत्नपरो भव। ततः स्वर्गं परं गत्वा स्वर्गे हि सुमहत्सुखं।
एष श्रेयः परो विप्र जीविते चेत् स्पृहा तव। इत्युक्तवन्तौ धर्म्मात्मा श्रुत्वा विप्रो जनार्द्दनः।
उवाच च यतिं दृष्ट्वा प्रणम्याथो सुभीतवत्। मा भूतामीदृशं वाक्यं राजानौ मन्दचेतसौ।
अश्राव्यमीदृशं घोरं लोकयोरुभयोरपि। को वक्तुमीशो मन्दात्मा यदि जीवेत् सबान्धवः।
सर्व्वथा काल एवायं युवयोर्म्मन्दचेतसोः। समाप्त आयुषः शेषो ब्रह्मदण्डहतौ युवां।
एते हि यतयः शुद्धा ज्ञानदीपितचेतसः। ज्ञानाग्निदग्धकर्म्माणः प्राणान् प्राणेषु जुह्वति।
एते वामीदृशं वाक्यं कः समर्थो ह्यनुब्रुवन्। सर्व्वथा ज्ञातमस्माभिः समाप्तमिह जीवितं।
चत्वार आश्रमाः पूर्व्वमृषिभिर्व्विहिता नृपौ। ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः।
तेषामग्र्यस्तुर्योऽयमाश्रमो भिक्षुकः स्मृतः। आस्ते तस्मिन्महाबुद्धिः स हि पुण्यतमः स्मृतः।
नोपासिता भवद्भ्यां च वृद्धाः सम्यग्विनीतवत्। ज्ञानं नाप्तं ततस्तेभ्यस्तथा चेदं वदेत कः।
अश्राव्यमीदृशं घोरं मया प्राणभृता नृप। किं करिष्यामि मन्दात्मन् मित्रत्वाद्ब्रुवतो नृप।
ज्ञानं यदाप्तं भवता गुरुभ्यस्तदत्र दुःखाय हि केवलं नृप। ज्ञानं हि धर्म्मप्रभवं यथेष्टं बलाद्धि पापस्य विनाशरूपं।
युवां विहाय यास्ये वा पतेयं वा शिलातले। पिबे वाऽपि विषं घोरं पतेयं वा महोदधौ।
आत्मानं वाऽत्र संत्यक्ष्ये पश्यतां शृण्वतां पुनः। इत्युक्त्वा विललापैवं मा भूतामिति तौ वदन्।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने नवनवत्यधिकद्विशततोऽध्यायः॥ २० ॥

॥ वैशम्पायन उवाच ॥ ततः क्रुद्धोऽथ दुर्व्वासा धक्ष्यन्निव तयोरसून्। एकेनाक्ष्णाऽथ दुर्व्वासा रौद्रेणाभियुजा सदा।
पश्यंस्तौ च दुरात्मानौ रोषव्याकुलितेन्द्रियः। कुर्व्वन्निव तदा लोकान् भस्मभूतानिमान्नृप।
ब्राह्मणं चक्षुषा पश्यन् सौम्येनान्येन केवलं। उवाच वचनं राजन् ध्वंसत ध्वंसतेति च।
इतो गच्छत राजानौ किं विलम्बत माचिरं। न वां वचनसंभूतं रोषं धारयितुं क्षमे।
अन्यथा वो महीपालान् सर्व्वान्दग्धुमहं क्षमः। किमतः साहसं वक्तुं कश्च शक्नोति मत्पुरः।
दर्पं वो लोकविख्यातः शङ्खचक्रगदाधरः। व्यपनेष्यति मन्दौ किं वा वक्ष्यामि साम्प्रतं।
तत उत्थाय धर्म्मात्मा गन्तुमैच्छद्यतीश्वरः। तस्य वाक्यं समादाय हंसो नृपवरोत्तमः।
कौपीनं चिच्छिदे क्रूरः कृतान्त इव सत्तम। यतयोऽन्येऽपलायन्त दिशो दश विचेतसः।
कष्टं हेति वदन् विप्रो मित्रभावाज्जनार्द्दनः। न्यवारयद्यथाशक्ति किमिदं साहसन्त्विति।
दुर्व्वासा सत्यधर्म्मस्तु हन्तुमीशोऽपि तं ततः। मन्दं मन्दमुवाचेदं हंसं डिम्भकमेव च।
शापेनाहं समर्थोऽपि हन्तुं राजकुलाधमौ। तथाऽपि न करोम्यस्मं यतयो ह्यत्र ते वयं।
यो हि देवो जगन्नाथः केशवो यादवेश्वरः। शङ्खचक्रगदापाणिर्गर्व्वं ते व्यपनेष्यति।
लोके तस्मिन् यदुश्रेष्ठे रक्षत्येव जगत्पतौ। युवयोः सर्व्वथा जीवः सुजीव इति मे मतिः।
जरासन्धोऽपि वां बन्धुः स च वक्तुं न चेच्छति। ईदृशं लोकविद्विष्टं स हि धर्म्मपथे सदा।

एतावता स वां बन्धुर्न हि भूयो भविष्यति । विद्वेषोऽप्यस्तु वां तस्य मागधस्य महीपतेः ।
श्रुत्वेदं घोररूपन्तु स हि बन्धुः सहेत चेत् । धर्म्मनाशो भवेत्तस्य नात्र कार्य्या विचारणा ।
इत्युक्त्वा गच्छ गच्छेति हंसं प्राह पुनः पुनः । जनार्द्दनमुवाचेदं दुर्व्वासा यतिसत्तमः ।
स्वस्त्यस्तु तव विप्रेन्द्र भक्तिरस्तु जनार्द्दने । सङ्गतिस्तव तस्यास्तु शङ्खचक्रगदाभृतः ।
अद्य श्वो वा परश्वो वा साधुरेव सदा भवान् । न हि साधोर्विनाशोऽस्ति लोकयोरुभयोरपि । १११२०
गच्छ सर्व्वं पितुर्ब्रूहि ज्ञात्वा वृत्तं यथाखिलं ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने त्रिशततमोऽध्यायः ॥ ३०० ॥
॥ वैशम्पायन उवाच ॥ ततस्तौ हंसडिम्भकौ क्रुद्धौ कालेन चोदितौ । शिक्यं कमण्डलुञ्चैव द्विदलं दारुनेव च ।
दण्डान् पात्रविशेषांश्च छित्त्वा भित्त्वा च सर्व्वशः । तस्मिन् देशे महाराज व्याधेर्म्मांसान्यदीदहन् ।
भर्त्सयित्वा च तद्देशात् स्वपुरीं तौ प्रजग्मतुः । जनार्द्दनस्य धर्म्मात्मा स्नेहादनययौ तयोः ।
नष्टाविमाविति तदा स मेने दुःखितः परं । गतेषु तेषु सर्व्वेषु दुर्व्वासा यतिसत्तमः । १११२५
पलायनपरान् सर्व्वानिदमाह यतीश्वरान् । इतो देशाद्विनिर्गत्य पुष्करात् पुण्यसंयुतात् ।
मन्दं मन्दं समाश्वस्य विश्रम्य च ततस्ततः । प्रविश्य द्वारकां देवं शङ्खचक्रगदाधरं ।
दृष्ट्वा च तस्मै प्रभवे वक्ष्यामो यतिसत्तमाः । स हि रक्षन् जगदिदं धर्म्मवर्त्मनि संस्थितः ।
आद्यो लोकगुरुर्विष्णुर्यतात्मा तत्त्ववित्प्रियः । उद्धृत्य कण्टकान् सर्व्वान् शशास पृथिवीमिमां ।
स च पापान्महाघोरान् पापकर्म्मकृतान् प्रभुः । रक्षेन्नः सकलान् सर्व्वान् ज्ञानेषु नियतात्मनः । १११३०
इदमद्य त्वमं विप्रा यानमद्य विधीयतां । साहसं यत् कृतं ताभ्यां पात्रभेदादि सत्तमाः ।
एतत् सर्व्वमशेषेण दर्शयामो जनार्द्दनं । तथेति ते प्रतिज्ञाय यतयो ज्ञानचक्षुषः ।
छिन्नांस्ताभ्यां समादाय शिक्यं दारुमयं तथा । द्विदलं कर्पटञ्चैव कौपीनमथ वल्कलं ।
कमण्डलुं तथा राजन्नर्द्धशीतकपालकं । एतानन्यान् समादाय द्रष्टुं केशवमाययुः ।
पञ्च चैव सहस्राणि पुरस्कृत्य महामुनिं । दुर्व्वाससं तपोयोनिमीश्वरस्यात्मसम्भवं । १११३५
अहोरात्रेण ते सर्व्वे द्वारकां कृष्णपालितां । ययुर्द्दान्ता महात्मानो लोमशाः केशवर्ज्जिताः ।
प्रातः प्रविश्य राजेन्द्र वापिकायां यतीश्वराः । स्नात्वापस्पृश्य ते सर्व्वे यत्नेन महता तदा ।
द्रष्टुमभ्युद्यता विष्णुं कण्टकोद्धृतितत्परं । एकरूपं समास्थाय सुधर्म्मायामवस्थितं ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने एकाधिकत्रिशततमोऽध्यायः ॥ ३०१ ॥
॥ वैशम्पायन उवाच ॥ अथ सर्व्वेश्वरो विष्णुः पद्मकिञ्जल्कलोचनः । श्यामः पीताम्बरः श्रीमान् प्रलम्बाम्बरभूषणः ।
किरीटी श्रीपतिः कृष्णो नीलकुञ्चितमूर्द्धजः । अव्यक्तः शाश्वतो देवः सकलो निष्कलः शिवः । १११४०
क्रीडाविहारोपगतः कदाचिदभवद्धरिः । कुमारैरपरैः सार्द्धं सात्यकिप्रमुखैर्नृप ।
गोलक्रीडां सुधर्म्माया मध्ये यादवसत्तमः । चकार प्रियकृष्णोऽपि युयुधानेन केशवः ।
ममायं प्रथमो गोलस्त्वं पश्चाद्भविष्यति । इति ब्रुवंस्तदा विष्णुः सात्यकिं सलेवणः ।

पार्श्वस्था यादवास्तस्य वसुदेवपुरोगमाः । उद्धवप्रमुखा राजन्नासेदुः कश्चिदत्र वै ।
अन्यव्यापाररहितो भूतात्मा भूतभावनः । विजहार यथा रामः सुग्रीवेण पुरा नृप । ११५४५
मध्यन्दिने महाविष्णुः शैनेयेन महाच्युतः । विक्रीड्य सुचिरं कृष्ण उपारंसीत् स यादवः ।
द्वाःस्थेन वारिताः पूर्व्वं द्वार्य्येव च समास्थिताः । इदमन्तरमित्येवं विविशुस्तां सभां नृप ।
यतयो दीर्घतपसः पुरस्कृत्य तपोधनं । दुर्व्वाससं सुमनसो ददृशुर्यादवेश्वरं ।
गोलक्रीडासमायुक्तं करसंस्थितगोलकं । पद्मपत्रविशालाक्षं विष्णुं तं सात्यकिं हरिं ।
एकेनात्मन्। छादयन्तं परेणान्येन गोलकं । यतयस्तु महाराज प्रत्यदृश्यन्त तत्पुरः । ११५५०
वृष्णयः पुण्डरीकाक्षः सात्यकिर्ब्बलभद्रकः । वसुदेवस्तथाऽक्रूर उग्रसेनस्तथा नृपः ।
अन्ये च यादवाः सर्व्वे संभ्रमं प्रतिपेदिरे । इदं किमिदमित्येवं व्यासक्तमनसोऽभवन् ।
पृष्ठतोऽप्यनुगच्छन्तं दिधक्षन्तं जगत्त्रयं । अर्द्धकौपीनवसनं स्मरन्तं कमपि द्विजं ।
अन्तस्तापसमायुक्तं छिन्नदण्डधरं यतिं । अन्तर्ज्वलन्तं रोषेण हंसामादितकल्मषं ।
नेत्रोत्थितमहावह्निं प्रेक्षन्तं यादवेश्वरं । दुर्व्वाससं ते ददृशुर्भीता यादवसत्तमाः । ११५५५
किं करिष्यत्यसौ क्रुद्धः किं वा वक्ष्यति नः प्रभुः । इति प्राञ्जलयः सर्व्वे यादवाः प्रतिपेदिरे ।
इदमासनमित्येवं किञ्चिदूचुश्च वृष्णयः । ततः कृष्णो हृषीकेशः किञ्चिदुत्थाय तत्पुरः ।
इदमासनमित्येवं स्थीयतामिह निर्वृतः । अहमत्र स्थितो विप्र किङ्करोऽस्मीति चाब्रवीत् ।
ततः किञ्चिदिवासीत आसने यतिविग्रहः । आसने संस्थिते तस्मिन् यतयो वीतमत्सराः ।
आसनानि यथायोगं भेजिरे निर्वृताः किल । अर्घ्यादिसमुदाचारं चक्रे कृष्णः किरीटभृत् । ११५
आह भूयो हृषीकेशो यतिं दुर्व्वाससं प्रभुं । किमर्थं ब्रूहि विप्रेन्द्र अस्मिन् प्रत्यागमो हि वः ।
दृष्टं वाऽप्यथ वा किञ्चित् कारणं वोऽस्ति वा महत् । संन्यासिनो द्विजश्रेष्ठा यूयं विगतकल्मषाः ।
निस्पृहाश्च सदा यूयमस्मत्तो द्विजपुङ्गवाः । प्रार्थ्यं नाम न चैवास्ति स्पृहा नैवास्ति वो यतः ।
स्पृहाप्रेरितकर्म्माणः क्षत्त्रियान् यान्ति सुव्रताः । निरूप्यमाणमस्माभिर्विप्र किञ्चिन्न दृश्यते ।
न जाने कारणं ब्रह्मन् युष्मदागमनं प्रति । एतावता चानुमेयं किञ्चित् कारणमस्ति वै । ११५६५
तद्ब्रूहि यदि विद्येत त्वत्तो ज्ञास्यामहे वयं । इत्युक्तवति देवेशे चक्रपाणौ जनार्द्दने ।
तस्यापि राजन् विप्रस्य भूयः कोपो महानभूत् । तस्मादभ्यधिकः पूर्व्वात् कोपः कोपायते महान् ।
दिधक्षन्निव लोकांस्त्रीन् भक्षयन्निव पश्यतः । रोषरक्तेक्षणः क्रुद्धो हसन्निव दहन्निव ।
उवाच वचनं विष्णुं दुर्व्वासाः क्रोधमूर्च्छितः । न जाने इति कस्मात्त्वं ब्रूषे नो यादवेश्वर ।
जानामि त्वां महादेवं उद्वयन्निव भाषसे । पुरातना वयं विष्णो पूर्व्ववृत्तान्तवेदिनः । ११५७०
तथाहि देवदेवोऽसि मायामानुषदेहवान् । निगूहसे प्रभुरतः कंसारे जगतीपते ।
सोऽसि ब्रह्मविदां मूर्त्तिस्तदेतत् परमं पदं । यदभाव्यं पुरा ब्रह्म यत्र ज्ञाता वयं पुरा ।
यत्तो विश्वमिदं भूतं तदेतत् परमं पदं । यत्र स्थूलं विजानन्ति पुरातत्त्वेन चेतसा ।

पुराविदोऽय विश्वेश तदेतत् परमं वपुः । कर्म्मणा प्राप्यते यत्तु यत् ख्यात्वा निर्वृता वयं ।
प्रत्यक्षतोऽपि यद्रूपं नैव जानन्ति मानुषाः । न हि मूढधियो देव न वयं तादृशा हरे । ११५७५
न जाने इति यद्रूपे किमतः साहसं वचः । ये हि मूलं विजानन्ति तेषान्तु प्रविचेतनं ।
कुर्व्वतः किं फलं देव तव केशिनिषूदन । वेदान्ते प्रथितं तेजस्तव चेदं विचार्य्यते ।
ये च विज्ञानतृप्तास्तु योगिनो वीतकल्मषाः । पश्यन्ति हृत्सरोजे हि तदेवेदं वपुः प्रभो ।
वेदैर्यच्छ्रूयते तेजो ब्रह्मेति प्रतिपाद्य वै । तदेवेदं विजानेऽहं रूपमैश्वरमेव च ।
वैष्णवं परमं तेज इति वेदेषु पठ्यते । अवगच्छाम्यहं विष्णो तदेवेदं वपुस्तव । ११५८०
य ओमित्युच्यते शब्दो यस्य वागिति गीयते । स एवासि प्रभो विष्णो न जाने इति मा वद ।
परोक्षे यदि किञ्चित् स्या तव वक्तुं प्रयुज्यते । न जाने इति गोविन्द मा वादीः साहसं हरे ।
विश्वं यदा प्रादुरासीद्यस्मिन् लीनं लये सति । इदं तदैश्वरं तेजस्त्ववगच्छामि केशव ।
कर्त्ता त्वं भूतभव्येश प्रतिभासि सदा हृदि । यद्यद्रूपं स्मरे नित्यं तत्तदेवासि मे हृदि ।
वायुरेव यदा विष्णुरिति मे धीयते मतिः । तदा तद्रूप एवासि हृन्मध्ये संस्थितो विभो । ११५८५
आकाशो विष्णुरित्येव कदाचिद्धीयते मतिः । तदा तद्रूप एवासि हृन्मध्ये संस्थितो विभो ।
पृथिवी विष्णुरित्येव कदाचिद्धीयते मतिः । तदा पार्थिवरूपस्त्वं प्रतिभासि सदा मम ।
रसोऽयं देव इत्येव कदाचिच्चिन्त्यते मया । तदा रसात्मना विष्णो हृन्मध्ये संस्थितो विभो ।
यदा त्वं तेज इत्येव स्मर्त्ता स्यां पुरुषोत्तम । तदा तद्रूपसम्पन्नः प्रतिभासि सदा हृदि ।
चन्द्रमा हरिरित्येव तदा चान्द्रमसं वपुः । निरीक्ष्य चक्षुषा देव ततः प्रीतोऽस्मि केशव । ११५९०
यदा सौरं वपुरिति स्मर्त्ता स्यां जगतीपते । तदा तद्भावनायोगात् सूर्य्य एव विराजसे ।
तस्मात् सर्व्वं त्वमेवासि निश्चिता मतिरीदृशी । अतो न जानेऽहमिति वक्तुं नेशो जनार्द्दन ।
इत्यर्थे संस्थितो विष्णो पीडां नो नैव चिन्त्यसे । अत्यन्तदुःखिता विष्णो वयं त्वामनुसंस्थिताः ।
ईदृशीयमवस्था नो नेतां स्मरसि केशव । तत्पुनर्भागधेयं नो नष्टमित्येव चिन्तये ।
मन्दभाग्या वयं विष्णो यतो नो न स्मरेः प्रभो । कौचित् क्षत्रियदायादौ गिरीशवरगर्व्वितौ । ११५९५
नाम्ना च हंसडिम्भकौ बाधेते नो जनार्द्दन । गार्हस्थ्यं हि सदा श्रेयो वदन्ताविति केशव ।
इतस्ततश्च धावन्तौ वदन्तौ बहुकिल्बिषं । अयुक्तं बहुभाषन्तौ धर्षयन्तौ च नः सदा ।
इदमन्यत् कृतं देव असह्यं पापमुच्यते । पश्येदं बहुधा देव भिन्नं भिन्नं सहस्रशः ।
शिक्यञ्च दारवं पात्रं द्विदलान् वेणुकान् बहून् । इदमप्यपरं पश्य तयोः साहसचेष्टितं ।
कौपीनं बहुधा छिन्नं तदस्माकं सहस्रुनं । कृतं कपालमात्रेण कमण्डलु जगत्प्रभो । ११६००
त्वन्तु नो रक्ष्यसे नित्यं चात्वं वै व्रतमास्थितः । चित्रं चित्रमिदं देव रक्षियसि सदा निशं ।
किं करिष्यामि मन्दात्मा मन्दभाग्या वयं विभो । किन्नः शरणमद्यैव तद्ब्रूहि जगतां पते ।

जीवन्तौ तौ यदि स्यातां नष्टा लोका इमे त्रयः । न विप्रा न च राजानो न वैश्या न च पादजाः ।
अत्यन्तबलिनौ मत्तौ तीक्ष्णदण्डधरौ नृप । न तयोः पुरतः स्थातुं शक्ता देवाः सवासवाः ।
न च भीष्मो न वा राजा वाह्लीको भीमविक्रमः । यो हि वीरो जरासन्धः क्षत्रियाणां भयङ्करः । १५८०५
नैव च प्रायशः स्थातुं गिरीशवरदर्पिणोः । तयोः कृष्ण हरे शक्तो नित्यमप्रतिसङ्गिनोः ।
तस्मात्त्वं जहि तौ वीरौ रक्ष लोकानिमान् प्रभो । अन्यथा रक्षमोऽप्येवं व्यर्थः शब्दोऽत्र जायते ।
बहुनाऽत्र किमुक्तेन रक्ष रक्ष जगत्त्रयं । इत्युक्त्वा विररामैव दुर्व्वासा क्रोधमूर्च्छितः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने द्व्यधिकद्विशततोऽध्यायः ॥ २०२ ॥
॥ वैशम्पायन उवाच ॥ यतेर्व्वचनमाकर्ण्य मन्दमुत्कृत्य केशवः । दुर्व्वाससं समालोक्य बभाषे यादवेश्वरः ।
क्षन्तव्यं भवता सर्व्वं दोष एवं ममैव हि । शृणु वाक्यं ममैतत्तु श्रुत्वा क्षमापरो भव । १५८१०
जेष्यामि तौ रणे विप्र हंसं डिम्भकमेव च । गिरीशो वा वरं दद्यात् शक्रो वा धनदोऽपि वा ।
यमो वा वरुणो वाऽपि ब्रह्मा साक्षाच्चतुर्मुखः । सबलौ सानुजौ हत्वा पुनर्दास्यामि वो रतिं ।
सत्येनैव शपाम्यद्य मा रोषवशगो भव । रक्षां वोऽहं करिष्यामि हत्वा तौ च नृपाधमौ ।
जानामि तौ दुरात्मानौ युष्मद्दोषकरौ हि तौ । श्रुतश्च पूर्व्वमस्माभिस्तीक्ष्णदण्डधराविति ।
अत्यन्तबलिनौ मत्तौ गिरीशवरदर्पितौ । नाल्पप्रयत्नसंसाध्यौ जरासन्धहितैषिणौ । १५८१५
प्राणानपि तथा राजा दास्यत्यत्र न संशयः । जरासन्धो महीपालो विना तेन यतेम हि ।
जये तयोर्विप्रवर्य्य तत्र श्रेयो भवेत्तु नः । यत्र यत्र च तौ गत्वा स्थिताविस्यनुशुश्रुम ।
तत्र तत्र च हन्ताऽहं नात्र कार्य्या विचारणा । गच्छध्वं यतयः स्वैरं निजकार्य्यपरायणाः ।
अचिरेणैव कालेन जेष्यामि रणपुङ्गवौ । ततः प्रीतः प्रसन्नात्मा यादवेश्वरमाह सः ।
स्वस्त्यस्तु भवते कृष्ण जगतां स्वस्तिकुर्व्वते । किन्नु नाम जगन्नाथ दुःसाध्यं तव केशव । १५८२०
त्रिलोकेश त्रिधामाऽसि सर्गसंहारकारक । देवानामपि देवेश सर्व्वत्र समदर्शन ।
विष्णो देव हरे कृष्ण नमस्ते चक्रपाणये । नमः स्वभावशुद्धाय शुद्धाय नियताय च ।
शब्दगोचर देवेश नमस्ते भक्तवत्सल । अज्ञानादथ वा ज्ञानाद्यन्मयोक्तं क्षमस्व तत् ।
त्वमेवाहं जगन्नाथ नावयोरन्तरं पृथक् । अतः क्षमस्व भगवन् क्षमासारा हि साधवः ।
॥ श्रीभगवानुवाच ॥ क्षन्तव्यं भवता विप्र क्षमासारा वयं सदा । संन्यासिनः क्षमासाराः क्षमा तेषां परं बलं । १५८२५
क्षमा मोक्षकरी नित्यं तत्त्वज्ञानमिव द्विज । क्षमा धर्म्मः क्षमा कर्म्म क्षमा सत्यं क्षमा यशः ।
क्षमा स्वर्गस्य सोपानमिति वेदविदो विदुः । तस्मात् सर्व्वप्रयत्नेन क्षमां पालयत स्वकां ।
प्रत्यक्षं ज्ञानसंयुक्ता यूयं सर्व्वे यतीश्वराः । त एते यतयो विप्राः पूजनीया मयाऽद्य वै ।
नाकव्या यतयो विप्रा भिक्षुकाः सर्व्व एव हि । तथेति ते प्रतिज्ञाय भोक्तुमैच्छन् हरेर्गृहे ।
ततः स्वभवनं विष्णुः प्रविश्य हरिरीश्वरः । चतुर्व्विधं तथाहारं कारयित्वा यथाविधि । १५८३०

भोजयामास तान् सर्व्वान् यतीन् यतिवरार्च्चितः । छित्त्वा छित्त्वा च देवेशो दुकूलानि मृदूनि सः ।
ददौ तेभ्यस्तदा विष्णुः सर्व्वेभ्यो जनमेजय । ते च प्रीता यथायोगं यतः पूर्व्वं ततो गताः ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने यतिभोजने त्र्यधिकद्विशततोऽध्यायः ॥ २०३ ॥
॥ वैशम्पायन उवाच ॥ दुर्व्वासास्त्वथ तत्रैव नारदेन महात्मना । चिन्तयन् ब्राह्मणस्तत्त्वं विजहार यथासुखं ।
भगवानपि गोविन्दस्तयोर्व्वासममन्यत । ततस्तौ हंसडिम्भकौ तस्मिन् काले महीपते ।
ब्रह्मदत्तं महीपालं पितरं वीर्य्यशालिनं । प्रोवाचतामिदं वाक्यं समन्तान्जनसंसदि । ११६३५
राजसूयं महायज्ञं पितः कुरु सुयत्नतः । अस्मिन्नामि नृपश्रेष्ठ यतावो यज्ञसिद्धये ।
आवां तेऽद्य महाराज दिशो विजयतत्परौ । यतिष्यावो बलैः सार्द्धं गजैरश्वैरथैरपि ।
सम्भारा यज्ञसिद्ध्यर्थमानेतव्या नृपोत्तम । तथेति स महाबाहो ब्रह्मदत्तोऽब्रवीत्तदा ।
जनार्द्दनस्तु विप्रेन्द्रो दृष्ट्वा साहसतत्परौ । अशक्यमिति मन्वानो वयस्यं हंसमब्रवीत् ।
शृणु हंस वचो मह्यं श्रुत्वा निश्चित्य वीर्य्यवान् । आयुष्मन् साहसं कर्त्तुमुद्यतोऽसि नृपोत्तम । ११६४०
स्थिते भीष्मे जरासन्धे वाह्लीके च नृपोत्तमे । किञ्च वीरेषु सर्व्वेषु यादवेषु नृपोत्तम ।
भीष्मो हि बलवान् वृद्धः सत्यसन्धो जितेन्द्रियः । त्रिसप्तकृत्वः पृथिवीं यो जिगाय भृगूत्तमः ।
तं युद्धे जितवान् भीष्मः सर्व्वक्षत्रस्य पश्यतः । जरासन्धस्य यद्वीर्य्यं तद्भवान् वेत्ति संयुगे ।
वृष्णिवीरास्तु ते सर्व्वे कृतास्त्रा युद्धदुर्म्मदाः । तत्र कृष्णो हृषीकेशो जितशत्रुः कृती सदा ।
जरासन्धेन सहितः सदा युद्धे जितश्रमः । प्रमुखे तस्य न स्थातुं शक्तो जीवन्नृपोत्तम । ११६४५
बलभद्रस्तथा मत्तः क्रुद्धो यदि भवेद्बली । लोकानिमान् समादातुं शक्नोतीति मतिर्म्मम ।
तथा च सात्यकिर्व्वीरः शक्तो जेतुं रणे रिपून् । तथाऽन्ये यादवाः सर्व्वे कृष्णमाश्रित्य गर्व्विताः ।
अस्माभिश्च कृतः पूर्व्वं विरोधो यतिभिः सह । दुर्व्वासा यतिभिः सार्द्धं गतो द्रष्टुं स केशवं ।
इति श्रुतं नृपश्रेष्ठ ब्राह्मणाद्वीक्ष्यमागतात् । तथा मति यथा सिद्ध्येत्तथा चिन्त्यस्व मन्त्रिभिः । ११६५०
ततः पश्चाद्विधास्यामो राजसूयं महाक्रतुं ।
॥ हंस उवाच ॥ को नाम भीष्मो मन्दात्मा वृद्धो हीनबलः सदा । आवयोः पुरतः स्थातुं शक्तः स किल वृद्धकः ।
यादवा इति चित्रं नः शक्ताः स्थातुं रणे द्विज । कश्च कृष्णः पुरः स्थातुं बलदेवश्च सत्तकः ।
शैनेयश्चापि विप्रेन्द्र स्थातुं न इति चिन्तय । जरासन्धस्तु धर्म्मात्मा बन्धुरेव सदा मम ।
गच्छ विप्र यदुश्रेष्ठं ब्रूहि मद्वचनात् त्वरन् । दीयतां करमर्व्वस्वं यज्ञार्थं सुन्दरं बहु ।
लवणानि बहून्याशु गृह्य केशव माचिरं । आगच्छ त्वरितं कृष्ण न ते कार्य्यं विलम्बनं । ११६५५
इति ब्रूहि यदुश्रेष्ठं याहि त्वरितविक्रमः । न ब्रूयाश्चोत्तरं विप्र शपथं त्वां प्रियोऽसि मे ।
मित्रभावादिदं ब्रूहि शपामि त्वां पुनः पुनः । इति सञ्चोदितो विप्रो नोत्तरं प्रत्यभाषत ।
मित्रभावात्तथा राजन् स्नेहाच्च जनमेजय । जनार्द्दनस्तु धर्म्मात्मा नित्यं गन्तुं समुद्यतः ।
श्वः श्वो वा परश्वो वा गच्छामीति यतेत सः । देवं द्रष्टुं जगद्योनिं शङ्खचक्रगदाधरं ।

एक एव च धर्म्मात्मा हयमारुह्य सत्वरं । प्रातरेव जगामाशु द्रष्टुं द्वारवतीं द्विजः ।
हरिं कृष्णं हृषीकेशं मनसा संस्मरन् द्विजः ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने द्वारकायां दूतप्रेषणे चतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥

॥ वैशम्पायन उवाच ॥ ततः प्रायाद्धरिं विष्णुं ब्राह्मणो ब्रह्मवित्तमः । हयेनैकेन राजेन्द्र त्वरितं स ययौ नृप ।
यथा निदाघसमये सूर्य्यांशुपरिपीडितः । पान्थो याति जलं दृष्ट्वा त्वरितं तत् पिपासया ।
धावत्येव तथा विप्रो हरिं द्रष्टुं जनार्द्दनं । गच्छन् स चिन्तयामास चोदयन् हयमुत्तमं ।
हंस एव प्रियो मह्यं कुर्य्यात् प्रियहितं मम । तथा हि प्रेषितस्तेन हरिं पश्याम्यहं प्रभुं ।
अहमेव सदा धन्यो मत्तो ह्यभ्यधिको नहि । यतो द्रक्ष्याम्यहं विष्णुं वसन्तं द्वारकापुरे ।
सा हि मे जननी धन्या हरिं दृष्ट्वा पुनर्गतं । कृतार्थं सर्व्वदा देवी द्रक्ष्यत्येषा मनस्विनी ।
मुखमुन्निद्रहेमाब्जकिञ्जल्कसदृशप्रभं । द्रक्ष्यामि देवदेवस्य चक्रिणः शार्ङ्गधन्वनः ।
वपुर्द्रक्ष्याम्यहं विष्णोर्नीलोत्पलदलच्छवि । शङ्खचक्रगदाशार्ङ्गवनमालादिभूषितं ।
नेत्रे ते देवदेवस्य पद्मकिञ्जल्कसप्रभे । पश्याम्यहमदीनात्मा नष्टदुःखोऽस्मि निर्वृतः ।
अपि द्रक्ष्यति योगात्मा सौम्येनैव स्वचक्षुषा । अपि वा मत्प्रियं ब्रूयात् स्वस्ति चेति च वा वदेत् ।
द्रक्ष्यामि चक्रिणो वक्षं ततस्त्रैलोक्यसन्निभं । पादाब्जं चक्रिणो द्रष्टुं त्वरत्येव च मे मनः ।
वक्षस्थलं सदा विष्णोः स्फुरद्रत्नसमायुतं । पश्यन्निव च गच्छामि स्मरंस्तान्निशमीश्वरं ।
पीतकौशेयवसनं लम्बहारविभूषितं । ईषत्स्मिताधरं विष्णुं पश्यामि च पुनः पुनः ।
स्मरतश्च हरेरूपं रोमहर्षोऽयमीदृशः । गच्छतश्च पुरो भाति शङ्खचक्रगदासिमान् ।
यातीव च पुरो भाति सख्ये देवो जगद्गुरुः । एषोऽयमिति मे वक्तुं जिह्वा प्रस्फुरतीव तं ।
इदं दुःखतरं मन्ये करं देहीति मद्वचः । इदं तत् साहसं मन्ये यद्वचस्तस्य भूपतेः ।
हंसस्य करदो विष्णुस्तदाज्ञापरिचारकः । तस्य सर्व्वं पुरो गत्वा वक्ताऽहं किल निर्द्दयः ।
मूढानामग्रणीरस्मि निर्लज्जश्च तथा वदन् । करं देहि हरे विष्णो हंसस्य यदुपुङ्गव ।
लवणानि बहून्याशु दातव्यानि करात्मना । इति वक्तुं न मे युक्तं पुरतस्तस्य शार्ङ्गिणः ।
तथाऽपि मित्रभावात्तु वक्तव्यं घोरमीदृशं । कष्टो ह्ययं मित्रभावो मनुष्याणां कृतात्मनां ।
अथवा सर्व्वविद्विष्णुः सर्व्वस्य हृदि संस्थितः । जानात्येव सदा भावं प्राणिनां शोभने रतः ।
तथा मति न मे दोषो मित्रभावो यतो ह्ययं । सर्व्वथा रक्ष्यतां विष्णुर्घोरं वक्तुं यतस्त्व मे ।
द्रक्ष्याम्यहं जगन्नाथं नीलकुञ्चितमूर्द्धजं । कम्बुग्रीवाधरं विष्णुं श्रीवत्साङ्कादितोरसं ।
स्फुरत्पद्मसमाबाहुं रत्नच्छायाविराजितं । द्रक्ष्यामि केशवं विष्णुं चक्रिणं यादवेश्वरं ।
अचिन्त्यमित्यं देवं भूतभव्यभवत्प्रभुं । आत्मेच्छया जगद्रक्षं द्रक्ष्यामि जलशायिनं ।
कृतार्थः सर्व्वथा चाहं भवामि विगतज्वरः । अद्य मे सफलं जन्म साक्षात् दृष्टवतो हरिं ।

अद्य मे सफला यज्ञाः साक्षात्कृतवतो हरिं । नेत्रे मे सफले विष्णुं पश्यतश्च जगन्मयं ।
प्रीतिमानस्तु मे विष्णुर्व्विकुर्व्वाणस्य कर्म्मणः । उन्मिषन्नेत्रयुग्मेन द्रक्ष्यामि मधुसूदनं ।
आमूलमथकेशान्तं पश्यामि च पुनः पुनः । पिबामि नेत्रयुग्मेन वपुः कृष्णस्य केवलं । १५६९०
धारयिष्याम्यहं पांशुं तत्पादप्रभवं शिवं । ततः कृतार्थतां यास्ये स्वर्गमार्गो हि तद्रजः ।
मेघगम्भीरनिर्घोषं श्रोष्यामि च हरेः स्वरं । पादाब्जं चक्रिणो विष्णोः पश्यामि च जगत्पतेः ।
पश्यामीव हरेर्व्वक्त्रं पूर्णेन्दुसदृशप्रभं । हरेरिदं जगद्रूपं पश्यामीव च सर्व्वतः ।
प्रसीदतु सदा विष्णुरयुक्तं वच्मि स्तुतः । आलोलकुण्डलयुतं हरिचन्दनचर्च्चितं ।
स्फुरत्केयूररत्नार्च्चिर्व्वाहुद्वयविराजितं । मध्ये द्योतन्महाशङ्खं रश्मिजालविराजितं । १५६९५
प्रोद्यद्भास्करवर्णाभं वक्षोज्ज्वलाविराजितं । प्रोज्ज्वलत्कङ्कणयुतं तप्तजाम्बूनदाङ्गदं ।
पीतकौशेयवसनं विस्तीर्णोरस्कमच्युतं । कदा द्रक्ष्यामि देवेशमिदानीमथ वाऽन्यदा ।
सर्व्वथा कृतकृत्योऽहं यद्वपुर्द्रष्टुमुद्यतः । नमो मह्यं नमो मह्यं यतो द्रष्टुमहं हरिं ।
उद्यतोऽस्मि जगन्नाथं बलभद्रकृतास्पदं । द्रक्ष्याम्यत्राद्यमप्येव विष्णुं जिष्णुं जगद्गुरुं ।
श्रीकौस्तुभाङ्कवरदीप्तिस्फुरितोरुवक्षः पीताम्बरं मकरकुण्डलपङ्कजाक्षं । कृष्णं किरीटवरचक्रगदाब्जहस्तं तेजोमयं मम हरेर्व्वपुरस्तु भूत्यै । १५७००
वेदोदधौ विषदशास्त्रमहाद्रियोगे निर्ज्ञातशब्दमतिमन्दरमथ्यमाने । उद्योतमानममरैरनिशं निषेव्यं नारायणाख्यममृतं प्रपिबामि चाद्य ।
ध्येयं मुमुक्षुभिरमेयमनाद्यनन्तं स्थूलं सुसूक्ष्ममपरमेकमनेकमाद्यं । ज्योतिस्त्रिलोकजननं त्रिदशैकवन्द्यमन्तर्गतो मम सदास्तु सततं हरे येऽच्युताख्यं ।
चिन्तयन्निति विप्रेन्द्रो ययौ द्वारवतीं पुरीं । सभा कृतार्थमात्मानं चोदयन् हयमुत्तमं ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने जनार्द्दनस्य द्वारकागमने पञ्चाधिकत्रिशततोऽध्यायः ॥ ३०५ ॥

॥ वैशम्पायन उवाच ॥ स निवेदितसर्व्वस्वो दास्येन हि जनार्द्दनः । अथ प्रविश्य धर्म्मात्मा सुधर्म्मां वै द्विजोत्तमः ।
अपश्यद्देवदेवेशं सुधर्म्माकृतिमंस्थितं । बलभद्रेण संयुक्तमध्यासितमहासनं । १५७०५
अग्रतः स्थितशैनेयं पार्श्वतः स्थितनारदं । दुर्व्वाससा शुनकयमुप्रसेनपुरस्कृतं ।
गायद्गन्धर्व्वमुख्यैश्च नृत्यदप्सरसां गणैः । सेव्यमानं महाराज सूतमागधवन्दिभिः ।
उद्गीयमानयशसं माधवं मधुसूदनं । उद्गीयमानं विप्रैश्च सामभिः सामगैर्हरिं ।
दृष्ट्वा प्रीतमना विष्णुं प्राञ्जलिः पुलकच्छविः । नाम्ना जनार्द्दनोऽस्मीति ननाम चाग्रे हरेः ।
बलभद्रं ततो देवं ववन्दे शिरसा द्विजः । दूतोऽस्मि देवदेवेश हंसस्य डिम्भकस्य च । १५७१०
इति ब्रुवाणं विप्रेन्द्रमिदमाह स माधवः । आस्वेह विप्रवर्य्य पश्चाद्वृहि प्रयोजनं ।
तथेति चाब्रवीद्विप्रो सहदासनमास्थितः । वाचा सम्पूज्य विप्रेन्द्रमपृच्छत् कुशलं हरिः ।

ब्रह्मदत्तस्य राजेन्द्र हंसस्य डिम्भकस्य च । श्रुतश्चापि तयोर्वीर्य्यं प्रयोजनमतो द्विज ।
अपि वा कुशलं विप्र पितुस्तव जनार्द्दन ।
॥ जनार्द्दन उवाच ॥ कुशलं ब्रह्मदत्तस्य पितुश्च मम केशव । तयोरेव जगन्नाथ हंसस्य डिम्भकस्य च ।   १५७१५
॥ श्रीभगवानुवाच ॥ किमाहतुर्म्महीपालौ तौ हंसडिम्भकौ नृपौ । ब्रूहि सर्व्वमशेषेण नात्र शङ्का द्विजोत्तम ।
वाच्यं वाऽप्यथवाऽवाच्यं कर्त्तव्यमथ चेतरत् । श्रुत्वा तस्य विधास्यामो युक्तरूपं द्विजोत्तम ।
दूतोऽसि सर्व्वथा विप्र न वाच्यावाच्यकल्पना । यत्कर्म राज्ञा निर्द्दिष्टं तद्वाच्यं दूतजन्मना ।
नात्र शङ्का त्वया कार्य्या वक्तव्यस्येतरस्य च । अतो वद यथाप्रोक्तं ताभ्यामिह जनार्द्दन ।
केशवेनैवमुक्तस्तु प्रोवाच स जनार्द्दनः । अजानन्निव किं ब्रूषे सर्व्वं प्रत्यक्षदर्शिवान् ।   १५७२०
न चास्ति ते परोक्षन्तु जगद्वृत्तान्तमच्युत । सर्व्वं हि मनसा पश्यन् किं त्वमात्थ वदेति मां ।
विद्वद्भिर्गीयसे विष्णो त्वमेव जगतोपते । इच्छया सर्व्वमाप्नोषि दृष्टादृष्टविवेचनं ।
त्वमेवेदं जगत् सर्व्वं जगच्च त्वयि तिष्ठति । न त्वया रहितो लोकः पदार्थः सचराचरः ।
नास्ति किञ्चिदवेद्यन्ते सर्व्वगोऽसि जगत्पते । त्वमिन्द्रः सर्व्वभूतानां रुद्रः संहारकर्म्मकृत् ।
रक्षितासि सदा विष्णुः सर्व्वलोकस्य माधव । संसारस्य भवान् स्रष्टा किं त्वमात्थ वदेति मां ।   १५७२५
विद्वद्भिर्गीयसे नित्यं ह्यात्मात्मेति च माधव । प्राणं प्राणविदः प्राहुस्त्वामेव पुरुषोत्तम ।
शब्दं शब्दविदः प्राहुस्त्वामेव पुरुषोत्तम । तथा सति हृषीकेश किं त्वमात्थ वदेति मां ।
तथापि शृणु देवेश चोदितोऽस्मि यतस्त्वया । वदेत्यसकृद्देवेतत्तस्माद्वक्ष्यामि माधव ।
राजसूयेन यागेन ब्रह्मदत्तोऽद्य यक्ष्यते । तदर्थं प्रेषितस्ताभ्यां हंसेन डिम्भकेन च ।
करार्थं यदुमुख्येभ्यस्तव चामन्त्रणाय हि । लवणं बहुदेयं ते यज्ञार्थं तस्य केशव ।   १५७३०
इत्यर्थं प्रेषितस्ताभ्यां करं देहि तदाज्ञया । इदं त्वमपरं ताभ्यामुक्तं शृणु जगत्पते ।
लवणानि बहून्याशु प्रगृह्य त्वरितं भवान् । आगच्छतु तयोराज्ञा सेयं केशव वा विभो ।
इत्युक्तवति विप्रेन्द्रे दूते तत्र तयोर्नृप । प्रहस्य सुचिरं कृष्णो बभाषे दूतमीश्वरः ।
शृणु दूत वचो मह्यं युक्तमुक्तं द्विजोत्तम । करं ददामि ताभ्यान्तु करदोऽस्मि यतो नृपः ।
धार्ष्ट्यमेतत्तयोर्विप्र मत्तो यत्तु करग्रहः । अहो धार्ष्ट्यमहो धार्ष्ट्यं तयोः क्षत्रियवीरयोः ।   १५७३५
इदमश्रुतपूर्व्वं मे मत्तो वस्तु करग्रहः । इत्युक्त्वा केशवो दूतमिदमाह स्म यादवः ।
हास्यमेतद्यदुश्रेष्ठा मत्तो यत्तु करग्रहः । यष्टाऽसौ राजसूयस्य ब्रह्मदत्तो महीपतिः ।
तौ तं याजयितारौ हि हंसो डिम्भक एव च । वोढा किल यदुश्रेष्ठो लवणस्य दुरात्मनोः ।
करदो वासुदेवो हि जितोऽस्मि यदुसत्तमाः । हास्यं हास्यमिदं भूयः शृणुध्वं यादवा वचः ।
इत्युक्तवति देवेशे बलभद्रपुरोगमाः । यादवाः सर्व्व एवैते हासाय समवस्थिताः ।   १५७४०
करदः कृष्ण इत्येवं ब्रुवन्तः सर्व्वसात्वताः । हासं मुमुचुरत्यर्थं तलं दत्त्वा परस्परं ।
तलशब्दो हासशब्दो रोदसी पर्य्यपूरयत् । स च विप्रो नृपश्रेष्ठ निन्दयन्निवमात्मनः ।

अहो कष्टमहो कष्टं दौत्यं यत् कृतवानहं । इति लज्जासमाविष्टस्तूष्णीमासीदवाङ्मुखः ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने कृष्णवाक्ये षडधिकद्विशततोऽध्यायः ॥ २०६ ॥

॥ वैशम्पायन उवाच ॥ हासं कुर्व्वत्सु तेष्वेवं केशवः केशिसूदनः । उवाच वचनं दूतं गच्छ मद्वचनाद्वद ।
तावित्थं हंसडिम्भकौ ब्रूहि त्वरितविक्रमः । वाणैर्हास्यामि निशितैः शार्ङ्गमुक्तैः शिलाशितैः । ११७४५
असिना वाऽथ हास्यामि निशितेन महात्मनोः । शिरो वश्छेत्स्यते चक्रं मत्करप्रहितं बली ।
यो वरं दत्तवान् रुद्रो युवयोर्धार्ष्ट्यकारणं । स एव रक्षिता वां स्यात्तं जित्वा वां निहन्म्यहं ।
देशोऽयं स विधातव्यो यत्र नः सङ्गतिर्भवेत् । तत्र गन्ता तथा चास्मि सबलः सहवाहनः ।
भवन्तौ निर्भयौ भूत्वा गच्छेतां सबलौ नृपौ । पुष्करे वा प्रयागे वा मथुरायामथापि वा ।
तत्राहं सबलो याता नात्र कार्य्या विचारणा । अथवा मित्रभावाच्च वक्तुमेवं न ते क्षमं । ११७५०
न शक्यं यत्त्वया वक्तुं तच्च वक्ष्यति सात्यकिः । त्वया सह ततो गत्वा साक्षिभूतो भव द्विज ।
इदञ्च जाने विप्रेन्द्र स्नेहो मम सदा त्वयि । तेन त्वं विजयी भूत्वा संसार दुःखसंकुले ।
मत्कथापरमो नित्य सदा भव जनार्द्दन ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने कृष्णवाक्ये सप्ताधिकद्विशततोऽध्यायः ॥ २०७ ॥

॥ वैशम्पायन उवाच ॥ इत्युक्त्वा ब्राह्मणं कृष्णः सात्यकिं पुनराह सः । गत्वा शैनेय विप्रेण ब्रूहि मद्वचनात्तयोः ।
यत्नयोक्तमशेषेण वद गत्वा तयोः पुरः । यथा नः सङ्गतिर्युद्धे तथा वद बलात्तदा । ११७५५
धनुरादाय गच्छ त्वं बद्धगोधाङ्गुलित्रवान् । एकेनाश्वेन गच्छ त्वमसहायो यदूत्तम ।
सात्यकिस्तं तथेत्युक्त्वा हयमारुह्य शीघ्रगं । गन्तुमैच्छत्ततो राजन्नसहायः स सात्यकिः ।
जनार्द्दनं विसृज्याशु दूतं तं यादवेश्वरः । अहो धार्ष्ट्यमहो धार्ष्ट्यमित्युवाच जनार्द्दनः ।
नमस्कृत्य तदा दूतो माधवं यादवेश्वरं । स ययौ शाल्वनगरं शैनेयेन समन्वितः ।
ततः प्रविश्य धर्म्मात्मा ब्राह्मणो ब्रह्मवित्तमः । आसनं महदास्थाय विसृज्य यादवं पुनः । ११७६०
आस्ते सुखं सदा विप्रः शैनेयेन समन्वितः । अथ तं हंसडिम्भकयोर्दर्शयामास सात्यकिं ।
दूतोऽयं सात्यकिः प्राप्तः सख्यो वाक्करयं हरेः । तस्य तद्वचनं श्रुत्वा हंसः प्राह वचस्तदा ।
श्रुतः समागतः पूर्व्वमद्य दृष्टो मया त्वसौ । धनुर्वेदे च वेदे च शास्त्रे शस्त्रे तथैव च ।
निपुणो यः सदा शूर इत्येवमनुशुश्रुम । ततो दृष्टिपथं प्राप्तः प्रीतिं मे विदधात्यसौ ।
कुशलं वासुदेवस्य बलदेवस्य चापि वा । कुशलाः सात्वताः सर्व्वे उग्रसेनपुरोगमाः । ११७६५
तथेति सात्यकिः प्राह मन्दमुस्मितिताननः । ततो जनार्द्दनं प्राह हंसो वाक्यविशारदः ।
अपि दृष्टस्त्वया चक्री सिद्धं नः कार्य्यमीहितं । वद सर्व्वमशेषेण मा वृथा कालमत्यगाः ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने हंसवाक्ये अष्टाधिकद्विशततोऽध्यायः ॥ २०८ ॥

॥ वैशम्पायन उवाच ॥ इत्युक्तवति हंसे च धर्म्मात्माऽथ जनार्द्दनः । उवाच प्रहसन् वीरः स्तुवन्नारायणं तदा ।

॥ जनार्द्दन उवाच ॥ अद्राक्षमद्राक्षमहं जनार्द्दनं करस्थचक्रं वरशङ्खधारिणं। आतप्तजाम्बूनदभूषिताङ्गं स्फुरत्प्रभाद्योतितरत्न
धारिणं।
अद्राक्षमेनं यमिभिः पुरातनैः संसेव्यमानं मुनिवृन्दमुख्यैः। संस्तूयमानं वरवन्दिमागधैः छिन्नप्रवालारुणपल्लवाधरं। १५७७०
अद्राक्षमेनं कविभिः पुरातनैर्विविच्य वेद्यं विधिवत् सहामरैः। प्रफुल्लनीलोत्पलशोभितं श्रिया विनिद्रहेमाब्जविराजितोदरं।
भूयोऽहमद्राक्षमजं जगद्गुरुं प्रसादयन्तं वचनेन यादवान्। निरूपयन्तं विधिवन्मुनीश्वरैः प्रवृद्धवेदार्थनिधिं पुरातनैः।
अद्राक्षमद्राक्षमहं पुनः पुनः समस्तलोकैकहितं प्रभुं हरिं। वसन्तमस्मिन् जगतो हिताय जगन्मयं तं परिभूय शत्रून्।
भूयोऽप्यपश्यं सरसीरुहेक्षणं सार्द्धं तथा भीष्मतनूजया हरिं। वसन्तमम्भोनिधिशायिनं विभुं भक्तप्रियं भक्तजनास्पदं हरिं।
भूयोऽप्यपश्यं सह यादवेश्वरैर्विक्रीड्य विक्रीड्य विहारकाले। रमन्तमीड्यं रमयन्तमीश्वरान् यदूत्तमान् यादवमुख्यमी
श्वरं। १५७७५
अद्राक्षमद्राक्षमहं सुनिर्वृतः पिबन् पिबंस्तस्य वपुः पुनः पुनः। नेत्रेण नीलद्विवरेण केवलं धन्योऽहमेवेति तदा व्यचिन्तयं।
अद्राक्षमम्भोजयुगं दधानं प्रभुं विभुं भूतभवं प्रभावनं। आद्यं ककुद्मानमरं त्रिभावसुं संस्मृत्य संस्मृत्य तमेव निर्वृतः।
अद्राक्षं जगतामीशं वक्षोराजितकौस्तुभं। वीज्यमानं हरिं कृष्णं चामराणां शतैः सदा।
युवां विद्वेषयुक्तेन चेतसा यादवेश्वरं। स्मरन्तं सर्वदा विष्णुं क्व वा तौ क्व च वेति वा।
कुतो द्रक्ष्यामि तौ मन्दौ कुतो वा मत्पुरोगतौ। ध्यायन्तमित्थं देवेशं करसंश्रवणात्तदा। १५७८०
हंसं तमेवमद्राक्षं करं देहीत्यतः परं। वदन्तं नारदे वाचं दुर्वाससि यतीश्वरे।
ब्रह्मसूत्रपदां वाणीं दापयन्तं मुनीश्वरं। दृष्ट्वा दृष्ट्वा हरिं देवं पुनः पुनरचिन्तयं।
असाध्यमिदमारब्धं ताभ्यामिति नृपोत्तम। नारब्धव्यमिदं कार्यमितः प्रभृति भूमिप।
निवृत्ता सा कथा हंस यत्कथाग्रहणं तव। एष ते सर्व्वमखिलं वक्ष्यत्येव हि सात्यकिः।
एतद्वचनमाकर्ण्य हंसः क्रुद्धोऽब्रवीद्वचः। १५७८५
॥ हंस उवाच ॥ अरे ब्राह्मणदायाद का नाम तव वागियं। आवयोः पुरतो वक्तुं त्रैलोक्यं जेतुमिच्छतोः।
मायया त्वां भ्रामयति कृष्णो लीलाविधानवित्। तद्दृष्ट्वा भ्रम एवैष तव संजायते महान्।
शङ्खचक्रगदाशार्ङ्गवनमालाविभूषितं। वृष्णिवीरसभावेशे समुद्भूतयशोधनं।
सूतमागधसंस्तावप्रकटद्वीरबाहुकं। अत्यद्भुतयशोराशिविलसल्लोकमण्डलं।
चतुर्भुजबलाक्रान्तवृष्णियादवसंसदं। अहोऽद्य भ्रम एवैष दर्शनात्तस्य चक्रिणः। १५७९०
इदानीञ्च महात्माऽसौ भ्रामयत्येव केशवः। त्वामेव विप्र मन्दात्मन्निन्द्रजालीकृता हि या।
चापल्यमिदमेवैतत् तव विप्र समुद्भवं। अहो न खलु सादृश्यं कर्त्तव्यं भवता मम।
अहमेव त्वया विप्र मर्षये प्रोदितं वचः। सखिभावाद्द्विजश्रेष्ठ अन्यथा कः सहेदिदं।
गच्छ मन्दमते विप्र यथेष्टं सांप्रतं द्विज। गच्छ गच्छ यथेष्टं त्वं पृथिवीं पृथिवीं तव।
जित्वा गोपालदायाद जित्वा यादवकान् बहून्। एष नः प्रथमः कल्पो जेष्याम इति यादवान्। १५७९५

गच्छ गच्छेति विप्रं तं हृष्टः पद्मवादिनं। शत्रुपक्षस्तु निपरः सह भुक्ता सदा मया।
न मे विप्रवधः कार्य्यः कष्टादपि हि सर्व्वतः। इत्युक्त्वा ब्राह्मणं हंसो भूयः सात्यकिमब्रवीत्।
अरे यादवदायाद किमर्थं प्राप्तवानिह। किमब्रवीन्नन्दसुतः किं वा मे नादिशत् करं।
॥ सात्यकिरुवाच ॥ इदं तस्य वचो हंस शङ्खचक्रगदाभृतः। शरैर्निशितधाराग्रैः शार्ङ्गमुक्तैः शिलाशितैः।
दास्यामि करमर्व्वस्वमसिना वा शितेन ते। शिरश्छेत्स्यामि वै हंस करदानस्य संग्रहे। ११८००
धार्ष्ट्यं धार्ष्ट्यं तव महन्मन्दात्मन् किमतोऽपि वा। नृपाधम जगन्नाथात् करमिच्छति यो नरः।
तस्यैष करसंक्षेपो जिह्वाच्छेदो नराधम। तस्य शार्ङ्गरवं श्रुत्वा शङ्खस्य च हरेः पुरः।
को नाम जीवनं काङ्क्षंस्तिष्ठेदानीं त्वमद्य वै। गिरीशवरदर्पेण को ब्रूयादीदृशं वचः।
सहाया वयमेवैते बलभद्रपुरोगमाः। प्रथमो बलभद्रोऽसौ द्वितीयोऽहं स सात्यकिः।
कृतवर्म्मा तृतीयस्तु चतुर्थो निशठो बली। पञ्चमोऽथ च बभ्रुश्च षष्ठश्चैवोल्मुकः स्मृतः। ११८०५
सप्तमस्सारणो धीमानस्त्रशस्त्रविशारदः। अष्टमस्त्वथ सारङ्गो नवमो विपृथुस्तथा।
दशमश्चोद्धवो धीमान् वयमेते बलान्विताः। त एते पुरतो गोप्तुः शङ्खचक्रगदाभृतः।
देवदेवस्य युद्धेषु तिष्ठन्त्येव दिवानिशं। तावेव वां चनौ युद्धे हन्तुं मदबलान्वितौ।
यो गिरीशो गिरावेव वरं दत्त्वाऽधितिष्ठति। युवां हि केवलं युद्धे तिष्ठतः समरं धनुः।
गृहीत्वा शत्रुभिः सार्द्धं युद्धं कर्त्तुं समावृतौ। ईदृशौ च मर्त्त्येषु युद्धं कुर्व्वतः शत्रुभिः। ११८१०
त्रैलोक्यं रक्षतस्तस्मात् करमिच्छन् व्रजेत कः। हनिष्यत्येव वां युद्धे त्रैलोक्यं योऽभिरक्षति।
शरेण निशितेनाजौ शार्ङ्गमुक्तेन केवलं। क्व नः संग्राम इत्यत्र पुनरेव जगत्पतिः।
पुष्करे पुण्यगे नित्यमुत गोवर्द्धने गिरौ। मथुरायां प्रयागे वा दर्शयेतां बलानि मे।
शङ्खचक्रधरे देवे जगत्पालनतत्परे। राजसूयं महायज्ञं यष्टुमिच्छति कः स्वयं।
वदन् वा स्वस्तिमान् मर्त्यस्तं विना को व्रजेत् सुखं। इदं जाड्यमिदं मौढ्यमिदमत्यद्भुतं वचः। ११८१५
इदमिच्छसि चेन्मूढ हास्यतां यासि भूतले। इत्युक्त्वा सात्यकिर्वीरो हसन्निव भुवि स्थितः।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने सात्यकिवाक्ये नवाधिकत्रिशततमोऽध्यायः॥ ३०९ ॥

॥ वैशम्पायन उवाच ॥ ततः क्रुद्धौ महाराज हंसो डिम्भक एव च। इदं वै प्रोचतुर्वाक्यं रोषव्याकुलितेक्षणौ।
दिधक्षन्तौ दिशः सर्व्वाः सर्व्वान् वीक्ष्य नृपोत्तमान्। करं करेण निष्पीड्य स्मरन्तौ तद्वचो महत्।
क्व नु कृष्णः क्व वा नन्दसूनुः क्व च रामो बलोत्कटः। इति ब्रुवाणौ साक्षेपौ सात्यकिं सत्यसङ्गरं।
अरे यादवदायाद किं ब्रूषे नः पुरोगतः। इतो निर्गच्छ मन्दात्मन् दूतस्त्वमसि सांप्रतं। ११८२०
अन्यथा वध्य एव त्वं लपन् परुषं वचः। सत्यं निर्लज्ज एवासि यद्ब्रूया ईदृशं वचः।
आवामिदं जगत् सर्व्वं शासितुं संयतौ नृपौ। को नाम मानुषे लोके करदो नैव जीवति।
हत्वा गोपालकान् सर्व्वान् बद्ध्वा यादवकान् बहून्। गृहीमः करसर्व्वस्वं ततो गच्छ नराधम।
अवध्यौ दूतौ प्राप्तौ बद्धबद्धं प्रभाषसे। ईश्वरो नौ वरं दाता शस्त्राणामपि च प्रभुः।

रक्षितारौ महाभूतौ संग्रामं गच्छतोश्च नौ । पितरं याजयिष्यावो हत्वा गोपालकान् रणे । १५८७५
एते प्रोक्ता भृशं युद्धे कातराः सर्व्व एव ये । हत्वा तान् सबलान् युद्धे पुनर्जेष्याव केशवं ।
संहर्त्तव्या महासेना प्रगृहीतशरासना । गृहीतप्रासमुसला गृहीतकवचा सदा ।
आरूढरथसाहस्रगदापरिघसंकुला । सुप्रभूतेन्धनवती प्रभूतबलसाधना ।
प्रभूतबलसंयुक्ता सकुटीका सतोमरा । सच्छत्रा सध्वजा चैव सघण्टा सायुधाम्बरा ।
कल्प्यतां वाहिनी घोरा बलाध्यक्षाः समन्ततः । अवध्य एव गच्छ त्वं न ते मरणतो भयं । १५८८०
संग्रामः पुष्करे ऽस्माकं श्वः परश्वोऽपि वा नृप । ततो ज्ञास्यावहे वीर्य्यं केशवस्य बलस्य च ।
ये त्वयोक्ता नृपाः संख्ये तेषां मयि च यद्बलं ।
॥ सात्यकिरुवाच ॥ एष गच्छामि वां हन्तुं श्वः परश्वोऽपि वा नृपौ । अद्यैव हि मया वध्यौ न चेद्दूतो भवाम्यहं ।
न हि श्वो वा परश्वो वा युवां कटुकभाषिणौ । दौत्यं हि दुःखमखिलं भवत्येव सदा नृणां ।
अन्यथाऽहं युवां हत्वा ततो यास्यामि निर्वृतिं । स्ववीर्य्यं बाहुदर्पञ्च दर्शयंश्च नृपाधमौ । १५८८५
शङ्खचक्रगदापाणिः शार्ङ्गधन्वा किरीटभृत् । नीलकुञ्चितकेशाढ्यो लम्बबाहुः श्रिया वृतः ।
स सर्व्वलोकप्रभवो विश्वरूपः सुरूपवान् । दैत्यदानवहन्ताऽसौ योगिध्येयः पुरातनः ।
पद्मकिञ्जल्कवदनः श्यामलः सत्यविक्रमः । सृष्टिस्थितिलयस्यैककर्त्ता त्रिजगतां पतिः ।
शरेण निशितेनाजौ दर्पं वां व्यपनेष्यति । इत्युक्त्वा हयमारुह्य प्रतस्थे सात्यकिः किल ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने सात्यकिप्रतिप्रयाणे दशाधिकत्रिशततोऽध्यायः॥ ३१० ॥
॥ वैशम्पायन उवाच ॥ प्रविश्य च पुरं विष्णोः सात्यकिः शिनिपुङ्गवः । आचचक्षेऽथ कृष्णाय यथावृत्तं तयोस्तथा । १५८९०
ततः प्रभाते विमले केशवः केशिसूदनः । बलाध्यक्षानुवाचेदं कृतमङ्गलतत्परः ।
सन्नह्यतां बलं सर्व्वं रथकुञ्जरवाजिमत् । अनेकभेरीपणवप्रासासिपरिघाकुलं ।
सध्वजं सपताकञ्च सालङ्कारपरिच्छदं । तथेति ते प्रतिश्रुत्य सर्व्वं चक्रुरदीनगाः ।
वनमाली हली रामो नीलवासाः सितप्रभः । बभौ सैन्याग्रतो राजन् नगामिन्दुसमप्रभः ।
सात्यकिश्च तथा राजन् प्रगृहीतशरासनः । बभौ क्रोधसमायुक्तो नगामाग्रे महाबलः । १५८९५
अन्ये च यादवाः शूराः प्रगृहीतमहायुधाः । सिंहनादं प्रकुर्व्वन्तो जग्मुरत्यर्थमुत्तमाः ।
आदाय सुदृढं चापं रथमारुह्य दंशिताः । अग्रतो जग्मुरत्यर्थं सेनायाः पुरुषोत्तमाः ।
हरिस्तु रथमारुह्य सन्नद्धं दारुकेण ह । शार्ङ्गं भारसहं घोरं गृहीत्वा सशरं धनुः ।
चक्रपाणिस्तदा शङ्खी गदाशूलशरासिमान् । बद्धगोधाङ्गुलित्राणः पीतवासा जनार्द्दनः ।
पद्ममालावृतोरस्को नवजीमूतसन्निभः । यथौ रथगतो विप्रैः स्तूयमानो मुदाऽन्वितैः । १५९००
सूतैर्म्मागधपुण्ड्रैश्च गीयमानस्ततस्ततः । आनीय सेनां सकलां ययौ काष्ठामथोत्तरां ।
पाञ्चजन्यं मुखे न्यस्य सर्व्वप्राणेन केशवः । दध्मौ महारवं कुर्व्वन् शत्रूणां भयवर्द्धनं ।
आध्मातस्तेन हरिणा स चक्रे शंखराट् रवं । रवः स रोदसी राजन् पूरयामास सर्व्वतः ।

तस्मिन् शङ्खे तथाध्माते दध्मुः शङ्खान् सहस्रशः । भेर्य्यश्चापि समाध्माता मृदङ्गा बहवो नृप ।
नेदुरत्यर्थमतुलं घर्म्मान्ते जलदा यथा । अथाययुर्म्महाराज पुष्करं पुण्यवर्द्धनं । १५८५५
सरसस्तस्य तीरे तु पुष्करस्य नृपोत्तमाः । प्रतीक्षन् हंसडिम्भकौ युद्धाय समवस्थिताः ।
निवेशं कारयामासुर्यादवाः सर्व्व एव हि । स्वं स्वं यथासुखं राजन् प्रगृहीतकुटीमठं ।
भगवानपि गोविन्दः सरो दृष्ट्वा सुशोभनं । उपस्पृश्य जले तस्मिन् प्रणम्य यतिपुङ्गवान् ।
तयोरागमनं लिप्सुरास्ते तीरे यथासुखं । शृण्वन् वेदध्वनिं विप्रा(?)र्ब्राह्मणानां समन्ततः ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने कृष्णस्य पुष्करप्रवेशे एकादशाधिकद्विशततोऽध्यायः ॥ २११ ॥

॥ वैशम्पायन उवाच ॥ अथ तौ हंसडिम्भकौ जग्मतुः पुष्करं प्रति । प्रगृहीतमहाचापौ सरथौ सध्वजौ नृप । १५८६०
पुरःसरमहाभूतौ संहरन्ताविवोल्वणौ । प्रकुर्व्वन्तौ च वसुधां भस्मना परिवेष्टितौ ।
त्रिपुण्ड्रकललाटान्तौ रुद्राक्षपरिशोभितौ । अन्यौ द्वाविव रुद्रौ तौ लोकसंहारकारकौ ।
ततोऽनुजग्मुः शतशः सैन्यानि नृपसत्तम । अक्षौहिण्यो दशैवासंस्तयोरथ समागताः ।
विचक्रस्तु महाराज दानवो नगसन्निभः । तयोरेव सखा पूर्व्वमासीच्च बलशालिनोः ।
शक्रोऽपि तत्पुरःसरः स्थातुं शक्तो न वज्रभृत् । यो हि वीरो महाबाहुर्द्देवदैत्यसमागमे । १५८६५
देवान्निघ्नंस्तथा राजन् देवेन्द्रमजयन्महान् । अकरोच्च पुरा युद्धं विष्णुना प्रभविष्णुना ।
यो हि द्वारवतीं प्राप्य बबाधे यदुपुङ्गवान् । स तदानीं महाराज श्रुत्वा युद्धमवस्थितः ।
अनेकशतसाहस्रैर्द्दानवैः परिघायुधैः । वृतः समभवद्दैत्यो वृष्णिद्वेषान्नृपोत्तमः ।
हंसस्य डिम्भकस्याथ साहाय्यं कर्त्तुमुद्यतः । विचक्रस्याथ दैत्यस्य हिडिम्बो राक्षसेश्वरः ।
अतीव मित्रतां यातो दद्यात् प्राणांश्च संप्रति । राक्षसैरपरैः सार्द्धं शिलाप्रासासिपाणिभिः । १५८७०
ययौ तस्य सहायार्थं हिडिम्बः पुरुषादपः । अष्टाशीतिसहस्राणि तस्य रक्षांसि चाभवन् ।
अनुयाता महाराज शिलापरिघपाणयः । तयोस्तत्र महासैन्यं गच्छतोः केशवं प्रति ।
मिश्रितं दैत्यसङ्घैश्च राक्षसैश्च समन्ततः । अत्यद्भुतं महारौद्रं त्रैलोक्यभयदायि च ।
दैत्येन तेन सहितौ जग्मतुः पुष्करं प्रति । तावेतौ हंसडिम्भकौ हन्तुं केशवमञ्जसा ।
ततः श्रुत्वा जरासन्धो विग्रहं यदुपुङ्गवैः । नाकरोन्नृप साहाय्यं शापो मे भवितेति ह । १५८७५
गच्छतोः संयुगं राजन् हंसस्य डिम्भकस्य च । अतित्वरितविक्रान्तास्ते ययुः पुष्करं नृपाः ।
सिंहनादं विमुञ्चन्तः कथयन्तः परस्परं । अहमेव नृपो युद्धं करोमि प्रथमं हरेः ।
इत्यब्रुवन्नृपा राजन् गच्छन्तः केशवं प्रति । संप्राप्तास्ते नृपश्रेष्ठाः पुष्करं पुण्यवर्द्धनं ।
मुनिजुष्टं तपोऽर्हं दैवर्षिभिश्च निषेवितं । अत्यन्तभद्रं लोकेषु पुष्करं प्रथमं नृप ।
पुष्करं पुण्डरीकाक्षो द्वावेव जगतीपते । दर्शनात् स्पर्शनाद्वाऽपि किल्विषघ्नौ(?) दिशौ नृप । १५८८०
पुष्करं पुण्डरीकाक्षो द्वावेव नृपसत्तम । सेव्यमानौ मुनिश्रेष्ठैः सामघोषैर्म्महात्मभिः ।

द्वावेव हि नरश्रेष्ठ किल्बिषाणाञ्च नाशकौ । तावुभौ यत्र सहितौ तत्र ते संस्थिता नृपाः ।
दृष्ट्वा तौ च हरिं विष्णुं विष्टरश्रवसं परं । पुष्करं पुण्यनिलयं तीर्थं ब्रह्मनिषेवितं ।
ताभ्यां कुरु नमस्कारं मनसा नृपसत्तम । अहो निःशेषमभवत्तव भूप न संशयः ।
सैन्यं तत्र च संप्राप्तं दैत्यरक्षःसमाकुलं । अनेकभेरीपणवझर्झरीडिण्डिमाकुलं ।
तालसंमिश्रपणवं रक्षोनादसमाकुलं । प्रविश्य सरसस्तीरं पुष्करस्य विशाम्पते ।
दर्शयामास देवेशं युद्धाय समुपस्थितं ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने युद्धार्थं हंसडिम्भक सैन्यानां पुष्करागमने द्वादशाधिकत्रिशततोऽध्यायः ॥ ३१२ ॥

॥ वैशम्पायन उवाच ॥ द्वे सेने सङ्गते राजन् सध्वजे सपरिच्छदे । महापरिघसंकीर्णे गदाशक्तिसमाकुले ।
भेरीझर्झरसंपूर्णे डिण्डिमारावसंकुले । प्रगृहीतमहाशस्त्रे शूलासिवरकार्म्मुके ।
परस्परकृतोत्साहे चक्राते युद्धमुल्वणं । ते शराः कार्म्मुकोत्सृष्टा निर्भिद्याथ शरीरिणां ।
शरीराणि महाराज जग्मुर्दूरं सहस्रशः । भटबाहुविनिर्म्मुक्ताः खड्गा निर्भिद्य वर्त्मसि ।
स्फुटिताश्च तदा राजन् शिरांस्याहृत्य संययुः । परिघाश्च तदा राज्ञा बाहुभिः परिचोदिताः ।
तिलशस्त्रकृरतुल्यं शरीरं नृपरक्षसां । दैत्यानां कुर्व्वतां नादमन्योन्यवधकाङ्क्षिणां ।
दैत्यरक्षांसि राजेन्द्र राजानश्च समन्ततः । अन्योन्यं परिघैर्जघ्नुश्चापमुक्तैर्म्महाशरैः ।
नागा नागैर्म्महाराज हयाश्चाश्वैः समन्ततः । रथा रथैः समाजघ्नुः सादिनः सादिभिस्तथा ।
पट्टिशासिशरव्रातैः कुन्तसायककर्षणैः । सशक्तिपरिघप्रासपरश्वधसमाकुलैः ।
भिन्दिपालैर्म्महारौद्रैर्जघ्नुरन्योन्यमाहवे । राक्षसा दानवा राजन् क्षत्त्रियाश्च समन्ततः ।
शरैश्च भोगिभोगाभैस्तीक्ष्णमन्ये महाबलाः । राक्षसा दानवाश्चान्ये मत्तमातङ्गविक्रमाः ।
अन्योन्यं जघ्निरे राजंश्चापमुक्तैः शिलाशितैः । इतश्चेतश्च धावन्तः कुर्व्वन्तो विस्वरं रवं ।
हताः केचिन्महाराज पेतुरुर्व्व्यां महासिभिः । केचिन्मथितमस्तिष्का गदाभिर्वीर्य्यवत्तमाः ।
भग्नग्रीवा महाराज पट्टिशैः परिघैस्तथा । यमराष्ट्रं गताः केचित् केचित् स्वर्गं समाययुः ।
अप्सरोभिः समासेदुः पश्यन्तः स्वकलेवरं । केचित् स्वांश्च परांश्चैव हत्वा भ्रान्ता इवाभवन् ।
एतस्मिन्नन्तरे राजन् शङ्खा भेर्य्यः सहस्रशः । सस्वनुः सर्व्वतः सैन्ये मृदङ्गा बहवस्तथा ।
मध्यन्दिनगते सूर्य्ये तापं दधति घोरवत् । ततः पिशाचा विकृताः कराला निर्णतोदराः ।
राक्षसाश्च महाघोराः पिबन्तः केशशाद्वलं । मुदिता भक्षयामासुः पिबन्तः शोणितं बहु ।
सञ्चितानि शवान्यासन् कबन्धाः खड्गपाणयः । विभज्य देशं बहुशो युद्धभूमौ शवार्थिनः ।
अथ श्येना बलाश्चैव कङ्का गृध्रास्तथाऽपरे । तुण्डैः शवानि निष्कृष्य भक्षयन्ति ततस्ततः ।
सप्ताशीतिसहस्राणि हता नागा नृपोत्तम । त्रिंशत्सहस्रमयुतं निहता हयसत्तमाः ।
हतं लक्षं महाराज रथानां रथिभिः सह । त्रिंशत्कोट्यो हतास्तत्र सादिनः सायुधा भृशं ।

मध्यन्दिनगते सूर्य्ये हताः केचिन्न निर्गताः । केचिच्च निहता राजन् पुष्करं प्राविशन् नरः । ११८१०
केचिद्भूमिं समालिङ्ग्य हता इत्यब्रुवन् रणे । मुक्तकेशाः पतन्ति स्म रथं सन्त्यज्य केचन ।
सन्दष्टौष्ठपुटाः केचित् सादिनः पुरतो हताः । अत्यद्भुतं महायुद्धमासीत् पुष्करतीर्थके ।
यथा देवासुरं युद्धं पूर्व्वमासीन्नृपोत्तम ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने सङ्कुलयुद्धे त्रयोदशाधिकत्रिशततोऽध्यायः ॥ २१३ ॥
॥ वैशम्पायन उवाच ॥ एतस्मिन्नन्तरे राजन् द्वन्द्वयुद्धमवर्त्तत । विचक्रं योधयामास शार्ङ्गधन्वा गदाधरः ।
बलभद्रोऽथ हंसेन डिम्भकेन च सात्यकिः । वसुदेवोग्रसेनाभ्यां हिडिम्बः पुरुषादकः । ११८१५
शेषाश्च शेषैराजेन्द्र चक्रुर्युद्धमदीनगाः । वासुदेवस्त्रिसप्तत्या दैत्यं वक्षस्यताडयत् ।
शरैर्निशितधाराग्रैर्विस्मयं दर्शयन् रणे । दानवो देवदेवेशं दृढेन निशितेन च ।
शरेणाकर्णमाकृष्य धनुःप्रवरमीश्वरं । जघान स्तनयोर्मध्ये पश्यतस्तु शचीपतेः ।
तेन विद्धोऽथ भगवान् वक्षोदेशे जनार्द्दनः । स्रावयच्छोणितं विष्णुरादिकाले यथा प्रजाः ।
ततः क्रुद्धो हृषीकेशः क्षुरप्रेणाहरद्ध्वजं । अश्वांस्तु चतुरो हत्वा सारथिञ्च शरैस्त्रिभिः । ११८२०
ततो दध्मौ शङ्खवरं यथा तारामये रणे । रथादुत्प्लुत्य सहसा दानवः क्रोधमूर्च्छितः ।
गदां गृह्य महाघोरां दुर्व्विषह्यां वीर्य्यशालिनीं । तया जघान दैत्येन्द्रः किरीटे केशवस्य ह ।
ललाटे च पुनर्विष्णुं सिंहनादं तथाऽनदत् । ततः शिलाञ्च महतीं प्रगृह्य दनुजः किल ।
भ्रामयित्वा शतगुणं प्राहरत् केशवोरसि । तामापतन्तीं संप्रेक्ष्य हस्तेनादाय केशवः ।
जघान च तदा दैत्यं ताडितः स तदा क्षितौ । गतासुरिव संजज्ञे श्वसन्निव पपात ह । ११८२५
प्राप्य संज्ञां तदा दैत्यः क्रोधाद्द्विगुणमाबभौ । आदाय परिघं घोरमिदमाह जनार्द्दनं ।
अनेन तव गोविन्द दर्पं जातं निहन्म्यहं । त्रिकमक्रमस्तदा चासि मम देवासुरे रणे ।
तावेव रिपुलौ बाहू स एवास्मि जनार्द्दन । तथापि युध्यसे वीर न ज्ञात्वा मम केवलं ।
वारयैनं महाबाहो परिघं बाहुनिःसृतं । इत्युक्त्वा देवदेवेशं शङ्खचक्रगदाधरं ।
चिक्षेप दैत्यो लोकेशं सर्व्वलोकस्य पश्यतः । तं गृह्य बाहुना कृष्णो दृष्टोऽसीति वदन् हरिः । ११८३०
खण्डशः कारयामास खड्गेन निशितेन च । उत्पाट्य वृक्षं दैत्येन्द्रः शतशाखं महाशिखं ।
तेन तं पोथयामास विष्वक्सेनं प्रभुं । गृह्य तञ्चापि खड्गेन तिलशश्च चकार ह ।
विक्रीड्य सुचिरं कृष्णस्तेन दैत्येन माधवः । हन्तुमैच्छत्तदा दैत्यमादाय निशितं शरं ।
आग्नेयास्त्रेण संयोज्य जघानैनं स तेन ह । स सन्दह्य शरो दैत्यं सर्व्वलोकस्य पश्यतः ।
यथा पूर्व्वं जगाम ... करं भगवतः पुनः । हतशिष्टास्तदा दैत्याः पलायन्त दिशो दश । ११८३५
अद्यापि न निवर्त्तन्ते ते गच्छन्तो महोदधिं ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने विचक्रवधे चतुर्द्दशाधिकत्रिशततोऽध्यायः ॥ २१४ ॥
॥ वैशम्पायन उवाच ॥ बलदेवस्तु धर्म्मात्मा धनुरादाय सत्वरं । जघान हंसं दशभिर्बाणैर्बाणभृतां वरः ।

तं प्रत्यविध्यन्नाराचैर्हंसः पञ्चभिराशुगैः । तदनान्तरे हली छित्त्वा नाराचैर्द्दशभिः पुनः ।
नाराचेनाशु विव्याध ललाटे हंसमोजसा । दृढं पतन् स नाराचस्तत्र संज्ञां समादधे ।
रथोपस्थे चिरं स्थित्वा तूणाद्बाणं समाददे । लब्धा हंसः स संज्ञान्तु विद्धा तेन यदूत्तमं । १५९४०
सिंहवद्व्यनदद्धंसो देवान् विस्मापयन् रणे । ततः क्रुद्धो हली विद्धस्तेन बाणेन माधवः ।
वमन् शोणितमत्यर्थं निशश्वास रणाजिरे । लोहिताविष्टगात्रश्च कुङ्कुमार्द्र इवाभवत् ।
नाराचैः सप्तभाश्चैर्द्दारयामास माधवः । हंसं हंसगतिं वीरं नीलवासा हलायुधः ।
ते मुक्ता निशिता घोरा नाराचाश्च खवाजिनः । रथे ध्वजे तथा चापे कवचे तूणोदये नृप ।
पतिताः सर्व्वतो राजन् व्यथाश्चैव तथा दधुः । ततः क्रुद्धो महाराज हंसो वीर्य्यमदान्वितः । १५९४५
शरेण हलिनं विद्धा ध्वजं चिच्छेद केशरिणः । शरैश्चतुर्भिरश्वांश्च सूतं प्रेताधिपे ददौ ।
ततः क्रुद्धो हली तस्माद्गदां गृह्य महारणे । अपातयन्महाबाहुर्हंसं शेष इव श्वसन् ।
तथा ध्वजं रथं चक्रमीषां सूतं हलायुधः । बभञ्ज तिलशः सर्व्वं ननाद च पुनः पुनः ।
भूयश्च गदया हंसं चिक्षेप च बलः किल । सोऽपि हंसो गदां गृह्य रथात्तस्मादवापतत् ।
ततस्तौ हंसबलिनौ युयुधाते महारणे । महारथौ महाबाहू लोके प्रथिततेजसौ । १५९५०
अत्यद्भुतौ सुविक्रान्तौ परस्परवधैषिणौ । कृतश्रमौ महायुद्धे सिंहविक्रान्तगामिनौ ।
यथा देवासुरे युद्धे शक्रवृत्रौ पुराऽम्बरे । उभौ संसिक्तसर्व्वाङ्गौ शोणितेन महारणे ।
अत्यन्तखेदितौ युद्धे परस्परबलेन ह । ततश्च दक्षिणं मार्गं बलभद्रोऽन्वगच्छत ।
सव्यन्तु हंसो राजेन्द्र प्रागच्छत् स्वयमेव हि । पीडयाश्चक्रतुर्युद्धे गदाभ्यां गजविक्रमौ ।
यथाप्राणं महाबाहू जघ्नतुर्मरणाय वै । अतिप्रवृत्तं संग्रामं देवासुररणोपमं । १५९५५
विदधाते महारङ्गे पश्यतां त्रिदिवौकसां । देवाश्च मुनयश्चैव विस्मयं परिजग्मिरे ।
अहो खल्वीदृशं युद्धं दृष्टपूर्व्वं न च श्रुतं । इत्यूचुर्विस्मयवशाद्देवगन्धर्व्वकिन्नराः ।
परस्परकृतोत्साहौ कृतं युद्धं तयाऽद्भुतं । अथ हंसो महारङ्गे दक्षिणं दक्षिणोत्तमः ।
व्यचरन्मार्गमत्यर्थं सव्यन्तु बलवान् बली । निकुञ्च्य जानुनी पूर्व्वं चक्रतुर्गदया भृशं ।
रणं रणविदां श्रेष्ठौ पश्यतां त्रिदिवौकसां । १५९६०

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने हंसबलदेवयोर्युद्धे पञ्चदशाधिकत्रिशततमोऽध्यायः ॥ ३१५ ॥

॥ वैशम्पायन उवाच ॥ युद्धं चक्रतुरत्यन्तं ततो डिम्भकसात्यकी । तावुभौ बलिनौ वीरौ प्रख्यातौ क्षत्रियेषु वै ।
कृतश्रमौ महायुद्धे सततं वृद्धसेविनौ । सात्यकिर्द्दशभिर्वीरो डिम्भकं सत्यविक्रमं ।
अविध्यन्निशितैर्व्बाणैस्तनमध्ये तथोरसि । स तेन विद्धो बलिना डिम्भकः क्षत्रियोत्तमः ।
नाराचैः पञ्चसाहस्रैर्विव्याध युधि गर्व्वितः । तानन्तरे वृष्णिवीरो निषिद्धमिदमब्रवीत् ।
अथ क्रुद्धो नृपवरो विद्धा सप्तभिराशुगैः । पुनः शतसहस्रेण प्रत्यविध्यत् स सात्यकिं । १५९६५

सात्यकिस्तस्य विक्रान्तो धनुश्चिच्छेद तस्य तत्। अर्द्धचन्द्रेण तीक्ष्णेन डिम्भकस्य स यादवः।
आजघ्ने डिम्भको राजन् युयुधानं युधाम्वरं। क्षुरप्रेणाथ रौद्रेण तैलधौतेन विक्रमी।
स तेन विद्धो वाणेन वमन् शोणितकं नृप। अतीव शुशुभे राजन् वसन्ते किंशुको यथा।
धनुश्चिच्छेद भूयस्तु गृहीतं यत् पुनर्म्महत्। ततोऽन्यद्धनुरादाय डिम्भको यादवेश्वरं।
जघान निशितैर्व्वाणैः सर्व्वलोकस्य पश्यतः। स धनुः पुनरत्यर्थं चिच्छेद युधि सात्यकिः।
शरेण तीक्ष्णपुङ्खेन डिम्भकस्य दुरात्मनः। ततोऽन्यद्धनुरादाय सत्वरं स नृपोत्तमः।
धनुषा तेन राजेन्द्र सात्यकिं विव्यधे पुनः। एवं धनूंषि राजेन्द्र शतं पञ्च च पञ्च च।
छित्त्वा ननाद शैनेयः सर्व्वलोकस्य पश्यतः। धनुषी तौ परित्यज्य वीरौ डिम्भकसात्यकी।
खड्गौ प्रगृह्य चात्युग्रौ युद्धाय समुपस्थितौ। तौ हि खड्गविदां श्रेष्ठौ वीरौ डिम्भकसात्यकी।
द्रौणिश्चास निर्म्महाराज सोमदत्तस्तथैव च। अभिमन्युश्च विक्रान्तो नकुलश्च तथैव च।
एते खड्गविदां श्रेष्ठाः कीर्त्तिता युधि सत्तमाः। एतेष्वेतौ नृप श्रेष्ठौ षट्सु वै नृपसत्तमौ।
तत्र तावसिना युद्धं चक्रतुर्युद्धलालसौ। भ्रान्तमुद्भ्रान्तमाविद्धं प्रविद्धं वज्रनिःसृतं।
आकरं विकरं भिन्नं निर्म्मर्य्यादममानुषं। संकोचितं कुलचितं सव्यं जानुविजानु च।
आहितं चित्रकं चित्रं कुद्रवं लवणं हृतं। सर्व्वबाहुर्विनिर्म्बाहुः सव्येतरमथोत्तरं।
त्रिबाहुस्तुङ्गबाहु च सव्योद्गतमुदासि च। पृष्ठतः प्रथितञ्चैव योधिकं प्रथितं तथा।
इति प्रकारा द्वात्रिंशच्चक्रतुः खड्गयोधिनौ। पुनश्च प्रहरन्तौ तौ न च श्रममुपेयतुः।
पुष्करस्थौ महाराज युद्धाय कृतनिश्चयौ। ततो देवाः सगन्धर्व्वाः सिद्धाश्च परमर्षयः।
तुष्टुवस्तौ महाराज जये कृतपरिश्रमौ। अहो वीर्य्यमहो धैर्य्यमनयोर्व्वलशालिनोः।
एतावेव रणे शक्तौ खड्गे धनुषि पारगौ। एकः शिष्यो गिरीशस्य द्रोणस्यान्यो हि धीमतः।
अर्ज्जुनः सात्यकिश्चैव वासुदेवो जगत्पतिः। चय एते महाराज प्रथिताः सङ्गरे तथा।
डिम्भकः शक्तिभृत्त्र्च्चैस्त्रय एते महारथाः। प्रसिद्धाः सर्व्व एवैते वीर्य्येषु च वलेषु च।
इति ते देवगन्धर्व्वाः सिद्धा यक्षा महोरगाः। दिवि स्थिताः समं शुश्रुवुर्युद्धदर्शनलालसाः।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने सात्यकिडिम्भकयोर्युद्धे षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

॥ वैशम्पायन उवाच ॥ वसुदेवोग्रसेनौ च वृद्धौ युद्धेषु निष्ठितौ। जराजरितसर्व्वाङ्गौ पलिताङ्गशिरोधरौ।
ज्ञानविज्ञानसम्पन्नौ राजमार्गविशारदौ। युयुधाते महाराज राक्षसेन दुरात्मना।
शरैरनेकसाहस्रैरर्द्दयामासतू रणे। राक्षसेन्द्रं महात्मानं हिडिम्बं पुरुषादकं।
हिडिम्बो राक्षसेन्द्रस्तु भक्षयन् सर्व्वतो नरान्। अतिप्रवृद्धो दुष्टात्मा लम्बबाहुर्म्महाहनुः।
लम्बोदरो विरूपाक्षः पिङ्गकेशो विलोचनः। श्येननासो महारौद्र ऊर्द्ध्वरोमा महाभुजः।
पर्व्वताकारगात्रश्च दीर्घदंष्ट्रः शिवाननः। लम्बोदरो दीर्घदन्तो गजपाशकरः सदा।

उन्नुन्नास्यो महोरस्को दीर्घग्रीवो गजोपमः । भक्षयन् मांसपिटकं पिबन् शोणितसञ्चयं ।
गजान् गजैः समाहत्य हयानश्वैर्नृपोत्तम । रथान् रथैः समाहत्य सादिनः सादिभिस्तथा । ११९९५
मनुष्यान् स्वपुरीं दृष्ट्वा नास्यग्रासं चकार सः । कांश्चिद्धत्वा महाराज वृष्णिपालान् समन्ततः ।
भक्षयामास सहसा हिडिम्बः पुरुषादकः । यानपश्यत् पुरो रक्षस्तान् जघान विरूपधृक् ।
भक्षयन्नपरान् वृष्णीन् पादातान् राक्षसेश्वरः । चिक्षेप सहसा कांश्चित् हिडिम्बः पुरुषादकः ।
अन्तकाले यथा क्रुद्धो रुद्रः प्राणभृतो नृप । क्षणेनैकेन सर्व्वांस्तान् भक्षयामास राक्षसः ।
केचिद्भीता दिशः प्रापुर्वृष्णयो वीर्य्यशालिनः । केचित्तु भक्षितास्तेन रक्षसा वृष्णिपुङ्गवाः । १२०००
कुम्भकर्णो यथा राजन् हरिसैन्यमभक्षयत् । निःशेषं वृष्णिसैन्यन्तु स्थितं चित्रपटे यथा ।
एतस्मिन्नन्तरे क्रुद्धौ वृद्धौ यादवपुङ्गवौ । धनुर्गृह्य महाघोरं राक्षसस्य पुरः स्थितौ ।
यथा क्रुद्धस्य सिंहस्य मेषौ क्रुद्धतमाविव । व्यादायास्यं महारक्षस्तौ दृष्ट्वाऽथ व्यधावत ।
चिखादिषु र्विरूपाक्षं पातालतलसन्निभं । पर्य्यधावत्ततो रक्षः खादत् खादत् कलेवरं ।
पूरयामासतुर्वीरौ शरैर्यदुवृषौ नृप । हिडिम्बाख्यं महाघोरं व्यादितास्यमिवान्तकं । ५
सर्व्वास्तान् खादयामास देवशत्रुर्विरूपधृक् । धावति स्म ततो रक्षो व्यादितास्यं भयानकं ।
तयोर्गृहीत्वा धनुषी बभञ्ज युधि सत्वरं । प्रसार्य्य बाहू दुष्टात्मा राक्षसो विकृताननः ।
वसुदेवं महीपालं राजानं वृद्धसेनिनं । ग्रहीतुं रक्षसां श्रेष्ठो यतते नृपसंसदि ।
॥ हिडिम्ब उवाच ॥ एष त्वां भक्षयिष्यामि वसुदेव नृपाधम । उग्रसेन किमर्थं त्वं तिष्ठसे मत्पुरोऽधम ।
आगत्य प्रविशास्यं मे ग्रासभूतौ युवां मम । विधिना निर्म्मितौ वृद्धौ वसुदेव हरेः पितः । १२०१०
बुभुक्षितः श्रमार्त्तश्च युद्धे त्वरितविक्रमः । सम्मुखाविव गच्छेतां प्रविशन्तौ त्वरान्वितौ ।
युवयोः शोणितं पीत्वा तृप्तिं यास्यामि निर्वृतः । खादामि च पुनर्म्मांसं युवयोर्वृद्धयोः सुखं ।
इति ब्रुवंस्तदा क्रुद्धो व्यादितास्यो महाहनुः । धावति स्म तदा क्षिप्रं हिडिम्बो राक्षसेश्वरः ।
वसुदेवोग्रसेनौ च भीतौ विप्रेक्ष्य सर्व्वतः । दिशोऽभ्यभजतां राजन्निःशस्त्रौ वृष्णिपुङ्गवौ ।
एतस्मिन्नन्तरे दृष्ट्वा बलभद्रः प्रतापवान् । दृष्ट्वा च तौ तथाभूतौ वसुदेवोग्रसेनकौ । १२०१५
वासुदेवं समादिश्य हंसं युध्यन्तमीश्वरं । निर्गत्य चान्तरं तस्य राक्षसस्य दुरात्मनः ।
मा कृथाः साहसं रक्षो मुञ्चैतौ राजसत्तमौ । स्थितोऽस्मि युध्यतां रक्षो मया शत्रून् जिघांसता ।
अहमेव हनिष्ये त्वां कथं तव विभीषिका । इति ब्रुवाणं हलिनं विसृज्य तौ महारणे ।
महानयमसौ दृष्टो भक्षयाम्येनमग्रतः । विदार्य्य पूर्व्ववद्वक्त्रं बलभद्रमुपाद्रवत् ।
विसृज्य सशरं चापं राक्षसस्य पुरः स्थितः । मुष्टिं प्रगृह्य बलवान् स्फोटयन् बाहुमुत्तम । १२०२०
हिडिम्बस्त्वथ दुष्टात्मा मुष्टिं कृत्वा भयानकं । जघान वक्षो रामस्य व्यादितास्य इवान्तकः ।
क्रुद्धोऽथ बलभद्रस्तु मुष्टिना तेन ताडितः । जघान मुष्टिना रामो राक्षसेन्द्रमनिन्दितः ।
मुष्टियुद्धं समभवन्नरराक्षसवीरयोः । युध्यतोर्युद्धरङ्गेषु नरराक्षससिंहयोः ।

तयोश्चटचटाशब्दः प्रादुरासीद्भयानकः । अथ राक्षसराजस्तु मुष्टिना राममाहवे ।
जघान वक्षोदेशे तु वज्रेणेव पुरन्दरः । अथ रामो बली चापि मुष्टिं संवर्त्य यत्नतः । १२०२५
हिडिम्बं ताडयामास वक्षस्येवं महाद्विपं । तलाभ्यामथ रामस्तु वक्षो हत्वा स राक्षसं ।
स हतस्तलघातेन हिडिम्बो राक्षसेश्वरः । जानुभ्यामपतद्भूमौ गतासुरिव राक्षसः ।
तत उत्पाट्य रामस्तु दोर्भ्यां संगृह्य राक्षसं । आदाय बाहुवेगेन भ्रामयित्वा पदात्पदं ।
व्याविध्य सुचिरं रामो दर्शयन्नात्मनो बलं । उत्क्षिप्य राक्षसेन्द्रन्तं सर्व्वलोकस्य पश्यतः ।
गव्यूतिमात्रं चिक्षेप ततो देशाद्धलायुधः । गतासू राक्षसश्रेष्ठस्ततो देशान्निराक्रमत् । १२०३०
ये केचिद्राक्षसास्तत्र हतशेषा महारणे । बलभद्रात्ततो भीता जग्मुश्चैव दिशो दश ।
अथांशुमाली भगवान् दिनेशः संहृत्य तेजांसि सहस्ररश्मिः । अस्तं ययौ चक्षुरपि प्रजानामोषध्ययश्चापि समाविवेश ।
तस्मिन् प्रविष्टेऽथ समुद्रतोयं प्रजापतौ विश्वमुखे जगद्गुरौ । नक्षत्रनाथः समुपाजगाम सन्ध्यातमोऽपि व्यनशन्नृपोत्तम ।
प्रभातकाले नृप सत्तमो रणो गोवर्द्धने किन्नरगीतनादिते । इति ब्रुवन्तो नृपसत्तमास्तदा व्युपारमंस्तत्र रणोत्सवं नृप ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने हिडिम्बवधे सप्तदशाधिकद्विशततोऽध्यायः ॥२१७॥
॥ वैशम्पायन उवाच ॥ उभौ तौ हंसडिम्भकौ राजाविव महागिरिं । जग्मतुः सहितौ राजन् गोवर्द्धनमथो नृप । १२०३५
अथ प्रभाते विमले सूर्य्ये चाभ्युदिते सति । गोवर्द्धनं जगामाशु केशवः केशिसूदनः ।
शैनेयो बलभद्रश्च यादवाः सारणादयः । गन्धर्व्वैरप्सरोभिश्च नादितं बहुधा गिरिं ।
तस्येतरं नृपश्रेष्ठ पार्श्वं संप्राप्य यादवाः । निकषा यमुनां राजंस्ततो युद्धमवर्त्तत ।
हंसेन डिम्भकेनाथ यादवैश्च समन्ततः । उग्रसेनस्त्रिसप्तत्या शराणां नतपर्व्वणां ।
विव्याध हंसडिम्भकौ वसुदेवश्च सप्तभिः । सारणः पञ्चविंशत्या दशभिः कङ्क एव च । १२०४०
निशठस्तु त्रिसप्तत्या सात्यकिश्चापि सप्तभिः । अशीत्या विपृथू राजन्नुद्धवो दशभिः शरैः ।
प्रद्युम्नस्त्रिंशता राजन् साम्बश्चापि च सप्तभिः । अनाधृष्टिस्त्रिकपञ्चा शराणां नतपर्व्वणां ।
एवं ते सहिता राजंश्चक्रुर्युद्धमदीनवत् । अत्यद्भुतं महाघोरं यादवाः सर्व्व एव च ।
चक्रुस्ताभ्यां महायुद्धं वासुदेवस्य पश्यतः । सर्व्वानपि महाराज यादवान् बलदर्पितान् ।
तावुभौ हंसडिम्भकौ नृपांस्तान् प्रत्यविध्यतां । प्रत्येकं दशभिर्विद्धा बाणैर्निशितसप्तभिः । १२०४५
जघ्नतुश्च शरैस्तीक्ष्णैरत्यर्थं यादवेश्वरान् । व्यथिताः सर्व्व एवैते वमन्तः शोणितं बहु ।
माधवे किंशुका राजन् पुष्पिता इव ते बभुः । भीताश्च यादवा राजन् पलायनपरायणाः ।
एतस्मिन्नन्तरे राजन् वसुदेवात्मजो नृप । वासुदेवो हली युद्धे प्रमुखे धन्विनो तयोः ।
चक्रतुर्युद्धमतुलं स्कन्दशक्राविवाम्बरे । ततो देवाः सगन्धर्व्वाः सिद्धा यक्षा महर्षयः ।
विमानस्थाश्च ददृशुर्युद्धं देवासुरोपमं । ततः प्रादुरभूतां तौ दूतौ भूतेश्वरौ नृप । १२०५०
शूलिना प्रेषितौ युद्धे रक्षार्थं बलिनौ तयोः । हंसोऽथ वासुदेवश्च युद्धं चक्रतुरीश्वरौ ।
रामश्च डिम्भकश्चैव संयुक्तौ युद्धकाङ्क्षया । विक्रान्ताः सर्व्व एवैते शस्त्रे शूले तथा बले ।

ग्रहणाम दधुः पृथग्राजन् स्वे स्वे सर्व्वे रथे स्थिताः। ततः कृष्णो हृषीकेशः पाञ्चजन्यं महारवं।
दध्मौ पद्मपलाशाक्षः सर्व्वान् विस्मापयन्निव। अथ भूतौ महाघोरौ जम्भोदरशरीरिणौ।
दुद्रुवतुर्म्महाराज शूलमादाय केशवं। शूलेन पोथयन्तौ राजन् चक्रतुर्याद्वेश्वरं। ११७८५
ताभ्यां समाहतो विष्णुर्द्देवगन्धर्व्वसन्निधौ। ईषत्स्मिताधरो देवः किञ्चिदुत्सृज्य सत्वरं।
रथाद्रथिवरश्रेष्ठस्तौ प्रगृह्य जगत्पतिः। भ्रामयित्वा शतगुणमलातमिव केशवः।
कैलासस्य समुद्दिश्य प्रचिक्षेप ततो हरिः। तावेत्य तु गिरेः शृङ्गं कैलासस्य महीभृतः।
दृष्ट्वा तत् कर्म्म देवस्य विस्मयं जग्मतुः परं। हंसस्तु दृष्ट्वा तत् कर्म्म रोषताम्रायतेक्षणः।
उवाच वचनं विष्णुं पश्यतां त्रिदिवौकसां। किमर्थं राजसूयस्य विघ्नं चरसि केशव। ११७९०
ब्रह्मदत्तो महीपालो यष्टा तस्य महाक्रतोः। करं दिश यथायोगं यदि प्राणान् प्रकाङ्क्षसि।
अथ वा त्वं क्षणं तिष्ठ ततो ज्ञात्वा करं वद। ददामि नन्दपुत्र त्वं ततो यष्टा स मे गुरुः।
ईश्वरोऽहं सदा राज्ञां देवानामिव शूलधृक्। एवन्ते वीर्य्यविभवं नाशयिष्यामि संयुगे।
इत्युक्त्वा सशरं चापं शालतालोपमं नृप। आकृष्य च यथाप्राणं नाराचेन स केशवं।
ललाटे विव्यधे हंसो ललाम इव सोऽभवत्। उवाच सात्यकिं कृष्णो रथं वाहय मे प्रभो। ११७९५
दारुकं पृष्ठवाहन्तु कृत्वा केशव ईश्वरः। आग्नेयमस्त्रं संयोज्य शरे कस्मिंश्चिदीश्वरः।
अनेन त्वां दहाम्यद्य यदि शक्तोऽसि वारय। अलं ते बहुयुद्धेन क्षत्रियोऽसि सदा शठ।
मत्तश्चेत् करमिच्छेस्त्वं दर्शयाद्य पराक्रमं। पन्नगो बाधिता हंस पुष्करे संस्थितास्त्वया।
शास्ता त्वं खलु विप्राणां स्थिते मयि नराधम। स्थिते मयि जगन्नाथे हत्वा क्षत्रियकण्टकान्।
शास्ताऽस्म्यथ सतां लोके दुष्टानां ब्रह्मविद्विषां। शापेन यतिमुख्यानां हत एव नराधम। ११८००
मृत्यवे त्वां निवेद्याद्य रक्षिता ब्राह्मणानहं। इति ब्रुवंस्तदस्त्रन्तु मुमोच युधि केशवः।
तदस्त्रं वारुणेनाथ हंसोऽपि प्रत्यषेधयत्। वायव्यमथ गोविन्दो मुमोच युधि हंसके।
तदस्त्रं वारयामास माहेन्द्रेण नृपोत्तमः। अथ माहेश्वरं कृष्णो मुमोचास्त्रं महाहवे।
रौद्रेण तत्ततो हंसो वारयामास तत्क्षणं। गान्धर्व्वं राक्षसञ्चैव पैशाचमथ केशवः।
ब्रह्मास्त्रमथ कौबेरमासुरं याम्यमेव च। क्षिप्त्वाऽस्यैतानि हंसस्तु मुमोच युधि सत्वरं। ११८०५
वारणार्थं तदस्त्राणां चतुर्णां माधवस्य ह। अथ ब्रह्मशिरो नाम घोरमस्त्रविनाशनं।
मुमोच हंसमुद्दिश्य केशवः क्रोधमूर्च्छितः। हंसोऽपि तेन राजेन्द्र वारयामास तं शरं।
यमुनाप उपस्पृश्य देवदेवो जनार्द्दनः। अस्त्रं वैष्णवमादाय शरे सन्निहिते हरिः।
योजयामास भूतात्मा भूतभावनभावनः। येन देवा रणे हत्वा राज्यमापुः पुराऽसुरान्।
तदस्त्रं योजयामास बधार्थं तस्य भूपते। ११८०८

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसडिम्भकोपाख्याने कृष्णस्य वैष्णवास्त्रत्यागे अष्टादशाधिकत्रिशतोऽध्यायः॥ २१८॥

॥ वैशम्पायन उवाच ॥ अथ भीतो महारौद्रमस्त्रं दृष्ट्वा नृपोत्तमः । हंसो राजा महाराज निश्चेष्ट इव संबभौ ।
उत्प्लुत्य स रथात्तस्माद्यमुनामभ्यधावत । यत्र कृष्णो हृषीकेशः कालीयाहिं ममर्द ह ।
महाह्रदं महारौद्रं यावत्पातालसंस्थितं । तावद्धोधं महानीलं कालाञ्जननिभं हि यत् ।
तस्मिन् ह्रदे महाघोरे पपाताथ स हंसकः । हंसे पतति तस्मिंस्तु महान् रावो बभूव ह ।
गिरीणां पात्यमानानां समुद्र इव वज्रिणा । रथादुत्प्लुत्य कृष्णोऽपि तस्योपरि पपात ह ।
देवदेवो जगन्नाथो जगद्विस्मापयन्निव । प्राहरत्तं महाबाहुः पदाभ्यामथ केशवः ।
पादक्षेपं नृपस्तस्मात्सह्या हंसो नृपोत्तम । ममार च नृपश्रेष्ठ केचिदेवं वदन्ति हि ।
अन्ये पातालमायातो भक्षितः पन्नगैरिति । अद्यापि नैव राजेन्द्र दृष्ट इत्यनुशुश्रुम ।
यथापूर्व्वं जगन्नाथो रथं समुपजग्मिवान् । हते तस्मिन् महाराज धर्म्मपुत्रो युधिष्ठिरः ।
अकरोद्राजसूयञ्च तव पूर्व्वपितामहः । यदि जीवेदसौ हंसः को नयस्यति तं क्रतुं ।
स च सर्व्वास्त्रविन्नित्यं रुद्राद्लब्धवरः प्रभो । क्षणादेव महाराज वार्त्तेयं गामगाहत ।
हतो हंसो ह्रदे दैत्यः कृष्णेन रिपुमर्द्दिना । जगुर्गन्धर्व्वास्तत्र देवलोके दिवानिशं ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हंसवधे ऊनविंशत्यधिकत्रिशततमोऽध्यायः ॥ ३१९ ॥
॥ वैशम्पायन उवाच ॥ श्रुत्वा निहतमत्युग्रं भ्रातरं वीर्य्यशालिनं । बलदेवं परित्यज्य युध्यमानं महारणे ।
डिम्भको वीर्य्यसम्पन्नो यमुनामनुजग्मिवान् । तमन्वधावद्वेगेन बलभद्रो हलायुधः ।
हंसोऽपि यत्र पतितस्तत्रासौ निपपात ह । यमुनायां महाराज विलोड्य जलसञ्चयं ।
अथ क्रुद्धोऽथ डिम्भको भ्रामयित्वा जलं बहु । उन्मज्ज्य मज्ज्य सहसा निमज्ज्य च पुनः पुनः ।
न ददर्श तदा राजन् भ्रातरं वीर्य्यशालिनं । उन्मज्ज्याथ महाबाहुर्वासुदेवं विलोक्य च ।
उवाच वचनं राजन् डिम्भको वीर्य्यवत्तमः । अरे गोपालदायाद क्वासौ हंस इति स्थितः ।
वासुदेवोऽपि धर्म्मात्मा यमुनां पृच्छ राजक । इत्यब्रवीत् प्रसन्नात्मा वासुदेवः प्रतापवान् ।
तच्छ्रुत्वा यमुनां भूयः प्रविश्य डिम्भकः किल । बहुप्रकारमुद्वीक्ष्य सर्व्वतो भ्रातृवत्सलः ।
विललाप ततो राजा डिम्भको भ्रान्तमानसः । क्व नु गच्छसि राजेन्द्र विहायैकमबान्धवं ।
कुतो भ्रातरितो गच्छः परित्यज्यैव मामिह । विलप्यैवं नृपश्रेष्ठ डिम्भको भ्रातृवत्सलः ।
आत्मत्यागे मनः कुर्व्वन् यमुनायां महाह्रदे । निमज्ज्योन्मज्ज्य सहसा मरणे कृतनिश्चयः ।
हस्तेन जिह्वामाकृष्य भूयो भूयो विलप्य च । ततः समूलमाकृष्य जिह्वां स ह सहसा स्वयं ।
ममार स जले राजन् डिम्भको नरकाय वै । तस्मिन्नराधमे हंसे डिम्भके च तथा हते ।
आगमत् पुण्डरीकाक्षो भूतान् विस्मापयन्निव । ततः प्रीतः प्रसन्नात्मा वासुदेवः प्रतापवान् ।
गोवर्द्धनमथ विश्रम्य बलभद्रसहायवान् । किञ्चित् कालं महाराज पूर्व्वभुक्तमुवास ह ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि डिम्भकमरणे विंशत्यधिकत्रिशततमोऽध्यायः ॥ ३२० ॥
॥ वैशम्पायन उवाच ॥ यशोदा नन्दगोपश्च कृष्णदर्शनलालसौ । गोवर्द्धनगतं श्रुत्वा वासुदेवस्य मातरं ।

नवनीतञ्च दधि च पायसं कृशरं तथा । परिगृह्य महाराज मयूराङ्गदमेव च ।
बलवैरपरैः सार्द्धं गोपीभिश्च समन्ततः । जग्मतुः सहसा प्रीतिं तत्र दृष्ट्वा महाबलौ । १२११०
दर्शयामासतुर्देवं पायसानि महान्ति च । नन्दगोपं यशोदाञ्च दृष्ट्वा प्रीतोऽभवद्धरिः ।
अवोचच्च ततो वाक्यं नन्दगोपं सबान्धवं । यशोदां मातरं पश्चाद्वासुदेवः परन्तपः ।
तात मातर्व्रजे कच्चित् कुशलं वाप्यगोधने । अपि गावः क्षीरवत्यो वत्सा वत्सतराः पितः ।
अपि वा सुशुभं क्षीरमपि गावः सुशोभनाः । अपि वा दारका मातर्वत्सशालाः पिबन्ति च ।
बहूनि चापि दामानि कीलका अपि वा बहु । तृणानि बहुरूपाणि किं वा सन्ति पितः सदा । १२११५
शकटानि सुगन्धानि किं वा सन्ति पितर्ध्रुवं । अपि गोप्यः पुत्त्रवत्यो दारकान् किमजीजनन् ।
घाटाः किं बहवो मातरभिन्नाः सर्व्वतो व्रजे । किं गावः क्षीरमतुलं स्रवन्त्यहरहः पितः ।
हैयङ्गवीनं क्षीराणि दधि वा किमजीजनन् । गोधनं सर्व्वमेवेदं नीरोगं प्रतिपद्यते ।
॥ नन्द उवाच ॥ सर्व्वमेतद्यदुश्रेष्ठ नीरोगं बहुशः प्रभो । कुशलं गोधनञ्चैव सर्व्वकालेषु केशव ।
रक्षणात्तव देवेश सदा कुशलिनो वयं । सगोधनाः सवत्साश्च नीरोगा इव केशव । १२१२०
एकमेव सदा दुःखं न त्वां द्रक्ष्यामि केशव । यदेतत् केवलं दुःखमिति धीः शोच्यते सदा ।
॥ वैशम्पायन उवाच ॥ एवमादि विलप्यन्तं गच्छेत्याह स केशवः । यशोदां पुनराहेदं मातर्गच्छ गृहं प्रति ।
ये च त्वां कीर्त्तयिष्यन्ति ते च स्वर्गमवाप्नुयुः । ये केचित्त्वां नमस्यन्ति ते मे प्रियतराः सदा ।
मद्भक्ताः सर्व्वदा सन्तु गच्छेत्याह च तौ हरिः । इत्युक्त्वा पितरौ देवो वासुदेवः सनातनः ।
गाढमालिङ्ग्य तौ प्रीतौ प्रेषयामास केशवः । यशोदा नन्दगोपश्च जग्मतुः स्वगृहं प्रति । १२१२५
ततः कृष्णो हृषीकेशो यादवैः सह वृष्णिभिः । गन्तुमैच्छत्तदा विष्णुः पुरीं द्वारवतीं किल ।
य एतच्छृणुयान्नित्यं पठेद्वाऽपि समाहितः । पुत्रवान् धनवांश्चैव अन्ते मोक्षञ्च गच्छति ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि यशोदानन्दगोपबलभद्रकृष्णसमागमे एकविंशत्यधिकद्विशततमोऽध्यायः
॥ २२१ ॥

॥ वैशम्पायन उवाच ॥ गच्छन्नथ महाविष्णुः पुष्करं प्राप्य यादवैः । अपश्यन्मुनिमुख्यांस्तु पुष्करस्थांस्तपोत्तम ।
ते समेता महादेवं ऋषयो वीतमत्सराः । अर्घ्यादिसमुदाचारं कृत्वेनं यादवोत्तमं ।
प्रोचुर्विश्वेश्वरं विष्णुं भूतभव्यभवत्प्रभुं । अत्यद्भुतमिदं विष्णो तव वीर्यं जनार्द्दन । १२१३०
येन तौ निहतौ युद्धे हंसो डिम्भक एव च । यौ त्रिचक्षो दुराधर्षौ देवैरपि सुदुःसहः ।
सङ्गरे निहतौ देव दुःसाध्य इति नो मतिः । येन नः सर्व्वकार्य्येषु चरतां तप उत्तमं ।
निष्कल्मषा भविष्यामस्तव संस्मरणाद्धरे । त्वं हि सर्व्वस्य दुःखस्य हर्त्ता त्वां ध्याायतां सदा ।
त्वदनुस्मरणं जन्तोः सदा पुण्यप्रदं प्रभो । त्वं हि नः सततं धाता विधाता तपसो हरे ।
नमोङ्कारो वषट्कारस्त्वं दक्षस्त्वं पितामहः । त्वं ज्योतिर्ब्रह्मणो मूर्त्तिस्त्वं ब्रह्मा रुद्र एव च । १२१३५
प्राणस्त्वं सर्व्वभूतानामन्तरात्मेति कथ्यसे । उपास्यः सर्व्वभूतानां यज्ञेशानेर्जगत्पते ।

नमो विश्वसृजे देव नमस्ते विश्वमूर्त्तये । पाहि लोकमिमं देव हत्वा ब्रह्मद्विषः सदा ।
स तथेति हरिर्विष्णुर्ययौ द्वारवतीं पुरीं । अवसद्वृष्णिभिः सार्द्धं स्तूयमानः स मागधः ।
इयं हि देवदेवस्य चेष्टा हि जनमेजय । प्रोक्ता ते पृच्छते राजन् किमन्यच्छ्रोतुमिच्छसि ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि कृष्णस्य द्वारकाप्रत्यागमने द्वाविंशत्यधिकत्रिशततोऽध्यायः ॥ १२२ ॥
॥ जनमेजय उवाच ॥ भगवन् केन विधिना श्रोतव्यं भारतं बुधैः । फलं किं के च देवाश्च पूज्या वै पारणेष्विह ।
देयं समाप्ते भगवन् किञ्च पर्व्वणि पर्व्वणि । वाचकः कीदृशश्चात्र एष्टव्यस्तद्ब्रवीहि मे ।
॥ वैशम्पायन उवाच ॥ शृणु राजन् विधिमिमं फलं यच्चापि भारतात् । श्रुताद्भवति राजेन्द्र यत्त्वं मामनुपृच्छसि ।
दिवि देवा महीपाल क्रीडार्थमवनिं गताः । कृत्वा कार्य्यमिदञ्चैव ततश्च दिवमागताः ।
हन्त यत्ते प्रवक्ष्यामि तच्छृणुष्व समाहितः । ऋषीणां देवतानाञ्च सम्भवं वसुधातले ।
अत्र रुद्रास्तथा साध्या विश्वेदेवाश्च शाश्वताः । आदित्याश्चाश्विनौ देवौ लोकपाला महर्षयः ।
गुह्यकाश्च सगन्धर्व्वा नागा विद्याधरास्तथा । सिद्धा धर्म्मः स्वयम्भूश्च मुनिः कात्यायनो वरः ।
गिरयः सागरा नद्यस्तथैवाप्सरसां गणाः । ग्रहाः संवत्सराश्चैव अयनान्यृतवस्तथा ।
स्थावरं जङ्गमञ्चैव जगत् सर्व्वं सुरासुरं । भारते भरतश्रेष्ठ एकस्थमिह दृश्यते ।
तेषां श्रुत्वा प्रतिष्ठानं नामकर्म्मानुकीर्त्तनात् । कृत्वाऽपि पातकं घोरं सद्यो मुच्येत मानवः ।
इतिहासमिमं श्रुत्वा यथावदनुपूर्व्वशः । संयतात्मा शुचिर्भूत्वा पारं गत्वा च भारते ।
तेषां श्राद्धानि देयानि श्रुत्वा भारत भारतं । ब्राह्मणेभ्यो यथाशक्त्या भक्त्या च भरतर्षभ ।
महादानानि देयानि रत्नानि विविधानि च । गावः कांस्योपदोहाश्च कन्याश्चैव स्वलङ्कृताः ।
सर्व्वकामगुणोपेता यानानि विविधानि च । भवनानि विचित्राणि भूमिर्वासांसि काञ्चनं ।
वाहनानि च देयानि हया मत्ताश्च वारणाः । शयनं शिविकाश्चैव स्यन्दनाश्च स्वलङ्कृताः ।
यद्यद्गृहे वरं किञ्चिद्यद्यदस्ति महद्वसु । तत्तद्देयं द्विजातिभ्य आत्मा दाराश्च सूनवः ।
श्रद्धया परया दत्तं क्रमशस्तस्य पारगः । शक्तितः सुमना हृष्टः शुश्रूषुरविकम्पनः ।
सत्यार्ज्जवरतो दान्तः शुचिः शौचसमन्वितः । श्रद्दधानो जितक्रोधो यथा सिध्यति तच्छृणु ।
शुचिः शीलान्विताचारः शुक्लवासा जितेन्द्रियः । संस्कृतः सर्व्वशास्त्रज्ञः श्रद्दधानोऽनसूयकः ।
रूपवान् सुभगो दान्तः सत्यवादी जितेन्द्रियः । दानमानगृहीतश्च कार्य्यो भवति वाचकः ।
अविलम्बमनायस्तमद्रुतं धीरमूर्ज्जितं । असंसक्ताक्षरपदं रसभावसमन्वितं ।
त्रिषष्टिवर्णसंयुक्तमष्टस्थानसमीरितं । वाचयेद्वाचकः स्वस्थः स्वासीनः सुसमाहितः ।
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं । देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ।
ईदृशाद्वाचकाद्राजन् श्रुत्वा भारत भारतं । नियमस्थः शुचिः श्रोता शृण्वन् स फलमश्नुते ।
पारणं प्रथमं प्राप्य द्विजान् कामैश्च तर्पयन् । अग्निष्टोमस्य यागस्य फलं वै लभते नरः ।
अप्सरोगणसंकीर्णं विमानं लभते महत् । प्रहृष्टः स तु देवैश्च दिवं याति समाहितः ।

द्वितीयं पारणं प्राप्य अतिरात्रफलं लभेत् । सर्व्वरत्नमयं दिव्यं विमानमधिरोहति ।
दिव्यमाल्याम्बरधरो दिव्यगन्धविभूषितः । दिव्याङ्गदधरो नित्यं देवलोके महीयते ।
तृतीयं पारणं प्राप्य द्वादशाहफलं लभेत् । वसत्यमरसङ्काशो वर्षाण्ययुतशो दिवि ।
चतुर्थे वाजपेयस्य पञ्चमे द्विगुणं फलं । उदितादित्यसङ्काशं ज्वलन्तमनलोपमं ।
विमानं विबुधैः सार्द्धमारुह्य दिवि गच्छति । वर्षायुतानि भवने शक्रस्य दिवि मोदते । १६१७०
षष्ठे द्विगुणमस्तीह सप्तमे त्रिगुणं फलं । कैलासशिखराकारं वैदूर्य्यमयवेदिकं ।
परिक्षिप्तञ्च बहुधा मणिविद्रुमभूषितं । विमानं समधिष्ठाय कामगं साप्सरोगणं ।
सर्व्वान् लोकान् विचरति द्वितीय इव भास्करः । अष्टमे राजसूयस्य पारणे लभते फलं ।
चन्द्रोदयनिभं रम्यं विमानमधिरोहति । चन्द्ररश्मिप्रतीकाशैर्हयैर्युक्तं मनोजवैः ।
सेव्यमानो वरस्त्रीणां चन्द्रात्कान्ततरैर्मुखैः । मेखलानां निनादेन नूपुराणाञ्च निस्वनैः । १६१७५
अङ्के परमनारीणां सुखसुप्तो विबुध्यते । नवमे क्रतुराजस्य वाजिमेधस्य भारत ।
काञ्चनस्तम्भनिर्व्यूहं वैदूर्य्यकृतवेदिकं । जाम्बूनदमयैर्दिव्यैर्गवाक्षैः सर्व्वतो वृतं ।
सेवितं चाप्सरःसंघैर्गन्धर्व्वैर्दिविचारिभिः । विमानं समधिष्ठाय श्रिया परमया ज्वलन् ।
दिव्यमाल्याम्बरधरो दिव्यचन्दनरूषितः । मोदते दैवतैः सार्द्धं दिवि देव इवापरः ।
दशमं पारणं प्राप्य द्विजातीनभिवन्द्य च । किङ्किणीजालनिर्घोषं पताकाध्वजशोभितं । १६१८०
वसुवेदिकसंकाशं वैदूर्य्यमणितोरणं । हेमजालपरिक्षिप्तं प्रवालवडभीमुखं ।
गन्धर्व्वैर्गीतकुशलैरप्सरोभिश्च शोभितं । विमानं सुकृतावासं सुखेनैवोपपद्यते ।
मुकुटेनार्कवर्णेन जाम्बूनदविभूषिणा । दिव्यचन्दनदिग्धाङ्गो दिव्यमाल्यविभूषितः ।
दिव्यान् लोकान् विचरति दिव्यैर्भोगैः समन्वितः । विबुधानां प्रसादेन श्रिया परमया युतः ।
अथ वर्षगणानेवं स्वर्गलोके महीयते । ततो गन्धर्व्वसहितः सहस्राण्येकविंशतिं । १६१८५
पुरन्दरपुरे रम्ये शक्रेण सह मोदते । दिव्ययानविमानेषु लोकेषु विविधेषु च ।
दिव्यनारीगणाकीर्णे निवसत्यमरो यथा । ततः सूर्य्यस्य भवने चन्द्रस्य भवने तथा ।
शिवस्य भवने राजन् विष्णोर्याति सलोकतां । एवमेतन्महाराज नात्र कार्य्या विचारणा ।
श्रद्दधानेन वै भाव्यमेवमाह गुरुर्मम । लेखकस्य तु दातव्यं मनसा यद्यदिच्छति ।
हस्त्यश्वरथयानानि वाहनञ्च विशेषतः । कटके कुण्डले चैव ब्रह्मसूत्रं तथाऽपरं । १६१९०
वस्त्रञ्चैव विचित्रञ्च गन्धञ्चैव विशेषतः । देववत्पूजयेत्तन्तु विष्णुलोकमवाप्नुयात् ।
अतः परं प्रवक्ष्यामि यानि देयानि भारते । वाच्यमाने तु विप्रेभ्यो राजन् पर्व्वणि पर्व्वणि ।
जातिं देशञ्च सत्त्वञ्च माहात्म्यं भरतर्षभ । धर्म्मवृत्तिञ्च विज्ञाय क्षत्रियाणां नराधिप ।
स्वस्ति वाच्य द्विजानादौ ततः कार्य्यं प्रवर्त्तते । समाप्ते पर्व्वणि ततः स्वशक्त्या पूजयेद्द्विजान् ।
आदौ तु वाचकं तत्र वस्त्रगन्धसमन्वितं । विधिवद्भोजयेद्राजन् मधुपायससुत्तमं । १६१९५

ततो मूलफलप्रायं पायसं मधुसर्पिषा । आस्तीके भोजयेद्राजन् दद्याच्चैव गुडौदनं ।
अपूपैश्चैव पूपैश्च मोदकैश्च समन्वितं । सभापर्व्वणि राजेन्द्र हविष्यं भोजयेद्द्विजान् ।
आरण्यके मूलफलैस्तर्पयेत्तु द्विजोत्तमान् । अरणीपर्व्व चासाद्य जलकुम्भान् प्रदापयेत् ।
तर्पणानि च मुख्यानि वन्यमूलफलानि च । सर्व्वकामगुणोपेतं विप्रेभ्योऽन्नं प्रदापयेत् ।
विराटपर्व्वणि तथा वासांसि विविधानि च । उद्योगे भरतश्रेष्ठ सर्व्वकामगुणान्वितं ।
भोजनं भोजयेद्विप्रान् गन्धमाल्यैरलङ्कृतान् । भीष्मपर्व्वणि राजेन्द्र दत्त्वा यानमनुत्तमं ।
ततः सर्व्वगुणोपेतमन्नं दद्यात् सुसंस्कृतं । द्रोणपर्व्वणि विप्रेभ्यो भोजनं परमार्च्चितं ।
शराश्च देया राजेन्द्र चापान्यसिवरास्तथा । कर्णपर्व्वण्यपि तथा भोजनं सार्व्वकामिकं ।
विप्रेभ्यः संस्कृतं सम्यक् दद्यात् संयतमानसः । शल्यपर्व्वणि राजेन्द्र मोदकैः सगुडौदनैः ।
अपूपैस्तर्पणैश्चैव सर्व्वमन्नं प्रदापयेत् । गदापर्व्वण्यपि तथा मुद्गमिश्रं प्रदापयेत् ।
स्त्रीपर्व्वणि तथा रत्नैस्तर्पयेत्तु द्विजोत्तमान् । घृतौदनं पुरस्ताच्च ऐषीके दापयेत् पुनः ।
ततः सर्व्वगुणोपेतमन्नं दद्यात् सुसंस्कृतं । शान्तिपर्व्वण्यपि तथा हविष्यं भोजयेद्द्विजान् ।
आश्वमेधिकमासाद्य भोजनं सार्व्वकामिकं । तथाश्रमनिवासे तु हविष्यं भोजयेद्द्विजान् ।
मौषले सार्व्वगुणिकं गन्धमाल्यानुलेपनं । महाप्रास्थानिके तद्वत् सर्व्वकामगुणान्वितं ।
स्वर्गपर्व्वण्यपि तथा हविष्यं भोजयेद्द्विजान् । हरिवंशसमाप्तौ तु सहस्रं भोजयेद्द्विजान् ।
गामेकां निष्कसंयुक्तां ब्राह्मणाय निवेदयेत् । तदर्द्धेनापि दातव्या दरिद्रेणापि पार्थिव ।
प्रतिपर्व्वसमाप्तौ तु पुस्तकं वै विचक्षणः । सुवर्णेन च संयुक्तं वाचकाय निवेदयेत् ।
हरिवंशपर्व्वणि च पायसं तत्र भोजयेत् । पारणे पारणे राजन् यथावद्भरतर्षभ ।
समाप्य सर्व्वाः प्रयतः संहिताः शास्त्रकोविदः । शुभे देशे निवेश्याथ क्षौमवस्त्राभिसंवृताः ।
शुक्लाम्बरधरः स्रग्वी शुचिर्भूत्वा स्वलङ्कृतः । अर्च्चयेत यथान्यायं गन्धमाल्यैः पृथक् पृथक् ।
संहितापुस्तकान् राजन् प्रयतः सुसमाहितः । भक्ष्यैर्माल्यैश्च पेयैश्च कामैश्च विविधैः शुभैः ।
हिरण्यं गाश्च वस्त्रञ्च दक्षिणामथ दापयेत् । सर्व्वत्र त्रिपलं स्वर्णं दातव्यं प्रणतात्मना ।
तदर्द्धं पादशेषं वा वित्तशाठ्यविवर्ज्जितं । यद्यदिष्टतमं लोके यच्चात्मनोऽभीष्टं तत्तद्देयं द्विजातये ।
सर्व्वथा तोषयेद्भक्त्या वाचकं गुरुमात्मनः । देवताः कीर्त्तयेत् सर्व्वा नरनारायणौ तथा ।
ततो गन्धैश्च माल्यैश्च स्वलङ्कृत्य द्विजोत्तमान् । तर्पयेद्विविधैः कामैर्दानैश्चोच्चावचैस्तथा ।
अतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः । प्राप्नुयाच्च क्रतुफलं तथा पर्व्वणि पर्व्वणि ।
वाचको भरतश्रेष्ठ व्यक्ताक्षरपदस्वरः । भविष्यं श्रावयेद्विद्वान् भारतं भरतर्षभ ।
भुक्तवत्सु द्विजेन्द्रेषु यथावत् सम्प्रपूजयेत् । वाचकं भरतश्रेष्ठ भोजयित्वा स्वलङ्कृतं ।
वाचके परितुष्टे तु शुभा प्रीतिरनुत्तमा । ब्राह्मणेषु तु तुष्टेषु प्रसन्नाः सर्व्वदेवताः ।
ततो हि वरणं कार्य्यं द्विजानां भरतर्षभ । सर्व्वकामैर्यथान्यायं साधुभिश्च यथाक्रमं ।

इत्येष विधिरुद्दिष्टो मया ते द्विपदाम्बर । श्रद्दधानेन वै भाव्यं यन्मां त्वं परिपृच्छसि ।
भारतश्रवणे राजन् पारणे च नृपोत्तम । सदा यत्नवता भाव्यं श्रेयस्तु परमिच्छता ।
भारतं शृणुयान्नित्यं भारतं परिकीर्त्तयेत् । भारतं भवने यस्य तस्य हस्तगतो जयः ।
भारतं परमं पुण्यं भारते विविधाः कथाः । भारतं सेव्यते देवैर्भारतं परमं पदं ।
भारतं सर्व्वशास्त्राणामुत्तमं भरतर्षभ । भारतात् प्राप्यते मोक्षस्तत्त्वमेतद्ब्रवीमि ते । १६११०
महाभारतमाख्यानं क्षितिं गाश्च सरस्वतीं । ब्राह्मणान् केशवञ्चैव कीर्त्तयन्नावसीदति ।
वेदे रामायणे पुण्ये भारते भरतर्षभ । आदौ चान्ते च मध्ये च हरिः सर्व्वत्र गीयते ।
यत्र विष्णुकथा दिव्याः श्रुतयश्च सनातनाः । तच्छ्रोतव्यं मनुष्येण परं पदमिहेच्छता ।
एतत् पवित्रं परममेतद्धर्म्मनिदर्शनं । एतत् सर्व्वगुणोपेतं श्रोतव्यं भूतिमिच्छता ।
क्रियतेऽसारसंसारे वाञ्छितस्यैककारणं । हरिवंशस्य श्रवणमिति द्वैपायनोऽब्रवीत् । १६११५
अश्वमेधसहस्रेण वाजपेयशतैस्तथा । यत्फलं प्राप्यते पुंसा तद्धरिवंशपारणात् ।
अजरममरमेकं ध्येयमाद्यन्तशून्यं सगुणमगुणमाद्यं स्थूलमत्यन्तसूक्ष्मं । निरुपममनुमेयं योगिनां ज्ञानगम्यं त्रिभुवनगुरुमीशं त्वां प्रपन्नोऽस्मि विष्णो ।
सर्व्वस्तरतु दुर्गाणि सर्व्वो भद्राणि पश्यतु । सर्व्वेषां वाञ्छिता अर्था भवन्त्वस्य च पारणात् ।
इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि सर्व्वपर्व्वानुकीर्त्तने त्रयोविंशत्यधिकद्विशततोऽध्यायः ॥ २२३ ॥
॥ जनमेजय उवाच ॥ त्र्यम्बकाद्वधमहं ब्रह्मन् श्रोतुमिच्छामि तत्त्वतः । त्रयाणां पुरसंज्ञानां खेचराणां समासतः ।
॥ वैशम्पायन उवाच ॥ शृणु विस्तरतः सर्व्वं यन्मां पृच्छसि नैधनं । दैत्यानां बाहुबलिनां सर्व्वप्राणिविरोधिनां । १६१
शङ्करेण वधं राजन् शरैस्त्रिभिरजिह्मगैः । कृतं पुराऽसुरेन्द्राणां सर्व्वभूतवधैषिणां ।
त्रिपुरं पुरुषव्याघ्र ब्रह्मणा तु समीरितं । विक्रामति नभोमध्ये मेघवृन्दमिवोद्यतं ।
प्राकारेण प्रवृद्धेन काञ्चनेन विराजता । मणिभिश्च प्रकाशद्भिः सर्व्वरत्नैश्च तोरणैः ।
बभासे नभसो मध्ये श्रिया परमया ज्वलत् । गन्धर्व्वाणामिवोदग्रं कर्म्मणा साधितं पुरं ।
वाजिनः पक्षसंयुक्ता वहन्ति बलदर्पिताः । पुरं प्रभाकरं श्रेष्ठं मनोभिः कामचारिणः । १६१२५
धावन्तो हेषमाणाश्च विक्रमैः प्राणसंभृतैः । आक्रमन्त इवाकाशं खुरैः शष्पदलप्रभैः ।
वायुवेगसमैर्वेगैः कम्पयन्त इवाम्बरं । सर्व्वतः समदृश्यन्त चक्षुर्भिर्विदितात्मभिः ।
ऋषिभिर्ज्वलनप्रख्यैस्तपसा दग्धकिल्बिषैः । गीतवादित्रबहुलं गन्धर्व्वनगरोपमं ।
चित्रायुधसमाकीर्णैः प्रतप्तकनकप्रभैः । भवनैर्बहुवर्णैश्च प्रांशुभिः समलङ्कृतैः ।
देवेन्द्रभवनाकारैः शुशुभे तन्महाद्युति । प्रासादाग्रैः प्रवृद्धैश्च कैलासशिखरप्रभैः । १६१३०
शुशुभे दैत्यनगरं बहुसूर्य्यमिवाम्बरं । चयाट्टालकसम्पन्नं तप्तकाञ्चनसप्रभं ।
क्ष्वेडितोत्कृष्टबहुलं सिंहनादविनादितं । बभौ दनुजनाकीर्णं वनं चैत्ररथं यथा ।
समुद्धूतपताकं तदसिभिश्च विराजितं । रराज त्रिपुरं राजन् महाविद्युदिवाम्बरे ।

सूर्य्यनाभश्च विक्रान्तश्चन्द्रनाभश्च भारत। तथाऽन्ये च महावीर्य्या दानवा बलदर्पिताः।
मन्दस्य बभञ्जुश्च मोहिताः परमेष्ठिना। पन्थानं देवगमनं पितृयानञ्च भारत। १२८८५
तैरेवमसुराग्र्यैस्तु प्रगृहीतशरासनैः। दानवैर्नरशार्दूल देवयाने महापथे।
पितृवह्निबलोपेते हृते भरतसत्तम। ब्रह्माणमभ्यधावन्त सर्व्वे सुरगणास्तथा।
विवर्णवदना दीनाश्छिन्ने च गतिकर्म्मणि। अभुंञ्जाग्रतः स्थित्वा स्वरेणार्त्तनिनादिना।
हन्यामहे शत्रुगणैर्भागोच्छेदेन भागद। तेषाञ्चैव बधोपायं वदस्व वदताम्बर।
यं ज्ञात्वा बाहुबलिनो बधेम समरे परान्। सान्त्वयित्वाऽथ वरदो ब्रह्मा प्रोवाच देवताः। १२८९०
शृणुध्वं देवताः सर्व्वाः शत्रुप्रतिकृतिं परां। अबध्या दानवाः सर्व्वे ऋते शङ्करमव्ययं।
प्रतिगृह्य च तद्वाक्यं मनोभिर्वाग्भिरेव च। भूमौ प्रपेदिरे सर्व्वे सहरुद्रैश्च भारत।
विन्ध्यपादे च मेरौ च मध्ये च पृथिवीतले। तपसा येन योगज्ञाः सर्व्वे ते मुनयो नृप।
काश्यपेया हरं प्राप्ता जपन्तो ब्रह्मसंहितां। तेषां परमनारीणामभवद्वन्ध्यता जने।
विन्यस्तदर्भनिचये तास्तं लोकस्य भूषणं। परिधानानि चर्म्माणि मृदूनि च शुभानि च। १२८९५
रुरूणां कृष्णानां मृगाणां कुरुसत्तम। गृहीतानि विमुक्तानि देहेभ्यो वनचारिणां।
अन्तरीक्षमथोपेत्य विविधैर्मायया कृताः। हरालयं सुराः सर्व्वे व्याघ्रचर्म्मनिवासिनः।
प्रणिपत्याथ ते दीना भगवन्तं जगत्पतिं। सुव्यक्तेनाभिधानेन प्रभाषन्ते हरं ततः।
हविर्दत्तमिवाज्ञानाद्भस्मच्छन्नेषु वह्निषु। वरदानं कृथाऽस्मासु भगवन् विमुखे त्वयि।
यथादेशं यथाकालं क्रियतां ब्रह्मणो वचः। यदुक्तं देवदेवेन खेचराणां समीपतः। १२९००
एवं देववचोभिश्च भाविनोऽर्थस्य वै बलात्। ससन्नह्यन्महादेवो देवैः सह सवासवैः।
आदित्या रथमास्थाय सन्नद्धाः समलङ्कृताः। सर्व्वे काञ्चनवर्णाभा बभुर्दीप्ता इवाग्नयः।
रुद्रेण सहिता रुद्रा दहन्त इव तेजसा। सन्नद्धाश्चारुमुकुटाः प्रांशवः पर्व्वता इव।
विश्वे विश्वेन वपुषा बलिनः कामरूपिणः। ससन्नह्यन्महात्मानो दानवान्तं विधित्सवः।
एभिः सह बलाध्यक्षैः समन्तात् परिवारितः। त्रिपुरं योधयन्त्र्यक्षः प्रगृह्य सशरं धनुः। १२९०५
अथ दैत्या भिन्नदेहाः पुराट्टालगता इव। न्यपतन् भुवि देहैस्ते विशीर्णा इव पर्व्वताः।
अतिविद्धाः सुविद्धाश्च चर्य्याट्टालगता नृप। न्यपतन् दैत्यसंघाश्च वज्रेणेव हता नगाः।
असिभिश्च हता देवैः शक्तिचक्रपरश्वधैः। बाणैश्च भिन्नमर्म्माणो दैत्येन्द्रा युद्धगोचरे।
प्रपेतुः सहिता उर्व्यां छिन्नपक्षा इवाचलाः। तत्र संज्ञां व्यमुञ्चन्त तेन दीप्तेन तेजसा।
एवं तेऽन्योन्यसंबाधे क्लीयन्ते चयकर्म्मणा। नोपालभ्यन्त चक्षुर्भ्यामपि दिव्येन चक्षुषा। १२९१०
अस्तं प्राप्ते दिनकरे सुरेन्द्रास्ते निशामुखे। छिन्नभिन्नक्षतमुखा निपेतुर्व्वसुधातले।
अथ दैत्या जयं प्राप्ता निशायां निशितैः शरैः। विनेदुर्विपुलैर्नादैर्मेघा इव महारवाः।
जयं प्राप्यासुराश्चैव तेऽन्योन्यमभिजल्पिरे। त्रासितास्त्रिदशाः सर्व्वे संग्रामे जयकाङ्क्षिणः।

अस्माभिर्बलसम्पन्नैः सह प्रासासितोमरैः । विरेजुश्च जयं प्राप्ता उत्तमोत्कर्षबोधिताः ।
समरे बलसम्पन्नाः सायुधा दैत्यसत्तमाः । सुरैश्च सहितः सर्व्वैरथमास्थाय शङ्करः ।
दर्पितानभिनद्दैत्यान् प्रभिन्दन्निव वै दिशः । युगान्तकाले विततो रश्मिजालानिव निर्द्दहन् ।
सर्व्वभूतानि भूतात्मा प्रलये समुपस्थिते । स रथे वाजिभिः शीघ्रैरुह्यमानो मनोजवैः ।
विबभौ नभसो मध्ये सविद्युदिव तोयदः । वृषभेण ध्वजाग्रेण गर्जमानेन भारत ।
भाति स्म स रथो राजन् सेन्द्रायुध इवाम्बुदः । ततोऽम्बरगताः सिद्धास्तुष्टुवुर्वृषभध्वजं ।
कर्म्मभिः पूर्व्वजं पूर्व्वैः शुचिभिस्त्र्यम्बकं तदा । ऋषयश्च तपःश्रान्ताः सत्यव्रतपरायणाः ।
अमृतप्राशिनश्चैव सुरसंघाः सहस्रशः । गन्धर्व्वाश्चोपगायन्ति गान्धर्व्वेण स्वरेण वै ।
प्रहृष्टवदनाः सौम्याः पैशे स्थानान्तरे नृप । सयाट्टालकसंपन्ने शतघ्नीशतसंकुले ।
तस्मिंस्तु दैत्यनगरे सर्व्वभूतभयावहे । ततस्तु शरवर्षाणि मुमुचुर्दैत्यदानवाः ।
सुराणामरयो मध्ये तीक्ष्णाग्राणि समन्ततः । शतघ्नीभिश्च निघ्नन्तो भल्लैः शूलैश्च भारत ।
ते चक्रिरे महत् कर्म्म दानवा युद्धकोविदाः । गदाभिश्च गदा जघ्नुर्भल्लैर्भल्लांश्च चिच्छिदुः ।
अस्त्रैरस्त्राण्यबाधन्त मायां मायाभिरेव च । ततोऽपरे समुद्यम्य शरशक्तिपरश्वधान् ।
अशनीश्च तथा घोरान् मुक्तान् शतसहस्रशः । असिभिर्म्मायाविहितैर्म्मर्त्त्यैर्विषयगोचरैः ।
ते बध्यमाना विबुधाः शरवर्षैरवस्थिताः । गन्धर्व्वनगराकारः सोऽसीदत् सहरो रथः ।
हन्यमानोऽसुरगणैः शार्ङ्गैः प्रासासितोमरैः । दैत्यप्रहरणैस्तैश्च गुरुभिर्भारसाधिभिः ।
चित्रैश्च बहुभिः शस्त्रैरतिष्ठत शचीपतिः । ततो मध्ये दिव्यशब्दः प्रादुरासीन्महीपते ।
ऋषीणां ब्रह्मपुत्त्राणां महतामपि भारत । स एष शङ्करस्याग्र्ये रथो भूमिं प्रतिष्ठितः ।
अजेयो जय्यतां प्राप्तः सर्व्वलोकस्य पश्यतः । तस्मिन्निपतिते राजन् रथानां प्रवरे रथे ।
निपेतुः सर्व्वभूतानि वसुधां वसुधाधिप । विचेलुः पर्व्वताग्राणि चेलुश्चैव महाद्रुमाः ।
विचुक्षुभुः समुद्राश्च न रेजुश्च दिशो दश । वृद्धाश्च ब्राह्मणास्तत्र जजपुः परमं जपं ।
यत्तद्ब्रह्ममयं तेजः सर्व्वत्र विजयैषिणां । शान्त्यर्थं सर्व्वभूतानामिह लोके परत्र च ।
समाधायात्मनात्मानं योगप्राप्तेन हेतुना । रथन्तरेण साम्नाऽथ ब्रह्मभूतेन भारत ।
तेजसा ज्वलयन् विष्णोस्त्र्यक्षस्य च महात्मनः । सर्व्वेषाञ्चैव देवानां बलिनां कामरूपिणां ।
ऋषीणां तपसाढ्यानां वसतां विजने वने । अथ विष्णुर्म्महायोगी सर्व्वतोदृश्यतत्त्ववित् ।
वृषरूपं समास्थाय प्रोज्जहार रथोत्तमं । समाक्रान्तं देवगणैः समग्रबलपौरुषैः ।
बलवांस्तोलयित्वा तु विषाणाभ्यां महाबलः । ननाद प्राणयोगेन मथ्यमान इवार्णवः ।
तृतीयं वायुविषयं समाक्रम्य विषाणवान् । ननाद बलवन्नादं समुद्र इव पर्व्वणि ।
ततो नादेन वित्रस्ता दैतेया युद्धदुर्म्मदाः । पुनस्ते कृतसन्नाहा युयुधुः सुमहाबलाः ।
सर्व्वे वै बाहुशालिनः समर्थबलपौरुषाः । सुरसैन्यं प्रमर्द्दन्तः प्रगृहीतशरासनाः ।

अग्निमन्धाय धनुषि तस्य बाणं सुपचितं। ब्रह्मास्त्रेणाभिसंयोज्य ब्रह्मदण्डं शिवोऽव्ययः।
मुमुचे दैत्यनगरे त्रिधा शब्देन संश्रितं। तं बाणं त्रिविधं वीर्य्यात् सन्धाय मनसा प्रभुः। १२२११
सत्येन ब्रह्मयोगेन तपसोग्रेण भारत। मुमुचे दैत्यनगरे सर्व्वप्राणहरान् शरान्।
दीप्तान् कनकवर्णाभान् सुपर्णांश्च सुनिर्म्मलान्। मुक्ता शरवरान् घोरान् स विषानिव पन्नगान्।
सुप्रदीप्तैस्त्रिभिर्बाणैर्वेगिभिस्तद्विदारितं। शतघातप्रदीप्तानि विन्ध्याग्राणीव भारत।
गोपुराणि पुरैः सार्द्धं दह्यमानानि भारत। विशीर्य्यन्त इवाभान्ति मनुजेन्द्र धराधराः।
अग्निना संप्रदीप्तानि वज्रगर्भाणि भारत। धरणीं संप्रपद्यन्त पुराणि वसुधाधिप। १२२२०
तानि वैदूर्य्यवर्णानि शिखराणि गिरेरिव। शङ्करेण प्रदग्धानि ब्रह्मास्त्रेणापतन्नृप।
हते च त्रिपुरे देवैर्वाचो हर्षात् किलेरिताः। सर्व्वान् जहोति शत्रूंस्त्वं प्रवृद्धान् पुरुषोत्तम।
विष्णुरेव महायोगी योगेन प्रशमयन्निव। स्तूयते ब्रह्मसदृशैर्महर्षिभिः शङ्करेण च।
ब्रह्मणा सहितैर्देवैः सम्पन्नबलपौरुषैः।

इति श्रीमहाभारते खिलेषु हरिवंशे भवष्यपर्व्वणि त्रिपुरवधे चतुर्विंशत्यधिकत्रिशततमोऽध्यायः॥ ३२४॥

॥ वैशम्पायन उवाच॥ हरिवंशेऽत्र वृत्तान्ताः कीर्त्त्यन्ते क्रमशोदिताः। तत्राद्यमादिसर्गस्तु भूतसर्गस्ततः परः। १२२२५
पृथोर्वैण्यस्य चाख्यानं मनूनां कीर्त्तनं तथा। वैवस्वतकुलोत्पत्तिर्द्धुन्धुमारकथा तथा।
गालवोत्पत्तिरिक्ष्वाकुवंशस्याप्यनुकीर्त्तनं। पितृकल्पस्तथोत्पत्तिः सोमस्य च बुधस्य च।
अमावसोरन्वयस्य कीर्त्तनं कीर्त्तिवर्द्धनं। द्युतिप्रतिष्ठे शक्रस्य प्रसवः क्षत्रवृद्धिजः।
दिवोदासप्रतिष्ठा च त्रिशङ्कोः क्षत्त्रियस्य च। ययातिचरितञ्चैव पुरुवंशस्य कीर्त्तनं।
कीर्त्तनं कृष्णसम्भूतेः स्यमन्तकमणेस्तथा। सङ्क्षेपात् कीर्त्तिता विष्णोः प्रादुर्भावास्ततः परं। १२२३०
तारकामययुद्धञ्च ब्रह्मलोकस्य वर्णनं। योगनिद्रासमुत्थानं विष्णोर्वाक्यञ्च वेधसः।
पृथ्वीवासश्च देवानामंशावतरणं तथा। ततो नारदवाक्यञ्च स्वप्नगर्भविधिस्तथा।
आर्य्यास्तवः पुनः कृष्णसमुत्पत्तिः प्रपञ्चतः। गोव्रजे गमनं विष्णोः शकटस्य निवर्त्तनं।
पूतनाया बधो भङ्गो यमलार्ज्जुनयोरपि। वृकसन्दर्शनञ्चैव वृन्दावननिवेशनं।
प्रावृषो वर्णनञ्चापि यमुनाह्रददर्शनं। कालियस्यापि दमनं धेनुकस्य बधस्तथा। १२२३५
प्रलम्बनिधनञ्चैव शरद्वर्णनमेव च। गिरियज्ञप्रवृत्तिश्च गोवर्द्धनविधारणं।
गोविन्दस्याभिषेकञ्च गोपीसंक्रीडनं तथा। रिष्टासुरस्य निधनमक्रूरप्रेषणं तथा।
अन्धकस्य च वाक्यानि केशिनो निधनं तथा। अक्रूरागमनञ्चैव नागलोकस्य दर्शनं।
धनुर्भङ्गस्य कथनं कंसवाक्यमतः परं। कुवलयापीडबधश्चाणूरान्ध्रबधस्तथा।
कंसस्य निधनञ्चापि विलापः कंसयोषितो। उग्रसेनाभिषेकश्च यादवाश्वासनन्तथा। १२२४०
प्रत्यागतिर्गुरुकुलाद् योक्ता रामकृष्णयोः। मथुरायाश्चोपरोधो जरासन्धनिवर्त्तनं।
चिक्रद्रुव्याक्यं रामस्य दर्शनं भाषणं तथा। गोमन्तारोहणञ्चापि जरासन्धगतिस्तथा।

गोमन्तस्य गिरेर्दाहः करवीरपुरे गतिः । शृगालस्य बधस्तत्र मथुरागमनं ततः ।
यमुनाकर्षणञ्चैव मथुरापक्रमं तथा । उपायेन बधः कालयवनस्य प्रकीर्त्तितः ।
निर्म्माणं द्वारवत्यास्तु रुक्मिणीहरणं तथा । विवाहश्चैव रुक्मिण्या रुक्मिणो निधनं तथा । ११९४५
बलदेवाह्निकं पुण्यं बलमाहात्म्यमेव च । नरकस्य बधः पारिजातस्य हरणं तथा ।
निकुम्भस्य बधाख्यानं प्रपञ्चेनैव कीर्त्तितं । प्रभावत्याश्च हरणं वज्रनाभबधस्तथा ।
द्वारवत्या विशेषेण पुनर्निर्म्माणकीर्त्तनं । द्वारकायां प्रवेशश्च सभायाश्च प्रवेशनं ।
नारदस्य च वाक्यानि वृष्णिवंशानुकीर्त्तनं । षट्पुरस्य बधाख्यानमन्धकस्य निबर्हणं ।
समुद्रयात्रा कृष्णस्य जलक्रीडाकुतूहलं । तथा भैमप्रवीराणां मधुपानप्रवर्त्तनं । ११९५०
ततश्छालिक्यगान्धर्व्वमुदाहरणं हरेः । भानोश्च दुहितुर्भानुमत्या हरणकीर्त्तनं ।
शम्बरस्य बधश्चैव धन्योपाख्यानमेव च । वासुदेवस्य माहात्म्यं बाणयुद्धं प्रपञ्चितं ।
भविष्यं पुष्करञ्चैव प्रपञ्चेनैव कीर्त्तितं । वाराहं नारसिंहञ्च वामनं बहुविस्तरं ।
कैलासयात्रा कृष्णस्य पौण्ड्रकस्य बधस्ततः । हंसस्य डिम्भकस्यैव बधश्चैव प्रकीर्त्तितः ।
पुरत्रयस्य संहार इति वृत्तान्तसंग्रहः । कथितो नृपशार्दूल सर्व्वपापप्रणाशनः । १
वृत्तान्तं शृणुयाद्यस्तु सायम्प्रातः समाहितः । स याति वैष्णवं धाम लब्धकामः कुरूद्वह ।
धन्यं यशस्यमायुष्यं भुक्तिमुक्तिफलप्रदं ।

इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्व्वणि हरिवंशवृत्तान्तसंग्रहे पञ्चविंशत्यधिकत्रिशततमोऽध्यायः ॥ ३२५ ॥

॥ जनमेजय उवाच ॥ हरिवंशे पुराणे तु श्रुते मुनिवरोत्तम । किं फलं किञ्च देयं वै तद्ब्रूहि त्वं समागतः ।
॥ वैशम्पायन उवाच ॥ हरिवंशे पुराणे तु श्रुते च भरतोत्तम । कायिकं वाचिकञ्चैव मनसा यदुपार्ज्जितं ।
तत्सर्व्वं नाशमायाति हिमं सूर्य्योदये यथा । अष्टादशपुराणानां श्रवणाद्यत् फलं लभेत् । ११९६०
तत्फलं समवाप्नोति वैष्णवो नात्र संशयः । श्लोकार्द्धं श्लोकपादं वा हरिवंशसमुद्भवं ।
शृण्वन्ति श्रद्धया युक्ता वैष्णवं पदमाप्नुयुः । जम्बूद्वीपं समाश्रित्य श्रोतारो दुर्लभाः कलौ ।
भविष्यन्ति नरा राजन् सत्यं सत्यं वदाम्यहं । स्त्रीभिश्च पुत्रकामाभिः श्रोतव्यं वैष्णवं यशः ।
दक्षिणा चात्र देया वै निष्कत्रयसुवर्णकं । वाचकाय यथाशक्त्या यथोक्तफलमिच्छता ।
स्वर्णशृङ्गीञ्च कपिलां सवत्सां वस्त्रसंयुतां । वाचकाय प्रदद्याद्वै आत्मनः श्रेयकाङ्क्षया । ११९६५
अलङ्कारं प्रदद्याच्च पारणे भरतर्षभ । कर्णस्याभरणं दद्याद्दानञ्च सविशेषतः ।
भूमिदानं समादद्याद्ब्राह्मणाय नराधिप । भूमिदानसमं दानं न भूतं न भविष्यति ।
शृणोति श्रावयेद्वाऽपि हरिवंशन्तु यो नरः । सर्व्वपापविनिर्मुक्तो वैष्णवं पदमाप्नुयात् ।
पितॄनुद्धरते सर्व्वानेकादश समुद्भवान् । आत्मानं ससुतञ्चैव स्त्रियञ्च भरतर्षभ ।
दशांशश्चात्र होमो वै कार्य्यः श्रोत्रा नराधिप । इदं मया तवाग्रे च सर्व्वं प्रोक्तं नरर्षभ । ११९७०
स्य श्रवणमात्रेण सर्व्वपापैः प्रमुच्यते । अपुत्त्रः पुत्त्रमाप्नोति अधनो धनमाप्नुयात ।

नरमेधाश्वमेधाभ्यां यत्फलं प्राप्यते नरैः । तत् फलं लभते नूनं पुराणश्रवणान्नरः ।

ब्रह्महा भ्रूणहा गोघ्नः सुरापो गुरुतल्पगः । सकृत्पुराणश्रवणात् पूतो भवति नान्यथा ।

इदं मया ते परिकीर्त्तितं महत् श्रीकृष्णमाहात्म्यमपारमद्भुतं । शृण्वन् पठन्वाप्यु समाप्नुयात् फलं यच्चापि लोकेषु सुदुर्लभं महत् ।

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां खिलेषु हरिवंशे भविष्यपर्व्वणि हरिवंशश्रवणफलकीर्त्तने षड्विंशत्यधिकत्रिशतोऽध्यायः ॥ ३२६ ॥

॥ समाप्तोऽयं खिलसंज्ञको हरिवंशभट्टारकः ॥

॥ समाप्ता चेयं महाभारतसंहिता ॥

अत्र व्यासोक्ताध्यायश्लोकसंख्यान्यूनाधिक्यं लिपिकरप्रमादात्तद्बोध्यं ॥